॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

श्रीमन्न्यायसुधा

परिमळाद्युपेता

संपुटम् – १

जिज्ञासाधिकरणम्

(आदितः ओङ्काराथशब्दयोः मङ्गलजनकत्वविषयपर्यन्तम्)

पुटसंख्या १ तः ४८०

प्रकाशनम्

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

॥ श्रीमद्भनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

श्रीमन्न्यायसुधा

परिमळाद्युपेता

संपुटम् – १

जिज्ञासाधिकरणम्

(आदितः ओङ्काराथशब्दयोः मङ्गलजनकत्वविषयपर्यन्तम्)

पुटसंख्या १ तः ४८०

प्रकाशनम्

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

श्रीमन्न्यायसुधा
परिमळाद्युपेता

संपुटम् – १

प्रथमं मुद्रणम् - ई.सन् २००३

Śrīman-Nyāyasudhā
Parimalādyupetā

Volume - 1

First Edition -2003 A.D.

स्वभानु संवत्सर, शके १९२५, ज्येष्ठ कृष्ण त्रयोदशी, शुक्रवासरः
श्रीविजयीन्द्रतीर्थश्रीपादानाम् आराधनामहोत्सवः

Published by :

Śrī Gurusārvabhauma Saṁskṛt Vidyāpīṭham
Śrī Rāghavendra Swāmy Mutt
Mantrālayam - 518 345
India.

* मुद्रकः *

वरखेडकरोपाह्वप्रद्युम्ननरसिंहयोः ।
पौत्रो धनंजयो न्यायसुधां मुद्रापयत्यसौ ॥

सुधा मुद्रणम्
शंकरपुरम्, बेंगळूरु - ५६० ००४
दूरवाणी– ६६७ ६९४२

SUDHA MUDRANA
Shankarpuram, Bangalore - 560 004
Phone : 667 6942

समर्पणपत्रिका

श्रीमत्परमहंसपरिव्राजकाचार्यत्वाद्यमन्दबिरुदवृन्दविभूषित-
सर्वतन्त्रस्वतन्त्र-श्रीमद्वैष्णवसिद्धान्तस्थापनाचार्य-
षड्दर्शनाचार्यवर्य-नास्तिकदर्शननिराकरणधुरन्धर-
आस्तिकदर्शनमहाचार्य-

श्रीमन्मध्वाचार्यसमलंकृत-

श्रीमद्द्वैतसाम्राज्यदिग्विजयविद्यासिंहासनाधीश्वराणां
परमपूज्यानां कामधेनुकल्पवृक्षसदृशानां

श्रीश्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमानां

हृत्कमलनिवासि-

श्रीरामकृष्णवेदव्यासाभिन्न-

श्रीमूलरघुपतिपादकमलयोः

समर्पितोऽयं ग्रन्थः ॥

सुजयीन्द्रकृपापूर्णसुशमीन्द्रयतीश्वरैः ।
श्रीमन्न्यायसुधाग्रन्थ अर्पितोऽयं मुदा हरेः ॥

॥ श्रीमन्मूलरामो विजयते ॥

श्रीमद्धंसनामकपरमात्मसमारब्धपरम्परागत-श्रीमत्परमहंसेत्यादिविरुदभूषित-
श्रीमदानन्दतीर्थभगवत्पादाचार्य-मूलमहासंस्थानाधीश्वर-
श्रीमद्राघवेन्द्रगुरुसार्वभौम-
वेदान्तसाम्राज्यदिग्विजयविद्यासिंहासनाधीश्वर-
श्रीमत्सुयमीन्द्रतीर्थश्रीपादकरकमलसञ्जात-
श्रीमत्सुजयीन्द्रतीर्थश्रीपादवरकुमारक-

श्री श्रीमत्सुशमीन्द्रतीर्थश्रीपादानाम्

अनुग्रहवचनम्

अस्मत्प्रियशिष्यान् तथैव अस्मन्मठीयान् नैकान् आस्थानविद्वज्जनान् वयं अस्मद्गुरुवराणां श्रीमत्सुजयीन्द्रतीर्थश्रीमच्चरणानामाज्ञामनुरुद्ध्य परिमलादि-बहुटिप्पणीभिर्युक्तां श्रीमन्न्यायसुधां संशोध्य प्रकाशयितुमादिष्टवन्तः स्मः।

अस्मदादेशमनुरुध्य ग्रन्थमिमं संशोध्य मुद्रणप्रतिमपि संशोधितवद्भ्यः प्रधानसंपादकेभ्यः वैकुण्ठवासिभ्यः श्री साणूरु भीमभट्टेभ्यः तथा ग्रन्थमिमं प्रकाशितवद्भ्यः श्रीगुरुसार्वभौमसंस्कृत-विद्यापीठीयेभ्यः एवं ग्रन्थसंशोधने तथा मुद्रणप्रतिसंशोधने सहायमाचरितवद्भ्यः अस्मद्विद्यापीठाध्यापकेभ्यः, तथाऽन्येभ्यो विद्वद्भ्यः, एवमल्पकाले सुष्ठु मुद्रणं कृतवद्भ्यः 'सुधा मुद्रण'नेतृभ्यः श्री धनंजयाचार्येभ्यः तथा सर्वेभ्यः एतद्ग्रन्थाध्ययन-अध्यापनादिकर्तृभ्यः अस्मदुपास्यः श्री श्रीमद्राघवेन्द्र-तीर्थगुर्वन्तर्गत-श्रीभारतीरमण-मुख्यप्राणान्तर्गतः श्रीसीतापतिः श्रीमूलरामचन्द्रदेवः इतोऽप्यतिशयिता-युरारोग्यैश्वर्यादीनि, ज्ञानभक्तिवैराग्यादीनि च दत्वा अनुगृह्णातु इत्याशास्महे।

इति नारायणस्मृतिः।

मन्त्रालयक्षेत्रम्,
स्वभानु संवत्सर
ज्येष्ठ कृष्ण त्रयोदशी

श्रीराघवेन्द्रस्वामिमठाधीशानां श्री श्री सुशमीन्द्रतीर्थश्रीपादानां वरकुमारकाणां

श्री श्री सुविद्येन्द्रतीर्थश्रीपादानां

परमानुग्रहपूर्वक मार्गदर्शनि संपादितोऽयं ग्रन्थः ।

* * *

श्री श्रीपादानां आज्ञानुसारेण ग्रन्थस्यास्य संशोधनादिकार्यं
तत्कालीन श्रीगुरुसार्वभौमसंस्कृतविद्यापीठाध्यक्षैः
श्री राजा एस्. गिरिआचार्यैः तथा तत्पुत्रैः **श्री राजा एस्. पवमानाचार्यैः**
कृतमिति विशेषरूपेण स्मर्यते ।

* * *

संपादकविद्वन्मंडली

प्रधानसंपादकाः

श्री आचार्य साणूरु भीमभट्टाः

आस्थानविद्वांसः, श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

संपादकाः

विद्वान् श्री कु. सुशीलेन्द्राचार्याः, *प्रांशुपालः श्री गु.सं.वि., मन्त्रालयः*

विद्वान् श्री कडपा राघवेन्द्राचार्याः

विद्वान् श्री पुराणिक सुब्रह्मण्याचार्याः

विद्वान् श्री एन्. वादिराजाचार्याः

विद्वान् श्री वरखेडकर भीमसेनाचार्याः

विद्वान् श्री डॉ. पुरोहित नरसिंहाचार्याः

निर्वाहकाः

श्रीपादपुत्राः राजा एस्. राजगोपालाचार्याः

श्री श्री सुशमीन्द्रतीर्थश्रीपादानां आप्तकार्यदर्शिनः, श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

॥ श्रीमन्मूलरामो विजयते ॥

प्रकाशकीयम्

द्वापरे श्रीगौतममहर्षिभिः शास्त्रेषु साधुजनेषु व्याकुलीभूतेषु श्रीब्रह्मरुद्रेन्द्रादिभिः प्रार्थितो भगवान्नारायणः श्रीवेदव्यासत्वेनावतीर्य राशीभूतान् वेदान् विभज्य, वेदार्थनिर्णायकानि (५६४) चतुःषष्टयधिकपञ्चशत-ब्रह्मसूत्राणि व्यरचयत्।

एषां ब्रह्मसूत्राणां श्रीवाय्ववतारिणः सर्वज्ञाः श्रीमदानन्दतीर्थभगवत्पादाः भाष्यं, श्रीमदनुव्याख्यानं, न्यायविवरणं, अणुभाष्यं चेति ग्रन्थचतुष्टयं विरचय्य महदुपाकुर्वन्।

श्रीमदाचार्याणां प्रियान्तेवासिनां श्रीत्रिविक्रमपण्डिताचार्याणां "व्यक्ततर्कततिं कुरु" इति प्रार्थनामनुरुध्य श्रीमदाचार्याः उपर्युक्तग्रन्थेष्वन्यतमं श्रीमदनुव्याख्यानग्रन्थं रचयामासुः।

अनुव्याख्यानस्यास्य इन्द्रांशसंभूताः श्रीमज्जयतीर्थश्रीमच्चरणाः श्रीमन्न्यायसुधानाम्नीं मेरुतुल्यामनुपमां टीकां व्यरचयन्।

ग्रन्थोऽयं चित्रपदपुञ्जमण्डितः, महागाम्भीर्यवान् महापण्डितवरेण्यानामपि महान्तं गर्वपर्वतं खण्डयितुं दक्षश्चकास्ति।

अस्यामोघस्य ग्रन्थस्य महत्त्वम् एतद्ग्रन्थस्य एतदीयानामनेकासां व्याख्यानां सङ्ख्यैव व्यञ्जयति।

	व्याख्यातारो महाभागाः	व्याख्यानस्य नाम
१)	श्री श्रीपादराजतीर्थाः	वाग्वज्रम्
२)	श्री विजयीन्द्रतीर्थाः	न्यायसुधाबिन्दुः
३)	श्री वादिराजतीर्थाः	गुर्वर्थदीपिका
४)	श्री राघवेन्द्रतीर्थाः	परिमलः
५)	श्री यदुपत्याचार्याः	टिप्पणी
६)	श्री वंशपल्ली श्रीनिवासाचार्याः	वाक्यार्थविवृतिः
७)	श्री गलगली नरसिंहाचार्याः	आनन्दः
८)	श्री कंबालूरु रामचन्द्रतीर्थाः	विवृतिः
९)	श्री श्रीनिधितीर्थाः	टिप्पणी
१०)	श्री विद्याधीशतीर्थाः	वाक्यार्थचन्द्रिका

११)	श्री पाण्डुरङ्गि नरसिंहाचार्याः	वाक्यार्थरत्नमाला
१२)	श्री पाण्डुरङ्गि केशवाचार्याः	शेषवाक्यार्थचन्द्रिका
१३)	श्री कुण्डलगिरि आचार्याः	रसकूलङ्कषः
१४)	श्री सत्यव्रततीर्थाः	सुधाविवृतिः
१५)	श्री सत्यनाथतीर्थाः	दुर्घटवाक्यार्थविचारः
१६)	श्री विट्ठलभट्टाः	टिप्पणी
१७)	श्री कल्लापूर सत्याधिराजाचार्याः	दुग्गि
१८)	श्री विष्णुतीर्थाः	रसरञ्जनी
१९)	श्री अडवि कृष्णाचार्याः	लघुरसरञ्जनी
२०)	श्री मन्नारि कृष्णाचार्याः	चषकः
२१)	श्री एरी बाळाचार्याः	उपस्पर्शः
२२)	श्री काशी तिम्मण्णाचार्याः	काशी टिप्पणी
२३)	श्री गूढकर्तृकटिप्पणीकाराः	टिप्पणी
२४)	श्री प्रदीपकाराः	प्रदीपः
२५)	श्री पांग्री श्रीनिवासाचार्याः	टिप्पणी
२६)	श्री रोट्टि वेङ्कटभट्टाः	सुधाविवृतिः
२७)	श्री ताम्रपर्णी आचार्याः	टिप्पणी
२८)	श्री उमर्जी प्रह्लादकृष्णाचार्याः	उमर्जी
२९)	श्री व्यासतत्त्वज्ञतीर्थाः	कुलिशम्
३०)	श्री महेश्वरसूरिः	टिप्पणी
३१)	श्री पुट्ट तंवि आचार्याः	टिप्पणी
३२)	श्री रत्नगर्भ ओडेयर्	टिप्पणी
३३)	श्री अनन्तभट्टाः	टिप्पणी
३४)	श्री सत्यनाथाचार्याः	टिप्पणी
३५)	श्री जयवेङ्कटाचार्याः	टिप्पणी
३६)	श्री गूढकर्तृकाचार्याः	सुधासारसङ्ग्रहः
३७)	श्री गलगली गोविन्दाचार्याः	पञ्चरत्नस्तवकः
३८)	श्री श्रीमुष्णाचार्याः	पञ्चाधिकरणी
३९)	श्री लिङ्केरि श्रीनिवासाचार्याः	सिद्धान्तप्रभा
४०)	श्री पाण्डुरङ्गि केशवाचार्याः	सुधावाक्यार्थविनोदः
४१)	श्री उडुपि राघवेन्द्रतीर्थाः (पुत्तिगे मठः)	टिप्पणी

४२)	श्री सत्यनाथाः	न्यायसुधापरशुः
४३)	श्री सुमतीन्द्रतीर्थाः	भावरत्नकोशः
४४)	श्री पाण्डुरङ्गि केशवाचार्याः	मञ्जरी
४५)	श्री व्यासतत्त्वज्ञतीर्थाः	लघुरसरञ्जनी
४६)	श्री व्यासतत्त्वज्ञतीर्थाः	गुरुरसरञ्जनी
४७)	श्री भीमराव् कुलकर्णी कुम्बारगेरी	टिप्पणी
४८)	श्री सत्यपराक्रमतीर्थाः	सुधाफक्किका
४९)	श्री हुलिगि श्रीपत्याचार्याः	टिप्पणी
५०)	श्री अहोबिलाचार्याः	टिप्पणी
५१)	श्री सत्यप्रज्ञतीर्थाः	टिप्पणी

एतादृशस्य अत्युत्तमग्रन्थस्य मुद्रणकार्यं श्रीमत्परमपूज्यानां प्रातःस्मरणीयानां श्रीमत्सुजयीन्द्रतीर्थ-श्रीमच्चरणानामादेशं सदिच्छां चानुरुध्य सम्प्रति श्रीराघवेन्द्रस्वामिमठीयपीठाधीश्वराः पूज्याः श्री १००८ श्रीमत्सुशमीन्द्रतीर्थश्रीपादाः कारयन्तीति अस्माकं परमं प्रमोदस्थानम् ।

अस्य ग्रन्थस्य संशोधनकार्ये अस्मद्विद्यापीठीयप्राच्यग्रन्थालयस्थाः अधोनिर्दिष्टाः टिप्पण्यः हस्तप्रति-कृतयोऽपि उपयोजिता इति निवेदयितुं नितान्तं तुष्यामः।

संशोधनादिकार्येष्वनुकूलयितुं श्रीसुधाव्याख्यानं श्रीनिधितीर्थीयं तालपत्रस्थं तथा तत्प्रतिकृतिं चानु-गृहीतवद्भ्यः परमपूज्येभ्यः श्रीपुत्तिगेमठाधीश्वरेभ्यः सभक्ति प्रणामगणं समर्पयामः । एवमेव मुद्रणकार्येऽस्मिन् साक्षाद्वा परोक्षे वा सहकृतवद्भ्यः परमपूज्येभ्यः श्रीमठाधीश्वरेभ्यः सर्वेभ्यः सभक्तिप्रणामगणं कार्तज्ञ्यमाविष्कुर्मः। श्रीनिधितीर्थीयं व्याख्यानं तालपत्रस्थं तौल्वलिपिगतं देवनागरिलिपिगतं कृतवतः कीर्तिशिष्टान् श्रीपाठकमहाभागान् सन्दर्भेऽस्मिन् सप्रश्रयं स्मरामः।

ग्रन्थस्यास्य प्रधानसंपादकेभ्यः विद्वद्वरेभ्यः श्री आचार्य साणुरु भीमभट्टमहाशयेभ्यः तथा एतद्ग्रन्थसंपादकेभ्यः विद्वद्वरेभ्यः श्री कुरुडि सुशीलेन्द्राचार्येभ्यः, विद्वद्वरेभ्यः श्री कडपा राघवेन्द्राचार्येभ्यः, विद्वद्वरेभ्यः श्री पुराणिक सुब्रह्मण्याचार्येभ्यः, विद्वद्वरेभ्यः श्री एन्. वादिराजाचार्येभ्यः, विद्वद्वरेभ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, विद्वद्वरेभ्यः श्री पुरोहित नरसिंहाचार्येभ्यः, तथा श्रीपुत्तिगेमठाधीशानामाज्ञामनुरुध्य प्रतिकृतिं दत्तवद्भ्यः विद्वद्वरेभ्यः श्री वासण्णे महाशयेभ्यः, विद्वद्वरेभ्यः श्री नागसंपिगे आनन्दतीर्थाचार्येभ्यः, एवं विट्ठलभट्टीयां टिप्पणीं तथा एरी बाळाचार्याणां टिप्पणीं दत्तवद्भ्यः विद्वद्वरेभ्यः श्री व्यासनकेरे प्रभञ्जनाचार्येभ्यः, तथा पांन्त्री श्रीनिवासाचार्याणां टिप्पणी दत्तवद्भ्यः विद्वद्वरेभ्यः श्री पांन्त्री लक्ष्मणाचार्येभ्यः, तथा वाक्यार्थरत्नमालां टिप्पणीं, सत्यनाथतीर्थीयां टिप्पणीं, हुग्गि टिप्पणीं च दत्वा उपकृतवद्भ्यः पंदरपुरीय पूर्णप्रज्ञमतोन्नाह्निीपाठशालाप्रांशुपालेभ्यः विद्वद्वरेभ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, तथा वाक्यार्थरत्नमाला-टिप्पण्याः प्रतिकृत्यन्तरं दत्तवद्भ्यः विद्वद्वरेभ्यः श्री के. टि. पाण्डुरङ्गि महाशयेभ्यः एवमेव

प्रदीपटिप्पणीं दत्तवद्भ्यः मद्रपुरसर्वकारीयग्रन्थालयव्यवस्थापकेभ्यः श्रीमद्भ्यः, श्रीमन्न्यायसुधाबिन्दुनाम्नीं टिप्पणीं दत्तवद्भ्यः श्रीमद्भ्यः केरलराज्यीय तिरुवाङ्कूरु ग्रन्थभाण्डारव्यवस्थापकेभ्यः, तथा रसरञ्जनी-लघुरसरञ्जनीद्वयं दत्तवद्भ्यः विद्वद्भ्यः श्री गंगूरु हनुमेशाचार्येभ्यः, एवं अल्पीयस्येव काले महता परिश्रमेण सभ्रद्धं ग्रन्थानां प्रतिकृति-संशोधने श्रीमद्भिः संपादकैः सहकृतवद्भ्यः तथा सर्वाङ्गसौन्दर्येण मुद्राप्य दत्तवद्भ्यः 'सुधा मुद्रण'नेतृभ्यः विद्वद्भ्यः श्री वरखेडकर धनंजयाचार्येभ्यः, तथा ग्रन्थस्यास्य अध्ययनाध्यापनादिकर्तृभ्यः सर्वेभ्यः श्रीभगवान् सीताजानिः श्रीमूलरघुपतिवेदव्यासः आयुरारोग्यैश्वर्यादीनि चानुगृह्य संरक्षत्विति अनन्यया भक्त्या संप्रार्थयामहे।

अत्र मुद्रापितासु टिप्पणीषु काश्चन टिप्पण्यः प्राचीनहस्तप्रतिरूपेण शिथिलाः मध्ये मध्ये त्रुटिताः कदाचिदसमग्रा अपि तेनैव रूपेण पण्डितैः संशोध्य मुद्रापिताः। अत्र प्रकाशितभागे यदि कुत्रचित् स्खलितानि प्राज्ञैर्विद्वद्भिः विलोकितानि चेत् ते अस्मान्प्रति संसूचयेयुः। तेन वयं शुद्धिपत्रिकायां अग्रिमसंपुटेषु वा तत्सर्वं समीकृत्य विदुषां पुरः उपस्थापयितुं शक्ष्यामः। येषां समीपे अस्माभिरमुद्रितटिप्पण्यः उपलभ्यन्ते ते कृपया तान् ग्रन्थान् अस्मभ्यं प्रेषयन्ति चेत् तत्सर्वमागामिसंपुटेषु वयं सम्यक् संशोध्य मुद्रापयितुं महता सन्तोषेण स्वीकुर्मः।

इत्थम्।

भवदीयम्

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्,

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

४२)	श्री सत्यनाथाः	न्यायसुधापरशुः
४३)	श्री सुमतीन्द्रतीर्थाः	भावरत्नकोशः
४४)	श्री पाण्डुरङ्गि केशवाचार्याः	मञ्जरी
४५)	श्री व्यासतत्त्वज्ञतीर्थाः	लघुरसरञ्जनी
४६)	श्री व्यासतत्त्वज्ञतीर्थाः	गुरुरसरञ्जनी
४७)	श्री भीमराव् कुलकर्णी कुम्बारगेरी	टिप्पणी
४८)	श्री सत्यपराक्रमतीर्थाः	सुधाफक्किका
४९)	श्री हुलिगि श्रीपत्याचार्याः	टिप्पणी
५०)	श्री अहोबिलाचार्याः	टिप्पणी
५१)	श्री सत्यप्रज्ञतीर्थाः	टिप्पणी

एतादृशस्य अत्युत्तमग्रन्थस्य मुद्रणकार्यं श्रीमत्परमपूज्यानां प्रातःस्मरणीयानां श्रीमत्सुजयीन्द्रतीर्थ-श्रीमच्चरणानामादेशं सदिच्छां चानुरुध्य सम्प्रति श्रीराघवेन्द्रस्वामिमठीयपीठाधीश्वराः पूज्याः श्री १००८ श्रीमत्सुशमीन्द्रतीर्थश्रीपादाः कारयन्तीति अस्माकं परमं प्रमोदस्थानम् ।

अस्य ग्रन्थस्य संशोधनकार्ये अस्मद्विद्यापीठीयप्राच्यग्रन्थालयस्थाः अधोनिर्दिष्टाः टिप्पण्यः हस्तप्रति-कृतयोऽपि उपयोजिता इति निवेदयितुं नितान्तं तुष्यामः।

संशोधनादिकार्येष्वनुकूलयितुं श्रीसुधाव्याख्यानं श्रीनिधितीर्थीयं तालपत्रस्थं तथा तत्प्रतिकृतिं चानु-गृहीतवद्भ्यः परमपूज्येभ्यः श्रीपुत्तिगेमठाधीश्वरेभ्यः सभक्ति प्रणामगणं समर्पयामः । एवमेव मुद्रणकार्येऽस्मिन् साक्षाद्वा परोक्षे वा सहकृतवद्भ्यः परमपूज्येभ्यः श्रीमठाधीश्वरेभ्यः सर्वेभ्यः सभक्तिप्रणामगणं कार्तज्ञ्यमाविष्कुर्मः। श्रीनिधितीर्थीयं व्याख्यानं तालपत्रस्थं तौलवलिपिगतं देवनागरिलिपिगतं कृतवतः कीर्तिशिष्टान् श्रीपाठकमहाभागान् सन्दर्भेऽस्मिन् सप्रश्रयं स्मरामः।

ग्रन्थस्यास्य प्रधानसंपादकेभ्यः विद्वद्भ्यः श्री आचार्य साणूरु भीमभट्टमहाशयेभ्यः तथा एतद्ग्रन्थसंपादकेभ्यः विद्वद्भ्यः श्री कुरुडि सुशीलेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री कडपा राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री पुराणिक सुब्रह्मण्याचार्येभ्यः, विद्वद्भ्यः श्री एन्. वादिराजाचार्येभ्यः, विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, विद्वद्भ्यः श्री पुरोहित नरसिंहाचार्येभ्यः, तथा श्रीपुत्तिगेमठाधीशानामाज्ञामनुरुध्य प्रतिकृतिं दत्तवद्भ्यः विद्वद्भ्यः श्री वासण्णे महाशयेभ्यः, विद्वद्भ्यः श्री नागसंपिगे आनन्दतीर्थाचार्येभ्यः, एवं विठ्ठलभट्टीयां टिप्पणीं तथा एरी बाळाचार्याणां टिप्पणीं दत्तवद्भ्यः विद्वद्भ्यः श्री व्यासनकेरे प्रभञ्जनाचार्येभ्यः, तथा पांड्री श्रीनिवासाचार्याणां टिप्पणीं दत्तवद्भ्यः विद्वद्भ्यः श्री पांड्री लक्ष्मणाचार्येभ्यः, तथा वाक्यार्थरत्नमालां टिप्पणीं, सत्यनाथतीर्थीयां टिप्पणीं, हुग्गि टिप्पणीं च दत्वा उपकृतवद्भ्यः पंढरपुरीय पूर्णप्रज्ञमतोन्नाहिनीपाठशालाप्रांशुपालेभ्यः विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, तथा वाक्यार्थरत्नमाला-टिप्पण्याः प्रतिकृत्यन्तरं दत्तवद्भ्यः विद्वद्भ्यः श्री के. टि. पाण्डुरङ्गि महाशयेभ्यः एवमेव

प्रदीपटिप्पणीं दत्तवद्भ्यः मद्गुरुसर्वकारीयग्रन्थालयव्यवस्थापकेभ्यः श्रीमद्भ्यः, श्रीमन्न्यायसुधाबिन्दुनाम्नीं टिप्पणीं दत्तवद्भ्यः श्रीमद्भ्यः केरलराज्यीय तिरुवाङ्कूरु ग्रन्थभाण्डारव्यवस्थापकेभ्यः, तथा रसरञ्जनी-लघुरसरञ्जनीद्वयं दत्तवद्भ्यः विद्वद्भ्यः श्री गंगूरु हनुमेशाचार्येभ्यः, एवं अल्पीयस्येव काले महता परिश्रमेण सभ्रद्धं ग्रन्थानां प्रतिकृति-संशोधने श्रीमद्भिः संपादकैः सहकृतवद्भ्यः तथा सर्वाङ्गसौन्दर्येण मुद्राप्य दत्तवद्भ्यः 'सुधा मुद्रण'नेतृभ्यः विद्वद्भ्यः श्री वरखेडकर धनंजयाचार्येभ्यः, तथा ग्रन्थस्यास्य अध्ययनाध्यापनादिकर्तृभ्यः सर्वेभ्यः श्रीभगवान् सीताजानिः श्रीमूलरघुपतिवेदव्यासः आयुरारोग्यैश्वर्यादीनि चानुगृह्य संरक्षत्विति अनन्यया भक्त्या संप्रार्थयामहे।

अत्र मुद्रापितासु टिप्पणीषु काश्चन टिप्पण्यः प्राचीनहस्तप्रतिरूपेण शिथिलाः मध्ये मध्ये त्रुटिताः कदाचिदसमग्रा अपि तेनैव रूपेण पण्डितैः संशोध्य मुद्रापिताः। अत्र प्रकाशितभागे यदि कुत्रचित् स्खलितानि प्राज्ञैर्विद्वद्भिः विलोकितानि चेत् ते अस्मान्प्रति संसूचयेयुः। तेन वयं शुद्धिपत्रिकायां अग्रिमसंपुटेषु वा तत्सर्वं समीकृत्य विदुषां पुरः उपस्थापयितुं शक्ष्यामः। येषां समीपे अस्माभिरमुद्रितटिप्पण्यः उपलभ्यन्ते ते कृपया तान् ग्रन्थान् अस्मभ्यं प्रेषयन्ति चेत् तत्सर्वमागामिसंपुटेषु वयं सम्यक् संशोध्य मुद्रापयितुं महता सन्तोषेण स्वीकुर्मः।

इत्थम्।

भवदीयम्

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्,

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

४२)	श्री सत्यनाथाः	न्यायसुधापरशुः
४३)	श्री सुमतीन्द्रतीर्थाः	भावरत्नकोशः
४४)	श्री पाण्डुरङ्गि केशवाचार्याः	मञ्जरी
४५)	श्री व्यासतत्त्वज्ञतीर्थाः	लघुरसरञ्जनी
४६)	श्री व्यासतत्त्वज्ञतीर्थाः	गुरुरसरञ्जनी
४७)	श्री भीमराव् कुलकर्णी कुम्बारगेरी	टिप्पणी
४८)	श्री सत्यपराक्रमतीर्थाः	सुधाफक्किका
४९)	श्री हुलिगि श्रीपत्याचार्याः	टिप्पणी
५०)	श्री अहोबिलाचार्याः	टिप्पणी
५१)	श्री सत्यप्रज्ञतीर्थाः	टिप्पणी

एतादृशस्य अत्युत्तमग्रन्थस्य मुद्रणकार्यं श्रीमत्परमपूज्यानां प्रातःस्मरणीयानां श्रीमत्सुजयीन्द्रतीर्थ-श्रीमच्चरणानामादेशं सदिच्छां चानुरुध्य सम्प्रति श्रीराघवेन्द्रस्वामिमठीयपीठाधीश्वराः पूज्याः श्री १००८ श्रीमत्सुशमीन्द्रतीर्थश्रीपादाः कारयन्तीति अस्माकं परमं प्रमोदस्थानम् ।

अस्य ग्रन्थस्य संशोधनकार्ये अस्मद्विद्यापीठीयप्राच्यग्रन्थालयस्थाः अधोनिर्दिष्टाः टिप्पण्यः हस्तप्रति-कृतयोऽपि उपयोजिता इति निवेदयितुं नितान्तं तुष्यामः।

संशोधनादिकार्येष्वनुकूलयितुं श्रीसुधाव्याख्यानं श्रीनिधितीर्थीयं तालपत्रस्थं तथा तत्प्रतिकृतिं चानु-गृहीतवद्भ्यः परमपूज्येभ्यः श्रीपुत्तिगेमठाधीश्वरेभ्यः सभक्ति प्रणामगणं समर्पयामः । एवमेव मुद्रणकार्येऽस्मिन् साक्षाद्वा परोक्षे वा सहकृतवद्भ्यः परमपूज्येभ्यः श्रीमठाधीश्वरेभ्यः सर्वेभ्यः सभक्तिप्रणामगणं कार्तज्ञ्यमाविष्कुर्मः । श्रीनिधितीर्थीयं व्याख्यानं तालपत्रस्थं तौल्वलिपिगतं देवनागरिलिपिगतं कृतवतः कीर्तिशिष्टान् श्रीपाठकमहाभागान् सन्दर्भेऽस्मिन् सप्रश्रयं स्मरामः।

ग्रन्थस्यास्य प्रधानसंपादकेभ्यः विद्वद्भ्यः श्री आचार्य साणूरु भीमभट्टमहाशयेभ्यः तथा एतद्ग्रन्थसंपादकेभ्यः विद्वद्भ्यः श्री कुरुडि सुशीलेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री कडपा राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री पुराणिक सुब्रह्मण्याचार्येभ्यः, विद्वद्भ्यः श्री एन्. वादिराजाचार्येभ्यः, विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, विद्वद्भ्यः श्री पुरोहित नरसिंहाचार्येभ्यः, तथा श्रीपुत्तिगेमठाधीशानामाज्ञामनुरुध्य प्रतिकृतिं दत्तवद्भ्यः विद्वद्भ्यः श्री वासण्णे महाशयेभ्यः, विद्वद्भ्यः श्री नागसंपिगे आनन्दतीर्थाचार्येभ्यः, एवं विट्ठलभट्टीयां टिप्पणीं तथा एरी बाळाचार्याणां टिप्पणीं दत्तवद्भ्यः विद्वद्भ्यः श्री व्यासनकेरे प्रभञ्जनाचार्येभ्यः, तथा पांन्त्री श्रीनिवासाचार्याणां टिप्पणीं दत्तवद्भ्यः विद्वद्भ्यः श्री पांन्त्री लक्ष्मणाचार्येभ्यः, तथा वाक्यार्थरत्नमालां टिप्पणीं, सत्यनाथतीर्थीयां टिप्पणीं, हुग्गि टिप्पणीं च दत्वा उपकृतवद्भ्यः पंढरपुरीय पूर्णप्रज्ञमतोन्नाहिनीपाठशालाप्रांशुपालेभ्यः विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, तथा वाक्यार्थरत्नमाला-टिप्पण्याः प्रतिकृत्यन्तरं दत्तवद्भ्यः विद्वद्भ्यः श्री के. टि. पाण्डुरङ्गि महाशयेभ्यः एवमेव

प्रदीपटिप्पणीं दत्तवद्भ्यः मद्रपुरसर्वकारीयग्रन्थालयव्यवस्थापकेभ्यः श्रीमद्भ्यः, श्रीमन्न्यायसुधाबिन्दुनाम्नीं टिप्पणीं दत्तवद्भ्यः श्रीमद्भ्यः केरलराज्यीय तिरुवाङ्कूरु ग्रन्थभाण्डारव्यवस्थापकेभ्यः, तथा रसरञ्जनी-लघुरसरञ्जनीद्वयं दत्तवद्भ्यः विद्वद्भ्यः श्री गंगूरु हनुमेशाचार्येभ्यः, एवं अल्पीयस्येव काले महता परिश्रमेण सश्रद्धं ग्रन्थानां प्रतिकृति-संशोधने श्रीमद्भिः संपादकैः सहकृतवद्भ्यः तथा सर्वाङ्गसौन्दर्येण मुद्राप्य दत्तवद्भ्यः 'सुधा मुद्रण'नेतृभ्यः विद्वद्भ्यः श्री वरखेडकर धनंजयाचार्येभ्यः, तथा ग्रन्थस्यास्य अध्ययनाध्यापनादिकर्तृभ्यः सर्वेभ्यः श्रीभगवान् सीताजानिः श्रीमूलरघुपतिवेदव्यासः आयुरारोग्यैश्वर्यादीनि चानुगृह्य संरक्षत्विति अनन्यया भक्त्या संप्रार्थयामहे।

अत्र मुद्रापितासु टिप्पणीषु काश्चन टिप्पण्यः प्राचीनहस्तप्रतिरूपेण शिथिलाः मध्ये मध्ये त्रुटिताः कदाचिदसमग्रा अपि तेनैव रूपेण पण्डितैः संशोध्य मुद्रापिताः। अत्र प्रकाशितभागे यदि कुत्रचित् स्खलितानि प्राज्ञैर्विद्वद्भिः विलोकितानि चेत् ते अस्मान्प्रति संसूचयेयुः। तेन वयं शुद्धिपत्रिकायां अग्रिमसंपुटेषु वा तत्सर्वं समीकृत्य विदुषां पुरः उपस्थापयितुं शक्ष्यामः। येषां समीपे अस्माभिरमुद्रितटिप्पण्यः उपलभ्यन्ते ते कृपया तान् ग्रन्थान् अस्मभ्यं प्रेषयन्ति चेत् तत्सर्वमागामिसंपुटेषु वयं सम्यक् संशोध्य मुद्रापयितुं महता सन्तोषेण स्वीकुर्मः।

इत्थम्।

भवदीयम्

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्,

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

॥ श्रीमन्मूलरामो विजयते ॥

प्रस्तावना

यत्पदं वेदसंवेद्यं कटाक्षेणापि वीक्षितुम् ।
न क्षमन्ते विमतयः तमुपासे श्रियःपतिम् ॥

भूर्भुवस्वरादिचतुर्दशभुवनात्मकसंख्यातिगब्रह्माण्डकोटीः रोमकूपे सन्निवेश्य सकललोकजनन्या श्रिया सह सर्पतल्पे शयानेन भगवता सृष्टेषु भूलोकखण्डेष्वन्यतमेऽस्मिन् भरतखण्डे जनिमतामस्माकं महद्भागधेयमिदं यदत्र भगवान् तत्तद्युगेष्ववतीर्य बलकार्यं ज्ञानकार्यं च संपाद्य स्वभक्तानन्वग्रहीत् । तत्रापीदमतिशयितं वक्तव्येष्वार्यं वचनं यदत्र तद्भक्तागणीः पावनः पवमानः अनेकधाऽवतीर्य तत्रापि तृतीयेऽवतारे श्रीमध्वनाम्नाऽत्र प्रकटीभूय सज्जनानुददीधरत् । तदीयभक्तानुग्रहकार्येषु आचन्द्रार्कं दीप्यमानानि बहूनि कार्याणि यद्यपि वक्तव्यानि सन्ति तथाऽपि समस्तशास्त्रार्थसारभूतानां श्रीबादरायणसंज्ञकेन श्रीवेदव्यासमहर्षिणा निर्मितानां ब्रह्मसूत्राणां भाष्य-अणुभाष्य-अनुभाष्य-न्यायविवरण-ग्रन्थानां निर्माणमतितरां सर्वैरपि अध्यात्मविद्यारसिकैः विचारविमर्शकैः प्रशंसनीयं सर्वदा स्मरणीयं कार्यमिति निश्चप्रचं दृढतरं वयं वक्तुं शक्नुमः ।

. तत्र च सूत्रसंबन्धिग्रन्थचतुष्टये ब्रह्मसूत्र-अनुव्याख्यान-ग्रन्थराजः नभसि नक्षत्रपुञ्जमध्ये चन्द्रमा इव चकास्ति । तस्यास्य ग्रन्थराजस्य इन्द्रावतारभूतैः प्रातःस्मरणीयैः परमपूज्यश्रीजयतीर्थमस्करिवरैः रचितम् अनुव्याख्यानव्याख्यानं न्यायसुधानामकं नैकाभिष्टिप्पणीभिः समलंकृतं श्रीराघवेन्द्रतीर्थगुरुवर्याणां प्रेरणया अनुग्रहेण च इदानीं संप्रकाश्य हरिगुरुभक्तानां करकमल्योः समर्पयितुं मोमुद्यते अस्माकं चेतः ।

उपनिषत्प्रस्थान-गीताप्रस्थान-सूत्रप्रस्थाननामकप्रस्थानत्रये सूत्रप्रस्थानमेव अन्तिमं निर्णायकं समस्तैः शिरसा धारणीयं च भवति । किं बहुना समस्तेषु वेदेषु समस्तेषु पुराणेष्वन्यत्राप्यभ्यर्हणीयवैदिकवाङ्मयेषु च उक्तानामर्थानां निर्णयाय सूत्राण्येव अस्माकमवलम्बभूतानि महार्णवे तरतामाधारभूतनौकास्थानीयानि । तेषां सूत्राणां व्याख्यानभूतानुव्याख्यानस्य व्याख्यानरूपा इयं सुधा देवलोकीयसुधातोऽप्यभ्यर्हिततमा जन्ममृत्यु-जरादिकं सर्वमपहृत्य स्वरूपानन्दाविर्भावरूपं मोक्षं दापयितुं समर्था । अस्य ग्रन्थस्य प्रशंसा कथं कार्या, कियती कार्या इत्यादिविषयाः आलोच्यमानाः अस्माकं जिह्वां पुरःसर्तुमेव न मुञ्चन्ति । यतो हि ग्रन्थकाराः श्रीमज्जयतीर्थश्रीमच्चरणाः पूर्वाश्रमे नामपात्रेण गृहस्थाश्रमप्रवेशं लब्ध्वा केनापि अनालोचनीयेन केवलं भगवता क्लृप्तेन घटनाविशेषेण संसारमिमं तुच्छीकृत्य स्वीये तरुणे वयसि संन्यासाश्रमं प्रविश्य स्वगुरूणां विद्यारण्यारण्यच्छेदकानां श्रीमदक्षोभ्यतीर्थगुरुवर्याणां सविधे शुकवत् शिक्षिता भूत्वा स्वीयया अलौकिकप्रज्ञया आचार्याणां अनेकग्रन्थानां टीकाः विरचय्य प्रायः अन्ते इमां न्यायसुधां भक्तेभ्यः नाकीन्द्रः सुधां इव प्रादुः । अस्य ग्रन्थस्य माहात्म्यं शेषोऽपि वर्णयितुं नालम् । बाल्यादारभ्य यौवनपर्यन्तं प्रायः संस्कृतभाषायाः वेदादिशास्त्राणां च परिचयहीना अपि केवलं गुर्वनुग्रहेण शास्त्राण्यभ्यस्य अनन्तरं किञ्चित्समयपर्यन्तं सरस्वतीं संसेव्य तदनुग्रहेण घण्टां (लेखनीं) पूगं च लब्ध्वा

लेखनकार्यं प्रारभन्त जयतीर्थश्रीमच्चरणाः । तत्रापि गुहाया अन्तरुपविश्य पञ्चषशिष्यान् पाठयन्तः स्वयमेव वाणीकृपया लब्धया लेखन्या आचार्याणां ग्रन्थान् व्याख्यान्तः, अनन्तरं तदुपरि पूगेन सम्मार्जनमात्रेण तत्सर्वं त्रुटिलेशरहितं भगवत्कृपया आविर्भावयन्तः ते लोके टीकाचार्याः इत्येव निरुपपदगौरवनाम्ना प्रथिताः बभूवुः ।

महानुभावाः जयतीर्थश्रीमच्चरणाः मठीयवैभवादीन् हित्वा शिष्यैः भिक्षया आनीतेन यावनालान्नेन (भक्कारि) जीवनं निरवहन् ।

महानुभावाः जयतीर्थश्रीमच्चरणाः गुरुभक्तिविषये अन्यादृशम् आदर्शम् अस्माकं पुरतः उपस्थापयामासुः । तद्यथा—

न शब्दाब्धौ गाढा न च निगमचर्चासु चतुरा
न च न्याये प्रौढा न च विदितवेद्या अपि वयम् ।
परं श्रीमत्पूर्णप्रमतिगुरुकारुण्यसरणिं
प्रपन्ना मान्याः स्मः किमपि च वदन्तोऽपि महताम् ॥

अनेन श्लोकेन प्रदर्शितः विनयः अनन्यसाधारणः लोकातिशायी सहृदयान् जिज्ञासून् रोमाञ्चयति । एतदपेक्षया अधिकः गुरुप्रवणः गुरोः दासानुदासः लोके यत्र कुत्रापि नोपलभ्येत इत्येवं सर्वैः सर्वथा अनुभूयते एव ।

अल्पीयसा अनेहसा स्वकीयप्रखरबुद्धिवैभवेन निर्मितस्य अस्य सुधाग्रन्थस्य वैशिष्टयं वर्णयितुं सहस्रवदनः शेषोऽपि नालम्, किमुत अल्पप्रज्ञाः तृणकल्पाः वयम् । एतदीयग्रन्थस्य माहात्म्यं संवर्णयन् कविरेकः एवमुद्गिरति स्म । यथा—

आमूलाग्रनिबद्धतर्कजटिलं शब्दैकजीवातुकं
मीमांसानुनयं च शङ्करवचो हुङ्कारभङ्गप्रवम् ।
शास्त्रं तन्त्रचतुष्टयात्मकमिदं निस्स्वप्रतन्त्रान्तराः
व्याख्यास्यन्ति पठन्ति वा कथमहो किं वा कलौ वुर्घटम् ॥

'अध्यात्मविद्या विद्यानाम्' इति श्रीकृष्णोक्त्यनुसारेण अद्वितीयाध्यात्मविद्याख्य-सूत्रव्याख्यानरूपा इयं न्यायसुधा नैकाभिष्टिप्पणीभिः सह संयोज्य, संशोध्य, संमुद्रच अत्र प्रकाशं नीयते । महदिदं साहसकार्यं महापुरुषोत्तमस्य श्रीहरेः अविच्छिन्नभक्ताग्रेसर-श्रीमन्मुख्यप्राणावताराणां श्रीमदानन्दतीर्थभगवत्पादानां परमानुग्रहेणैव संपन्नः प्रह्लादावतारभूतानां श्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमानाम् आराधनसमये तत्करकमलाभ्यामेव श्रीमन्मूलरामचन्द्रदेवस्य पादकमलयोः तद्भक्तवृन्देन सप्रश्रयं सभक्ति समर्प्यतेतमाम् । श्रीकृष्णार्पणमस्तु ॥

आचार्याः साणूरु भीमभट्टाः
प्रधानसंपादकाः

टिप्पणीविषये स्पष्टीकरणम्

श्रीमज्जयतीर्थविरचितं महामेरुतुल्यं श्रीमन्न्यायसुधाग्रन्थमनेके व्याचख्युः। साम्प्रतमस्माभिः, उपलब्धाः श्रीमन्न्यायसुधाव्याख्याः सङ्कलैकत्र मुद्रापयितव्याः इत्येकमात्रोद्देशेन अनेकव्याख्यासहिततया श्रीमन्न्यायसुधाग्रन्थः मुद्रापितः।

श्रीमद्विजयीन्द्रतीर्थश्रीपादानां श्रीमद्राघवेन्द्रतीर्थश्रीपादानां च सुधाव्याख्यानयोः इदानीं मुद्रापितायां यस्यां कस्याञ्चित् सुधाव्याख्यायां यस्मिन् कस्मिंश्चिद्विषये भिन्नाभिप्राये सति (विरुद्धाभिप्राये सति) सः तद्व्याख्यातृणामभिप्राय एव। यः श्रीमद्विजयीन्द्रतीर्थश्रीपादानां वा परिमलकाराणां वा संपादकानां वा प्रकाशकानां वा सम्मत इति न मन्तव्यमिति एतन्मूलकतया स्पष्टीकुर्मः।

इत्थम्

संपादकाः

श्रीमन्न्यायसुधा

परिमळाद्युपेता

टिप्पणीनां क्रमः तथा संक्षिप्तनामानि

क्र.सं.	कर्तृनाम	टिप्पणीनाम	संक्षिप्तनाम
१	श्री विजयीन्द्रतीर्थाः	न्यायसुधाबिन्दुः	बिन्दुः—
२	श्री राघवेन्द्रतीर्थाः	परिमळः	परि०—
३	श्री श्रीपादराजतीर्थाः	वाग्वज्रः	वाग्वज्रः—
४	श्री वादिराजतीर्थाः	गुर्वर्थदीपिका	गु०दी०—
५	श्री यदुपत्याचार्याः	टिप्पणी	यादु०—
६	श्री वंशपल्ली श्रीनिवासाचार्याः	वाक्यार्थविवृतिः	वं०प०—
७	श्री गलगली नरसिंहाचार्याः	आनन्दः	आनन्दः—
८	श्री कंबालूरु रामचन्द्रतीर्थाः	विवृतिः	कं०रा०—
९	श्री श्रीनिधितीर्थाः	टिप्पणी	श्रीनिधि०—
१०	श्री विद्याधीशतीर्थाः	वाक्यार्थचन्द्रिका	वा०चं०—
११	श्री पाण्डुरङ्गि केशवाचार्याः	शेषवाक्यार्थचन्द्रिका	शे०चं०—
१२	श्री पाण्डुरङ्गि नरसिंहाचार्याः	वाक्यार्थरत्नमाला	वा०र०—
१३	श्री सत्यव्रततीर्थाः	सुधाविवृतिः	स०व्र०—
१४	श्री कुण्डलगिरिआचार्याः	रसकूलङ्कषः	कुण्डल०—
१५	श्री सत्यनाथतीर्थाः	दुर्घटवाक्यार्थविचारः	स०ना०—
१६	श्री विट्ठलभट्टाः	टिप्पणी	विट्ठ०—
१७	श्री विष्णुतीर्थाः	रसरञ्जनी	रस०—
१८	श्री अडवी कृष्णाचार्याः	लघुरसरञ्जनी	ल०र०—
१९	श्री मन्नारी कृष्णाचार्याः	चषकः	चषकः—
२०	श्री एरी बाळाचार्याः	उपस्पर्शः	ए०बा०—
२१	श्री काशी आचार्याः	काशी टिप्पणी	काशी०—
२२	श्री गूढकर्तृकाचार्याः	गूढकर्तृका	गूढ०—
२३	श्री प्रदीपकाराः	प्रदीपः	प्रदीपः—
२४	श्री पांध्री श्रीनिवासाचार्याः	टिप्पणी	पांध्री०—
२५	श्री कल्लापूर सत्याधिराजाचार्याः	हुग्गि	हुग्गि०—

श्रीमन्न्यायसुधा

परिमळाद्युपेता

संपुटम् - १

विषयानुक्रमणिका

विषयः	परि.संख्या	पुटसंख्या
शास्त्रप्रतिपाद्यदेवतानतिः—	मङ्गलपद्यम् १	१
सूत्रकृतं व्यासं अभीष्टं याचते—	मङ्गलपद्यम् २	४७
भाष्यकर्तारं आनन्दतीर्थं अभीष्टं प्रार्थयते—	मङ्गलपद्यम् ३	५७
वायुपत्नी-भारती-सन्निधिं अर्थयते—	मङ्गलपद्यम् ४	८०
सन्न्यायरत्नावलिकर्तारं पद्मनाभतीर्थं प्रार्थयते—	मङ्गलपद्यम् ५	८४
स्वगुरुं अक्षोभ्यतीर्थं नमति—	मङ्गलपद्यम् ६	८७
स्वचिकीर्षितं व्यनक्ति—	मङ्गलपद्यम् ७	९२
स्वमहत्त्वं विनयेन भूषयितुं विनयप्रदर्शनं करोति—	मङ्गलपद्यम् ८	९८
॥ अनुव्याख्यानकृतां मङ्गलाचरणम् ॥	१	११३
॥ अनुव्याख्यानस्थे आद्यपद्ये नारायणप्रणामः ॥	१	११३
आद्यपद्यस्य अवतरणिका—	१	११३
॥ आद्यपद्यस्थशब्दानां अन्वयः अर्थश्च सोपपत्तिकः ॥	२	१२७
॥ अभिमतसिद्ध्यङ्गतया शब्दार्थविवरणम् ॥	२	१२७
स्तुतिपदैः आर्षिकपुनरुक्तेः स्तुतित्वमेव समाधानं अभिप्रेत्य शब्दार्थविवरणम्—	२	१२७
॥ नम्यत्वप्रयोजकतया विशेषणानां व्याख्यानम् ॥	४	१४४
अशेषविशेषनोऽपि वन्द्यम् इत्यादि विशेषणानां व्याख्यानम्—	४	१४४
॥ वन्द्यत्वप्रयोजकत्रिविधधर्मोपपादकतया विशेषणानां व्याख्यानम् ॥	५	१५१
वन्द्यानां देवतानां त्रैविध्यम्—	५	१५१
वैशिष्ट्योपपादकतया विशेषणत्रयस्य व्याख्यानम्—	६	१५६
अधिकृतत्वप्रदर्शकतया विशेषणद्वयव्याख्यानम्—	७	१७५

विषयः	परि.संख्या	पुटसंख्या
इष्टत्वप्रदर्शकतया विशेषणव्याख्यानम्—	८	१८०
॥ प्रकारान्तरैः विशेषणानां व्याख्यानम् ॥	९	१८५
विभवात् अनेकलक्षणपरतया विशेषणानां व्याख्यानम्—	९	१८५
उक्तानेकलक्षणोपपादकतया विशेषणानां व्याख्यानम्—	१०	१९४
जगज्जन्मादिकारणत्वासंभवपरिहारकतया विशेषणानां व्याख्यानम्—	११	१९७
नारायणशब्दस्य विशिष्टगुणवाचकतया विशेषणानां व्याख्यानम्—	१२	१९९
॥ सकलशास्त्रार्थसङ्क्षेपकतया विशेषणानां व्याख्यानम् ॥	१४	२०४
प्रथमाध्यायार्थसङ्क्षेपकतया व्याख्यानम्—	१५	२०६
द्वितीयाध्यायार्थसङ्क्षेपकतया व्याख्यानम्—	१६	२०९
तृतीयाध्यायार्थसङ्क्षेपकतया व्याख्यानम्—	१७	२१०
चतुर्थाध्यायार्थसङ्क्षेपकतया व्याख्यानम्—	१८	२१२
॥ अनुव्याख्यानस्थे द्वितीयपद्ये गुरुप्रणामाचरणपुरःसरशास्त्रव्याख्यानप्रतिज्ञा तत्समर्थनं च ॥	१९	२१५
॥ गुरुप्रणामाचरणम् ॥	१९	२१५
अवतरणिका, अन्वयः, शब्दार्थश्च—	१९	२१५
पुनःप्रणामस्य उपपादनं, नारायणस्य गुरुत्वोपपादनं च—	२०	२२०
साक्षादुपदेष्टृत्वेन गुरुत्वप्रदर्शनम्—	२१	२२५
पृथक्प्रणामानुपपत्तिपरिहारः—	२२	२२६
प्रणामस्य ग्रन्थे निवेशने प्रयोजनविशेषः—	२३	२३१
॥ शास्त्रव्याख्यानप्रतिज्ञा ॥	२४	२३४
अनुव्याख्यानस्य वैयर्थ्यशङ्कानिवारकतया परमाख्यविद्येतिपदस्य अवतरणम्—	२४	२३४
अन्यान् ग्रन्थान् परित्यज्य ब्रह्मसूत्राणामेव व्याख्यानस्योपपादनम्—	२७	२४४
अन्यैः व्याख्यानेऽपि पुनरस्य व्याख्यानस्य आवश्यकता—	२८	२५७
सूत्रभाष्ये कृतेऽपि अनुव्याख्याने प्रयोजनसद्भावः—	२९	२५७
अनुव्याख्यानकरणे अन्येषां असामर्थ्यसूचना—	३०	२५८
॥ गुरुनमने प्रतिज्ञायां च उक्तानां विषयाणां समर्थनम् ॥	३१	२५९
नारायणस्य एतच्छास्त्रप्रभवत्वोपपादनम्—	३१	२५९

विषयः	परि.संख्या	पुटसंख्या
॥ अस्य शास्त्रस्य व्याख्यातव्यतासमर्थनम् ॥	३३	२६५
॥ अस्य शास्त्रस्य सर्वोत्तमप्रामाण्यसमर्थनम् ॥	३३	२६५
अस्य शास्त्रस्य परविद्याख्यया सर्वोत्तमप्रामाण्यसाधनम्—	३३	२६५
॥ अस्य शास्त्रस्य अनुत्तमप्रामाण्यसाधनम् ॥	४१	२८७
॥ अनुमानतः अनुत्तमप्रामाण्यसाधनम् ॥	४१	२८७
प्रामाण्यसाधनम्—	४१	२८७
॥ अनुत्तमप्रामाण्यसाधनम् ॥	४३	२९७
साक्षात्परंपरया च साध्यनिर्देशः—	४३	२९७
साध्यान्तराध्याहारसमर्थनम्—	४८	३०७
आप्तिस्वरूपम्—	५९	३५०
हेतूनां परंपरया साध्यसंबन्धसमर्थनम्—	६६	३७८
ब्रह्मसूत्राणां प्रामाण्यस्य त्रैविध्यप्रदर्शनम्—	७१	४०१
॥ अनुत्तमप्रामाण्यसाधनोपसंहारः ॥	८०	४३५
॥ अस्य व्याख्यानस्य गतार्थतानिरासः ॥	८२	४३८
॥ अस्य शास्त्रस्य मङ्गलाचरणसहितत्वसमर्थनम् ॥	८७	४५५
॥ ओङ्कारशब्दयोः मङ्गलजनकत्वम् ॥	८७	४५५

* * * * *

।। श्रीमदानन्दतीर्थभगवत्पादाचार्याः ।।

अभ्रमं भङ्गरहितमजडं विमलं सदा ।
आनन्दतीर्थमतुलं भजे तापत्रयापहम् ।।

॥ श्रीमज्जयतीर्थश्रीमच्चरणाः ॥



चित्रैः पदैश्च गम्भीरैर्वाक्यैर्मानैरखण्डितैः ।
गुरुभावं व्यञ्जयन्ती भाति श्रीजयतीर्थवाक् ॥

॥ श्रीविजयीन्द्रतीर्थाः ॥

भक्तानां मानसाम्भोजभानवे कामधेनवे ।
नमतां कल्पतरवे जयीन्द्रगुरवे नमः ॥

॥ श्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमाः ॥



मूकोऽपि यत्प्रसादेन मुकुन्दशयनायते ।
राजराजायते रिक्तो राघवेन्द्रं तमाश्रये ॥

॥ श्री सुजयीन्द्रतीर्थश्रीपादाः ॥

सुयमीन्द्रकराब्जोत्थं सुविद्याबोधकं सदा ।
सुमूलरामपूजाढ्यं सुजयीन्द्रगुरुं भजे ॥

श्रीमन्मध्वाचार्यमूलमहासंस्थान श्रीमद्राघवेन्द्रतीर्थमठाधीशानां

श्री १००८ श्री सुशमीन्द्रतीर्थश्रीपादानां वरकुमारका

श्री १००८ श्री सुविद्येन्द्रतीर्थश्रीपादाः

श्रीमन्मध्वाचार्यमूलमहासंस्थान श्रीमद्राघवेन्द्रतीर्थमठाधीशाः

श्री १००८ श्री सुशमीन्द्रतीर्थश्रीपादाः

श्रीमन्न्यायसुधाकर्तारः श्रीमज्जयतीर्थश्रीमच्चरणाः

(Courtesy : Vidwan Shri Raja J. Rajendracharya, Nanjangud)

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

श्रीमन्न्यायसुधा

परिमळाद्युपेता

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

शास्त्रप्रतिपाद्यदेवतानतिः—

श्रीमन्न्यायसुधा—

श्रियः पत्ये नित्यागणितगुणमाणिक्यविशद-
प्रभाजालोल्लासोपहतसकलाद्यतमसे ।
जगज्जन्मस्थेमप्रलयरचनाशीलवपुषे
नमोऽशेषाम्नायस्मृतिहृदयदीपाय हरये ॥ ॥ १ ॥

न्यायसुधाबिन्दुः—

(श्रीमद्विजयीन्द्रतीर्थविरचितैतद्व्याख्याः उपलब्धैकमात्रहस्तप्रतावपि मङ्गलाचरणादिकानि आदितः विंशतिपत्रपर्यन्तानि हस्तलिखितानि पत्राणि नोपलब्धानि । उपलब्धभागः श्रीमन्न्यायसुधापद्धिसमीपे तत्तत्स्थाने मुद्रितः ।)

परिमळः—

पूर्णागण्यगुणोदारमूर्तये पुण्यकीर्तये । नमः श्रीपतये भक्तदत्तस्वानन्दमूर्तये ॥ १ ॥

पूर्णागण्यगुणोदारनित्यसुन्दरमूर्तिने । श्रीब्रह्मवीन्द्रपूर्वेड्यकीर्तिने ब्रह्मणे नमः ॥ २ ॥

विश्वं यस्य वशे सर्वमनिशं शङ्करादिकम् । तस्य वायोस्तृतीयांशमाश्रये शमवाप्तये॥ ३ ॥

सत्पद्मबन्धवो यस्य गावो विश्वतमोनुदः । स स्यात् तत्त्वप्रकाशाय जयतीर्थरविर्मम ॥ ४ ॥
पदवाक्यप्रमाणज्ञो दुर्मतध्वान्तभास्करः । व्यासतीर्थमुनीन्द्रो मे भूयाज्ज्ञानसमृद्धये ॥ ५ ॥
अस्मद्देशिकपादानां प्रणम्य चरणाम्बुजम् । श्रीमन्न्यायसुधावाक्यव्याख्यां कुर्यां यथामति ॥ ६ ॥

आद्यपद्यं विवृण्वानो ग्रन्थादौ नम्यत्वप्रयोजकविशिष्टत्वेष्टत्वाधिकृतत्वयुक्तदेवतानतिरूपं मङ्गलमाचरति श्रिय इति ॥ मूले अशेषविशेषतोऽपीत्यनेन सङ्गलय्य श्रीब्रह्माद्युत्तमत्वमुक्तम् । तत्र सकलवाङ्मनसदेवतायाः देव्याः ग्रन्थारम्भेऽवश्यं वन्द्यत्वद्योतनाय श्रियः पत्य इति विशिष्योक्तिः । तदपि ईश्वरोपसर्जनतयेति ज्ञापनाय श्रिय इति पृथगुक्तिः । निखिलेति निर्दोषमिति च विशेषणद्वयस्य हेतुहेतुमद्भावेन योजनाद्योतनाय नित्येत्याद्युक्तम् । 'प्रच्युतोऽशेषदोषैः सदा पूर्तित' इत्युक्तेः सर्वस्वातन्त्र्यसर्वज्ञानसर्वशक्तिसर्वैश्वर्यादिगुणसत्त्वे पारतन्त्र्यादिदोषाणामयोगात् । एतच्च ब्रह्मपदेन गुणपूर्तिवन्निर्दोषत्वस्यापि लाभाय । तेन नारायणशब्दस्य ब्रह्मशब्दसमानार्थत्वसूचनेन ब्रह्मतन्त्रे नारायणनतिः मूले न युक्तेति शङ्का परास्ता । यद्वा लोके गुणदोषयोरविनाभावदृष्टेरिहापि गुणित्वे दोषित्वापत्तिरित्यतः मितगुणित्वे दोषित्वमत्रामितगुणित्वान्न दोषितेति सूचनायैवमुक्तिः । देहस्य ज्ञानादिगुणात्मकत्वे लोके ज्ञानादेरनित्यत्वाद्देहोऽपि तथा स्यात् इति शङ्कानिरासाय नित्येति गुणविशेषणम् । तेन मूले सदापदस्य निखिलेत्यत्रापि अन्वयः सूचितः । निर्दोषमित्यत्र दोषपदम् अशेषदोषपरमिति ज्ञापनाय सकलावद्येत्युक्तिः । अस्योद्भवादिदमित्यत्र अस्येतिपदं प्रमितसर्वपरं सदपि नेश्वरपरमिति ज्ञापनाय जगज्जन्मेत्युक्तम् । अनेनास्य समस्तस्योद्भवादिदमित्यन्वयः सूचितः । स्थेमा स्थैर्यं रक्षेत्यर्थः । उक्तं हि श्रुतप्रकाशेऽपि 'अखिलभुवनजन्मस्थेमभङ्गादिलील' इति भाष्यव्याख्यानावसरे स्थेमा स्थितिरिति । स्थिरशब्दादिमनिच्प्रत्यये प्रियस्थिरेत्यादिसूत्रेण स्थिरशब्दस्य स्थादेशे आद्गुण इति गुणे च स्थेमेति रूपम् । यद्यपि वामनवृत्त्यादौ मुग्धप्रौढस्थिरशब्दानां पृथ्वादिष्वपाठात्पृथ्वादिभ्य इमनिज्वेत्युक्तेरनिजप्राप्तेरिमनिजन्तप्रयोगोऽसाधुरिति उक्तम् । तथापि नैषधद्वादशसर्गस्थस्य 'यत्करस्यामपि भानुमान्न ककुभि स्थेमानमालम्बत' इत्यस्य व्याख्याने 'वर्णदृढादिभ्यः ष्यञ्च' इति सूत्रे चकारेणेमनिचः समुचितत्वात् स्थिरशब्दस्य दृढादिषु पाठादिमनिजित्युक्तत्वात्साधुरेवायं ध्येयः । यद्वा तिष्ठतेरौणादिकेमनिचि गुणे रूपं स्थेमेति । स्थितिरित्यर्थः । उद्भवादिदमित्यनेन सृष्ट्याद्यष्टकग्रहणेऽपि वियदधिकरणन्यायेन ईशादन्यसर्वसंबन्धित्वाज्जन्मादित्रयस्यैवात्रोक्तिः । नियतिरप्युपलक्ष्या । ईश्वरस्य जगज्जन्मादिना फलं नास्ति चेदस्योद्भवादिदमित्ययुक्तम् । प्रेक्षावतो निष्फले प्रवृत्त्ययोगात् । अस्ति चेन्निखिलपूर्णगुणेत्ययुक्तमित्यतः शीलेति । जन्मादिरचनास्वभावेत्यर्थः । फलाभावेऽपि स्वभावोऽयं सृष्ट्यादि-

व्यापारः। यथा चैतत्तथा नप्रयोजनाधिकरणे वक्ष्याम इति भावः। अनेन सदाऽस्योद्भवादिदमित्यप्यन्वयः सूचितः। मूले देहमित्युक्तिर्न केवलं ज्ञानादिगुणसत्त्वाद्युपपत्त्यर्थं किन्त्वस्योद्भवादिदमित्युक्तप्रष्टृत्वाद्युपपत्त्यर्थं चेति सूचनाय वपुष इत्युक्तिः। अन्यथा पत्युरसामञ्जस्यादित्यधिकरणे संबन्धानुपपत्तेश्चेति सूत्रेऽशरीरस्य जगता कर्तृकार्यभावरूपसंबन्धानुपपत्तेरिति वक्ष्यमाणदोषापत्तेरिति भावः। सुवाक्यैरित्येतद्वेदवेदानुसारिसर्वपौरुषेयापौरुषेयपरमिति भावेनोक्तम् अशेषाम्नायस्मृतीति। आपाततो नोक्तगुणविशिष्टो हरिः प्रतीयत इत्यत उक्तं हृदयेति। तात्पर्यप्रकाशितायेत्यर्थः। सदा प्रियतममित्यस्यार्थः हरय इति।

नित्येत्यादिविशेषणद्वयेन विशिष्टत्वम् अशेषेत्यधिकृतत्वम् हरत्यशेषक्लेशानिति हरय इत्यनेन इष्टत्वमुक्तं ध्येयम्। 'हरिं हरन्तमनुयन्ति देवा' इत्यादेः। यद्वा मूले तमेवेति श्लोके व्यासगुरोः नारायणैक्यमुच्यते। 'प्रादुर्भूतो हरिर्व्यास' इति श्लोके च हर्यैक्यम्। तत्कथमित्यतस्तावेक एवेति ज्ञापनाय मूलोक्तनारायणविशेषणान्येवोक्त्वा हरय इति विशेष्यमुक्तम्। 'वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः। तावन्ति हरिनामानी'ति स्मृतिसूचनाय हरिपदप्रयोग इत्येके। अनेन हरेर्नारायणानन्यत्वप्रतीत्या प्रादुर्भूतो हरिर्व्यास इति व्यासस्य हर्यवतारत्वोक्तेः नारायणानवतारत्वात् तमेवेति तदभेदोक्तिः अयुक्तेति शङ्काऽनवकाश इति। तमेव शास्त्रप्रभवमित्युपपत्त्यर्थमित्यन्ये। हरेर्नारायणविशेषणविशिष्टत्वोक्त्या हरिविशेषणानां कृत्यं मूलविशेषणकृत्यवद्बोध्यम्। निखिलेत्यादिविशेषणत्रये वेदादिरेव मानमिति ज्ञापनाय मूलक्रमोल्लङ्घनेनाशेषाम्नायेत्यस्यान्ते निवेशः। नित्येति विशेषणेन पूर्वाध्यायद्वयस्य अशेषेत्यादिविशेषणविशेष्याभ्याम् उत्तरद्वयस्यार्थोक्तिः। 'नासिकास्तनयोर्धाधेटोः' इति निर्देशादल्पाच्तरमित्यस्य प्रायिकत्वाद्वाऽभ्यर्हितत्वाद्वा आम्नायशब्दस्य पूर्वनिपातः॥ १॥

वाग्वज्रः—

श्रीमन्न्यायसुधाग्रन्थात् क्रियते त्वर्थसङ्ग्रहः।
वाग्वज्राख्यं महाग्रन्थं निर्मातुं तर्कसङ्कुलम्॥

(अयं ग्रन्थः अर्थसङ्ग्रहरूपत्वात्, उपन्यासरूपत्वाच्च परिशिष्टविभागे मुद्रितो वर्तते।)

गुर्वर्थदीपिका—

नारायणं हयग्रीवं व्यासं वायुं सरस्वतीम्।
नत्वा तत्करुणासत्त्वाद्रमे न्यायसुधाम्बुधौ॥

श्रिय इति भूतिर्महालक्ष्मीरिति च श्रीवाचकपदाभ्यामाद्यन्तयोः संपुटीकरणात् श्रीकरोऽयं ग्रन्थः। तत्र वयमेव साक्षिणः। **नित्यागणितगुणमाणिक्यविशदप्रभाजालोल्लासोपहतसकलावद्यतमस** इति वदता ज्ञानानन्दादि-गुणमाणिक्यविशदप्रभाजालोल्लासेन देशतः कालतश्च पूर्णत्वाख्यमहिम्ना अज्ञानदुःखादिदोषाणामनवसरदुःस्थतया उपहतत्वस्यापि सूचितत्वात् प्रथमद्वितीयार्थयोर्हेतुहेतुमद्भावरूपोऽपि सङ्गतिरुक्ता वेदितव्या। भगवति पूर्णगुणत्व-स्यास्मदादावभावेनासंभावनाशङ्कानिरासाय **जगज्जन्मस्थेमप्रलयरचनाशीलवपुष** इत्युक्तम्। शीलेति वदता प्रयोजनापेक्षणेन सृष्ट्यादिकरणे अपूर्णता, तदभावे प्रयोजनाभावेन सृष्ट्यादिकरणमेवानुपपन्नमिति शङ्काऽपि परिहृता। "देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा" इति हि श्रुतिः। उक्तार्थे प्रमाणाभावशङ्कापरिहारायोक्तम् **अशेषा-म्नायस्मृतिहृदयदीप्ताय हरय** इति। अनेन तृतीयाध्यायार्थोऽपि सूचितः। हरये सांसारिकविविधदुःखापहर्त्रे इत्यनेन चतुर्थाध्यायार्थोऽपि सूचितः।

यादुपत्यम्—

सुखमुखगुणबिम्बः साधुमार्गावलम्बः सुमतिजलजमोदो दूषितान्यप्रमोदः।
भुवनविततमोहध्वान्तविध्वंसकेहो दिशतु दृशमभीष्टां व्याससूर्यः स्वनिष्ठाम्॥ ॥ १ ॥

पूर्णप्रज्ञजयार्यपूर्वकगुरूनानम्य विद्याप्रदान्
वेदेशाभिधयोगिनोऽपि कृपया तेषां सुधाटिप्पणीम्।
बालानां तनुते मितां यदुपतिर्बोधाय धीशुद्धये
स्वस्यापि प्रविचिन्त्य सद्गुरुमुखात्सम्यक् श्रुतार्थान्मुहुः॥ ॥ २ ॥

न पाण्डित्याभिमानेन नापि मत्सरतः क्वचित्।
यत्नोऽयं किन्तु धीवाचोविशुद्ध्यै मम नान्यथा॥ ॥ ३ ॥

अथ परमकारुणिको जयतीर्थश्रीचरणः 'ग्रन्थोऽयमपि बह्वर्थो भाष्यं चात्यर्थविस्तरम्। बहुज्ञा एव जानन्ति विशेषेणार्थमितयोरि'त्याचार्योक्तौ लोकानां विश्वासमुपजनयन्ननुव्याख्यानव्याख्यामारभमाणो अभीष्टसमाप्त्यादि-प्रयोजनकं श्रीपतिस्तुतिप्रणामरूपं मङ्गलं कृत्वा शिष्यशिक्षायै ग्रन्थादौ तदुपनिबध्नाति **श्रियः पत्य** इति। अत्राद्ये पद्ये अनुव्याख्यानाद्यपद्यगतविशेषणचतुष्टयविवरणाय **नित्यागणिते**त्यादि विशेषणानि। तेन तेषां विशेषणानां यद्वक्ष्यमाणं प्रयोजनं तदेतेष्वपि बोध्यम्। गुणमाणिक्यविशदप्रभाजालोल्लासोपहतसकलावद्यतमस इत्यनेन निखिलपूर्णगुणैकदेहं निर्दोषमित्येतयोर्हेतुहेतुमद्भावो विवक्षित इति सूचितमिति ज्ञातव्यम्। यद्यपि स्थिरशब्दप्रकृतिकः स्थेमशब्दो दार्ढ्ये रूढः तथापि स्थाधातुनिष्पन्नत्वायोगेन स्थितिवाच्यपि भवतीत्यभिप्रेत्य स्थेमेत्युक्तम्। अत एव 'अखिलभुवनजन्म-स्थेमभङ्गादिलील' इति प्राचां प्रयोगः। व्याख्यातं च तट्टीकायां स्थेमा स्थितिरिति। स्मृतिपदस्याल्पाच्तरत्वेऽपि आम्नायपदस्याभ्यर्हितत्वात्पूर्वं प्रयोग इति ज्ञातव्यम्॥ १ ॥

वंशपत्नी श्रीनिवासाचार्याः—

वेदव्यासं गुणावासं पूर्णबोधान्मुनीनपि । वन्देऽहं जयतीर्थार्यांस्तथा वेदेशयोगिनः ॥ १ ॥
वेदेशमुनिसत्पादसेवासंप्राप्तवैभवान् । यादवार्यान् न्यायसुधाटीकाकारानहं भजे ॥ २ ॥
तत्पादाराधकश्रीनिवासेन तदनुग्रहात् । टीकाऽगृहीतवाक्यार्थविवृतिः क्रियते मया ॥ ३ ॥

ग्रन्थादौ श्रीपतिनमनरूपं मङ्गलमाचरति श्रियः पत्य इति ॥ १ ॥

आनन्दः—

श्रीमज्जयतीर्थपूज्यचरणोऽनुव्याख्यानव्याख्यां चिकीर्षुः प्रारिप्सितप्रतिबन्धकनिवृत्त्यर्थम् आद्यपद्यं विवृण्वन् स्वेष्टदेवतां प्रणमति **श्रियः पत्ये इति** । अत्र हृये नम इत्यन्वयः । हरिशब्दस्येन्द्रेऽपि प्रसिद्धत्वादिन्द्रादिरत्र नम्यत इति प्रतीतिनिरासायाह **श्रियःपत्य इति** । अनेन च न विद्यन्ते अरा दोषाः यस्याः सा नारा लक्ष्मीः तस्या अयनं नारायण इति नारायणपदार्थ उक्तो भवति । तेन चाचार्यैर्ग्रन्थारम्भे भगवती न वन्दितेति दूषणमपास्तं भवति । न च श्रीपतय इति समासान्तं पदं परित्यज्य भिन्नपदत्वकरणे हेतुः क इति वाच्यम् । तस्य श्रयन्त्येनमिति श्रीः स चासौ पतिश्चेति कर्मधारयप्रतीतिनिरासार्थत्वात् । पदभेदकरणे षष्ठ्या श्रियोऽप्राधान्यस्य स्पष्टं प्रतीतेश्च । अन्यथा भगवतीवन्दनस्य तस्याः अप्राधान्यप्रतीतेश्चासंभवादिति भावः । **मूले निखिलपूर्णगुणैकदेहं निर्दोषमिति** पदद्वयोक्तगुणपूर्णत्वनिर्दोषत्वयोर्हेतुहेतुमद्भावो न प्रतीयते किञ्च **गुणपूर्णत्वस्य निर्दोषत्वे हेतुत्वे पूर्णगुणत्वापगमे** निर्दोषत्वस्याप्यपगमः स्यात् । किञ्च तयोर्हेतुहेतुमद्भावः केन प्रकारेणेति शङ्कात्रयं **परिहरन् निखिलेत्यादि** पदद्वयं विवृणोति **नित्येति** । अत्र नित्यमित्येतद्गुणानामुपहतशब्दस्यापि विशेषणम् । एवं च नित्याश्च ते अगणिताश्च ते गुणाश्च त एव माणिक्यानि तेषां या विशदप्रभा तस्या यज्जालं तस्य य उल्लासः **तेन नित्यमुपहतं सकलभवद्यलक्षणं तमो येनेति** विग्रहः । एवं च दोषा अज्ञानादयः ते च ज्ञानादिगुणेषु सत्सु न संभवन्तीति ज्ञानादिपूर्णगुणत्वं निर्दोषत्वे हेतुरित्युक्तं भवति । गुणानां नित्यत्वोक्त्या च गुणपूर्णत्वापगमे निर्दोषत्वस्य अपगम इत्यप्यपहस्तितम् । प्रभया उपहतमित्युक्त्या तमःप्रकाशयोरिव ज्ञानाज्ञानयोः विरोधात् तस्मिन्सति न तस्यावस्थानमित्येतत्प्रकारेण हेतुमद्भावः । यद्वा हरिगुणमाणिक्यध्याने तत्प्रभया निराकृतं भक्तस्यावद्यलक्षणं तमो येनेत्यर्थः । परदोषनिवर्तकत्वं च स्वस्य निर्दोषत्वं विना न संभवतीति परमात्मनो निर्दोषत्वं सिद्ध्यतीति भावः । **अस्योद्भवादिदमित्यत्र** मूले आदिशब्देन कियतः परिग्रह इति न प्रतीयते अतद्गुणसंविज्ञानबहुव्रीहिणा । स्थितिमात्रकर्तृत्वं च प्रतीयते तच्च श्रुत्यादिविरुद्धम् । किं च प्रयोजनमुद्दिश्येश्वरः सृष्ट्यादि करोति न वा । नाद्यः । अपूर्णत्वापत्तेः । न द्वितीयः । तथात्वे सृष्ट्यादौ प्रवृत्तेरेवायोगादित्याशङ्कात्रयं परिहरन् **अस्योद्भवादिदमित्येतद्विवृणोति जगदिति** । उपलक्षणमेतत् । उत्पत्तिस्थितिसंहारा इति स्मृत्यनुसारेणाष्टकमपि ग्राह्यम् । एवं चादिशब्देन स्थित्यादिसप्तकस्य गृहीतत्वात्तद्गुणसंविज्ञानबहुव्रीहेराश्रितत्वात् । लोकवत्तु लीलाकैवल्यं, देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहेति श्रुतिसूत्रयोः जगत्सृष्ट्यादिकारणस्य परमात्मशीलत्वस्योक्तत्वाच्छङ्काऽप्यपहस्तिता भवति । अखिलैः सुवाक्यैर्निर्दोषमाप्यतममित्यनेन कानिचिद्वाक्यानि

वा परिगृह्यन्ते सर्वाणि वा । नाद्यः । अखिलैरित्यनेन व्याघातात् । न द्वितीयः । तथात्वे गामानय शुक्लां दण्डेनेति लौकिकवाक्येनापि प्रतिपाद्यत्वापत्तेः । किञ्च वाक्यानां वर्णसमुदायरूपत्वे वर्णानां व्यापकत्वेनैतदाप्यत्वस्य आकाशवत्सर्वत्र सत्त्वेन किं विशिष्योच्यते परमात्मनस्तदाप्यत्वमिति । किञ्चात्रातिशयार्थकतमपा को वातिशय उक्त इति न प्रतीयते तथा च कथमेतदिति शङ्कात्रयं परिहरन् तत्पद्यं विवृणोति अशेषेति । अशेषा ये आम्नाया वेदाः स्मृतयः पुराणानि तैः हृदयेन परममुख्यया वृत्त्या महातात्पर्येण दीप्ताय प्रकाशितायेत्यर्थः । एवं च वाक्यशब्देन [illegible]णानामेव गृहीतत्वादाप्यतमशब्दस्य च प्रतिपाद्यत्वार्थकत्वान्महातात्पर्यरूपातिशयस्य तमपोक्तत्वान्न [illegible]ः । तर्हि धर्मादिप्रतिपादकाभावात्तत्सिद्धिर्न स्यादिति वाच्यम् । तस्याप्यवान्तरतात्पर्य-विषयत्वा[illegible]ः । अनिष्टनिवारकत्वसूचनार्थं हरिशब्दप्रयोगः । एवं च पदत्रयेण विशिष्टत्वस्याशेषेत्यनेनाधि-कृतत्वस्य [illegible]नेनेष्टत्वस्य योक्तत्वान्न[illegible]त्वं युक्तमिति भावः ।

कंभ[illegible]न्द्रभिक्षुकृता—

[illegible]कल्याणगुणपूर्णाय कामितार्थप्रदायिने । कञ्जजादीड्यपादाय कमलापतये नमः ॥ ॥ १ ॥

अस्पृष्टदोषवपुषेऽशेषकल्याणशालिने । श्रीरङ्गशायिने नित्यं नमो भक्तेष्टदायिने ॥ ॥ २ ॥

यः प्राणिचेष्टा ह्यनिशं तनोति यत्किङ्कराः शङ्करशक्रपूर्वाः ।
तं मुख्यवायोरवताररूपं पूर्णप्रबोधं प्रणमामि नित्यम् ॥ ॥ ३ ॥

यन्मनोऽभ्युदितन्यायसुधासेवनतत्पराः । भवन्ति विबुधा लोकास्तं जयार्यमहं भजे ॥ ४ ॥

अदायि वित्तं द्विविधं द्विजेभ्यो न्यधायि पादः प्रतिवादिमूर्धनि ।
अमण्डि येन स्वमतं परस्य त्वखण्डि तं व्यासमुनिं नमामि ॥ ॥ ५ ॥

लक्ष्मीकान्तमुनिं वन्दे लक्षणार्यमहं सदा । लक्षितां स्वेन कुर्वाणं लक्षेशान् भिक्षुकानपि ॥ ६ ॥

पदवाक्यप्रमाणज्ञान् सौशील्याद्युपशोभितान् । विजयीन्द्रयतीन्द्राख्यान् सेवे विद्यागुरून् मम ॥ ७ ॥

वेङ्कटेशपदात् सर्ववादिभङ्गविचक्षणम् । श्रीपतीन्द्रगुरुं वन्दे सर्वतन्त्रेषु कोविदम् ॥ ॥ ८ ॥

श्रीवल्लभयतिं शान्तं श्रुतिस्मृतिषु कोविदम् । शान्तं व्यासमुनेः पौत्रं मम देशिकमाश्रये ॥ ९ ॥

अथ तद्दासदासेन रामचन्द्राख्यभिक्षुणा । श्रीमन्न्यायसुधाव्याख्या क्रियते प्रीतये हरेः ॥ १० ॥

मद्वाचि दोषा यदि संभवेयुस्तथाऽपि तान्नैव बुधा भणन्तु ।
गुणैकदृष्टिं परमां विधाय तानेव सम्यक् प्रतिपादयन्तु ॥ ॥ ११ ॥

श्रीमज्जयतीर्थमुनिः प्रारिप्सितन्यायसुधाया निरन्तरायपरिसमाप्तिप्रचयप्रयोजनकमविगीतशिष्टाचारपर-म्परावगतमवश्यकर्तव्यं श्रीहरिप्रणामरूपं मङ्गलं शिष्यान् ग्राहयितुं ग्रन्थादौ निबध्नाति श्रिय इति । क्विब्वचि

प्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसंप्रसारणं चेति श्रित्र: किपि दीर्घे च निष्पन्नस्य श्रीशब्दस्य नेयुवङुवङ्स्थानावस्त्रीति नदीसंज्ञानिषेधात् ङिद्वचने च तत्संज्ञायां ङिति ह्रस्वश्चेति विकल्पितत्वात् श्रिय इति निर्देश: । जगज्जन्मस्थेमेति । यद्यपि पृथ्वादिभ्य इमनिज्वेत्यत्र स्थिरशब्दस्य पृथ्वादिष्वपाठात् पृथ्वादिष्विमनिजभावेन प्रियस्थिरेत्यादिना स्थादेशप्रसक्ते: स्थेमशब्दस्यानुपपत्ति: । तथापि उणादयो बहुलमिति स्थाधातोरौणादिके भावार्थे इमनिच्प्रत्यय आतो लोप इटि चेत्याकारलोपे स्थेमशब्द: साधु: । प्रयोगानुसारेणौणादिकप्रत्ययकल्पने अतिप्रसङ्गाभावात् । प्रयोगाणां चाभियुक्त-प्रयोगेषु रामानुजभाष्यादिषु 'अखिलभुवनजन्मस्थेमभङ्गादिलीले विनतविविधभूतव्रातरक्षैकदीक्षे । श्रुति-शिरसि विदीप्ते ब्रह्मणि श्रीनिवासे भवतु मम परस्मिन् शेमुषी भक्तिरूपा' इत्यादावुपलम्भात् । स्थेमशब्दस्योक्तरीत्या स्थाधातुजत्वादेव श्रुतप्रकाशिकायां स्थेमा स्थितिरिति व्याख्यातं, न तु स्थेमा स्थिरत्वमितीति द्रष्टव्यम् ॥

श्रीनिधितीर्थकृता—

अगण्यदिव्योरुगुणार्णवाकृतिं रमापतिं मां श्रीमदानन्दतीर्थान् ।
जयार्यवर्यान् नरसिंहाचार्यवर्यान् गुरूंस्तथान्यानपि सन्नतोऽस्मि ॥

विद्याश्रीरतिहर्यनुव्रतजनान्यस्तान् गुरूनर्चति
भक्त्या नित्यमुदेधितैर्ननपदं संस्तौति साख्रत: ।
कल्याधि: गुरुशिक्षितानतनुहृत् त्राति स्म यत्सिंहवाक्
वाक्पुञ्जान् विबुधैश्च यश्च कलिहा तं तत्त्वत: सौम्यवाक् ॥

ज्ञानवैराग्यभक्त्यादिगुणपुष्पार्चिताच्युतान् । श्रीवल्लभाख्ययोगीन्द्रान् नौम्यहं तत्कृपाबल: ॥
श्रीनिवासपदाम्भोजयुगलासक्तमानसान् । श्रीनिवासाख्यहंसेन्द्रान् नौम्यहं बुद्धिशुद्धये ॥
श्रीपूर्णबोधगुरवे सर्वाभीष्टाप्तिहेतवे । पूर्णज्ञानादितनवे नम: पूजितविष्णवे ॥

परमास्तिको जयतीर्थमुनि: स्वावरसज्जनकृपापरवशोऽनुव्याख्यानं गहनार्थं व्याख्यातुकाम: प्रारिप्सित-ग्रन्थस्य निरन्तरायपरिसमाप्त्यादिप्रयोजनकं विशिष्टेष्टदेवतानतिरूपं मङ्गलं मनसि निधाय शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति श्रिय: पत्य इति । ननु शेषो घ्यसखीत्यनेन इवर्णान्तत्वेन घिसंज्ञायां घेर्ङितीति गुणे कृते पतय इति स्यात् । न तु पत्य इति चेन्न । पति: समास एवेति व्यस्तस्य घिसंज्ञानिषेधात् । षष्ठीयुक्ते घिसंज्ञास्तीति चेन्न । छन्दसी-त्युक्ते: तत्रापि विकल्पेनैव प्राप्ते लोकेऽपीति केनचित् उक्तमिति चेत्तथापि विकल्पेन तदभावपक्षे साधुत्वोक्ते: । नित्यमगणिता: नित्याश्च ते गुणाश्च नित्यागणितगुणा: । उल्लास: विकास: । प्रभाजालानामुल्लास: । हृदयेन तात्पर्येण स च उद्भूतत्वादेव कश्चिदनुभवसिद्धो धर्मविशेष: । हृदयेन तात्पर्येण दीप्त: प्रकाशित: हृदयदीप्त: । अशेषाम्नायस्मृतिभि: हृदयदीप्त: तस्मै । अत्र च श्रिय: पत्य इत्यनेन लक्ष्म्या अपि वन्दनकर्मत्वमभिप्रेतम् । श्रिय इति भूतिर्महालक्ष्मीरिति च श्रीवाचकशब्दाभ्यां संपुटीकृतत्वात् श्रीकरोऽयं ग्रन्थ इति संप्रदायविद: । हरये सकलसांसारिकदु:खापहर्त्रे इति चतुर्थाध्यायार्थ: सूचित: । शिष्टं स्पष्टम् ।

ननु पृथ्वादिभ्य इमनिज्वेति सूत्रेण स्थिरशब्दादिमनिचि कृते प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रप्द्राघिवृन्दाः इति सूत्रेण इष्ठेमेयस्सुपरतः प्रियादीनां प्राद्यादेशविधानात् स्थिरशब्दस्य स्थादेशे कृते किं स्थेमशब्दो निष्पन्नः आहोस्वित् स्थातृशब्दात् तुरिष्ठेमेयस्स्विति सूत्रेण एषु परतः तृ इत्यस्य लोपविधानात् ज्ञापकात् इमनिचि कृते लोपे तृलोपे च सति स्थेमशब्दो निष्पन्नः। नाद्यः। स्थिरशब्दस्य पृथ्वादिष्वपठितत्वेन तत इमनिचोऽसंभवात्। असतीमनिचि तन्निमित्तकस्थादेशस्याप्यसंभवः। न द्वितीयः। इमनिज्ग्रहणस्य उत्तरार्थत्वेन ज्ञापकत्वानुपपत्तेः। तथा चोक्तं काशिकायाम्— इमनिज्ग्रहणं उत्तरार्थमिति। मञ्जर्यामपि न चेदमेव ज्ञापकं भवितुमर्हति। उत्तरार्थत्वेनाप्युपपत्तेरिति। अतः स्थेमशब्दस्य कथं साधुत्वमिति चेन्न। 'यत्कस्यामपि भानुमान्न ककुभि स्थेमानमालम्बते, जातं यद्धनकाननैकशरणं प्राप्तेन दावाग्निना' इति नैषधे प्रयोगदर्शनात् तत्साधुत्वार्थं स्थिरशब्दस्य पृथ्वादिषूपसङ्ख्येयत्वात्। इकोऽचि विभक्तावित्यादौ अजादिग्रहणस्योत्तरार्थत्वेऽपि न लुमताङ्गेति निषेधाद्यनित्यत्वज्ञापकत्ववत् इमनिचि तृलोपविधानस्य ज्ञापकत्वस्याश्रितत्वाद्वेति।

[illegible]ागण्यबलद्युतिप्रमितिसत्सौख्याग्र्यवीर्यातुलौ-
दार्यप्राभवधीरतामुखगुणव्रातात्मदिव्याकृतिम्।
सन्तापादिसमस्तदोषविधुरं वेदैकवेद्यं जग-
ज्जन्मादिप्रदमिन्दिरेश(ममलं)मनिशं नारायणं नौम्यहम् ॥ १ ॥

वेदाम्भोधिसमुद्धृतातिविलसत्सूत्रामृताम्भोलसद्धारावर्षणतुष्टसद्धृदवनिज्ञानाङ्कुराधायकम्।
संसारातपनाशनं सुरमनःसच्चातकानन्ददं वेदव्यासविचित्रमेघमनिशं मच्छ्रेयसे संश्रये ॥ २ ॥

यद्वाग्विस्तररश्मिभिर्जगदिदं सन्मार्गमालम्बितं सत्सिद्धान्तवरारविन्दनिवहा विस्तारमासादिताः।
दुःसिद्धान्तमहान्धकारनिकरा देशान्तमुल्लङ्घिताः सोऽयं मध्वदिवाकरो भवतु सज्ज्ञानप्रकाशाय मे' ॥ ३ ॥

सत्सूत्रान्वितमध्वभाष्यविलसद्गाण्डीवसंयोजितैः सन्मानेषुभिरर्दयन्कुसमयप्रत्यर्थिदुःस्यन्दनान्।
श्रीकृष्णेरितवेदवाजिनियतश्रीमध्वशास्त्रोल्लसद्दिव्यस्यन्दनसंस्थितो जयमुनीशाख्यार्जुनः स्यान्मुदे ॥ ४ ॥

सच्छास्त्रामलभावबोधकिरणैः संवर्धयन्मध्वसत्सिद्धान्ताब्धिमनन्तशिष्यकुमुदव्रातं विकासं नयन्।
उद्भूतो रघुवर्यतीर्थजलधेस्तापत्रयं त्रासयन्यस्तं नौमि रघूत्तमाख्यशशिनं श्रीविष्णुपादाश्रयम् ॥ ५ ॥

श्रीमद्रामगिरीन्द्रपादनिरतं विद्रावयन्तं दिशो दुर्वादीन्द्रमहामृगान्निगमसद्व्याख्यालसन्नादतः।
दुःशास्त्रेभकुतर्ककुम्भदलनप्रौढात्मविद्यानखं वेदव्यासमृगेन्द्रराजमधिकं वन्देऽनिशं मद्गुरुम् ॥ ६ ॥

वेदान्ताब्धिममन्दबोधगिरिणा सद्ब्रह्मसूत्राहिना दुस्तर्केतरदानवामरगणैः संमथ्य यो लब्धवान्।
सन्न्यायामृतचन्द्रिके युधि तथा तर्केऽकरोत्ताण्डवं सोऽयं व्यासमुनीन्द्रपूज्यचरणो नित्यं भवेन्मे मुदे ॥ ७ ॥

अनुव्याख्याब्धियुङ्न्यायसुधाऽगाधसुरापगाम्।
गुरूणां दयया शुद्ध्यै धियः सेवितुमुत्सहे ॥ ८ ॥

टीकाकारा ग्रन्थादौ मङ्गलमाचरन्ति श्रियः पत्य इति।

नारायणमिति प्रथमपद्यव्याख्यानरूपेऽत्र पद्ये नारायणपदस्थाने हरिपदप्रक्षेपेण प्रादुर्भूत इतिश्लोकोक्तहरेरेव नारायणत्वादुत्तरश्लोकोक्तं तमेवेति समर्थितं भवति।

अत्र श्रियः पत्य इत्युक्त्या नारा लक्ष्मीः तत्पतित्वेन तदयनमित्यभिप्रायव्यञ्जनेन आवश्यकसकल-वाङ्मनसदेवतानमनाभावप्रयुक्तन्यूनताशङ्काऽपहस्तिता भवति ।

पूर्वविशेषणान्तर्गतनिखिलपूर्णगुणत्वस्य तदुत्तरनिर्दोषत्वस्य च प्रयोज्यप्रयोजकभावोऽप्यस्तीत्यभिप्रेत्य गुणावद्ययोर्माणिक्यतमोभ्यामुपमानम्। तदुपपादनायैव प्रभाजालोल्लासेति।

गुणनिखिलत्वोक्तिलब्धोपहन्यमानदोषसाकल्यकथनं सकलेति।

गुणोपहतत्वयोर्नित्यत्वविशेषणेन तयोः कादाचित्कत्वशङ्कां व्यवच्छिनत्ति।

अस्येति परामर्शविषयमादिपदसंग्राह्यं च दर्शयन्नेव प्रयोजनाभावान्नोद्भवादिदानं युक्तमित्याशङ्कां च परिहरति जगदिति।

अत्र स्येमशब्देनान्नदानादिनेव ज्ञानदानेनापि पालनस्याभिप्रेतत्वात्प्रलयशब्देन चाज्ञानबन्धमोक्षाणां रचनाशब्देन तन्त्रेण नियमनस्यापि ग्रहणसंभवादुत्तरत्राष्टकसङ्गाहकत्वेन व्याख्यास्यमानादिपदसङ्गाह्यकथनपरत्वं नास्य युक्तमिति न शङ्कनीयम् ।

[अजिरशिशिरशिथिलस्थिरस्थिरस्थविरखदिराः। स्थास्फाय्योष्ठिलोपः। स्थिरं निश्चलम्। स्फिरं प्रभूतम्। तिष्ठतेर्बुक् ह्रस्वत्वं च। स्थविरः। खद स्थैर्ये हिंसायां च। खदिरः। खदिरी शाखिभेदे स्त्री ना चन्द्रे दन्तधावने इति मेदिनी। बाहुलकाच्छीङो बुक्ह्रस्वश्च। शिबिरम्। शेरतेऽस्मिन् राजबलानि। निवेशः शिबिरं शण्डमित्यमरः। अजगतिक्षेपणयोः अजेर्वीभावाभावः। अजिरमङ्गणम् अङ्गेर्युटि अनादेशस्य बाहुलकाण्णत्वमित्येके। अन्ये तु विश्व-कोशाद्युपष्टम्भेन दन्त्यमेवेच्छन्ति। इह दशापादीवृत्तौ नञ्पूर्वस्य जीर्यतेर्ऋवर्णलोपो निपात्यत इत्युक्तं तदपि ग्राह्यम्। आशु दृतमजिरं प्रव्रमीड्यमित्यादौ न जीर्यतीत्यजिर इत्यर्थस्यानुगुणत्वात्। अजिरं प्राङ्गणे काये विषये दद्रुरेऽनिले। शशाम्रुतगतौ। उपधाया इत्वम्। शिशिरं स्यादृतोर्भेदे तुषारे शीतलेऽन्यवत्। शिशिरो ना हिमे न स्त्री ऋतुभेदे जडे त्रिषु। श्रथ मोचने। उपधाया इत्वं रेफलोपः प्रत्ययरेफस्य लत्वम्। शिथिलम्।] अत्राजिरशिशिरशिथिलस्थिरेत्युणादि-सूत्रेण (उणादीत्यादिपदेन ष्यञ्अञ्त्वतलां समावेशो बोध्यः) स्थाधातोः किरच्प्रत्यये आतो लोप इटि चेति धात्वाकारलोपे च निष्पन्नस्य दृढार्थस्थिरशब्दस्य दृढादित्वेन वर्णदृढादिभ्य (वर्णदृढादिभ्यः ष्यञ्च। चादिमनिच्। शौक्ल्यं शुक्लिमा। दार्ढ्यम्। पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वम्। द्रढिमा धौ ङीषर्थः। औचिती। यथाकामी। ब्राह्मणादेराकृतिगणत्वाद्गुणवचनब्राह्मणादिभ्यः ष्यञ् कर्मणि चेति सूत्रेण ष्यञ्। हलस्तद्धितस्येति यलोपः। चाद्भावे। जडस्य कर्म भावो वा जाड्यम्। मौढ्यम्। ब्राह्मण्यम्। अर्हतो नुम् चेति नुमर्थः पाठः। आर्हन्त्यम्। आर्हन्ती। एकभाव। अन्यभाव। त्रिभाव। एषां पाठः स्वार्थे विधानार्थः। आन्यभावम्।) इतीमनिचि (पृथ्वादिभ्य इमनिज्वा। वावचनमणादिसमावेशार्थम्। ऋतो हलादेर्लघोः। इष्ठेमेयस्सु। टेः। टेर्लोपः स्यादिष्ठे मेयस्सु। पृथोर्भावः प्रथिमा।

पार्थवम् । प्रदिमा । मार्दवम् ।) प्रियस्थिरेत्यादिना (प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षिवप्द्राघिवृन्दाः । प्रियादीनां क्रमात्प्रादयः स्युरिष्टादिषु । प्रेष्ठः स्थेष्ठः स्फेष्ठः वरिष्ठः बंहिष्ठः गरिष्ठः वर्षिष्ठः त्रपिष्ठः द्राघिष्ठः । वृन्दिष्ठः । एवमीयस् । प्रियोरुबहुलगुरुदीर्घाणां पृथ्वादित्वात्प्रेमेत्यादि ।) स्थादेशे निष्पन्नस्येमशब्दस्य दार्ढ्ये प्रसिद्धावपि 'अखिलभुवनजन्मस्थेमभङ्गादिलील' इति रामानुजभाष्यनान्दीश्लोके स्थित्यर्थत्वेन तद्व्याख्यानरूपश्रुतप्रकाशिकायामन्यत्र चामियुक्तप्रयोगाणां बहुलमुपलम्भात्तिष्ठतीति स्थिरमिति व्युत्पत्तेः स्थितिमत्परत्वेऽप्युपपत्तेश्च स्थेमशब्दस्य स्थितावत्र प्रयोग इति द्रष्टव्यम् ।

सुवाक्यैरित्यत्र वाक्यानां शोभनत्वमात्ररूपसुष्ठुत्वस्य प्रकृतानुपयोगादपौरुषेयत्वेन तन्मूल-कामवाक्यत्वेन वा शोभनत्वमुच्यत इत्यभिप्रेत्याप्यतमामित्यत्र तमबर्थं चाह अशेषेति ।

(द्वन्द्वे घि । द्वन्द्वे घिसंज्ञं पूर्वं स्यात् । हरिश्च हरश्च हरिहरौ । अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे । हरिगुरुहराः हरिहरगुरवः ।) न च द्वन्द्वे घीत्यस्य पटुगुप्तावित्यत्राजाद्यन्तमित्यस्य च (अजाद्यन्तम् । इदं द्वन्द्वे पूर्वं स्यात् । ईशकृष्णौ । बहुषु अनियमः । अश्वरथेन्द्राः । इन्द्राश्वरथाः । घ्यन्तादजाद्यन्तं विप्रतिषेधेन । इन्द्राग्नी ।) ईशकृष्णौ इत्यत्र सावकाशत्वेनेन्द्राग्नी इत्यत्रेवाग्नायस्मृतीत्यत्राप्युभयप्रसङ्गे विप्रतिषेधे परं कार्यमित्यजाद्यन्तत्वादाग्नायशब्दस्य पूर्वनिपातसंभवेऽप्यजाद्यन्तमित्यस्य पूर्वोक्तेऽल्पाच्तरमित्यस्य (अल्पाच्तरम् । शिवकेशवौ ।) प्लक्षन्यग्रोधावित्यत्र [redacted]ावित्यत्रेवात्राप्युभयप्रसङ्गे पूर्वन्यायेनाल्पाच्तरत्वात्स्मृतिशब्दस्यैव पूर्वनिपातः स्यादिति [redacted]: क्रियायाः', 'समुद्राग्राद्धः' इत्यादिषु यथायथं व्यभिचारं कुर्वता सूत्रकृतैतत्प्रकरणस्य अनि[redacted]ाच्तरमित्यस्यानित्यत्वाच्छकुनिसूत्रयोरिति साध्विति वदता टीकाकृता तदनित्यत्वस्योक्त[redacted]ाच्तरमिति लक्षणस्य व्यभिचारं कुर्वाणेनेति युक्तिपादीयटीकाकारीयोक्तिश्च तन्नित्यत्वाभ्युपगमवादेन [redacted] न विरोध इति द्रष्टव्यम् ॥ १ ॥

वाक्यार्थरत्नमाला—　*(वाक्यार्थचन्द्रिकायाः व्याख्यानमिदम् ।)*

सद्बोधोरुसुखोन्नतद्युतिवरौदार्याप्रियवीर्यातुल-
स्वातन्त्र्यादिगुणार्णवं जनिमृतिभ्रान्त्यादिदोषातिगम् ।
वैराग्योन्नतभक्तिसंश्रुतिमतिध्यानैश्च साक्षात्कृतं
सद्भिः प्राप्यमजेशपूर्वसुरपं लक्ष्मीनृसिंहं भजे ॥　॥ १ ॥

वेदव्यासं वेदमुद्धृत्य वेदं व्याख्यानार्थं भारताद्यं च सूत्रम् ।
कृत्वाजेशेन्द्रादिदेवेषु दत्वा जैमिन्यादीन् बोधयन्तं नमामि ॥　॥ २ ॥

श्रीमध्वाचार्यवर्योऽनिलवपुरतुलं ब्रह्मसूत्रस्य भाष्यं
कृत्वा दुर्वादिभाष्याण्यपवदितुमनुव्याकृतिं चानुवर्त्य ।
तत्रत्यन्यायदीप्त्यै वरनयविवृतिं चाकरोत्सत्सुखार्थं
तं मे सद्बोधसिद्ध्यै गुरुगमनुभजे वैष्णवाध्वावभासम् ॥　॥ ३ ॥

वाक्चेतसोर्मानिनीं भारतीं त्वां टीकाकृदुक्तौ परिगच्छतो मे।
वाक्चेतसोः संस्कुरु सन्निधानं बद्धाञ्जलिस्त्वां प्रणमामि मूर्ध्ना ॥ ॥ ४ ॥

श्रीमध्वोक्तिविकासनी वरगुरुप्रौढप्रसादार्चिता
दुर्वादीरितमूकतापसरणी गंभीरभावान्विता।
शुद्धा श्रीजयराजवागनुदिनं मद्वाग्घृदोर्भासितां
यद्वानान् मम वागशेषविदुषामल्पापि मान्या भवेत् ॥ ॥ ५ ॥

यः श्रीमान् व्यासतीर्थः सुखमुनिगुरुसंप्रोक्तभाष्यानुभाष्य-
न्यायव्याख्यातसूत्रे जयमुनिरचितव्याकृतौ चातिधीरः।
चक्रे दुर्वादिभङ्गं सुजनसुमतये चाकरोच्चन्द्रिकादि-
ग्रन्थं जीवेशभेदादिपरमनुभजे तं धियो वीर्यसिद्धये ॥ ॥ ६ ॥

रघूत्तमाद्या गुरवो ज्ञानभक्त्यादिशालिनः।
मन्मानसं वर्तयन्तु सच्छास्त्रोक्तसुवर्त्मनि ॥ ॥ ७ ॥

येनालाभि समस्तशास्त्रजमहाज्ञानं समाः षोडशं येनाबोधि रमेशतत्त्वमपवाद्युक्तिश्च दूरीकृता।
येनाकारि विरक्तिरच्युतपदे भक्तिश्च लोकश्रुता विद्याधीशयतिः स मे परगुरुः विद्यादिप्राप्त्यै भवेत् ॥ ८ ॥

यद्धस्तनिःसृतरमेशपदाभिषेकतीर्थेन शुष्कतरवः सरसा गयायाम्।
जाता विपश्यति जने बहुदेशसंस्थे तं दैवतं परपुमांसमहं नमामि ॥ ॥ ९ ॥

पुण्यस्तम्भनिवासिगौतमसरित्स्नानाग्निहोत्रादिसद्धौतार्षादिगुरूक्तकर्मनिचयश्रीशप्रपूजारतान्।
श्रीमध्वीयसुशास्त्रकण्टकहरांस्तद्व्याकृतौ पण्डितान्वन्दे व्यासमुशिष्यसन्नतियुतानानन्दभट्टारकान् ॥ १० ॥

इनोदयस्नानसुरार्चनाग्निहोत्रादिसत्कर्मरतातिशुद्धम्।
श्रीश्रीनिवासाभिधमार्यवर्यं पितृव्यमानौम्यतिधीरशिष्यकम् ॥ ॥ ११ ॥

श्रीमत्सत्यनिधिप्रभूतयतिराट् श्रीसत्यनाथाधिपः सत्याभीनवतीर्थसद्गुरुवरे संवृद्धभाग्यप्रदः।
श्रीकृष्णश्रुतिनाथरामभजकश्चित्रैर्नवैः साधनैः भक्तं मां नरसिंहमाशु कृपया पायादपायात्प्रभुः ॥ १२ ॥

विद्याधीशगुरोरशेषसमयानभ्यस्य मध्वीयसत्तन्त्रार्थं प्रविचार्य चानुहृदयं शास्त्रप्रवक्ताऽभवत्।
दुर्वादीन्द्रसुभङ्गकृद्धरनदीस्नानाग्निहोत्रादिकृच्छ्रीमध्वेशवरार्चने रतमनाः श्रीकेशवार्याह्वयः ॥ ॥ १३ ॥

यद्व्याख्यानस्य शाला त्वहमहमिकया शिष्यसङ्घेन पूर्णा
व्याख्या चातुर्यदूरीकृतकुमतिजना शिष्यवाक्सारयुक्ता।
सायं ज्ञात्यादिशिष्यप्रसुतवरनरावल्लभपूर्वाच्च जात-
प्रीत्या युक्ता गुरुं तं पितरमपि पतिं नौमि मे रूपदीपम् ॥ ॥ १४ ॥

यस्यानुग्रहलेशतोऽहमभवं विद्वत्सुमानाश्रयो यद्वाचानुगतेर्ममदीयवचनं विद्वन्मनोगोचरः।
यो मच्छिक्षणसिद्धये मम करेणालेखयद्वाकृतीस्तत्सेवां करवाणि कां तदुदितार्थालोचनादेः पराम् ॥ १५ ॥

रुग्मिण्यायीमातृपादौ प्रवन्दे सुष्ठ्वन्नादेर्दानतो लालनाच्च।
मां संपात्य ज्ञानिवर्गे निवेशयोग्यं कृत्वाशीर्वचोरक्षितारौ ॥ ॥ १६ ॥

यौ वै शास्त्रचतुष्टयेऽतिनिपुणो दूरीकृताज्ञानको दुर्वादीन्द्रविदारणेतिचतुरो दाने तु कर्णोपमः।
गुर्वानुग्रहवारिधिर्मयि परस्नेहं दयातोऽकरोज्ज्येष्ठभ्रातरमाश्रये सुमतये श्रीश्रीनिवासं गुरुम् ॥ ॥ १७ ॥

अथोक्तनम्यकृपया गुरुशिक्षानुसारतः। यथामति व्याकरिष्ये सौधवाक्यार्थचन्द्रिकाम् ॥ ॥ १८ ॥

श्रीमच्छ्रीगुरुतद्गुरूदितमहाटीकाविवृत्यादिकं नानाशास्त्रगमर्मवाक्यरचनाशैलीविदां शोभते।
अप्येवं गुरुपादचिन्तनबलात्स्मृत्वोरुतच्छिक्षितं न्यायांस्तत्र यतन् स्खलन्नपि पुनर्निन्द्यो न सुज्ञानिनाम् ॥ १९ ॥

श्रीमट्टीकाकारो ग्रन्थादौ मङ्गलमाचरति **नित्यागण्येति** । एतत्पद्यस्य श्रियः पत्य इत्येतदाद्यपद्य-विवरणरूपत्वाट्टीकाकृद्वक्ष्यमाणतत्पद्यगतविशेषणप्रयोजनेषु यावन्ति प्रयोजनानि संभवन्ति तावत्प्रयोजनक-तयैतत्पद्यगतविशेषणानि योजनीयानि । मूलकारीयगुणपदनिर्दिष्टगुणानामुपलक्षणया प्रदर्शनं **बलद्युतीत्यादि** । [redacted]नाशरूपदोषयोरिव दुःखसंभिन्नत्वादिदोषान्तरस्याप्युपलक्षणया निरासपरमित्याशयं ग्यष्टयितुं [redacted]सत्सौख्याग्र्येत्यादि । अत्र नित्यत्वागण्यत्वे बलद्युत्यादिसर्वान्विते । यथासंभवं च सत्त्वादिकं [redacted]वन सर्वान्वयि । प्राभवं प्रभुता । मुखपदेन शक्त्यादेर्ग्रहः । व्रातः समूहः । व्रातात्मा दिव्या अद्भुता [redacted]र्तिर्यस्येति विग्रहः । आद्यपदोक्तदोषाणामुपलक्षणया प्रदर्शनं **सन्तापापीति** । **वेदैकवेद्यमित्येतत्** आगमैकविज्ञेयगुणैकदेहमितिवद्वचुत्पाद्यम् । शिष्टं स्पष्टम् । यद्यपि कर्मण्यणिति कर्मण्युपपदे धातोरणि प्राप्ते तदपवादेनातोऽनुपसर्गे क इत्यनेनानुपसर्गादिवातो धातोः कः इति कप्रत्ययविधानाद्गोद इत्यादावनुपसर्गे तत्प्राप्तावपि गोसन्दाय इत्यादौ सोपसर्गतया कप्रत्ययाप्राप्तौ निरपवादेऽण्येव सति आतो युक् चिण्कृतोरिति युगागमे चोक्तरूपवज्जन्मादिप्रदमित्यत्रापि निरपवादे अण्येव सति युकि च प्रदायमिति प्राप्नोति । तथापि सोपसर्गार्थमारब्धेन प्रे दाञ इति सूत्रेण प्रशब्दपूर्वकाद्दातेर्जानातेश्च कप्रत्ययविधानेन सर्वप्रदः वसुप्रदः फलप्रदः इत्यादेः साधुत्ववत्प्रकृतेऽपि जन्मादिकं प्रददातीति जन्मादिप्रद इति प्रोपसृष्टाद्ददातेः प्रे दाञ इत्यनेन अणोपवादेन कप्रत्यये आतोलोप-इटिचेत्याकारलोपे च प्रदमित्यस्य साधुत्वम् । उक्तं च काशिकायाम्— सोपसर्गार्थमयमारम्भ इत्यादि । कुम्भं करोतीति कुम्भकार इति तिङन्तेन विग्रहेऽपि कुंभस्य कार इति प्रक्रियावाक्याश्रयणेनोपपदमतिङिति सूत्रेण समासवत्प्रकृतेऽपि स्वपदविग्रहसिध्यर्थं जन्मादेः प्रद इति प्रक्रियावाक्यमाश्रित्योपपदमतिङित्यनेन समास इति ज्ञेयम् । विधैवेत्यधिकरणीयहत्याया मोक्षहेतुत्वं कुत इत्येतदनुव्याख्यानमूलटीकाग्रपद्यावसरेऽधिकं च वक्ष्यामः । उत्तमपुरुषप्रयोगसत्त्वस्थलेऽपि वन्देऽहं तम्, वन्देऽहं देवभक्त्येत्यादाविव पृथगेवाहमिति कर्तुरुक्तिरपि युक्तैव ॥ १ ॥

देवतात्वेन नारायणप्रणामं कृत्वा शास्त्रकर्तृविदव्यासरूपेणापि नारायणं मेघश्लेषेण स्तौति वेदेति । वेदलक्षणाम्भोधेः समुद्भूतमतिविलसत्सूत्रामृताम्भः तस्य लसन्ति शोभमाना या धारा तस्याः वर्षतो न तुष्टा सतां हृदयलक्षणाया अवनिः । तस्यां ज्ञानलक्षणाङ्कुराधायकमित्यर्थः । अन्यत्र तु प्रसिद्धजलेन वर्षणादिकं सिद्धम् । प्रसिद्धमेघासाध्यकार्यकथनेन लब्धस्यातिशयस्य कथनं विचित्रेति ॥ २ ॥

एवं दिव्यस्यन्दनेति । मृगेन्द्रराजमिति चातिशयकथनपरम् ।

दिवाकरः इत्यादौ तु विशेषणसामर्थ्यप्राप्तातिशयस्य स्पष्टत्वाशयेनानुक्तावपि न दोषः । सत्सिद्धान्तेति । सत्सिद्धान्तलक्षणानि यानि उत्कृष्टानि अरविन्दानि तेषां निवहाः समूहाः अन्धकारनिकराः तत्समूहाः ॥ ३ ॥

गाण्डीवस्थानीयभाष्यस्वरजुसद्भावप्रतिपादनाय सत्सूत्रेत्युक्तम् । कुसमयलक्षणाः ये प्रत्यर्थिभूताः विरोधिनः दुरत्यन्दनाः दुष्टरथिनः तानित्यर्थः । कृष्णेरितत्वं च वेदव्यासनाम्ना वासिष्ठकृष्णेनोद्धृतत्वं विभक्तत्वादिकं ज्ञेयम् । श्रीमध्वशास्त्रं च श्रीमध्वभाष्यातिरिक्तं अत्र विवक्षितमिति न कश्चित् क्षुद्रोपद्रवः । अर्जुनश्लेषकरणेन इन्द्रावतारत्वादिप्रसिद्धिरपि अनुकूलिता ॥ ४ ॥

सच्छास्त्राणि सूत्रभाष्यटीकारूपाणि । प्रसिद्धकिरणादिवैलक्षण्यं वक्तुं अमलेत्याद्युक्तम् । नयतेः द्विकर्मकत्वात् व्रातं विकासमिति उभयत्रापि द्वितीया ॥ ५ ॥

एवं विद्रावयन्तम् इत्यत्रापि । श्रीमद्रामेति । रामो मूलरामादिः । दिशः प्रति । मद्गुरुम् इत्यनेन उत्तरश्लोकोक्तमठान्तरस्थव्यासतीर्थेभ्यो व्यावृत्तिः सूचिता ॥ ६ ॥

वेदान्ताब्धिमिति श्लोके इतरे सत्तर्काः श्रीमध्वोक्ताः विवक्षिताः । यद्यपि न्यायामृते मध्वसच्छास्त्रदुग्धाब्धिमित्युक्तं तथापि सूत्रे भाष्ये चेत्याद्युक्तेः स्वयं तत्र तत्र श्रुतिविचारस्यापि करणात् वेदान्ताब्धिमित्युक्तेर्न दोष इत्यादि ज्ञेयम् । दुस्तर्केति । दुस्तर्काश्च तदितरे सत्तर्काश्च दुस्तर्केतरे । दानवाश्चामराश्च दानवामराः । दुस्तर्केतरे च ते दानवामराश्च तेषां गणाः । देवानां अमृतलाभवत् चन्द्रलाभवच्च व्यासमुनेः तदुभयलाभं प्रतिपाद्यामृतपानानन्तरं देवैः दैत्ययुद्धकरणादस्यापि तत्स्थानीयमाह युधि तथेति ॥ ७ ॥

यत्र गङ्गासागरसङ्गमः तत्र शरीरशुद्ध्यर्थं सेवाकरणमस्तीति प्रकृते न्यायसुधायाः अनुव्याख्यानसङ्गमं गङ्गासागरसङ्गमोपश्लेषेणाह अनुव्याख्याब्धीति । सुराणां देवानां आपगा नदी भागीरथीति यावत् । न्यायसुधैवाऽगाधा सुरापगा तथोक्ता । अनुव्याख्याब्धिना युक् योगः यस्याः सा तथोक्ता । अनुव्याख्याब्धियुक् चासौ न्यायसुधागाधसुरापगा च तथोक्ता । तामित्यर्थः । धियः शुद्ध्या इति संबन्धः ॥ ८ ॥

मङ्गलमाचरन्तीति । वाचनिकमङ्गलस्यायमाचार एव इति आचरन्तीत्युक्तम् । विस्तृतं चैतत् । मङ्गलमाचरतीति चन्द्रिकाव्याख्याने गुरुराजेन । अत्रापि उपयुक्तम् अनुपदमेव स्पष्टीकरिष्यामः । प्रथमपद्यव्याख्यानरूपेति । अनेनेदं तद्वचाख्यानरूपम् इत्यतः तद्वतविशेषणप्रयोजनकथनम् उत्तरत्र क्रियमाणं नासङ्गतमिति

ध्वनयति । तद्व्याख्यानं चाशेषविशेषतोऽपि वन्द्यमित्यादिविशेषणद्वयं विहायेतरांशे विवक्षितमिति न दोषः । एवमेवेदं च पद्यं भाष्यस्योक्तश्लोकविवरणरूपत्वात् इत्येतत् चन्द्रिकावाक्येऽपि संभवत् अंशाभिप्रायेण विवरणत्वं विवक्षितमिति ज्ञातव्यम् । **प्रक्षेपेणेत्यस्य** समर्थितं इत्युत्तरेण संबन्धः । समर्थनप्रकारकथनं प्रादुर्भूतः इत्यादि पद्यान्तम् । अयमर्थः । तमेवेति श्लोके तं पूर्वप्रणतं नारायणमेव शास्त्रप्रभवं प्रणम्येत्युक्त्या नारायणस्य शास्त्रप्रभवत्वादिना गुरुत्वमुक्तम् । तत्कथम् । प्रादुर्भूत इति श्लोके हरेरेव व्यासरूपेण प्रादुर्भूतस्य शास्त्र-प्रभवत्वादिप्रतिपादनेन नारायणस्य तदभावादिति न शङ्कनीयम् । तत्रोक्तहरेरेव उत्तरमूलानुसारेण नारायणत्वेन हरिस्वरूपप्रतिपादकस्य नारायणस्वरूपप्रतिपादकतया नारायणस्य शास्त्रप्रभवत्वादेरुपपत्त्या तं शास्त्रप्रभवं नारायणमेवेति प्रतिपादनोपपत्तेरिति समर्थितमिति । **नारा लक्ष्मीरिति** । न विद्यन्ते अराः दोषाः यस्याम् इति व्युत्पत्त्येति शेषः । **अभिप्रायव्यञ्जनेनेति** । अनुव्याख्यानकारीयेति शेषः । तादृशदेवताभूतलक्ष्मीपतित्वेन नारायण-वन्दने तस्यापि नमनलाभः । न च तत्पतित्वसमर्पकाभावः । नारायणपदस्यैव तथात्वात् इत्येवंरूपोऽभिप्रायो बोध्यः । **न्यूनतेति** । अनुव्याख्याने प्राप्तेति शेषः । **पूर्णेति** । अनुव्याख्यानगतनिखिलकर्तृ गुणेतिविशेषणंत्यर्थः । संपूर्णस्य एकदेहविशिष्टत्वस्य मूलपदादलाभात् अन्तर्गतित्युक्तम् । **प्रयोज्यप्रयोजकभावोऽपीति** । न केवलं प्रत्येकं वैशिष्ट्यसमर्पकत्वमित्यपेरर्थः । गुणावद्ययोरित्यतःपरं उक्तस्योपहन्तृपहन्यमानभावस्य घटनायेति शेषः । **माणिक्यतमोभ्यामित्यत्र** गुणावद्ययोरिति वर्तते इति शेषम् । उपमानोक्त्या गुणा एव माणिक्यानीत्यादि रूपमिति समास इत्युक्तं भवति । **तदुपपादनायैवेति** । **उपहन्यमानभावोपपादनाय** एवेत्यर्थः । न केवलं उपपादनायात्रोपमानम्, अपि तु प्रमेत्यादिकमपि इत्येवशब्देनाह । माणिक्यस्य द्रव्यान्तरप्रतिघाते उपहन्तृत्वं न संभवतीत्यतः तस्य [redacted]ीति सूचनाय प्रमेत्यादिकं उक्तमिति भावः । यद्वा उपमानोपपादनायैवेत्यर्थः । उपमानमात्रेण [redacted]र्थमिति न शङ्कनीयम् । उपमानोपपादनायैव उपहन्तृत्वसामर्थ्यप्रदर्शनाय तस्याभिधानादित्येव-[redacted]गुणनिखिलत्वोक्तीति । गुणपूर्णत्वस्य निर्दोषत्वोपपादकतयोक्तिस्थितावपि यद्येकमात्रदोषराहित्यं [redacted]त्यत्राभिप्रेतं स्यात् तर्हि ज्ञानादिगुणेषु अज्ञानविरोधिज्ञानोक्त्यैवाज्ञानाख्यदोषाभावरूपनिर्दोषत्वलाभः । एवं दुःखविरोधिकर्णसुखमात्रोक्त्या दुःखाख्यदोषाभावरूपनिर्दोषत्वलाभ इत्येवं एकगुणमात्रोक्त्या तल्लाभात् तदर्थ-सुखादिगुणान्तरप्रतिपादकं निखिलपदं व्यर्थं स्यात् इत्यतो निर्दोषत्वमित्यत्रानेकदोषराहित्यमेवाभिप्रेतमित्याश्रित्य तावत् दोषराहित्योपपादकतया तद्विरोध्यनेकगुणकथनं कृतमिति वाच्यम् । इत्येवं गुणसाकल्यकथनेन दोषसाकल्य-मप्यभिप्रेतमिति लाभात् भाष्याभिप्रेततत्साकल्यकथनीयसकलपदमित्यर्थः । **गुणोपहतत्वयोरिति** । गुणापगमकाले निर्दोषत्वमपि तत्साध्यं नास्ति सत्यपि वा गुणे दोषोपहतिर्नास्तीति कादाचित्कत्वतया यच्छब्दं तदुभयं नित्यत्वविशेषणेन निरस्तमित्यर्थः । अनेन नित्याश्च ते अगणिताश्च ते गुणाश्चेति नित्यत्वगुणविशेषणम् । तथा नित्यम् अगणितगुणमाणिक्यविशदप्रभाजालोल्लासेन उपहतमिति नित्यत्वं उपहतत्वस्यापि विशेषणम् । तन्त्रेण च विशेषणोपादानमिति भाव इति सूचितम् । **अस्येतीति** । न प्राक् परामृश्य अयं इदंशब्दः । किन्तु बुद्धिप्रकृतपरामर्शक इति भावेनेति शेषः । शीलपदव्यावृत्त्या शङ्कं दर्शयति **प्रयोजनाभावादिति** । नप्रयोजनवत्वादित्यधिकरणीय-शङ्केयम् । प्रयोजनोद्देशे चापूर्णत्वं स्यादिति भावः । **अन्नदानादिनेवेति** । पालनस्येत्याकृष्यते । अन्नदानादिना

पालनस्यैवेति योज्यम् । **अज्ञानबन्धमोक्षाणामिति** । मोहान्तमापीपन्नप्रेत्यसंज्ञा इत्यादौ विनाशार्थकप्रलय-शब्दप्रयोगादज्ञानस्य प्रलयपदेन सङ्ग्रहो युक्तः । प्रकृष्टं स लीयते तत् प्रलय इति व्युत्पत्त्याज्ञानबन्धयोः ग्रहणमिति वा । एवं च प्रलयपदेन संहारादिचतुष्टयं सङ्गृहीतं भवति । स्वतन्त्रकृत्यर्थकरचनाशब्देन तन्त्रेणोपात्तेन प्रलयश्च रचना च जन्म स्थेमप्रलयरचनाः तासां रचनेति योजनायाः सूचितत्वात् । प्रथमस्य रचनाशब्दस्य नियमार्थत्वं द्वितीयस्य तु कृत्यर्थत्वं इति योजनीयमिति भावेनाह **रचनाशब्देनेति** । **उत्तरत्रेत्यादि** । अस्योद्भवादिदं इत्येतत् व्याख्यानावसरे मुखतः उपात्तोद्भवव्यतिरिक्ताष्टकेत्यादि योज्यम् । यद्वा आदिपदेत्यस्य उद्भवपदसहितादिपदेत्यर्थः । अत एव उद्भवः आदिः यस्योद्भवादि जन्माद्यष्टकमिति मूले वक्ष्यति । उत्तरत्रेत्यादि न शङ्कनीयमिति प्रतिज्ञायां अत्रेत्यादिसंभवात् इत्यन्तो हेतुः । अनेनैवात्र तद्गुणसंविज्ञानो बहुव्रीहिरित्यपि सूचितम् । आदिपदस्यान्यसङ्ग्राहकत्वविचारस्तु जन्माधिकरणे वैशेषिकाधिकरणे च करिष्यते । किरच्प्रत्यये निरूढत्वप्रतिपादनमुखेन किरच्विधायकमजरेति सूत्रं इत्याशयेनाह **अजरशिशिरशिथिलस्थिरेति उणादीति** । इति उणादीत्यर्थः । आदिपदेन स्फिरस्थविरखदिराः इति सूत्रशेष-ग्रहणम् । स्थाधातोः किरचिस्थिरेति प्राप्तावाह **आतो लोप इटि चेतीति** । आकारान्तधातोः किति इटि च परे आकारलोपो भवतीति सूत्रार्थः । उक्तं च उणादिवृत्तौ दशपद्याम् । ष्ठा गतिनिवृत्तौ । अस्याकारलोपः । तिष्ठतीति स्थिरं दृढमिति सिद्धान्तकौमुद्यां तु स्थास्फाधोश्च टिलोपेति यदुक्तौ तत्तु स्फायतेष्टिलोपस्यावश्यकत्वेऽपि स्थाधातो-राकारलोपेनैव सामञ्जस्ये टिलोपस्यावाच्यत्वात् अयुक्तमिति सूचयितुं चाकारलोपाभिधानम् । **दृढादित्वेनेति** । दृढ्वृढपरिवृढ इत्यादिषु तकणमन्दस्थिरेति **परिगणनादिति** भावः । **वर्णदृढादिभ्यः इतीति** । वर्णा दृढादिभ्यश्चेति सूत्रेणावर्णविशेषवाचिशुक्लादिप्रातिपदिकेभ्यो दृढादिभ्यश्च ष्यञ् भवति चकारात् इमनिच् प्रत्ययश्च भवति भावरूपेऽर्थे विवक्षित इति विधानादिति भावः । **प्रियस्थिरेत्यादिनेति** । **स्थिरोरुबहुलगुरुवृद्धेत्यादिवृन्दाः** इत्यन्तसूत्रेण इष्टन् इमन् इयसुन् प्रियादिशब्दानां प्रस्थाघादेशविधानात् इति भावः । **स्थेमशब्दस्येति** । इमनिच इकारचकारयोर्लोपे गुणे च स्थेमन् इति नकारान्तप्रातिपदिकसिद्धिः । तस्य च दृढार्थकस्थिरशब्दप्रकृतिकतया दार्ढ्यमेवार्थतया प्राप्तम् । न केवलं उक्ताभिप्रायमात्रे अपि तु तथा प्रसिद्धिरपि अस्तीत्यर्थः । तथाच जन्मप्रलयसाहचर्येणात्र स्थितिरूपोऽर्थः प्राप्तोऽपि न युज्यत इति भावः । स्थितावपि **अखिलेति** । प्रयोगाणां इत्येतत् वक्ष्यमाणो बुद्ध्या विवेकेन प्रयोगस्येति लाभात् स्थेमशब्दस्य स्थितावपि नान्दीश्लोके अभियुक्तप्रयोगस्य उपलम्भात् इति वक्ष्यमाणेन संबन्धः सिद्धः । अत्राखिल-भुवनजन्मस्थेमभङ्गादिलीले विततविविधभूतध्वान्तरक्षैकदीक्षे । श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे भवतु मम परस्मिन् शेमुषीभक्तिरूपेति तदीयप्रथमपद्यपाठानुसारेण भुवनजन्मेति पाठः स्वरस एव । जगज्जन्मेति पाठसत्त्वे सार्थानुवादः । एवं भङ्गादिलीले इति ह्रस्वलकारपाठः । सप्तम्यन्तपाठानुसारात् । लाकारपाठो लेखकागतः । भङ्गादिलीला यस्येति विग्रहः । नप्रयोजनवत्त्वात् इत्यधिकरणे तथा प्रमेयस्य तन्मध्ये स्थितत्वात् । **स्थित्यर्थ-त्वेनेति** । स्थेमशब्दस्य स्थितावपि इति वर्तते । तथा च स्थेमशब्दस्य स्थितावपि श्रुतप्रकाशिकायां प्रयोगस्योपलंभात् वक्ष्यमाणेन पूर्ववदेव संबन्धः । श्रीभाष्यीयमङ्गलश्लोकवत् तट्टीकायां पद्यादौ तत् प्रयोगो नास्तीत्यत उक्तं स्थित्यर्थत्वेन तद्व्याख्यानरूपेति । स्थेमा स्थितिरिति । तत्र व्याख्यानात् । श्रौतप्रयोगव्याख्यानेनैव तदीयप्रयोगः सिद्ध इति भावः । केचित्तु नान्दीश्लोके स्थितौ प्रयोगोपलम्भे विप्रतिपद्यमानं प्रति तद्व्याख्यानसंमतिकथनाय इदम् । तथाच

नान्दीश्लोकव्याख्यानरूपश्रुतप्रकाशिकायां स्थेमशब्दस्य स्थित्यर्थत्वेनोपलम्भादिति वाक्यस्य श्रुतप्रकाशिकायां स्थित्यर्थत्वेन तद्व्याख्यानस्योपलम्भादिति योजनाभिप्रेतेति न टीकाकारीयप्रयोगगवेषणादिप्रयासप्रसक्तिरिति प्राहुः । अन्यत्र प्रयोगाः शोध्याः सन्ति । ननु तिष्ठतीति स्थिरमिति हि व्युत्पत्तिः स्थिरशब्दे । सा च उणादिवृत्तौ । दृढमिति दृढ एव दर्शिता । तथा च स्थिरशब्दात् इमनिचि निष्पन्नस्थेमशब्दोऽपि दृढत्वमेव ब्रूयात् न स्थितिमित्यतो भवेदेवं यदि सा व्युत्पत्तिः दृढार्थे न संभवतीति स्यात् । न चैवम् । स्थितिमत्यपि तिष्ठतीति स्थिरमिति व्युत्पत्त्युपपत्तेः । तथाच स्थिरशब्दसद्भावे इमनिचि निष्पन्नस्थेमशब्दस्य स्थितिमतो भावरूपया स्थित्या व्याख्यानोपपत्तिः । वृत्तिकारोक्तिस्तु नान्यार्थव्यावृत्त्यभिप्रायेत्याशयेनाह तिष्ठतीति स्थिरमितीति । इत्यभिप्रेत्येति । आहेति वक्ष्यमाणं अत्रापि संबध्यते । तथा चेत्यभिप्रेत्य आहेत्यस्येति अभिप्रेत्य । पौरुषेयत्वादिरूपं शोभनत्वम् । न तु प्रमाणाभाससाधारणं सुश्राव्यत्वं इत्याहेत्यर्थलाभात् तमवर्थं चेति समुच्चयोपपत्तिः । तमवर्थश्च हृदयपदोक्तो धर्मप्राणादिव्यावृत्तये महातात्पर्यरूपः । उपलक्षणं चैतत् । वर्णानां सर्वगततया वाक्याप्तेः सर्वसाधारणतया तत् व्यावृत्त्यर्थं दीप्तत्वरूपं आप्यत्वं च इह विवक्षितमिति आहेत्यपि बोध्यम् । पटु गुमावित्यत्रेति । सावकाशत्वेनेति वक्ष्यमाणेन संबन्धः । सर्वत्रापि बाधे शास्त्रवैयर्थ्यापत्त्या क्वचित् सावकाशतायाः आवश्यकत्वमिति दर्शयितुं अत्र तत्र तत्र स्थले सावकाशत्वं वर्णितम् । परमितीति । परमितिन्यायेनेत्यर्थः । वक्ष्यति च पूर्वन्यायेनेति । अजाद्यदन्तत्वात् इत्यनन्तरं इन्द्रशब्दस्येवेति शेषः । पूर्वोक्त इति । ईशकृष्णावित्यत्रेत्यर्थः । इत्यत्र चेति । अत्र चशब्दस्य अत्याच्तर इत्यस्य चेति संबन्धाश्रयणात् न वैयर्थ्यमिति ज्ञेयम् । अत एवाजाद्यदन्तं इत्यस्य चेति पूर्वं शब्दप्रयोगः । सावकाशत्वेन वागिन्द्रावित्यत्रेवेति पाठः सर्वत्र । सावकाशत्वेनेवेति । क्वचित्तु पाठे इव पदं लेखकागतम् । अत्याच्तरत्वादित्यनन्तरं वाक्शब्दस्येवेति शेषः । इति न वाच्यं इति पूर्वेणान्वयः । कुतो न वाच्यं [illegible] नित्यत्वेनात्र तत् प्रवृत्त्यभावोपपत्त्या अपवादाभावे अजाद्यदन्तशास्त्रस्यैव प्रवृत्त्या इन्द्राग्नीत्यत्र [illegible]पि आम्नायशब्दस्याजाद्यदन्तस्य पूर्वनिपातोपपत्तेः इति हेतुं मनसि निधाय भवेदेवं यदि तच्छास्त्रं [illegible] तदेव कुतः इत्याशङ्कापरिहाराय तदनित्यत्वे नियामकमाह लक्षणेत्यादि । इत्यादिषु इत्यादिपदेन [illegible]धिकरणजातीययोः नासिकास्तनयोः ध्याधेटोः उत्तमैकाभ्यां चेत्यादेर्ग्रहणम् । अस्तु तदनित्यत्वं सूत्रशापितं तथापि ग्रन्थकाराभिप्रेतोऽयं परिहारः कस्मात् इत्यतः स्थलान्तरे तथात्वेन ग्रन्थकृताभिधानादेवेति परिहरति अत्याच्तरमित्यस्येति । इति वदतेति । तत्त्वनिर्णयटीकायां इति शेषः ॥ ननु व्यभिचारं कुर्वाणेनेत्युक्त्या प्रयोजनार्थलक्षणस्य व्यभिचारः कुत इति प्रतीत्योत्तरग्रन्थे तन्नित्यत्वाभ्युपगमसिद्धेः तद्ग्रन्थविरोधः । तदनित्यत्वाश्रयणे स्यात् इत्यत आह अत्याच्तरमितीति । धर्मादिषु उभयमित्याकृतिगणतायाः आकरे स्वीकारेण गुणवृद्धी वृद्धिगुणावित्यत्रेव पदद्वयस्यापि पर्यायेण पूर्वनिपातसिद्धेः आम्नायस्मृतीत्यपि उपपन्नमिति केचित् । अन्ये तु वासुदेवार्जुनाभ्यां वुन् इत्यादिनिर्देशमूलकाभ्यर्हितं पूर्वं वक्तव्यं इति वचनात् अत्याच्तर शास्त्रबाधेनाम्नायमूलकतया लब्धप्रमाणभावस्मृत्यपेक्षया उपजीव्याम्नायस्याभ्यर्हितत्वात् आम्नायशब्दस्यैव पूर्वनिपात इत्याहुः । एतदुभयपक्षेऽपि तत्त्वनिर्णयटीकाननुसारात् श्वयुवमघोनामतद्धिते इति सूत्रेऽभ्यर्हितस्यापि मघवच्छब्दस्य पूर्वनिपाताभावेन तस्य नियामकस्यापि व्यभिचारेण च प्रकारान्तरे टीकायामभिहितम् । युक्तिपादीयेति । निर्णीतिजयकारक इति

नविलक्षणत्वाधिकरणीयानुव्याख्याव्याख्यानावसरे तथोक्तिरिति ज्ञेयम्। मूले हरये नम इति। नमःस्वस्तीत्यादिना चतुर्थी। नित्यागणितगुणमाणिक्यानीव। तेषां याः विशदप्रभाः तासां यज्जालं समूहः, जालं समूहः आनायः इत्यमरोक्तेः। तस्य यः उल्लासो विकासः। तेन नित्यं उपहतं सकलं अवद्यतमो येनेति विग्रहः। नोद्यते नोच्यते इत्यवद्यं गर्हितम्। वदे नञि उपपदे वदेः सुपि क्यप्चेति यत् क्यपोः प्राप्तयोः तदपवादेन यदेव भवति। स च गर्हायामेवेत्युभयार्थं अवद्यपण्यवर्यागर्ह्यपणितव्यानिरोधेषु इति अवद्यशब्दनिपातनात्। तत् तम इवेति। उपमितं व्याघ्रादिभिः इत्यनेन समासः। अत्र गुणानां माणिक्योपमानेन शुभत्वाभिधानात् अनुभाष्यस्थगुणपदस्य तार्किकादि-परिकल्पितदुःखादिपरत्वभ्रान्तिरपि निराकृता। स्वतन्त्रकृत्यर्थकरचनापदप्रयोगेण दानकर्मणाऽभिप्रेतत्वेन संप्रदान-तयाऽस्येति षष्ठ्यनुपपत्तिरिति शङ्कापाकृता। देहशून्यस्य संबन्ध एवानुपपन्न इति शङ्का वपुषः इत्युक्त्या निराकृता। अनिष्टनिवर्तकत्वार्थकहरिशब्दप्रयोगात्सदा प्रियतमं इत्युपपादितं भवति। अशेषविशेषतोऽपि वन्द्यं इत्येतत् उपपादकतया निखिलेत्यादेः प्रवृत्तिरिति मूले वक्ष्यमाणतया निखिलेत्यादिविशेषणजातविवरणेनैव तस्यापि विवृत-प्रायत्वात् न तदविवरणं दोषाय। उत्तरपद्यस्य किञ्चित् विवरणतायाः वक्ष्यमाणत्वेन आद्यस्य संपूर्णविवरणतायाः सिद्धत्वात् इत्येतावत् मूलार्थो गुरुराजेन पृथगुक्तो ज्ञेयः॥ १॥

सत्यव्रततीर्थीया—

वेदव्यासं मूलरामं नत्वा दिग्विजयं तथा।
गुरूनपि सुधावाक्यव्याख्यां कुर्मो यथामति॥

अथ परमकारुणिको जयतीर्थश्रीचरणः 'ग्रन्थोऽयमपि बह्वर्थो भाष्यं चात्यर्थविस्तरम्। बहुज्ञा एव जानन्ति विशेषेणार्थमेतयोरि'त्याचार्योक्तौ लोकानां विश्वासमुपजनयन् अनुव्याख्यानव्याख्यामारभमाणोऽभीष्टसमाप्त्यादि-प्रयोजनकं श्रीपतिनतिनुतिरूपं मङ्गलं कृत्वा शिष्यशिक्षायै ग्रन्थादौ निबध्नाति श्रियः पत्य इति। अत्र अनुव्याख्यानाद्यपद्यगतविशेषणचतुष्टयविवरणाय नित्यागणितेत्यादि विशेषणानि। तेन तेषां यद्वक्ष्यमाणं प्रयोजनं तदेतेष्वपि बोध्यम्॥ १॥

कुण्डलगिरीया—

(प्रणम्य जयतीर्थार्यगुरूनथ महामुनीन्। कुण्डलादिपदेनेदं लिख्यते गिरिशार्मणा ॥ १॥
श्रीमन्न्यायसुधोपेतं भावबोधाख्यपञ्चकम्। सतां सन्तोषणायैव प्रीयतां तेन माधवः ॥ २॥)

श्रीवेंकटेशाय नमः॥

श्रियः कान्तं सम्यग् गुणजलनिधिं वीतकलुषं
जगज्जन्मस्थेमप्रभृतिदमाम्नाय विदितम्।
सदा सेव्यं सद्भिर्हृदयकमले भानुसदृशं
भजेदेवं नारायणममलसौख्योन्नतिकरम्॥ ॥ १॥

येनाम्नायगणाः सुखावगतये व्यस्ताः पुराणं रविः
यस्मादाविरभूत्तदर्थमितये सद्ब्रह्मसूत्रं महत्।
येनाकाशि परं च तत्त्वमपरं ध्वान्तं निरस्तं मुहुः
स व्यासोऽस्तु हृदब्जगो मम सदा श्रीमान्सुबोधाकृतिः ॥ २ ॥

अव्याजकरुणासिन्धुर्बन्धुः सर्वसतां गुरुः।
स्वामी च वाजिवदनः प्रीयतां चित्सुखाकृतिः ॥ ॥ ३ ॥

येनाज्ञानतमो निरस्तमखिलं हृद्देशगं गोगणै-
स्त्रय्यन्ता सुजनाश्च सूत्रनिचयः पद्मं समुज्जृम्भितम्।
निर्दोषाखिलपूर्णसद्गुणगणो नारायणः ख्यापित-
स्तं वन्दे सुमनोगुरुं मुनिवरं श्रीमध्वभानुं सदा ॥ ॥ ४ ॥

पीत्वा सुधां यदीयां तु सत्संपत्त्या समासते। विद्वज्जना निःसपत्नं तं जयार्यं भजेऽन्वहम् ॥ ५ ॥

यत्प्रणीतप्रबन्धेन भिदुरेण विपश्चितः। भेत्तारो वादिगोत्राणां सेवे तं व्यासयोगिनम् ॥ ६ ॥

स्वादिमानं सुधाया यः सम्यक् ज्ञापितवान् भुवि। रामचन्द्रं गुरुं नौमि विद्वन्मुकुटमण्डनम् ॥ ७ ॥

सभासु जयसंपन्नं सर्वशास्त्रेषु कोविदम्। लक्ष्मीनाथमुनिं शान्तं मम देशिकमाश्रये ॥ ८ ॥

सन्तो मयि महात्मानः शास्त्रे सन्तु दयालवः। मदीयदोषान्विस्मृत्य भक्तिलेशेन तोषिताः ॥ ९ ॥

व्यासतीर्थपदाम्भोजभक्तिपूर्णेन धीमता। सौन्दर्यराजसन्नाम्ना पण्डितेनानुमोदितः ॥ १० ॥

[illegible]लादिगिरिः सूरिः कोंडिभट्टतनूद्भवः। लक्ष्मीनाथमुनेः शिष्यो व्याकरोमि सुधामिमाम्॥ ११ ॥

[illegible] सुधा पूर्वदेशिकैस्तु प्रपञ्चिता। तथापि सुखबोधार्थं ममायं सफलः श्रमः ॥ १२ ॥

[illegible]श्रीमत्परमहंसपरिव्राजकाचार्यः पदवाक्यप्रमाणपारावारपारीणः सकलविद्वज्जनसंश्लाघ्यपटुतरपाण्डित्यः श्रीमज्जयतीर्थमुनिः मुमुक्षुभिरत्यादरेणोपादेयमतिगहनगम्भीरार्थं श्रीमद्ब्रह्मसूत्रानुव्याख्यानं सज्जनानुजिघृक्षया व्याचिख्यासुः प्रारिप्सितविघ्नविघातादिप्रयोजनकमविगीतशिष्टाचारपरम्पराप्राप्तं विशिष्टेष्टदेवतानमनरूपं मङ्गलं कुर्वाणः शिष्यशिक्षायै ग्रन्थतो निबध्नाति श्रिय इति। श्रीशब्दस्य यू स्त्र्याख्यौ नदीति सूत्रेण प्राप्तायाः नदीसंज्ञायाः नेयङुवङ्स्थानावस्त्रीत्यनेन निषिद्ध्यत इति तन्निमित्तकस्य आण्नद्या इति सूत्रशिष्टस्याप्रसक्तेः। 'अचिश्नु' इत्यादिना विहिते इयङादेशे श्रिय इति रूपसिद्धिः। पत्य इति। पतिशब्दस्य शेषो घ्यसखीति सूत्रशिष्टायाः घिसंज्ञायाः पतिः समास एवेति सूत्रेण समासस्थपतिशब्दविषयतया नियमितत्वेन केवलपतिशब्दस्य तदप्राप्त्या घेर्ङितीति गुणस्याप्रसक्तेः पत्य इति रूपसिद्धिः। स्थेमा स्थितिः ष्ठा गतिनिवृत्तावित्यस्माद्धातोः हृभृधृजृस्तृसृभ्य इमनिच् इति सूत्रे इमनिजिति योगविभागाद्वा उणादयो बहुलमिति बहुलग्रहणाद्वा इमनिच्प्रत्यये गुणे च स्थेमन्शब्दनिष्पत्तिः। तत्रोदाहरणं तु हरिमा-भरिमा-धरिमेत्यादि। रामचन्द्रतीर्थीये तु यद्यपि पृथ्वादिभ्य इमनिज्वेत्यत्र स्थिरशब्दस्या-

पाठादिमनिजभावेन प्रियस्थिरेत्यादिना स्थादेशाप्रसक्तेः स्थेमशब्दानुपपत्तिः । तथापि उणादयो बहुलमिति स्थाधातोरौणादिके भावार्थकिमनिचि आद्गुण इति गुणे च स्थेमेति व्युत्पादितम् । अत एवाभियुक्तै रामानुजाचार्यैः स्वभाष्यादौ अखिलभुवनजन्मस्थेमभङ्गादिलीले विनतविविधभूतव्रातरक्षैकदीक्षे । श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे भवतु मम परस्मिन् शेमुषी भक्तिरूपा, इत्यत्र स्थेमशब्दः प्रयुक्तः । स्थेमशब्दस्य स्थाधातुजत्वादेव श्रुतप्रकाशिकायां स्थेमा स्थितिरिति व्याख्यातं न तु स्थिरत्वमिति । आधुनिकैरपि जन्मस्थेमलयं समस्तजगतां यस्यैव लीलायितमिति । अन्ये तु यद्यपि स्थिरशब्दप्रकृतिकः स्थेमशब्दो दार्ढ्ये रूढः तथाऽपि स्थाधातुनिष्पन्नत्वाद्योगेन स्थितिवाच्यपि भवतीत्यभिप्रायेण स्थेमेत्युक्तमित्याहुः । यद्यप्यत्र स्मृतिपदस्य अल्पाच्तरत्वात् घिसंज्ञकत्वाच्चाल्पाच्तरं, द्वन्द्वे घि इति सूत्राभ्यां प्राक्प्रयोगार्हत्वं तथापि आम्नायस्याभ्यर्हितत्वात् अभ्यर्हितं पूर्वमिति प्राक्प्रयोगः । हृदयेति । तात्पर्येत्यर्थः । तथाच अशेषश्रुतिस्मृत्यादिमहातात्पर्यगोचरायेत्यर्थः । अनेनानुभाष्यस्याद्यपद्यविवरणरूपेण श्लोके व्याचिख्यासितानुव्याख्यानमूलभूतब्रह्ममीमांसाशास्त्रप्रतिपाद्यमपि सूचितं भवति ॥

सत्यनाथतीर्थीया—

प्रणम्य रामं मध्वं च जयं सत्यनिधिं गुरुम् ।
सुधादुर्घटवाक्यानां स्वार्थं वक्ष्यामि सन्मुदे ॥

विट्ठलभट्टीया—

इन्दिरापतिमानन्दज्ञानादिगुणविग्रहम् । नमामि सर्वदोषातिदूरं मध्वार्यहृद्गतम् ॥ १ ॥
श्रीमदानन्दतीर्थार्यानगण्यगुणवारिधीन् । शर्वगुर्वादिगीर्वाणदेशिकान् प्रणमाम्यहम् ॥ २ ॥
अनुव्याख्यानदुग्धाब्धिं विमथ्य मतिभूभृता । समुद्धृता सुधा यैस्तान् जयार्यान् प्रणमाम्यहम् ॥ ३ ॥
नृसिंहाचार्यवर्यांश्च ज्ञानादिगुणवारिधीन् । तत्प्रशिष्यान् विट्ठलार्यान् भजेऽहं बुद्धिशुद्धये ॥ ४ ॥

श्रीमज्जयार्यवर्याः शिष्यानुकम्पया अनुव्याख्याव्याख्यानं कर्तुकामाः ग्रन्थादौ मङ्गलमाचरन्ति श्रिय इति । अत्रादौ श्रिय इति अन्ते च भूतिर्महालक्ष्मीरिति विद्यमानत्वात् श्रीकरोऽयं ग्रन्थ इति ज्ञायते । श्रीपतित्वेन विशेषणात् श्रियोऽपि नित्यन्वयो द्रष्टव्यः । तस्याः अत्यन्तरङ्गतायाः ज्ञापनार्थं भगवदन्वितत्वेन नतिरिति ध्येयम् । अनुव्याख्याद्यपद्यविवरणाय श्रियः पत्ये इत्यादि विशेषणानि । नारायणशब्दार्थः श्रियः पत्ये इति निर्दोषतया नारशब्दवाच्यायाः पतित्वेनायनमिति । निखिलपूर्णगुणैकदेहं निर्दोषमित्यनयोः हेतुहेतुमद्भावो विवक्षित इत्याशयेन तदर्थकथनपरं नित्येत्यादि । गुणमाणिक्यविशदप्रभाजालोल्लासेन देशतः कालतो गुणतश्च पूर्णत्वाख्यविस्तारेणोपहतानि सकलानि पारतन्त्र्याद्यवद्यतमांसि यस्य स तथोक्तः । महामाणिक्यप्रभायास्तमोविरोधित्वबद्गुणपूर्तेरप्यवद्यविरोधित्वज्ञापनाय तत्सादृश्योक्तिः । अनेन गुणपूर्तिनिर्दोषप्रतिपादकयोराद्यद्वितीयाध्याययोरर्थोऽपि सङ्गृहीतो भवति । नम्यत्वोपपादकं विशिष्टत्वं च सूचितम् । पूर्णगुणत्वादिरूपलक्षणं च नारायणस्य सूचितं द्रष्टव्यम् ।

अस्योद्भवादिदमित्यस्य विवरणं जगदिति । उपलक्षणतया नियमनादिकं च ग्राह्यम् । अत एव मोक्षदानेन फलाध्यायार्थसङ्गतोऽपि लब्धः । इष्टत्वं लक्षणाष्टकं च सूचितम् । प्रयोजनभावाभावविकल्पदोषपरिहाराय शीलेत्युक्तम् । ननु स्थिरशब्दादिमनिच्प्रत्यये प्रियस्थिरेत्यादिना स्थिरशब्दस्य स्थादेशे सति निष्पन्नस्य स्थेमशब्दस्य दार्ढ्ये प्रसिद्धत्वात् कथं स्थित्यर्थकत्वमिति चेन्न । उभयार्थकत्वोपपत्तेः । यद्यपि पृष्वादिभ्य इमनिज्वेत्यत्र स्थिरशब्दस्य पृष्वादिष्वपाठात् इमनिजभावेन प्रियस्थिरेत्यादिना स्थादेशाप्रसक्तेः स्थेमशब्दानुपपत्तिः तथापि उणादयो बहुलमिति स्थाधातोरौणादिके भावार्थकिमनिच्प्रत्यये आतो लोप इटि चेत्याकारलोपे च स्थेमशब्दः साधुः । प्रयोगानुसारेण औणादिकप्रत्ययकल्पने अतिप्रसङ्गाभावात् । प्रयोगाणां चाभियुक्तप्रणीतेषु रामानुजभाष्यादिषु अखिलभुवनजन्मस्थेमभङ्गादिलील इत्यादावुपलम्भात् । स्थेमशब्दस्योक्तरीत्या स्थाधातुजत्वादेव श्रुतप्रकाशिकायां स्थेमा स्थितिरिति व्याख्यातम् । नैषधेऽपि स्थेमानमालम्बत इत्युक्तम् । आप्यतममित्यादिविवरणं अशेषाम्नायेति । अशेषाम्नायैः पौरुषेयापौरुषेयग्रन्थैश्च हृदयं सतात्पर्यं ज्ञापितायेत्यर्थः । तृतीयाध्यायवर्णनं चाधिकृतत्वोपपादनं च नम्येश्वरसिद्धौ प्रमाणं चानेन सूचितं ज्ञातव्यम् । स्मृतिशब्दस्याल्पाच्तरत्वेऽप्याम्नायस्य स्मृतिं प्रति मूलत्वेनाभ्यर्हितत्वात् अल्पाच्तरमित्यनित्यत्वात् शकुनिसूत्रयोरिति साध्विति टीकाकृतैवान्यत्रोक्तत्वाच्च लक्षणहेत्वोरिति निर्देशः पूर्वनिपातलिङ्गमिति वृत्तिकारेणैवोक्तत्वाच्च पूर्वनिपाताभावः ।

रसरञ्जनी—

श्रीहृत्पद्मनिवासं दासीदासगणसंसेव्यमनिशम् । श्रीशं सेवे मनसा भाव्यं स्वे भावुकैः स्वान्ते ॥ १ ॥
ऐजीरामार्यहृत्पद्मसूर्यबिम्बस्थितं मम । वासुदेवं सदा सेवे तत्त्वमार्गप्रभासकम् ॥ ॥ २ ॥
यद्यपि टीका व्याख्या टीकैव ननु विद्वत्सदसि विदिता ।
अथ ह पुनः सेवायै प्रथयेऽहं प्रकारमात्रं तत् ॥ ॥ ३ ॥
[redacted] मिषेणापि मनसा हरिसङ्गमम् । धन्याः सकलसच्छास्त्रसारमन्या महीतले ॥ ॥ ४ ॥
[redacted]खनन्दिनीं दितिसुतेन्द्रदिग्लापिनीं महीन्द्रतनुसंभवामथ महीन्द्रगोत्रोद्भवाम् ।
[redacted]दयालुहरिदापितां दुरितदावजिद्भायितां सुधामवनिदेवताः पिबत पानपात्रागताम् ॥ ॥ ५ ॥
भारतभुविजन्मवतां भवतरणकरणहरिपदमनुसरताम् ।
भूयाच्छ्रीन्यायसुधा रसरंजनी तन्मानसदा ॥ ॥ ६ ॥
दोषेणापि मदीया वाग्धार्यैव धरिणीसुरैः । श्लाघ्यते गुणलुब्धैर्यत्कण्टकेतापि केतकी ॥ ७ ॥
नन्दतीर्थप्रबन्धाख्यसुधासिन्धुविहारिणः । बान्धवा मत्कृतौ तोषं यान्त्येवान्तरचिन्तकाः ॥ ८ ॥
सुपुण्ये भारतेऽरण्ये ये विज्ञानविवर्जिताः । दुःशास्त्रदूषितात्मानः किं मां निन्दन्ति दुर्बलाः ॥ ९ ॥
टीकाकृद्वरजश्रीहरिदासेष्टजयतीर्थकृतिरूपा । षोडशभागवतीयं पूजा प्रीत्यै हरेर्भूयात् ॥ १० ॥

इह खलु निखिलनिजजनमनोमलापनुत्तये भगवदाज्ञया अवतीर्णस्य श्रीमदानन्दतीर्थगुरुचरणस्य परमानुज्ञां पुरस्कृत्य श्रीमद्ब्रह्मसूत्रभाष्यव्याख्यां कुर्वन्नार्यवर्यस्त्रिविक्रमाचार्य आचार्यकृतबहुनिबन्धतो मन्दमतीनां सुबहुयुक्ति-

सङ्ग्रहाशक्तिमालोच्य मन्दजनानुजिघृक्षया श्रीहरितत्त्वावेदकव्यक्ततरतर्कततिनिबन्धनाय स्वगुरुराजं प्रार्थयामास। ततो भगवान्भाष्यकारः स्वकृताशेषग्रन्थार्थसङ्ग्रहरूपां विशिष्यसूत्रभाष्यविवरणरूपामनुव्याख्यां प्रकटीचकार। तामपि वेदितुमबलान्कलिबलकालितमनोबलान्बालानानन्दयिष्यंस्तत्पञ्जिकामशेषस्वनिबन्धार्थपञ्जिकां प्राचीनटीकागत-विषमपदवाक्यार्थसूचिकां विशिष्य भाष्यटीकाभावबोधिनीमव्याख्यातास्खिलमूलगतविषमपदपङ्कजनन्दिनीं निखिल-निबन्धशिरोमणिं श्रीमन्न्यायसुधामारभमाणो जयतीर्थश्रीमच्चरणो विशिष्टाचारपरम्पराप्राप्तस्वेष्टदेवताश्रीहरिनतिनुतिरूपं प्रारिप्सितविघ्नपरिसमाप्त्यादिसिद्धये कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति श्रियःपत्य इति। हरये नम इत्यन्वयः। श्रियः पत्य इत्यादि विशेषणचतुष्टयस्य तु नमनोद्देश्येन हरिणा विशेषणतया संबन्धः। प्रयोजनं च स्तुतिपदानां विशेष्य प्रशंसैव। तत्रार्थिकपुनरुक्तेः स्तुतित्वमेव समाधानमवधातव्यम्। अथवा कुतो हरेर्नम्यत्वं तथात्वेऽपि कुतोऽन्यासु देवतासु सतीष्वस्यैव नमनमित्याशङ्कापरिहाराय विशेषणचतुष्टयम्। तथाहि। त्रिविधा हि देवता वन्द्या भवति। इष्टा विशिष्टा अधिकृता चेति। वन्दनं खलु भक्त्याद्युपेतमेव सफलम्। तच्चेष्टायामेव देवतायामुपपद्यते। न च देवतावन्दनं व्यसनितया क्रियते। किन्तु विघ्नविघातादिप्रयोजनापेक्षितया। विशिष्टैव देवता तस्येष्टे। अधिकृता तु स्वविषय-ग्रन्थप्रबोधादिकं सम्पादयतीति। तत्र वन्द्यत्वप्रयोजकधर्मवत्त्वाद्वन्द्यत्वमित्याद्यशङ्कायाः परिहारः। तत्रेष्टत्व-प्रदर्शनार्थमाद्यं विशेषणम्। स्वभ्रूविभ्रममात्रेण कमलासनादिपददात्र्याः कमलायाः स्वामिन इति। वैशिष्ट्य-स्फुटीकरणाय तदुत्तरं विशेषणद्वयम्। अधिकृतत्वाधिगमनायान्तिमम्। वन्द्यत्वप्रयोजन(केष्टत्वादिप्रदर्शक-विशेषणजातस्यैवात्र)धर्माणामेव सर्वोत्तमत्वोपपादकतया सर्वोत्तमत्वात्तस्यैवेतरप्रहाणेन वन्द्यत्वमिति द्वितीय-शङ्कापरिहारोऽप्यनेनैव भवतीति सर्वं सुस्थम्।

यद्वा नानिर्धारितस्वरूपस्य प्रणामो युक्तः। नचान्तरेण लक्षणं वस्तुनिर्धारणमित्यतो विभवादनेकानि हरेर्लक्षणान्यन्येनेनोच्यन्ते। तत्राद्येन मुख्यवन्द्यत्वम्। पद्मभवभवादिसमुपासितपादपद्मायाः पद्मायाः अधीश्वरायेति। तस्य च भागवतादिषु भृग्वादिकृतमीमांसापूर्वकसुदृढनिर्णीतत्वप्रसिद्धिं श्रीग्रहणेन सूचयति। इतरथा लक्ष्म्या इत्यवक्षत्। तदुत्तरैर्विशेषणैर्यथासंभवं लक्षणानि सूचितानि बोध्यानि। अन्तिमविशेषणं तूक्तलक्षणो हरिः केन प्रमाणेन प्रतिपत्तव्य इत्याशङ्कानिरसनपरतयाऽपि योज्यमिति। अथवा नायं हरिशब्दो डित्थादिशब्द इव भगवति साङ्केतिकः, नापि घटादिशब्द इव रूढिमात्रेण प्रवृत्तः किन्तु विशिष्टगुणानप्याचष्ट इति ज्ञापयंस्तदर्थमनेन कथयति। एतदपि स्तुत्यर्थमित्यवगन्तव्यम्। तथाहि। हरति विहरति क्रीडते रमयेति हरिस्तदभिप्रायकथनं श्रियः पत्य इति। हरति परिहरति स्वीयगुणप्रभया दोषतमो दूरीकरोतीति वा। सोऽयं विहार इत्युक्तेः क्रीडते जगत्सृष्ट्यादिरूपक्रीडावान् भवतीति वा। वेदगिरोऽखिलाः। यत्क्रीडाभूमय इत्युक्तेः। क्रीडते वेदादिष्विति वेति यथाक्रममवगन्तव्यम्। अथवा श्रोतृबुद्धचनुकूलनाय सकलशास्त्रार्थं सङ्क्षेपतोऽनेनाचष्टे। विदितसङ्क्षेपा हि प्रपञ्चं जिज्ञासवो भवन्ति। तत्र नम इति प्रथमसूत्रार्थोक्तिः। मनोवृत्तेस्तत्प्रवणता हि नमनम्। जिज्ञासापि तद्विशेष एव। तस्य जीवादिव्यावृत्तये यद्ब्रह्मेत्युक्तं तस्यार्थो नित्यागणितेत्यादि। तदुपपादनाय द्वितीयसूत्रे लक्षणमभिहितम्। तदाह जगदिति। तृतीयसूत्रे तत्र शास्त्रं प्रमाणमभिधाय तस्याध्यायशेषेण तद्विषयतोपपादिता। तत्कथनम् अशेषेति। प्रथमाध्यायार्थे शङ्कितदोषनिरासो द्वितीयेऽभिहितस्तमाह उपहतेत्यादि। एवं ब्रह्मस्वरूपे सिद्धे अधिकारिणस्तत्प्रसादनोपायभूततत्साक्षात्कारजननाय

वैराग्यभक्तिभ्यां तदुपासनं कर्तव्यमिति तृतीये निरूपितम् । तस्यायं सङ्ग्रहः अशेषेति । न केवलं भगवन्मात्रोपासनेन पूर्यते किं नाम परिवारभूतानां श्रीब्रह्मादीनामुपासनमप्यावश्यकमित्याशयेनाह श्रियः पत्य इति । स्वरूपावरणव्यतिरिक्तेषु श्रियः श्रेष्ठ्यात्कण्ठत उक्तिः । अथवा अतीव हरिप्रीतिजनकतयाऽत्यन्तावश्यकं भगवदुपासन एव प्रकारमाह श्रियः पत्य इति । भगवत्प्रीतिविशेषपात्रत्वमेव माहात्म्यं नामान्यत्र । ततस्तद्योतकभार्यात्वानुसन्धानं रमात्यन्तप्रीतिजनकमिति सिद्धमेव । माहात्म्यज्ञानस्य प्रसादजनकतायाः लोकसिद्धत्वात्, हरेः श्रीपतित्वोपासनमुभयप्रसादजनकमिति सिद्धम् । अत्र विशेषो भावदीपप्रकाशे द्रष्टव्यः । एतेनैव मनोवृत्तिप्रवणतारूपवन्दनस्तुत्यादिकमपि व्याख्यातम् । श्रीपतित्वेन वन्दनादेरेव तत्प्रीतिसाधनत्वात् । अनेन शिष्टजनशिरोमणिना देव्या वन्दनं न कृतमिति शङ्कानवकाशः । नतिस्तुत्योरुभयोरपि कृतत्वात् । उक्तविधमाहात्म्यद्योतकभगवद्भार्यात्वादिना नमनादि कृत्वा तस्मिन्नेव पद्ये पद्यान्तरे वाऽनिबन्धनाभावस्तूक्तरीत्या तत्पतित्वादिना भगवन्नमनस्याप्यावश्यकतयैकयैवोक्त्योभयलाभे निमित्तमुक्तिगौरवाश्रयणेऽरुच्यैव । एतमेवाशयं मनसि निधायोक्तविधमाहात्म्यद्योतकानि कमलापतेः लक्ष्मीपतेः रमावल्लभं, रमणं श्रियः, रमणं लक्ष्म्याः, रमाया रमणं पतिं श्रियः माधवमध्वयोरित्येवंजातीयकान्येव तथा भगवत्याः प्रसादे भगवद्भार्यात्वतद्वत्तामधर्मद्योत्यतन्माहात्म्यज्ञानाद्यन्तरङ्गसाधनं भागवतानामन्येषां प्रसादे तु तदुक्ततद्योग्यविशिष्टव्यापारकारयितृत्वतद्वत्तामधर्मप्रकटितमाहात्म्यज्ञानादीति विशेषं विभावयितुं कमलाकामुकस्य कमलाश्लेषरसिकः श्रीमच्छ्रीवदनाम्भोजगतसौन्दर्यसौरभाम् । 'लिह्यां लोचनालिभ्यां भगवान्पातु नो हरिः । पान्तु नः पद्मनाभस्य श्रीपदाम्बुजरेणवः । कमलाकबरीभारसुरभीकरणोद्यताः । वचनप्रसूनमाला जयतीर्थाख्यभिक्षुणा रचिता । ध्रीयतां हृदये सदये कमलामहिलेन पूरुषेण' इत्येवंजातीयकानि तथा 'पूर्णबोधानपि गुरून् । नमामि श्रीमदानन्दतीर्थाचार्यं परं गुरुम् । यस्य वाणी कृपाणीयं निकृन्तति भवाटवीम् । धर्मविज्ञानवैराग्यपरमैश्वर्यशालिनः । आनन्दतीर्थभगवत्पादान्वन्दे निरन्तरमि'त्येवंजातीयकानि माहात्म्यद्योतकविशेषणवाचकपदानि प्रायुङ्क्तेति । अनेनैवाभिप्रायेण विद्योपदेशावसरे सकलवाङ्मनसदेवतया रमया युक्तस्यैव हरेः स्तुतिरुचितान्तो रमापतिरिति विशेष्यं निर्दीक्षदिति तत्त्वोद्योतटीकावाक्यप्रवृत्तम् । देवतयेति वन्दनावश्यकतायाः प्रमाणान्तरबलेन रमया युक्तस्यैव [redacted] रमापतित्वेन स्तुतिरित्यर्थस्यावश्यकतया युक्तस्यैवोचितेति श्रीपतित्वेन स्तुतेरावश्यकताया अतो विशेष्यमित्यनेनैकोक्त्यैवोभयसङ्ग्राहकत्वस्य सूचनात् । अनेनैव शुद्धानन्देत्यादिप्रमाणप्रबन्धोऽपि [redacted]वृतः । तत्प्रकारस्तु चतुर्थपद्ये प्रदर्शमानप्रकारेण ज्ञातव्यः । प्रसन्नं च तथादृशं पुमर्थं प्रयच्छति तत्स्वरूपं चतुर्थेऽभिहितं तदभिधानं श्रियः सङ्कल्पमात्रसाध्यस्वस्वयोग्यनिखिलभोगभोक्तृत्वरूपैश्वर्यस्य पत्ये दात्रे इति यद्यपि चतुर्थाध्यायार्थकथनरूपस्यास्य अन्तेनिवेशनमुचितं तथापि श्रीशब्द आदौ निवेशितः परमकल्पदायी तच्छास्त्राध्येतृणामिति शिष्यान्ग्राहयितुमादौ निवेशितम् । अत एवान्ते सदेति । ततश्चादौ पठितस्य श्रीशब्दस्य सविभक्तिकतयान्तिमेन दकारेण संबन्धे श्रीदा न्यायसुधा भक्त्या सेवकानामनादृता इति सिद्ध्यति । पूर्वत्र तत्त्वप्रकाशिकेति । अत्र न्यायसुधेति च संज्ञाकरणस्वारस्यं स एव भर्गशब्दार्थ इत्यत्र स्वयमेव सूचयिष्यति । नात्राध्यायचतुष्टयस्य समन्वयार्थैकैकार्थमात्रप्रतिपादकत्वं किन्त्वेकैकस्याप्यध्यायस्य समन्वयाद्यर्थचतुष्टयप्रतिपादकत्वम् । न चैवमध्यायभेदानुपपत्तिः पौनरुक्त्यादिदोषश्चेति वाच्यम् । विवक्षाभेदेन सामञ्जस्यात् । यदा प्रथमः

समन्वयार्थो विवक्ष्यते न तदर्थतेतरेषामित्यादि । ततोऽस्य शास्त्रस्यैवंरूपेणानेकार्थप्रतिपादकत्वेनेतरश्रेष्ठचादादरनैरन्तर्याभ्यामेतच्छ्रवणमननरूपोपासना कार्येति सूचनाय वा आदौ निवेशितम् । यद्यप्येतत्प्रत्येकं चतुरात्मकाः पादाः सर्वे तदंशाश्चेति मूलकृतैव वक्ष्यते तथापि शिष्यहितैषिणा आदरजननायादावेव सूचितमिति ॥

अथवा आद्यपद्यं भगवतेत्यादिना विशेषतो व्याकरिष्यन् श्रोतृबुद्धचनुकूलनाय सङ्क्षेपतोऽनेन व्याचष्टे । तथाहि । दोषवर्जितमित्रि भाष्यमशेषदोषातिदूरमिति व्याख्यातं तदयुक्तम् । गुणैः सर्वैरित्यत्रैव सर्वपदाभावात् । तद्व्याख्यारूपेऽनुभाष्येऽप्यनुक्तत्वाच्च । अतो यत्किञ्चिद्दोषरहितत्वमेव विवक्षितमिति वाच्यम् । तदप्यनुपपन्नम् । तादृशस्य चास्मदादिसाधारण्यादुक्तविशेषणायोगादित्यतः 'अच्युतो यो गुणैर्नित्यमेवाखिलैः प्रच्युतोऽशेषदोषैः सदा पूर्तित' इत्यादिनाऽन्यत्र सदा अगणितगुणवत्त्वे कथं तद्विरोधिन एकस्यापि दोषस्यावकाशः स्यादिति सदा सकलगुणवत्त्वोक्त्यैव सर्वदोषदूरत्वप्राप्तेरुक्तत्वेनास्य चाशेषनिबन्धार्थसङ्ग्रहरूपत्वात्तदप्यत्राभिप्रेतहेतुहेतुमद्भावेनान्वयस्याभिप्रेतत्वादतो न सदा प्रयोगप्रयुक्तो दोष इत्याशयेनाह **नित्येति** ॥

अथवा विशेषणकृत्योक्तिसमये दोषवर्जितमित्येतन्नारायणपदनिर्वचनपरमित्युक्तम् । तत्र स्वस्य दोषरहितत्वमेवैतदर्थ इति न, किन्त्वशेषस्वभक्तादौ दोषदूरीकरणमपीत्याशयेनाह **नित्येति** । उपहतानि सकलानां सकलावद्यतमांसि **येनेति** । नित्यागणिताः नित्यागणितगुणमाणिक्यानां विशदप्रभाजालोल्लासाः यस्येत्याद्यं विशेषणं तु सदा महापराधेभ्यः कथमशेषनिष्टनिवृत्तिदानमित्यत अशेषगुणतया सकलकीर्त्यस्यैतदपि युक्तमिति द्योतनाय । तदेतदभिप्रेत्य गुणानां माणिक्योपमानं जालादिपदप्रयोगेष्विति । यथाहुर्महाभूतिभाष्ये । 'निरासनाच्च दोषाणां स्वभक्तेभ्यः समं ततः । नारायण इति प्रोक्त' इति । दोषवर्जितपदादेतल्लाभस्त्वच्प्रत्ययमुत्पाद्येति ॥

अथवा 'गुणगणनिलयं पतिं रमाया जगदघदहनं च वासवीसूनुम् । मुनिकुलतिलकं चे'ति प्रमेयदीपिकाद्यपद्ये जगदघदहनं चेति चशब्दो वासवीसूनुरूपगुरुसमुच्चायकजगदघदहनत्वं च तस्यैव विशेषणम् । उत्तरश्चशब्दो विशेषणसमुच्चये इत्यन्यथाप्रतीतिनिरासाय स्ववाक्यं विवृणोति **नित्येति** । अत्र नित्यागणितगुणमाणिक्यविशदप्रभाजालोल्लासश्चासावुपहतसकलावद्यतमाश्चेति विशेषणोभयपदत्वसूचनेन द्वयोरप्येकविशेषणत्वलाभेन रमापतिविशेषणत्वम् । आद्यस्य चशब्दस्य विशेषणसमुच्चायकत्वम् । द्वितीयस्य गुरुसमुच्चायकत्वमिति सूचनेनोक्तशङ्कानिरास इति ॥

अथवा न च मायामयी सृष्टिः 'धाम्ना स्वेन सदा निरस्तकुहकमि'त्यन्यत्रोक्ता युक्तिरप्यत्र विवक्षिता । अस्याचार्यकृताशेषनिबन्धगतयुक्ति(वुक्तादेवहेतोरि)सङ्ग्रहरूपत्वादिति भावेन निखिलपूर्णगुणैकदेहत्वान्निर्दोषमिति योजनां मनसि निधाय यदुक्तं जिज्ञास्यब्रह्मलक्षणसकलगुणपूर्णत्वोपपादकजन्मादिकर्तृत्वप्रतिपादकमस्योद्भवादिदमिति विशेषणमिति तदयुक्तम् । मायामयजगज्जन्मादिकर्तृत्वस्य नरेन्द्रादाविव गुणपूर्त्युपपादकत्वाभावादित्यतो मायामयसृष्ट्यादिकर्तृत्वस्य तत्तत्पदार्थोपादानालाभतदज्ञानसत्यतत्पदार्थनिर्माणाशक्तितज्जन्यफलालाभतत्प्रयुक्तरागद्वेषचिन्ताद्यनेकदोषनिबन्धत्वेन श्रुत्यादिसिद्धतत्सर्वलाभसार्वज्ञपूर्णशक्त्यादिगुणगणे ब्रह्मणि तद्विरोधिदोषसञ्चारानवकाशेन तत्कल्पकाभावेन सत्यजगज्जन्मादिकर्तृत्वस्यैव श्रुत्यादिसिद्धत्वेन निराबाधत्वेन गुणपूर्तिसिद्धिरित्यभिप्रेत्य

धामपदसूचितप्रभात्वादिनोभयोरभिधानम् । अगणितत्वस्यान्यव्यासङ्गादिनिमित्तत्वे तादृशागणितगुणत्वेन नोक्त-सिद्धिरित्यतो मुख्यमेवेत्याह नित्यमगणितेति । नित्यमनवरतं नियमेनादरेण च गणनेऽप्यलब्धपारेति । ननु व्याख्यानतो हि व्याख्येयतात्पर्यं निश्चेयं ततश्च निर्दोषाशेषसद्गुणमित्यस्यानन्तलक्षणोक्तिपरता निखिलपूर्णगुणैकं देहं निर्दोषमित्यनयोऽस्त्येकलक्षणपरता च कथं न मूलकर्तुः स्वव्याहतिमापादयेत् । कथं वा अत्र निर्दोषग्रहणेन पारतन्त्र्यराहित्यादीन्यशेषसद्गुणमित्यनेन परिपूर्णानन्दादीनि चानन्तानि लक्षणानि सूचितानि तदर्थमशेषेत्युक्तमिति । निखिलेत्यनेन त्रीणि लक्षणान्युदितानि, निर्दोषमित्यनेनैकमिति तद्व्याख्यातुर्नाचतुरतां संपादयेदित्याशङ्कां वा गूढाभिसन्धिरत्राप्यनन्तलक्षणपरतास्वीकारेण परिहरति अगणितेति । अभिसन्धिं तु तद्व्याख्यावसरे व्यक्तीकरिष्यामः । उपमानभागे विशदेति जालेत्युल्लासेति च सकलपदसङ्कोचव्यञ्जनमिति न कृत्यगवेषणायासः । नित्यमगणितगुणा एव माणिक्यानि तेषां विशदाः निर्मलाः याः प्रभास्तासां यानि जालानि तेषामुल्लासेन विलासेन नित्यमुपहतानि सकलावद्यतमांसि येन तस्मा इति विग्रहः ॥

अथवा 'सर्वज्ञत्वादिभिः सर्वगुणैर्युक्तं सदाशिवम् । जगद्विचित्ररचनाकर्तारं दोषवर्जितमि'ति मूलकारीयः सर्वगुणैर्युक्तं दोषवर्जितमिति प्रधानलक्षणविरुद्धार्थोपन्यासो न युक्तः । दोषवर्जितत्वस्य प्रधानलक्षणान्तरस्यैवाभावात् । अन्यथा 'जन्माद्यस्येति सूत्रेण गुणसर्वस्वसिद्धये । ब्रह्मणो लक्षणं प्रोक्तम् । अन्वयः सर्वशब्दानां गुणसर्वस्ववेदक' इत्यादिना तावन्मात्रस्य प्रधानलक्षणत्वोक्त्ययोगादित्यतो न पृथगुक्त्यन्यथानुपपत्त्या प्रधानलक्षणत्वाभावसिद्धि-स्तस्या उक्तरीत्या गुणप्रत्यधीनसिद्धिमूलकत्वादित्यभिप्रेत्याह नित्येति ॥

अथवा आद्ये अध्याये सकलशास्त्रसमन्वयेन सकलगुणगणत्वं समस्तजगज्जन्मादिकारणत्वं च समर्थितम् । तत्रोभयत्र युक्त्यादिविरोधः परिहीयतां द्वितीये निर्दोषत्वसमर्थनस्य का सङ्गतिस्तस्य प्रागनभिहितत्वादित्यतः सकलशास्त्रसमन्वयेन जगज्जन्मादिकारणत्वे समस्तगुणगणपरिपूर्णत्वेऽशेषदोषविधुरत्वे च परस्य ब्रह्मणाभिहित एव तत्र विरोधः परिस्फुरति नान्यथा निराश्रयत्वात् । विरोधस्फूर्तिरेव तदभावसाधनस्यावसरो नेतरथा । अप्राप्तप्रतिषेधा-योगात् । तदेवं द्वितीयार्थभूतं विरोधाभावसाधनं प्रति परम्परया प्रथमार्थस्योपजीव्यत्वादुपजीव्योपजीवकभावसङ्गति-[redacted]तुं निर्दोषत्वस्य प्राक्समर्थितत्वप्रकारं प्रकाशयति नित्येति । अत्र विशेषं तदवसरे प्रदर्शयिष्यति ॥

अस्योद्भवादिदमित्युक्तं तत्र जगन्निर्माणादिनेश्वरस्य प्रयोजनमस्ति न वा । आद्ये यत्प्रयोजनार्थं सृष्ट्यादि-स्तदूनत्वादपूर्णता । द्वितीये प्रेक्षावतः प्रवृत्त्ययोग इत्यतस्तां शङ्कां परिहर्तुं न चातृप्तः प्रवर्तते किन्तु मृषा वृथैवेति तात्पर्योक्तां युक्तिं मनसि निधायाह जगदिति । द्वितीयपक्षमङ्गीकृत्य स्वभावत्वाङ्गीकारेण तत्रोक्तदोषपरिहार इति शीलग्रहणेन सूचयति । यद्यपीदं नप्रयोजनाधिकरणे वक्ष्यते तथाऽप्युत्कटायाः शङ्कायाः परिहरणीयत्वात्सङ्क्षेपतो व्याख्यानत्वसूचनार्थत्वाद्वात्रोक्तमिति ॥ अयं न्यायोऽन्यत्रापि बोध्यः । स्वप्रयोजनाभावेऽपि परप्रयोजनसद्भावादुक्तं युक्तमिति प्रथमपक्षाङ्गीकारेणापि शङ्कां निराह शीलवपुषे पातालादिलोकोत्पादनस्वभावायनेकावयवोपेतविग्रहवत इति । एवंरूपेण ध्यानादिना भक्तपुरुषार्थसिद्धिरेव प्रयोजनमिति ॥ यथाहुः । सोऽयं विहार इह मे तनुभृत्स्वभाव-संभूतय इति ॥ नन्वस्योद्भवादिदमित्यत्र जन्माद्यष्टकविवक्षास्ति न वा । आद्ये तद्व्याख्याने जन्मस्थेमप्रलयेति

त्रितयमात्रग्रहणमनुपपन्नम् ॥ द्वितीये 'सृष्टिस्थितिश्च संहारो नियतिर्ज्ञानमावृतिः । बन्धमोक्षावपि ह्यासु श्रुतिषूक्ता' इति स्ववाक्यविरोधः । उद्धव उत्पत्तिरादिरस्येत्युद्धवादि जन्माद्यष्टकमिति तद्व्याख्यानासङ्गतिश्च । न च प्रथमपक्ष एवाङ्गीक्रियते । त्रितयमात्रोक्तिश्चोपलक्षणाभिप्रायेणेति वाच्यम् । तथात्वेऽपि जन्ममात्रग्रहणेनाप्युपलक्षणसंभवेन त्रितयग्रहणे प्रयोजनाभ्यादिति चेत् । उच्यते । यत्तावद्विकल्पितमष्टकविवक्षास्ति न वेति तत्रास्तीति ब्रूमः । तत्र यदुक्तं त्रितयमात्रग्रहणानुपपत्तिरिति । तन्न । उपलक्षणयाष्टकस्यापि ग्रहणात् । न चैकोक्तावपि उपलक्षणयाष्टकग्रहणसंभवेन कण्ठतस्तृतयग्रहणे प्रयोजनाभाव इत्युक्तमिति वाच्यम् । प्रयोजनाभावस्यैवासिद्धेः । तथाहि । अत्रोच्यमानं जन्मादिकर्तृत्वं तावज्ज्ञानद्वारा मोक्षोपयोगीति 'सृष्टिरक्षाहृतिज्ञाननियत्यज्ञानबन्धनान् । मोक्षं च विष्णुतश्चैव ज्ञात्वा मुक्तिर्न चान्यथे'त्यादिप्रमाणप्रसिद्धम् । न च ज्ञातमात्रं मोक्षोपयोगी किन्तु याथातथ्येन । यथास्थितिश्च तस्यैवम् । अस्येत्यनेनोक्तमीश्वरातिरिक्तं प्रमितं सर्वचेतनाचेतनतया द्वैराश्येन विवक्षितम् । तत्र जन्माद्यष्टके त्रितयस्य राशिद्वयविषयत्वं उत्तरपञ्चकस्य तु चेतनमात्रविषयत्वमिति । अस्य विशेषस्यानुक्तौ कथमवगतिः स्यात् । अन्यथावगतिस्ततोऽनर्थावगतिर्वा कथं न स्यादतः स वक्तव्य एव । अष्टकमुक्त्वा विशेषवचने च सङ्क्षेपव्याख्यानत्वहानिः स्यादतः सङ्क्षेपेणैव कार्यमतोऽष्टकग्रहणे कार्ये कृतं तृतयमात्रग्रहणं अन्यतोऽविशेषं सूचयत्येव । ततो विशेषज्ञापनरूपप्रयोजनसद्भावाद्युक्ततरं तन्मात्रग्रहणमिति । एतमेव विशेषं सूचयितुं जन्माद्यस्य यतोऽन्वयादिति भागवताद्यपद्यव्याख्यानरूपे तात्पर्याद्यपद्ये सृष्ट्याद्यष्टकमादिपदार्थमुक्त्वा तत्र सृष्टिस्थित्यप्ययेहा इति नियतिदृशितमोबन्धमोक्षाश्चेति त्रितयपञ्चकघटितसमूहद्वयस्य विवक्षितत्वाद्विष्णोर्व्यस्ताः समस्ता इति क्रमेण सृष्ट्यादित्रयस्य व्यस्तत्वं राशिद्वयसंबन्धित्वरूपं विस्तृतत्वं नियत्यादिपञ्चकस्य समस्तत्वमेकराशिमात्रसंबन्धित्वरूपं सङ्कुचितत्वं च प्रदर्शितम् । तद्विवक्षितविशेष एवात्राभिमत इति तत्रत्य ईहापदस्य रचनेति व्याख्यानेन सूचयति । व्याख्यानकरणेऽन्यथेहायाः इच्छारूपायाः भगवत्संबन्धिन्याः जगत्संबन्धिसमुच्चयेत्यादिना सहपाठो यस्मादित्यनेनान्वयश्चानुपपन्नः स्यादिति । यद्यपि धात्वर्थमात्ररूपस्वव्यापारेषु कारकत्वापाद्यनरूपं नियमनमपि राशिद्वयसंबन्धि, तथापीष्टानिष्टप्राप्तिपरिहारेच्छापूर्वकिषु स्वस्वव्यापारेषु कारकत्वापादनरूपमेव नियमनमत्र ज्ञातव्यतया विवक्षितम् । अचेतनस्य स्वतो व्यापाराभावेन चेतनाधीनव्यापारकारकत्वेऽतिविवादाभावात् । चिकीर्षितकार्योपसंहारादिना चेतनस्वातन्त्र्यस्यैव सुदृढनिरूढत्वेन चेतननियमने बहुविवादात् ईदृशनियमनस्य च चेतनमात्रसंबन्धित्वं युक्तम् । यत्र तदपि ज्ञेयतयोच्यते तत्सर्वथा वचनेनास्त्येवेति मन्दप्रतीतिनिरासाय वा प्रसङ्गे सति वास्तवं वक्तव्यमिति सूचनाय वा दृष्टान्ततया वा निर्दलतादृशवाद्येकदेशिनिरसनाय वेति । अचेतनसृष्टिमात्रादावतिविवादाभावेऽपि ईश्वरकर्तृके तस्मिन्बहुवादिविवादान्न तदुक्तिसंभव इति अस्येत्येतत्परामर्शविषयप्रदर्शनं जगदिति । जन्म स्थेमा स्थितिश्च प्रलयश्च तेषां रचनाशीलं स्वभावो यस्य तादृशं वपुर्यस्य तस्मा इति । अथवा जन्माद्यष्टके पञ्चकं भवतु विष्णोः, तस्यान्यकर्तृकत्वेन प्रसिद्धचभावात् । तथा स्थितिकर्तृत्वं च । तत्कर्तृत्वेन प्रसिद्धत्वाच्च । जन्मप्रलयौ तु सर्वथाप्यनुपपन्नौ । तयोरन्यकर्तृकतया सुप्रसिद्धत्वादित्यतस्तयोरपि तत्कर्तृकत्वं संभवतीत्याह जगदिति । अत्र स्थेम्नो दृष्टान्ततयोपादानं यथा तत् तत्कर्तृकं तथैतद्वयमपीति प्रसिद्धिविरोधात्कथं संभवतीत्यत उक्तं शीलानि वपूंषि विरिञ्चहरिशिवनामानि यस्येति । प्रसिद्धेर्ब्रह्मकर्तृत्वमात्रविषयतयोपपत्तेरत्रोच्यमानस्य विष्णोर्मुख्यकर्तृत्वस्य

न तद्विरोध इति । यथोक्तम् । परः पुरुष एक इहास्य धत्ते स्थित्यादये हरिविरिञ्चहरेति संज्ञा इत्यादि । अनेन यत्राष्टकमनुक्त्वा त्रयमेवोच्यते सदुद्भवस्थाननिरोधलीलेत्यादौ तत्र सर्वत्राप्युत्तरपक्षके न विवादः । आद्यत्रयेऽप्येकं स्फुटं तदृष्टान्तेनान्यद्वयमपि ज्ञेयमित्याशय इति सूचयति । अनेनैव विश्वोत्पत्तिस्थितिध्वंसकारणमित्यादि स्ववाक्यमपि विवृतं वेदितव्यम् ॥

अथवा एतत्त्रयस्य क्रमेण ब्रह्मेन्द्ररुद्रकर्तृकतया प्रसिद्धत्वात्कथमेतदित्यवतरणीयम् । वर्षणादिनेन्द्रस्य पालनकर्तृत्वं च लोकतो दशमभागवतादिना च प्रसिद्धमिति । उक्तलक्षणो नारायणः केन प्रमाणेन प्रतिपत्तव्य इत्यतः सुवाक्यैराप्यतममित्युक्तम् । तदयुक्तम् । जीवाद्भवन्ति भूतानि प्रधानादिदमुत्पन्नमित्यादौ विष्णोर्जगत्कारणत्वाद्य-प्रतिभासात् । प्रत्युत जीवादीनामेव तत्प्रतिभासात् । सुवाक्येत्यत्र शोभनत्वविशेषणमपि व्यर्थम् । अशोभन-वाक्यव्यावृत्त्यर्थत्वे कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ जीवा एव तु दुःखिन इत्यादिबद्धदुःख्यादि-पदघटिताशोभनवाक्यप्रतिपाद्यत्वस्यापि वक्ष्यमाणत्वेन तद्विरोधापत्तेरित्यतस्तद्विशेषणं समञ्जसीकरोति अशेषेति । आपाततो जीवाद्युत्कर्षप्रतिभासेऽपि तात्पर्यतो विष्णूत्कर्ष एव प्रतिपाद्यत इत्याशयेनोक्तं हृदयेति । अनेनाद्य-चोद्यनिरासः । शोभनत्वं चात्रानाशङ्कितदोषत्वम् । तच्चापौरुषेयत्वेन तत्संवादित्वेन वेति सूचनाय वाक्यपदं विवृणोति आम्नायेति । अनेनेदृशशोभनत्वस्योदाहृते वाक्येऽपि सत्त्वेन न तद्व्यावर्तीरिति न वक्ष्यमाणविरोधः । नापि तद्वैयर्थ्यम् । सदागमैकविज्ञेयमित्यादाविवातादृशवाक्यव्यावर्तकत्वेन तत्सार्थक्योपपत्तेरिति द्वितीयशङ्कानिरासः । स्मृतीत्यस्यात्याच्चत्वेऽपि प्राधान्यप्रज्ञापनायाम्नायस्य प्रथममुक्तिः । उभयार्थः स्यादित्युक्तेः साम्यप्रतीतिप्रसक्तौ निर्णीति जयकारक इति तत्त्वनिर्णीतिः प्राधान्यप्रदर्शनार्थं विवरणं कृतम् । अल्पाच्तरमिति लक्षणस्य व्यभिचारं कुर्वाणेनापि एतदेव सूचितम् । अन्यथा जयनिर्णीतिकारक इत्यवक्ष्यदित्यादिना युक्तिपादे जल्प इत्यपि नाम स्याद्वादस्यैतादृशस्य त्वित्येतन्मूलव्याख्यानव्याजेन स्वयमेव स्वाभिप्रायं विशदयति । अखिलैरित्यस्यानु-च्छित्त्यर्थकत्वे प्रकृतानुपयोगात्प्राणादिवन्यतोशङ्काऽनिरासाच्चेत्यतस्तद्व्याचष्टे अशेषेति । सदा वन्द्यमित्येत-त्प्रथमसूत्रार्थकथनरूपमित्येतदयुक्तम् । जिज्ञासायाः निर्विषयत्वेनाविधेयत्वात् । न च सूत्रकृता जीवादि-[redacted]बोधकब्रह्मपदेन भाष्यकृता च नारायणपदेन चोक्त्या कथमेतदिति वाच्यम् । तथापि नारायण-[redacted]त्वेन रूपविशेषानिर्णये विचारायोगादित्यतोऽनन्तरूपवत्त्वेऽपि नारायणस्य रूपविशेषध्यानस्यैव [redacted]न्तरसाधनत्वेन तदेव मुमुक्षुणा सर्वथा संपाद्यं तदलाभे त्वनन्तेष्वपि रूपेषु यत्र मनो विशति तदेव तल्लाभ-पर्यन्तं यथाशक्ति ध्येयम् । सति तल्लाभे तदेव, तत्र मनोऽविक्षेपादावन्यदपि वा, तच्च रूपमिदमेवेत्याशयेन नारायणपदविवक्षितमर्थं दर्शयति हृय इति । एतत्तत्त्वं पुरुषार्थसूत्रव्याख्यावसरे स्वयमेव स्फुटीकरिष्यति । एतेन किमपि च वदन्तोऽपीत्यत्रत्यं किमपीत्येतद्विवृतं भवति ॥

अत्र विशेषस्तु भावदीपप्रकाशे द्रष्टव्यः । मम प्रियतममित्यत्र ममेत्येतद्व्यर्थम् । प्रियतमत्वमात्र-स्यैवाव्यभिचारादित्यतो वाह अशेषाम्नायस्मृतिहृदयदीप्यमानेति । अशेषेत्युभयविशेषणम् । अभिमन्यमानवाचक-पदस्याभिमानिनयन्यायेनाभिमानिनि मुख्यतया तेन पदेन तन्मुख्याभिमानिप्राणनायकपरिग्रहः । तस्य हृदये भक्तोपासनार्थं दीप्यमानायेति । अयमाशयः । नात्र ममेतिपदं प्रियतमत्वघटकं येन तस्य वैयर्थ्यं स्यात् । किं नाम

ममातीव तत्प्रीतिविषतया मुख्यप्रतिमात्वं ततो मयैवोपासनं कार्यमित्येतत्प्रमेयद्योतकमेवेति न वैयर्थ्यशङ्केति । उपास्यस्य भगवत आयतनं प्रतिष्ठा रहस्यं नाम तत्प्रवृत्तिनिमित्तं चेति चतुष्टयं खलूपासकेन ज्ञेयम् । एकन्यून-तायामपि प्रोक्तफलानुदयात् । तदनेन प्रतिष्ठा दर्शिता । आयतनं चाह हृदयदीप्तायेति । सर्वेषामुपासकानां हृदय-रूपे स्थाने यतो दीप्यते अतस्तदेवोपासनायतनमिति । ननु स्वस्वहृदये चोपासना कार्या वेदायतनस्य सुलभतया सर्वेऽपि कुर्युस्ततस्तत्फलं ज्ञानं चाप्नुयुरिति चेन्न । आयतनमात्रस्य सौलभ्येऽप्युपासनामुख्यसाधनाभावात् । किं तन्मुख्यसाधनमित्यत उक्तम् अशेषाम्नायस्मृतीति । अशेषाम्नायस्य तदर्थस्य वायुना वा इत्युदितगुणोपेतस्य सूत्ररस्यान्तर्यामिणश्चोक्तरूपेणानवसरस्मृत्येति । तदेतत्सूचयितुं तात्पर्यादिपदपरित्यागेन हृदयपदप्रयोगः । रहस्यं नामाह हरय इति । तत्प्रवृत्तिनिमित्तमाह जगत्प्रलयकर्ता इति । जगत्पदं योग्यमात्रपरम् । जगद्रुरूणामित्यादिवत् । तस्य तत्संबन्धि यः प्रकर्षेण सर्वात्मना ल्यो दुःखस्य प्रलयस्तत्कारणायेति । एतेन हरत्यनिष्टमिति हरिरित्या-त्यन्तिकानिष्टनिवृत्तिरूपमोक्षदातृत्वं हरिपदप्रवृत्तिनिमित्तमिति सूचितम् । एतत्फलमपि न प्रथममेव ददाति किन्तु किञ्चिद्द्वारीकृत्येत्याशयेन रचना कल्पनेति । किं तद्द्वारमित्यत आह जन्मज्ञानं चेति । द्वेधा हि जननं शरीरेण विद्यया चेत्येतत्सूचनाय जन्मपदप्रयोगः । तेन शरीरतो जननमिव विद्यया जननमपि नैतत्प्रयत्नसाध्यमिति सूचितम् । ज्ञानोदयस्य जन्मरूपत्वं च पराधीनविशेषितेत्येतद्व्याख्यावसरे अपूर्वविशेषोपजनने हि विशिष्टाकारोपजनोऽवश्यं-भावी, विशिष्टाकारश्च वस्तुस्वरूपाभिन्न इति तस्यैवासावुपजनो भवति देवदत्तः शरीरी जातो विद्वान् जात इत्यवस्थितस्वरूप एव वस्तुनि विशेषाप्तिमात्रेण जननव्यवहारो दृश्यत एवेत्यनेन टीकाकृत्स्वयमेव स्पष्टीकरिष्यति । तदपि न स्वयमेव फलदं किन्तु द्वारान्तरमपेक्षत इत्याशयेनाह स्थेमा दार्ढ्यं चेति । अर्थाद्ज्ञानस्येति प्राप्नोति । ज्ञानस्थैर्यं चापरोक्षोत्तरमेवेति । एवं क्रमेणेदृशफलदानं न प्रयोजनोद्देश्यकम् । किन्तु हरेर्दयानाथस्य स्वभाव एवेत्याशयेनाह जन्मस्थेमप्रलयानां रचनाशीलं स्वभावो यस्येति । तर्ह्येतद्रूप्यरूपेणैव मोचकत्वनियमः किमर्थः न हि दयालूनामित्थंभूता प्रवृत्तिरित्यत उक्तं शीलानि वपूंषि यस्येति । अयमाशयः । यद्यपि भगवान्भक्तवत्सलो रूपान्तरेण दातुं परमेश्वरश्च, तथाप्येतैरेवानन्तैर्जीवान्तस्थै रूपैरपरोक्षादिद्वारा ददामि मोक्षमिति स्वसङ्कल्पानुसारेण ददाति । न चैतावता दयालुता हानिः । तथा गुरुहस्तेनैव देयं दापयितुरपि प्रसङ्गात् । नाप्यसमर्थता । सत्यसङ्कल्पत्वात् । सत्यपि सामर्थ्ये स्वसङ्कल्परक्षणाय महतोऽनिष्टस्यापि बहुलं सहनदर्शनात् । ननु क्वचित्सङ्कल्पत्यागोऽपि श्रूयते । यथोक्तम्— 'स्वनियममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः । धृतरथचरणोऽभ्ययाच्चलाग्रो हरिरिव हन्तुमिभं गतोत्तरीय' इत्यादि । मैवम् । तत्रार्थश्च कृपादिकं विना चक्रधारणादिकं न करोमीत्येतद्रूपत्वाद्रथाङ्गपाणीच्छाया इति । अनेन ब्रह्मशब्दश्च विष्णावेवेत्यनेन रूपविशेषसूचनेऽपि तस्य 'इत्थमैक्षत देवेशो ब्रह्माद्या यदि मां विना । क्रियादिषु समर्था स्युर्न मे विष्ण्वभिधा भवेत् ॥ सर्वचेष्टयितृत्वाच्च विशिष्टबलतस्तथा । विष्णुरित्यभिधे'त्याद्युक्तदिशा 'बहुज्ञा एव जानन्ति विशेषेणार्थमेतयोरि'त्युक्तबहुज्ञैरेव सुज्ञेयतया अल्पज्ञविज्ञाय मुकुं ददातीति मुकुन्द इत्यभिधोपेतमिति यदुक्तं तदपि विवृतं भवति । यद्यप्येतत्तृतीयस्य तृतीये सूत्रकृदेव निष्कर्षति । वक्ष्यति वै तत्र तत्रानुभाष्यकृत् । तथापि शिष्यहितैषिणा टीकाकृता सुग्रहायात्रोक्तम् । सूत्राक्षरादिप्रतिपाद्यमूर्तिविशेषादिकं त्वस्मत्कृतात्सौधप्रमेयसारोद्धारा-दवगन्तव्य इति ॥ इत्याद्यपद्यव्याख्या ॥

लघुरसरञ्जनी—

श्रियः कान्तं सन्तं गुरुहृदयगेहेऽति विततं गुणाद्देशात्कालादपि विगतदोषं निजवशम्।
जगत्संभूत्यादिप्रदमखिलवेदादिवचसामगम्यं गम्यं श्रीहरिमनिशमीडे गुणविदे॥ ॥ १ ॥

वेदाम्भोधिनिधिमन्थनोद्भूतिमहासूत्रामतो यो हरिर्जातो व्यासपदेन यश्च सुखतीर्थाख्यायुतो मारुतः।
तद्भाष्यादिबहूक्तिसञ्चयकरः कारुण्यमात्रेण तौ देवौ दिव्यतदीयमेयमतये वन्देऽभिवन्द्यौ सुरैः ॥ २ ॥

या शेषादिसमस्तजीववचनस्वान्ताभियन्त्रीच्छया मन्दान्वाद्यतिभिः पटूनस्फुटतरं या संविधत्ते जनान्।
सा चेतोवचने समीरयतु मे सङ्कीर्तनादौ हरेः शर्वेन्द्रादिसुरेन्द्रपूजितपदा श्रीभारती सर्वदा॥ ॥ ३ ॥

आज्ञां श्रीधवभारतीधवकृतां कुर्वन्स्वमौलौ मणिं भूत्वा भूमितले यतिश्च जयतीर्थाख्यायुतो योऽलिराट्।
सप्तत्रिंशतिमूलसद्विवृतिं चक्रे परं तं गुरुं श्रीमन्न्यायसुधादिशब्दनिचयैर्वाच्यां भजे भक्तितः ॥ ४ ॥

दिक्प्रान्ता तत पुण्यकीर्तिसुलता संशोभितः सन्ततं नानाशिष्यतदीयशिष्यविलसच्छाखोपशाखान्वितः।
ऐजेवेङ्कटनारसिंहदयितादिव्यालबालोद्भवः संभूयात्सकलेष्टदो परगुरु रामार्यकल्पद्रुमः॥ ॥ ५ ॥

सुधादिटीकाकृदभीष्टशिष्यराट् तेनोपदिष्टः सुजनेष्टसिद्धये।
अवातरच्छ्रीजयतीर्थसंज्ञया गुरुं च साक्षाच्छरणं तमेम्यहम्॥ ॥ ६ ॥

तमेव तातं मम नैकधावने स्थितं यतिं चाध्वनिदेव शङ्किते।
प्रवर्तमानो नरमात्रकः पुनर्भीतः शरण्यं शरणं समेम्यहम्॥ ॥ ७ ॥

श्रीमन्न्यायसुधाया रसरञ्जनी गुरुकृता गुर्वर्था।
तस्मान्मन्दहितार्थं कुर्वे रसरञ्जनीं लघ्वीम्॥ ॥ ८ ॥

अगाधबोधैर्विवृते प्रवृत्तिर्ग्रन्थे मदीयापि न दूषणीया।
नमः पतन्त्यात्मसमं पतत्रिणः पक्षीश्वराद्युत्पतितं दुरन्तम्॥ ॥ ९ ॥

[redacted]वता बादरायणेन प्राणिनां निःश्रेयसाय ब्रह्ममीमांसाशास्त्रं प्रणीतम्। तथापि तदसाधुनिबन्धान्ध-[redacted]कुण्ठितत्वेनाप्रणीतमिव मन्यमानो भगवानानन्दतीर्थमुनिर्यथाचार्याभिप्रायमस्य भाष्यं विधाय पुनस्त्रिविक्रमाचार्यसंप्रार्थितो दुर्वादिगर्वाद्रिपविं मायिध्वान्तरविद्युतिं व्यक्ततर्कततिमनुव्याख्यामपि चकार। तामगाधबोधैः पूर्वाचार्यैर्यथाश्रुताभिप्रायं विवृतामप्यतिदुर्विभाव्यतया कलिबलकालितमनोबलतया च सामस्त्येन ज्ञातुमशक्तान् सज्जनान्निरीक्ष्य सञ्जातकरुणो जयतीर्थश्रीमच्चरणः अनन्यसाध्यमनोदोषनिरासपूर्वकं संप्रकटितसमस्तभावसुधां श्रीमन्न्यायसुधां करिष्यन् विलीनप्रकृत्या आनन्दतीर्थप्रतिबिम्बतया तद्वत् स्वयमन्तरायविधुरोऽप्यनवरतमीश्वर-प्रवणकायकरणवृत्तिरपि श्रीहरिप्रणामादिकं प्रारिप्सितस्यानन्तरायपरिसमाप्तेः प्रचयस्य च हेतुतया अविगीत-शिष्टाचारपरम्पराऽवगतमवश्यं करणीयं शिष्यान्ग्राहयितुं ग्रन्थादौ निबध्नाति श्रियःपत्य इति। अत्र हरये नम इत्यन्वयः। प्रकरणात्करोमीति वा। अस्तिभवत्योः सर्वत्रानुषङ्गादस्तीति उपलभ्यते। बुद्धया विविक्तं नित्यपदं

नम इत्यत्राप्यन्वेति । तेन सदातनत्वरूपं नित्यत्वं सिद्ध्यदन्यथानुपपत्त्या नमतेर्भक्त्याद्यतिशयसाहित्यं द्योतयति । यद्वा । निरुपपदं नमःपदमेव मुख्यनमनाभिधायकम् । निरुपपदशब्दस्य मुख्यार्थाभिधायकत्वस्य सूत्रशब्दार्थ-कथनावसरे समर्थितत्वात् । नमनस्य मुख्यत्वं च भक्त्याद्यतिशयसाहित्यमेव । तथाविधमेव हि हरिनमनं भवत्यभि-मतसिद्धेरङ्गम् । श्रियः पत्य इत्यादीनां तु नमनोद्देश्येन हरिणा विशेषणतया संबन्धः । प्रयोजनं च स्तुतिपदानां विशेष्यप्रशंसैव । तत्रार्थिकपुनरुक्तेः स्तुतित्वमेव समाधानमवधातव्यम् । अत्र शिष्टजनशिक्षणदीक्षितेन बादरायणेन शिष्टशिक्षार्थं ग्रन्थादौ देवतावन्दनं कस्मान्नानुष्ठितमित्याशङ्क्यापनोदायोक्तं सूत्रकृता ब्रह्मजिज्ञासेति । अनेकार्थ-त्वाद्ब्रह्मजिज्ञासापदयोः प्रकृतानुकूलार्थाविभिहितौ पूर्वग्रस्थाने । नारायणं नत्वेति । अतः ब्रह्मपदार्थो नारायणः जिज्ञासापदार्थो नमनम् । मनोवृत्तेरस्तत्प्रवणता हि नमनं नाम । जिज्ञासापि तद्विशेष एवेत्युक्तं भवति । यदुक्तं नत्वेति नमनमात्रं जिज्ञासापदार्थ इति तदयुक्तम् । नमनमात्रस्याभिमतसिद्ध्यङ्गत्वाभावादित्यतस्तद्विवृतमुत्तरग्रस्थाने । नारायणं सन्नमामीति । समिति भक्त्याद्यतिशयसाहित्यलक्षणां प्रणामस्य सम्यक्तामाह । तथाच नमनमात्रं न जिज्ञासापदार्थः । येनाभिमतसिद्ध्यभावः । किन्तु भक्त्याद्यतिशयसहितं मुख्यमेव नमनम् । नत्वेत्युक्तिस्तु निरुप-पदपदस्य मुख्यार्थाभिधायकत्वाभिप्रायेणेति भावः । अत एव सुधायां नम इत्येवोक्तम् । ननु यदुक्तं ब्रह्मपदार्थो नारायण इति तदयुक्तम् । यदि नारायणपदं डित्यादिशब्दवत्साङ्केतिकादिरूपं तदा देवतानमनासिद्धेरित्याशङ्क्य नारायणपदार्थो विवृतः पूर्वोत्तरग्रस्थानयोः । गुणैः सर्वैरुदीर्णमित्यादिना निखिलपूर्णगुणैकदेहमित्यादिना च नात्र नारायणशब्दो डित्यादिशब्द इव साङ्केतिको घटादिशब्द इव वा रूढिमात्रेण प्रवृत्तः येन ग्रन्थादौ देवतानमनाभावः स्यात् । किन्तु महायोगवृत्त्या गुणपूर्णत्वाद्यभिधायकः । तथाच गुणपूर्णत्वादिमान्नारायणपदार्थ इति न देवतानमना-सिद्धिरिति । अनेन सौत्रं ब्रह्मपदमपि 'अथ कस्मादुच्यते ब्रह्मे'ति 'बृहन्तो ह्यस्मिन्गुणा' इतिश्रुतेर्गुणपूर्णवस्त्वभिधाय-कम् । व्याख्यानव्याख्येययोः समानार्थत्वादिति विवृतं भवति । तादृशश्च साक्षाल्लक्ष्मीपतिरित्याशयेनोक्तं श्रियः पत्य इति । अथवा नारायणं सन्नमामीत्यनेन नत्वेति निरुपपदपदेनैवोक्ता नमनसहकारिणी भक्तिर्नारायणे न संभवति । तस्य देवतान्तरसाम्यादित्यतोऽपि नारायणशब्दार्थो विवृतः पूर्वोत्तरग्रस्थानयोः । गुणैः सर्वैरुदीर्णं निखिलपूर्णगुणैकदेह-मित्यादिना । तथाच नायं नारायणो देवदत्तादिसमानः किन्तु गुणपूर्णत्वादिमाहात्म्योपेतः । तस्मिंश्च माहात्म्यज्ञान-पूर्विका भक्तिः संभवत्येवेति भावः । एतदप्यभिसन्धायोक्तं श्रियः पत्य इति । यदा यत्किञ्चित्पुरुषार्थप्रदात्र्यां श्रीदेव्यां भक्तिः सर्वानुभवसिद्धा तदा मोक्षादिसर्वपुरुषार्थदातृत्वादिमहामहिमोपेते श्रीपतौ भक्तिर्भवतीति किं वाच्यमिति भावः । अथवा ननु तथापि बादरायणेन शिष्टशिक्षार्थं ग्रन्थारम्भे सुकलत्वाद्यनोदेवताया महालक्ष्म्याः वन्दनं कस्मान्नानुष्ठित-मित्याशङ्क्यायां चोक्तं सूत्रकृता ब्रह्मजिज्ञासेति । मम योनिर्महद्ब्रह्मेत्युक्तेर्ब्रह्मणो महद्ब्रह्मणो महालक्ष्म्याः जिज्ञासा वन्दनमित्यर्थः । ननु न महालक्ष्मीवन्दनं नारायणसाम्येन कार्यम् । दोषापत्तेः । प्रकारान्तरेण चेत्किं तदित्यत उक्तं भाष्यकृता प्रस्थानद्वयेऽपि । नारायणमिति । नारा लक्ष्मीस्तस्याः अयनमाश्रय इति । नन्वाश्रयाश्रयिभावोऽप्या-धाराधेयभावादिरूपोऽनेकविधः कस्तत्रोपासितः तत्प्रीतिजनक इत्यतस्तं व्यनक्ति श्रियः पत्य इति । तथाच भगवद्भार्यात्वेन वन्दनं तत्प्रीतिविशेषजनकमिति भावः । जयाजानिरित्यादाविवार्थान्तरप्रतिभासो मा भूदिति शिष्यहितैषिणा श्रियः पत्य इत्यसमासः भूत इति ज्ञेयम् । नन्वनुव्याख्याने ओङ्काराथशब्दयोर्माङ्गलिकत्वस्योक्त-

त्वात्कथं ब्रह्मजिज्ञासापदाभ्यां मङ्गलानुष्ठानं समर्थ्यत इति चेन्न । पूर्वप्रस्थाने अथशब्दस्यैव माङ्गलिकत्वोक्ता-वप्युत्तरप्रस्थाने ओङ्काराथशब्दयोर्द्वयोरपि माङ्गलिकत्वोक्ते रीत्यन्तरत्ववदस्यापि रीत्यन्तरत्वसंभवादिति । ननु यदुक्तं ब्रह्मपदविवरणरूपं नारायणपदं तद्विवरणरूपं च निखिलेत्यादिविशेषणषट्कमिति, तत्रास्तु नारायणपदविवरणरूपं निखिलेत्यादिविशेषणषट्कमिति । अराः दोषाः तद्विरुद्धत्वाद् गुणा नारास्तदयनत्वान्नारायणः । अराणामयनं न भवतीति वा । उपकारित्वादिना नराणामिमे नाराः वेदादयः प्रतिपाद्यतया तदयनत्वाद्वा । नराणामिदं नारमुद्भवादिदातृतया तदयनत्वाद्वा । नरसमूहो नारं बन्धतया तदयनत्वाद्वा । नराणामयमधिपतिर्नारो मुख्यवायुः परमप्रेमास्पदतया तदयनत्वाद्वेति वक्ष्यमाणदिशा नारायणपदस्य निर्वक्तुं शक्यत्वात् । ब्रह्मपदविवरणरूपं नारायणपदमिति तु कथं संभवति । गुणपूर्णत्वादिधर्मषट्कप्रतिपादनाय ब्रह्मपदे नारायणपदवन्निर्वचनषट्कस्य कर्तुमशक्यत्वात् । अन्यथा समानार्थत्वाभावेन व्याख्यानव्याख्येयभावानुपपत्तेः । सौत्रब्रह्मपदविवरणाय भाष्ये नारायणपदस्य भाष्यस्थनारायणपदविवरणाय तत्त्वप्रकाशिकायां ब्रह्मपदस्य च प्रयोगानुपपत्तेश्चेति चेदित्थम् । ब्रह्मशब्दस्यार्थद्वयम् । श्रौतार्थिकभेदात् । तत्राथ कस्मादुच्यते ब्रह्मेति बृहन्तो ह्यस्मिन् गुणाः । तद्वा एतद्ब्रह्मात्मानं बृहतिबृंहयति चेतीत्यादिश्रौतनिर्वचनबलेन ब्रह्मशब्दस्य साक्षात्प्रतीयमानो गुणपरिपूर्णत्वरूपः श्रौतार्थः । तस्मादेवार्थात् प्रतीयमानो निर्दोषतादिरूप आर्थिकोऽर्थः । तत्र नारायणपदं न ब्रह्मपदश्रौतार्थमात्रस्य विवरणमित्यङ्गीकुर्मो येनोक्तानुपपत्तिः । किन्तु अर्थद्वयस्यापि । तथाच ब्रह्मपदे गुणपूर्णत्वादिधर्मषट्कप्रतिपादनपरतया निर्वचनषट्कस्य कर्तुमशक्यत्वेऽप्युक्तदिशा गुणपूर्णत्वादिधर्मषट्कस्यापि तदर्थत्वादुपपन्नं धर्मषट्कप्रतिपादकस्यापि नारायणपदस्य ब्रह्मपदविवरणरूपत्वं समानार्थत्वादिति । ननु तथापि ब्रह्मपदस्य निर्दोषत्वादिः कथमार्थिकोऽर्थः । तेन तल्लाभप्रकाराऽदर्शनादित्याशङ्क्य श्रौतनिर्वचनबलेन गुणपूर्णत्वं तावद्ब्रह्मशब्दस्य श्रौतोऽर्थ इत्यविवादम् । गुणपूर्णत्वं च यावद्गुणवत्त्वम् । यावद्गुणज्ञानं च तद्घटकावान्तरगुणज्ञानं च विना न संभवतीति अर्थादाप्यतममित्यादि । पदप्रतिपाद्यगुणान्तराणां लाभप्रकारं सुगमत्वाच्छिष्या एव जानन्तीत्याशयेन दुर्गमत्वादत्र भाष्यकारेण नारायणपदेनैव सूचितमन्यत्र प्रच्युतोऽशेषदोषैः सदा पूर्तित इति स्पष्टमुक्तं ब्रह्मपदेन निर्दोषत्वस्यार्थाल्लाभप्रकारमेव दृष्टान्तमाह नित्येत्यादिना । अगणिता ये गुणास्त एव माणिक्यानि तेषां या विशदाः स्पष्टाः प्रभास्तासां यानि जालानि [redacted]तेषां उल्लासैर्विलासैरुपहतानि सकलावद्यतमांसि यस्मिन्स तथोक्तस्तस्मै । अस्य सङ्क्षेपव्याख्यानत्वात्सङ्क्षे[redacted] पूर्णेति च पदद्वयार्थानुवादो अगणितेति । गुणेष्वेको द्वावित्यादि गणनाभावे निखिलत्वस्यायमेतावानयमेतावानिति परिच्छिन्नपरिमाणतया गणनाभावे पूर्णत्वस्य च लाभात् । अत्रागणितत्वगुणोल्लासोपहतत्वेषु चतुर्षु नित्यत्वविशेषणेन तेषां कादाचित्कत्वशङ्कां व्यावर्तयति । तेन सदा निर्दोषमिति मूले दोषत्वावच्छिन्नदोषप्रतिपादकनिरुपपददोषपदप्रतिपाद्यं दोषाणां साकल्यं सदापदप्रतिपाद्यं तदभावस्य सार्वकालिकत्वं च समर्थितं भवति । अन्यथा गुणेष्वगणितत्वस्य कादाचित्कत्वे प्रकृतेऽगणितपदोक्तनिखिलत्वपूर्णत्वयोः कादाचित्कत्वाद्गुणेषु कदाचिदल्पत्वं सावधिकत्वं स्यात् । ततश्च गुणानां स्वसदृशदोषनिवर्तकत्वस्य युक्तत्वात् । गुणोपहन्यमानदोषेष्वपि अल्पत्वादिप्राप्त्या साकल्यं न स्यात् । तथा गुणानां कादाचित्कत्वे निवर्तकाभावेन उल्लासस्य कादाचित्कत्वे निवर्तकसद्भावेऽपि सहकार्यभावेन निवर्तकादिसद्भावेऽपि प्रतिबन्धवशादुपहतत्वस्य कादाचित्कत्वे च कदाचित्

दोषाणामपि प्रसङ्गेन सदापदोक्तसार्वकालिकत्वं दोषाभावस्य न स्यात् । अथवा नित्यं अगणितगुणमाणिक्य-विशदप्रभाजालोल्लासैरुपहतानि सकलावद्यतमांसि यस्मिन्निति बहुपदबहुव्रीह्याश्रयणेनैकस्मिन्नगणितगुणमाणिक्य-विशदप्रभाजालोल्लासोपहतसकलावद्यतमस्त्वरूपविशिष्टधर्म एव नित्यत्वविशेषणेन सर्वं सेत्स्यति । उक्तस्थलेषु नित्यत्वविवक्षां विना विशिष्टधर्मे नित्यत्वापर्यवसानात् । अनेन मूले सदापदस्य निखिलपूर्णगुणैकदेहं निर्दोषत्वमित्युभयत्रान्वयः सूचितः । पूर्वप्रस्थानव्याख्यानावसरे शुद्धानन्दोल्लसंविदित्यादिना गुणस्वरूपस्य विशिष्य दर्शितत्वादत्र गुणेत्येवोक्तम् । सूर्यादिप्रभायाः कादाचित्कत्वान्माणिक्यप्रभाया सदातनत्वाद्वा यथा तत्तन्माणि-क्यस्य तत्तत्तमोनिवर्तकत्वं तथा ज्ञानमज्ञानस्यानन्दो दुःखस्येत्येवमनन्तानां गुणानामनन्तदोषनिवर्तकत्वमिति प्रदर्शनार्थत्वाद्वा गुणानां माणिक्यैरेवोपमानम् । गुणेषु सकलदोषोपहन्तृत्वोपपादनायोक्तं नित्यागणितेति । तथा माणिक्येषु तमोहन्तृत्वोपपादनायोक्तं प्रभाजालोल्लासेति । प्रभानिवर्त्यत्वं तमस एवेति दोषाणां तमोभिरुपमानम् । तथा च यथा प्रभातमसोः सामानाधिकरण्यविरोधात्प्रभावतिप्रदेशेऽनुक्तावपि तमोऽभावः सिध्यति तथा गुणदोषयोरपि सामानाधिकरण्यविरोधादेव ब्रह्मपदोक्ते नित्यमगणितगुणे नारायणेऽनुक्तावपि सकलदोषाभावः सिध्यति । अत एव नारायणपदव्याख्यानावसरे अरा दोषास्तद्विरुद्धा गुणा नारा इति गुणदोषयोर्विरोधं वक्ष्यतीति भावः । ननु नानिर्धारितस्वरूपस्य प्रणामो युक्तः । न चान्तरेण लक्षणप्रमाणे वस्तुनिर्धारणमित्यतो नम्यनारायणस्वरूपनिर्धारणाय सूत्रकृता आद्यसूत्रे ब्रह्मपदेनाभिहितं गुणपूर्णत्वादिरूपं प्रधानलक्षणं निखिलेत्यादिना अभिधाय पुनस्तत्सिद्धचर्थं जन्मादिसूत्रोक्तान्येव लक्षणान्यनुवदति **अस्योद्भवादिदमिति** । नन्वस्योद्भवादिदमित्यत्र न तावत्समुदितमेकमेव लक्षणं विवक्षितम् । जन्मादिष्वेकैकस्यैव लक्षणत्वसंभवेन शेषवैयर्थ्यात् । किन्त्वनेकमेवेत्यविवादम् । तत्र किमष्टावपि लक्षणानि विवक्षितानि उत कतिपयानि । नाद्यः । यथा यथा कतिपयैरेव लक्षणैरस्य स्वरूपावधारणे लक्षणाष्टक-विवक्षाया अनुपयोगात् । न द्वितीयः । एतान्येवेति निर्णायकाभावेन अनिर्णयादिति चेन्न । पक्षद्वयाङ्गीकारेऽपि दोषाभावात् । तथाहि । भाष्यकारस्तावत्सूत्रोक्तान्येव लक्षणान्यनुवदतीत्युक्तम् । सूत्रे तु श्रौतान्येव लक्षणान्युच्यन्ते । सूत्रं च श्रुत्यनुसारीत्युक्तेः । श्रुतयश्च 'तद्विजिज्ञासस्व तद्ब्रह्म', 'नारायणं महाज्ञेयम्', 'तमेवैकं जानथ आत्मानमि'त्याद्या आद्यसूत्रविषयवाक्यभूता जिज्ञासाविधात्र्योः बन्धः सन्ति । तत्र जिज्ञास्यस्य सर्वव्यावृत्तये लक्षणमुच्यते । न चैकमेव सर्वत्र जिज्ञासाविधायकश्रुतिषु लक्षणं श्रूयते । किन्तु क्वचित्सृष्टिः क्वचित्स्थितिः क्वचित्प्रलयः क्वचिन्मोक्षः क्वचिद्वयं क्वचित्त्रयं वेत्यादिरूपेणाष्टकमपि । तत्र सूत्रस्य विश्वतोमुखत्वादविशेषेण जिज्ञासाविधायकसर्वश्रुतिनिर्णायकत्व-दशायां सूत्रेऽष्टावपि लक्षणानि विवक्षितानि । अत एव 'सृष्टिस्थितिसंहारनियमनज्ञानाज्ञानबन्धमोक्षा यतः । सृष्टिस्थितिश्च संहारो नियतिर्ज्ञानमावृतिः । बन्धमोक्षावपि ह्यासु श्रुतिषूक्ता हरेः सदे'त्यादितद्भाष्यानुभाष्ययोरष्टावपि लक्षणानि स्पष्टमुक्तानि । अस्यां दशायां सूत्रार्थानुवादपरे अस्योद्भवादिदमिति सङ्क्षिप्तभाष्येऽपि अष्टावेव लक्षणानि विवक्षितानि । अत एव सुधायामुत्तरत्र तत्तथैव व्याख्यास्यते । कयाचन विवक्षया तत्तच्छ्रुतिनिर्णायकत्वदशायां तु तत्तदुक्तान्येव लक्षणानि विवक्षितानि । नाधिकानि । प्रयोजनाभावात् । प्रकृते च कयाचन विवक्षया तद्विजिज्ञासस्व तद्ब्रह्मेति श्रुतिः कण्ठत एव सूत्रकृता सूचिता । आकाशस्तल्लिङ्गादस्यैव चोपपत्तेरूष्मेत्यादाविव ब्रह्मजिज्ञासेति तत्रत्यब्रह्मशब्दपाठात् । तां विवक्षां तु हरिपदप्रयोगप्रयोजनप्रदर्शनावसरे लेशतः प्रदर्शयिष्यामः । इतरास्तूपलभ्यन्ते ।

त्वात्कथं ब्रह्मजिज्ञासापदाभ्यां मङ्गलानुष्ठानं समर्थ्यत इति चेन्न । पूर्वप्रस्थाने अथशब्दस्यैव माङ्गलिकत्वोक्ता-वप्युत्तरप्रस्थाने ओङ्काराथशब्दयोर्द्वयोरपि माङ्गलिकत्वोक्ते रीत्यन्तरत्वबदस्यापि रीत्यन्तरत्वसंभवादिति । ननु यदुक्तं ब्रह्मपदविवरणरूपं नारायणपदं तद्विवरणरूपं च निखिलेत्यादिविशेषणषट्कमिति, तत्रान्तु नारायणपदविवरणरूपं निखिलेत्यादिविशेषणषट्कमिति । अराः दोषाः तद्विरुद्धत्वाद् गुणा नारास्तदयनत्वान्नारायणः । अराणामयनं न भवतीति वा । उपकारित्वादिना नराणामिमे नाराः वेदादयः प्रतिपाद्यतया तदयनत्वाद्वा । नराणामिदं नारमुदकादिदातृतया तदयनत्वाद्वा । नरसमूहो नारं बन्धुतया तदयनत्वाद्वा । नराणामयमधिपतिर्नारो मुख्यवायुः परमप्रेमास्पदतया तदयनत्वाद्वेति वक्ष्यमाणदिशा नारायणपदस्य निर्वक्तुं शक्यत्वात् । ब्रह्मपदविवरणरूपं नारायणपदमिति तु कथं संभवति । गुणपूर्णत्वादिधर्मषट्कप्रतिपादनाय ब्रह्मपदे नारायणपदनिर्वचनषट्कस्य कर्तुमशक्यत्वात् । अन्यथा समानार्थत्वाभावेन व्याख्यानव्याख्येयभावानुपपत्तेः । सौत्रब्रह्मपदविवरणाय भाष्ये नारायणपदस्य भाष्यस्थनारायणपदविवरणाय तत्त्वप्रकाशिकायां ब्रह्मपदस्य च प्रयोगानुपपत्तेश्चेति चेदित्थम् । ब्रह्मशब्दस्यार्थद्वयम् । श्रौतार्थिकभेदात् । तत्राथ कस्मादुच्यते ब्रह्मेति बृहन्तो ह्यस्मिन् गुणाः । तद्वा एतद्ब्रह्माबृंहतीति-बृंहयति चेतीत्यादिश्रौतनिर्वचनबलेन ब्रह्मशब्दस्य साक्षात्प्रतीयमानो गुणपरिपूर्णत्वरूपः श्रौतार्थः । तस्मादेवार्थात् प्रतीयमानो निर्दोषतादिरूप आर्थिकोऽर्थः । तत्र नारायणपदं न ब्रह्मपदश्रौतार्थमात्रस्य विवरणमित्यङ्गीकुर्मो येनोक्तानुपपत्तिः । किन्तु अर्थद्वयस्यापि । तथाच ब्रह्मपदे गुणपूर्णत्वादिधर्मषट्कप्रतिपादनपरतया निर्वचनषट्कस्य कर्तुमशक्यत्वेऽप्युक्तदिशा गुणपूर्णत्वादिधर्मषट्कस्यापि तदर्थत्वादुपपन्नं धर्मषट्कप्रतिपादकस्यापि नारायणपदस्य ब्रह्मपदविवरणरूपत्वं समानार्थत्वादिति । ननु तथापि ब्रह्मपदस्य निर्दोषत्वादिः कथमार्थिकोऽर्थः । तेन तल्लाभ-प्रकाराऽदर्शनादित्याशङ्क्य श्रौतनिर्वचनबलेन गुणपूर्णत्वं तावद्ब्रह्मशब्दस्य श्रौतोऽर्थ इत्यविवादम् । गुणपूर्णत्वं च यावद्गुणवत्त्वम् । यावद्गुणज्ञानं च तद्घटकावान्तरगुणज्ञानं च विना न संभवतीति अर्थादाप्यतममित्यादि । पदप्रतिपाद्यगुणान्तराणां लाभप्रकारं सुगमत्वाच्छिष्या एव जानन्तीत्याशयेन दुर्गमत्वादत्र भाष्यकारेण नारायणपदेनैव सूचितमन्यत्र प्रच्युतोऽशेषदोषैः सदा पूर्तित इति स्पष्टमुक्तं ब्रह्मपदेन निर्दोषत्वस्यार्थाल्लाभप्रकारमेव दृष्टान्तमाह नित्येत्यादिना । अगणिता ये गुणास्त एव माणिक्यानि तेषां या विशदाः स्पष्टाः प्रभास्तासां यानि जालानि सन्दोहास्तेषां उल्लासैर्विलासैरुपहतानि सकलावयवतमांसि यस्मिन्स तथोक्तस्तस्मै । अस्य सङ्क्षेपव्याख्यानत्वात्तस्य निखिलेति पूर्णेति च पदद्वयार्थानुवादो अगणितेति । गुणेष्वेको द्वावित्यादि गणनाभावे निखिलत्वस्यायमेतावा-नयमेतावानिति परिच्छिन्नपरिमाणतया गणनाभावे पूर्णत्वस्य च लाभात् । अत्रागणितत्वगुणोल्लासोपहतत्वेषु चतुर्षु नित्यत्वविशेषणेन तेषां कादाचित्कत्वशङ्कां व्यावर्तयति । तेन सदा निर्दोषमिति मूले दोषत्वावच्छिन्न-दोषप्रतिपादकनिरूपद्दोषपदप्रतिपाद्यं दोषाणां साकल्यं सदापदप्रतिपाद्यं तदभावस्य सार्वकालिकत्वं च समर्थितं भवति । अन्यथा गुणेष्वगणितत्वस्य कादाचित्कत्वे प्रकृतेऽगणितपदोक्तनिखिलत्वपूर्णत्वयोः कादाचित्कत्वाद्गुणेषु कदाचिदन्यत्वं सावधिकत्वं स्यात् । ततश्च गुणानां स्वसदृशदोषनिवर्तकत्वस्य युक्तत्वात् । गुणोपहन्यमानदोषेष्वपि अन्यत्वादिज्ञाप्या साकल्यं न स्यात् । तथा गुणानां कादाचित्कत्वे निवर्तकाभावेन उल्लासस्य कादाचित्कत्वे निवर्तकसद्भावेऽपि सहकार्यभावेन निवर्तकादिसद्भावेऽपि प्रतिबन्धवशादुपहतत्वस्य कादाचित्कत्वे च कदाचित्

दोषाणामपि प्रसङ्गेन सदापदोक्तसार्वकालिकत्वं दोषाभावस्य न स्यात् । अथवा नित्यं अगणितगुणमाणिक्य-विशदप्रभाजालोल्लासैरुपहतानि सकलावद्यतमांसि यस्मिन्निति बहुपदबहुव्रीहिग्रहणेनैकस्मिन्नगणितगुणमाणिक्य-विशदप्रभाजालोल्लासोपहतसकलावद्यतमस्त्वरूपविशिष्टधर्म एव नित्यत्वविशेषणेन सर्वं सेत्स्यति । उक्तस्थलेषु नित्यत्वविवक्षां विना विशिष्टधर्मे नित्यत्वापर्यवसानात् । अनेन मूले सदापदस्य निखिलपूर्णगुणैकदेहं निर्दोषत्वमित्युभयत्रान्वयः सूचितः । पूर्वप्रस्थानव्याख्यानावसरे शुद्धानन्दोल्लसंविदित्यादिना गुणस्वरूपस्य विशिष्य दर्शितत्वादत्र गुणेत्येवोक्तम् । सूर्यादिप्रभायाः कादाचित्कत्वान्माणिक्यप्रभाया सदातनत्वाद्वा यथा तत्तन्माणि-क्यस्य तत्तत्तमोनिवर्तकत्वं तथा ज्ञानमज्ञानस्यानन्दो दुःखस्येत्येवमनन्तानां गुणानामनन्तदोषनिवर्तकत्वमिति प्रदर्शनार्थत्वाद्वा गुणानां माणिक्यैरेवोपमानम् । गुणेषु सकलदोषोपहन्तृत्वोपपादनायोक्तं नित्यागणितेति । तथा माणिक्येषु तमोहन्तृत्वोपपादनायोक्तं प्रभाजालोल्लासेति । प्रभानिवर्त्यत्वं तमस एवेति दोषाणां तमोभिरुपमानम् । तथा च यथा प्रभातमसोः सामानाधिकरण्यविरोधात्प्रभावतिप्रदेशेऽनुक्तावपि तमोऽभावः सिध्यति तथा गुणदोषयोरपि सामानाधिकरण्यविरोधादेव ब्रह्मपदोक्ते नित्यमगणितगुणे नारायणेऽनुक्तावपि सकलदोषाभावः सिध्यति । अत एव नारायणपदव्याख्यानावसरे अरा दोषास्तद्विरुद्धा गुणा नारा इति गुणदोषयोर्विरोधं वक्ष्यतीति भावः । ननु नानिर्धारितस्वरूपस्य प्रणामो युक्तः । न चान्तरेण लक्षणप्रमाणे वस्तुनिर्धारणमित्यतो नम्यनारायणस्वरूपनिर्धारणाय सूत्रकृता आद्यसूत्रे ब्रह्मपदेनाभिहितं गुणपूर्णत्वादिरूपं प्रधानलक्षणं निखिलेत्यादिना अभिधाय पुनस्तत्सिद्धचर्थं जन्मादिसूत्रोक्तान्येव लक्षणान्यनुवदति अस्योद्भवादिदमिति । नन्वस्योद्भवादिदमित्यत्र न तावत्समुदितमेकमेव लक्षणं विवक्षितम् । जन्मादिष्वेकैकस्यैव लक्षणत्वसंभवेन शेषवैयर्थ्यात् । किन्त्वनेकमेवेत्यविवादम् । तत्र किमष्टावपि लक्षणानि विवक्षितानि उत कतिपयानि । नाद्यः । यथा यथा कतिपयैरेव लक्षणैरस्य स्वरूपावधारणे लक्षणाष्टक-विवक्षाया अनुपयोगात् । न द्वितीयः । एतान्येवेति निर्णायकाभावेन अनिर्णयादिति चेन्न । पक्षद्वयाङ्गीकारेऽपि दोषाभावात् । तथाहि । भाष्यकारस्तावत्सूत्रोक्तान्येव लक्षणान्यनुवदतीत्युक्तम् । सूत्रे तु श्रौतान्येव लक्षणान्युच्यन्ते । सूत्रं च श्रुत्यनुसारीत्युक्तेः । श्रुतयश्च 'तद्विजिज्ञासस्व तद्ब्रह्म', 'नारायणं महाज्ञेयम्', 'तमेवैकं जानथ आत्मानमि'त्याद्या आद्यसूत्रविषयवाक्यभूता जिज्ञासाविधाय्योः बन्धः सन्ति । तत्र जिज्ञास्यस्य सर्वव्यावृत्तये लक्षणमुच्यते । न चैकमेव सर्वत्र जिज्ञासाविधायकश्रुतिषु लक्षणं श्रूयते । किन्तु क्वचित्सृष्टिः क्वचित्स्थितिः क्वचित्प्रलयः क्वचिन्मोक्षः क्वचिद्वयं क्वचित्त्रयं वेत्यादिरूपेणाष्टकमपि । तत्र सूत्रस्य विश्वतोमुखत्वादविशेषेण जिज्ञासाविधायकसर्वश्रुतिनिर्णायकत्व-दशायां सूत्रेऽष्टावपि लक्षणानि विवक्षितानि । अत एव 'सृष्टिस्थितिसंहारनियमनज्ञानाज्ञानबन्धमोक्षा यतः । सृष्टिस्थितिश्च संहारो नियतिर्ज्ञानमावृतिः । बन्धमोक्षावपि ह्यासु श्रुतिषूक्ता हरेः सदे'त्यादितद्भाष्यानुभाष्ययोरष्टावपि लक्षणानि स्पष्टमुक्तानि । अस्यां दशायां सूत्रार्थानुवादपरे अस्योद्भवादिदमिति सङ्क्षिप्तभाष्येऽपि अष्टावेव लक्षणानि विवक्षितानि । अत एव सुधायामुत्तरत्र तत्तथैव व्याख्यास्यते । कयाचन विवक्षया तत्तच्छ्रुतिनिर्णायकत्वदशायां तु तत्तदुक्तान्येव लक्षणानि विवक्षितानि । नाधिकानि । प्रयोजनाभावात् । प्रकृते च कयाचन विवक्षया तद्विजिज्ञासस्व तद्ब्रह्मेति श्रुतिः कण्ठत एव सूत्रकृता सूचिता । आकाशस्तल्लिङ्गादस्यैव चोपपत्तेरूष्मेत्यादाविव ब्रह्मजिज्ञासेति तत्रत्यब्रह्मशब्दपाठात् । तां विवक्षां तु हरिपदप्रयोगप्रयोजनप्रदर्शनावसरे लेशतः प्रदर्शयिष्यामः । इतरास्तूपलभ्यन्ते ।

अत एव भाष्यकार उपलक्षणाभिप्रायं द्योतयितुं नारायणं महाज्ञेयमिति श्रुतिगतं नारायणपदं पपाठ । तद्विजिज्ञासस्वेत्यादिश्रुतौ च 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ती'ति चत्वार्येव लक्षणानि श्रुतानि । तत्राभिसंविशन्तीतिपदोक्तो मोक्षश्च जिज्ञासायाः निष्प्रयोजनत्वशङ्कावारकतया अवश्यमादावेव वक्तव्यः । उक्तश्च सूत्रकृता अतःशब्देन । एवं प्रयोजनान्तरार्थमुक्तोऽपि मोक्षो लक्षणमपि भूत्वा स्वलक्ष्यमवधारयत्येव । न हि पाकार्थमुत्पादितोऽपि दहनो न प्रकाशयतीति युक्तमिति । तथाच श्रौतेषु चतुर्षु लक्षणेषु मोक्षाख्यलक्षणस्योक्तदिशा आद्यसूत्रोक्तत्वात्परिशिष्टानि त्रीण्येव लक्षणानि द्वितीयसूत्रे तत एवानुभाष्ये च विवक्षितानीत्याशयेनाह **जगज्जन्मस्थेमप्रलयरचनाशीलवपुष इति** । अथवा द्वितीयसूत्रेऽनुभाष्ये च श्रौतानि चत्वार्यपि लक्षणानि विवक्षितानीत्याशयेनाह **जगज्जन्मस्थेमप्रलयरचनाशीलवपुष इति** । अत्र केवलो लयशब्दः संहारस्य प्रशब्दसहकृतस्तु प्रकृष्टलयरूपमोक्षस्य वाचक इति विवेकः । आद्यसूत्रं तु ब्रह्मजिज्ञासायाः निष्प्रयोजनत्वशङ्कावारणमात्रेण चरितार्थम् । अस्येत्यस्यार्थोऽत्र जगतो जङ्गमस्येति । श्रुतौ इमानि भूतानीति प्राणिनिकायप्रसिद्धभूतशब्दात् जीवन्तीति प्राणधारणवचनात् अभिसंविशन्तीति मोक्षप्रतिपादनाच्च । अस्य प्रत्यक्षादिप्रमाणसिद्धतया बुद्धिसन्निहितस्य स्वव्यतिरिक्तप्रपञ्चस्येति करिष्यमाणव्याख्यानं तु सूत्रस्य जिज्ञासा-विधायकसर्वश्रुतिनिर्णायकत्वपक्षमवलम्ब्येति न विरोधि । तत्र तत्तच्छ्रुत्युक्तस्य मिलित्वा जन्माद्यष्टकस्य यथासंभवं सर्वप्रपञ्चसंबन्धित्वस्य न्याय्यत्वात् । अथवाऽत्रापि जगतः प्रपञ्चस्येत्यर्थः । प्रकृतत्वादिमानि भूतानीति प्राणिमात्रपरामर्शस्य प्रपञ्चे यथासंभवं जन्मादिसंबन्धस्य च संभवात् । स्थेमशब्दस्तु स्थाधातुप्रकृतिको योगेन स्थितिवाचीत्येकः पक्षः । स्थिरशब्दप्रकृतिको रूढ्या दार्ढ्यवाचीत्यन्यः । तत्राद्ये स्थेमा स्थितिरित्यर्थः । द्वितीये स्थेमा दार्ढ्यमित्यर्थः । नन्वस्तु प्रथमः पक्षः । सृष्टिस्थितिसंहारनियमनज्ञानाज्ञानबन्धमोक्षा यतः । उत्पत्ति-स्थितिसंहारा नियतिर्ज्ञानमावृतिः । सृष्टिः स्थितिश्च संहारो नियतिर्ज्ञानमावृतिः । सृष्टिस्थित्यप्ययेहा इत्यादौ सर्वत्र सृष्टयाष्टककथनावसरे स्थितेरेव कथनात् । द्वितीयस्तु कथम् । कुत्राप्यनुक्तेरिति चेत्सत्यम् । अभिप्रायसद्भावात् । तथाहि । अस्योद्भवादिदमिति मूले आदिपदेनोक्तमानोक्तत्वात्स्थितिर्गृह्यते । सृष्टिं च पालनं चैव संहारं नियमं तथेत्यादिमानोक्तत्वात्पालनं वेति सन्दिह्यते । न चोभयमप्येकमेव भक्तिपादे प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय इत्यधिकरणे तयोः साध्यसाधनभावकथनेन भेदस्याभिप्रेतत्वात् । यथोक्तं तत्रैव सुधायाम् । नेश्वरस्य विश्वपालकत्वं संभवति । स्थितेस्तत्प्रयोजनात् । तस्याश्च स्वतःसिद्धत्वादिति दार्ढ्यपरिग्रहे तु नायं संशय उदेति । जगत्स्वरूपस्थितेरेवाभावे कस्य दार्ढ्यं अन्नदानादिना, पालनाभावे च कथं दार्ढ्यमिति दार्ढ्यान्यथानुपपत्त्योभयस्यापि ग्रहणसूचनात् । एवं च वाक्यद्वयमप्येकविषयं भवति । तत्र स्थितिप्रतिपादके वाक्ये कार्यान्यथानुपपत्त्या कारणीभूत-पालनपरिग्रहस्य पालनप्रतिपादकेऽपि अप्रतिहतेच्छावत्परमेश्वरानुष्ठितकारणान्यथानुपपत्त्या कार्यपरिग्रहस्य च संभवादिति । तथाच कुत्राप्यनुक्तत्वेऽप्युक्तसन्देहवारणायोक्तमानद्वयेऽप्येकेन पदेन द्वयोरपि ग्रहणं यदवश्यं विवक्षितं तत्सूचनाय दार्ढ्यार्थपक्षोऽपि युक्त एवेति । अस्योद्भवादिदमिति मूले उद्भवादिकर्मकं दानं प्रतीयते । तच्च नात्र स्वस्वत्वपरित्यागपूर्वकपरस्वत्वापादनरूपम् । येनैतादृशदानोद्देश्यस्य जगतः कर्मणा यमभिप्रैति स संप्रदानमिति संज्ञायां संप्रदाने चतुर्थीति सूत्रेणास्मा इति चतुर्थ्या भाव्यमिति शङ्का स्यात् । किन्त्वन्यदेव विवक्षित-

मित्याशयेनेदमित्यस्य अभिप्रायमाह रचनेति । जन्माद्यनुकूलो दैहिको व्यापारविशेष इत्यर्थः । तथाच नास्येति षष्ठ्यनुपपत्तिः । ननु जगज्जन्मादिदाननेश्वरस्य प्रयोजनमस्ति न वा । नाद्यः । अपूर्णत्वप्रसङ्गात् । न द्वितीयः । तस्याप्रेक्षावत्त्वप्रसङ्गात् । न हि प्रेक्षावान्निरत्यं प्रवर्तत इत्यतः सदा अस्योद्भवादिदमित्युक्तम् । सदा जन्मादिदानं च तादृशस्वभावं विना न संभवतीत्याशयेनाह शीलेति । स्वभावेत्यर्थः । तथाच उक्तविकल्पद्वयदूषणानवकाशः । तस्यास्वाभाविकविषयत्वात् । ननु तथापि नेश्वरस्य जन्मादिकर्तृत्वं युक्तम् । अशरीरत्वान्मृतपुरुषवदिति चेन्नाशरीरत्वस्यैवासिद्धेः । तर्हि शरीरं कुतो नोक्तम् । न च निखिलपूर्णगुणैकदेहमित्यनेनोक्तमिति वाच्यम् । तत्र ज्ञानादिगुणोपपत्त्यर्थमुक्तत्वेऽपि भगवतः सृष्ट्यादिकर्तृत्वोपपत्त्यर्थमवश्यवक्तव्यत्वादिति चेन्न । ज्ञानादिगुणोपपत्त्यर्थमुक्तस्यापि देहस्य तन्त्रेण सृष्ट्यादिकर्तृत्वोपपत्त्यर्थत्वाद्वा अस्योद्भवादिदमित्यत्र दानं तावद्वचनेत्युक्तम् । सा च जन्माद्यनुकूलो दैहिको व्यापारविशेष इति च । दैहिको व्यापारश्च देहं विनाऽनुपपद्यमानोऽस्य तदाक्षिपतीत्याक्षेपलब्धत्वाद्वा न स्पष्टमत्रोक्तमित्याशयेनाह वपुष इति । तथाच जगतो जन्मस्थेमप्रलयानां रचनाशीलं यस्य तादृशं वपुः यस्येति विग्रहः । अथवा नन्वत्र मूलस्थनारायणपदस्य प्रतिपदं हरय इति विशेष्यमुक्तम् । हरिश्च मूलरूपमिति समर्थितमस्माभिर्गुहाधिकरणार्थसङ्ग्रहे । ततश्च व्याख्यानव्याख्येययोः समानविषयत्वान्मूले नारायणोऽपि मूलरूपमेव । तच्च नावतारैर्विना प्रायेण सृष्ट्यादिकर्तृपलब्धम् । ततः कथं अस्योद्भवादिदमिति विशेषणमित्यत आह जगदिति । जगतो जन्मस्थेमप्रलयानां रचनाः करणानि शीलानि स्वभावा येषां तानि वपूंषि अवतराः यस्य तस्मा इत्यर्थः । ननु के ते अवतारास्तत्रापि कः कस्य कर्तेत्यतोऽप्युक्तं जगतो जन्मस्थेमप्रलयानां चतुर्णां रचनाशीलानि निर्माणदीक्षितानि वपूंष्वनिरुद्धादिचतूरूपाणि यस्य तस्मा इति । तथाच सृष्ट्यादिकर्तृत्वरूपैस्तल्लिङ्गैरनिरुद्धादय एव ते अवतारा इति ज्ञायत इति भावः । यथोक्तं महाभारततात्पर्यनिर्णयषड्विंशतितमेऽध्याये । 'न मादृशोऽन्योऽस्ति कुतः परो मत्सोऽहं चतुर्धा जगतो हिताय । स्थितोऽस्मि मोक्षप्रलयस्थितीनां सृष्टेश्च कर्ता क्रमशः स्वमूर्तिभिः । स वासुदेवादिचतुःस्वरूपः स्थितोऽनिरुद्धो हृदि चाखिलस्ये'ति । एवं नम्यस्वरूपावधारणाय लक्षणान्यभिधाय शास्त्रयोनित्वात्प्रमाणान्यप्याह मूले । आप्यतममप्यखिलैः सुवाक्यैरिति । तद्वचाचष्टे अशेषाम्नायस्मृतिहृदयदीप्तायेति । समन्वयसूत्रे संशब्दस्य अर्थद्वयमभिप्रेतं सर्वेषामिति मुख्यवृत्त्येति च । तदुभयानुवादो मूले अखिलैरित्याप्यतममिति च । तत्रार्थान्तरप्रतीतिवारणाय अखिलैरित्यस्यार्थो अशेषेति । वाक्यैरासत्वं तत्प्रतिपाद्यत्वं आप्यतमत्वं तु मुख्यतात्पर्यविषयत्वमित्याशयेनाप्यतममित्येतद्वचाचष्टे हृदयदीप्तायेति । तात्पर्यतः प्रतिपाद्यायेत्यर्थः । शास्त्रेति सौत्रपदार्थानुवादो मूले सुवाक्यैरिति । तस्यार्थ आम्नायस्मृतीति । यद्वक्ष्यति । अपौरुषेयत्वेन तन्मूलत्वेन वा अनाशङ्कितदोषत्वादिना शोभनानि वाक्यानि वेदादीनि ब्रह्मसूत्राणि च सुवाक्यानि तैरखिलैरप्याप्यतममतिशयेन प्रतिपाद्यमिति । तथा चाम्नायपदोक्ता वेदास्तदनुसारिपौरुषेयग्रन्थाश्च तत्र प्रमाणमिति भावः । नन्वल्पाच्तरमिति सूत्रात् अल्पाच्तरत्वात्स्मृत्याम्नायेति भाव्यम् । सत्यम् । तथाप्याम्नायस्य प्राधान्यप्रदर्शनार्थमाम्नायस्मृतीति व्यत्यस्तप्रयोगः । यथोक्तं युक्तिपादीयसुधायाम् । 'जल्प इत्यपि नाम स्याद्वादस्यैतादृशस्य तु' इत्येतद्वचाख्यावसरे । उभयार्थः स्यादित्युक्ते साम्यप्रतीतिप्रसक्तौ निर्णीति जयकारक इति तत्त्वनिर्णीतेः प्राधान्यप्रदर्शनार्थं विवरणं कृतम् । अल्पाच्तरमिति लक्षणस्य व्यभिचारं कुर्वाणेनाप्येतदेव सूचितम् ।

अन्यथा जयनिर्णीतिकारक इत्यवक्ष्यदिति । नन्वेवमल्पाच्तरमित्यस्य नित्यत्वे कथं लक्षणहेत्वोः क्रियायाः 'समुद्राद्भ्राद्ध' इत्यादिषु सौत्रा एव तद्विपरीताः प्रयोगा इति चेन्न । अभिप्रायसद्भावात् । तथाहि । अल्पाच्तरमित्युत्सर्गः । उत्सर्गस्य क्वचित्कारणान्तरेणायं वादो दृष्टः । यथा न हिंस्यात्सर्वा भूतानीत्युत्सर्गस्याग्नीषोमीय पशुमालभेतेत्यपवादः । कारणान्तरेणापोदितस्तु उत्सर्गोऽपवादविषयं परित्यज्यान्यत्र सर्वत्र स्वविषयं व्यवस्थापयत्येवेति नित्य एव । नत्वपवादो नापोदितो व्यभिचारीत्यमानम् । यथोक्तं भक्तिपादीयानुव्याख्याने । उत्सर्गतोऽपि यत्प्राप्तमपवादविवर्जितम् । व्यभिचार्यपवादेन मानमेव भविष्यतीति । तत्रैव सुधायां च । अदृष्टे व्यभिचार इति साध्यव्यभिचारिलिङ्गप्रमाणमित्युक्तम् । तत्र विशेषमाह उत्सर्गतोऽपीति । यल्लिङ्गमुत्सर्गतः स्वभावेनापवादविवर्जितं साध्यव्यभिचारविवर्जितं प्राप्तं निश्चितमप्यपवादेन कारणविशेषेणैव व्यभिचारि तन्मानमेव भविष्यति । एतदुक्तं भवतीत्यादि । आनन्दमयनयसुधायां च । अत्र केचिद्व्यभिचारमुद्भावयन्ति । तदसत् । सामान्यलक्षणप्राप्तं हि पुनर्विशेषलक्षणैरपोद्यत इति व्याकरणप्रक्रिया । यथोक्तं सामान्यविशेषवता लक्षणेनेति । तत्र विशेषलक्षणान्यपर्यालोच्य सामान्यलक्षणे व्यभिचारोद्भावनं कथं युज्यत इति । एवं चाल्पाच्तरमिति विधिर्वस्तुतो नित्य एव । तस्य यथा प्राधान्यसूचनादिकारणान्तरवशान्निर्णीतजयकारक इति मूलमपवादकमित्युक्तं सुधायाम् । अन्यथा विधेरनित्यत्वे प्रयोगस्योच्छृङ्खलत्वान्निर्णीतिजयकारक इति व्यत्यस्तप्रयोगेऽपि प्राधान्यसूचनं न स्यात् । तथा लक्षणहेत्वोरित्यादिसौत्रप्रयोगा अपि कारणान्तरवशादपवादका एव । अन्यथा शब्दाम्भोनिधिविहरणचतुरः पाणिनिमुनिरल्पाच्तरमिति स्वयमेवाभिधाय पुनर्लक्षणहेत्वोरिति तद्विपरीतं स्वयमेव प्रयुञ्जन् स्वोक्तविरुद्धभाषीति सर्वत्रानवधेयवचनः स्यात् । संभावितं चैतत् । यत्सार्वत्रिकतया प्रसक्तस्यापि नियमस्य क्वचिदपवादेनाभावेऽपि नित्यत्वम् । यथाल्पाक्षरत्वं सूत्रलक्षणं श्रुत्यनुगमादिरूपप्रयोजनानन्तरार्थमाकाश इत्यादिबह्वक्षरपदोपेतेष्वाकाशस्तल्लिङ्गादित्यादिसूत्रेष्वभावेऽपि सूत्राणां नित्यं लक्षणमेव न तु सर्वथा अलक्षणं नाप्यनित्यम् । अन्यथा सूत्रान्तरेष्वपि अल्पाक्षरोपेतपदप्रयोग एव कार्य इति नियमाभावप्रसङ्गात् । सर्वज्ञशिखामणिः सूत्रकारोऽपि स्वोक्तविरुद्धभाषीत्यनवधेयवचनः स्यात् । यथा वा प्रतिबन्धादिनिमित्तान्तरवशात्क्वचित्कार्यमजनयदपि कारीर्यादि वृष्ट्यादिकारणं भवत्येव । तथाल्पाच्तरमिति विधिरपि कारणान्तरवशात्क्वचिदप्रसक्तोऽपि नित्य एव । कारणान्तरं च मुनिवचनस्य नैरर्थ्यस्यायोगात्सामान्यतः सिद्धमेव । विशेषतस्त्वनवसरान्न विचार्यते । न चानित्यत्वज्ञापनमेवास्तु कारणान्तरमिति वाच्यम् । तथात्वेऽन्यतरस्यामित्यादिस्पष्टशब्दान्तरप्रयोगं विहाय स्वोक्तविरुद्धभाषणायोगादिति । नन्वेवं सति अल्पाच्तरमित्यस्यानित्यत्वाच्छकुनिसूत्रयोरिति साधुरिति विष्णुतत्त्वनिर्णयटीकाविरोध इति चेन्न । तत्रानित्यत्वादित्यस्य कारणान्तरापोदितत्वादित्येवमर्थकत्वेनोपपन्नत्वात् । अन्यथा प्राज्ञशिरोमणिः सर्वज्ञकल्पष्टीकाकारोऽपि विष्णुतत्त्वनिर्णयटीकासुधयोरुन्मत्तवत्परस्परविरुद्धं कथमभिदध्यात् । ननु तथापि यदुक्तं आम्नायस्मृतीति व्यत्यस्तप्रयोगस्याम्नाये प्राधान्यज्ञापनं प्रयोजनमिति तदयुक्तम् । सुवाक्यैरित्यस्य प्रसिद्धार्थकत्वेऽपि सामान्यशब्दत्वात्सुवाक्यमात्रे साम्यप्रतीतिप्रसक्तौ तत्राम्नायस्य प्राधान्यप्रदर्शनार्थं आम्नायस्मृतीति विवरणं कृतमिति तेनैव तज्ज्ञापनात् । यथोक्तमुक्तायां सुधायाम् । उभयार्थः स्यादित्युक्ते साम्यप्रतीतिप्रसक्तौ निर्णीतिजयकारक इति तत्त्वनिर्णीतेः प्राधान्यप्रदर्शनार्थं विवरणं कृतमितीति चेत् । किं स्ववाक्यस्य स्वेनैव विवरणं ज्ञापकमित्यभिप्रेतं किं वा

विवरणमात्रम् । नाथः । प्रकृते तदभावात् । द्वितीये व्यत्यस्तप्रयोगरूपव्यभिचारकरणस्य ज्ञापकान्तरत्वसंभवात् । अत एव तत्रैव सुधायां अल्पाच्तरमिति लक्षणस्य व्यभिचारं कुर्वाणेनापीत्यपिशब्दः प्रयुक्तः । अत्रानुव्याख्याने विशेषणक्रम एकस्मिन्नध्याय्यानसुधायां त्वन्यः । तत्रानुव्याख्यानस्यायमाशयः । नमनायावश्यकं नारायणस्वरूपावधारणं लक्षणप्रमाणाभ्यां भवति । तत्र निखिलपूर्णगुणैकदेहमिति निर्दोषमिति विशेषणाभ्यां लक्षणान्यभिहितानि । अथ तद्विशिष्टे प्रमाणानि वक्तव्यानि । तत्र परोक्षे नारायणे प्रत्यक्षस्यानवकाशात् वक्तव्ययोरागमानुमानयोर्मध्ये आगमस्यापजीव्यत्वादाप्यनममप्यखिलैः सुवाक्यैरित्यागम एवादावुक्तः । अत एवागमेऽपि स्मृतिं प्रत्याम्नाय एवापजीव्य इत्यवान्तरविशेषमपि ज्ञापयितुं सुधायामल्पाच्तरमिति सौत्रनियममपहाय आम्नायस्मृतीत्याम्नायस्यादौ सङ्कीर्तनं कृतम् । अनुमानस्य तूपजीवकत्वादागमानन्तरमस्योद्भवादिदमित्यनुमानान्युक्तानीति । यद्वक्ष्यति सुधायाम् । अथवा निखिलेत्यायुक्तलक्षणोपपन्नतया नारायणः केन प्रमाणेन प्रतिपत्तव्य इत्यतः सुवाक्यैराप्यमित्युक्तम् । अपिशब्दो वक्ष्यमाणप्रमाणसमुच्चयार्थः । सकलजगन्निमित्तकारणत्वादिहेतुभिरप्युक्तलक्षणो नारायणः प्रत्येतव्य इत्यभिप्रत्यानमय्यंतीति । सुधायास्त्वयमाशयः । प्रमाणाकाङ्क्षाया गुणपूर्णत्वादिप्रधानलक्षणेष्विव तत्र प्रमाणतयाभिप्रेतेषु सकलजगन्निमित्तकारणत्वाद्यवान्तरलक्षणेष्वप्यसंभवपरिहारादयो भवन्त्येवेत्येकोक्त्यैवोभयत्र प्रमाणान्यभिधातुं नित्यागणितगुणेति जगज्जन्मस्थेमेति च विशेषणाभ्यां तदुभयमादावभिधाय अशेषाम्नायस्मृतिहृदयदीप्तायेत्याद्यग्रन्थे निवेश इति । अत एव सूत्रकारेणाप्याद्यसूत्रे गुणपूर्णत्वादीनि द्वितीयसूत्रे जगन्निमित्तकारणत्वादीनि च लक्षणान्यभिधाय शास्त्रयोनित्वादित्युभयत्रापि प्रमाणानि दर्शितानीति ध्येयम् । यद्वा ननु कुतो नारायणस्य नम्यत्वं तथान्येऽपि कुतोऽन्यासु देवतासु सर्वाध्वस्यैव नमनमित्याशङ्क्योक्तं मूले अशेषविशेषतोऽपि वन्द्यमिति । नारायणस्य वन्द्यत्वप्रयोजकधर्मवत्त्वाद्वन्द्यत्वं सर्वोत्तमत्वाद्येतरप्रमाणेन वन्द्यत्वमिति तत्परिहारोऽत्राभिमतः । वन्द्यत्वप्रयोजकीभूताश्च धर्मा विशिष्टत्वाधिकृतत्वेष्टत्वरूपास्त्रयः । तत्र विशिष्टत्वोपपादनाय मूले निखिलपूर्णगुणैकदेहं निर्दोषमस्योद्भवादिदमिति विशेषणत्रयम् । तदभिप्रेतार्थमाह नित्यागणितगुणमाणिक्यविशदप्रभाजालोल्लासोपहतसकलावद्यतमसे, जगज्जन्मस्थेमप्रलयरचनाशीलत्वपुष इति द्वाभ्याम् । अधिकृतत्वप्रदर्शनाय मूले आप्यतममप्यखिलैः सुवाक्यैरिति विशेषणम् । तदर्थमाह अशेषाम्नायस्मृतिहृदयदीप्तायेति । इष्टत्वप्रदर्शनाय मूले सदा प्रियतमं नमेति । अनेन नम्रप्रेमयोग्यत्वमेवेष्टत्वमित्युक्तं भवति । इष्टत्वं द्विविधम् । निरुपाधिकं सोपाधिकं चेति । अधिकारिणोऽपि द्विविधाः । एकान्तिनस्तदन्ये चेति । तत्राद्यमाद्यान्याति । यथोक्तम् । एकान्तानां न कस्यचित् । अर्थे नारायणो देवः सर्वमन्यत्तदर्थकमिति । द्वितीयं द्वितीयान्याति । यथोक्तमनुव्याख्याने साधनमिष्टस्य भगवानिष्टदेवतेति । सोपाधिकमिष्टत्वं चेष्टसाधनत्वानतिरिक्तम् । तत्र यदिष्टं प्रति साधनत्वं भगवति ज्ञेयम् । तदिष्टं द्विविधम् । संपदादिभावरूपम् अनिष्टनिवृत्त्याद्यभावरूपं चेति । तत्राद्यं प्रति साधनत्वं भगवतोऽप्यस्तीत्याह । श्रियः स्वरूपानन्दाविर्भावादिरूपमोक्षादिसंपदः । पत्ये दातृतया स्वामिन इति । तथा द्वितीयं प्रत्यपि साधनत्वं तस्यास्तीत्याह । हरनि वन्द्याद्यनिष्टमिति हरिरतस्मा इति । अत्र वन्द्यत्वप्रयोजकेष्वाद्यप्रयोजकोपपादकानां निखिलपूर्णगुणत्वादीनां तथा द्वितीयतृतीयप्रयोजकयोश्च सर्वोत्तमत्वोपपादकतया सर्वोत्तमत्वादस्यैवेतरप्रहाणेन वन्द्यत्वमपि समर्थितं भवतीति ज्ञेयम् । अथातो ब्रह्मजिज्ञासेत्यत्र जिज्ञास्यं ब्रह्म तावद्विष्वरूपमित्यवश्यमङ्गीकरणीयम्, तल्लक्षणोपेत-

त्वात् । तत एव नारायणोऽपि तथा । तथाहि । मोक्षस्तावदपरोक्षज्ञानेनैव भवतीति विद्यैव तु निर्धारणादि-त्यधिकरणे दर्शनाच्चेति सूत्रादि सिद्धम् । अपरोक्षज्ञानं द्विविधम् । बिम्बापरोक्षमबिम्बापरोक्षं चेति । तत्राद्यं साक्षादेव मोक्षसाधनम् । द्वितीयमाद्यद्वारा । तथाच साक्षान्मोक्षसाधनज्ञानविषयत्वरूपं बिम्बलक्षणम् अथातो ब्रह्मजिज्ञासेति सूत्रे स्वजन्यज्ञानद्वारा मोक्षसाधनत्वात् ब्रह्मजिज्ञासा कर्तव्येति जिज्ञास्यब्रह्मण उच्यते । यथोक्तमनुव्याख्याने जिज्ञासाधिकरणे । जिज्ञासोत्थज्ञानजात्तत्प्रसादादेव मुच्यत इति । तथोपासनापादे च । 'यतो मोक्षादिदातासावतो जिज्ञास्य एव वः । येनैव बन्धमोक्षः स्यात्स च जिज्ञासयागत' इति । अत एव तत्त्वप्रकाशिकायाम् । सौत्रं ब्रह्मैव विशेष्यतया निर्दिश्य ध्यानजज्ञानयोगाद्गम्यमित्युक्तम् । तथा शरीरेन्द्रि-यादिसर्वचेष्टकत्वं च बिम्बलक्षणम् । यथोक्तं भागवतसारोद्धारे बिम्बोपदेशप्रकरणे । 'स्थित्युद्भवप्रलयहेतुरहेतुरस्य यः स्वप्नजागरसुषुप्तिषु सन्बहिश्च । देहेन्द्रियासु हृदयानि चरन्ति येन सञ्जीवितानि तदवैहि परं नरेन्द्रे'ति । इदं च लक्षणं जिज्ञास्यस्योच्यते । ब्रह्मशब्दश्च विष्णावेवेति भाष्येण । तस्यार्थः । चशब्दः प्रकृतानुसन्धानार्थः । रूपान्तरसाधारणोऽपि ब्रह्मशब्दः प्रकृतसूत्रे विष्णौ देहेन्द्रियादि सर्वचेष्टके रूपे एव । न कार्यान्तरार्थे रूपान्तरे । यथोक्तं महाभूतिभाष्ये । 'इत्थमैक्षत देवेशो ब्रह्माद्या यदि मां विना । क्रियादिषु समर्था स्युर्न मे विष्ण्वभिधा भवेत् । सर्वचेष्टयितृत्वाच्च विशिष्टबलतस्तथा । विष्णुरित्यभिधा मह्यमि'तीति । यद्यपि स विष्णुराह हि न ब्रह्मेत्याचक्षत इति निरन्तरसूत्रद्वये ब्रह्मत्वेन नारायणस्यैव प्रस्तुतिं सूचयति विष्णुग्रहणेनेति टीकायां विष्णुशब्दस्य प्रयोजनमुक्तं तथापि तदुपलक्षितमेव प्रयोजनान्तरमिदमुक्तमिति नानुपपत्तिः । तथा देहेन्द्रियादिसर्वप्रेरकतया सर्वजीवहृदयगुहानिविष्टत्वं च बिम्बरूपलक्षणम् । यथोक्तं गुह्यं प्रविष्टाविति सूत्रे । गुह्यं प्रविष्टौ पिबन्तौ विष्णुरूपे एव । आत्मान्तरात्मेति हरिरेक एव द्विधा स्थितः । निविष्टो हृदये नित्यं रसं पिबति कर्मजमित्यादि तद्भाष्ये च । ज्ञानं विशुद्धं परमार्थमेकमनन्तरं न बहिर्ब्रह्म सत्यम् । प्रत्यक्प्रशान्तम् । त्वं प्रत्यगात्मनि सदा भगवत्यनन्त आनन्दमात्र उपपन्न समस्तशक्ताविति भागवते सारोद्धारे तस्मिन्नेव प्रकरणे । प्रत्यक्प्रत्यगात्मपदाभ्यां च । इदमपि लक्षणं जिज्ञास्यब्रह्मण उच्यते तैत्तिरीये ब्रह्मवल्ल्याम् 'यो वेद निहितं गुहायां परमे व्योमन्नि'ति । यथोक्तमानन्दमयनयसुधायाम् । यो वेदेति द्वितीयशङ्को-त्तरम् । परिपूर्णपरिमाणमपि शक्तिवशाद्भक्तानुकम्पया अल्पपरिमाणं प्रकटयत्सर्वजीवतदुपकारिकार्यकारणप्रेरकत्वेन हृदयगुहावस्थितं ज्ञेयमितीति । तथा अस्मिन्नेव भागवतसारोद्धारवाक्ये ब्रह्म सत्यमिति ज्ञानं विशुद्धमिति भगवत्यनन्त इति च सत्यत्वादीनि बिम्बलक्षणान्युक्तानि । इमान्यपि लक्षणानि जिज्ञास्यब्रह्मण उक्तानि । सत्यं ज्ञानमनन्तं ब्रह्मेति । एवं नारायणेऽपीमानि बिम्बलक्षणानि सन्त्येव । नारायणशब्दस्य ब्रह्मशब्दव्याख्यानत्वेन तत्समानार्थत्वात् । अतो नारायणस्यैव जिज्ञासा अत्र विधीयत इत्यनुव्याख्याने नारायणस्यैव स्पष्टजिज्ञास्यत्ववचनाच्च । उपलक्षणायान्यान्यपि लक्षणानि ग्राह्याणीत्याशयेनैव ज्ञेयं गम्यमिति भाष्ये साक्षान्मोक्षसाधनज्ञानविषयत्वरूपप्रथमलक्षणस्योपन्यासाच्च । स्पष्टं च नारायणे जिज्ञास्यब्रह्मण्युक्तानि सर्वाण्यपि बिम्बलक्षणानि श्रावयति 'नारायणं महाज्ञेयं विश्वात्मानं परायणम् । विश्वतः परमां नित्यं विश्वं नारायणं हरिमि'त्येवंजातीयका जिज्ञासाविधात्री श्रुतिः । तत्र नारायणस्य महाज्ञेयमिति-पदेन साक्षान्मोक्षसाधनज्ञानविषयत्वरूपलक्षणस्य विश्वात्मानमितिपदेन सर्वजीवहृदयगुहानिविष्टत्वस्य तत्र स्थित्वा शरीरेन्द्रियादिरूपकार्यकारणप्रेरकत्वस्य च जीवनप्राणनकर्तृतया मुख्याश्रयत्वबोधकेन नारायणपदेन सत्त्वं जीवनमेव

चेत्याद्यानन्दमयनयोक्तदिशा सत्यत्वस्य द्वितीयनारायणपदेन नारं ज्ञानं तदाश्रयतया नारायणमिति ज्ञानस्य नित्यमित्यनन्तत्वस्य चोक्तत्वात् । तथाच यदि जिज्ञास्यं ब्रह्म नारायणो वा बिम्बरूपादन्यदेव स्यात्तदा कथं तल्लक्षणान्यत्र श्रूयेरन् । कथं चान्यस्य जिज्ञास्यतादिम्बस्य तज्जन्यज्ञानविषयतेति जिज्ञासाज्ञानयोर्भिन्नविषयता युज्येत । ननु जिज्ञासाजन्यज्ञानविषयताऽप्यन्यस्याङ्गीक्रियत इति चेन्न । साक्षान्मोक्षसाधनज्ञानस्यैव जिज्ञासाजन्यतया अत्र विवक्षितत्वादन्यज्ञानस्य च तद्द्वारीभूतस्यातथात्वाद्बिम्बान्यस्य स्वातन्त्र्येण तद्विषयता-ङ्गीकारायोगात् । तत्प्रमाणानां च द्वारकारणप्रतिपादनपरतया सावकाशत्वस्य वक्तुं शक्यत्वात् । अत्र विशेषोऽग्रन्थणीनेन सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिरित्यधिकरणार्थसंग्रहे द्रष्टव्य इति । तथा चावश्यं जिज्ञास्यं बिम्बरूपमित्यङ्गीकार्यमिति स्थिते तत्किंनामकमित्यत उक्तं हरय इति । तद्बिम्बरूपं हरिनामकं 'रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय । इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशे'ति श्रुतेः । तथा श्रुतिपादे आभास एव चेत्यष्टादशे अधिकरणे जीवसमुदायः परमेश्वरस्य रूपं रूपं प्रति प्रतिरूपो भूत्वा वर्तते । तद्बिम्बरूपमस्य मुक्त्यर्थं साक्षात्कारविषयो भवति । स च परमेश्वरः स्वसामर्थ्येनानन्तजीवबिम्बरूपो जायते । अग्न्यानन्तानि हरिनामकानि रूपाणि व्यूहशः सन्तीति प्रसिद्धमित्यर्थ इति । तथा उपासनापादे विकल्पो विशिष्टफलत्वादित्येकोनचत्वारिंशेऽधिकरणे अत्र हरिदर्शनोपयोग्यबिम्बोपासनस्याकर्तव्यतानिरासादस्ति शास्त्रा-दिगम्यकृतिर्गिति च तत्त्वप्रकाशोक्तेरिति भावः । सूत्रभाष्ययोः सामान्यपदप्रयोगस्तु द्वारतया रूपान्तरस्यापि जिज्ञास्यतालाभाय । तेन तद्वचनान्यपि अनुकूलितानि भवन्तीति । इममेवाशयं विवक्षित्वा सूत्रकारैः बहुबिम्ब-लक्षणोपेतां 'ब्रह्मविदाप्नोति परमि'त्यादितैत्तिरीयश्रुतिं स्मारयितुं तत्रत्यब्रह्मपदपठनेन 'तद्विजिज्ञासस्व तद्ब्रह्मे'ति तैत्तिरीयश्रुतिमेव विशिष्य विषयवाक्यतया निर्दिदेशेति । अत्रास्य पद्यस्यार्थविशेषास्तु अनुव्याख्यानाख्यपद्यस्य करिष्यमाणव्याख्यानानुसारेण ज्ञेयाः । तत्प्रकारश्च निपुणतरं व्युत्पादितोऽस्मद्गुरुचरणैः सुधासरञ्जिन्यामिति सप्रपञ्चरुचिभिरवहितैस्तत्रैव द्रष्टव्य इति ॥

ब्रह्मविद्याध्यायार्थिभिर्नारायणादयः षड्देवता अवश्यं वन्दनीयाः । तथाहि । तत्र ब्रह्मविद्यावाच्यतया नारायणस्तद्वक्तृतया वेदव्यासस्तदध्यायार्थिनां तदुपयुक्तान्नपानवसनाद्यर्थभाग्याभिमानिनी लक्ष्मीस्तत्साध्यतत्त्व-निर्णयाय भगवत्कार्यसाधकेशो वायुस्तस्य मनोवाग्व्यापाररूपत्वेन तत्परतया तदुभयनियमनाय तदभिमानिनी भारती तत्राधिकारसंपत्तये वैराग्यार्थं भगवत्कार्यस्यावान्तरसाधकः शेषदेव इति । तदुक्तं महाभारततात्पर्यनिर्णये । 'नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरये । वायुर्नरोत्तमो नाम देवीति श्रीस्दीरिता । नारायणो व्यास इति वाच्यवस्तु स्वरूपतः । एकः स भगवानुक्तः साधकेशो नरोत्तमः । उपसाधको नरश्चोक्तो देवी भाग्यात्मिका नृणाम् । सरस्वती वाक्यरूपा तस्मात्तस्या हि तेऽखिला' इति । तासु हरय इति नारायणो वन्दितः । अत एव नारायणवन्दननिमित्तं ब्रह्मविद्यावाच्यत्वमशेषाम्नायस्मृतिहृदयदीप्तायेति हरावुक्तम् । श्रियः पत्य इति महालक्ष्मीश्च वन्दिता । अत एव तद्वन्दननिमित्तं 'आवहन्ती वितन्वाना कुर्वाणा चीरमात्मनः । वासांसि मम गावश्च अन्नपाने च सर्वदा । ततो मे श्रियमावहे'ति श्रुत्युक्तमन्नपानादिभाग्यदेवतात्वं स्मारयितुं तत्रत्यश्रीशब्दप्रयोगः । एवं लक्ष्मीनारा-यणौ प्रणम्यावशिष्टांश्चतुरो व्यासादिदेवानपि तारतम्यक्रमेण प्रणम्य तेभ्योऽभीष्टमाशास्ते येनेत्यादिपद्यचतुष्टयेन ।

तत्राद्ये पद्ये व्यासवन्दननिमित्तं विद्यावक्तृत्वं व्यस्तारि गोसन्ततिरित्यादिना प्रदर्शितम् । द्वितीये वायुवन्दननिमित्तसाधकेशत्वोपपादनं भूयात्तत्त्वविनिर्णयाय भगवानिति । तृतीये भारतीवन्दननिमित्तवाङ्मनोमानित्वप्रदर्शनं वचनचेतोदेवतेति । चतुर्थे शेषवन्दननिमित्तावान्तरसाधकत्वप्रदर्शनं वैराग्यभाग्यो भवताद्विभूत्या इतीति ज्ञेयम् । अत्र पद्मनाभतीर्थाः शेषावतारा इत्यार्याः । अत एवात्रापि रमानिवासोचितवासभूमिरिति रमारमणोचितशयनस्थानत्वरूपं सन्न्यायरत्नावलिजन्मभूमिरिति फणासु रत्नावलिमत्त्वरूपं वैराग्यभाग्य इति शेषस्य शिवैक्यात् तदभिमन्यमानवैराग्याधिकरणत्वरूपं च ज्ञापकमर्थादुक्तमिति ज्ञेयम् । ननु नरं चैव नरोत्तममित्यत्र शेषवाय्वोर्मूलरूपेणैव मुख्यावान्तरसाधकत्वं प्रतीयते । अतः कथं तदुपजीव्यवायुशेषावतारयोरानन्दतीर्थपद्मनाभतीर्थयोर्मुख्यावान्तरसाधकत्वाद्भङ्गतोच्यते । मैवम् । 'तस्याङ्गं प्रथमं वायुः प्रादुर्भावत्रयान्वितः ।' 'प्रथमो हनुमान्नाम द्वितीयो भीम एव च । पूर्णप्रज्ञस्तृतीयस्तु भगवत्कार्यसाधकः । तृतीयाङ्गं हरेः शेषः प्रादुर्भावसमन्वित' इत्यादि निर्णयवचनबलादेवावतारयोरपि मूलवन्मुख्यावान्तरसाधकत्वसिद्धेः । ननु पद्यचतुष्टयेऽपि गुणकीर्तनरूपा स्तुतिरभीष्टाशासनं चेति द्वयमेव प्रतीयते न प्रणामः । अतः कथं प्रणम्याभीष्टमाशास्त इत्युक्तमिति चेन्न । तद्गुणकीर्तनरूपा स्तुतिस्तत्र मनोवृत्तिप्रवणतां विना न संभवतीति सर्वानुभवसिद्धा । मनोवृत्तेस्तत्प्रवणता हि वन्दनं नामेत्यभिप्रायात् । अथवा पूर्वप्रस्थाने मूलकारस्य गुरुदेवतयोरभेदेऽपि नारायणं नत्वा गुरुंश्च नत्वेति पुनः प्रणामेन गुरुनमस्कारावश्यकत्वस्य नारायणं नत्वेति त्वाप्रत्ययेन गुरुनमस्कारे देवतानमनानन्तर्यस्य स्वगुरोरेकत्वेऽपि गुरूनिति बहुवचनेन यस्य यावन्तो गुरवस्तेन ते सर्वेऽपि नमस्कार्या इत्यस्य च शिक्षितत्वात्तदनुसारेण 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन' इत्यादिश्रुत्यनुसारेण च टीकाकारोऽपि देवतानतिसमनन्तरं 'स्मृत्वा गुरुं पूर्वगुरुं आदिमूलगुरुं तथा । देवतां वासुदेवं च विद्याभ्यासी तु सिद्धिभागि'त्यत्र ब्रह्मविद्याभ्यासिभिरवश्यं वन्द्यतयोक्तान् मूलगुर्वादीन् चतुरो गुरून् क्रमेण प्रणमति येनेत्यादिपद्यपञ्चकेन । तत्र यं स्वतन्त्रं गुरुं मूलीकृत्यान्येषां सर्वेषामपि गुरुत्वं प्राप्तं स मूलगुरुः सर्वेषां गुरुत्वमपि नमनगुरोरेव साक्षाल्लभ्यते । किन्तु तद्वारीभूतं यं कञ्चन सर्वज्ञमादिं कृत्वा स एवादिगुरुः । साक्षादुपदेशको गुरुः । गुर्वादिगुरुमध्यवर्तिनोऽवान्तरतारतम्योपेताः सर्वेऽपि पूर्वगुरवः । तत्र मूलगुर्ब्वादरायणः । स येनेत्याद्यपद्येऽभिवन्दितः । ततस्तद्गतानि विशेषणानि तत्र मूलगुरुत्वोपपादनपरतया योज्यानि । एवमुत्तरत्रापि । आदिगुरुर्मुख्यवाय्ववतारभूतः श्रीमदानन्दतीर्थः स व्यासिरिति द्वितीयपद्येऽभिवन्दितः । पूर्वगुरुर्भारतीमारभ्य साक्षाद्गुरुपर्यन्तः सर्वोऽपि । अत एव मध्यवर्तिसर्वसङ्ग्रहाय तेष्वाद्यन्तौ भारतीपरमगुरू भवतीत्यादितृतीयचतुर्थपद्याभ्यामभिवन्दितौ । साक्षाद्गुरुः अक्षोभ्यतीर्थः प्रसिद्धः स पदवाक्येति पञ्चमपद्येऽभिवन्दितः । अत्र गुरुंश्च नत्वेति पृथक्प्रणामस्य गुरूनिति बहुवचनस्य च टीकादावुपलक्षणाभिप्रायेणैकैकमत्र प्रयोजनमुक्तम् । अन्यथा 'ग्रन्थोऽयमपि बह्वर्थो भाष्यं चात्यर्थविस्तरमि'ति स्वयमेवोक्तत्वात्तदभिप्रेतयावत्प्रयोजनप्रदर्शने यथा पर्यवसानप्रसङ्गात् । अत उपलक्षणया तत्सूचितमेव प्रयोजनान्तरमत्र प्रदर्शितम् । एवमन्यत्राप्यनुसन्धेयमिति । अथवा देवतानमनस्येव गुरुनमनस्याप्यभिमतसिद्धचङ्गतया कार्यारम्भेऽवश्यमनुष्ठेयत्वात् तदाचरणपुरःसरं गुरुत्वं विवृण्वन् गुरुषु गुरुत्वप्रयोजकीभूतान्धर्मांश्च दर्शयति येनेत्यादिपद्यपञ्चकेन । गुरुत्वं च बहुधा भवति । क्वचिन्मोक्षसाधनोपदेशाय महाशास्त्रनिर्माणादिना क्वचिन्महाशास्त्रावबोधकप्रमाणप्रमेयसङ्ग्राहकबहुग्रन्थनिर्माणपूर्वकं

विशिष्टतत्त्वनिर्णयजननेन क्वचिच्छास्त्राभ्यासजन्यतत्त्वनिर्णयस्य मनोव्यापारसाध्यत्वेन तयोस्तद्विषयतया नियमनेन क्वचिदुक्तग्रन्थार्थविवरणकरणपूर्वकं वैराग्यादिसहकारिशिक्षणेन क्वचिन्मोक्षमार्गप्रवृत्तये सोपस्करसच्छास्त्रोपदेशेन चेति।

चषकः—

पर्यष्कारि तनुर्गुणौघमणिभिस्तत्सौषुमोत्कर्षतोऽजङ्घानीतरतन्त्रताद्यरतमःस्तोमः कदम्बं विदाम्।
स्वामोमोदि च येन विश्वजननस्येमादिहेतुर्गिरां सर्वस्वं मम तन्तनीतु स शिवं श्रीशास्तुरङ्घास्यकः ॥ १ ॥

योऽश्रायि विद्येन्दिरया शुकेन्दुना तन्त्रादिरत्नैरपि भारतद्रुमा(णा)।
सूत्रामृतेन श्रितकल्पणादपं तमद्य कानीनसुधानिधिं श्रये ॥ ॥ २ ॥

यस्सूत्रपीयूषनिधिं पृणाति गोभिर्ह्रीविद्याख्यतमः कृणाति।
पृणोतु स स्वान्तचकोरकेऽद्य त्विष्णाति वाच्येन दरीदृशाख्यः(ज्वः) ॥ ३ ॥

सूत्रज्यान्वितसौत्रभाष्यधनुषि प्रोतप्रमाणाशुगश्छिन्दन्युक्तिशिरांसि मायिकसुधीसंशप्तकीयानि हि।
कृष्णव्यापृतनैगमार्वकमहाशास्त्रोल्लसत्स्यन्दनारूढस्संपदमाशु मे प्रदिशतात्पार्थो जयीशाभिधः ॥ ४ ॥

योऽनन्तविद्वद्वसमण्डनक्रियाहेतुं व्यधाद्भवनिभं कृतित्रयम्।
सोऽलञ्चिकीर्ष्यादथ संयमीन्द्रो मां व्यासराजस्त्रितयेन तेन ॥ ॥ ५ ॥

व्याचक्रिरे ये तु महानुभाविनस्तत्पादपाथोजरजः स्मृतिर्हि नौः।
सुधां गभीरद्युसरित्रिभामलं तितीर्षतो बालिशशेखरस्य मे ॥ ॥ ६ ॥

चमत्कृतं चर्करीते चर्कृतादौ फणीतैः। अचर्कतमचर्कारि सत्यवर्यं तमाश्रये ॥ ॥ ७ ॥

गीष्पतिं योऽदिधिषणदचिकीतत्किरीटिनम्। व्यशश्राणनदादित्यं सत्यधर्मः स माऽवतात् ॥ ८ ॥

धायं धायं सुधां सौधभावस्य हि प्रकाशिकाम्। योऽतानीच्छ्रीनिवासार्यः श्रेयो मे तन्तनीतु सः ॥ ९ ॥

अगाधेयं सुधा क्वातिगूढार्था मन्दशेमुषिः। क्व चाहमपवाक्यत्वं यास्याम्यन्ते सतामपि ॥ ॥ १० ॥

श्रीमन्न्यायसुधां भौमनिलिम्पानां सुधित्सताम्। सौधं चषकमुदीतं मुदे कृष्णोऽभिधास्यति ॥ ॥ ११ ॥

श्रीनिवासार्यहृत्पद्मन्दिरो हयकन्धरः। सुनन्दतात्सेवया मे भक्त्याऽलङ्कृतयाऽनया ॥ ॥ १२ ॥

'वृद्धिसूत्रे एतदेकमाचार्यस्य मङ्गलार्थं मृष्यतां माङ्गलिक आचार्यो महतश्शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते' इति व्याख्यासमर्थनौपयिकतया 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि चाध्येतारश्च मङ्गल्युक्ता वृद्धियुक्ता तथा स्युरि'ति पातञ्जलाभिधानाद्वन्योऽयमित्यानुपूर्वीकभगवत्पादीयवचोधर्मिकप्रामाण्योपरक्तप्रतिसंहित्युत्पादनानुकूलव्यापारविशेषितोऽनुव्याकृतिव्याकृतिमारिप्सुष्टीकाकृत्पूज्यचरणस्समीहितसमापनादिफलकश्रीजान्यभिष्टुत्यादिरूपमङ्गलविधानोत्तरकालिका-

नभ्यर्णवर्तिविनेयाधिकरणकतद्गोचरानुसंहितिप्रयोजनकं मङ्गलप्रत्यायकपदघटकवर्णानुवादकरेखाविशेषरूपोपनिबन्धमादितो विधत्ते श्रियः पत्य इत्यादि । घिसंज्ञाविरहत्वान्न गुणः । आदितस्समापनदशायां च श्रीमहालक्ष्मीपदयोरुपादानेनातीवमाङ्गलिकतैतस्य ध्वन्यते । शैषिकषष्ठ्यन्तताश्रयणेनेशशेषतयैव प्रणता श्रेयसे प्रभवतीति ज्ञापयति । स्वव्याख्येयाद्यपद्यगतचतुर्विशेषणीविवृतिफलिका नित्येत्यादिचतुर्थ्यन्तत्रयीत्यभिधास्यमानतत्फलेनैवैतस्याः फलवत्तेत्यवसेयम् । अत्र श्रियः पत्य इत्युक्त्या नारा लक्ष्मीः पतित्वेन तदयनमित्यभिप्रायव्यञ्जनेनावश्यकवाङ्मनसदेवतानमनाभावप्रयुक्तन्यूनताशङ्काऽपहस्तिता भवतीत्याद्यचतुर्थ्यन्तमपि विशेष्यवाचकपदविवृतिपरमित्यपि स्थितम् । श्रीपदप्रकृतिकया षष्ठ्या पतिपदार्थतावच्छेदकान्वयिनिरूपितत्वं प्रत्याप्यते । नमःस्वस्तीत्यादिना नमःपदसमभिव्याहारे चतुर्थ्यनुशिष्यते । स्वापकर्षबोधनानुकूलस्वीयव्यापाररूपनत्यात्मकतमःपदार्थतावच्छेदकघटकापकर्षान्वय्यवधित्वं तया प्रत्याप्यते । स्वमुच्चारयिता । तथाच समानविभक्तिकविशेषणविशेष्यवाचकपदसमभिव्याहारस्थले विशेषणपदोत्तरविभक्तेरर्थराहित्यस्याभेदार्थकत्वस्य च मतभेदेन स्थिततया चतुर्थ्यन्तचतुष्टयीप्रतिपाद्याभिन्नहर्यवधिकापकर्षबोधानुकूलष्टीकाकृद्व्यापार इति बोधाकारो द्रष्टव्यः । सुपो धात्विति लुप्तयोल्लासपदोत्तरतृतीयया निरूपकतया धात्वर्थान्वितकरणताप्रत्यायनान्माणिक्योपमितगुणैकदेहत्वध्वान्तोपमितदोषराहित्ययोर्हेतुहेतुमद्भावो ध्वनित इत्यवधेयम् । अप्रौढप्रकाशकचाक्षुषादिरश्मिभिस्तमोनिवृत्तिप्रसञ्जनव्युदसनाय प्रौढप्रकाशकत्वस्य तन्निवर्तकतावच्छेदकघटकताज्ञापनायोल्लासपर्यन्तानुधावनम् । स च न तज्जालमन्तरेणोपपद्यत इति जालपदोपादानम् । अथोपोपसृष्टाद्धनेः कर्मसाधननिष्ठायामनुदात्तोपदेशेत्यनुनासिकलोपे निष्पन्न उपहतशब्दो नकुलेनाहिरुपहत इत्यादौ नकुलकर्तृकध्वंसप्रतियोगितारूपकर्मताविशेषवचन इति नाजात एकोऽयं हन्ति नाप्यन्याधार इति न्यायेन तत्र स्वोपहन्तव्याहिसामानाधिकरण्यवत्प्रकृतेऽपि तथात्वप्रसङ्ग इति चेदत्र गुरुपादाः प्रयोजकतासंबन्धेन फलोत्पत्तिवैशिष्ट्यरूपफलोपहितत्वस्यैव तादृङ्न्यायसञ्चारबीजत्वात्प्रकृते च तादृगुल्लासवृत्तितेजस्त्वावच्छिन्नजनकतानिरूपितध्वंसवृत्तिजन्यतानिरूपितप्रतियोगितासंसर्गावच्छिन्नावच्छेदकतावच्छेदकधर्मावच्छिन्नात्मकत्वात्मकस्वरूपयोग्यत्वरूपोपहतत्वस्यैवाभिप्रेतत्वात् । अन्यथा यादृशो राजपालितनकुलो न जातु भुजङ्गमवधीत् तत्र अयमुपहतभुजङ्गो नैसर्गिकप्रौढप्रकाशकतेजः माघे प्रतिहततमस्कस्सवितेत्याद्यभियुक्तप्रयोगाणां दुस्समाधेयतापत्तेः । अत एवोपघातकतावच्छेदकधर्मावच्छिन्ननिरूपिताधारतायाः कालत्रयावच्छिन्नतया तत्र नैकतरकालावच्छिन्नोपहन्तव्यनिरूपिताधारतेति ध्वनयितुमुपघातकतावच्छेदकधर्मावच्छिन्ननिरूपिताधारतायां आधारतायाः कालत्रयावच्छिन्नत्वावबोधनतात्पर्यकनित्यपदोपादानम् ।

अत्रैके नव्यसङ्ख्यावन्तः । प्रामाणिकप्रतियोगिताकात्यन्ताभावमुररीकृत्य तस्य टीकाक्षरजनिताधिगतिविषयत्वसिद्धये प्रकृतोल्लासोपहतपदं तादृगुल्लाससमानाधिकरणात्यन्ताभावप्रतियोग्यर्थकमित्यर्थापयन्ति । वध्यघातकभावापन्नगुणदोषाणां समसङ्ख्यतया तत्तद्वृत्तिव्यासज्यवृत्तिधर्मयोर्वध्यघातकतावच्छेदकत्वायोगेन सर्वज्ञानसर्वस्वातन्त्र्यसर्वशक्त्यादिरूपा यावन्तो घातकाभिमता गुणाः प्रत्येकं तत्तद्वृत्तिधर्मावच्छिन्नजनकतानिरूपितजन्यताशालिध्वंसप्रतियोगितावच्छेदकाभिमतवध्याभिमततत्तद्वृत्तिधर्मावच्छिन्नत्वलाभाय सकलपदोपा-

दानम् । सर्वनामरूपप्रकृतिप्रत्ययसङ्घातात्मकमौलास्येतिघटकप्रकृत्यंशजनितोपस्थितिविषयतावच्छेदकावच्छिन्न-गोचरजिज्ञासां तत्समभिव्याहृततद्गुणसंविज्ञानाभिधेयस्य वा तदघटकोत्तरपदलक्ष्यस्य वान्यपदार्थस्य च जिज्ञासां पूरयन्नुद्भवादिदातृताया नैसर्गिकतयोद्भवादेर्न फलराहित्यनिबन्धनविधित्सानुपपत्यवकाश इत्यभिदधाति ।

जगदिति। मौलादिपदस्याष्टकप्रत्यायकत्वेन व्याकरिष्यमाणतया प्रकृते त्रितयप्रमापकत्वोक्तिस्तद्व्याकृतिं विरोत्स्यतीतिशङ्का त्वेकतरपदस्य शिष्टोपलक्षकत्वाशयेन प्रववृते इति निरसनीया । अत्राजिरशिशिरेत्युणादिसूत्र-व्युत्पादितकिरच्प्रत्ययान्तस्य आतो लोप इति प्रत्ययकित्वनिबन्धनधात्वाकारलोपकस्य दृढार्थनिरूपितसमुदाय-वृत्तिकस्य स्थिरशब्दस्य काशिकायां मुग्धप्रौढस्थिरशब्दानां पृष्ठ्यादिष्वपाठात्पृष्ठ्यादिभ्य इत्यनेनेमनिचोऽप्राप्तेर्नाय-मिमनिजन्तस्साधुरित्युक्तत्वेऽपि नैषधद्वादशसर्गगत 'यत्कस्यामपि भानुमान्न ककुभि स्थेयानमालम्बत' इति श्लोकस्य व्याख्यायां वर्णदृढादिभ्यः ष्यञ् चेति सूत्रे चकारेणेमनिजस्समुचितत्वात्स्थिरशब्दस्येमनिजन्तोऽयं साधुरित्यभि-हितनया तादृशाद्भावार्थकेमनिचिप्रत्यये प्रियस्थिरेति विहितस्थादेशनिष्पन्नस्थेमशब्दस्य प्रकृतिजन्यबोधीयप्रकृत्यर्थ-निष्ठविशेष्यतानिरूपितप्रकारतापन्नभावभूतदार्ढ्यप्रत्यायकत्वेऽपि स्थाधातुप्रकृतिकतया स्थितिमन्निरूपितावयव-वृत्तिमानपि भवतीत्याशयेन 'अखिलभुवनजन्मस्थेमभङ्गादिलील' इति रामानुजभाष्यकृदभाषिष्ट । तादृशनान्दी-श्लोकगतस्थेमपदं स्थेमा स्थितिरिति श्रुतप्रकाशिकाकृदपि व्याचख्यौ । एवमन्येऽपि चिरन्तनाः । प्रकृतेऽपि स्थितिप्रतीतितात्पर्येण स्थेमपदप्रयोग इति व्याचक्षिरे ।

अपौरुषेयत्वेन तन्मूलत्वेन वाऽनाशङ्कितदोषत्वादिना शोभनानि वेदादीनीत्यादिव्याख्यास्यमानभङ्गीं प्रतिसन्दधानो वाक्यपदप्रकृतिकबहुवचनोपस्थाप्यव्यासज्यवृत्तिसङ्ख्याया असंकुचितायाः प्रकृत्यर्थेऽन्वयमुपगच्छन् कृत्यान्तप्रकृतिकतमबर्थस्तात्पर्यविषयतारूप इति च विभावयन् समुदिताशयं दर्शयति अशेषेति । अष्टलक्षण्यां द्वितीयलक्षणे द्वितीयचरणे द्वन्द्वाधिकारे 'द्वन्द्वे घि' 'अजाद्यदन्तं' 'अल्पाच्तरमि'ति त्रिसूत्री द्वन्द्वसमासे प्राक्प्रयो-ज्यताविधात्री श्रूयते । तत्र घ्यन्तस्यासङ्कीर्णमुदाहरणं हरिहराविति । अजादीत्यस्य तादृशमीशकृष्णाविति । घ्यन्तादजाद्यन्तं विप्रतिषेधेन इन्द्राग्नी इतिवदाम्नायस्मृतीत्यत्राम्नायशब्दस्य पूर्वप्रयोगनिर्वाहवत् अजाद्यदन्तमि-त्येतदर्शिततादृशेऽल्पाच्तरमित्येतच्छिवकेशावित्यत्र तादृशेऽजाद्यदन्तादल्पाच्तरविप्रतिषेधेन वागीशाविति यथा तद्वत्प्रकृतेऽप्याम्नायस्मृती इत्यत्र विप्रतिषेधेन स्मृतिशब्दस्य पूर्वनिपातः स्यादिति शङ्का तु निर्दलैव । समानाधि-करणजातीययाः 'लक्षणहेत्वोः क्रियायाः', 'समुद्राभ्राद्धः', 'नासिकास्तनयोर्धाधेटोः' इत्यादिसूत्रकारीयनिर्देशेनैत-त्प्रकरणस्यानित्यताज्ञापनात् । शकुनिसूत्रयोरित्यस्य साधुतासिसाधयिषयाऽल्पाच्तरमित्यस्य टीकाकृत्पादैरपि अनित्यताभिहितेश्च । तापसपर्वताविति वदाम्नायस्य अभ्यर्हितत्वाद्वा तत्पदस्य पूर्वनिर्देश इति ॥ १ ॥

एरी बाळाचार्यकृता—

श्रियः सहायं गुणवृन्दकायं विधूतहेयं निगमैकमेयम् ।
भजे सहायं सुसुखाप्युपायं प्रगे च सायं नरसिंहकायम् ॥ ॥ १ ॥

शंतीर्थजयतीर्थादीननन्तार्यगुरूनपि ।
संप्रणम्य न्यायसुधापद्यानि विवृणोम्यहम् ॥ ॥ २ ॥

विवृतानामपि त्वार्यैस्तेषां विवृतिचापलम् ।
बालस्यागांस्यत्र मेऽन्यान्यपि क्षाम्यन्तु सूरयः ॥ ॥ ३ ॥

अथ सर्वज्ञदेवयाष्टीकाकृच्चरणा 'इष्टं दैवं हरिः साक्षाल्लक्ष्मीर्भाग्यस्य देवता । गुर्ब्रह्मात्र वायुर्वा विद्यादेव्यौ प्रकीर्तितौ । तस्मादेते प्रिया विष्णोरन्तरङ्गतया सदा । ज्ञेयाश्चैव प्रपूज्याश्चे'त्याचार्योक्तिमनुसन्दधाना विघ्नविघातादिसाधनतया ग्रन्थादाववश्यानुष्ठेयतया भगवता सूत्रकृतोङ्कारायुपादानेन सूचितं देवतास्तुतिनत्यादिरूपमङ्गलं सन्निहितशिष्यान् प्रशासितुं ग्रन्थारम्भसमये स्वेन समनुष्ठितमसन्निहितानन्तेवासिनः प्रशासितुं देवताया नम्यत्वप्रयोजकविशिष्टेष्टत्वादिधर्मानभिदधतः आनुव्याख्यानिकमाद्यं पद्यं विवृण्वाना एव तावदुपनिबध्नन्ति श्रियः पत्य इति । श्रियः पत्ये नित्यागणितगुणमाणिक्यविशदप्रभाजालोल्लासोपहतसकलावद्यतमसे । जगज्जन्मस्थेमप्रलयरचनाशीलवपुषे नमोऽस्तोषाम्नायस्मृतिहृदयदीपाय हरये ॥ १ ॥ "श्रियः पत्य इति भूतिर्महालक्ष्मीरिति च श्रीवाचकपदाभ्यामाद्यन्तयोः संपुटीकरणाच्छ्रीकरो ग्रन्थः । तत्र च वयमेव साक्षिण" इति श्रीमद्वादिराजतीर्थश्रीचरणाः । यथावदस्त्यघ्याहाराभिप्रायेणाद्यन्तश्लोकयोः श्रीसदाशब्दाभ्यामाद्यन्तवाक्ययोश्च भगवद्भूतिशब्दाभ्यां च संपुटीकरणादयं ग्रन्थः श्रीकर इति गुरुचरणाः । उक्तं च भाष्ये— 'अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्ती'ति । तथा माघः— 'तुङ्गत्वमितरानाद्रौ नेदं सिन्धावगाधते'ति । श्रियोऽप्युपसर्जनतया नम्यत्वे श्रीपतय इति समासोक्त्यापि द्योतनीये विश्लेषोक्तिर्दम्पत्योर्महावैलक्षण्यज्ञापनाय । तदुक्तमृग्भाष्ये । 'विशिष्टार्थे च विशिष्टमिति' । एवमग्रेऽपि । मूलस्थनारायणपदविवरणपरेण श्रियः पत्य इत्यनेन नात्र सकलवाञ्छनसदेवतायाः श्रियोऽनमनेन मूले न्यूनतेति शङ्का मनेनिजुः । अनेनैव सतीष्वन्यासु देवतासु तान्विहाय श्रीपतेरेव प्रणमनं युक्तमिति सूचयन्तो अशेषविशेषतोऽपि वन्द्यमित्यपि विशेषणं व्यावृण्वन् । तथाहि । श्रियांग्रणीसूक्ते 'यं कामये तं तमुग्रं कृणोमी'त्यादिना ब्रह्मादीनां स्वाधीनपदप्राप्तिमभिधाय 'मम योनिरप्स्वा अन्तः समुद्रे' इति समुद्रान्तस्थस्य श्रीनारायणस्य स्वकारणत्वेन कथनात्सर्वदेवोत्तमत्वावगतेः । सूत्रोपात्तयोरोङ्कारब्रह्मशब्दयोरेकार्थत्वेऽपि विवक्षाविशेषेणाध्यायद्वयार्थसङ्ग्राहकतया तौ विवरीतुं सदाशब्दस्योभयत्रान्वयं निरुपपदस्य दोषशब्दस्य सकलदोषपरत्वं चाभिप्रेत्य प्रवृत्तयोराद्यद्वितीयविशेषणयोर्भजनचरणानुव्याख्याने (भक्तिपादानुव्याख्याने) अशेषशक्तियुक्तश्चेत्स्वातन्त्र्याद्दोषवान्कथमित्यनेनाचार्यैः सूचितां हेतुहेतुमद्भावेन योजनामभिप्रेत्य गुणावद्ययोर्माणिक्यतमोभ्यामुपमानेन तदुपपादयन्तस्ते विशेषणे विवृण्वन्ति **नित्येत्यादिना । गुणाः माणिक्यानीव च सकलावद्यानि तमांसीव चेति** चोपमितिसमासः । नित्यागणितगुणा आनन्दादय एव माणिक्यानि तेषां विशदानां निर्मलानां प्रभाणां त्विषां जालस्य समूहस्य उल्लासेन उपहतानि सकलावद्यान्येव तमांसि यस्य तस्मा इत्यपि व्याचक्षते । गुणोपहतत्वयोर्नित्यत्वविशेषणेन तयोः कादाचित्कत्वशङ्कां निराचक्रिरे । विवक्षाविशेषस्तु सूत्रोपात्तयोरोङ्कारब्रह्मशब्दयोर्गुणपूर्णत्वार्थत्वेऽपीहोङ्कारस्य गुणपूर्णत्वार्थत्वं ब्रह्मशब्दस्य तु निर्दोषार्थत्वमित्येवंरूपो ज्ञेयः । यद्वक्षत्याचार्यः । दोषाभावो गुण इति प्रसिद्धो

लौकिकेष्वपीति । गुणदोषयोः सहचारदर्शनादिहापि गुणित्वे दोषस्याप्यापत्तिरित्याशङ्कायां मितगुणानां दोषसहचारेऽप्यमितगुणानां तददर्शनेनेह चामितगुणानामेव हेतुतया न दोषशङ्कावकाश इत्यभिप्रेत्य वाभिदधति नित्येत्यादिना । चन्द्रिकायां तु द्वितीयाध्यायार्थोऽपि भगवन्निर्दोषता विघ्नोत्सारणाय मुमुक्षुणादावनुसन्धेयेति वा दुःखनिवृत्त्यनन्तरमेवानन्दादिगुणप्राप्तिरूपमोक्ष इति फलक्रममनुसृत्य वा तत्साधनोपासनाविषययोः निर्दोषतैवादावनुसन्धेयेत्याशयेनाध्यायार्थयोर्व्यत्यासेनास्पृष्टदोषगन्धाय कल्याणगुणसिन्धव इत्युक्तिः न तु हेतुहेतुमद्भावविवक्षतयेति तट्टिप्पण्यां स्थितम् । वयं तु निर्दोषत्वगुणपूर्णत्वयोः क्रमादाद्यद्वितीयार्थतापि विवक्षाविशेषेण मुनित्रयसंमतेतीममर्थं सूचयितुं तयोरत्था क्रमेण तत्र तत्र तथोक्तिरिति प्रतीमः । तदुक्तमनुव्याख्याने । पादाः सर्वे तदंशाश्चेति । ते पादाः अंशाः येषां ते तदंशाः अध्याय इति तदर्थः । वस्तुतस्तु 'नमो नमोऽशेषदोषदूरपूर्णगुणात्मने' इति पूर्वप्रस्थाने इह च 'निःशेषदोषरहितकल्याणाखिलसद्गुणेति' संभवत्समस्तप्रयोगेणाद्यद्वितीयाध्यायार्थयोर्व्यत्यासेनापि हेतुहेतुमद्भावसूचनात्तदननुसारेणेहापि हेतुहेतुमद्भावाभिप्रायाऽस्पृष्टेत्याद्युक्तिः श्रीमद्भाष्यस्य 'भाष्यं चात्यर्थविस्तरमि'त्युक्तबह्वर्थतामवगमयतीति अयमन्यः पन्थाः । हरेरशरीरत्वात् सशरीरत्वेऽपि पूर्णकामत्वेनोद्धवादिदाने प्रयोजनाभावात् इदंशब्दार्थकुक्षिनिक्षिप्तस्य स्वस्य स्वस्मादुद्धवासंभवाच्चास्योद्धवादिदमित्युक्तमयुक्तमित्याशङ्क्यमिदंशब्दपरामर्शविषयमादिशब्दसङ्गृह्यं च प्रदर्शयन्त एव पराणुदन्ति । जगदित्यादिना इदं शब्दः सङ्कुचितवृत्तिः । स्वव्यतिरिक्तप्रपञ्चपर इति नासंभावित इति भावः । स्थेमशब्दो यद्यपि दृढपर्यायस्थिरशब्दप्रकृतिकः । तथापि स्थाधातुनिष्पन्नत्वाद्योगेन स्थितिवाच्यपि भगवतीत्यभिप्रेत्य स्थेमशब्दं प्रायुङ्क्त । तथा च श्रीहर्षः । 'यत्कस्यामपि भानुमान्न ककुभि स्थेमानमालम्बत' इति । रामानुजभाष्यकृदपि । 'अखिलभुवनजन्मस्थेमभङ्गादिलील' इति । विवृतं च श्रुतप्रकाशिकायां स्थेमा स्थितिरिति । निर्दुष्टत्वसूचनाय त्रयाणामपि मुखत उक्तिस्तु प्रथमसूत्रोपात्तश्रुत्यनुसारेण । तत्रापि तृतीयोक्तिर्विभवादधिकारिविवक्षया वेति प्रतिभाति । शीलवपुष इत्यनेनेमानि न परमत इव तटस्थलक्षणानि । किन्तु स्वरूपलक्षणान्येव । देवस्यैष स्वभावोऽयमिति श्रुतेः । उपपादयिष्यते चैतत् । नापि संबन्धानुपपत्तेश्चेति वक्ष्यमाणदोष इत्यभिप्रैति । तदेताभ्यामपि विशेषणाभ्यां नम्यत्वप्रयोजकं विशिष्टत्वमेवोक्तं भवति ॥ छ ॥

सुवाक्यैरित्यत्र वाक्यानां शोभनत्वमुक्तम् । तच्चापौरुषेयत्वमाप्तोक्तत्वं वा विवक्षितम् । तमर्थं तु मुख्यत्वमभिप्रेत्य व्याचक्षते अशेषेत्यनेन । अशेषाणां समस्तानामाम्नायानां आम्नायो अनन्यथापाठादित्यत्रोक्तदिशा अपौरुषेयाणां, स्मृतीनां, स्मरणं नाम ग्रन्थकृतिरिति प्रथमतात्पर्योक्तदिशा पुरुषप्रणीतस्मृतीनां च हृदयेन तात्पर्येण दीप्ताय तदुभयमुख्यप्रतिपाद्यायेत्यर्थः । अनेन प्रागुक्तार्थे प्रमाणोक्तिद्वारा नम्यत्वप्रयोजकमधिकृतत्वमुक्तं भवति । यद्वा शिष्यन्ते हिंस्यन्ते एभिरिति विशेषाः कामादिदैरिणः न विद्यन्ते ते येषां ते अशेषा वीतरागादयो जनाः । तैराम्नायस्मृतीनां हृदयेन दीप्तायेत्यर्थः । कष-शिषेति हिंसार्थदण्डके भ्वादौ शिषधातोः पाठात् । अनेनाशेषविशेषतो वन्द्यमित्येतत् प्रकारान्तरेण तृतीयाध्यायार्थतया विवृतं भवति । स्मृतिपदस्य अत्याच्चेऽप्याम्नायस्याभ्यर्हितत्वात्पूर्वप्रयोगः । अशेषाणामाम्नायानां स्मृतिः प्रतिभा यस्य स तथोक्तः श्रीमध्वाचार्यः । 'अत्र जन्मनि न यत्पठितं ते जैत्र भाति कथमित्यमुनोक्ते । पूर्वजन्मसु हि वेदपुरेदं सर्वमित्यमितबुद्धिस्त्वाचे'ति सुमध्वविजयोक्तेः । तस्य हृदयं प्रियः । स चासौ दीप्तश्च तस्मा इत्यर्थः । 'प्रियं हृदयमुद्रिक्तं कान्तमित्यभिधीयत' इति द्वितीयतात्पर्योक्तेः । अनेन मम सदा

प्रियतममित्येतद्विवृतं भवति । श्रीमध्वाचार्यस्य हृदये स्वस्यान्येषां वा दीप्तायावभातायेत्यर्थो वा । अनेन एषां बहिरुपासनेन मोक्षस्तेषामपि ह्युपासनं कर्तव्यमेवेति बृहद्भाष्योक्तमर्थं सूचयन्ति । 'तस्यैष आत्मा विशते ब्रह्मधामे'ति श्रुतेः । श्रीमध्वाचार्यस्य च वाय्वंशत्वात् । 'प्रादुर्भूतो हरिर्व्यास' इत्युक्तो हरिर्नारायण एव । न तयोर्मनागपि भेदशङ्का कार्येत्यभिप्रेत्य नारायणपदं व्याचक्षिरे । हरय इति नमःस्वस्तीत्यादिना चतुर्थी । 'वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः । तावन्ति हरिनामानी'ति स्मृतिसूचक हरय इत्युक्तिरित्येके । 'हरिनामगृहीतेर्यत्फलं सर्वबुधैरपि । विज्ञानं तत्त्वयोग्यानां न ज्ञेयमिति नो ब्रुवे ॥ १ ॥ हरति स्वीकरोति श्रियं कलत्रतयेति वा (१)। गुणान् हरति स्वीकरोतीति वा (२)। हरति परिहरति दोषानिति वा (३)। स्वेतरस्य जगतः उद्भवादि प्रापयतीति वा (४)। हरत्याहरत्याम्नायादीन् स्वविषय इति वा (५)। हरति स्वीकरोति मध्वाचार्यमाप्ततयेति वा (६)। हरत्युपाहरति मुक्तिं भक्तानिति वा (७)। हरिशब्दार्थो ज्ञातव्यः । सप्तमनिरुक्त्या तुर्याध्यायार्थमवादिषुरिति । हृञ् हरण इति धातुवृत्तौ हरणं नाम प्रापणं स्वीकारः स्तेयं चेत्युक्तेः । उक्तं चान्यत्र 'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते । प्रहाराहारसंहारविहारपरिहारवदि'ति । उपसर्गाणां धातुनिलीनार्थाविगमकत्वमेवेत्यन्यत्र व्यक्तमिति । यद्यप्युत्तरद्विकेऽपि पूर्वद्विक इव पूर्वोत्तराध्यायार्थयोः हेतुहेतुमद्भावोऽनुव्याख्यानाभिमतः । तथापि तत्परतयेह टीकाकृच्चरणानामविवृतिस्त्वन्यत्र ध्यानजज्ञानयोगाद्गम्यमिति विवरणादिति ज्ञेयम् । तदुक्तं तत्त्वप्रकाशिकाटिप्पण्यां गुर्वर्यदीपिकायाम् । तृतीयचतुर्थाध्याययोः हेतुहेतुमद्भावरूपसङ्गतिसूचनार्थं ध्यानजज्ञानयोगादिति निमित्तपञ्चमीति । तत्र टीकायामाद्यद्वितीयार्थयोस्तदनुक्तिस्तु केवलव्यतिरेकिणः साधनस्य असाधनाङ्गतां ध्वनयितुम् । तच्च प्रमाणपद्धतौ व्यक्तम् । कथञ्चित्तदभ्युपेत्य त्विह न द्विरुक्तिरिति ज्ञायते । प्रस्थानद्वयेऽप्यन्यतरयोरेव तदुक्त्या स्थाली.....

काशीआचार्यकृता—

जन्माद्यस्य यतः शास्त्रगम्यमन्वयतः पृथक् ।
परमं ब्रह्मविष्ण्वाख्यमधिकं तदुपास्महे ॥ ॥ १ ॥

सूत्रतद्भाष्यतट्टीकातद्व्याख्याकारिणो गुरून् ।
संनम्य तत्कृपालेशैः सुधा किञ्चित्प्रपञ्च्यते ॥ ॥ २ ॥

यश्चन्द्रिकातदुपजीविमहानिबन्धैष्टीकाशयेषु बहुधा विशदीकृतेषु ।
यद्वो ममैष सफलोऽस्तु तदाशयानुवादैस्तदीयकरुणालवसंप्रयुक्तैः ॥ ॥ ३ ॥

अनेकतन्त्रसिद्धान्तविचारगहने मम ।
श्रद्धाजाड्येन चरतः क्षाम्यन्तु स्खलनं बुधाः ॥ ॥ ४ ॥

प्रारिप्सितपरिसमाप्तिपरिपन्थिपरिहारपटीयसीं परदेवताप्रणतिमादौ निबध्नाति श्रियः पत्य इति । अत्रैतत्पद्यस्य मूलाद्यपद्यविवरणरूपत्वात्तद्वदेव पदप्रयोजनमवगन्तव्यम् । तथाहि । निखिलेत्यादिना नारायणशब्दस्य यौगिकत्वे सूचिते तत्र णत्वानुपपत्तिस्तावत्प्राप्ता । पूर्वपदात्संज्ञायामग इति संज्ञायामेव णत्वविधानात् । अतो रूढिज्ञापनाय हरिपदेन तद्व्याख्यानम् । हरेरपि जगत्कर्तृत्वेन श्रमचिन्तादिदोषप्राप्तेः कथं निर्दोषत्वमित्याशङ्कानिरासाय

गुणपूर्णत्वनिर्दोषत्वयोर्हेतुहेतुमद्भावः प्रदर्शितः । प्रच्युतोऽशेषदोषैः सदा पूर्तित इत्युक्तेः । गुणमाणिक्येत्यादिना स्वातन्त्र्यादिगुणानां पारतन्त्र्यादिदोषोपघातकत्वं तेजसस्तिमिरविरोधित्वमिव स्वाभाविकमिति सूचितम् । गुणानां विशदप्रभाः सर्वविषयीकरणशक्तयस्तज्जालस्योल्लासः कार्योन्मुखतालक्षणो व्यक्तिविशेषस्तेन नित्योपहतान्यत्यन्ताभावप्रतियोगिभूतानि सकलावद्यतमांसि यत्र तस्मा इत्यर्थः । यत्रैकैकगुणस्यापि सकलदोषात्यन्ताभावप्रयोजकता किमु तत्र तदानन्त्यस्येत्याशयः । आप्यतममस्योद्भवादिदमित्थनयोर्यथास्थितयोजनायां गुणपूर्णत्वादौ प्रमाणप्रदर्शकत्वमात्रलाभाज्जगज्जन्मादिकारणत्वस्य निखिलेत्यादिविशेषणद्वयनिर्वाह्यत्वादिलाभाय व्यत्यासेनापि तद्योजनामभिप्रेत्याह जगदिति । अत्र स्थेमशब्दस्य दृढार्थकस्थिरशब्दादिमनिच्प्रत्यये निष्पन्नप्रयोगतः स्थित्यर्थस्य दार्ढ्यार्थत्वेऽप्यभियुक्तता । स्थाधातोः किरच्प्रत्यये निष्पन्नस्थिरशब्दस्य स्थितिमदर्थत्वस्यापि संभवात् । प्रकृष्टो लयः प्रलयः । प्रकर्षश्च वियदधिकरणादिव्युत्पाद्यं वैचित्र्यम् । तच्च जन्मादिवैचित्र्याधीनमित्यर्थात्तदपि लभ्यते । विचित्रजगज्जन्मादीनां च रचनानुकूलव्यापारस्तत्स्वभावं वपुर्यस्येत्यनेन निष्प्रयोजनत्वान्नास्य कर्तृत्वमित्यपास्तम् । मूले देहपदं कर्तृत्वोपपादकमिति ज्ञापयितुमेतद्विशेषणे वपुःपदप्रक्षेपः । न च मूलस्थोद्भवादिपदस्य जन्माद्यष्टकपरतया व्याख्यास्यमानत्वादत्र जन्मादित्रयमात्रोक्तिरयुक्तेति वाच्यम् । यतो लयशब्दस्य नाश इव संबन्धोऽप्यर्थः । श्लिष श्लेषण इति स्मरणात् । प्रशब्देन तत्रानादित्वरूपप्रकर्षविवक्षायां बन्धस्य नित्यत्वरूपप्रकर्षविवक्षायां ब्रह्मप्राप्तिलक्षणमोक्षस्य व्यवहाराप्रयोजकत्वरूपप्रकर्षविवक्षायां तत्तत्क्रियासंबन्धरूपनियतेः प्रकृष्टत्वयो यस्मादिति व्युत्पत्त्या तद्धेतुज्ञानाज्ञानयोश्च लाभः । न च सकृदुक्तप्रलयशब्दस्यानेकार्थत्वायोगः । एकशेषेणापि तदुपपत्तेः । स्मृतिशब्दस्याल्पाच्त्वेऽपि शकुनिसूत्रयोरित्यादावल्पाच्तरमित्यस्यानित्यत्वोक्तेरभ्यर्हितत्वाच्चाम्नायस्य पूर्वत्वम् । वेदपुराणादिसकलसदागमैस्तात्पर्येण प्रकाशितायेत्यर्थः । यद्वा, अशेषैर्निमित्तैराम्नायस्मृतिहृदयदीप्ताय श्रुतिस्मृतिहृदाद्यङ्गविहितवन्दनैर्विषयीकृताय, वन्द्यत्वनिमित्तयावद्धर्मैर्वन्द्यायेति यावत् । यद्वा, अशेषा आम्नायस्मृतयो यत्र तस्य भाष्यकर्तुर्हृदये दीप्ताय परमप्रेमास्पदत्वेनाभिव्यक्ताय । यद्वा, अशेषेषु वन्द्यत्वेन वेदादिवेद्येषु आम्नायस्मृतिहृदयदीप्ताय अतिशयेन तद्वेद्याय, मुख्यवन्द्यायेति यावत् । यद्वा, अशेषाणामाम्नायस्मृतिहृदयेन स्तुत्याद्यङ्गयुक्तवन्दनेन दीप्ताय, सर्ववन्द्यायेत्यर्थः । यद्वा, अशेषा आम्नायस्मृतिहृदयदीप्ताः कार्यलक्षणया श्रवणमननिदिध्यासनोज्वला यत्र तस्मै, मुमुक्षुजिज्ञास्यायेति यावत् । यद्वा, कर्मतत्फलाद्यशेषविषयाम्नायस्मृतिहृदाऽयेन भक्तियोगेनाभिव्यक्ताय, अशेषविषयान्विहाय विज्ञातव्ययेति यावत् । यद्वा, अशेषा आम्नायस्मृतिहृदयेन निरुक्तभक्तियोगेन अभिव्यक्तस्वरूपाय, यत्र तस्मै मुक्ताश्रयायेत्यर्थः । अशेषविशेषतोऽपीत्यस्य पञ्चमीतत्पुरुषत्वपक्षेऽशेषशब्दो न कतिपयचेतनपरः किन्तु श्रीतत्त्वपर्यन्तपर इति सूचनाय सकलवाङ्मनसमुख्यदेवतायाः श्रियो नमनलाभाय च श्रियः पत्य इत्युक्तम् । अन्ते भूतिर्महालक्ष्मीरितिवत्परममाङ्गल्यिकत्वादादौ तदुक्तिः । अत एव श्रीपतय इति नोक्तम् । तथा सति तस्य विष्णौ रूढत्वेन हरिपदेन निराकाङ्क्षत्वात् । हरिपदपरित्यागे चास्यैव विशेष्यतयाऽन्ते निवेशापत्तेः । मूलानुसारेण हरिमहं नमामीति कृते नमामीत्यन्तस्य तद्विवरणत्वं प्रतीयेत । तच्च क्रियाकर्तृभेदादनुपपन्नमतो नम्यपरपदानामेव तद्विवरणत्वज्ञापनाय विभक्तिव्यत्ययो विशेष्यनिर्देशात्प्रागेव नमःपदप्रयोगात्तत्रादरातिशयः सूचितः । अत्राद्यन्तयोः श्रीकीर्तनादेतद्ग्रन्थस्य श्रीकरत्वं ज्ञायत इति सांप्रदायिकाः ॥ १ ॥

गूढकर्तृका—

श्रीमज्जयतीर्थपूज्यचरणोऽनुव्याख्यानं व्याकर्तुकामस्तदादिपद्यं विवृण्वन् स्वेष्टदेवतां प्रणमति **श्रियः पत्य इति** । अत्र हरये नम इत्यन्वयः । हरिशब्दस्येन्द्रादावपि प्रसिद्धत्वादिन्द्रादिरत्र नम्य इति प्रतीतिनिरासायाह **श्रियःपत्य इति** । अनेन च न विद्यन्ते अरा दोषा यस्याः सा नारा लक्ष्मीः तस्या अयनं नारायण इति नारायणपदार्थ उक्तो भवति । तेन चाचार्यैर्ग्रन्थारम्भे भगवती न वन्दितेति दूषणमपास्तं भवति । न च श्रीपतय इति समासान्तपदं परित्यज्य भिन्नपदत्वकरणे को हेतुरिति वाच्यम् । श्रयन्त्येतमिति श्रीः स चासौ पतिश्चेति कर्मधारयप्रतीतिनिरासार्थत्वात् । पदभेदकरणे षष्ठ्या श्रियोऽप्राधान्यस्य प्रतीतेश्च । अन्यथा भगवतीवन्दनस्य तस्या अप्राधान्यप्रतीतेश्चासंभवादिति भावः । **मूले निखिलपूर्णगुणैकदेहं निर्दोषमितिपदद्वयोक्तगुणपूर्णत्वनिर्दोषत्वयोर्हेतुहेतुमद्भावो न प्रतीयते । किञ्च पूर्णगुणत्वस्य निर्दोषत्वे पूर्णगुणत्वापगमे निर्दोषत्वस्याप्यपगमः स्यात् । किञ्च तयोर्हेतुहेतुमद्भावः केन प्रकारेणेति शङ्कात्रयं परिहरन्निखिलेत्यादिपदद्वयेन विवृणोति नित्येति** । अत्र नित्यमित्येतत् गुणानां उपहतशब्दस्यापि विशेषणम् । एवं च नित्याश्च ते अगणिताश्च ते गुणाश्च त एव माणिक्यानि तेषां या विशदप्रभा तस्याः यज्जालं तस्य य उल्लासः तेन नित्यं उपहतं सकलमवद्यलक्षणं तमो येनेति विग्रहः । एवं च दोषा अज्ञानादयः ते च ज्ञानादिगुणेषु सत्सु न संभवन्तीति परिपूर्णगुणत्वं निर्दोषत्वे हेतुरित्युक्तं भवति । गुणानां नित्यत्वोक्त्या च गुणपूर्णत्वापगमे निर्दोषत्वस्याप्यपगम इत्यप्यपहस्तितम् । प्रभाजालोल्लासोपहतमित्युक्त्या तमःप्रकाशयोरिव ज्ञानाज्ञानयोर्विरोधात्तस्मिन् सति न तस्यावस्थानमित्यनेन प्रकारेण हेतुहेतुमद्भावः । यद्वा हरिगुणमाणिक्यध्यानेन तत्प्रभया निराकृतं भक्तस्यावद्यलक्षणं तमो येनेत्यर्थः । परदोषनिवारकत्वं च स्वस्य निर्दोषत्वं विना न संभवतीति परमात्मनो निर्दोषत्वं सिध्यतीति भावः । अस्योद्भवादिदमित्यत्र मूले आदिशब्देन कस्य परिग्रह इति न प्रतीयते । अतद्गुणसंविज्ञानबहुव्रीहिणा स्थितिमात्रकर्तृत्वं च प्रतीयते । तच्च श्रुत्यादिविरुद्धम् । किञ्च प्रयोजनमुद्दिश्येश्वरः सृष्ट्यादिकं करोति न वा । नाद्यः अपूर्णतापत्तेः । न द्वितीयः । तथात्वे सृष्ट्यादौ प्रवृत्तेरेवायोगादित्याशङ्कात्रयं परिहरन्नस्योद्भवादिदमित्येतद्विवृणोति **जगदिति** । उपलक्षणमेतत् । उत्पत्तिस्थितिसंहारेति स्मृत्यनुसारेणाष्टकमपि ग्राह्यम् । एवं च आदिशब्देन स्थित्यादिसप्तकस्य गृहीतत्वात्तद्गुणसंविज्ञानबहुव्रीहिराश्रितः । लोकवत्तु लीलाकैवल्यम्, देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहेति श्रुतिसूत्रयोः जगत्सृष्ट्यादिकारणत्वस्य परमात्मशीलत्वस्योक्तत्वात् शङ्कात्रयमपि अपहस्तितं भवति । अखिलैः सुवाक्यैः सुप्रवाक्यैर्निर्दोषैर्वाक्यैराप्यतममित्यत्र वाक्यैरित्यनेन कानिचिद्वाक्यानि गृह्यन्ते सर्वाणि वा । नाद्यः । अखिलैरित्यनेन व्याघातात् । न द्वितीयः । तथात्वे गामानय शुक्लां दण्डेनेति लौकिकवाक्येनापि प्रतिपाद्यत्वस्यापत्तेः । वाक्यानां पदरूपत्वेन पदानां वर्णसमूहरूपत्वेन वर्णानां च व्यापकत्वेन तदाप्यत्वस्याकाशवत् सर्वत्र सत्त्वेन विशेष उच्यते **अशेषविशेषतोऽपि इति** । किञ्चातिशयार्थकतमपा को वातिशय उक्त इति न प्रतीयते । तथाच कथमेतदित्याशङ्कात्रयं परिहरन् तत्पदं विवृणोति **अशेषेति** । अशेषाः ये आम्नाया वेदाः स्मृतयः पुराणानि तैः हृदयेन परममुख्यया वृत्त्या महातात्पर्येण दीप्ताय प्रकाशितायेत्यर्थः । एवं च वाक्यशब्देनाशेषवेदपुराणानामेव गृहीतत्वादाप्यतमशब्दस्य प्रतिपाद्यत्वार्थत्वात् महातात्पर्यरूपातिशयस्य तमपोक्तत्वान्न शङ्कात्रयस्यावकाशः । तर्हि

धर्मादिप्रतिपादकाभावात्तत्सिद्धिर्न स्यादिति वाच्यम् । तस्याप्यवान्तरतात्पर्यविषयत्वादिति भावः । अनिष्ट-निवारकत्वसूचनार्थं हरिशब्दप्रयोगः । एवं च पदत्रयेण विशिष्टत्वस्य अशेषेत्यनेनाधिकृतत्वस्य हरय इत्यनेन इष्टत्वस्योक्तत्वान्नम्यत्वं युक्तमिति भावः ।

प्रदीपः—

विश्वोत्पत्तिनिमित्तमात्मनिहितस्वान्तात्मदत्ताभयं
तत्तद्भूतहिताहिताहितमतिध्वस्ते हितानीहितम् ।
सच्छास्त्रप्रमितामितोत्तमगुणं धात्रादिदेवस्तुतं
लक्ष्मीवल्लभमच्युतं धृतिमयं दोषातिदूरं नुमः ॥

निराकृतासन्मतमोहजालो निवारितायोग्यजनप्रचारः ।
स्थिरीकृताशेषयथार्थबोधः चकास्तु नश्चेतसि पूर्णबोधः ॥

गूढभावानुभाष्यस्य व्याख्या न्यायसुधाभिधा ।
तदर्थप्रत्ययार्थोऽयं प्रदीपस्तन्यते मया ॥

टीकाकारः शास्त्रादावनुष्ठेयं शिष्टाचारमनुतिष्ठति **श्रियः पत्य इत्यादिभिः** षड्भिः श्लोकैः ।

सूत्रकृतं व्यासं अभीष्टं याचते—

सु०— येन प्रादुरभावि भूमिवलये व्यस्तारि गोसन्ततिः
प्राबोधि श्रुतिपङ्कजं करुणया प्राकाशि तत्त्वं परम् ।
ध्वान्तं ध्वंसमनायि साधुनिकरश्चाकारि सन्मार्गग-
स्तेन व्यासदिवाकरेण सततं मा त्याजि मे मानसम् ॥ २ ॥

परि०— प्रतिपाद्यं नत्वा द्वितीयपद्यस्थशास्त्रप्रभवत्वादि विवृण्वन् सूत्रकृतमभीष्टं याचते **येनेति** । गोसन्ततिरित्यनेन भारतपुराणब्रह्मसूत्रादिग्रन्थसमूहः किरणसन्ततिश्चोच्यते । प्राबोधीत्यनेन वेदप्रभवत्वं वेदव्यञ्जकत्वमेवेति दर्शितम् । गोपदश्रुतिपदयोरुक्त्या शास्त्रपदेन पौरुषेयापौरुषेयग्रन्थसङ्ग्रह इति सूचितम् । यद्वा गोसन्ततिर्ज्ञानसन्ततिरित्यादि ध्येयम् ॥ २ ॥

यादु०— माङ् योगे लुङः सर्वलकारापवादकत्वेन मा त्याजीति लुङः लोडर्थ इति ज्ञातव्यम् ॥ २ ॥

वं०प०— व्याचिख्यासितानुव्याख्यानमूलभूतब्रह्मसूत्रकर्तृत्वोपाधिना श्रीवेदव्यासं दिवाकरसाम्येन वर्णयन्मनसः सदा तद्विषयकत्वं प्रार्थयते **येनेति**। भूमिवलये भूखण्डे यमुनाद्वीप इत्यर्थः। साधूनां निकरः समूहश्च सन्मार्गगोऽकारि। मानसं मनः मा त्याजि सदा तद्विषयकमेव भवत्वित्यर्थः॥ २॥

आनन्दः— तमेवेति श्लोके गुरुत्वेन वेदव्यासवन्दनं क्रियते। तत्र तमेवेत्यनेन व्यासस्य परदेवतैक्यमुक्तं तदयुक्तं वेदव्यासस्य जन्मादिमत्त्वेन मूलरूपस्य च जन्मादिशून्यत्वेन विरुद्धधर्माधिकरणयोरैक्यायोगात्। शास्त्रप्रभवमित्येतद्गुरुत्वोपपादनार्थमुक्तम्। तत्र श्रुत्यादिशास्त्रस्य प्रभवमुत्पादकमिति प्रतीयते, तदयुक्तम्। श्रुत्यादेरपौरुषेयत्वेन तदुत्पादकत्वायोगात्। जगद्गुरूणां गुरुमित्यत्र जगद्गुरूणां ब्रह्मादीनामेवोपदेष्टृत्वेन गुरुर्नान्येषामिति प्रतीयतेऽतस्तमेवेति श्लोकं किञ्चिद्व्याचष्टे **येनेति**। **तथा च व्यासस्य प्रादुर्भावमात्रसत्त्वेनोत्पत्त्यादेरभावात्परदेवतैक्यं युक्तम्**। प्राबोधि श्रुतिपङ्कजमित्यनेन श्रुत्यादेरुत्सन्नस्य **प्रबोधकत्वमेव न तु कर्तृत्वमित्युक्तत्वान्नापौरुषेयत्वविरोधः**। व्यस्तारि गोसन्ततिः प्राकाशि तत्त्वं परं ध्वान्तं ध्वंसमनायीत्यादि विशेषणत्रयेण संप्रदायप्रवर्तकत्वेन गुरुत्वमुपपादितम्। ध्वान्तं ध्वंसमित्यनेन यावत्पर्यन्तमज्ञाननिवृत्तिस्तावत्पर्यन्तं बोधकत्वस्योक्तत्वादज्ञसैवेत्युपपादितं भवति। साधुनिकर इत्यनेन गुरूणामित्युपलक्षणमित्युक्तम्। तथाच सर्वेषामपि साधूनां गुरुरित्युक्तं भवति। दिवाकरसाम्येन स्तुतिकरणेन दिवाकरसन्निधाने यथा न तमोऽवस्थानं सर्वथा तथा व्यासदिवाकरस्यानवरतं मनःसन्निधाने अज्ञानलेशोऽपि न भविष्यतीति **वक्ष्यमाणप्रमेये कश्चिदपि न दोष** इति सूचयति। व्यासदिवाकरस्य मनःसन्निधानं ध्यानेन विनाऽसंभवि।

श्रीनिधि०— येन प्रादुरभावीति। अत्र प्राबोधीत्यादि ध्वंसमनायीत्यन्तं सूर्ये युगपत् व्यासे तु क्रमेणेति विशेषः।

वा०चं०— गुरुत्वोपपादकशास्त्रप्रभवत्वोप(पादक तमेवेति द्वितीयपद्यव्याख्यानरूपे)पादनेन किञ्चित् द्वितीयस्य पद्यस्य व्याख्यानरूपे **येनेति** पद्ये वेदविभागो वेदार्थोपबृंहकेतिहासपुराणादिनिर्माणं तन्निर्णायकब्रह्मसूत्रनिर्माणं चेति त्रिविधोऽपि गोसन्ततिविस्तारोऽभिमतः। तत्राद्यस्य प्राबोधीत्युक्ते मन्दैरध्येयत्वरूपे प्राबोधे हेतुत्वम्। द्वितीयतृतीययोस्तु प्राकाशीत्याद्युक्तप्रकाशादि हेतुत्वमिति द्रष्टव्यम्। करुणयेत्येतत्प्रादुरभावीत्यादौ सर्वत्र संबध्यते। अनेन प्रादुर्भूत इति पद्यतात्पर्यमप्युक्तं भवति। **लुङ्प्रायपाठभङ्गपरिजिहीर्षयाऽऽह मेति**॥ माङ्योगे लुङः सर्वलकारापवादकत्वान्न त्यज्यतामित्यर्थः॥ २॥

वा०र०— गुरुत्वोपपादकेत्यादि। अनेन द्वितीयपद्यगतशास्त्रप्रभवत्वोपपादनेन किञ्चित् द्वितीयपद्यविवरणपूर्वकं वेदव्यासं दिवाकरश्लेषेण प्रार्थयते इति श्लोकावतारः सूचितः। पद्ये गोसन्ततिविस्तारः वेदविभागादिरूपेण त्रिविधोऽपि अभिमत इति योजना। **व्यस्तारि गोसन्ततिरित्युक्तगोसन्ततिविस्तारस्य श्रुतिपङ्कजं प्राबोधीत्यादिनोक्तप्राबोधिकार्यचतुष्टयं प्रति हेतुत्वम् अभिप्रेतमिति स्पष्टयन् व्यवस्थया हेतुत्वं दर्शयति तत्राद्यस्येत्यादिना**। मूले येन प्रादुरभावि इत्यादौ येनेति सर्वक्रियासु संबध्यते। अभावीति भावे लुङ्। व्यस्तारीत्यादयो लुडः कर्मणि। भवतेर्भवि लः कर्मणि चेति लकारे भूतार्थत्वात् लुङि तिङि भावकर्मणोरित्यनेन भावकर्मणोर्विहितस्थलस्य स्थाने

आत्मनेपदविधानात् अत्रात्मनेपदप्रथमपुरुषैकवचने तप्रत्यये च्लिलुङि इति सूत्रेण च्लिप्रत्यये चिण् भावकर्मणोरिति सूत्रेण भाविकर्मवाचिनः शब्दे परतो धातोरुत्तरच्लेः चिणादेशे णिति परतः अचो ञ्णिति इत्यादिना वृद्ध्यावादेशयोरडागमे वा अभावि इति स्थिते चिणो लुगिति सूत्रेण चिणः उत्तरस्य प्रत्ययस्य लुकि सत्यभावीति रूपं सिध्यति । एवमेव व्यस्तारीत्यादिकमपि । एतावांस्तु विशेषः । अभावीत्यस्य भावे लुङ्त्वात् कर्माप्रयोगः । कर्तुः स्तिङानभिधानात् कर्तरि तृतीया । ततश्च येन प्रादुरभावीत्यस्य यत् कर्तृकप्रादुर्भावः इत्यर्थः । यः प्रादुर्भूतः इति यावत् । व्यस्तारीत्यादेस्तु कर्मणि लुङ्त्वात् कर्मप्रयोगः । तिङोक्तत्वात् कर्मणि न द्वितीयेति । ननु नयतेः द्विकर्मकतया प्रधानाप्रधानकर्मणोः मध्ये कुत्रचित् लकाराश्रयणे वक्तव्ये गौणे कर्मणि ध्वान्तरूपे लकारपक्षे तस्य कर्मणः तिङोक्तत्वात् ध्वान्तमिति द्वितीयायोग इति चेत् । अत्र गुरवः । 'गौणे कर्मणि द्रुह्यादेः प्रधानेनीहकृष्वहाम् ।' इत्यादिनिर्णयानुसारेण अजा ग्रामं नीयते इत्यादाविव न्यादीनां प्रधाने कर्मण्येव लकाराङ्गीकारेण तस्यैवोक्तम् । तथा ध्वान्तपदादेव प्रथमोपपत्तिरिति । स्पष्टं चैतत् भावकर्म प्रक्रियान्ते । करुणयेति सन्निधानात् प्राकाशीत्यत्रैव अन्वेतीति भ्रमनिरासायाह **करुणयेत्येतदिति** । मध्यदीपिकान्यायेनोक्तमेतत्पद्यगतक्रियामात्रेण संबध्यतेत्यर्थः । न केवलं द्वितीयपद्यविवरणरूपमेतत्पद्यम् । किन्तु प्रादुर्भूतो हरिरित्येतत् तात्पर्यनिरूपणरूपमपीत्याह **अनेनेति** । करुणया प्रादुर्भावादिप्रतिपादनेन प्रादुर्भूत इत्यादेः करुणया प्रादुर्भूत इत्याद्यर्थसूचनादिति भावः । न त्यज्यतामिति प्रार्थनायां लोटि प्रयोक्तव्ये त्याजीति लुङ्प्रयोगः कुत इत्यतो प्रादुर्भावीत्यादि लुङ्प्रायपठितमिदं क्रियापदं यदि लोडन्तं तर्हि अर्थानुगुण्येऽपि प्रायपाठभङ्गः आयाति । आशिषोऽभिप्रेततया लुङर्थस्तु न विवक्षितः । तस्मात् लोडर्थप्रतिपत्त्या च भवितव्यम् । प्रायपाठभङ्गश्च मास्तु इत्याशयेन निषेधार्थकमाशब्दप्रयोगः कृतः । माङश्च योगे लुङः सर्वलकारापवादकतया लोडर्थक एवायं लुङुक्तः इत्याह **लुङ्प्रायपाठेति** । अत्र गुरुभिरधिकं चोक्तम् । तथाहि । तमेवेत्यनेन भाष्यकारस्य गुरुदेवतयोरैक्यं यदुक्तं तदत्र प्रादुर्भूत इत्येतत् पद्यतात्पर्यवर्णनव्याजेनोपपादितं भवति । भगवदाज्ञया स्वव्यापारकारिदिवाकरापेक्षया दार्ष्टान्तिकेऽतिशयश्च सूचितः । एवं परमिति ध्वान्तसामान्यया चिध्वान्तमिति साधु इत्येतच्चातिशयसूचकम् । प्रसिद्धदिवाकरपक्षे गोशब्दः किरणवाची । **सन्ततिः** विस्तारः । मानसं मानसपर्वत इति युक्तीति ॥ २ ॥

कुण्डल०— सूत्रकारं श्रीव्यासं भानुत्वेन भजते **येनेति** । गोसन्ततिः वाक्सन्ततिः व्यस्तारि विस्तृता । **मा त्याजीति** । न त्यज्यतामिति लोटि प्रयोक्तव्ये लुङ्प्रयोगस्तु माङ्लुङिति सूत्रेण माङ्योगे सर्वलकारापवादेन लुङ्मात्रविधानात्साधु । न माङ्योग इत्यनेन निषिद्धतया लङ्लुङ्लृङ्क्षित्यिति सूत्रविशिष्टाडागमाप्रसक्तेः मा त्याजीति सिद्ध्यति ॥

विद्व०— तमेव शास्त्रप्रभवमिति वक्ष्यमाणन्यायेन वेदव्यासाख्यहरिं प्रार्थयते **येनेति** । लुङः प्रायपाठभङ्गपरिजिहीर्षयोक्तस्य मा त्याजीत्यस्य मा त्यज्यतामिति लोडर्थो ज्ञातव्यः । माङ् योगे लुङः सर्वलकारापवादकत्वात् ।

रस०— एवं मोक्षसाधनजिज्ञासाविषयत्वरूपपरदेवतात्वेन लक्ष्मीसमेतं श्रीहरिं नत्वा भगवान् खलु एकेन रूपेण सर्वं कर्तुं शक्तोऽपि स्वेच्छयैवेकेन रूपेण मोक्षान्तरङ्गसाधनध्यानादिरूपोपासनाविषयो भवति । अन्येन तु तत्साधनज्ञानादिदोऽपरेण च तत्साधनसंपादकः । तत्र ज्ञानाद्यर्थमवतीर्णो भगवान्बादरायणोऽतः स एव अज्ञानिना ज्ञानार्थं ज्ञानिना तु तद्रक्षणायावश्यं प्रार्थनीय इति शिष्यान् शिक्षयंस्तमेवेति श्लोकं तद्विवरणरूपं प्रादुर्भूत इति श्लोकं च विवृण्वन् तदनुगुणगुणोपेतोपमानभावेन स्तुवंस्ततो ज्ञानतिरोभावाभावमाशास्ते येनेति । तमेव शास्त्रप्रभवमित्यत्र नारायणस्यैव शास्त्रप्रभवत्वं प्रतीयते । तदयुक्तम् । व्यासकृतत्वप्रसिद्धिविरोधात् । न च नारायण एव व्यासः । जननविरोधात् । न च जननं प्रादुर्भावरूपतया प्रादुर्भूत इति श्लोके भाष्यकृतैव व्याख्यातमिति वाच्यम् । पुराणादौ देवदत्तादिसाम्येन स्त्रीपुरुषसंयोगोद्भूतत्वस्य स्फुटं प्रतीत्या तद्बाधादित्यत आह भूमिवलये प्रादुरभावीति । अत्र भूमिवलयपदमावर्तनीयम् । एकं लुप्तोपमानम् । ततश्च भूमिवलये भूप्रदेशविशेषे स्तम्भादाविव भूमिवलये यमुनाद्वीपे पराशरात्सत्यवत्यां प्रादुरभावीति । इदमुदितं भवति । नृसिंहादि प्रादुर्भावं प्रति स्तम्भादेरिव व्यास-व्यक्तिं प्रति वासव्या अप्यवधित्वेन न तु ततो मात्रयाऽपि विशेषः । पुराणादिवचनं त्वयोग्यजनव्यामोहनाय कृतविडम्बनानुवादमात्रपरमिति युक्तमुक्तमिति । यथाहुः । 'यथा नृसिंहाकृतिराविरासीत्स्तंभात्तथा नित्यतनुत्वतो विभुः । आविर्भवेद्योषिति नो मलोत्थस्तथापि मोहाय निदर्शयेत्तथे'ति । तर्हि स्थानान्तरं विहाय तस्यां कुतः प्रादुर्भाव इत्यत उक्तं करुणयेति । तदीयतपस्तुष्टेन हरिणा तस्मै तव पुत्रो भविताहमिति वरो दत्तोऽतः स्वप्रतिज्ञाप्रतिपालनाय तस्मिन्करुणयैव तदीयक्षेत्रे प्रादुर्भूतो न त्वन्यत्रोत्पत्तुमशक्त्येति । यमाहुः । 'वसिष्ठनामा कमलोद्भवात्मजः सुतोऽस्य शक्तिस्तनयः पराशरः । तस्योत्तमं सोऽपि तपोऽचरद्धरिः सुतो मम स्यादिति तद्धरिर्ददौ । उवाच चैनं भगवान् सुतोषितो वसोर्मदीयस्य सुतास्ति शोभना । नाम्ना तु सा सत्यवतीति तस्यां तवात्मजोऽहं भवितास्म्यपीति ।' सूर्यदृष्टान्तोऽपि एतमेवार्थं सूचयति । अत एव— 'इत्याह तत्परं ब्रह्म व्यासाख्यं ज्ञानरश्मिमदि'त्येतद्व्याख्याव्याजेन अपान्तरतमो नाम कश्चिन्मुनिर्व्यासो बभूवेति प्रवाददर्शनाच्छिष्याणां सूत्रकारे भक्तिमान्द्यं मा भूदित्यतोऽविशेषणोपादानमित्यनेनैतद्व्यनक्ति ॥

अथवा बाधकं परिहृत्य साधकं वदन् यतः प्रसिद्धतरं तदीयं द्वैपायननामधेयमेवैतत्साधयति । किं ततः साधकान्तरचिन्तयेति तदेवार्थप्रदर्शनमिषेण दर्शयति येनेति । अनेन द्वीपो यमुनामध्यप्रदेश एवायनमुत्पत्तिस्थानं यस्य स एव द्वैपायन इति व्युत्पत्तिं सूचयति । ननु व्यासस्यैवंविधत्वे कथं भवद्भिरेव वासवीसूनुमिति तज्जातत्वमुक्तमित्यतः सूनुपदार्थं वा विवृणोति येनेति । योजना तु पूर्ववदेव । तथा चानेन अभिप्रायेण 'नन्दसूनुरयमार्तजनानां शर्मदः', 'जातः पराशराद्योगी वासव्यां कलया हरेरि'त्यादाविव रूपादिपदप्रयोगेऽपि नोक्तविरोध इति । ननु शास्त्रशब्देन ब्रह्ममीमांसा-शास्त्रं तन्निर्णेतव्यार्थं वेदादिकं विवक्षितम् । निर्णेयमात्रग्रहणे निर्णायकशास्त्रनिर्माणप्रसङ्गेनावतारप्रयोजनासिद्धेः । निर्णायकस्य निर्णेयसिद्ध्युत्तरकालीनत्वेन तन्मात्रग्रहणायोगात् । तत्र प्रभवशब्द उत्पत्त्यर्थोऽभिव्यक्त्यर्थ उभयार्थो वा । नाद्यः । वेदेऽसिद्धेः । न द्वितीयः । निर्णायके निर्णेये पौरुषेये चासिद्धेः । नापि तृतीयः । सकृदुक्तस्य शब्दस्य विरुद्धानेकार्थत्वस्य क्वाप्यदर्शनात् । नारायणावतारत्वेन कृतकृत्यस्य व्यासस्य प्रयोजनाभावेन शास्त्रनिर्माणा-

संभवाच्चेत्यत आह करुणया श्रुतिपङ्कजं प्राबोधि गोसन्ततिर्व्यस्तारीति । पूर्वापरीभावाविवक्षया तथोक्तिः । श्रुतिपङ्कजप्रबोधादेः प्राथम्यादिकं च प्रथमभागवतादौ प्रसिद्धम् । अत्र श्रुतिशब्दसमभिव्याहाराद्वाक्यसामान्यार्थकस्य गोशब्दस्य गोबलीवर्दन्यायेन श्रुत्यतिरिक्तपौरुषेयवाक्यपरत्वम् । तत एव व्यस्तारीत्यस्योत्पत्यर्थत्वं च सिद्धयति । प्राबोधीत्यस्याभिव्यक्त्यर्थं तु स्फुटमेव । करुणयेत्येतत्सावधारणम् । अयमत्रोत्तरक्रमः । यत्तावत्पृष्टं तत्रोभयार्थ इति ब्रूमः । न चादर्शनम् । आत्मन आकाशः संभूत इत्यादौ सकृच्छ्रुतस्यापि संभूतपदस्याकाशशब्दोपात्तेषु हरितदभिमानितद्देहभूतेषु यथायोगं प्रादुर्भावाभिमानं परिणामरूपसंभवसमर्पकत्वस्य दर्शनात् । यदप्युक्तम्— प्रयोजनाभावेन निर्माणायोग इति । तत्रोत्तरं करुणयेति । स्वप्रयोजनाभावेऽपि क्लिश्यमानजनेषु करुणया निर्माणोपपत्तिरिति । यदा करुणयैव निर्माणसंभवस्तदा सुतरां सञ्जातकरुणगीर्वाणगणप्रार्थनयेत्येवार्थ इति । ननु श्रीहरिर्दयया दयालुप्रार्थनया च शास्त्रं चक्र इत्यनुपपन्नम् । हरेर्हरिदासानां च प्राणिषु दयोत्पत्तौ निमित्ताभावात् । क्लिश्यमानजनान् खलु दृष्ट्वा दयोत्पद्यते दयालूनाम् । न च स्वयोग्यगुणोपसंहारेण श्रीहरिं ध्यायतां क्लेशसंभावनापि संभवति येऽपि त्रलरयेण भवन्ति । न ते पृथग्जनवत् अतिविघ्नकरा भवन्ति । न च करुणास्वभाव एव । इतःपूर्वमपि तन्निर्माणापत्तेः । स्वभावस्य तदानीमनपायात् । चक्र इति आत्मनेपदप्रयोगोऽप्यनुपपन्नः । स्वप्रयोजनाभावस्य भवद्भिरेवाङ्गीकृतत्वात् । न च दयालूनां परप्रयोजनमपि स्वप्रयोजनमिवेति वाच्यम् । परप्रयोजनस्याप्यदर्शनादित्यत आह । येन परं तत्त्वं प्राकाशि ध्वान्तं ध्वंसमनायि साधुनिकरः सन्मार्गगोऽकारीति । चशब्दोऽत्र समुच्चयार्थो मुक्तिगश्चेति । अयमत्र समुदायार्थः । आसुरप्रकृतयो हि भूमाववतीर्य सौगतचार्वाकादिमतानि प्रथितवन्तस्तदा श्रीवासुदेवो युगकार्यप्रवृत्तये क्षणदानुवृत्तये सवितेव सतां मानसात्तिरोबभूव । तदैव च दुर्दर्शनोत्थं मिथ्याज्ञानादिरूपं तमो मानसे व्याप्तम्, ततः श्रीहरिभक्त्यादिरूपैकैवल्यमार्गात्सन्तो भ्रष्टाः पशुप्राया भोगमात्रनिरता बभूवुः । ततः संप्राप्तं तेषां भयमालोक्य जातकरुणैरमरैरर्थितो दयालुनाथो व्यासरूपेण भूवलये सत्यवत्यामवतीर्यापपाठादिना तिरोहितान् वेदान् व्यञ्जयित्वा तदर्थनिर्णयाय ब्रह्मसूत्राणि तदुपबृंहणार्थानन्यांश्च ग्रन्थान्प्रकटयित्वा स्ववाक्यैर्यथायोगं परतत्त्वं ज्ञापयित्वा मानसे स्थितमुक्ततमस्तस्माद्व्यापयित्वाऽसतः सदुपद्रवरूपव्यापारान्निवर्तयित्वा दुर्मार्गं दुर्गतिं च, सतः सुमार्गं सुगतिं च प्रापयित्वा प्रभासत इति । भगवत्तिरोभावादिरूपस्य कादाचित्कस्य क्लेशकारणस्य तज्ज्ञानाज्ञाननिरसनभक्त्यादिरूपपरप्रयोजनस्य च सूचनेन दयालुत्वेऽपीदानीमेव क्लेशविशेषप्राप्त्या तन्निवृत्तये इदानीमेव तन्निर्माणोपपत्तिरित्याद्यशङ्कापरिहारः । दयालूनां तस्यैव स्वप्रयोजनतुल्यत्वेन आत्मनेपदप्रयोगोपपत्तिरिति द्वितीयशङ्कानिरासश्चेति । सूर्यो हि भूप्रदेशे प्रादुर्भवति । ततः स्वकरनिकरं विस्तारयति । पङ्कजं प्रबोधयति । पदार्थसार्थं प्रकाशयति । ध्वान्तं धुनोति । सार्थसार्थं स्वार्थसाधनसमर्थं करोति । चोरनिकरांश्च स्वव्यापारतो व्यावर्तयति । सर्वथाऽप्युदयास्तमययोर्मानसगिरिं न त्यजतीति प्रसिद्धम् । तत्र यदि त्वं मे मानसं त्यजसि तदा ज्ञानसूर्यमृते ब्रूयात्तमेकं बादरायणमित्यादि निखिलनिजभजकजनसिद्धा सूर्यत्वप्रसिद्धिरेव न सिद्धयेदिति भावेन भावभरेण भावे तस्य सदाभावमेव भावयते । तेन व्यासदिवाकरेण मानसं सततं मा त्याजि । माङ्योगे लुङः सर्वलकारापवादकत्वेन न त्यज्यतामिति । उपलक्षणमेतत् । वागपि ग्राह्या । दृष्टान्तसौकर्याय मानसस्य कण्ठतो ग्रहणम् । संभवति सूर्यस्य स्वनायकमर्यादारक्षणाय वाऽपेक्षितप्राप्तये वैकत्रैवावस्थानम् । अस्य पुनरनन्याधिपतेरेवाप्तसमस्तकामस्य

कथमेकत्रैवावस्थानम् । न चासंभावितं कोऽपि कुशलः कामयत इत्यत उक्तं करुणयैवेति । स्वेच्छयैव नान्यप्रयत्नेनेत्येवार्थः । संभवति स्वतन्त्रस्यापि करुणयावस्थानं सैव कथमित्यत उक्तं मे मोक्षयोग्यस्येति । मोक्षयोग्येष्वनादित एव निरवग्रहानुग्रहोऽस्तीति प्रसिद्धम् । अनेन सतां भूतिद इत्येतद्विवृतम् । भूतिशब्दार्थस्य ज्ञानवैराग्यादेस्तद्दानप्रकारस्य च स्फुटीकरणात् अनेनैव व्यासदिवाकरेणेति स्वोक्तव्यासपदार्थोऽपि व्याख्यातः । विस्तारकत्वस्य विस्तृतत्वात् । अथवा येनेत्यंशेन वासवीसूनुमित्येतत्स्फुटीकृत्य यदाद्यपद्ये जगदघदहनत्वं रमापतिविशेषणमिति सूचितं तच्च तावदेव किन्तु वासवीसूनुविशेषणमपीति ज्ञापयंस्तस्य जगदघदहनत्वप्रकारं प्रकटयतीति व्यस्तारीत्यारभ्य सन्मार्गग इत्यन्तमवतरणीयम् । अर्थस्तूत्तोलित एवेति । अनेनैव पद्येन 'दुरन्तदुरितध्वान्तविपाटनपटीयसे । बादरायणसंज्ञाय परस्मै ब्रह्मसे नमः' इत्युक्तं ब्रह्मत्वं पितरं पतिं गुरुतम-मित्युक्तं गुरुत्वं च विवृतं वेदितव्यमिति ॥

ल०२०— तत्राद्यं गुरुत्वं बादरायणेऽस्तीति मनसि तत्तिरोभावाभावमाशास्ते येनेति । येनेति सर्वत्र योज्यम् । तस्य तेनेत्यन्वयः । तेन व्यासदिवाकरेण मे मोक्षयोग्यस्य मानसं मनः सततं श्रवणादिसर्वसाधनानुष्ठान-काले मा त्याजि न त्यज्यताम् । अत्र श्रुतिपङ्कजं प्राबोधीत्यनेनापपाठनादिना तिरोहितं वेदं स्वयमुच्चार्य सम्यगभि-व्यक्तीकरणपूर्वकं निर्णयवेदविभागादिकं व्यस्तारि । गोसन्ततिरित्यनेन निर्णयभारतपुराणादिनिर्माणं वेदादिसर्वशास्त्र-निर्णायकब्रह्मसूत्रनिर्माणं चोच्यते । तेन 'तमेव शास्त्रप्रभवं प्रणम्य । परविद्याख्यं चक्रे शास्त्रमनुत्तमम्' इत्येतद्विवृतं भवति । येन परं तत्त्वं भगवत्स्वरूपं प्राकाशि येन परं बाह्यविलक्षणं ध्वान्तमज्ञानं ध्वंसमनायीत्यनेन जगद्गुरूणां गुरुमित्येतद्विवृतं भवति । अत्र साधुनिकरः मोक्षयोग्यतालक्षणसाधुतां समुदायः । सन्मार्गगो मोक्षसाधनज्ञानवा-नकारीत्यनेन मोक्षयोग्यानां मोक्षसाधनोपदेशकत्वं गुरुत्वमिति सामान्यतो गुरुत्वं विवृतं भवति ।

अथवा हेर्नम्यत्वप्रयोजकधर्मोपपादनावसरेऽधिकारिविशेषान्प्रति इष्टसाधनत्वमेवेष्टमित्युपपादिते, इष्टं च मोक्षतत्साधनभेदेनापि द्विविधम् । तयोराद्यं मुख्यम् । द्वितीयमगुख्यम् । तत्र मुख्येष्टसाधनम् । बिम्बापरपर्यायो हरिरेव । समोऽपि भगवान् स्वबिम्बदर्शन एवैनं मोचयतीति न्यायविवरणोदाहृतश्रुतेः । येषां बह्निरुपासनेन मोक्षस्तेषामपि हृद्युपासनं किञ्चित्कार्यमेवेति बृहद्भाष्याच्च । अमुख्येष्टसाधनमपि यद्यपि स एव तथापि न तेनैव रूपेण । दत्तव्यासकपिलवृषभग्रीवादिज्ञानकार्यरूपवैयर्थ्यापत्तेः । यथोक्तं भारततात्पर्यनिर्णये । 'कृष्णरामादिरूपेषु बलकार्यो जनार्दनः । दत्तव्यासादिरूपेषु ज्ञानकार्यस्तथा प्रभुरि'ति । किन्तु स्वेच्छापरिगृहीतज्ञानकार्यवेदव्यासरूपेणेत्याशयेन मानसे तत्तिरोभावाभावमाशास्ते येनेति । येन व्यासदिवाकरेण भूमिवल्ये प्रादुरभावीत्यादि तेन व्यासदिवाकरेण सततं मे मानसं मा त्याजि माङ्योगे लुङ् । सर्वलकारापवादकत्वान्न त्यज्यतामिति योजना । अत्र येन साधुनिकरो मोक्ष-योग्यजनसमुदायः सन्मार्गः सतो निर्दुष्टस्य मोक्षस्य यो मार्गः 'तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यत' इत्यादिश्रुत्युक्तोऽपरोक्षज्ञानाख्य उपायस्तद्भक्तस्तद्ज्ञानकारीत्यनेन व्यासस्य साक्षात्परम्परया वा मोक्षसाधना-परोक्षज्ञानदातृत्वमुक्तम् । अनेन गुर्ल्गुरूणामिति चतुर्थपद्ये गुरूणां गुरुरिति पदं गुरूणामपरोक्षार्थं जगतस्तत्त्वोपदेशकानां

ब्रह्मादीनां गुरुस्तदर्थमेव तत्त्वोपदेष्टेति विवृतं भवति । नन्वपरोक्षज्ञानप्रतिबन्धकानामनाद्यज्ञानसंशयविपर्ययाणां सत्त्वात्कथं तद्दातृत्वमित्यत उक्तं येन परं बाह्यतो विलक्षणं ध्वान्तमज्ञानसंशयविपर्ययात्मकं ध्वंसमनायीति । ननु निवर्तकाभावात्कथं ध्वान्तं प्रतिध्वंसप्रापणमित्यत उक्तं येन परं सर्वोत्तमं तत्त्वं हरिस्वरूपमिति यावत् । तथा परं अन्यदपि तत्त्वं परतत्त्वज्ञानोपयुक्तं ब्रह्मादिस्वरूपमपि प्राकाशि । साक्षादसाक्षाद्वा शास्त्राणि श्रावयित्वा प्रकाशितं कृतमिति । तथाच श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ । संशयं च पराणुद्य लभते ब्रह्मदर्शनमित्युक्तदिशा श्रवणादिजनितस्तत्त्वप्रकाश एव ध्वान्तनिवर्तक इति भावः । अनेन तमेवेति द्वितीयपद्ये जगद्गुरूणां गुरुमञ्जसैवेति पदं जगतः गुरूणां शास्त्रस्य प्रवक्तृणां ब्रह्मादीनामञ्जसा मुख्यतया न तु वयोधिकत्वादिमात्रेण गुरुं शास्त्रस्य प्रवक्तारमिति यावदिति विवृतं भवति । ननु यदुक्तं श्रावयित्वा तत्त्वं प्राकाशीति । तत्र युक्तम् । श्रवणीयाभावात् । न च वेदाः श्रवणीयाः । तेषामानन्त्येन श्रोतुमशक्यत्वादपपाठादिना तिरोहितत्वाच्चेत्यत उक्तं येन श्रुतिपङ्कजं प्राबोधीति । अपपाठादिना तिरोहितं प्रागेव चतुर्धा विभक्तं वेदं ऋङ्निगदादिरूपं व्यक्तीकृत्यैकैकस्मादेकैको भाग इति चतुर्धा व्यभजत् । एकैकं चावान्तरमृगादिवेदं चतुर्विंशत्यादिशाखाभेदेन व्यभजदिति भावः । तदुक्तं 'ऋचः स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः । यजूंषि निगदाच्चैव तथा सामानि सामतः । चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधस' इति । श्रुतीनां पङ्कजाभेदप्रतिपादनमपि इममेवाशयं द्योतयति । यथा पूर्वस्थितमेव पङ्कजं केनचिन्निमित्तेन मुकुलीभावमापन्नं दिवाकरकरस्पर्शेन विकसितं विभक्तदलं च दृष्टं तथाऽनादिकालमारभ्य स्थिता एव श्रुतयोऽपपाठादिना तिरोहिताः वेदव्यासेन सम्यगुच्चारणेनाभिव्यञ्जिता विभक्ताश्च कृता नत्वपूर्वा इदानीमेव निर्मिता इति । तथाच वेदा एव श्रवणीयास्तच्छ्रवणादिना तत्त्वप्रकाशो भवतीति भावः । ननु वेदार्थज्ञानोपायाभावात्कथं तैरपि तत्त्वप्रकाश इत्यत उक्तं 'येन गोसन्ततिरितिहासपुराणाभ्यां वेदं समुपबृंहयेदित्युक्तेर्वेदार्थज्ञानोपायभूतो भारतपुराणाख्यवाक्यसमूहस्तथा वेदभारताद्यशेषनिर्णेयार्थनिर्णायकन्यायग्रथनात्मकब्रह्ममीमांसाशास्त्राख्यवाक्यसमूहश्च व्यस्तारी'ति। अनेन 'तमेवे'ति द्वितीयपद्ये शास्त्रप्रभवमिति पदं शास्त्रशब्देन प्रकृतत्वाद्ब्रह्ममीमांसाशास्त्रं वेदादिकं चोच्यते । प्रभवत्युत्पद्यते प्रथममुपलभ्यते वा यस्मात्स प्रभवः । यथासंभवं शास्त्रस्य प्रभवस्तमिति । तथा गुरुर्गुरूणामिति चतुर्थपद्ये गुरूणां शास्त्राणां गुरुः प्रभव इति पदं च गुरूणामशेषार्थप्रतिपादकानां सविस्तराणां वेदादिशास्त्राणां गुरुर्मुख्यः प्रभवो न तु संप्रदायमात्रस्य प्रवर्तक इति विवृतं भवति। ननु साधुनिकरस्योक्तविधसन्मार्गप्रापणमधिकार्युत्तमप्रापणनायकानुग्रहाभावे कथं स्यादित्यतस्तमपि संपादयतीत्याह साधुनिकरः सन्मार्गगः । 'असतः सदजायत ब्रह्म वा असत् सद्भाव प्राण' इत्यादिश्रुतेः सतः प्राणस्य तदनुग्रहस्येति यावत् । यो मार्गस्तन्माहात्म्यश्रवणादिरूप उपायस्तद्गश्चाकारीति । ननु देवदत्तादिवत् स्त्रीपुरुषसंबन्धाभिजातस्य बादरायणस्योक्तविधानेककार्यकारित्वमसंभावितमित्यतस्तद्वैलक्षण्यमाह 'येन भूमिवलये' भूमिर्वलय इव भूमिवलयस्तस्मिन्वर्तुले यमुनाद्वीपे इति यावत् । प्रादुरभावीति । अयमाशयः । न बादरायणो देवदत्तादिवत्स्त्रीपुरुषमलाभिसञ्जातः । तदेहस्य नित्यत्वात् । किन्तु 'यथा नृसिंहाकृतिराविरासीत् स्तम्भात्तथा' अयमप्याविर्भूत एव सत्यवत्यां । अत एव सत्यवत्यां प्रादुरभावीति वक्तव्ये यथा भूमिवलयस्य व्यासाभिव्यक्तिस्थानत्वमात्रं न पुनरत्र किञ्चिदपि विशेषाधायकत्वं तथा सत्यवत्याम् अपि आविर्भावाधिकरणमेवेतीमं विशेषं द्योतयितुं भूमिवलये प्रादुरभावीत्युक्तम्। अत एव भाष्यादौ भगवान्नारायणो व्यासत्वेनावततारेति केवलोक्तिः।

क्वचिद् 'अवतीर्णो महायोगी सत्यवत्यां पराशरादि'त्यादिस्त्रीपुरुषसंबन्धाभिजातत्वोक्तिरनु भगवता अयोग्यजनमोहनाय प्रदर्शितचरितानुवादमात्रम् । यथोक्तं भारततात्पर्यनिर्णये । 'यथा नृसिंहाकृतिराविरासीत् स्तम्भात्तथा नित्यतनुत्वतो विभुः । आविर्भवेयोषिति नो मलोत्थस्तथापि मोहाय निदर्शयेत्तये'ति । अतो देवदत्तादिविलक्षणो बादरायण इति । नन्वस्तु बादरायणस्य देवदत्तादिवैलक्षण्यादुक्तानेककार्यकारित्वं संभावितम् । तन्निश्चयस्तु कथमित्याशङ्कापरिहारकतया व्यासेनेति वक्तव्ये व्यासदिवाकरेणेति व्यासस्य दिवाकराख्यतेजस्त्वमुक्तम् । तथाच यथा दिवाकरो भूम्याः बल्यवद्विन्ध्यमाने मानसगिरौ आविर्भूयानन्तरमेव किरणसन्ततिं विस्तारयति पङ्कजं प्रबोधयति घटपटादितत्त्वं प्रकाशयति ध्वान्तं ध्वंसं प्रापयति पान्थनिकरं मार्गं नयति तेजःस्वभावत्वादेव । तथा बादरायणोऽपि प्रादुर्भावानन्तरमेव गोसन्ततिविस्तारादिकं करोति तेजस्त्वादेवेति कात्र कथन्ता । यथोक्तं न्यायविवरणटीकायाम् । बादरायणसंज्ञाय परस्मै ब्रह्मसे नम इति । ननु बादरायणस्य प्रादुर्भाव एव किमर्थः । न हि प्रेक्षावत्प्रवृत्तिर्विफला संभाविनीत्यत उक्तं करुणयेति । नष्टधर्मज्ञानलोककृपालुभिर्ब्रह्मरुद्रेन्द्रादिभिः कृतेन प्रार्थनेन सज्ञातया करुणयेत्यर्थः । तथाच स्वप्रयोजनाभावेऽपि परप्रयोजनार्थः प्रादुर्भावः । दृश्यन्ते हि केवलं कृपापारवश्येन परोपकारार्थं प्रवर्तमानाः सुतरां तैर्वर्तिता इति भावः । ननु न तावद्बादरायणः साधनजातं साधुनिकराय साक्षादुपदिशतीति युक्तम् । चतुर्मुखेतरेषां साक्षात्तदुपदेशायोग्यत्वात् । नापि चतुर्मुखद्वारा । सर्वेषां साक्षात्तदुपदेशं प्रत्यप्ययोग्यत्वात् । न चायमुपदेशः साधारणप्रमेयमात्रविषयः । येनेन्द्रादेरपि कदाचिद्विरिञ्चमुखादुपदेश इव नारदादेरिव च युज्येत । किन्तु साक्षान्मोचकातिगोप्यबिम्बरूपादिविषयः । न चेदृश उपदेशो जन्तुमात्रस्य विरिञ्चाद्वेर्वा युज्यते । ततः कथं साधुनिकरस्य सन्मार्गप्रापणमित्यत उक्तं सततं सर्वसाधनानुष्ठानकालेऽपि व्यासदिवाकरेण मे मानसं मा त्याजीति । इदमुदितं भवति । अस्त्येवाधिकारिमात्रस्यापि हरिविरिञ्चाभ्यामुपदेशो बिम्बादेरेव । न चैतदुक्तरीत्या दुर्घटम् । साक्षाद्बहिष्टरूपेण तदनङ्गीकारात् । तस्यैव दुर्घटतयाऽभिप्रेतत्वात् । अन्तर्गतरूपेण परोक्षेणोपदेशस्य स्वीकारात् । अन्यथा ब्रह्मोपदेशेनैव सर्वेषां मुक्तिरित्यस्यासामञ्जस्यप्रसङ्गात् । तथाच बादरायणो बहिष्टरूपेण शास्त्रनिर्माणादिकं विधाय मनोनिष्टेन रूपान्तरेण तदर्थावबोधादिसाधनजातं रक्षस्यमपि संपादयतीति न किञ्चिदत्र दुर्घटमिति । निपुणतरमेतदुपपादितं भागवतसारोद्धारे गुरुविचारप्रकरणे अस्मद्गुरुचरणैः । ननु व्यासस्य केनाविर्भावः । नारायणेनेति चेत् । तर्हि हेः किमायातम् । न । हरिनारायणयोरैक्यात् । तदेव कथं निश्चितमिति चेत् । न । 'भगवान्नारायणो व्यासत्वेनावततार', 'तमेव शास्त्रप्रभवं प्रणम्य', 'प्रादुर्भूतो हरिर्व्यास' इति भाष्यकारीयवाक्यप्राबल्यान्यथानुपपत्तेरेव निश्चायकत्वादिति ॥

चषकः— चतुर्लक्षणीप्रतिपाद्यविशेषितप्रणामानन्तर्येण व्याख्येयद्वितीयपद्यप्रतिपादनीयगुरुत्वोपपादकशास्त्रप्रभवत्वादिकं स्फुटीकुर्वाणस्सूत्रकृत्सन्निहितिं स्वचेतसि प्रार्थयते येनेति । तन्त्रावृत्त्याद्याश्रयणेन चिणन्तघटकेनान्वेति । करुणयेत्यपि तथा । तत्राद्या चिण्प्रकृतिरकर्मिका शिष्टतत्प्रकृतयस्सकर्मिका इति । भवतेर्भवि लकारः शेषतत्सङ्गात्कर्मणि । 'लः कर्मणि च' 'चिण्भावकर्मणोरि'ति च स्मृतेः । अत्र भावो भावनोत्पादनक्रिया । सा धातुत्वेन

सकलधातुषु वाच्या भावार्थकलकारेणानूद्यते । युष्मदस्मद्भ्यां सामानाधिकरण्याभावात्प्रथमपुरुषः । तिङ्वाच्य-भावनाया असत्त्वरूपत्वे तद्वित्वाद्यप्रतीतेर्न द्विवचनादि किन्त्वेकवचनमेव तस्यौत्सर्गिकत्वेन सङ्ख्यानपेक्ष-त्वात् । अनभिहिते कर्तरि तृतीया । आद्ये यन्निष्ठकर्तृतानिरूपकः प्रादुर्भाव इति बोधः । शेषेषु यत्कर्तृक-विस्तृत्यादिक्रियाकर्मभूता गोसन्तत्यादय इति । द्विकर्मणां तु 'गौणे कर्मणि दुह्वादेः प्रधाने नीह्वकृष्वहाम् । बुद्धिभक्ष्यार्थयोः शब्दकर्मणां च निजेच्छया प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मता' इत्यनुशासनविषयतया चैत्रेण ग्राममजा नीयत इतिवन्मुख्यकर्मीभूतध्वान्तवृत्तिकर्मतैव चिणा प्रत्याप्यत इति तत्पदोत्तरा प्रथमैव । ग्रामस्येव ध्वंसस्याप्रधानकर्मतया तदुत्तरा तन्निष्ठकर्मतावगमिका द्वितीयैव । क्षुभ्नस्वान्तध्वान्तेत्यनिट्कतया निपातित-ध्वनिप्रकृतिकभावनिष्ठान्तरीयेण ध्वान्तशब्दस्य नपुंसकाधिकारीयेण भावे ल्युडन्त इति सूत्रोत्तरनिष्ठायां चेत्यनुशिष्ट-नित्यक्लीबताकतया क्लीबनिर्देश इति ज्ञातव्यम् । माङ्समभिव्याहारे लुङस्सर्वलकारापवादकतया लोडर्थभूताशी-रर्थकोऽयम् । आशिषि लिङ् लोटाविति स्मृतेः । लोडप्रयोगबीजं तु लुङो भूयःसमभिव्याहारभङ्गापनिनीषैवेति ध्येयम् । शिष्टं निबन्धान्तरेषु व्यक्तम् ॥ २ ॥

ए०बा०— स्वस्य त्यागानर्हत्वं निवेदयते **करुणयेति** । त्यजेस्तु माङ्योगात्प्रार्थने लुङ् । माङि लुङिति माङ् योगे लुङः सर्वलकारापवादकत्वात् । त्याजीति छेदः । न माङ् योग इत्यटो निषेधात् । ननु व्यासदिवाकरेणेत्यत्र कः समासः । न तावद्व्यासश्चासौ दिवाकरश्चेति कर्मधारयः । विशेषणविशेष्याभावाभावात् नापि व्यासो दिवाकर इवेत्युपमितसमासः । सामान्यप्रयोगसत्त्वेन उपमितं व्याघ्रादिभिः सामान्याप्रयोग इत्यस्याप्रसक्तेः । अत एव भाष्याब्धिः क्वातिगम्भीर इति कैयटप्रयोगं प्रामादिकं मन्यन्ते । अन्ये त्विह गाम्भीर्येण साम्यं न विवक्षितम् । किन्तु वितनदुरवगाहत्वादिनेतीह तदप्रयोगोऽस्त्येवेति भट्टोजिप्रभृतयः । समादधत इति चेन्न । व्यासाख्यश्चासौ दिवाकरश्चेति वा व्यास एव दिवाकर इति वा समाससंभवात् । शाखपार्थिवादिष्वस्योपसंख्येयत्वात् । तथा च माघः (११-१७) 'अविरतरतलीलायासजातश्रमाणामुपशममुपयान्तं निःसहेऽङ्गेऽङ्गनानाम् । पुनरुषसि विवित्तैर्मालतीश्चावचूर्ण्य ज्वलयति मदनाग्निं मालतीनां रजोभिरि'ति व्याचिख्यौ च तत्र मल्लिनाथः । मदन एवाग्निर्मदनाग्निरिति । एतेन सोऽयं व्याससुधानिधिर्भवतु म इत्यादयो व्याख्याताः । यद्वास्मदीयं गुणार्णवमित्यनुव्याख्यानव्याख्यानसुधायामर्णव इवाचरतीत्यर्णव इत्युक्तदिशा दिवाकर इवाचरतीति दिवाकर इति व्याख्येयम् । विशेषणविशेष्यभावस्य काम-चारित्वाद्विशेषणस्य परनिपातः । पूर्वश्लोक इवेह नमनस्याभिसंहितत्वेऽपि नमःशब्दाप्रयोगस्तु श्रीव्यासस्य तमेवेति श्लोकोक्तं श्रीपतेर्हर्यपरपर्यायनारायणाभेदं सूचयति । तदेताभ्यां श्लोकाभ्यामानुव्याख्यानिकाद्यपद्यत्रिकेण विवृतं साद्यपद्यमुपोद्घातभाष्यं विवृतं भवतीति ॥ २ ॥

काशी०— अथ सूत्रकृतं प्रार्थयते **येनेति** । अत्र द्वितीयतृतीयविशेषणयोः साक्षान्मूलोक्तशास्त्रप्रभवत्व-विवरणत्वमन्येषां तदुपपादकत्वमभिप्रेतम् । प्रादुरभावीत्यादिना प्रादुर्भावानन्तरमेव ग्रन्थरूपगोसन्ततिनिर्माणादे-र्विवक्षितत्वेन स्वतः सार्वज्ञ्यादिसिध्या शास्त्रप्रभवत्वशक्तिः सूचिता । उभयार्थकगोशब्दसूचितं च वाक्यानां

किरणसाम्यम् । प्रतिबन्धकनिरासेनार्थप्रकाशकत्वात् । श्रुतीनामपपाठादितिरोहितरूपत्वेन पद्मसाम्यम् । प्रबोधो विकासः स च श्रुतीनां यथास्थितपाठादिप्रकाशरूपः । नन्वस्य निष्प्रयोजनत्वान्न शास्त्रप्रभवत्वादिकं युक्तमित्यत आह प्राकाशीति । प्रकाशो बोधः । स च प्रकृते श्रौतो दृष्टान्ते चाक्षुषः । ननु परप्रयोजनार्थैव कथं प्रवृत्तिरत उक्तम् करुणयेति । दयालूनां स्वभावोऽयमिति भावः । ननु परेषामपि तत्त्वबोधेन किं प्रयोजनमत आह ध्वान्तमिति । तमःसमाज्ञाननिवृत्तिस्तत्प्रयोजनमिति भावः । तस्यापि किं प्रयोजनमत आह साधुनिकर इति । सन् मोक्षप्रापकत्वेन समीचीनः सतो वा नित्यसुखलक्षणमोक्षस्य यो मार्ग उपास्त्यादिरूपस्तद्व इत्यर्थः । तथा च मोक्षसाधनोपास्त्यादिप्रयोजकपरतत्त्वावबोधसंपादकत्वेन शास्त्रप्रभवत्वमर्थवदिति हृदयम् । मा त्याजीति । माङ् योगे लुङः सर्वलकारापवादकत्वाल्लोडर्थे लुङ् । न त्यज्यतामित्यर्थः । संबन्ध्यतामित्येवोक्ते संबन्धमात्रस्य नित्यसिद्धत्वात्स्मृतिविषयत्वरूपसंबन्धस्य चाधुनैव सत्त्वात्प्रार्थनाऽनुपपत्तिरतः सन्ततस्मृतिविषयत्वरूपसंबन्धलाभाय निषेधद्वयोक्तिः । तथा च यथा सूर्यः परेषामर्थप्रकाशनस्वभावो मानसे प्रकाशते तथा परतत्त्वप्रकाशनस्वभावो भगवानतिदयालुतया स्वयमेव सदैव मन्मानसे प्रकाशताम् । तस्यैव परतत्त्वप्रकाशत्वादित्याशयः । ननु सूर्ये सर्वदा मानसापरित्यागस्याभावात्कथं तद्दृष्टान्तेन तत्प्रार्थनमिति चेत् । उच्यते । सूर्यधर्मान्तराणामतिशयेन भगवत्युपलम्भान्मानसापरित्यागस्याप्यतिशयेन प्रार्थनम् । न हि सूर्येण प्रादुर्भावानन्तरमेव भूमिवलये गोसन्ततिविस्तारादिकमकारि किन्तु तदेकदेश एव । नापि करुणया । नापि परं तत्त्वं प्राकाशि । नापि ध्वान्तं ध्वंसं परमत्यन्तमनायि । पुनर्ध्वान्तसंभवात् । अतो गोसन्ततिविस्तारादौ साधारकभूवलयसंबन्धित्वाद्यतिशयोपलम्भान्मानसापरित्यागेऽपि सार्वदिकत्वरूपातिशयप्रार्थनमुपपन्नमेवेति ॥ २ ॥

गूढ०— तमेवेति श्लोके गुरुत्वेन वेदव्यासवन्दनं क्रियते । तत्र तमेवेत्यनेन व्यासस्य परदेवतैक्यमुक्तम् । तदयुक्तम् । वेदव्यासस्य जन्यादिमत्वेन मूलरूपस्य च जन्यादिशून्यत्वेन विरुद्धधर्माधिकरणयोरैक्यायोगात् । शास्त्रप्रभवमित्येतत् गुरुत्वोपपादनार्थमुक्तम् । तत्र श्रुत्यादिशास्त्रप्रभवमुत्पादकमिति प्रतीयते । तदयुक्तम् । श्रुत्यादेरपौरुषेयत्वेन तदुत्पादकत्वायोगात् । जगद्गुरूणामित्यत्र जगद्गुरूणां ब्रह्मादीनामेवोपदेष्टृत्वेन गुरुत्वान्येषामिति प्रतीयते । अतस्तमेवेति श्लोकं किमित्याचष्टे येनेति । तथाच व्यासस्य प्रादुर्भावमात्रसत्त्वेन उत्पत्त्यादेरभावात्परदेवतैक्यं युक्तम् । प्राबोधि श्रुतिपङ्कजमित्यनेन श्रुत्यादेरुत्पन्नस्य प्रबोधकत्वमेव न तत्कर्तृत्वमित्युक्त्वा-त्रापौरुषेयत्वविरोधः । व्यस्तारि गोसन्ततिः प्राकाशि तत्त्वं परं ध्वान्तं ध्वंसमनायीत्यादिविशेषणत्रयेण संप्रदायप्रवर्तकत्वेन गुरुत्वमुपपादितम् । ध्वान्तं ध्वंसमित्यनेन यावत्पर्यन्तमज्ञाननिवृत्तिस्तावत्पर्यन्तप्रबोधकत्वस्योक्त्वादज्ञसैवेत्युपपादितं भवति । साधुनिकर इत्यनेन गुरूणामित्युपलक्षणमित्युक्तम् । तथाच सर्वेषामपि साधूनां गुरुरित्युक्तं भवति । दिवाकरसाम्येन स्तुतिकरणेन दिवाकरसन्निधाने यथा न तमसोऽवस्थानं सर्वथा तथा व्यासदिवाकरस्यानवरतं मनःसन्निधाने अज्ञानलेशोऽपि न भविष्यतीति वक्ष्यमाणप्रमेये कश्चिदपि न दोष इति सूचयति । व्यासदिवाकरमनःसन्निधानं न ध्यानेन विना संभवति ।

भाष्यकर्तारं आनन्दतीर्थं अभीष्टं प्रार्थयते—

सु०— व्याप्तिर्यस्य निजे निजेन महसा पक्षे सपक्षे स्थिति-
र्व्यावृत्तिश्च विपक्षतोऽथ विषये सक्तिर्न वै बाधिते।
नैवास्ति प्रतिपक्षयुक्तिरतुलं शुद्धं प्रमाणं स मे
भूयात्तत्त्वविनिर्णयाय भगवानानन्दतीर्थो मुनिः ॥ ३ ॥

परि०— भाष्यकर्तारमभीष्टं प्रार्थयते **व्याप्तिरिति** ॥ तत्त्वविनिर्णयाय इदमदो वाऽन्यदेव वा तत्त्वज्ञानमिति संशयविपर्ययानास्कन्दितनिर्णीतप्रामाण्यकंनिश्चयरूपतत्त्वज्ञानायेति साध्योक्तिः । प्रमाणमिति करणे ल्युट् । इतरकरणवदस्य प्रमातृप्रयोज्यत्वाभावेऽपि सर्वप्रमितिकरणमनआदि-शक्तिप्रबोधकतया प्राधान्येन प्रमाहेतुत्वात् 'बृहत्तुलैरप्यतुलै'रित्यादाविवातुलमनुपममित्यर्थः । शुद्धं निर्दोषम् ।

पक्षवृत्तित्वं सपक्षे सत्त्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वं असत्प्रतिपक्षत्वं चेति अन्वय-व्यतिरेकिणः पञ्चरूपाणीति तानि क्रमेणाह **व्याप्तिरित्यादिना** ॥ निजे भक्तवर्गाख्ये पक्षे । भक्तवर्गस्य विष्णूत्कर्षादिज्ञानं वा तत्त्वज्ञानमिति **तत्त्वज्ञानगोचरसन्देहवत्त्वेन** विष्णूत्कर्षादिज्ञानमेव तत्त्वज्ञानं नान्यदित्येवं तत्त्वनिर्णयरूपप्रमाणफलस्य **तस्मिन्सिषाधयिषितत्वेन** तस्य पक्षत्वात् । स्वमाहात्म्यस्य तत्र प्रकटितत्वेन तैरवगतमाहात्म्यत्वात्तत्र सान्निध्यविशेषाद्वा **निजेन** महसा तं व्याप्नोतीति व्याप्तिपदेन पक्षे सर्वत्र वृत्तिरुक्ता । 'व्यावृत्तं यद्विपक्षेभ्यः **सपक्षे** च कृतान्वयि । व्यात्या पक्षे वर्तमानमन्वयव्यतिरेकि तदि'त्युक्तेः । सपक्षे हरौ इदमदो वेति सन्देहानास्कन्दितानुपचरिततत्त्वनिर्णयवति, स्थितिः निष्ठा न तु तत्र व्याप्तिः, हरिविषये कृत्स्नाविषयत्वात्, ईशादन्यत्रैवालोचने सर्वविषयकत्वादिति भावः । विपक्षतः उक्तरूपतत्त्वनिर्णयहीनायोग्यजनेभ्यः, व्यावृत्तिः उपदेशादावप्रवृत्तिः, बाधिते निषिद्धे विषये सक्तिः सङ्गो नैवास्तीति अवधारणे प्रसिद्धिद्योतको वा वैशब्दः, भ्रान्तिशून्य इति वार्थः; ऋजुज्ञानस्य यथार्थैक-स्वभावत्वात् । प्रतिपक्षयुक्तिः प्रतिवादियोगः । स नैव, प्रतिभटशून्य इत्यर्थः ॥

वेदभारतबौद्धादिग्रन्थाः पक्षसपक्षविपक्षा इत्येके ॥ ३ ॥

गु०दी०— **यस्य** अन्वयव्यतिरेक्यनुमानोपमया प्रमाणत्वेन निरूपितस्य आनन्दतीर्थमुनेः । **निजे पक्षे** विष्णुसर्वोत्तमत्वसगुणत्वसाकारत्वजगत्सत्यत्वादिरूपप्रमेये । **निजेन** स्वाभाविकेन । **महसा** श्रुतिस्मृत्यादि-प्रमाणैरुपपादनसामर्थ्येन सह **व्याप्तिरस्ति** । यथा धूमानुमानस्य निजे पर्वतेऽशतो बाधभागासिद्धचोः परिहाराय निजेन

महसा सह व्याप्तिरस्ति तथेति पक्षधर्मत्वाख्यं प्रथमं रूपमुपपादितम्। सपक्षे प्रामाणिकत्वेन स्वपक्षसमाने निर्णीतत्वात् सपक्षस्थानीये ज्योतिष्टोमादेः स्वर्गसाधनत्वादौ प्रमेये निजेन महसा सह स्थितिरस्ति। न तु व्याप्तिः। कदाचित्प्रसङ्गवशाद् तमप्यर्थं साधयति न तु नियमेन। अतः सपक्षे सत्त्वाख्यं द्वितीयं रूपमपि निष्पन्नम्। विपक्षतः विरुद्धपक्षात् अद्वैतादेः निजेन महसा सह व्यावृत्तिरस्ति। न तु तत्साधनेऽपि कदाचित् स्वसामर्थ्यं घटयति। अनेन विपक्षाद् व्यावृत्त्याख्यं रूपं संपादितम्। बाधिते शशशृङ्गसत्त्वादौ सक्तिरेव न। अनेनाबाधितविषयत्वाख्यं रूपमुपपादितम्। प्रतिपक्षयुक्तिर्नैवास्ति इत्यनेन असत्प्रतिपक्षत्वं स्पष्टीकृतम्। अतुलम् अलौकिकविषयकत्वादसदृशम्। अत एव शुद्धं प्रमाणं प्रमाणस्थानीयः स भगवान् आनन्दतीर्थो मुनिः तत्त्वनिर्णयाय भूयादिति समग्रोपमागर्भं रूपकम्।

बालु०— आनन्दतीर्थपक्षे— निजः पक्षो ब्रह्ममीमांसाशास्त्रम्, विप्रतिपत्त्या सन्दिग्धसाध्यार्थवत्त्वात्। तत्र व्याप्तिः निष्ठा; न तु परभाष्यकारस्येवानादरः, तेन श्रुतिसूत्रयोः विरोधे सूत्राणां कथञ्चिद्योज्यत्वस्योक्तत्वात्। निजेन स्वाभाविकेनैव, न बलादिलब्धेन; महसा स्वसाध्यज्ञापनसामर्थ्येनेत्यर्थः। सपक्षे निर्णतव्यार्थवत्तया निश्चिते वेदेतिहासादौ, स्थितिः निष्ठा। विपक्षतो विरुद्धसिद्धान्ततो, व्यावृत्तिः तत्रानादरः। सक्तिः आसक्तिः, आग्रह इति यावत्। ऋजुयोगिनामदृष्टबुद्धित्वस्य वेदादिप्रसिद्धत्वादिति हेतुं वैशब्देन सूचयति। प्रतिपक्षयुक्तिः प्रतिवादियोगः। अनुमाने सर्वत्र कथञ्चित्प्रतिपक्षयोगः संभावितः। 'उपाधिप्रतिपक्षौ तु क्व नामातीव दुर्वचौ' इत्युक्तेः; अस्य तु सर्वथा प्रतिपक्षयोगसंभावनापि नास्तीत्यभिप्रायेण नैवेत्युक्तम्। अत एवातुलमित्याहेति योजना द्रष्टव्या।

अनुमानपक्षे तु— निजेन महसा व्याप्त्याख्यसामर्थ्येन, निजे पक्षे स्वसाध्यधर्मविशिष्टे धर्मिणि, व्याप्तिः तत्र सर्वत्र वृत्तिः, अन्यथा भागासिद्ध्यापत्तेः। शिष्टं स्पष्टम्। शुद्धं पञ्चरूपोपपन्नम्। प्रमाणम् अनुमितिरूपप्रमाकरणम्। आनन्दतीर्थमुनेरपि सकलशेमुषीनियामकतया अस्मदाद्यनुमितिप्रमाकरणत्वमुपपादनीयम्॥ ३॥

बं०प०— व्याचिख्यासितानुव्याख्यानकर्तृत्वोपाधिना श्रीमदानन्दतीर्थमुनिमनुमानसाम्येन वर्णयन् तत्त्वनिर्णयसाधनत्वं प्रार्थयते व्याप्तिरिति॥ ३॥

आनन्दः— ध्यानं च न ज्ञानं विना, तच्च प्रमाणेन विना न संभवतीत्यतस्तज्ज्ञानजनकं किं प्रमाणमित्यतः प्रमाणत्वेन भाष्यकर्तृनमिष्टौति व्याप्तिरिति। स आनन्दतीर्थमुनिः तत्त्वनिर्णयाय मे प्रमाणं भूयादित्यन्वयः। नन्वानन्दतीर्थः प्रत्यक्षप्रमाणं वाऽनुमानं वाऽगमो वा। नाद्यः तस्येन्द्रियरूपत्वाभावात्। न द्वितीयः व्याप्त्यादेरभावात्। न तृतीयः तस्य शब्दरूपत्वाभावादिति चेत् मैवम्। तस्यानुमानरूपप्रमाणत्वाभ्युपगमात्। नन्वनुमानशब्दस्य अनुमानाभासेऽपि प्रयोगात् किमयमनुमानाभासो नेत्याह शुद्धमिति। व्यभिचारादिहेतुदोषशून्यमित्यर्थः। तर्हि धूमानुमानवदिदमनुमानमिति नेत्याह अतुलमिति। प्रसिद्धानुमानविलक्षणमित्यर्थः। तथापि व्याप्त्याद्यभावात् कथमनुमानत्वमित्यत उक्तं व्याप्तिर्यस्येति। यस्य निजेन महसा स्वरूपभूतेन तेजोरूपेण हरिणा व्याप्तिरस्ति निजे पक्षे सपक्षे स्थितिः विपक्षतो व्यावृत्तिः बाधिते विषये सक्तिर्न वै यस्य प्रतिपक्षयुक्तिर्नैवास्तीति संबन्धः। एवं च पञ्चरूपोपपन्नत्वाच्चास्यानुमानत्वमिति भावः। नन्वानन्दतीर्थस्य हेतुत्वेऽत्र किं साध्यं हरिर्वा सर्वोत्तमत्वं वा।

नाद्यः । तथात्वे पक्षाभावप्राप्तेः । न च सज्जनानामेव पक्षत्वमिति वाच्यं तथा सति सपक्षाभावेन पञ्चरूपोपपन्नत्वाभावापत्तेः । न द्वितीयः । हरिनिष्ठसर्वोत्तमत्वस्यान्यत्रासंभवेन व्याप्तिग्रहणायोगादिति चेन्नैवम् । हरिः सर्वोत्तमः आनन्दतीर्थवत्त्वात् इति सर्वोत्तमत्वस्यैव साध्यत्वात् । न चैवं सर्वोत्तमत्वस्यान्यत्रासंभवेन सपक्षाभावाद्व्याप्तिग्रहणायोग इति वाच्यम् । रामकृष्णाद्यवताराणामेव सपक्षत्वात् तत्र चानन्दतीर्थवत्त्वस्य सर्वोत्तमत्वस्य च सत्त्वान्न कश्चिद्दोषः । न च प्रेरकत्वेनानन्दतीर्थवत्त्वस्य सज्जनादिष्वपि सत्त्वेन तत्र साध्याभावाद्व्यभिचार इति वाच्यम् । तदधीनत्वेनानन्दतीर्थवत्त्वस्य विवक्षितत्वात्सज्जनादिषु तदभावान्न व्यभिचारः । न च लक्ष्म्याः तदधीनत्वेनानन्दतीर्थवत्त्वेऽपि सर्वोत्तमत्वाभावाद्व्यभिचारो दुष्परिहर एवेति वाच्यम् । तत्स्वतन्त्रत्वेन आनन्दतीर्थवत्त्वस्य विवक्षितत्वाल्लक्ष्म्याश्च स्वातन्त्र्याभावान्न व्यभिचारः । हेतुसिद्धिस्त्वागमादेव द्रष्टव्या । यद्वा सज्जना हरिमन्तः आनन्दतीर्थवत्त्वात् न च सपक्षाभावः । सज्जनैकदेशस्यैव पक्षत्वेनैकदेशान्तरस्य सपक्षत्वोपपत्तेः न च विनिगमकाभावात् कस्यैकदेशस्य पक्षत्वमिति वाच्यम् । अनवरतं पूर्णगुणत्वप्रकारकहरिस्मृतिमदभिन्नभक्तश्रीचतुर्मुखेतररुद्रादिसज्जनैकदेशस्य पक्षत्वेन तस्य सपक्षत्वोपपत्तेः । न च निश्चितसाध्याभाववत एव विपक्षत्वेन प्रकृते च हरेर्व्यापकत्वेन हरिमत्त्वस्य सर्वत्र विपक्षीभूतदैत्यादिषु सत्त्वेन कथं तेषां विपक्षत्वमिति वाच्यम् । 'दूराद्दूरतरं यत्तु तदेवान्तिकमन्तिकादि'त्यादौ तज्ज्ञानवत्त्वेन तदन्तिकत्वस्य तदज्ञानवत्त्वेन तद्दूरत्वस्यैव परिपूर्णगुणत्वेन हरिस्मृतिमत्त्वस्यैव हरिमत्त्वस्यैव हरिमत्त्वस्य विवक्षितत्वात् तस्य च तेष्वसत्त्वेन विपक्षत्वोपपत्तेः । न च प्रेरकत्वेनानन्दतीर्थवत्त्वस्य दैत्येष्वपि सत्त्वेन व्यभिचार इति वाच्यम् । आनन्दतीर्थवत्त्वेन तज्ज्ञानवत्त्वस्यानन्दतीर्थवत्त्वस्य विवक्षितत्वात्तस्य च तत्र अभावान्न व्यभिचारः । व्याप्तिस्तु देहेऽपि यत्र पवनोऽत्र हरिर्यतोऽसौ इत्युक्ता द्रष्टव्या । अथवा आनन्दतीर्थः हरिमानानन्दतीर्थत्वात् इति हेतुः । न चैवं मूलविरोधः । आनन्दतीर्थपदस्य भावप्रधानत्वात् न चैवं सति सपक्षे तत्राप्रवेशितत्वादसाधारण्यमिति वाच्यम् । आनन्दतीर्थानामनेकत्वेन तेषामेव सपक्षत्वोपपत्तेः । कस्यचिदानन्दतीर्थस्य पक्षत्वात् । अनवरततत्स्मृतिमत्त्वस्यैव हरिमत्त्वस्य विवक्षितत्वान्न कोऽपि दोषः । यद्वा वेदादिशास्त्रं प्रतिपाद्यत्वेन हरिमत्, तत्प्रतिपादकत्वेनानन्दतीर्थवत्त्वात् । अत्र सदागमानां सपक्षत्वाद्दुःशास्त्राणां विपक्षत्वम् । तथा च न कश्चिद्दोषः । बाधिते विषये सक्तिर्न वै इत्यनेन विष्णुसर्वोत्तमत्वादिरूपार्थस्य स्मृतीनां न कदापि बाध इत्युक्तं भवति । न च प्रतिपक्षयुक्तिर्नैवास्तीत्ययुक्तं परशास्त्राणां जागरूकत्वादिति वाच्यम् । समयपादे तदाभासत्वस्योक्तत्वेन तासां बाधकत्वायोगात् । न चानन्दतीर्थः श्रुतिमूलकानुमानं वा शुष्कानुमानं वा । नाद्यः तददर्शनात् नान्त्यः तस्य कामचारित्वादिति वाच्यम् । 'आनन्दरूपस्य परस्य पात्रधीरानन्दसन्दायिसुशास्त्रकृत् स यदि'त्यानन्दतीर्थपदेनैव प्रमाणस्योक्तत्वेन श्रौतानुमानत्वात् । अत एवातुलं असदृशं प्रमाणं तथा च पञ्चरूपोपपन्नत्वान्निर्दोषत्वादन्वयव्यतिरेक्यानन्दतीर्थाख्यो हेतुः प्रमाणमिति न कश्चिद्दोषः ।

कं०रा०— व्याप्तिरिति । यस्यानन्दतीर्थमुनेर्निजे स्वीयपक्षे 'अशेषगुणपूर्णत्वं सर्वदोषसमुज्झितिः । विष्णोरन्यच्च तत्तन्त्रमिति सम्यग्विनिर्णयः । स्वतन्त्रत्वं सदा तस्य तस्य भेदश्च सर्वतः" इत्यादिना वक्ष्यमाणे सत्सिद्धान्तरूपे निजेन महसा अविनाशिना ज्ञानेन व्याप्तिः साकल्येन तद्विषयत्वमिति यावत् । 'निजौ

स्वीयाविनाशिनौ' इत्यभिधानात्। 'एवं प्रलयकालेऽपि प्रतिभानपरावरः। मुख्यवायुर्नित्यसमः' इति वक्ष्यमाणरीत्या मुख्यवायोर्वृत्तिरूपज्ञानस्य प्रलयकाले नाशाभाव इति द्रष्टव्यम्। 'महस्तूत्सवतेजसोः' इत्यभिधानात् तेजोवाची महच्छब्दः अर्थप्रकाशकज्ञानवाची च भवति। पक्षपरिग्रह इत्यस्मान्निष्पन्नः पक्षशब्दः स्वपरिगृहीतसत्सिद्धान्तवाची। यद्वा, 'पक्षः सहायगरुदन्तिकसाध्यभितिमित्रेषु चुल्लिविबरे नृपकुञ्जरे च' इत्यभिधानात् आनन्दतीर्थमुनेः परममित्रभूतः परमात्मा पक्षशब्देनोच्यते। तथा च निजे पक्षे परमात्मनि निजेन महसा अविनाशिना ज्ञानेन व्याप्तिः। "सर्ववेदेषु ये चोक्ता गुणाः सर्वे सुमङ्गलाः। ज्ञानेन भगवान् ब्रह्मा वेत्ति लक्ष्मीरमनोऽधिकान्" इति वचनात् सर्ववेदोक्तसकलपरमात्मधर्मविषयकत्वमिति यावत्। अथवा, 'पक्षः सहायगरुदन्तिकसाध्या' इत्युदाहृताभिधानात्पक्षशब्दः साध्यवाची। तथा च निजे पक्षे स्वीये साध्ये प्रतिवादिनं प्रति स्वेन साधनीयार्थे निजेन महसा व्याप्तिः। सपक्षे स्थितिः समानपक्षे स्वसिद्धान्तसमानसिद्धान्ते व्यासकृतभारतादौ, तेषां ब्रह्मसूत्रव्याख्यानकाले सपक्षत्वात्। तत्संमत्या सूत्रयोजनायाः क्रियमाणत्वात्, निजेन महसा स्थितिः। व्यावृत्तिश्च विपक्षतो विरुद्धपक्षाद्विरुद्धसिद्धान्तात् व्यावृत्तिर्नाम तस्यासत्त्वेन विषयीकरणम्। प्रसिद्धधूमवत्त्वानुमानस्य तु निजे पक्षे पर्वतादौ निजेन महसा स्वीयेन वह्निना व्याप्तिः सपक्षे महानसादौ स्थितिर्विपक्षतो ह्रदादेर्व्यावृत्तिः बाधिते विषये सक्तिः संबन्धो न वै प्रतिपक्षयुक्तिः साध्यविपरीतसाधिका युक्तिर्नैवास्तीत्यर्थः स्फुटः। आनन्दतीर्थमुनेर्विपक्षे बाधिनेऽभद्रे विषये सक्तिः स्नेहो न वै। प्रमाणबाधिते वा मनःप्रवृत्तिर्न वै। प्रतिपक्षयुक्तिः प्रतिपक्षयोगो नैवास्तीति योज्यम्। यस्यानन्दतीर्थमुनेः निजे पक्षे व्याख्येयत्वेन परिगृहीते ब्रह्मसूत्रात्मकशास्त्रे निजेन महसा व्याप्तिः, सपक्षे भारतादौ निजेन महसा स्थितिः, विपक्षतः पाषण्डागमाद् व्यावृत्तिरित्यपि योज्यम्। 'समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु' इत्यत्र समानस्येति योगविभाग इष्टसिद्ध्यर्थः क्रियते तेन सपक्ष इत्यादि सिद्ध्यतीति काशिकोक्तेः सपक्षशब्दः साधुः। वायोः प्रलयेऽपि स्वरूपातिरिक्तज्ञाननाशाभावरूपमाहात्म्यसूचनाय निजेनेति पदम्। प्रसिद्धानुमाने तु स्वीयवाचिना निजपदेन स्वकारणत्वस्य विवक्षितत्वाद् व्याप्तिग्राहकतर्कसूचनार्थम्।

श्रीनिधि०— व्याप्तिर्यस्य निजे निजेनेति किं विष्णुपराणि उतान्यपराणीति सन्दिग्धानि वेदवाक्यानि विष्णुपरत्वेन ब्रह्ममीमांसया निर्णीयन्ते। प्रकृतं च ब्रह्ममीमांसाव्याख्यानम्। अतो वेदस्य पक्षत्वम्। निजे स्वीये। तत्तात्पर्यविशेषार्थस्य स्वेतरसर्वाधिकार्यपेक्षयाधिक्येन ज्ञातत्वात् स्वीयत्वं वेदस्य। लोकेऽपि यो यः शास्त्रतात्पर्यार्थं यावद्यावदाधिक्येन जानाति तस्मिन् तस्मिन् तदीयं शास्त्रं तदीयमेवेत्यादि अभियुक्तव्यपदेशस्य दर्शनात्। यावद्यावत्तदज्ञातं तावत् तावत्तदीयं न, तदीयं नैवेत्यादि तद्व्यपदेशस्य च दर्शनात्। सर्वात्मना वेदतात्पर्यं ये न जानन्ति मायिप्रभृतयः तेषां न वस्तुतो वेदवत्त्वम्। किन्तु तद्वत्ताभिमानमात्रम्। सर्वज्ञश्रीमदाचार्याणां तु तद्वत्त्वं मुख्यमेव। हेतोरुक्तत्वात्। न चारितिद्धिः। कश्छन्दसामिति श्रुतिसिद्धत्वात्। न च कर्त्वाभावः। भाविकत्वेनेदानीं तद्योग्यतावत्त्वादिति सूचितम्। मनसा प्रकृष्टज्ञानेन। (मनसा इति पाठान्तरं संभाव्यते) निजेन वराकलब्धेन, स्वरूपभूतेनेति यावत्। व्याप्तिः सकलवेदार्थविचारकत्वम्। सकलवेदपाठवत्त्वं वाऽस्ति। अनेन पक्षधर्मत्वरूपं अनुमानाङ्गं उपपादितं भवति। निर्णीतार्थत्वात्सकलपक्षशब्देन भारतायुच्यते। तत्र स्थितिः

तत्सकलप्रतिपाद्यपरिज्ञातृत्वम् । अनागतभारतपाठाभावाद् व्याप्तिरित्यनुक्त्वा स्थितिरित्युक्तम् । अनेन सपक्षे सत्त्वमुक्तम् । विष्णुसर्वोत्तमत्वविरुद्धशिवादिसर्वोत्तमत्वार्थप्रतिपादकत्वेन विपक्षात् शैवबौद्धाद्यागमात् व्यावृत्तिः । तद् व्यावृत्तत्वम् । अनेन तृतीयरूपोक्तिः । वेदानामापाततः प्रतीतहिरण्यगर्भसर्वोत्तमत्वादिरूपबाधितविषये सक्तिः । तत्प्रमातृत्वं तत्प्रवर्तकत्वं च नास्ति । अनेन अबाधितविषयत्वमुक्तम् । नैवेति पञ्चमरूपोक्तिः । पक्षे व्याप्तिमत्त्वात् इतरेषां पक्षे व्याप्त्या वर्तमानत्वाभावात् । अतुल्यसदृशम् । सकलवेदार्थनिर्णायकत्वाद्वा । अथवा पक्षशब्देन विष्णुसर्वोत्तमत्वसर्वगुणपूर्णत्वाद्युच्यते । तत्र व्याप्तिर्नाम सदा तत्सकलप्रतिपादकत्वम् । सपक्षशब्देन निर्णीतज्योतिष्टोमादिस्वर्गसाधनताद्युच्यते । तत्र स्थितिर्नाम कदाचित् प्रसङ्गात्तत्प्रतिपादकत्वम् । विपक्षशब्देन प्रमाणविरुद्धमद्वैताद्युच्यते । तस्मात् व्यावृत्तिस्तददूषकत्वम् । बाधिते विषये शशशृङ्गसत्त्वादौ सक्तिस्तद्विषयिणी बुद्धिर्न । विमता हरिमन्तः आनन्दतीर्थवत्त्वात् संमतभक्तान्तरवदित्यनुमानमभिप्रेतमिति केचिदाहुः ।

वा०चं०— युक्तिप्रधानत्वादनुव्याख्यानस्य तदुद्बोधार्थं युक्तिशेषेण तत्प्रणेतॄन्प्रार्थयते **व्याप्तिरिति** । अत्राचार्यपक्षे व्यापनं, स्वभावसामर्थ्येन, **स्वसिद्धान्ते, स्वसमानसिद्धान्ते**, दार्ढ्यम्, अनभिमतिः, **विरुद्धसिद्धान्ततः**, निषिद्धविषयासेहो, विरोधिमतयोगश्च यथाक्रमं शब्दार्था द्रष्टव्याः । अत्र न वै नैवेत्युभयावधारणप्रयोगेण व्याप्तिरेवेत्यादिः सर्वत्र संबन्धस्तस्य सूच्यते । तेन धूमस्य ह्रदपर्वतपक्षकानुमाने पक्षे व्याप्त्या स्थितेरभावात्, ह्रदे वह्निसाधनार्थं प्रयुक्तस्य पक्षे स्थित्यभावात्, ह्रददृष्टान्तेन प्रयुक्तस्य सपक्षे स्थित्यभावात्, वह्नयभावसाधनाय प्रयुक्तस्य विपक्षतो व्यावृत्त्यभावात्, वह्निमति वह्नयभावसाधनाय प्रयुक्तस्य (प्रत्यक्षादि)बाधिते विषये सक्तेश्च, स्थाल्यादिमत्त्वसाधनाय प्रयुक्तस्य पाषाणवत्त्वादिप्रतिपक्षयोगाच्च, क्वचित्सत्या एव युक्तेः क्वचिदसत्त्ववन्नाचार्यस्य क्वचिदपि स्वसिद्धान्तस्थित्यभावादीत्यर्थसिद्धाऽतुल्यत्वं सिद्धं भवतीति द्रष्टव्यम्। अत्र निजे पक्षे व्याप्तिः सर्वस्मिन्, स्वीये पक्षे स्थितिरित्यन्वयो द्रष्टव्यः ॥ ३ ॥

वा०र०— **अनुव्याख्यानस्य युक्तिप्रधानत्वात्** व्याचिख्यासितानुभाष्यव्याख्यानोपयोगितत्त्वनिर्णय-जनकयुक्त्युद्बोधार्थयुक्तिसदृशत्वेन अनुव्याख्यानप्रणेतॄन् **प्रार्थयतेत्यर्थः** । अत्र प्रणेतॄन् इत्यतःपरं गुरून् इति शेषः । वक्ष्यति च साक्षात् गुरूनिति । यस्य देव इत्यादिप्रमाणानुसारेण देवताप्रणामस्येव गुरुप्रणामस्यापि अभिमत-सिध्यङ्गतयाऽवश्यं ग्रन्थारम्भेऽनुष्ठेयत्वादिति भावः । व्याख्यादिपदानां अर्थान्तरप्रतीतेः अभिमतार्थाप्रतीतेश्च विवक्षितमर्थमाह **अत्राचार्येत्यादिना** । **व्याप्तिरित्यस्य व्यापनमित्यर्थः** । निजेन महसा इत्यस्य **स्वभावसामर्थ्येन इत्यर्थः** । निजे पक्षेत्यस्य **स्वसिद्धान्ते इत्यर्थः** । सपक्षे इत्यस्थस्य **समानसिद्धान्त इति** । स्थितिरित्यस्य **दार्ढ्यमिति** । व्यावृत्तिरित्यस्य **अनभिमतिरिति** । **विपक्षशब्दस्य विरुद्धसिद्धान्त इति** । **बाधिते विषये सक्तिर्नेत्यस्य निषिद्धविषयासेह इति** । प्रतिपक्षयुक्तिरित्यस्य **विरोधिमतयोग इति** । इत्येवं क्रमेण व्याप्तिः इत्यादि तत्रस्थ-शब्दार्थाः द्रष्टव्याः इत्यर्थः । निजेत्यस्य प्राथम्येऽपि पश्चादुक्तपक्षे इत्येतत् विशेषणतया पाश्चात्यं विवक्षित्वा व्याप्तिपदार्थानन्तरं निजेन महसेत्येतत् अर्थ एवोक्तः । अत एवासक्तिः इत्यत्रापि अन्वयक्रमं अभिप्रेत्य निषिद्धविषयासेह

इति तदर्थः उक्त इत्यदोषः । निजे पक्षे व्याप्त्यादिकं आचार्यधूमानुमानयोः साधारणमिति कथं अतुलत्वलाभः इत्यतः तद्द्योतकं स्पष्टयन् तेनातुलत्वलाभं च दर्शयति **अत्र न वै नैवेति उभयत्रेति । व्याप्तिरेवेत्यादिरिति** । व्याप्तिरेव वक्ष्यमाणरीत्या सर्वस्मिन् स्वीये पक्षे स्थितिः एवं निष्ठेवेति यावत् । न तु अनादरः । सपक्षे स्थितिरेव । न तु तत्रानभिनिवेशः । विपक्षात् व्यावृत्तिरेव न तु तत्र कदाचित् अभिमतिः । बाधितविषये यत्नाभाव एव । न तु कदापि तत्र क्षेहः । प्रतिपक्षयुक्तिः नास्त्येव न तु कदापि विरोधिमते योग इति सूच्यत इत्यर्थः । किं तत् सूचनेनेत्यतो धूमाद्यनुमानतुल्यत्वशङ्कानिरासायोक्तस्यातुलत्वस्योपपादनं तेन सिध्यतीत्याह **तेन धूमस्येत्यादिना** । **व्याप्तिरेवेत्यादिरित्यत्र निजेन महसैवेत्यपि विवक्षितमिति स्वभावसामर्थ्येनैव न तु तपःप्रभावेन इत्यप्यर्थो ज्ञेयः** । गुरवस्तु प्रतिपक्षयोगाभावे हेतुरतुलमिति । तुल्यबलं प्रति प्रमाणस्यैव प्रतिपक्षत्वादिति भावः । अत एव शुद्धमिति योजनेति वदन्ति । व्यवहितत्वात् अन्वयप्रदर्शनपूर्वकं व्याप्तिपदार्थं स्पष्टयति **अत्र निजे पक्ष इति** । निजे पक्षे इत्यस्य स्वीये पक्षे इति व्याख्यानं व्याप्तिरित्यस्य व्याप्त्या सत्त्वं अर्थो भवति इत्यतः सर्वस्मिन् स्थितिरिति व्याख्यानमिति विवेकः । प्रसिद्धानुमाने तु निजे पक्षे स्वसाध्यविशिष्टे धर्मिणि निजेन महसा व्याप्त्याख्यसामर्थ्येन तद्विशिष्टस्थितिः यावत् । **व्याप्तिः व्याप्त्या वर्तमानत्वम् । अन्यथा भागासिद्ध्यापत्तेरिति योज्यम्** । यत्तु अन्यथाख्यातौ । वर्णान्तरे दूषणमस्ति । अत्राले० ॥ ३ ॥

स०ब्र०— आनन्दतीर्थपक्षे— **निजे पक्षे सूत्रकारसिद्धान्ते, व्याप्तिः अशेषस्य तस्यार्थीकारः; निजेन महसा स्वसामर्थ्येन, न तु तपःप्रभावाद्यागादितवरादिनेत्यर्थः । सपक्षे तत्सजातीये वैशेषिकादि सिद्धान्ते, स्थितिः** तदेकदेशस्वीकारः, भेदसत्यत्वादिस्वीकारात् । **विपक्षतो व्यावृत्तिः** विरुद्धप्रमेयानङ्गीकारः । **सक्तिः** आग्रहनिराग्रह इति यावत् । **प्रतिपक्षयुक्तिः** प्रतिवादियोगः । अनुमाने सर्वत्र कथञ्चित् प्रतिपक्षयोगः संभावितः 'उपाधिप्रतिरोधौ तु क्व नामातीव दुर्वचौ' इत्युक्तेः; अन्य तु सर्वथा प्रतिपक्षयोगसंभावनापि नास्तीत्यभिप्रायेण नैवेत्युक्तम् । अत एवातुलमित्याहेति योजना ॥ यद्वा क्वचित्पक्षरूपोपपन्नस्यापि धूमाद्यनुमानस्य ह्रदादित्यत्रान्ते पक्षरूपोपपन्नत्वाभावात् तद्वैलक्षण्यप्रतिपादनाय सक्तिर्न वै इति नैवास्तीति चोक्तम् । तथाच व्याप्तिरित्यादावपि तदनुवृत्त्या-तुलत्वोपपादकत्वं द्रष्टव्यम् ।

अनुमानपक्षे तु— **निजेन महसा व्याप्त्याख्यसामर्थ्येन, निजे पक्षे स्वसाध्यधर्मविशिष्टे धर्मिणि, व्याप्तिः व्याप्त्या वर्तनम् । अन्यथा भागासिद्ध्यापत्तेरिति योज्यम् । शिष्टं स्पष्टम् । शुद्धं पक्षरूपोपपन्नम् ॥ ३ ॥**

कुण्ड०— भाष्यकारं श्रीमदानन्दतीर्थभगवत्पादं तत्त्वनिर्णायकत्वप्रयोजकधर्मवत्तया प्रार्थयते **व्याप्तिरिति** । **यस्यानन्दतीर्थमुनेः निजेन महसा निजेन नित्येन अविनाशिनेति यावत् । महसा ज्ञानेन वृत्तिरूपेण व्याप्तिः । नियतसंबन्धः निज आत्मीयनित्ययोः निजौ स्वीयावविनाशिनौ । महस्तूत्सवतेजसोः । एवं प्रलयकालेऽपि प्रतिघातकरावरः । अतिरोहितविज्ञानाद्वायुरप्यमृतः स्मृतः मुख्यवायुर्नित्यसम इत्यादेः । यस्येत्युत्तरत्रान्वेति । पक्षे व्याप्तिस्यासिततया परिगृहीते ब्रह्ममीमांसाशास्त्रे निजेन महसा शब्दतोऽर्थतश्चाशेषविशेषविषयीकरणलक्षण-**

व्यापनरूपा स्थितिः । सर्ववेदेषु ये चोक्ता गुणा विष्णोः सुमङ्गलाः । तानेव भगवान् ब्रह्मा वेत्ति लक्ष्मीस्ततोऽधिकानित्यादेः । पक्षपरिग्रह इति धातोः निष्पन्नः पक्षशब्दः परिगृहीतस्य वक्ता सपक्षे च भारतादौ तत्त्वनिर्णयहेतुभूतसदागमे उक्तरूपा स्थितिः । सपक्ष इत्यत्र समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु इत्यत्र काशिकायां समानस्येति योगविभाग इष्टसिद्ध्यर्थः क्रियते तेन सपक्ष इत्यादि सिध्यतीति प्रतिपादितत्वात् समानः पक्ष इति स्थिते समानशब्दस्य स भावः । सर्वैरपि भारतादिसदागमस्य प्रतिपादितप्रमाणतया परिगृहीतत्वात् सपक्षत्वम् । निजेन महसेत्यत्र भगवतो भाष्यकारस्य वृत्तिरूपज्ञानस्यापि नाशाभावरूपमहिमसूचनाय निजेतिपदम् । प्रसिद्धानुमाने तु स्वकीयत्वबाचिना निजपदेन स्वकारणत्वादिविशिष्टार्थस्य प्रतिपादनात् व्याप्तिग्राहकतर्कसूचनार्थमिति द्रष्टव्यम् । विपक्षतो वैदिकैरप्रमाणत्वेनापरिगृहीतपाषण्डाद्यागमात् व्यावृत्तिः । अप्रमाणतया परित्यागः । बाधितविषये सक्तिः दुष्टे प्रमाणबाधिते वा विषये मनसः सङ्गो न वै । नास्त्येव । वै इत्यनेन "न भारती मेऽङ्ग मृषोपलक्ष्यते न कर्हिचिन्मे मनसो मृषा गतिः । न मे हृषीकाणि पतन्त्यसत्पथे यन्मे हृदौत्कण्ठ्यवता धृतो हरिः" इति भागवतवचनं सूचयति । प्रतिपक्षयुक्तिः अज्ञानमिथ्यामत्यादिनियामककल्याद्यसुरसंबन्धः नास्त्येव । इदं च "मुख्यवायौ यदा देवाः शरीरस्थे च सूर्यगे । विष्णुमुद्गीथनामानं तदा तं च विदध्वसुः । यदा विदध्वसुः प्राणं विध्वस्तास्ते तदासुराः । आखणाश्मानमेवाप्य लोष्टो विध्वंसते यथा । प्रतिमां प्रेयसीं प्राप्य विष्णोः प्रीणन् तथा सुराः ॥" इत्यादि छान्दोग्यभाष्योदाहृतवचननिचयात्सिद्धम् । प्रसिद्धे अन्वयव्यतिरेकिणि धूमानुमाने व्याप्त्यादिकं स्पष्टमवगम्यते । तथाहि । यस्य धूमवत्वहेतोः निजेन स्वकारणतया स्वीयेन महसा वह्निना व्याप्तिः । अव्यभिचरितसामानाधिकरण्यं पक्षधर्मत्वादिपञ्चरूपोपपन्नत्वं च प्रसिद्धमेव । अत एव स धूमवत्वहेतुरतुलं शुद्धं प्रमाणमिव प्रमाणं मे तत्त्वनिर्णयाय भूयात् । शुद्धं प्रमाणं यथा तत्त्वनिर्णयाय भवति तथा तत्त्वनिर्णायकत्वोपयुक्तगुणसंपन्नः भगवान् भाष्यकारः मे तत्त्वनिर्णयाय भवत्वित्यर्थः । अत एवानन्दतीर्थमुनेः केवलप्रमाणत्वं वा अनुप्रमाणत्वं वा । नाद्यः प्रमितिरूपकेवलप्रमाणात्मकस्य तस्यास्मदीयतत्त्वहेतुत्वाभावात् । अनुमानाङ्गव्याप्त्याद्युक्त्ययोगाच्च । न द्वितीयः । अक्षाद्यनात्मकस्य तस्यानुप्रमाणत्वायोगात् । तस्यानुमानत्वे पक्षसाध्यसपक्षादेः दुर्निरूपत्वाच्चेति निरस्तम् । उक्तरीत्या प्रमाणस्यैव तत्त्वनिर्णायकत्वस्यैवात्राभिमतत्वात् । अत्र पक्षशब्दस्य । पक्षः सहायगरुदन्तिकसाध्यभित्तिमित्रेषु चुल्लीविवरे नृपकुक्षरे इत्यभिधानात् साध्याद्यर्थकत्वस्यापि संभवेन निजपक्षे "अशेषगुणपूर्णत्वं सर्वदोषसमुज्झितिः । विष्णोरन्यच्च तत्तन्त्रमिति सम्यग्विनिर्णयः । स्वतन्त्रत्वं सदा तस्य तस्य भेदस्य सर्वतः ।" इत्यादिवचनबोधितसिद्धान्तरूपे स्वीयसाध्ये निजेन महसा व्याप्तिः । तथा पक्षशब्दिते परममित्रभूते श्रीनारायणे निजेन महसा यथोचितं व्याप्तिरित्यप्यर्थोऽनुसन्धेयः । तेजोवाची महःशब्दः प्रकाशार्थोऽपि भवतीति महःशब्दस्य ज्ञानार्थत्वमुचितमेव । निजेन महसा स्वरूपसामर्थ्येन व्याप्तिः । निष्ठा इत्यप्याहुः । सुधाकृतः तत्त्वनिर्णायकभाष्यकारप्रार्थनमपि श्रुत्याद्यनुगृहीतम् । भक्त्यादिना प्रसन्नस्य गुरोः अर्थप्रकाशकत्वस्य 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ आचार्यवान्पुरुषो वेदे'त्यादिश्रुत्या प्रतिपादितत्वात् । अत एवात्र श्लोके अनुमानप्रमाणसाधारणव्याप्त्यादिपदप्रयोगमात्रसाम्येन भाष्यकारस्यानुमानप्रमाणत्वव्युत्पादनप्रयासोऽपि न कर्तव्यः । उक्तरीत्यैव तदुपपत्तेः । अत एवात्र श्लोके श्लेषलुप्तोपमयोरङ्गाङ्गिभावेन सङ्करः ॥

विद्व०— निर्णायकग्रन्थमारभमाणो निर्णयकरणयुक्तिरूपप्रमाणसादृश्यं वदन् निर्णयाय प्रार्थयते **व्याप्तिरिति** । अत्र पक्षशब्देन निर्णेतव्यत्वेन प्रकृतत्वाद्वेदाः गृह्यन्ते । निज इत्यनेन परेषां अपव्याख्याकर्तृत्वेन तदीयत्वं व्यावर्तयति । तत्र व्याप्तिर्नाम पाठोऽर्थज्ञानं प्रतिपादनसामर्थ्यं वाऽनन्तवेदानामपि । **निजेन महसा** स्वप्रतिभयैव । सपक्षशब्देन भगवत्परतया निर्णीताः पञ्चरात्राद्याः गृह्यन्ते । स्थितिशब्दार्थः पूर्ववदनुत्पन्न-ग्रन्थपाठाभावेन व्याप्तिरिति नोक्तम् । विपक्षशब्देन शैवाद्यागमाः । बाधिते विषये सक्तिर्नास्ति विष्णुसर्वोत्तमत्व-स्याबाधितत्वात् । वै इत्यनेनाचार्याणां अदृष्टबुद्धित्वं श्रुत्यादिसिद्धमिति सूचयति । प्रतिपक्षयुक्तिः प्रतिवादियोगः नैवास्ति । एवेति सर्वात्मना प्रतिपक्षाभावं सूचयति । अत एवातुलम् । अथवा व्याप्तिरित्यादौ सर्वत्रैवशब्दः संबध्यते । तेन भागासिद्ध्यादिशङ्काकलङ्करहितमिति लभ्यते । अत एवातुलं शुद्धं च । प्रमाणं परतत्वादिप्रमां प्रति कारणम् । इत्थं तदुपास्तावेव प्रसादात्तत्त्वनिर्णयो भवति ।

रस०— अधुना न केवलं व्यासरूपी वासुदेव एव स्वदासानां वेदवाक्यैर्मिथ्याज्ञानादिपरिहारेण मनसा श्रीहरितत्त्वप्रकाशकः किन्तु तद्दासोत्तमः सर्ववेदमुख्याभिमानी प्राणनायकोऽपि । ततो वेदविचारपरैर्मुमुक्षुभि-रवश्यमुपास्य इत्येतमर्थं पाशुपतादिपरित्यागेन वेदजन्यज्ञानस्य प्रार्थनीयत्वे ततो विशेषं च सूचयन् गुरुं श्रीमदानन्दतीर्थं परमपुरुषार्थमर्थयते **व्याप्तिरिति** । यस्य व्याप्त्यादि यच्चातुलं शुद्धं प्रमाणं स आनन्दतीर्थस्तत्त्व-विनिर्णयाय भूयादिति योजना । यस्य वेदरूपप्रमाणस्य पक्षे साध्ये वस्तुतः सकलगुणपूर्णत्वनिर्दोषत्वादिना स्वज्ञापनीये हरौ व्याप्तिर्व्यापनं महातात्पर्यम् । अशेषतोऽपि वाक्यैस्तत्प्रतिपादकत्वं वाऽस्ति । किं मायिवल्लक्षणया नेत्याह । निजेन महसा औत्पत्तिकेन सामर्थ्येन शक्त्येति । औत्पत्तिकस्तुशब्दस्यार्थेन संबन्ध इति जैमिन्युक्तेः । तर्हि धर्मादिर्दत्तजलाञ्जलिता यदि तत्प्रतिपादकत्वमपि तदा साम्यप्रसक्तिरित्यत उक्तं सपक्षे धर्मादौ स्थितिरवान्तरं तत्परत्वमेकदेशतस्तत्प्रतिपादकत्वं वा न पुनर्व्याप्तिरिति । किं लक्षणया नेत्याह **निजेन महसेति** । तथात्वे-ऽनेकार्थत्वप्रसङ्ग इति चेत् । स्यादयं प्रसङ्गो यदि द्वयोरपि साम्येन प्रतिपाद्यत्वमुररीकुर्मः । न चैवम् । किं नाम हरेः परममुख्यया वृत्त्या अन्यस्य तु मुख्यया । अतः क्वातिप्रसङ्गावकाश इत्याशयेनोक्तं निजे परममुख्ये पक्ष इति । समानेऽनुकूले श्रीहरिप्रतिपत्तिसाधनभूते पक्षे साध्ये स्वविषय इति च । सकलगुणपूर्णत्वनिर्दोषत्वादिमद् भगवदावेदको वेद इत्ययुक्तम् । जनितोत विष्णोरित्यादौ जन्मादिदोषप्रतिपादनादित्यत उक्तं विपक्षतउक्तपक्ष-शब्दार्थविरुद्धात्सदोषाद्वस्तुनो व्यावृत्तिरसंबन्धस्तत्प्रतिपादकत्वाभाव इति । तत्कुत इत्यतो यच्च प्रमाणमिति हेतुगर्भं विशेषणम् । यतो जनितोत विष्णोरित्यादि वेदभागोऽप्युक्तविधवस्तुप्रमाया एव करणमत इति । अन्यथैव प्रतीत्या कथमेतदित्यतस्तत्प्रतीतेरपरामर्शपूर्वकत्वात् । अन्यथा गुणाः श्रुता इति श्रुत्यैव सर्वत्रापि वेदे गुणा एव प्रतिपाद्यन्ते दोषप्रतीतिस्त्वज्ञानादिनिबन्धनेति सर्वश्रुतीनां व्याख्यातत्वे न तद्विरोधो महातात्पर्यविरोधश्चेति चशब्देन सूचयति । वेदे स्वविरोधाभावादि धर्मसमुच्चायकोऽथशब्दः । विपक्षशब्दः स्वविरोधद्योतकः । नन्वीदृशपरतत्वप्रतिपादकत्वे वेदस्य स्वविरोधाभावेऽपि प्रमाणान्तरविरोधः स्यादेवेति चेत् । कोऽभिप्रायः । किं प्रबलप्रमाणविरोधः स्यादिति किं वा समबलप्रमाणविरोधः । हीनबलस्य प्रबलविरोधेन स्वयमुत्थानशून्यस्य शङ्कितुमशक्यत्वात् । आद्यस्तावन्न

संभवतीत्याह । बाधिते विषये सत्तिः संबन्धः प्रमाणान्तरबाधितार्थप्रतिपादकत्वं नेति । प्रमाणबाधो नेति यावत् । प्रमाणबाधप्रकारप्रदर्शनाय तथोक्तिः । यद्वक्ष्यति । अयाथार्थ्यस्य विषयविपर्यासानतिरेकादिति । अत्र प्रबलप्रमाणविरोधसूचनाय बाधितपदप्रयोगः कुत इत्यतः यच्च शुद्धं निर्दोषमिति हेतुगर्भं विशेषणम् । स दोषमेव हि बाध्यते । न पुनर्निर्दोषमन्यथातिप्रसङ्गादिति । निर्दोषत्वहेतुभूतमपौरुषेयत्वरूपं नित्यत्वं च वाचा विरूप नित्ययेत्यादौ प्रसिद्धमिति वैशब्देनाचष्टे । द्वितीयोऽप्ययुक्त इत्याह प्रतिपक्षयुक्तिर्नास्तीति । कुत इत्यतो यच्चातुलमसदृशमिति । कथमित्यतः समबलं विरोधिप्रमाणं किमागमः किं वाऽनुमानमुत प्रत्यक्षम् । आद्येऽप्यपौरुषेयस्तदन्यो वा । नाद्यस्तदभावात् । उर्वरिते पक्षत्रयेऽपि किं तेषां वेदोपजीवकत्वमस्ति न वा । आद्ये कथं विरोधः । विरोधे वा तेषामेवाप्रामाण्यं कथं न भवेत् । द्वितीये तेषां तत्र प्रवेशायोगेन प्रतिपक्षत्वासंभव इति सर्वथाऽपि न प्रतिपक्षसंभव इत्याशयेनोक्तम् एवेति । न प्रतिपक्षो नाम वस्तुतोऽस्ति । तथा सति वस्तुविकल्पापातात् । किन्तु विशेषानिर्धारणायामेव । तन्निर्धारणायां तु प्रबलेन दुर्बलस्य बाध एवेत्याशयेनोक्तम् । युक्तिर्योगः संभवच्छङ्कामात्रमिति यावदिति । यच्चातुलमनुपमसदृशं मुख्यं प्रमाणमित्यावृत्त्या योज्यम् । वेदप्रामाण्यमुख्यत्वं च करणेष्विति बोध्यम् । स तदभिमानी । कृत्स्नो ह्येष आत्मा यद्बृहतीत्यादिवदभिमानित्वप्रदर्शनायैवाभेदोक्तिः । आदरनैरन्तर्याभ्यां श्रीगुरुचरणारविन्दध्यानादिमत्त्वरूपशिष्यलक्षणस्यास्मिन्मुख्यतया सत्त्वेन तदीयपरमानुग्रहपात्रतयैतदुपासनया अमात्यसेवया राज्ञ इव श्रीवेदव्यासस्यापि प्रीतिः स्यादतोऽप्येतदुपासनमत्यादरेण भाव्यमिति सूचयितुं दशप्रमत्यलवबोधादिपदं विहायानन्दतीर्थ आनन्दरूप श्रीवेदव्यास एव तीर्थं गुर्ल्यस्य ध्यानादिगोचरतया स इत्युक्तम् । तीर्थमन्त्राद्युपाध्यायशास्त्रेष्वंभसि पावने इत्यभिधानम् । यथाहुः । 'नन्दितीर्थोल्लसन्नामिनो नन्दिनः सन्दधानाः सदानन्द देवे मतिम् । मन्दहासारुणापाङ्गदत्तोन्नतिमि'ति । न मीमांसकादिवद्वेदतो धर्मादिज्ञानं प्राध्यते । किन्तु विशिष्टो निश्चयः । विशिष्टता च मोक्षान्तरङ्गसाधनता । सा च आध्यात्मिकविवक्षिततत्त्वनिर्णयस्यैव । यद्वक्ष्यति । तस्य सन्निहितत्वत इति । अतः स एवास्मत्प्रार्थनीय इत्याशयेनोक्तं वीति । अनेन पाशुपतादिजन्यज्ञानस्य परित्यागे हेतुः सूचितः । तस्य वेदविरोधिनो वेदोक्तविशिष्टपुरुषार्थहेतुत्वाभावादिति । नन्वस्य सर्वं गुरुकृपालब्धमस्तु तथाप्येतल्लब्धैश्वर्यवान् कोपि न दृष्टः । अतः कथमेतत्प्रार्थनेत्यत उक्तं भगवान् दातृतयेति । सर्वप्रकारेणोत्साहकरणेऽपि ये ज्ञानयोग्यास्त एव ज्ञानं प्राप्नुवन्ति नान्ये । अतस्तव योग्यताभावे कथं प्रार्थनयापि तत्प्राप्तिः स्यादित्यतो मे ज्ञानयोग्यस्येत्युक्तम् । ज्ञानयोग्यस्यापि तवेदानीं ज्ञानप्रतिबन्धकसत्त्वात्कथं प्रार्थितोऽप्यसौ प्रार्थितं दद्यात् इत्यतोऽभिनत्कर्ता न ओदनं पच्यमानं परो गिरेत्यादिसिद्धकर्मविशेषपरिपाककालसाक्षात्करणपूर्वकतन्नाशादिसामर्थ्यविशिष्टगुरुकृपालब्धं तदस्याप्यस्त्यतोऽनवरतं प्रार्थितस्तादृशकालविशेषं साक्षात्कृत्य निर्णयनिरोधं न्यक्कृत्य निर्णेयं ददाति । किं तत्र प्रतिबन्धकचिन्तयाऽस्माकमित्याशयेनोक्तं मुनिः तत्तत्कालकर्तव्यकार्यविशेषनिर्णयवानिति । यथोक्तम् । वेत्ता वेद्यस्य सर्वस्य मुनिः सद्भिरुदाहृत इति ॥

उक्तविधोपासनसाधनं ज्ञानं वेदादिनेति तन्मुख्याभिमानितया मुख्यावतारश्रीमदानन्दतीर्थगुरुचरणोपासनाकार्यैत्युक्तमिदानीं न साक्षाद्वेदजातं वृत्तिज्ञानमीदृशोपासनायालं किन्तु साक्षिरूपज्ञानोपोद्बलम् । न मुखेनैव अत उक्तविधोपासना साक्षात्साधनसाक्षिरूपज्ञानाभिव्यक्त्यै तदभिमानित्वेनापि तदुपासनं कार्यमिति सूचयन्

तत्रादरजननाय तत्स्वरूपं निरूपयंस्तदभिमानिनं मारुतावतारं प्रत्यभिमतमर्थमाशास्ते व्याप्तिरिति। पूर्ववदेव योजना। यस्य मुक्तियोग्यजनसंबन्धिचैतन्यापरपर्यायसाक्षिरूपप्रमाणस्य पक्षे मित्रे हरौ व्याप्तिः सर्वेभ्योऽतिशयेन वृत्तिः। स्वात्मात्मीयसमस्तवस्तुभ्योऽतिशयेन प्रेष्टतया विषयीकरणमिति यावत्। पक्षः सहायगरुदन्तिकराध्यर्धाभित्तिमित्रेषु चुलिविवरे नृपकुञ्जरे चेत्यभिधानात्। सा किमौपाधिकी नेत्याह। निजेन महसा स्वाभाविकेनैव सामर्थ्येनेति। भक्तिज्ञानादिरूपस्य जीवस्य तथा तद्विषयीकारित्वं स्वभाव एवेति सिद्धमेवेति। तर्हि तद्दासेषु द्वेष औदासीन्यं वा स्यादिति तत्राह। सपक्षे दासवर्गे वृत्तिरिति। किमन्नदानादिनिबन्धना नेत्याह निजेन महसेति। तत्रापि यदि तादृश्येव वृत्तिस्तर्ह्युभयोरपि साम्यापात इत्यत उक्तं स्थितिर्निवृत्तिरेव न तु पूर्ववद्व्याप्तिः। तर्हि वैषम्यापत्तिरिति चेत्। स्यादियमापत्तिर्यदि तत्तत्सिद्धयतिक्रमेण वृत्तिः स्यात्। न चैवम्। किं नाम परममित्रभूते हरौ व्याप्तिस्तदासतया तदनुग्रहक्रमानुसारेण मित्रभूतेऽन्यत्र वृत्तिमात्रमतः क्वापत्तेरवसर इत्यभिप्रायेणोक्तं निजे परममुख्ये पक्ष इति। समानतया श्रीहार्दमनुकूलतया पक्षे इति च। हरिदासवर्गादन्यत्रापीदृशवृत्तौ साम्यापत्तिः प्रकारान्तरेण वृत्तौ तु वैषम्यापत्तिरित्युभयथाऽपि विपत्तिरित्यत उक्तं विपक्षतः उक्तपक्षशब्दार्थविरोधिभूतात्तत एव तदीयद्वेषादिविषयाद्भूतवर्गाद्व्यावृत्तिरुक्तविधवृत्त्यभाव इति। चशब्दो विपक्षतो व्यावृत्तिरित्यस्य शृण्वे वीर उग्रमुग्रमित्यादि श्रुतिप्रसिद्धद्योतकः। इदमुदितं भवति। दाससमूहादन्ये द्विविधाः। दानवमानवभेदात्। तत्राद्या द्वेषिणोऽन्त्या औदासीन्योपेताः। औदासीन्यं चोक्तस्य नीचसाम्येनार्चनादिकमपि नत्वनर्चनमेवेति नियमः। उभयेऽपि हि हरिविरोधिन एव। परममित्रद्वेषौदासीन्ययोरुभयोरपि विरोधशब्दार्थत्वेन प्रसिद्धत्वात्। तत्र प्रथमेषु द्वेषो द्वितीयेष्वौदासीन्यमिति प्रकारान्तरेण वृत्तेः स्वीकारात्। न च वैषम्यापातः। यथाग्न्यित्यनतिक्रमात्। हरिद्वेष्यत्वादेः श्रुत्यादिसिद्धत्वात्। एतदभिप्रायेणैव द्वेष इति वा औदासीन्यमिति वाऽनुक्त्वा व्यावृत्तिरित्युक्तमिति। वस्तुतस्तु स्निग्धा एव श्रीहरिद्वेषविषयादिषु प्रीतिप्रदर्शनं हरेर्नः शिक्षयेदिति मयादिनिमित्तेनैव तथा दर्शयन्तीति शङ्का मा भूदित्याह निजेनैव महसेति। हेये रागवतः कथमन्यत्रोक्तविधः स्नेहो घटत इत्यत आह बाधिते हेये गेहादौ विषये सक्तिर्नेति। साक्षिणि धर्मसमुदायकोऽथशब्दः। सक्त्यभावोऽपीति। अन्यत्र स्नेहाभावोऽपि किं नैमित्तिको नेत्याह निजेनैव महसेति। ननु लोके कस्मिंश्चिद्राजादौ दृढतरसहजस्नेहवतामपि बलवन्निमित्तसन्निवेशेन तत्पुत्रीपादिकारिणामनर्थप्राप्तिदर्शनाद्धरौ तद्दासेषु स्निग्धानामपि प्रबलनिमित्तवशेन तदीयद्वेषादिसंपत्त्यानर्थप्राप्तौ कस्तेषां विशेषो विरोधिभ्य इत्यत आह निजेन महसा प्रतिपक्षाणां मोक्षविरोधिनां तद्विरोधिकार्यकरणादीनां युक्तियोगो नास्तीति। स्वाभाविकानां तेषामसत्त्वेऽपि निमित्तान्तरवशेन किं न स्युरिति शङ्कापि नास्तीत्याह एवेति। अयमाशयः। स्वरूपानुबन्धिनोऽनिष्टाचरणादयः सर्वथा मुक्तियोग्यानां न सन्त्येव। ये च प्रारब्धवशाच्छापादिनिमित्तेन भवविशेषैर्दृश्यन्ते तेऽप्याविष्टा सुरकृता एव ततस्तेषामेव फलदा अत एव प्रतिपक्षो नास्त्येवेत्येव वक्तव्ये निमित्तवशात्तदीयतया दृश्यमानानां तेषां गतिं वक्तुं युक्तिः संबन्धः फलजनकत्वरूप इत्युक्तमिति। एतादृशं प्रमाणं साक्ष्यवेति सूचनाय 'शुद्धमतुलं प्रमाणमिति', 'शुद्धं संसारगेष्वपि। निर्दोषत्वातिनियमात्तद्विलिष्टतमं मतमि'त्यादि प्रसिद्धयोः निर्दोषतातिनियमादृशत्वयोः सङ्कीर्तनम्। स तदभिमानी। अभेदव्यपदेशगतिः प्राग्वत्। प्रार्थितो हरिरपि न साक्षाज्ज्ञानादि यच्छति किन्तु स्वरूपेन्द्रियाभिमानि प्राणद्वारेणातोऽप्येतदुपासनमावश्यकमित्यभिप्रायेणोक्तमानन्दतीर्थ इति। प्राग्वन्दनार्थः। वन्दनस्य अन्यवृत्तिमात्रस्योक्तविधो-

पासनोपयोगित्वाभावेन तादृशव्यसनेतरभाविनः साक्षिरूपस्य वस्तुतथात्वाश्वासरूपस्य निर्णयस्येव तद्भावेन स एवात्र प्रार्थनीय इत्याशयेनोक्तं निर्णयायेति। अत एव टीकाकृत्स्वयमेव न स्तम्भोऽयमित्याद्येकाकारप्रतिनियमं साम्यमिह निर्णयादिशब्देनाभिधीयते। अपि तर्हि तदनन्तरभावी वस्तु तथात्वाश्वास इत्यादिना निर्णयपदार्थं प्रकटीकुरुते। वीत्यस्य भगवान्मुनिरित्येतयोश्च स्वारस्यं पूर्ववदेव बोध्यमिति॥

उपासना हि द्विविधा सच्छास्त्राभ्यासरूपा ध्यानरूपा चेति। तत्र प्रथमोपासनाधिकारिभिः स्वापेक्षित-पुरुषार्थानुसारिधर्मवत्तया प्राणनायकस्य प्रार्थना कार्येति शिष्यान् शिक्षयति व्याप्तिरिति। यस्यानन्दतीर्थस्य निजे पक्षे विष्ण्वशेषगुणपूर्त्यादौ परसत्सिद्धान्ते निजेन महसा स्वयोग्येन स्वाभाविकेन च ज्ञानरूपसामर्थ्येन व्याप्तिः। सर्वाधिकारिभ्यो विशेषेणाप्तिः प्राप्तिर्विषयीकरणं निष्ठा च। सपक्षे रमागुणपूर्त्यादिरूपे ब्रह्मादितारतम्यादिरूपे चापरसत्सिद्धान्ते यथाक्रमं निजेन स्वयोग्येन स्वाभाविकेन च महसा ज्ञानेन स्थितिर्वृत्तिर्विषयीकरणं निष्ठा च, विपक्षत एतद्विरोधिपक्षाद्व्यावृत्तिस्तादृशज्ञाननिष्ठयोरभाव इति यावत्। एतज्ज्ञानविषयीभूतमेतदविद्यमानमेव किं न स्यात्ततश्चैतद्विषयकनिर्णयप्रार्थनाऽयुक्तैवेत्यत आह॥ बाधिते विषये सत्तिर्ज्ञानद्वारा संबन्धो नास्ति। ज्ञानस्य बाधितार्थकत्वं दोषवशादेव कल्प्यमन्यथाऽतिप्रसङ्गात्। न चात्र दोषावकाशोऽस्ति। ऋजुत्वव्याघातादिति वैशब्देनाचष्टे। नन्वेतद्विरोधिप्रमाणदर्शनं प्रतिबद्धमीदृशमेतद्ज्ञानं न निष्ठामासादयति। अतस्तादृशानामप्यशक्या निष्ठा कथमस्मदभ्यर्थनीया भवेदित्यत आह **प्रतिपक्षयुक्तिर्नास्तीति**। यतः कस्यचित्प्रमाणस्योक्तार्थप्रतिपादकत्वमेव यतश्चापातत उक्तार्थविरोधिनः प्रमाणस्य सावकाशत्वमेव निरवकाशस्य त्वेतद्विरोधेनाप्रामाण्यमेवातः केनापि प्रकारेण प्रतिपक्षो नास्तीत्येवकारेणाह। युक्तिशब्दस्वारस्यं प्रथमव्याख्यावत्। यश्च प्रमाणं प्रवर्तकः विप्राः प्रमाणमितिवत्। प्रवर्तकत्वमपि नान्यसाधारण्येन किन्तु मुख्यमेवेत्याशयेनातुलमित्युक्तम्। किं विप्रलम्भादिना प्रवर्तकत्वं नेत्याह **शुद्धं निर्दोषमिति**। कथं सत्सिद्धान्तप्रवर्तकत्वमित्यतो द्वेधास्तीत्याशयेनानन्दतीर्थशास्त्रं यस्मात्स इति मुनिरुप-देशक इति चाह। एतत्संभावनायाह **भगवानिति**। शास्त्राभ्यासोपयुक्तोक्तसिद्धान्तगोचरविशिष्टनिर्णयाभावे तदयोगेन स एव प्रार्थनीय इति भावेनाह **विनिर्णयायेति**। म इत्यस्यावतरणं मुनिपदस्य वृत्त्यन्तरं च प्राग्वदेव ध्येयम्। एवं प्रकारेण तस्योपास्यत्वं ततः प्रसन्नस्यैवंविधफलदातृत्वं चेत्येतत्कुत इत्यतः श्रुतिप्रसिद्धमित्याह **बाधित इति**। बाधिते वायौ अन्तद्वयं श्रुतिप्रसिद्धमिति। का सा श्रुतिरित्यतस्तत्सूचनाय बाध्य इत्यनुक्त्वा बाधित इत्याह। अनेनार्थत एकदेशानुवादेन कुविदङ्गेत्यादिकां समग्रामभिप्रैतीति॥

परापरतत्त्वसंशयविरुद्धपक्षहेयत्वाज्ञानविषयभागतदाकाङ्क्षारूपदोषलेशवतामपि द्वितीयोपासनाधिकारो न सिध्यत्यतस्तद्दोषदूरीकरणाय तदनुकूलगुणोपसंहारेण करुणानायकस्तवनमेवानुपवनमादरेण द्वितीयोपासनाधि-कारिभिः करणीयमिति स्वानुग्राह्यान्ग्राहयति व्याप्तिरिति। यस्य निजे पक्षे मुख्ये साध्ये श्रीहरौ निजेन महसा स्वीयेन स्वयोग्येन ज्ञानाख्यसामर्थ्येन व्याप्तिर्व्याप्यविषयीकरणान्निश्चय इति यावत्। सपक्षे पक्षानुकूलेऽपरतत्त्वे स्थितिस्तथा तथ्येन निर्णय इति निष्कर्षः। विपक्षतो विरुद्धपक्षतो व्यावृत्तिस्तद्धेयत्वज्ञानमिति निष्कर्षः। बाधिते विषयसक्तिर्भोगो न च। अथशब्द उपासनासाधनसमुच्चये। हेयभोगाभावस्य न मे हृषीकाणि पतन्त्यसत्यथ इत्यादिप्रसिद्धिं वैशब्देन

सूचयति । प्रतिपक्षाणां मोक्षविरोधिनां मनसाप्यन्यकामानां युक्तिर्योगो नास्ति । यदा खलु यदनुग्रहपात्राणां सतां न किमप्याकांक्ष्यमस्तीति 'मतोऽप्यनन्तात्परतः परस्मात्स्वर्गापवर्गाधिपतेर्न किञ्चित् । येषां किमु स्यादितरेण तेषामकिञ्चनानां मयि भक्तिभाजामि'त्यादिप्रमाणप्रसिद्धं तदा किमु वाच्यं तस्येत्याशयेनोक्तमेवेति । स्वयं श्रीहर्यनुग्रहविशेषसंपत्तये एतादृशगुणवान्भूत्वान्यानपि स्वभक्तांस्तथैव प्रवर्तयतीत्याशयेनोक्तं यच्च प्रमाणं प्रवर्तक इति । अत्र प्रमाणं हि भवान् परमेष्ठी यथात्मभूः । अपरे ह्यनुतिष्ठन्ति पूर्वेषां पूर्वजैः कृतमित्यादिवत् । तदपि नेतरसमकक्ष्यतयेत्याह अतुलमिति । किमन्यान् वक्षयितुमेवं कुरुत इत्यतो नेत्याह शुद्धमिति । स उक्तविधोपासनासाधनसंपत्तिपूर्वकोपासनासिद्धिसंपादनद्वारा तत्साक्षात्काराय भूयादिति योजना । उपासनासाधनजातस्य तत्त्वसाक्षात्कारस्य च दातृत्वसंभावनाय भगवानिति । उपासनासिद्धिसंपादनसंप्रतिपत्तये मुनिरिति । एतत्सर्वमस्य न स्वातन्त्र्येण किन्त्वनादितः श्रीहरिध्यानादिलब्धमिति सूचनाय आनन्दतीर्थ इति । प्रथमव्याख्यावद्वचाख्येयम् । अनेन 'माध्यं यदास्यांबुजात् आविर्भूतममन्दबोधभगवत्पादान् प्रपद्येऽथ तान्' इति स्वव्याख्येयमूलकर्तृतोपाधिना तत्प्रतिपत्तिः प्रार्थिता । न च तावता सर्वजनप्रतिपत्तिविषयता प्राप्तिः । तद्व्याख्यातृप्रतिपत्तिविषयत्वेऽपि तदन्यप्रतिपत्तिविषयत्वाभावात् । न च निर्निमित्तं प्रतिपत्तिर्युक्तेत्याशङ्क्याह सर्ववेदार्थज्ञानजनकत्वस्वरूपेन्द्रियप्रेरकत्वनत्तद्योग्यगुणदातृत्वप्रबलप्रतिबन्धनिवर्तकत्वरूपोपपादकप्रतिपादनमिषेणाविशेषेणमुख्यगुरुत्वोपपादनद्वारा निरसनेन तत्पदं विवृतं भवति । तदनेन वृत्तिज्ञानसाक्षिज्ञानसाधकगुणप्रदानविरोधिदोषनिग्रहनरूपान्याशक्यसाधकत्वप्रकाशकत्वेन साधकेशो नरोत्तम इति महाभारतनात्पर्यनिर्णयवाक्यं विवृतं भवतीति । अथवा केचित्प्रत्यक्षादिप्रमाणप्रमितमपि प्रमेयजातमेवापलपन्ति । अन्ये तु पुनः किञ्चिदभ्युपगच्छन्तोऽप्यव्यक्तादितत्त्वं नेच्छन्ति । एवमेव बह्वो बहुधान्यथा भाषन्ते । एवं प्रमाणस्वरूपेऽपि । प्रत्यक्षमेकमेव प्रमाणमिति प्रलपन्त्येके । अपरे द्वयमेवेत्यपरथा सर्पन्ति । तदुभयमपि नेति वदन्तो वाचालाः प्रमाणानि प्रपञ्चयन्तोऽपि प्रमितान्यवजानते । तदेवमाद्यनेकविधदुर्मतदूरीकरणेन प्राङ्मतप्रसाधकानां परीक्षकाणां यथार्थोभयस्वरूपनिर्णयोऽपेक्षितः स्ववशीकृतरमेशप्रमाणप्रमेयाधीशप्राणाधीशप्रसादाधीन इति तदर्थप्रसिद्धप्रमाणरूपोपमानाधिक्येन स्तुतिप्रकाशप्रकटनेन निजान्परीक्षकाननुगृह्णाति व्याप्तिरिति । व्यावृत्तिश्चेति चशब्दोऽवधारणार्थोऽनेनापि संबध्यते । न च इत्येतदत्राप्यनुकृष्यते । वैशब्दस्तुशब्दार्थः । सपक्षे स्थितिरित्यत्राकारप्रश्लेषेणापि पदं छेद्यम् । प्रत्यक्षप्रमाणे तावत् चक्षुरादौ निजे विषय एव निजेन महसा स्थितिर्ग्राहकत्वसामर्थ्यम् । न तु प्रत्यक्षप्रमाणत्वेन स्वसजातीयरसनादिविषये रसादौ । एवं तत्तन्मात्रविषयेऽनुमानादौ । एवं प्रमाणत्रयस्यापि स्वविषयग्राहकत्वनद्विरोध्यभावग्राहकत्वमप्यस्ति उभयोरेकप्रमाणग्राह्यत्वस्य सर्वपरीक्षकसंमतत्वात् । अस्य तु तद्विशेष्यमस्तीति श्लेषेण व्यनक्ति । यस्यानन्दतीर्थप्रमाणस्य व्याप्तिरसङ्कोचेन ग्राहकत्वमेव । सर्वग्राहकत्वात् । उपमानेऽपि सत्त्वे तदाधिक्यायोगात्तदसत्त्वमुपपादयन्नेवकारव्यावर्त्यं दर्शयति निजे पक्षे स्वविषये स्थितिर्ग्राहकतया । सपक्षे स्वसमानप्रमाणविषयेऽस्थितिरिति नत्विति । यद्यप्यस्यां योजनायां पक्षपदात्पूर्वमेव निजपदं निवेशनीयमन्वयसौकर्यात् । तथाऽप्यनुप्रासलाभाय निजेनेत्यत्र निक्षेपः । तथा विपक्षतो विरुद्धविषयाद्व्यावृत्तिरेव न तु स्थितिरिति । व्याप्तिरसङ्कोच एवेति कुतः प्रमाणान्तरवत्सङ्कोच एव किं न स्यादित्यत आह अतुलमिति । अथशब्दस्तस्मादित्यर्थोऽत्राप्यनुकृष्यते । यस्मादतुलं तस्मादिति । सति समाने प्रमाणे

कस्यचिद्विषयस्य तेनापहारात्सङ्कोचः कल्पनीयः। तदभावे तु निर्निमित्तसङ्कोचस्यानाशङ्कनीयत्वादसङ्कोच एव सिद्ध इति। कुत एतदित्यत आह **नैवेति**। वैशब्दोऽत्राप्यनुवर्तते। एवास्तीति तत्रापि। यतः प्रतिपक्षयुक्तिर्नैवास्तीति वै श्रुत्यादिप्रसिद्धमत इति। ननु तथापि विपक्षतो व्यावृत्तिरेव न तु वृत्तिरिति कुत इत्यत उक्तं शुद्धं निर्दोषमिति। हेयेऽपि विषये सक्तिर्हि रागादिदोषमूलैव। न च निर्दोषो दोषी किं न स्यादिति शङ्कापि युक्ता। ततः कारणाभावादेव कार्याभाव इति। सत्यमेतत्, सति प्रमाणे तदेव कथमित्यतोऽत्रापि तदर्शयति अथेति। यस्माद्बाधिते हेये विषये सक्तिर्नैवास्तीति प्रमाणप्रमितं तस्मादिति। यद्यपि नैवेत्ययेति च क्रमे एव प्रमाणप्रदर्शनं कार्यम्। तथाप्याचार्यस्य प्रतिपक्षयोगोक्त्यपेक्षया हेयसक्तिवचनमत्यन्तमवचमिति सूचयितुं क्रमोल्लङ्घनम्। अत एव प्रस्तुतत्वाद्बाधिते स्थितिरिति वा वृत्तिरिति वा वक्तव्ये सक्तिरित्याह तत्त्वयोः प्रमाणावप्रमेययोः प्रार्थ्यमानस्य निर्णयस्यायथार्थत्वे करिष्यमाणव्याख्यानस्य पूतिकूष्माण्डोपमत्वप्राप्तिरित्यत उक्तं **वीति**। विशिष्टत्वं च निर्दोषतापरपर्यायं याथार्थ्यमिति। अन्यद्यथायोगं प्राग्वत्। इति तृतीयपद्यव्याख्या॥

ल०२०— द्वितीयं गुरुत्वं श्रीमदानन्दतीर्थेऽस्तीति तं विशिष्टनिर्णयं प्रार्थयते **व्यासिरिति**। यस्येत्यस्तीति च सर्वत्रान्वेति। यस्यानन्दतीर्थस्य निजेन महसा स्वरूपसामर्थ्येन निजे पक्षे ब्रह्ममीमांसाशास्त्रे व्यासिर्व्याप्तनं तदर्थावबोधकबहुग्रन्थनिर्माणपूर्वकमशेषसूत्रार्थवर्णनमिति यावत्। सपक्षे समानार्थतया पक्षसमाने भारताद्यशेषनिर्णेयशास्त्रे स्थितिः तत्र तत्र विप्रतिपन्नवाक्येषु ब्रह्ममीमांसासास्त्रनिर्णीतार्थस्थापनमिति यावत्। विपक्षतो निर्णेयनिर्णायकविरोधिशास्त्रान्तरतो व्यावृत्तिस्तदभ्यासादावप्रवृत्तिः। 'दुःशास्त्रं तु परित्यजेदि'त्युक्तेः। अथ बाधिते विषये सक्तिर्न वै नैव अविद्यमानार्थप्रतिपादने कदापि न प्रवृत्तिरिति यावत्। न भारती मेऽङ्ग मृषोपलक्ष्यत इत्याद्युक्तेः। प्रतिपक्षयुक्तिर्विरोधिप्रमाणयोगः। स्वोक्तार्थे परोपन्यस्तप्रमाणविरोधो नैव। अत एवातुलमसदृशं शुद्धं प्रमाणं विशिष्टार्थप्रमाकरणं स आनन्दतीर्थो विशिष्टनिर्णयजननेनानन्दकरं तीर्थं शास्त्रं यस्मात्स तथा तन्नामा मुनिः तत्त्वविनिर्णयाय भगवदादिस्वरूपविशिष्टविनिर्णयाय भूयादिति योजना। उक्तसर्वार्थसंभावनायोक्तं **भगवानिति**।

'तत्र तत्र स्थितो विष्णुस्तत्तच्छक्तिप्रबोधकः। दूरतोऽप्यतिशक्तः स लीलया केवलं प्रभुः', 'तत्र तत्र स्थितो विष्णुस्तत्तच्छक्तीः प्रबोधयन्। एक एव महाशक्तिः कुरुते सर्वमञ्जसे'त्याद्युक्तेः। श्रीहरिरेतेनैव तत्रापि वैकुण्ठादिदूरस्थानस्थितेनैव रूपेण सर्वत्र सर्वकार्यकरणसमर्थोऽपि केवलं लीलयैवैकेन जीवस्थितेन हरिनामकेन रूपेण मोक्षसाधनापरोक्षज्ञानविषयो भवति। अपरेण बहिःस्थितेन व्यासादिनाम्ना रूपेण ज्ञानसाधनसच्छास्त्राणि करोति। अन्येन तु तत्तच्चित्तगतेन चित्तगतवासुदेवाख्यरूपेण श्रवणादिसाधनान्यनुष्ठापयित्वा परापरतत्त्वविषयकपरोक्षापरोक्षज्ञाने जनयति। तत्रापि श्रीहरिर्न विरिञ्चप्राणेतरेषां साक्षादुपदिशति। सर्वेषां तदयोग्यत्वाद्वा 'शक्तोऽपि ह्यन्यथाकर्तुं स्वेच्छानियमतो हरिः। कारणैर्नियतैरेव करोतीदं जगत्सदे'त्याद्युक्तस्वनियमसंरक्षणार्थत्वाद्वा देवेषु परमानुग्रहाद्वा। किन्तु विरिञ्चादिद्वारैवेत्युक्तम्। तत्र विरिञ्चप्राणयोर्मध्ये विरिञ्चस्य महत्तत्त्वात्मकचित्ताभिमानितया सर्वप्राणिहृदिस्थितस्य स्वान्तर्यामिणा वासुदेवेन प्रेरितस्य मोक्षसाधनापरोक्षज्ञानविषयबिम्बरूपोपदेशकत्वमात्रम्। प्राणस्तु 'इन्द्रियस्थैः स्वरूपैस्तु ज्ञानानि जनयत्यसौ। मनःस्थेन विशेषेण कार्यैः कर्मकृदेव च। पृथक्स्थितेन रूपेण

जीवं धारयति प्रभुः । जीवस्थितेन रूपेण वेदयत्यहमित्यपि । प्राण एको वशे नित्यं बाह्यान्तःकरणेश्वरः । तान्येतान्यवशान्येव तथापि कृपयैव सः । पृथक्शक्तोऽपि तद्वैस्तु स्वरूपैरनङ्गकार्यकृत् । तस्येशो भगवान्विष्णुरेवमेष यथान्यग' इत्यादिश्रुतेः कृपयैव सर्वजीवतदुपकारिदेहेन्द्रियेषु बहुरूपैः स्थित्वा आदौ निष्कामभगवदर्थकर्माणि कारयित्वा शुद्धान्तःकरणानां श्रवणाद्यनुकूलतया तदिन्द्रियाणि नियम्य सर्वस्यापि मोक्षसाधनस्य प्रायेण मानसत्वात्तदपि तदानुकूल्येन विशेषेण नियम्य तत्प्रतिबन्धकानि दुरितानि दूरीकृत्य मोक्षसाधनविलम्बापरोक्षाय कदाचित्स्वामिः श्रवणादीनि साधनजातानि संपादितानि भवन्तीति जीवानामत्युत्कटां जिज्ञासां जनयति । अथ रूपान्तरेणापि आनन्दतीर्थनाम्ना भूमाववतीर्य स्वान्तःस्थेन हरिणा प्रेरितः ततद्योग्यतापरिपाककालानुसारेण तेषां तेषां तानि तानि साधनान्युपदिश्य श्रवणमारभ्य मूर्त्यन्तरापरोक्षज्ञानपर्यन्तं निर्णयं संपादयति । यद्यप्यनिमित्तबन्धुत्वादिदं सर्वमपि साधनजातं कृपया स्वयमेव साधयति । तथा महत्तु प्रार्थनादिरूपं विज्ञापनं शिष्यधर्म इति शिष्यान् शिक्षयितुं वा अनेकान्तभक्तानां मोक्ष इव तत्साधनान्यपि प्रार्थनीयानि सन्तीति तत्स्वभावानुकरणाय वा एकान्तभक्तानामपि सर्वमन्यत्तदर्थकमित्युक्तेः मोक्षतत्साधनादेः सर्वस्यापि भगवदर्थत्वेनाभ्यर्थनीयत्वाद्वैकान्तभक्तो जयतीर्थश्रीमच्चरणः प्राणावतारात् श्रीमदानन्दतीर्थाद्विशिष्टतत्त्वनिर्णयमर्थयते व्यामिरिति । आनन्दतीर्थो मे तत्त्वविनिर्णयाय तादर्थ्ये चतुर्थी भूयादिति योजना । नन्वानन्दतीर्थस्य न तावत्कर्तृभावेन निर्णयार्थत्वम् । म इत्यस्मच्छब्दार्थस्य कर्तृत्वात् । नापि कर्मभावेन । तत्त्वस्य तत्त्वात् । नापि करणभावेन । इन्द्रियादीनां ज्ञानकरणतया प्रसिद्धत्वात् । अतः कथमानन्दतीर्थस्य विनिर्णयायेति तादर्थ्यमुक्तमिति चेत् । करणभावे न तावत्तादर्थ्यमिति ब्रूमः । अत एव संन्यासिनां ज्ञानोपदेशा-निरिक्तकार्याभावादानन्दतीर्थस्यापि तथात्वेन ज्ञानासाधारणकारणत्वरूपज्ञानकरणत्वबोधनायानन्दतीर्थ इति संन्यासप्रसिद्धतीर्थपदप्रयोगः । अन्यथा पूर्णबोध इत्याद्यवक्ष्यत् । ननु ज्ञानकरणत्वं प्रत्यक्षाद्यन्यतमेन सहचरितमेवोपलब्धम् । अतः आनन्दतीर्थः किं प्रत्यक्षरूपं करणमुतानुमानरूपमथागमरूपम् । न त्रितयमपि । प्रसिद्धिबाधातेषां वैयर्थ्याद्वेत्यतस्त्रितयरूपमपि करणमित्याशयेनोक्तं प्रमाणमिति । अत एव प्रत्यक्षमिति वा अनुमानमिति वा आगम इति वा वक्तव्ये प्रत्यक्षादित्रितयमपि अभिप्रेतमिति द्योतनाय प्रमाणमिति सामान्यपदप्रयोगः । इन्द्रियादिषु प्रत्यक्षत्वादिप्रसिद्धिस्तु अयमिदमधृशब्दप्रसिद्धिरिव प्रत्यक्षादिशब्दमुख्यार्थमुख्यप्राणसन्निधिनिमित्ता अमुख्यैव । मुख्यप्राणस्य प्रत्यक्षादिशब्दमुख्यार्थत्वं च सर्ववेदवाच्यत्वं वायोरप्यस्तीत्यैतरेयभाष्यादुक्तसर्ववेदवाच्यत्वादेव सिद्धम् । वेदैकदेशप्रत्यक्षादिशब्दावाच्यत्वे सर्ववेदवाच्यत्वायोगात् । अतो न प्रसिद्धिबाधः । नापि तेषां वैयर्थ्यम् । 'इन्द्रियाणि स्वरूपैस्तु ज्ञानानि जनयत्यसौ । मनस्त्वेन विशेषेण कार्यैः कर्मकृदेव च । पृथक्शक्तोऽपि तद्वैस्तु स्वरूपैस्तत्कार्यकृदि'त्यादुक्तैरिन्द्रियादिकरणद्वारैव तस्य करणत्वात् । द्वारिणा च द्वारवैयर्थ्यं अतिप्रसक्तम् । न तु प्रत्यक्षत्वादिकं प्रायः सहानवस्थितमुपलब्धम् । अत एकस्यैवानन्दतीर्थस्य प्रत्यक्षादिप्रमाणत्रयात्मकत्वे प्रत्यक्षत्वादीनां सहावस्थानं विरुद्धम् । किञ्च प्रत्यक्षमज्ञातकरणं अनुमानागमौ तु ज्ञातकरणे इति ज्ञातकरणत्वाज्ञातकरणत्वयोः सहावस्थानमपि विरुद्धमेवेत्यत उक्तं भगवानिति । भगः श्रीकाममाहात्म्यवीर्ययशोर्ककीर्तिज्ञानेत्यभिधानात् उक्तधर्माणां सहावस्थानादिरूपाघटितघटकमाहात्म्यवान् इत्यर्थः । ननु प्रमाणत्वाभिमतानामपि प्रत्यक्षादीनां कादाचित्काद्यादिदोषसंबन्धेनायथार्थत्वदर्शनात्प्रकृतप्रमाणस्यापि

तथात्वे कथं तत्त्वनिर्णयार्थतेत्यत उक्तं शुद्धं निर्दोषमिति । ननु के ते दोषाः कथं च तदभाव इत्यतो दोषाभावमुपपादयितुं यदानन्दतीर्थस्य प्रमाणमिति सामान्यतः प्रमाणत्रितयरूपत्वमुक्तं तदेव विविच्य दर्शयति व्याप्तिरित्यादिना । आनन्दतीर्थस्य प्रत्यक्षप्रमाणत्वपक्षे तावदेवमुपपादनीयम् । नात्रानन्दतीर्थो बाह्यप्रत्यक्षतया विवक्षितः । तस्याध्यात्मिकतत्त्वनिर्णयार्थत्वात् । तेषां च बाह्यप्रत्यक्षाविषयत्वात् । किन्तु साक्षिप्रत्यक्षतया । तथाच यस्यानन्दतीर्थाख्यमोक्षयोग्यसाक्षिप्रत्यक्षस्य निजे स्वकीये पक्षे पक्षः सहायगरुदन्तिकसाध्यभित्तिमित्रेषु चुल्लिविवरे नृपकुञ्जरे इत्यभिधानात् साध्ये साध्यत्वस्य साधनज्ञापनीयत्वरूपत्वात्स्वज्ञापनीये बिम्बरूपादाविति यावत् । विषयसप्तमीयम् । निजेन महसा प्रतिबन्धाभावे स्वरूपसामर्थ्येनैव । व्याप्तिः व्यापनं मोक्षयोग्यं तृणजीवमारभ्य चतुर्मुखपर्यन्तं यस्य यावन्तो गुणाः क्रियारूपाणि च ज्ञातुं ध्यातुं साक्षात्कर्तुं च योग्यास्तस्य तावतां गुणक्रियादीनां ज्ञापनशक्तिरिति यावत् । अनेनावश्यं यावत्स्वज्ञापनीयं तावच्छक्तत्यभावाख्यो दोषो नास्तीति सूचितम् । तथा यस्य सपक्षे मोक्षार्थं ज्ञेयत्वेन धर्मेण पक्षसमानेऽनन्तरूपगुणक्रियादौ प्रमेये स्थितिर्ज्ञापकतयावस्थानं च ज्ञापकत्वमात्रमिति यावत् । अत्र पक्षशब्दार्थस्य कृष्णरूपगुणक्रियादेः पृथक्पृथग्ज्ञानमावश्यकम् । तथा ज्ञानं विना मोक्षासिद्धेः सपक्षशब्दार्थस्यानन्तरूपगुणक्रियादेस्तु न तथा ज्ञानमावश्यकम् । अशक्यत्वादयोग्यत्वाच्च । किन्तु केषाञ्चित् क्रियासामान्येन केषाञ्चिद्गुणसामान्येन केषाञ्चिद्रूपसामान्येनेत्यादिरूपेण ज्ञानमात्रमितीमं विशेषं द्योतयितुं तत्र व्याप्तिरिति अत्र स्थितिरिति चोक्तम् । अनेनावश्यकप्रमेयज्ञापकस्यापि तदुपयुक्तप्रमेयज्ञापनाभावो दोषः सोऽपि नास्तीति सूचितम् । तथा यस्य विपक्षतः उक्तविपरीतपक्षात्स्वातन्त्र्येण विष्ण्वन्यदेवतोपासनादेर्व्यावृत्तिः सर्वथा तत्राप्रवृत्तिश्च । अनेन देवानां विष्णुसाम्येन ज्ञापनरूपो दोषो नास्तीति सूचितम् । ननु यदि साक्षिप्रत्यक्षस्य अतथ्यवितथ्यप्रदर्शनेऽपि शक्तिस्तदा कथं तज्ज्ञापिते अन्यत्राप्याश्वास इत्यत उक्तं यस्य बाधिते विष्णौ प्रमाणविरुद्धे विषये अतथ्यादौ सक्तिः संबन्धो न वा इति । अथ विशेषणान्तरसमुच्चयार्थः । साक्षिप्रत्यक्षस्य निर्दोषत्वात्कालत्रयेऽपि विष्णौ प्रमाणबाधितार्थग्राहित्वं नास्तीति वैशब्देनाह । यथोक्तम् । साक्षिसिद्धस्य न क्वापि बाध्यत्वं तददोषत इति । यः कदाचित्तदवभासः समानदर्शनेनैव । यथोक्तम् । 'यत्कचिद्बचभिचारि स्याद्दर्शनं मानसं हि तदि'ति । अनेनाश्वासजनकातथ्यादिप्रदर्शनरूपो दोषो नास्तीति सूचितम् । नन्वस्तु एवंविधा शक्तिः साक्षिप्रत्यक्षस्य स्वभावतः । तथाप्यागन्तुकदोषसंबन्धात्कदाचित्पूर्वशक्तिप्रतिबन्धो वा विपरीतकार्यजननशक्त्युत्पादो वा किं न स्याच्चक्षुरादौ तथा दर्शनादित्यत उक्तं यस्य प्रतिपक्षस्य पूर्वशक्तिप्रतिबन्धकस्य शक्त्यन्तराधायकस्य वा दोषस्य युक्तियोगः स्वस्मिन् संबन्धो नैवास्तीति साक्षी निर्दोष एवैकः सदाङ्गीकार्य एव नः । निर्दोषत्वातिनियमात्तद्बलिष्ठतमं मतमित्यादेः कालत्रयेऽपि साक्षिप्रत्यक्षस्य दोषसंबन्ध एव नास्तीत्येवशब्देनाह । अनेन प्रतिपक्षयोगात्कदाचिदपि प्रतिबध्यत्वादिरूपो दोषो नास्तीति सूचितमिति । ननु साक्षिणोऽपि सहजशक्तिप्रतिबन्धो विपरीतकार्यजनकशक्त्यन्तरोत्पादश्चान्यत्रोक्तः । यथोक्तं विष्णुतत्त्वनिर्णयटीकायाम् । बुद्धिदोषनिरासमात्रकारणत्वाद्युक्तीनामिति मूलव्याख्यानावसरे । अयमभिसन्धिः । साक्ष्येव ज्ञानं तत्प्रामाण्यं च विषयीकर्तुं क्षमः । किन्तु कारणान्तरोपनिपातजेन मानसापराधेन प्रतिबद्धो ज्ञानमात्रं गृहीत्वा प्रामाण्यग्रहणस्य नेष्टे । यथा स्वयमेव गतिसमर्थोऽपि गजो गोक्षुरकादिना प्रतिबद्धो न चलितुं क्षमत इति । तथा तत्रैवानुपदं दुष्टबुद्धीनामेवाप्रामाण्यशङ्केति परतो

प्रामाण्यमित्येतन्मूलव्याख्यानावसरे । ज्ञानग्राहकः साक्षी प्रमाणतयैव गृह्णातीत्युत्सर्गत एव । विसंवादलक्षणात् परतोपवादादप्रामाण्यं च गृह्णाति । सहकारिणः सहजशक्तिं प्रतिबध्य विपरीतशक्तिं जनयतीति हि प्रसिद्धम् । दावदहनदग्धानां वेत्रबीजानां वेत्राङ्कुरमजनयित्वा कदलीकाण्डजनकत्वदर्शनादिति । अतः कथमत्र साक्षिणि तदुभय-निषेधे तद्विरोधो न स्यादिति चेन्मैवम् । विषयभेदेनाविरोधात् । तथाहि । अत्र चक्षुषः काचादिभिरिव साक्षिणः स्वसंबद्धदोषैः स्वरूपोपमर्देन सहजशक्तिप्रतिबन्धस्य निषेधः क्रियते । तत्र तु दीपस्य पटलेनेव तदसंबद्धैर्मानसैर्दोषैः प्रतिबन्धक उक्तः । न चैतादृशः प्रतिबन्धः करणस्य दोषमावहति । तस्य तदानीमपि स्वरूपानुपमर्देन जागृतत्वात् । अपसृते तु प्रतिबन्धेऽन्यानपेक्षया तदैव कार्यकरणसमर्थत्वाच्च । अत एवोक्तं तत्रैव । तस्मिन्निरस्ते साक्षी स्वमहिम्नैव प्रामाण्यं गोचरयति । यथा गोक्षुरकाद्यपसरणे स्वयमेव गजो गच्छतीति । किन्तु द्रष्टृणामेव तावद्दर्शनाभावमावहति । यावत्स्वसत्त्वम् । अन्यथा पटलेनापि दीपस्वरूपोपमर्दः तत एव तदपसरणेऽपि उद्बोधादिना विना प्रदीपस्य पदार्थप्रकाशकत्वं च स्यात् । अतो द्रष्टृपुरुषापेक्षयाऽन्यत्राङ्गीकृतोऽपि प्रतिबन्धो न साक्षिस्वरूपोपमर्दक इत्यत्र तादृशप्रतिबन्धं निषेधं न विरुणद्धि । तथात्र दोषैः साक्षिणो विपरीतशक्तिर्निषिध्यते । तत्र तु सहकारिणा साऽङ्गीक्रियते । यथोक्तं तत्रैव । सहकारिणः सहजशक्तिं प्रतिबध्य विपरीतशक्तिं जनयन्तीति हि प्रसिद्धमिति । तथात्र साक्षिणो यथार्थत्वादिका विपरीतशक्तिर्निषिध्यते । तत्र स्वरूपापेक्षयैव विपरीता सा अङ्गीक्रियते । न चेयं करणस्य दोषमावहति । किन्तु सहकारिसमवधानेन विचित्रानेककार्योत्पादकत्वरूपं माहात्म्यमेव । नापीयमयथार्थता-मापादयति । तत्र प्रामाण्यग्रहणे सहजशक्तिमानपि साक्षी विसंवादाख्यसहकार्याहितया स्वभावापेक्षया विपरीतया शक्त्या बौद्धादिवाक्यजनितज्ञाने अप्रामाण्यं च गृह्णातीत्युक्तत्वेन तस्मिंस्तज्ज्ञानस्य वस्तुतो यथार्थत्वात् । अत-स्तत्राङ्गीक्रियमाणा विपरीतशक्तिरपि नाममात्रत्वादत्रायथार्थज्ञानजनकविपरीतशक्तिनिषेधं न विरुणद्धीति । अनुमान-प्रमाणत्वपक्षे त्वेवमुपपादनीयम् । यस्यानन्दतीर्थाख्यानुमानस्य निजेन महसा स्वभावसामर्थ्येनैव निजे स्वकीये स्वज्ञापनीय इति यावत् । पक्षे परसत्सिद्धान्ते व्याप्तिर्व्यापनम् । द्विविधः सत्सिद्धान्तः परापरभेदात् । प्रत्येकं द्विविधः । वाचनिकः आनुषङ्गिकश्चेति । तत्र वाचनिकानुषङ्गिकभेदेन द्विविधस्यापि परसत्सिद्धान्तस्य वचनेनैव ज्ञापनीयत्वमिति यावत् । अत एवोक्तौ द्विविधावप्यनुव्याख्याने । 'अशेषगुणपूर्णत्वं सर्वदोषसमुज्झितिः । विष्णोरन्यच्च तत्तन्त्रमिति सम्यग्विनिर्णय' इति । 'स्वतन्त्रत्वं सदा तस्य तस्य भेदश्च सर्वतः । अदोषत्वस्य सिध्यर्थं यदभेदे तदन्वयः । तत्तन्त्रत्वं च मुक्तानामपि तद्गुणपूर्तये । मुक्तानामपि भेदश्चे'ति च । तथा सपक्षे । 'स्वयमेव समभ्यसेत् । ब्रूयादपि च शिष्येभ्यः सत्सिद्धान्तमहापयन्' इत्यनुव्याख्यानोक्तेः स्वयमेवाभ्यासकाले शिष्येभ्यः प्रवचनकाले चाहेयत्वेन धर्मेण पक्षसमाने अपरसिद्धान्ते स्थितिः । अयमप्युभयविध इत्युक्तं प्रत्येकं द्विविधो वाचनिक आनुषङ्गिकश्चेति । तत्रानुषङ्गिकः शिष्यैरेवोह्यतामिति तं विहाय वाचनिकस्यैव कण्ठतः कीर्तनमिति यावत् । अत एवायमेक एवोक्तस्तत्रैव । 'निर्दोषत्वं रमायाश्च तदनन्तरता तथा । ब्रह्मा सरस्वती वीन्द्रशेषरुद्राश्च तत्स्त्रियः । शक्रकामौ तदन्ये च क्रमान्मुक्तावपीति च । सत्सिद्धान्त इति ज्ञेय' इति । अत एव प्राक्पक्षशब्दार्थे सर्वत्र स्थितिवाची व्याप्तिशब्दः अत्र तु सपक्षशब्दार्थे स्थितिमात्रवाची स्थितिशब्द इति ज्ञेयम् । विपक्षतः 'एतद्विरोधि यत्सर्वं तमसेन्धाय केवलमि'त्यनुव्याख्यानोक्तेः उक्तविधसिद्धान्तचतुष्टयविरोधिपक्षाद्व्यावृत्तिस्तत्प्रतिपादनादौ अप्रवृत्तिः । ननु सत्सिद्धान्तस्यासत्त्वात्तज्ज्ञापक-

मानन्दतीर्थानुमानं बाधितविषयं भवतीत्यत उक्तम् । अथ बाधिते प्रमाणबाधितेऽसतीति यावत् । विषये सक्तिः ज्ञापकत्वप्रसक्तिः नेति । वैशब्देन सत्सिद्धान्तस्य 'जन्माद्यस्य यतः', 'कामादितत्र तत्र चायतनादिभ्यः', 'समना चासृत्युपक्रमादमृतत्वं चानुपोष्य', 'इयदामननादि'त्यादिब्रह्मसूत्रादिबहुमानप्रसिद्धतां द्योतयति । अयं भावः । प्रकृतानुमानस्य बाधितविषयत्वं हि तदा स्यात् । यद्येतद्विषयस्य सिद्धान्तस्य बाधन्तरपरिकल्पितसिद्धान्तबदसत्त्वं स्यात् । न चैवम् । किं नाम । वेदतन्मीमांसादिबहुमानसिद्धत्वात्सत्यमेव । अत एव सुधायां 'सत्सिद्धान्तमहापयन्' इत्येतद्वचाख्यावसरे । प्रामाणिकतयाऽभिमतोऽर्थः सिद्धान्तः । न तु प्रामाणिक एवेति नियमः । अयं तु न तथा । अपि तु प्रामाणिक एवेत्यतः सदित्युक्तमित्युक्तम् । तथाच् कथं तस्य बाधितविषयत्वं भवतीति । ननु तर्ह्यस्तूभयत्रापि वाचनिकसत्सिद्धान्तस्योक्तदिशा प्रामाणिकत्वम् । तत एव अनुमानस्याप्यबाधितविषयत्वम् । आनुषङ्गिकस्य तूभयत्रापि कथम् । सूत्रादिमानविषयत्वे वाचनिकत्वप्राप्त्या आनुषङ्गिकत्वहानेः । तदभावे चाप्रामाणिकत्वेनासत्त्वापत्त्या पुनरुक्तानुमानस्य बाधितविषयत्वप्राप्तेरिति चेन्न । मानविषयत्वस्यैवाङ्गीकारेण तावद्वितीयपक्षोक्तदोषाभावात् । प्राधान्येन वचनप्रतिपाद्यत्वस्यैव वाचनिकतया विवक्षितत्वेन तदुपयुक्ततया मानविषयस्याप्यानुषङ्गिकत्वसंभवेन आद्यपक्षोक्तदोषस्याप्यभावात् । यथोक्तं सुधायाम् । 'नन्वेतदप्यसंभवस्तु सतः । नात्माश्रुतेः । पृथगुपदेशात्' इत्यादिनाऽभिहितमेव तत्कथमानुषङ्गिकः सिद्धान्तः । सत्यम् । तथापि प्रधानप्रमेयोपयोगितयोक्तत्वाददोष इति । नन्वानन्दतीर्थानुमानज्ञापितस्योक्तचतुर्विधसत्सिद्धान्तस्य यथा शास्त्रवेद्यत्वं तथा तदभावस्यापि शास्त्रान्तरवेद्यत्वात् अनुमानस्य सत्प्रतिपक्षता स्यादित्यत उक्तं प्रतिपक्षस्य प्रतिसाधकस्य युक्तियोगो नास्तीति । एवशब्देन सत्सिद्धान्तप्रतिपादकस्य सच्छास्त्रत्वं तदभावप्रतिपादकस्य दुःशास्त्रत्वं चाभिप्रेत्य युक्तिपदोक्तघटनैवासंभावितेति द्योत्यते । अयं भावः । समबलं हि विरोधिप्रमाणं प्रतिपक्षः । न च शास्त्रान्तरं सत्सिद्धान्तप्रतिपादकवेदादिशास्त्रेण तत्संवादिना आनन्दतीर्थानुमानेन च समबलम् । तस्य सच्छास्त्रादित्वात्तत एवाभ्यसनीयत्वाच्छास्त्रान्तरस्य दुःशास्त्रत्वात्तत एव परित्याज्यत्वाच्च । यथोक्तमनुव्याख्याने । 'इत्येव श्रुतयोऽशेषाः पञ्चरात्रमथाखिलम् । मूलरामायणं चैव भारतं स्मृतयोऽखिलाः । वैष्णवानि पुराणानि साङ्गचयोगौ परावपि । ब्रह्मतर्कश्च मीमांसेत्यनन्तः शब्दसागरः । अनन्ता युक्तयश्चैव प्रत्यक्षागममूलकाः । प्रत्यक्षमैश्वरं चैव रमादीनामशेषतः । मुक्तानामप्यमुक्तानामेतमेवार्थमुत्तमम् । अन्यावकाशरहितं प्रकाशयति सादरम् । एतदेव तु सच्छास्त्रं दुःशास्त्रं च ततः परम् । सच्छास्त्रमभ्यसेन्नित्यं दुःशास्त्रं तु परित्यजेदि'ति । तथाच प्रामाणिकपरित्यक्तस्य शास्त्रान्तरस्य प्रत्यवस्थानमेवासंभावितमिति दूरे तत्समबलत्वादिविचार इति । अनेनानुमानस्य पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेति पञ्च रूपाणि स्वपरसंप्रतिपन्नानि तानि सर्वाण्यपि प्रकृतानुमाने सन्तीत्युक्तं भवति । तथा तस्य असिद्धमनैकान्तिकत्वापरपर्यायं सव्यभिचारत्वं विरुद्धत्वं बाधितत्वं सत्प्रतिपक्षत्वं चेति पञ्च दोषाः । अत्रासिद्धत्वं त्रिविधम् । आश्रयासिद्धत्वं स्वरूपासिद्धत्वं व्याप्यत्वासिद्धत्वं चेति । अनैकान्तिकत्वमपि त्रिविधम् । साधारणानैकान्तिकत्वमसाधारणानैकान्तिकत्वमनुपसंहार्यनैकान्तिकत्वं चेति । तत्र प्रकृतानुमानस्य व्याप्तिर्यस्य निजे निजेन महसा पक्ष इत्यनेन पक्ष इत्याश्रयानुवादादसिद्धाश्रयत्वरूपाश्रयासिद्धत्वाव्याप्तिरिति, सर्वत्र वृत्तित्वकथनेन स्वरूपासिद्धाख्यस्तद्विशेषो भागासिद्धाख्यश्च दोषः । सपक्षे स्थितिरित्यनेन सपक्षवृत्तित्वाभिधानादसाधारणानैकान्तिकाख्यः

सपक्ष इत्यन्वयदृष्टान्तभावाभिधानेऽनुपसंहार्यनैकान्तिकत्वाख्यः साध्यवद्वृत्तित्वकथनेन साध्याभावव्याप्तत्वरूप-विरुद्धत्वाख्यश्च दोषः व्यावृत्तिश्च विपक्षत इत्यनेन साधारणानैकान्तिकत्वाख्यो दोषः अर्थे विषये सक्तिर्न वै बाधित इत्यनेन बाधितत्वाख्यो दोषः नैवास्ति प्रतिपक्षयुक्तिरित्यनेन सप्रतिपक्षत्वाख्यो दोषश्च नास्तीत्युक्तं भवति । एतेन सोपाधिकत्वरूपव्याप्यत्वासिद्धत्वाख्यदोषाभावोऽपि सिध्यति । उन्नेयव्यभिचाराप्रतिपक्षयोरेवाभावोक्त्या तदुन्नाय-कोपाध्युद्भावनस्यैवाकर्तव्यत्वात् । एवमेव संभावितदोषान्तरपरिहारोऽप्यूहनीयः । आगमप्रमाणत्वपक्षेऽप्येव-मुपपादनीयम् । यस्यानन्दतीर्थाख्यवेदादिरूपसदागमस्य पक्षे साध्ये सकलगुणपूर्णत्वनिर्दोषत्वादिना स्वज्ञापनीये हरौ व्याप्तिर्व्यापनं महातात्पर्यं अशेषतोऽपि वाक्यैस्तत्प्रतिपादकत्वं चास्ति । किं मायि(वत्) लक्षणया नेत्याह । निजेन महसा औत्पत्तिकेन सामर्थ्येन शक्त्येति । औत्पत्तिकस्तुशब्दस्यार्थेन संबन्ध इति जैमिन्युक्तेः । तर्हि धमदिर्दत्त-जलाञ्जलिता । यदि तत्प्रतिपादकत्वमपि तदा साम्यप्रसक्तिरित्यत उक्तं सपक्षे धर्मादौ स्थितिरवान्तरं तत्परत्वं एकदेशतस्तत्प्रतिपादकत्वं च न पुनर्व्याप्तिरिति । किं लक्षणया नेत्याह निजेन महसेति । तथात्वेनेकार्थत्वप्रसङ्ग इति चेत् । स्यादयं प्रसङ्गो यदि द्वयोरपि साम्येन प्रतिपाद्यत्वमुररीकुर्मः । न चैवम् । किं नाम हरेः परममुख्यया वृत्त्या अन्यस्य तु मुख्यया । अतः क्वातिप्रसङ्गावकाश इत्याशयेनोक्तं निजे परममुख्ये पक्षे इति । समानेऽनुकूले श्रीहरिप्रतिपत्तिसाधनभूते पक्षे साध्ये स्वविषय इति च । सकलगुणपूर्णत्वनिर्दोषत्वादिना भगवदावेदको वेद इत्य-युक्तम् । जनिनोत विष्णोरित्यादौ जन्मादिदोषप्रतिपादनादित्यत उक्तम् । विपक्षत उक्तपक्षशब्दार्थविरुद्धात्सदोषा-द्वस्तुनो व्यावृत्तिरसंबन्धस्तत्प्रतिपादकत्वाभाव इति । अन्यथा गुणाः श्रुता इति श्रुत्यैव सर्वत्रापि वेदे गुणा एव प्रतिपाद्यन्ते दोषप्रतीतिस्त्वज्ञानादिनिबन्धनेति सर्वश्रुतीनां व्याख्यातत्वेन तद्विरोधो महातात्पर्यविरोधश्चेति चशब्देन सूचयति । वेदे स्वविरोधाभावाख्यधर्मसमुच्चायकोऽथशब्दः । नन्वीदृशपरतत्त्वप्रतिपादकत्वे वेदस्य स्वविरोधाभावेऽपि प्रमाणान्तरविरोधः स्यादेवेति चेत् । कोऽभिप्रायः । किं प्रबलप्रमाणविरोधः स्यादिति किंवा समबलप्रमाणविरोधः स्यादिति । हीनबलस्य प्रबलप्रमाणविरोधेन स्वयमुत्थानशून्यस्य शङ्कितुमशक्यत्वात् । तत्राद्यस्तावन्न संभवती-त्याह । बाधिते विषये सक्तिः संबन्धः प्रमाणान्तरबाधितार्थप्रतिपादकत्वं नेति । प्रमाणबाधो नेति यावत् । अत्र प्रबलप्रमाणविरोधसूचनाय बाधितपदप्रयोगः । कुतो नेति चेत् । निर्दोषत्वात् । अत एव शुद्धं निर्दोषमिति प्रमाणविशेषणमुक्तम् । निर्दोषत्वहेतुभूतमपौरुषेयत्वरूपं नित्यत्वं च वाचा विरूपनित्ययेत्यादौ प्रसिद्धमिति वैशब्देनाचष्टे । द्वितीयोऽप्ययुक्त इत्याह प्रतिपक्षयुक्तिर्नास्तीति । कथमित्यतः समबलं विरोधिप्रमाणं किमनुमानमुत प्रत्यक्षम् । उभयत्रापि किं तयोर्वेदोपजीवनमस्ति न वा । आद्ये कथं विरोधः । द्वितीये तयोः तत्र प्रवेशायोगेन प्रतिपक्षत्वासंभव इति सर्वथाऽपि न प्रतिपक्षसंभव इत्याशयेनोक्तमेवेति । अनेन मुख्यार्थस्यापि हरेर्विना प्रयोजनेनामुख्यया वृत्त्या अमुख्यार्थस्यापि धमदिर्मुख्यार्थसाम्येन च प्रतिपादकत्वादयो दोषा न सन्तीति सूचितमिति । नन्वेवंभूतं विलक्षणं प्रमाणं कुत्र दृष्टमित्यत उक्तम् अतुलमसदृशमिति । ननु सर्वार्थप्रदर्शक-प्रमाणात्मकप्राणनायकावतारानन्दतीर्थस्य सार्वज्ञाभावे कथं तत्प्रदर्शकत्वमित्यत उक्तं मुनिः प्रमाणवेद्यस्य सर्वार्थस्य वेत्तेति । यथोक्तम् । वेत्ता वेद्यस्य सर्वस्य मुनिः सद्भिरुदाहृत इति । तथा स्वामिनः फलश्रुतेरित्यात्रेय इति सूत्रोपात्तायाः 'यदु किं चेमाः प्रजाः शुभमाचरन्ति देवा एव तदाचरन्ति यदु किं चेमाः प्रजा विजानते देवा एव तद्विजानत' इत्यादिश्रुतेः

सर्वदेवोत्तमस्य प्राणस्य मोक्षयोग्येषु स्थित्वा जीवस्थितेन रूपेण वेदयत्यहमित्यपीत्याद्युक्तेर्म इत्याद्यहं पदार्थोऽपि भूत्वा तत्त्वनिर्णयान्तमोक्षसाधनकर्तृत्वात्कर्तृभावेन वा। तथा तत्त्वविनिर्णयविषयीभूतं तत्त्वं त्रिविधम्। प्राणादुत्तमं ततोऽधमं तदात्मकं चेति। तत्राद्ये विशिष्टप्रतिमा वायुरेव। विना प्राणप्रतीकं य इत्याद्युक्तेः प्राणस्य तत्प्रतिमात्वेन तत्त्वविनिर्णये विषयत्वात्। द्वितीये तस्यैव प्राणप्रतिमात्वात् प्रतिमासन्निहितदेवदत्तविषयत्वात्तृतीये स्वरूपेण तद्विषयत्वात्कर्मभावेन वा प्राणस्य तत्त्वविनिर्णयार्थतास्तीति न काऽप्यनुपपत्तिरिति।

चषकः— व्याचिख्यासितानुव्याख्याया युक्तिमालाग्रथिततया तत्स्फुरणौपयिकतया तत्तादात्म्योपरक्त-भाष्यकृदुपास्तिं विधत्ते **व्याप्तिरित्यादि। भगवत्पादकल्पे**— ब्रह्ममीमांसाशास्त्रं पक्षः, निखिलगुणपूर्त्यवद्यगन्ध-वैधुर्योभयविशेषितस्य स्वप्रतिपादकतासंबन्धेन तत्र सिषाधयिषितत्वात्। तत्र **व्याप्तिः** प्रतिसूत्रं प्रतिपदं प्रत्यक्षर-मितरानधिगन्तव्यतत्तत्प्रतिपाद्याधिगन्तृता, **निजेन नैसर्गिकेण महसा स्वसिषाधयिषितार्थानुमापनसामर्थ्येन। सपक्षे** वेदेतिहासादौ, अवधृतसाध्यकत्वात्। उभयानुगतहेतुताघटकसंबन्धस्तु स्वेतरानधिगन्तव्यस्वाधिगतार्थकत्वं हेत्वभिमतस्य। **विपक्षतः** प्रतीपसमयात्, **बाधिते** गर्हिते, **सक्तिः अभिनिवेशः। प्रतिपक्षयुक्तिः** प्रत्यर्थिघटना। अनुमाने उपाध्यादिसंभावनास्ति, प्रकृते तु तामपि व्यवच्छेत्तुं नैवेत्युक्तिः। पर्वतादौ वह्न्यादिकं धूमेनालोकेन भस्मना च साध्यत इति तानि साधनानि सतुलानि, प्रकृतसाधनाभिमतभगवत्पादातिरेकेण तादृशसाध्यानुमापनसमर्थ-वैकल्यादिदमतुलमिति हृदयम्।

अनुमानकल्पे तु— महःपदं तत्तत्साध्यनिरूपितव्याप्त्यवगमकं, पक्षतावच्छेदकसामानाधिकरण्येना-सिद्धिव्युदसनाय व्याप्तिपदं तदवच्छेदेन हेतुतावच्छेदकघटकसंबन्धप्रत्यायकम्। प्रमाणपदं करणसाधनल्युडन्त-मित्यतो भगवत्पादानामपि निखिलमनीषानेतृतया प्रकृतसाध्यगोचरास्मदाद्यधिकरणकानुमितिहेतुतोपपादनीया।

भक्तवर्गाख्ये पक्षे— विष्णूत्कर्षादिज्ञानधर्मितत्त्वज्ञानवत्त्वतदभावकोटिकसन्देहवत्त्वात्। सपक्षे हरौ तादृशसन्देहानास्कन्दितत्वात्। विपक्षतोऽयोग्यजनाद्ध्यावृत्तिस्तदुपदेशादावप्रवृत्तिरित्यादिकं निबन्धान्तरे स्थितम् ॥ ३ ॥

ए०बा०— अथ युक्त्युपबृंहितत्वात्सूत्रानुव्याख्यानयोस्तदुद्बोधमीप्समानयुक्तिशेषेण सूत्रकृतमनुभाष्यकृतं चैकोक्त्या प्रार्थयन्ते **व्याप्तिरित्यादिना। व्याप्तिर्यस्य निजे निजेन महसा पक्षे सपक्षे स्थितिर्व्यावृत्तिश्च विपक्षतोऽथ विषये सक्तिर्न वै बाधिते। नैवास्ति प्रतिपक्षयुक्तिरतुलं शुद्धं प्रमाणं स मे भूयात्तत्त्वविनिर्णयाय भगवानानन्दतीर्थो मुनिः ॥ ३ ॥ यस्य** श्रीव्यासस्य श्रीमध्वाचार्यस्य वा निजे पक्षे स्वसिद्धान्ते विष्णुसर्वोत्तम-त्वादौ पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिष्विति वैजयन्ती। **साध्यं** सिद्धान्तः। निजेन स्वाभाविकेनैव सहसा प्रमाणोदाहरणादिसामर्थ्येन व्याप्तिनिष्ठा। न तु वरादिलब्धेनेति भावः। 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः', 'नास्ति नारायणसमं न भूतं न भविष्यती'ति च तदुभयोक्तेः। सपक्षे पक्षसमानतया पक्षस्थानीये भगवत्स्वरूपे स्थितिर्निष्ठा। अत्यादर इति यावत्। सपक्षे सपक्षस्थानीये ज्योतिष्टोमादियागादेः स्वर्गस्थानादौ स्थितिरित्यपि

व्याचक्षते । अथशब्दोऽवधारणे । विपक्षतः विरुद्धादद्वैतसिद्धान्ताद्व्यावृत्तिरेव । न तु कदाचित्तत्साधने स्वसामर्थ्यं घटयतीति भावः । बाधिते शशशृङ्गसत्त्वादौ सत्तिरासत्तिः नैव प्रतिपक्षयुक्तिः सत्प्रतिपक्षो नैवास्ति । तस्य स्वमते प्रतिज्ञातार्थविरोधेऽन्तर्भवेन पृथगदोषतया तस्य च सत्तिर्नैव बाधित इत्यनेन निषेधादिति भावः । शुद्धं निर्दोषम् । प्रमाणमिव प्रमाणमिति रूपकं शब्दस्वाभाव्यान्नपुंसकत्वम् । अन्वयव्यतिरेकधूमानुमानमपि पक्षे सत्त्वं (१), सपक्षे सत्त्वं (२), विपक्षाद्व्यावृत्तिः (३), अबाधितविषयत्वं (४), असत्प्रतिपक्षत्वं चेति (५) पञ्चरूपोपपन्नमिति ज्ञेयम् । अत एव रूपकतया नात्र पक्षसाध्यहेत्वादिनिर्देशे क्लेशः कार्यः । तच्च प्रमाणमतुलम् असदृशं इतरकारणवृन्दस्येव प्रमातृप्रयोज्यत्वाभावात् । मन आदिशक्तयुद्बोधकतया प्राधान्येन प्रमाहेतुत्वाच्च । यो मनसि तिष्ठन्, द्रवतां हीन्द्रियाणां हि नियन्ता प्राण एकराडिति च श्रुतेः । स आनन्दतीर्थः आनन्दकरं तीर्थं बदर्याख्यक्षेत्रं वेदतन्मीमांसाशास्त्रं वा गुरुर्वा यथायथं यस्य यस्माद्यस्येति तथोक्तः । 'योनौ जलावतारे च मन्त्राद्यष्टादशस्वपि । पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यादि'ति हलायुधः । 'निपानागमयोस्तीर्थमृषिजुष्टजले गुरावि'ति चामरः । मुनिर्ज्ञानी संन्यासी वा । 'स हि लोके मुनिर्नान्यो यः कामक्रोधवर्जित' इति गीताभाष्योक्तेः । तत्त्वनिर्णयाय तादर्थ्ये चतुर्थी । भूयादिति पृथक्पृथगन्वयः । 'ऐश्वर्यादिगुणैः षड्भिः सामर्थ्यात्सर्वदेवताः । भगवच्छब्दवाच्यास्तत्साक्षात्तु भगवान्हरिः । निरपेक्ष्यं तु सामग्र्यं तस्य सर्वाधिकं यत' इत्येकादशतात्पर्योक्तेर्यथायथमुभयत्र भगवानिति विशेषणं योज्यम् । एतेन चतुर्मुखोऽपि प्रार्थितो ज्ञेयः । यद्वा भाष्ये गुरूंश्चेति बहुवचनसूचितपदेन 'नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्' इति शिष्टानुष्ठितं पुष्णन्तष्टीकाकृच्चरणा एकोक्त्या नरनारायणौ प्रार्थयन्ते व्यासिरित्यादिना । यस्य नरस्य नारायणस्य वा क्रमात् निजे पक्षे स्वस्वतपसि निजेन महसा व्यासिर्निष्ठा । आस्तिक्यबुद्धिः । सपक्षे मिथस्तपसि स्थितिर्निष्ठा संमतिः । विपक्षतो भ्रष्टजनात् । व्यावृत्तिः । तत्रानादर इत्यादि यथायथं योज्यम् । शिष्टं प्राग्वत् । तदुक्तं भागवते 'धर्मस्य दक्षदुहितर्यजनि स्वमूर्त्या नारायणो नर इति स्वतपःप्रभावः । दृष्ट्वात्मनो भगवतो नियमावलोपं देव्यस्त्वनङ्गपृतथाधटितुं न शेकुरि'ति । नरः शेषः । तदुक्तं द्वितीयतात्पर्ये 'नरो नारायणश्चैव हरिः कृष्णस्तथैव च । चत्वारो धर्मतनया हरिरेव त्रयो मताः । अनन्तो नरनामा च तस्मिंस्तु नरनामवान् । विशेषेण स्वयं विष्णुः निवसत्यंबुजेक्षण' इति । मुनित्वं तु गार्हस्थ्यं च यतित्वं च देवेष्वेकत्वमागतम् । प्राधान्योक्तिर्यतित्वस्य गार्हस्थ्यस्य क्वचित्क्वचिदि'त्येकादशतात्पर्यवचनानुसारेण यथासंभवमुपपादनीयं सर्वत्र । नरनारायणौ बदर्यां लोकशिक्षार्थं तपोऽनुतिष्ठ इति हि पौराणिकी प्रसिद्धिः ॥ श्रीरामकृष्णौ प्रार्थयन्ते व्यासिरित्यादिना । यस्य श्रीरामस्य कृष्णस्य वा निजे पक्षे क्रमात् सीता भैष्म्याहरणादौ व्यासिर्निष्ठा । सपक्षे सुग्रीवार्जुनादिपरिरक्षणे क्रमात् । स्थितिः निष्ठा । तयोर्हनूमद्भीमार्थत्वात्सपक्षत्वं ज्ञेयम् । तदुक्तं श्रीमन्महाभारततात्पर्यनिर्णये । सोऽवतारे तस्मात्स मारुतिकृतेरविजं रक्ष । एवं स कृष्णतनुर्जुनमप्यरक्षद्भीमार्थमेवेति । सः रामः । रविजं सुग्रीवम् । शिष्टं प्राग्वत् ॥ ३ ॥ एवं हनूमद्भीममध्वादिपरतया प्रकारान्तरेणापीदं पद्यं नेयमपि ग्रन्थविस्तरत्रासादेवोपरम्यते । आचार्यपरतामेव पूर्वाचार्याः समभ्यधुः । तथापि न न्यषेधंस्ते पद्यस्यास्येतरार्थतां न्यायमप्रतिषिद्धं यत्तदिहानुमतं हृदि । एतस्यालंब्य विवृत्तिरितरार्थतयोचितेति ॥ २ ॥ सुधाटिप्पण्यां तु आनन्दतीर्थपक्षे निजः पक्षो ब्रह्ममीमांसाशास्त्रं विप्रतिपत्त्या सन्दिग्धसाध्यार्थत्वात् । तत्र व्यासिर्निष्ठा । ननु परभाष्यकारस्येवानादरः । तेन श्रुतिस्मृत्योर्विरोधे सूत्राणां कथञ्चिद्योज्यत्वस्योक्तत्वात् । निजेन स्वाभाविकेनैव न वरादिलब्धेन महसा

साध्यसाधनसामर्थ्येनेत्यर्थः। सपक्षे निर्णीतार्थतया निश्चिते वेदेतिहासौ स्थितिर्निष्ठा। विपक्षतो बौद्धादिविरुद्धराद्धान्ततो व्यावृत्तिः तत्रानादरः। सक्तिरासक्तिराग्रह इति यावत्। ऋजुयोगिनामदुष्टबुद्धित्वस्य वेदादिसिद्धत्वादिहेतुं वैशब्देन सूचयति। प्रतिपक्षयुक्तिः प्रतिवादियोगः। उपाधिप्रतिपक्षौ तु क नामातीव दुर्वचावित्युक्तेः। अनुमाने सर्वत्र कथञ्चित्प्रतिपक्षयोगः संभावितः। अपि तु सर्वप्रतिपक्षयोगसंभावनापि नास्तीति भावेन नैवेत्युक्तम्। अत एवानुमित्याहेति योजना द्रष्टव्या। अनुमानपक्षे तु निजेन महसा व्याप्याख्यसामर्थ्येन निजे पक्षे स्वसाध्यधर्मविशिष्टे धर्मिणि व्याप्तिः सर्वत्र वृत्तिः। अन्यथा भागासिध्यापत्तेः। शिष्टं स्पष्टम्। शुद्धं पञ्चरूपोपपन्नं प्रमेयम्। अनुमितिरूपप्रमाकरणम्। आनन्दतीर्थमुनेरपि सकलशेमुषीनियामकतयास्मदाद्यनुमितिप्रमाकरणत्वमुपपादनीयमिति विवृतम्। अत्र यद्यपि 'शब्दजातस्य सर्वस्य यत्प्रमाणञ्च निर्णय' इति प्रमाणानुसारेण ब्रह्ममीमांसाशास्त्रानिर्णेयस्य शब्दराशेरलीकतया ब्रह्ममीमांसाशास्त्रस्यैव सन्दिग्धशास्त्रार्थत्वे सुतरां तन्निर्णये यस्य वेदेतिहासादेस्तथात्वेन सपक्षत्वोक्तिरयुक्ता। एवं बौद्धशास्त्रविरुद्धसिद्धान्तता चोदनापि नोचिता। अन्यथा 'पृष्टश्च तैराह निजं हृदिस्थं बौद्धागमार्थं स्मृतिबन्धमोचनमि'ति द्वात्रिंशदध्यायनिर्णयोक्तिविरोधप्रसङ्गात्। एवं प्रतिपक्षयुक्तिः प्रतिवादियोगो नैव इत्युक्तिरपि नौचितीमर्हति। श्रीसुमध्वविजये बहुशः प्रतिवादियोगाभिधानात्। तथापि वेदेतिहासादेरपरविद्यात्वेन सपक्षत्वोक्तिः। बौद्धादेर्विरुद्धसिद्धान्ततोक्तिर्यथाश्रुताभिप्रायेण। वस्तुतस्तु विपक्षतो विरुद्धसिद्धान्तादित्येव तत्र पाठो दृश्यत इति नैषा शङ्कोन्मिषति। प्रतिपक्षयुक्तिः प्रतिवादियोग इत्यत्र च योगशब्दः सामर्थ्यवाची। उपायवाची वा ज्ञेयः। प्राप्तोऽपि प्रतिवादिनः स्वपक्षसाधनायेष्टे। प्रत्युत जुगुप्सितमेव भाषते इति भावः। तदुक्तम्। आङादेशादुत्तरं रादिशब्दं श्रुत्वा नारेत्युक्तवन्तं पदं तम्। व्याख्यालील्यादैतरेयादिसूक्ते पृथ्वीदेवानिन्दनीयं निनिन्दुरित्यादि तत्र तत्र सुमध्वविजये। परिमले तु हरिभक्ताः सन्दिग्धतत्त्वनिर्णयाः पक्षाः। तेषु व्याप्तिः तेषु सर्वेषु स्वमाहात्म्यप्रवर्तनं सन्निधानं वा। सपक्षो भगवान्। तत्र निष्ठा स्थितिमात्रम्। न तु व्याप्तिः। ऋजुज्ञानस्येशादन्यत्रैव सर्वविषयत्वात् विपक्षो दुर्जनात्। व्यावृत्तिरित्यादि विवृतम्। तेषां भक्तजनधर्मिकतत्त्वनिर्णयविधेयकानुमितिकरणत्वरूपं मुख्यं हेतुत्वमनुमतमानन्दतीर्थस्येति ज्ञायते। अन्ये त्वानन्दतीर्थो मुनिः तत्त्वनिर्णायको भवितुमर्हति। शुद्धप्रमाणत्वात्। संमतवत्। आनन्दतीर्थो मुनिः शुद्धप्रमाणम्। पक्षधर्मत्वादिपञ्चरूपोपपन्नत्वात्। संप्रतिपन्नवदिति चानुमितेः। तेषामुत्तरत्र ब्रह्ममीमांसाशास्त्रस्य वेदेतिहासादेश्च क्रमात्कथं पक्षसपक्षत्वाभिधानमित्यादि विचार्यम्॥ ३॥

काशी०— तमेवेति श्लोकेऽहमेवेत्येवशब्दाभिप्रायं व्यञ्जयन् भाष्यकृतं प्रार्थयते व्याप्तिरिति। आनन्दतीर्थपक्षे निजे पक्षे सत्सिद्धान्ते स्वभावसामर्थ्येनैव व्याप्तिः कात्स्न्र्येन संबन्धः। कृत्स्नसिद्धान्ताभिज्ञतेति यावत्। सपक्षे परमात्मनि निष्ठा। विपक्षतो विरुद्धराद्धान्ताद्व्यावृत्तिस्तत्रासत्त्वनिश्चयः। यद्वा। सपक्षे योग्यजने तत्त्वोपदेशकत्वेन स्थितिर्विपक्षादयोग्यजनाद्व्यावृत्तिः। तदनुपदेष्टृत्वमिति यावत्। अथ च बाधिते विषये सक्तिर्मनोवृत्तिर्नैवेति (ऋजुयोगिनामदुष्टबुद्धित्वस्य वेदादिप्रसिद्धत्वादिति हेतुं वैशब्देन सूचयति) भ्रमात्यन्ताभाववत्त्वं निषिद्धविषये स्नेहराहित्यं वा विवक्षितम्। प्रतिपक्षयुक्तिः स्वतुल्यप्रतिवादियोगो नैवास्ति। अत एवातुलमनुपमं शुद्धं कदाऽपि बाधबुद्धचनवरुद्धं प्रमाणं प्रमापकम्। सत्सिद्धान्तप्रतिष्ठापक इति यावत्। स मुनिर्विचारग्रन्थनिर्माणेन मननशील इत्यनेन

व्याचक्षते । अथशब्दोऽवधारणे । विपक्षतः विरुद्धादद्वैतसिद्धान्ताद्व्यावृत्तिरेव । न तु कदाचित्तत्साधने स्वसामर्थ्यं घटयतीति भावः । बाधिते शशशृङ्गसत्त्वादौ सक्तिरासक्तिः नैव प्रतिपक्षयुक्तिः सत्प्रतिपक्षो नैवास्ति । तस्य स्वमते प्रतिज्ञातार्थविरोधेऽन्तर्भविन पृथगदोषतया तस्य च सक्तिर्नैव बाधित इत्यनेन निषेधादिति भावः । शुद्धं निर्दोषम् । प्रमाणमिव प्रमाणमिति रूपकं शब्दस्वाभाव्यान्नपुंसकत्वम् । अन्वयव्यतिरेकधूमानुमानमपि पक्षे सत्त्वं (१), सपक्षे सत्त्वं (२), विपक्षाद्व्यावृत्तिः (३), अबाधितविषयत्वं (४), असत्प्रतिपक्षत्वं चेति (५) पञ्चरूपोपपन्नमिति ज्ञेयम् । अत एव रूपकतया नात्र पक्षसाध्यहेत्वादिनिर्देशे क्लेशः कार्यः । तच्च प्रमाणमतुलम् असदृशं इतरकारणवृन्दस्येव प्रमातृप्रयोज्यत्वाभावात् । मन आदिशक्त्युद्बोधकतया प्राधान्येन प्रमाहेतुत्वाच्च । यो मनसि तिष्ठन्, द्रवतां हीन्द्रियाणां हि नियन्ता प्राण एकराडिति च श्रुतेः । स आनन्दतीर्थः आनन्दकरं तीर्थं बदर्याख्यक्षेत्रं वेदतन्मीमांसाशास्त्रं वा गुरुर्वा यथायथं यस्य यस्माद्यस्येति तथोक्तः । 'योनौ जलावतारे च मन्त्राद्यष्टादशस्वपि । पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यादि'ति हलायुधः । 'निपानागमयोस्तीर्थमृषिजुष्टजले गुरावि'ति चामरः । मुनिर्ज्ञानी संन्यासी वा । 'स हि लोके मुनिर्नान्यो यः कामक्रोधवर्जितः' इति गीताभाष्योक्तेः । तत्त्वनिर्णयाय तादर्थ्ये चतुर्थी । भूयादिति पृथक्पृथगन्वयः । 'ऐश्वर्यादिगुणैः षड्भिः सामर्थ्यात्सर्वदेवताः । भगवच्छब्दवाच्यास्तत्साक्षात्तु भगवान्हरिः । निरपेक्ष्यं तु सामग्र्यं तस्य सर्वाधिकं यत' इत्येकादशतात्पर्योक्तेर्यथायथमुभयत्र भगवानिति विशेषणं योज्यम् । एतेन चतुर्मुखोऽपि प्रार्थितो ज्ञेयः । यद्वा भाष्ये गुरूश्चेति बहुवचनसूचितपदेन 'नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्' इति शिष्टानुष्टितं पुष्णन्तष्टीकाकृच्चरणा एकोक्त्या नरनारायणौ प्रार्थयन्ते व्यासिरित्यादिना । यस्य नरस्य नारायणस्य वा क्रमात् निजे पक्षे स्वस्वतपसि निजेन महसा व्यासिर्निष्ठा । आस्तिक्यबुद्धिः । सपक्षे मिथस्तपसि स्थितिर्निष्ठा संमतिः । विपक्षतो भ्रष्टजनात् । व्यावृत्तिः । तत्रानादर इत्यादि यथायथं योज्यम् । शिष्टं प्राग्वत् । तदुक्तं भागवते 'धर्मस्य दक्षदुहितर्यजनि स्वमूर्त्या नारायणो नर इति स्वतपःप्रभावः । दृष्ट्वात्मनो भगवतो नियमावलोपं देव्यस्त्वनङ्गपृतधाघटितुं न शेकुरि'ति । नरः शेषः । तदुक्तं द्वितीयतात्पर्ये 'नरो नारायणश्चैव हरिः कृष्णस्तथैव च । चत्वारो धर्मतनया हरिरेव त्रयो मताः । अनन्तो नरनामा च तस्मिंस्तु नरनामवान् । विशेषेण स्वयं विष्णुः निवसत्यंबुजेक्षण' इति । मुनित्वं तु गार्हस्थ्यं च यतित्वं च देवेष्वेकत्वमागतम् । प्राधान्योक्तिर्यतित्वस्य गार्हस्थ्यस्य क्वचित्क्वचिदि'त्येकादशतात्पर्यवचनानुसारेण यथासंभवमुपपादनीयं सर्वत्र । नरनारायणौ बदर्यां लोकशिक्षार्थं तपोऽनुतिष्ठ इति हि पौराणिकी प्रसिद्धिः ॥ श्रीरामकृष्णौ प्रार्थयन्ते व्यासिरित्यादिना । यस्य श्रीरामस्य कृष्णस्य वा निजे पक्षे क्रमात् सीता भैष्म्याहरणादौ व्यासिर्निष्ठा । सपक्षे सुग्रीवार्जुनादिपरिरक्षणे क्रमात् । स्थितिः निष्ठा । तयोर्हनूमद्भीमार्थत्वात्सपक्षत्वं ज्ञेयम् । तदुक्तं श्रीमन्महाभारततात्पर्यनिर्णये । सोऽवतारे तस्मात्स मारुतिकृतेरविजं ररक्ष । एवं स कृष्णतनुरर्जुनमप्यरक्षद्भीमार्थमेवेति । सः रामः । रविजं सुग्रीवम् । शिष्टं प्राग्वत् ॥ ३ ॥ एवं हनूमद्भीममध्वादिपरतया प्रकारान्तरेणापीदं पद्यं नेयमपि ग्रन्थविस्तरत्रासादेवोपरम्यते । आचार्यपरतामेव पूर्वाचार्याः समभ्यधुः । तथापि न न्यषेधंस्ते पद्यस्यास्येतरार्थतां न्यायमप्रतिषिद्धं यत्तदिहानुमतं हृदि । एतस्यालंब्य विवृत्तिरितरार्थतयोचितेति ॥ २ ॥ सुधाटिप्पण्यां तु आनन्दतीर्थपक्षे निजः पक्षो ब्रह्ममीमांसाशास्त्रं विप्रतिपत्त्या सन्दिग्धसाध्यार्थत्वात् । तत्र व्यासिर्निष्ठा । ननु परभाष्यकारस्येवानादरः । तेन श्रुतिस्मृत्योर्विरोधे सूत्राणां कथञ्चियोज्यत्वस्योक्तत्वात् । निजेन स्वाभाविकेनैव न वरादिलब्धेन महसा

साध्यसाधनसामर्थ्येनेत्यर्थः। सपक्षे निर्णीतार्थतया निश्चिते वेदेतिहासौ स्थितिर्निष्ठा। विपक्षतो बौद्धादिविरुद्धराद्धान्ततो व्यावृत्तिः तत्रानादरः। सक्तिरासक्तिराग्रह इति यावत्। ऋजुयोगिनामदुष्टबुद्धित्वस्य वेदादिसिद्धत्वादिहेतुं वैशब्देन सूचयति। प्रतिपक्षयुक्तिः प्रतिबादियोगः। उपाधिप्रतिपक्षौ तु क नामातीव दुर्वचावित्युक्तेः। अनुमाने सर्वत्र कथञ्चित्प्रतिपक्षयोगः संभावितः। अपि तु सर्वप्रतिपक्षयोगसंभावनापि नास्तीति भावेन नैवेत्युक्तम्। अत एवानुमित्याहेति योजना द्रष्टव्या। अनुमानपक्षे तु निजेन महसा व्याप्याख्यसामर्थ्येन निजे पक्षे स्वसाध्यधर्मविशिष्टे धर्मिणि व्याप्तिः सर्वत्र वृत्तिः। अन्यथा भागासिध्यापत्तेः। शिष्टं स्पष्टम्। शुद्धं पञ्चरूपोपपन्नं प्रमेयम्। अनुमितिरूपप्रमाकरणम्। आनन्दतीर्थपुनेरपि सकलशेमुषीनियामकतयास्मदाद्यनुमितिप्रमाकरणत्वमुपपादनीयमिति विवृतम्। अत्र यद्यपि 'शब्दजातस्य सर्वस्य यत्प्रमाणश्च निर्णय' इति प्रमाणानुसारेण ब्रह्ममीमांसाशास्त्रानिर्णेयस्य शब्दराशेरलीकतया ब्रह्ममीमांसाशास्त्रस्यैव सन्दिग्धशास्त्रार्थत्वे सुतरां तन्निर्णये यस्य वेदेतिहासादेस्तथात्वेन सपक्षत्वोक्तिरयुक्ता। एवं बौद्धशास्त्रविरुद्धसिद्धान्तता चोदनापि नोचिता। अन्यथा 'पृष्टश्च तैराह निजं हृदिस्थं बौद्धागमार्थं स्मृतिबन्धमोचनमि'ति द्वात्रिंशदध्यायनिर्णयोक्तिविरोधप्रसङ्गात्। एवं प्रतिपक्षयुक्तिः प्रतिवादियोगो नैव इत्युक्तिरपि नौचितीमर्हति। श्रीसुमध्वविजये बहुशः प्रतिवादियोगाभिधानात्। तथापि वेदेतिहासादेरपरविद्यात्वेन सपक्षत्वोक्तिः। बौद्धादेर्विरुद्धसिद्धान्ततोक्तिर्यथाश्रुताभिप्रायेण। वस्तुतस्तु विपक्षतो विरुद्धसिद्धान्तादित्येव तत्र पाठो दृश्यत इति नैषा शङ्कोन्मिषति। प्रतिपक्षयुक्तिः प्रतिवादियोग इत्यत्र च योगशब्दः सामर्थ्यवाची। उपायवाची वा ज्ञेयः। प्राप्तोऽपि प्रतिवादिनः स्वपक्षसाधनायेष्टे। प्रत्युत जुगुप्सितमेव भाषते इति भावः। तदुक्तम्। आङादेशादुत्तरं रादिशब्दं श्रुत्वा नारेत्युक्तवन्तं पदं तम्। व्याख्यालौल्यादैतरेयादिसूक्ते पृथ्वीदेवानिन्दनीयं निनिन्दुरित्यादि तत्र तत्र सुमध्वविजये। परिमले तु हरिभक्ताः सन्दिग्धतत्त्वनिर्णयाः पक्षाः। तेषु व्याप्तिः तेषु सर्वेषु स्वमाहात्म्यप्रवर्तनं सन्निधानं वा। सपक्षो भगवान्। तत्र निष्ठा स्थितिमात्रम्। न तु व्याप्तिः। ऋजुज्ञानस्येशादन्यत्रैव सर्वविषयत्वात् विपक्षो दुर्जनात्। व्यावृत्तिरित्यादि विवृतम्। तेषां भक्तजनधर्मिकतत्त्वनिर्णयविधेयकानुमितिकरणत्वरूपं मुख्यं हेतुत्वमनुमतमानन्दतीर्थस्येति ज्ञायते। अन्ये त्वानन्दतीर्थो मुनिः तत्त्वनिर्णायको भवितुमर्हति। शुद्धप्रमाणत्वात्। संमतवत्। आनन्दतीर्थो मुनिः शुद्धप्रमाणम्। पक्षधर्मत्वादिपञ्चरूपोपपन्नत्वात्। संप्रतिपन्नवदिति चानुमितेः। तेषामुत्तरत्र ब्रह्ममीमांसाशास्त्रस्य वेदेतिहासादेश्च क्रमात्कथं पक्षसपक्षत्वाभिधानमित्यादि विचार्यम्॥ ३॥

काशी०— तमेवेति श्लोकेऽहमेवेत्येवशब्दाभिप्रायं व्यञ्जयन् भाष्यकृतं प्रार्थयते **व्याप्तिरिति**। आनन्दतीर्थपक्षे निजे पक्षे सत्सिद्धान्ते स्वभावसामर्थ्येनैव व्याप्तिः कात्स्न्र्येन संबन्धः। कृत्स्नसिद्धान्ताभिज्ञतेति यावत्। सपक्षे परमात्मनि निष्ठा। विपक्षतो विरुद्धराद्धान्ताद्व्यावृत्तिस्तत्रासक्त्वनिश्चयः। यद्वा। सपक्षे योग्यजने तत्त्वोपदेशकत्वेन स्थितिर्विपक्षादयोग्यजनाद्व्यावृत्तिः। तदनुपदेष्टृत्वमिति यावत्। अथ च बाधिते विषये सक्तिर्मनोवृत्तिर्नैवेति (ऋजुयोगिनामदुष्टबुद्धित्वस्य वेदादिप्रसिद्धत्वादिति हेतुं वैशब्देन सूचयति) भ्रमात्यन्ताभाववत्त्वं निषिद्धविषये स्नेहराहित्यं वा विवक्षितम्। प्रतिपक्षयुक्तिः स्वतुल्यप्रतिवादियोगो नैवास्ति। अत एवातुलमनुपमं शुद्धं कदाऽपि बाधबुद्ध्यनवरुद्धं प्रमाणं प्रमापकम्। सत्सिद्धान्तप्रतिष्ठापक इति यावत्। स मुनिर्विचारग्रन्थनिर्माणेन मननशील इत्यनेन

मूलग्रन्थस्य पूर्वोक्तविशेषणलभ्यपरमाप्तादिमूलकत्वेन परमप्रामाण्यगाम्भीर्यादिमत्त्वात्तदनुग्रहेणैव व्याख्येयत्वमुचितमिति सूचितम् । अनुमानपक्षे (यादुपत्ये– अनुमाने कथञ्चित्प्रतिपक्षयोगः संभावितः । उपाधिप्रतिपक्षौ तु क्व नामातीव दुर्वचावित्युक्तेः । अस्य तु प्रतिपक्षयोगसंभावनाऽपि नास्तीत्यभिप्रायेण नैवेत्युक्तम्) । निजे पक्षे सन्दिग्धस्वसाध्यधर्मिणि साधनतावच्छेदकरूपेण स्वसामर्थ्येन व्याप्तिः कात्स्न्र्येन वृत्तिरूपेण सिद्धसाधनस्वरूपासिद्धिभागासिद्धिसाधनाप्रसिद्ध्यादिनिरासः । सपक्षस्थितिविपक्षव्यावृत्तिभ्यामसाधारण्यानैकान्त्यादिव्युदासः । बाधिते विषये न संबन्धो नापि प्रतिपक्षयुक्तिरिति बाधसत्प्रतिपक्षयोः प्रतिक्षेपः । अतुलमिति प्रकरणसाम्यराहित्यमुक्तम् । अत एव शुद्धं निर्दोषम् । ईदृशं चानुमानं प्रमाणमेवेति । नन्वनुमानमिवाचार्यस्तत्त्वनिर्णयाय भूयादिति विवक्षितार्थो न युक्तः । केवलानुमानस्य तत्त्वनिर्णायकत्वाभावादिति चेन्न । आगमजन्याप्रामाण्यशङ्कयनास्कन्दिततत्त्वनिर्णयस्य न्यायानुसन्धानरूपानुमानापेक्षत्वात् । तादृशस्यैव च प्रकृते विवक्षितत्वान्न कश्चिद्दोषः ॥ ३ ॥

गूढ०— ध्यानं च न ज्ञानं विना, तच्च प्रमाणेन विना न संभवतीत्यतस्तज्ज्ञानजनकं किं प्रमाणमित्यतः प्रमाणत्वेन भाष्यकर्तृनभिष्टौति व्याप्तिरिति । स आनन्दतीर्थो मुनिः तत्त्वनिर्णयाय मे प्रमाणं भूयादित्यर्थः । न चानन्दतीर्थः किं प्रत्यक्षं स्यात् अनुमानं वा आगमो वा । नाद्यः तस्येन्द्रियरूपत्वाभावात् । न द्वितीयः । व्याप्त्यादेरभावात् । न तृतीयः । तस्य शब्दरूपत्वाभावादिति चेन्मैवम् । तस्यानुमानरूपप्रमाणत्वाभ्युपगमात् । नन्वनुमानशब्दस्यानुमानाभासेऽपि प्रयोगात् किमयमनुमानाभासः नेत्याह शुद्धमिति । व्यभिचारादिदोषशून्यमित्यर्थः । तर्हि किं धूमानुमानवदिदमनुमानमिति नेत्याह अतुलमिति । प्रसिद्धानुमानविलक्षणमित्यर्थः । तथापि व्याप्त्याद्यभावात् कथमनुमानत्वमित्यत उक्तम् व्याप्तिर्यस्येति । यस्य निजेन महसा स्वरूपभूतनंजोरूपेण हरिणा व्याप्तिरस्ति । निजे पक्षे सपक्षे स्थितिः विपक्षतो व्यावृत्तिः बाधिते विषये सत्किर्न वै यस्य प्रतिपक्षयुक्तिर्नैवास्तीति संबन्धः । एवंरूपोपपन्नत्वाद्युक्तमस्यानुमानत्वमिति भावः । नन्वानन्दतीर्थस्य हेतुत्वे किं साध्यं हरिर्वा सर्वोत्तमत्वं वा नाद्यः । तथात्वे पक्षाभावप्राप्तेः । न च सज्जनानामेव पक्षत्वमिति वाच्यम् । तथा सति सपक्षाभावेन पञ्चरूपोपपन्नत्वाभावापत्तेः । न द्वितीयः । हरिनिष्ठसर्वोत्तमत्वस्यान्यत्रासंभवेन व्याप्तिग्रहणायोगादिति चेन्मैवम् । हरिः सर्वोत्तमः आनन्दतीर्थवत्वादिति सर्वोत्तमत्वस्यैव साध्यत्वात् । न चैवं सर्वोत्तमत्वस्यान्यत्रासंभवेन सपक्षाभावाद्व्याप्तिग्रहणायोग इति वाच्यम् । रामकृष्णाद्यवताराणामेव सपक्षत्वात्तत्र चानन्दतीर्थवत्त्वस्य सर्वोत्तमत्वस्य च सत्त्वान्न कश्चिद्दोषः । न च प्रेरकत्वेनानन्दतीर्थवत्वस्य सज्जनादिष्वपि सत्त्वेन तत्र साध्याभावाद्व्यभिचार इति वाच्यम् । तदधीनत्वेनानन्दतीर्थवत्वस्य विवक्षितत्वात्सज्जनादिषु च तदभावान्न व्यभिचारः । न च लक्ष्म्या तदधीनत्वेन आनन्दतीर्थवत्वेऽपि सर्वोत्तमत्वाभावाद्व्यभिचारो दुष्परिहर एवेति वाच्यम् । तत्स्वतन्त्रत्वेनानन्दतीर्थवत्त्वस्य विवक्षितत्वात् । लक्ष्म्याश्च स्वातन्त्र्याभावान्न व्यभिचारः । हेतुसिद्धिस्त्वागमादेव द्रष्टव्या । यद्वा सज्जनाः हरिमन्तः आनन्दतीर्थवत्वात् । न च सपक्षाभावः । सज्जनैकदेशस्य पक्षत्वेनैकदेशान्तरस्य सपक्षत्वोपपत्तेः । (अत्र ग्रन्थपातः) न च विनिगमकाभावात् ।

पांघ्री श्रीनिवासाचार्याः— श्रीः ॥ भारतीरमणपूज्याय नमः ॥ अस्यैव उपपादनं **व्यासिरिति** । अयमत्र प्रयोगः— हरिः सर्वोत्तमः आनन्दतीर्थवत्त्वात् । व्यतिरेकी अपि अयं हेतुः, आनन्दतीर्थवत्त्वं साध्याभावव्यापकीभूत-अभावप्रतियोगीति ज्ञानेन । यत्र यत्र आनन्दतीर्थवत्त्वं तत्र तत्र सर्वोत्तमत्वं, व्यासवत्; इति अन्वय एव पर्यवस्यति । –इति अभिप्रेत्य एवमुक्तं **व्यासिर्यस्य निजे निजेन महसा पक्षे सपक्षे स्थितिरिति** । हेतोः हरित्वेन पक्षत्वं व्यासत्वेन सपक्षत्वमिति । **व्यावृत्तिरिति** । विपक्षः जडजीवादि, तस्माद् व्यावृत्तिः । तत्रायं हेतुरविद्यमान इति । व्यभिचारादिशून्य इत्यर्थः । ननु विपक्षभूते ब्रह्मादिजगति प्रेरकत्वेन आनन्दतीर्थवत्त्वस्य सत्त्वात् कथं तद्व्यावृत्तिः इति चेत्, – न; तदधीनत्वरूपधर्मावच्छिन्नानन्दतीर्थवत्त्वस्य हेतुत्वेन विवक्षितत्वात् तस्य च विपक्षे अभावात् । **सक्तिरिति** । यस्य बाधिते अर्थे सक्तिर्नास्ति । आनन्दतीर्थवत्त्वहेतुः बाधितो न भवति इत्यर्थः । बाधो नाम पक्षतावच्छेदकाव-च्छिन्ने साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावः । हरित्वावच्छिन्ने सर्वोत्तमत्वावच्छिन्नप्रतियोगिताक-सर्वोत्तमत्वाभावे हि स स्यात् । न च सोऽस्ति हरौ । सर्वोत्तमत्वस्य अनेकप्रमाणसिद्धत्वात्, इति । ननु सिद्धत्वे कथं साधनमिति चेत्, न । सिद्धमपि असिद्धं भ्रान्त्या मन्वानं शिष्यं प्रति तत्साधनात् । ननु पक्षसाध्ययोः भेदो अभेदो वा विवक्षितः । नाद्यः । 'एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति' इति निषेधात् । न द्वितीयः । साधनायोगात् । इति चेत्, मैवं; सविशेषाभेदाङ्गीकारेण उपपत्तेः । ननु अत्र बाधः तदवस्थः हरौ सर्वोत्तमत्वाभावत्वावच्छिन्नप्रतियोगिताकसर्वोत्तमत्वाभावाभावेऽपि व्यधिकरणधर्मावच्छिन्नव्यासज्यवृत्तिधर्माव-च्छिन्नप्रतियोगिताकसर्वोत्तमत्वाभावस्य सत्त्वात् इति मैवम् । व्यधिकरणधर्मानवच्छिन्नव्यासज्यवृत्तिधर्मा-नवच्छिन्नप्रतियोगिताकसाध्याभावस्य विवक्षितत्वात् । **नैवास्ति प्रतिपक्षयुक्तिरतुलमिति** । प्रतिपक्षयुक्तिः सत्प्रतिपक्षयुक्तिः प्रकरणसमयुक्तिश्च यस्य नैवास्ति । प्रकरणसमादिदोषशून्य इत्यर्थः । ननु गृहीताप्रामाण्यक-पक्षविशेष्यकाभिमतसंसर्गक-साध्यवत्त्वोपस्थितिकालीन-तदभावव्याप्यवत्त्वोपस्थितिविषयत्वं सत्प्रतिपक्षादि-त्वम् । तच्च विमतः सर्वोत्तमः तदधीनत्वधर्मावच्छिन्नानन्दतीर्थवत्त्वात् इति अनुमाने वर्तते; विमतः न सर्वोत्तमः आनन्दतीर्थवत्त्वात्, विमतः न सर्वोत्तमः चित्त्वात्, इत्यादिप्रयोगसौलभ्यात् इति चेन्न; पारतन्त्र्यस्य उपाधित्वात् । नित्यो नित्यानां चेतनश्चेतनानामित्यादिषु भगवतः चेतनचेतनत्वश्रवणात् । चित्त्वाभावेन असिद्धेश्च । अत एव अतुलं समकक्षविरोध्यनुमानशून्यम् । **शुद्धम्** विरोधादिदोषशून्यं श्रुतिविरोधादिदोषशून्यं च । ननु आनन्दतीर्थवत्त्वहेतुः विरुद्धः प्रलया(दि-अ)वच्छिन्नसाध्यव्यापकीभूताभावप्रतियोगित्वात् । न हि प्रलयाद्यव-च्छेदेन आनन्दतीर्थः अस्ति । असिद्धश्च अयं हेतुः । पक्षतावच्छेदकविशिष्टे हेतुतावच्छेदकावच्छिन्नस्य अभावोऽसिद्धिः । सा च प्रकृते वर्तते । (न च) विमतिविषयत्वलक्षणपक्षतावच्छेदकवत्त्वविशिष्टे हरौ हेतुतावच्छेदकीभूतानन्दतीर्थवत्त्वत्वावच्छिन्नानन्दतीर्थवत्त्वं हेतुः; अतो न विरुद्धः, नापि असिद्धः इति वाच्यम् । प्रतिवाद्यसम्मतेः । न हि प्रतिवादिनये जगदुत्पत्तेः प्राक् प्रलये वा आनन्दतीर्थो वर्तते । इति चेत् मैवम् । प्रलयाद्यवच्छेदेनापि पक्षे हेतोः अङ्गीकारात् । सयुक्तिकं च एतत् । जयाद्वारा सङ्कर्षणे लीनस्य हनुमदाद्यनन्त-व्यूहात्मकस्य आनन्दतीर्थस्यैव कल्पान्तरे ब्रह्मत्वाङ्गीकारात् । आनन्दतीर्थाभावे कथं तत्स्यादिति । परस्तु आनन्दतीर्थवत्त्वहेतुः न विरुद्धः । प्रलयाद्यवच्छिन्न(साध्य)व्यापकीभूताभावप्रतियोगित्वेऽपि कालविशेष-

विवक्षानवच्छिन्नसाध्यव्यापकीभूताभावप्रतियोगित्वात् । नापि असिद्धः । पक्षतावच्छेदकसामानाधिकरण्येन हेतोः अभावेऽपि पक्षतावच्छेदकावच्छेदेन तत्सत्त्वादित्यादि प्रत्याख्यातव्यम् इत्यादि दिक् । ननु आनन्दतीर्थवत्त्वं व्यभिचरितं रमायां तदधीनधर्माक्रान्तानन्दतीर्थवत्त्वस्य सत्त्वेऽपि सर्वोत्तमत्वस्य अभावादिति चेन्न । स्वतन्त्राधीनत्वधर्मावच्छिन्नानन्दतीर्थवत्त्वस्य हेतुत्वेन विवक्षितत्वादिति ॥

वायुपत्नी-भारती-सन्निधिं अर्थयते—

सु०— भवति यदनुभावादेडमूकोऽपि वाग्मी
जडमतिरपि जन्तुर्जायते प्राज्ञमौलिः ।
सकलवचनचेतोदेवता भारती सा
मम वचसि निधत्तां सन्निधिं मानसे च ॥ ॥ ४ ॥

परि०— देवीं सरस्वतीं व्यासमिति शिष्टाचारशिक्षामनुसृत्य वायुपत्नीसन्निधिमर्थयते **भवतीति** ॥ एडमूकः वक्तुं श्रोतुमशक्तः 'जडोऽज्ञ एडमूकस्तु वक्तुं श्रोतुमशिक्षितः' इत्यमरोक्तेः । किम्वनीदृश इति कैमुत्यार्थोऽपिशब्दः । वाग्मित्वभवने प्राज्ञमौलित्वभवने च हेतुः **सकलवचनचेतोदेवतेति** ॥ ४ ॥

वायु०— यदनुभावात् अनुग्रहात् । यदनुभावाभावे वाग्म्यपि मूको भवतीति व्यतिरेकसमुच्चायको अपिशब्दः । एवमग्रेऽपि । अनेन वाग्देवतात्वमुपपाद्य चेतोदेवतात्वमुपपादयति **जडमतिरपीति** ॥ ४ ॥

वं०प०— ग्रन्थकरणस्य वाक्चेतोव्यापाररूपत्वेन तद्देवतां भारतीं प्रार्थयते **भवतीति** ॥ ४ ॥

आनन्दः— सरस्वतीं प्रार्थयते भवतीति ।

श्रीनिधि०— एडमूकः बधिरमूकः । **जडमतिः** मन्दमतिः ।

वा०चं०— वाङ्मनसयोर्भारतीसन्निधिप्रार्थनानिमित्तं सहेतुकं वदन्नेव तां प्रार्थयते भवतीति । 'स्यादेडे बधिरः प्रज्ञो गडुलः कुकरे कुणिरि'त्यभिधानात् एडो बधिरश्चासौ मूकश्चेति विग्रहः ॥ ४ ॥

वा०र०— प्रार्थनानिमित्तमिति । सकलवचनचेतोदेवतात्वरूपं निमित्तमित्यर्थः । **सहेतुकमिति** । भवतीत्यादिनोभयदेवतात्वक्रमेण हेतुकथनादिति भावः । व्याख्यानौपयिकवागादिप्रवृत्त्यर्थं इति शेषः । तां भारतीमित्यत्र सन्निधिकर्तृत्वेनेति पूरणीयम् । भारतीसन्निधिप्रार्थनेत्युक्तत्वात् । स्यादेडे बधिर इत्यमरवाक्ये गडुल इति पाठः । गडुरस्यास्तीति गडुलः । सिध्मादित्वात् लचिति ङीरस्वाभ्युक्तेः । क्वचित् जडुलः इति जकारपाठो

लेखकागतः। यद्यपि स्यादेडे बधिरः कुब्जे इति कुब्जपदमेवामरे पठितम्। न प्रज्ञाविति पदम्। एडा पशुरेव एडः। बद्धौ कर्णौ अस्य बधिरः। कुत्सित उब्जः कुब्जः। पृषोदरादिरिति क्षीरस्वामीयं व्याख्यानं च। तथाच प्रज्ञाविति कथमित्याभाति। तथापि 'प्रसंभ्यां जानुनोर्ज्ञुः' इति सूत्रानुसारेण प्रगते जानुनी अस्येति प्रज्ञुरिति कुब्जशब्दसमानार्थक प्रज्ञुशब्दस्यापि स्थलान्तरे पाठात्। तदनुसारेणात्र प्रज्ञावित्युक्तम्। अत एव सञ्जुः संहतजानुक इति पूर्ववाक्य-व्याख्यानावसरे संहते च जानुनी अस्य प्रसंभ्यां जानुनोर्ज्ञुः इत्युक्तमिति ज्ञेयम्। **विग्रह इति**। विशेषणं विशेष्येण बहुलमिति बहुलग्रहणात् विशेषणयोरेव समास इति भावः। यद्वा मूकत्वविशिष्ट एव विशेष्यमिति भावः। यदनुभावादिति मूले यस्याः अनुभावः सामर्थ्यम्। अत्र चानुगतो भावो अनुभाव इति घञन्तेन भावशब्देन प्रादि-समासः। न तु सोपसर्गात् भवतेः घञ्प्रत्ययः। श्रिणीभुवोऽनुपसर्गे इत्यनुपसर्गादेव तस्मात् तद्विधानात्। अत एव काशिकायां कथं प्रभावो राज्ञामितीत्याक्षिप्य प्रकृष्टो भावः प्रभावः इति प्रादिसमासो भविष्यति इति परिहृतम्॥ ४॥

स०व्र०— यदनुभावात् अनुग्रहात्। यदनुभावाभावे वाग्म्यपि मूको भवतीति व्यतिरेकसमुच्चायको अपिशब्दः। एवमग्रेऽपि। अनेन वाग्देवतात्वमुपपाद्य चेतोदेवतात्वमुपपादयति **जडमतिरपीति**॥ ४॥

कुण्डल०— सकलवाङ्मनसनियामिकायाः श्रीभारतीदेव्याः प्रसादस्य सर्वेषामवश्यमपेक्षिततया स्ववाङ्मनसयोस्तत्सन्निधानमाशास्ते **भवतीति**। **यदनुभावात्** यस्याः भारतीदेव्याः अनुग्रहात्॥

विद्व०— बुद्धचारोहाय दृष्टान्तोक्तिः। **यदनुभावात्** यदनुग्रहात्। **एडमूको** जातिबधिरमूकः। **जडमतिः** मन्दमतिः। **जाड्यं** मान्द्यमिति प्रयोगात्। जडवदकिञ्चित्कर इति वा। **देवता** अभिमानिनी।

रस०— श्रीहर्यपरोक्षतत्साधनादौ हरितद्दासोत्तमप्राणनायकयोरिव भारत्या अपि प्रसादोऽन्तरङ्गसाधनं स च श्रीहरिदत्ततद्योग्यव्यापारकारयितत्वज्ञानसाध्यः स च व्यापारोऽयमेव। यत्स्वप्राणवल्लभं मनोऽनुसारेण श्रीवल्लभवल्लभानां तल्लाभाय सदा मनसस्तल्लोलुपत्वप्रापणं तदर्थं वाचाऽविरतं तच्चरितामृतसरसीविहारित्वप्रदापनं तत्प्राप्तवचस्वाभिमन्यमानागमगततत्तद्योग्याशेषविशेषप्रदीपनमित्यादिकं वाचा वै वेदाः सन्धीयन्ते तद्यत्रैतदधीनतया भाषते वावाचि तदा प्राणो भवति। वाक्तदा प्राणेरेह्यिवाग्वै माता प्राणः पुत्रः। तं पाकेन मनसा पश्यमन्तितस्तं माता रेह्यिसउरेह्यिमातरमित्यादिसिद्धम्। अतस्तदर्थं तदर्थिभिरीदृशज्ञानादि संपाद्यमित्याशयेन तां प्रत्याशिषमाशास्ते **भवतीति**। मूक इत्येवोक्ते आदौ वक्ता रागादिना वचनसामर्थ्यशून्य इति प्रतीतिः स्यात् तादृशस्य वाग्मित्वा-पादकत्वं च न महामहिमापादकमत एवेत्युक्तम्। बधिरत्वे सति वचनाभावश्च जातिमूकस्यैवेति भवति तन्माहा-त्म्यद्योतकमिति। अत एव किमु वक्ता प्रतिबन्धादिना वक्तृत्वशक्तिविधुर इति कैमुत्यद्योतकोऽपिशब्दः। यदनु-भावादुक्ताद्यस्याः माहात्म्याज्ज्ञातान्निमित्तात् वाग्मी भवति। नन्वीदृशस्यापि तुलसीसेवनादिनापि वाग्मित्वप्राप्तिः श्रूयते तत्कथमेतदितरेभ्योऽतिशयाधायकमित्यतस्तदल्पमेतच्चानल्पमित्यनुशयेनासाधारणव्यपदेशविवक्षया वाग्मीति वचनम्। अल्पमपि तदेतदधीनमेवातोऽपि न दोष इत्यभिसन्धायोक्तं **यदनुभावादिति**। अत एव मौलिरिति वक्ष्यति।

जन्तुरित्येव वचने कस्यचिद्ब्रह्मणमिति प्रतीयेत तस्य प्राज्ञत्वप्रदानं च नान्यप्रकर्षप्रदमतो जडमतिर्मन्दमतिरित्युक्तम् । अपिपदं पूर्ववत् । ननु जडमतेरपि जन्तोर्गजाननपूजादिना विद्वत्सभासभाजनदर्शनात्कथमेतदित्यतः सत्यं तदितोऽल्पमेतदधीनं चेत्याशयेनोक्तं मौलिः श्रेष्ठो जायत इति । यस्याः गजाननाद्यन्तर्गताया एतस्या एवानुभावादिति च । एतद्वयमेतस्याः कथमित्यतस्तत्संभावनायोक्तं वचनचेतोदेवतेति । ननूमादीनामपि वागादिदेवतात्वं प्रसिद्धं तत्कथं विशिष्योच्यत इत्यत उक्तम् सकलेति । सकलानां वचनचेतोदेवतात्वेन प्रसिद्धानामपीति । सा भारती मम वचसि मानसे च सन्निधिं विधत्तामिति । श्रीहरिणेरितप्राणप्रेरणानुसारेणास्या अपि सकलवचनचेतः प्रेरकतया तथोपासनमावश्यकमिति सूचनाय वाण्यादिपदपरित्यागेन भारतीत्येवाह । श्रीहरिचरणसन्ततानुचिन्तनयोग्यानां तद्दानेन भरणेरतो हि भरतस्तस्येयं मतानुसारितयेति । भारतीशब्दार्थः शब्दार्थतत्त्वविदुषां प्राणो हि भरतो नाम सर्वस्य भरणाच्छ्रुतः । तद्वार्या भारतीनामेत्यादि भगवत्पादप्रदर्शितप्रकारेण प्रसिद्ध एवेति । एतदर्थमपि सेत्यावृत्त्य भारतीपदे योज्यम् । सा प्रसिद्धा भारतीति । पूर्वोक्तश्रीहरिध्यानादिरूपपुरुषार्थेषु व्यासादीनां त्रयाणामेवान्तरङ्गसाधनत्वमतस्तत्प्रसादन एवावहितैर्भवितव्यमिति भावेनाह भारती चेति । प्राणस्य मनोवचनयोः सन्निधिप्रार्थनं त्वध्यात्मनिदर्शनिन तत्त्वनिर्णयजनकत्वप्रार्थनान्यथानुपपत्त्या साक्षिरूपमनोभिमानित्वोक्त्या च सिद्धम् । प्राज्ञानसग्रहणमुपलक्षणमित्याशयेनाह मानसे चेति । ननूक्तप्रयोजनसिद्ध्यर्थं वचनादौ तस्याः सन्निधिप्रार्थनमयुक्तम् । तादृशप्रयोजनाधिकारिताया एवाभावादित्यत आह मम पुरुषार्थयोग्यस्येति । अनेन सेवकसंवासमेतगजसंवादवत् तदा सदा अस्य समवहितश्रीहरिदास्यमेवाशास्यमानसाधकमतः कथं विगतप्राणनायकप्राणप्रियाप्राणमप्रार्थनः प्रबन्धः परीक्षकशिक्षकः स्यादित्याशङ्कानिरसनेन स विवृतः । तत्रापि तदनुष्ठितमेव । निबन्धनं तु सर्वनिबन्धशिरोमणावस्मिन्प्रबन्धे कृतं शिष्यशिक्षकं भवतीति न कृतमिति सूचनात् । अथाऽप्यन्यत्र तत्र यत्किञ्चिन्निबध्नाति स त्वधिको लाभ इति ॥

ल०२०— तृतीयं गुरुत्वं भारत्यामस्तीति मनोवचनयोस्तत्सन्निधानमर्थयते भवतीति । यदनुभावात् यस्याः भारत्याः सामर्थ्यात् । एडमूकः एडो बधिरश्चासौ मूको वचनशून्यश्चेति तथोक्तः । एडत्वं विना केवलमूकत्वं नैमित्तिकमपि भवति । तादृशस्य वाग्मित्वापादनेन भारत्या माहात्म्यापादकम् । तत्समानाधिकरणं तु मूकत्वमौत्पत्तिकमेव भवति । तादृशस्य वाग्मित्वापादकत्वं अन्यत्रासंभावितम् । भारत्यास्तु तादृशानुभावादेवैडमूकोऽपि जन्तुर्योग्यचेतनो वाग्मी विशिष्टनिर्णयजनकशास्त्राभ्यासचतुरो भवति । किं पुनरैडमूकः । तथा जडमतिर्जाड्योपेतबुद्धिः । पशुप्रायोऽपि जन्तुः प्राज्ञमौलिः शास्त्रजन्यविशिष्टतत्त्वनिर्णयवान् जायते भवति । किं पुनरजडमतिः । सा सकलानां एडमूकानामैडमूकजडमत्यजडमतीनां वा सकलानि उक्तचतुष्टयजन्तुसंबन्धीनि सर्वाणि वा यानि वचनचेतांसि वाङ्मनांसि तेषां देवता नियन्त्रीति हेतुगर्भं विशेषणम् । भारती वायुर्हि भरतो नामेति निर्णयोक्तेर्भरतस्य वायोरियं महिषी मम वचसि मानसे च सन्निधिं निधत्ताम् । तयोः शास्त्राभ्यासजन्यविशिष्टनिर्णयानुकूलतायै तत्र सन्निहितास्त्विति योजना । भारतीपदेन वाल्मवतारानन्दतीर्थकार्यानुकूलत्वं द्योतयतीति ।

श्रीहरिर्दयालुरपि न साक्षात्सर्वानुपदिशति । किन्तु प्राणद्वारेत्युक्तम् । स प्राणोऽपि न साक्षात्सर्वानुपदिशति । उक्तेभ्य एव हेतुभ्यः । किन्तु भारतीद्वारा । सा प्राणावतारानन्दतीर्थोपदिष्टं तत्त्वं स्वयमवबुध्य वाङ्मनोदेवतात्वात्तत्र स्थित्वाऽनुकूलतया ते नियम्योपदिष्टं तत्त्वमधिकारिणां मनसाऽवभासयतीति तत्प्रसादाय तद्गुणानुवादपूर्वकमन्वयव्यतिरेकाभ्यां वाङ्मनोदेवतात्वमुपपादयंस्तयोस्तत्सन्निधानमर्थयते भवतीति । अर्थस्तूक्त एवानुसन्धेयः ।

चषकः— वाग्मित्वप्राज्ञमौलित्वयोः स्वानुग्रहव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वस्वसमवधानकालीनसमवहितिकत्वरूपस्वनिरूपितान्वयव्यतिरेकविशेषिततया प्रत्यायितवाङ्मनसदेवतात्विकाया भारत्यास्सन्निहितिं स्वीयवाङ्मनसयोरर्थयते भवतीत्यादि । अथ 'श्रिणीभुवोऽनुपसर्गे' इति सूत्रेऽनुपसर्गग्रहणात् प्रभव इतिवदनुभव इति भवितव्यतयाऽनूपसृष्टस्य भवतेर्धञ्प्रत्ययानवकाशे वानुग्रहवचनः कथमनुभावशब्दो निष्पद्यत इति चेन्मैवम् । कथं प्रभावो राज्ञ इत्यादिकमाशङ्क्य प्रकृष्टो भाव इति प्रादिसमास इति पाणिनीयास्समादधुरिति तदिशाऽनुसमस्तस्यैव भावशब्दस्यानुग्रहप्रत्यायकत्वोपगतेः ॥ **एडो बधिरः, स चासौ मूकश्चेति विग्रहः ॥ ४ ॥**

ए०बा०— अथ सकलवाङ्मनसदेवतयोर्भारतीसरस्वत्योः स्ववाङ्मनसयोः सन्निधिमेकोक्त्याशासते **भवतीति । भवति यदनुभावादेडमूकोऽपि वाग्मी जडमतिरपि जन्तुर्जायते प्राज्ञमौलिः । सकलवचनचेतो देवता भारती सा मम वचसि निधत्तां सन्निधिं मानसे च ॥ ४ ॥** यदनुभावात् यस्या भारत्याः सरस्वत्या वा अनुग्रहात् । एडो बधिरश्चासौ मूकश्चेति विशेषणयोरेव बहुलग्रहणात्समासः । स्यादेडे बधिर इत्यमरः । वाग्मी प्रशस्तवक्ता भवति । वाचो ग्मिनिरिति ग्मिनिः । **'वाचो युक्तिपटुर्वाग्मी वावदूकोऽतिवक्तरी'**त्यमरः । यदनुभावाभावे वाग्म्यप्येडमूको भवतीति ज्ञापनायापिशब्दः । किम्वनीदृश इति ज्ञापनायापिशब्द इत्यप्याहुः । प्राज्ञमौलिः । लुप्तोपमोऽयम् । प्राज्ञानां मौलिः शिरोरत्नमिव किरीटमिव मान्य इति भावः । मौलिः किरीटे धम्मिल्ल इति विश्वः । स्त्रीषु सारत्वात् सरस्वती **''सारत्वात् स्त्रीषु सा देवी''**ति बृहद्वाप्योक्तेः । यच्छब्दश्रवणात्तच्छब्दोऽध्याहार्यः । सा भारती सरस्वती च मम मानसे मनसि **'स्वान्तं हृन्मानसं मन'** इत्यमरः । सन्निधिं सन्निधानमिति प्रत्येकमन्वयः । डुधाञ् धारणपोषणयोरित्यत आशिषि लोडात्मनेपदम् ॥ ४ ॥

काशी०— भारत्याः सकलवाङ्मनोविशिष्टदेवतात्वमुपपाद्य तामर्थयते भवतीति । यदनुभावात् यदनुग्रहात् । बधिरमूकत्वादिविशिष्टोऽपि तन्निवृत्त्या परप्रश्नानुगुणसदुत्तरवक्तृत्वरूपवाग्मित्वादिविशिष्टो भवति किमन्य इत्यपिशब्दः । एडश्चासौ मूकश्चेति विग्रहः । तेन जडोऽज्ञे एडमूकस्तु वक्तुं श्रोतुमशिक्षित इत्यमरोक्तेरेडमूकशब्द एव नास्तीत्यपास्तम् । स्यादेडे बधिरः कुब्जे गडुलः कुकरे कुणिरिति तदुक्तेः । एडमूकसदृशस्तद्भिन्नोऽनेडमूक इति व्याख्यातत्वाच्च । परिमळे तु जडोऽज्ञ एडमूकस्त्वित्यमरपाठानुसारेण वक्तुं श्रोतुमशक्त इति व्याख्यातम् । जडत्वमूहाक्षमत्वादिसन्निधिं सानुग्रहस्थितिं करोत्वित्यर्थः ॥ ४ ॥

सन्न्यायरत्नावलिकर्तारं पद्मनाभतीर्थं प्रार्थयते—

सु०— रमानिवासोचितवासभूमिस्सन्न्यायरत्नावलिजन्मभूमिः ।
वैराग्यभाग्यो मम पद्मनाभतीर्थामृताब्धिर्भवताद्विभूत्यै ॥ ५ ॥

परि०— प्राचीनटीकाकारादभीष्टमाशास्ते **रमेति** ॥ सन्न्यायरत्नावल्याः अनुव्याख्यान-टीकाग्रन्थस्य जन्मभूमिः जनक इत्यर्थः । अब्धिपक्षे वैराग्यं शौक्ल्यं ध्येयम् ॥ ५ ॥

बं०प०— अनुव्याख्यानस्य पूर्वटीका सन्न्यायरत्नावली । तत्कर्तॄन् पद्मनाभतीर्थश्रीमच्चरणान् क्षीरसमुद्र-साम्येन वर्णयन् ज्ञानादैश्वर्यसाधनत्वं प्रार्थयते **रमानिवासेति** ॥ ५ ॥

आनन्दः— परमगुरून् प्रणमति **रमानिवास इति** । निवसत्यस्मिन्निति निवासः रमाया निवासो रमा-निवासः । तस्योचितवासभूमिरिति विग्रहः ।

श्रीनिधि०— उचितश्चासौ वासश्च उचितवासः । उचितश्चासौ वासभूमिश्चेति वा ।

वा०चं०— सन्न्यायरत्नावलिग्रन्थस्यात्रोपजीवनं व्यञ्जयन्नमृताब्धिश्लेषेण तत्कर्तॄन्प्रार्थयते **रमेति** । क्रमेण विशेषणत्रयेण भक्तिज्ञानवैराग्याणि व्यञ्जयन्ति । 'सर्व एव वान्नावादयोऽनन्वादेशे वा वक्तव्या' इत्युक्तेर्ममेति साधु । (किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः । कार्यं विधातुमपूर्वं बोधयितुमित्यर्थः । यथाऽनेन व्याकरणमधीतमेनं छन्दोऽध्यापयेति । अन्वादेशे तु नित्यं स्युः ।) एवमुत्तरत्रापि द्रष्टव्यम् ॥ ५ ॥

वा०र०— **अत्रोपजीवनमिति** । सत्तर्कदीपावल्यादिग्रन्थपरित्यागेन एतदनुव्याख्यानव्याख्यानरूप-सन्न्यायरत्नावलिमात्रग्रहणेनात्र तदुपजीवनस्य सूचनादिति भावः । अमृताब्धिश्लेषेणेति पाठः । श्लेषत्वेनेति लेखकागतम् । **विशेषणत्रयेणेति** । रमानिवासेत्यादिरूपविशेषणत्रयेणेत्यर्थः । त्रयेणेत्यनन्तरं क्रमेणेति मूल-कोशानुसारी पाठः । तदभावो लेखकप्रयुक्तः । **भक्तिज्ञानेत्यादि** । रमानिवासस्य उचिताऽभ्यन्ता । अभ्यस्ने-त्युचितं न्याय्यं इति यादवोक्तेः । वासभूमिरित्युक्ते भगवति सुदृढश्लेषप्रतिपादनलाभात् भक्तिव्यञ्जनसिद्धिः । सन्न्यायेत्यनेन वेदार्थनिर्णायकन्यायकल्पाश्रयत्वोक्त्या ज्ञानव्यञ्जनम् । वैराग्यभाग्य इत्यनेन वैराग्यस्य व्यञ्जनमिति स्पष्टमेवेति ध्येयम् । पदात् परत्वात् पादादौ स्थितत्वादिलक्षणसद्भावात् तेमयावेकवचनस्येत्यनेन मयादेशप्राप्तेः ममेति कथं इत्यत आह **सर्व एवेति** । उत्तरस्य पुनरुक्तिरन्वादेशः तदभावे वान्नावित्याद्यादेशानां विकल्पविधानात् इत्यादेशाप्राप्तिपक्षे ममेति प्रयोगस्य साधुत्वादिति भावः । **उत्तरत्रापीति** । गुरून्ममेत्युत्तरश्लोकेऽपीत्यर्थः । अत्र मच्चरणात् इति प्रथमपुरुषैकवचनमिति ध्येयम् ॥ ५ ॥

कुण्डल०— सन्न्यायरत्नावलीकारं श्रीपद्मनाभतीर्थं प्रार्थयते **रमेति** । निवसत्यस्मिन्निति निवासः । अधिकरणे घञ् । रमायाः निवासः श्रीनारायणः, तस्योचितवासभूमिः । शिष्टं स्पष्टम् ॥

रस०— 'स पद्मनाभतीर्थोऽर्कगोगणोऽस्तु दृशे मम। न तत्त्वमार्गे गमनं विना यदुपजीवनमि'त्युदितोपजीव्यत्वप्रकारं प्रकटयन् प्राचीनटीकाकारात् श्रीपद्मनाभतीर्थादैश्वर्यमर्थयते रमेति। पद्मनाभतीर्थाख्यः समुद्रो ममाधिकारिणः विशिष्टज्ञानान्तरङ्गसाधनभूता भूतिर्विभूतिस्तस्यै भवतादिति योजना। विभूतिशब्दार्थं व्यञ्जयन् सुधासिन्धुप्रयोजकधर्मानाह रमेत्यादिना। अमृताम्भोधिर्हि रमायाः निवासस्यावस्थानस्योचिता योग्या वासभूमिः पितृगेहरूप इति। लक्ष्मीनिवासभूतस्य हरेरुचिता सर्वैः श्लाघ्या वासभूमिरावासयोग्यस्थानभूत इति वा तस्यैव तत्प्रियस्थानत्वेन पुराणादिप्रसिद्धत्वात्। अयं तु सर्वदा श्रीहरिध्यातृतया विशेषतस्तत्सन्निधानपात्रमिति सर्वसंमत इति। अनेन भक्तिमत्त्वं सूचितम्। भक्तिं विना प्रीतिपूर्वकश्रीहरिसन्निधानपात्रत्वायोगात्। तथा रत्नावलीनां जन्मभूमिरयं तु सन्तो निर्दोषा ये न्यायास्त एव रत्नानि तेषां सङ्ग्रथनात्तन्नामकस्य ग्रन्थस्योत्पादकः अनेन ज्ञानवत्त्वं सूचितम्। तदभावे ग्रन्थनिर्माणायोगात्। तथा वैराग्यं शौक्ल्यं भाग्यं यस्य तादृशोऽयं तु विषयविरक्तिरूपभाग्यवान्। एतद्विशेषणत्रयमुपजीव्यत्वप्रकारसूचकमिति सुधीभिर्विभावनीयम्। विभूतिप्रार्थनमप्येतमेवार्थं समर्थयते। अनेन कृपालवप्राप्यप्रयोजनप्रथनेन प्रार्थनीयत्वप्रयोजकप्रकटनेन च श्रीमध्वेति श्लोको विवृत इति॥

ल०र०— चतुर्थं गुरुत्वं पद्मनाभतीर्थेऽस्तीति ततो वैराग्यादिविभूतिमाशास्ते रमेति। रमानिवासोचितवासभूमिरित्यनेन पद्मनाभतीर्थस्य श्रीनिवासप्रेमपात्रत्वं प्रतीयते। ततः 'प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रिय' इत्युक्तेस्तत्प्रेमपात्रत्वं श्रीनिवासस्य च प्रतीयते। तदुभयमपि सन्न्यायरत्नावलीग्रन्थकरणे वैराग्यभाग्ये च हेतुः। न हि श्रीनिवासप्रेमपात्रस्य पद्मनाभतीर्थस्य तद्गुणगणवर्णनपरसन्न्यायरत्नावलीकरणमशक्यं, हेयेषु विषयेषु सक्तिर्वा भवति। नापि तस्मिन्प्रेमवतस्तस्य यो हि यत्रादरवांस्तस्यैव तद्वस्तुविद्यमानमपि स्फुरतीति टीकोक्तेः श्रीरमणगुणगणज्ञानसाध्यं ग्रन्थकरणमसाध्यम्। नाप्युपादेये प्रेमवतो हेयेऽनुरागादयो भवन्ति। सन्न्यायरत्नावलिजन्मभूमिः। वैराग्यभाग्य इत्याभ्यां चोक्तगुरुत्वप्रयोजकधर्मोपपादनं कृतमिति ज्ञेयम्। पद्मनाभतीर्थ एवामृताब्धिः क्षीरसमुद्राः अरण्याख्यामृतसमुद्रो वा। उभयोरपि समुद्रयो रमानिवासोचितवासभूमित्वं तत एव स्वं प्राप्तेभ्य आनन्ददातृत्वं चास्ति। 'भगवत्समीपमुपयातवतां प्रमदो न केवलमलब्धतुल' इति मध्वविजयोक्तेः। तत एव च वैराग्यरूपं भाग्यं यस्मादिति वैराग्यभाग्यत्वं चानन्दपूर्णाभ्यां तदर्थमैहिकविषयभोगरागायोगात्। वैराग्यस्य भाग्यत्वं च समुद्रसेवकानां आनन्दपूर्णत्वरूपमाहात्म्यव्यञ्जकत्वात्। पद्मनाभतीर्थस्य तु वैराग्यरूपं भाग्यं यस्येति यस्मादित्युभयथापि वैराग्यभाग्यत्वं द्रष्टव्यम्। समुद्रयो रत्नावलिजन्मभूमित्वं तु प्रसिद्धमेव। अथवा पद्मनाभतीर्थाख्यामृताब्धिर्विद्याख्यामृतसमुद्र इत्यर्थः। अत एवोक्तं पूर्वप्रस्थाने। 'श्रीमध्वसंसेवनलब्धशुद्धविद्यासुधांभोनिधय' इति। तस्य रमानिवासोचितवासभूमित्वसन्न्यायरत्नावलिजन्मभूमित्वयोरिव वैराग्यभाग्यत्वमपि मुख्यमेव भवति। यथोक्तं भागवते। 'ज्ञानं कचित्तच्च सङ्गवर्जितं ज्ञानेन वैराग्यविजृम्भितेन। वैराग्यसारं प्रतिलभ्य बोधं ज्ञानं च विज्ञानविरागयुक्तमि'त्यादि। अत्र तदीयज्ञानं प्रति प्रार्थनमपि तत्प्रार्थनमेव। यथा 'जयन्ति जानकीभर्तुश्चरणाम्भोजरेणव' इत्यत्र चरणरेणुस्तुतिश्चरणस्तुतिरिति ज्ञेयम्। विभूत्यै करितुरगादिविविधभूत्यपेक्षया विशिष्टोत्तमाया भूतिर्वैराग्याद्यैश्वर्यं तस्यै भवतादिति।

आनन्दतीर्थो भारतीद्वारा उपदिशतीत्युक्तम् । तत्र तावदेवेति ज्ञेयम् । किन्तु बहिरपि स्वोपदेशयोग्यान् कांश्चन साक्षादुपदिश्य तद्वारा अन्यानप्युपदिशतीति । तथा चोपदेशकपरम्पराघटकयावत्प्रसादोऽवश्यमापाद्यत इति शिष्यान् शिक्षयितुं स्वोपदेशकपरम्परायामाद्यं पद्मनाभतीर्थार्यं तावत्तत्प्रसादाय तद्गुणानुवादेन स्तुवंस्ततो वैराग्यादिसाधनसंपत्तिमाशास्ते रमेति । अत्र पद्मनाभतीर्थस्यामृताब्धित्ववर्णनेनेदं ध्वनयति । यथा समुद्राद्बहूनि शिलारत्नान्युत्पन्नानि तथा पद्मनाभतीर्थाद्बहूनि शिष्यरत्नान्युत्पन्नानि सन्तीति । अत एव समीचीना न्याया येषां ते सन्न्यायाः शिष्यास्त एव रत्नानि । तेषामावलिः पङ्क्तिः परम्परेति यावत् । तस्या जन्मभूमिरुत्पादक इत्युक्तम् । शिष्टं पूर्ववत् ॥ ५ ॥

चषकः— चिरन्तनटीकामुपजीवयतीयमभिनवटीकेति ध्वनयितुममृतोदधितुल्यतया तत्प्रणेतॄन्समीहितं नाथते रमेति ॥ 'पदस्य, पदात्, अनुदात्तं सर्वमपादादावि'त्यधिकृत्य 'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ, बहुवचनस्य वस्नसौ, तेमयावेकवचनस्य, त्वामौ द्वितीयाया' इतिचतुस्सूत्र्या विहितादेशान्तर्गत-मइत्यादेशस्य 'दत्तात्तेमेऽपि शर्म स' इत्यादाविव प्रसङ्गेन ममेति निर्देशासाधुत्वशङ्का निर्दलैव । किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानरूपान्वादेशस्थले दर्शितादेशानां नित्यत्वेऽपि 'एतेषां नावादय आदेशा अनन्वादेशे वा वक्तव्या' इत्यभिहिततया हरिर्मम सुखप्रद इत्यादिवत्साधुत्वोपपत्तेः ॥ ५ ॥

ए०बा०— अथ प्राचीनटीकाकारादभीष्टमाशास्ते रमानिवासेति । रमानिवासोचितवासभूमिः सन्न्यायरत्नावलिजन्मभूमिः । वैराग्यभाग्यो मम पद्मनाभतीर्थामृताब्धिर्भवताद्विभूत्यै ॥ ५ ॥ अत्र विशेषणद्वयेन क्रमात् ज्ञानभक्ती व्यज्येते । अमृताब्धिपक्षे वैराग्यं शौक्ल्यमित्याहुः । वस्तुतस्त्वत्रापि वैराग्यमौदार्यमेव । यच्छ्रियमपि परस्मै प्रायच्छत् । किं ततो अन्यद्वैराग्यं नामेति प्रतीमः । पद्मानि नयतीति पद्मनः सूर्यः । तस्याभेवाभा यस्य स पद्मनाभः । तदुक्तं सुमध्वविजये । 'दुर्मन्त्रैः खलपटलैः प्रचोद्यमानो ग्रामेशो वृषलपतिः प्रहर्तुमेनम् । संप्राप्तस्तत उत यान्तमीक्षमाणः प्रोद्यन्तं रविमिव विस्मितो ननामे'ति । यद्वा आ ईषत् सम्यग्वाभा यस्य सः आभः । स न भवती नाभः । नसमासोऽयम् । पद्मः चोलजः पद्मतीर्थो मायिभिक्षुर्नाभो विच्छविर्यस्मात्स तथोक्तः । श्रीमध्वाचार्यः । चातुर्मास्यादुत्थाय विद्रवन्तं निजपुस्तकस्तोमस्तेनं चोलजं पद्मतीर्थं मध्ये मार्गे तूर्णं निरुध्य गोगणैर्भीषयित्वा पार्थः सैन्धवमिव तं विच्छविं चकारेत्येषोऽर्थः सुमध्वविजये द्वादशे व्यक्त इति । विस्तरेण नेह तानि वचनान्युदाहराम इति दिक् । तस्मात्तीर्थं शास्त्रं यस्य स पद्मनाभतीर्थः । स एवामृताब्धिर्विभूत्यै भवतात् भूयात् । भवतेराशिषि तुह्योस्तातङ्ङाशिष्यन्यतरस्यामिति पक्षे लोट्स्तोस्तातङ् एवं तेमयादय आदेशा अन्वादेशे वा वक्तव्या इत्युक्तेः पक्षे तवममौ ङसीति ममादेशः । एवमग्रेऽपि । किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः । यथाऽनेनाम्नायोऽधीतः । एनं शास्त्रमध्यापयेतीति ॥ ५ ॥

काशी०— भक्तिज्ञानविरक्त्यतिशययुक्तत्वेन पूर्वटीकाकारान्प्रार्थयते रमानिवासेति । निर्दुष्टार्थप्रकाशकयुक्तिमत्त्वेन सन्न्यायरत्नावल्याख्यस्य ग्रन्थस्य जन्मभूमिर्जनकः । वैराग्यस्य भाग्यत्वं भाग्यार्थव्यसननिवर्तकत्वेन अमृताब्धेस्तु रमानिवासाश्रयत्वादिना भाग्यवत्त्वम् । विभूतिः भक्तिज्ञानादिसंपत्तिः ॥ ५ ॥

स्वगुरुं अक्षोभ्यतीर्थं नमति—

सु०— पदवाक्यप्रमाणज्ञान् प्रतिवादिमदच्छिदः।
श्रीमदक्षोभ्यतीर्थाख्यानुपतिष्ठे गुरून्मम ॥ ६ ॥

परि०— स्वगुरून्नमति **पदेति** ॥ शब्दमीमांसान्यायशास्त्रज्ञानित्यर्थः । उपतिष्ठे मनसा पूजयामि । 'उपान्मन्त्रकरण' इति सूत्रे 'उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्वि'ति वार्तिकेन पूजायामात्मनेपदम् ॥ ६ ॥

यादु०— पदं व्याकरणम् । **वाक्यं** वार्तिकम् । **प्रमाणं** न्यायः ॥ ६ ॥

आनन्दः— साक्षाद्गुरून् प्रणमति **पदेति**। पदं व्याकरणं, **वाक्यं** वार्तिकं, **प्रमाणं** ब्रह्मतर्कः।

कं०रा०— **पदवाक्यप्रमाणेति** । पदशब्देन सुप्तिङन्तादिपदानुशासनरूपव्याकरणशास्त्रमुच्यते । वाक्यशब्देन श्रुतिवाक्यविचारात्मकमीमांसाशास्त्रमुच्यते । प्रमाणशब्देन प्रमाणनिरूपणपरतर्कशास्त्रमिति ध्येयम् ।

श्रीनिधि०— पदवाक्यप्रमाणज्ञानित्यत्र **पदशब्देन** व्याकरणं **वाक्यशब्देन** मीमांसा प्रमाणशब्देन ब्रह्मतर्काद्युच्यते । **उपतिष्ठे** उपासे ।

वा०चं०— साधकोक्तौ बाधकपरिहारे च सामर्थ्येन 'असंशयः संशयच्छिदि'त्युक्ततत्त्वनिर्णायकतया मुख्यगुरुत्वं प्रतिपादयन्नेव साक्षाद्गुरूनुपतिष्ठते **पदेति** । अत्र पदार्थज्ञानोपायभूतं पद्यते शब्दार्थोऽनेनेति व्युत्पत्त्या व्याकरणं **पदम्**, वाक्यार्थज्ञानोपायन्यायसमर्पकप्रमेयमीमांसाशास्त्रं **वाक्यम्**, उद्देशलक्षणविभागपरीक्षाभिः प्रमाणस्वरूपनिर्धारकं प्रमाणमीमांसाशास्त्रं **प्रमाणमुच्यत** इति द्रष्टव्यम् । **उपतिष्ठ इति** । उपान्मन्त्रकरण इति आग्नेय्याऽग्नीध्रमुपतिष्ठत इत्याद्युपपादनाय वैवक्षिकमन्त्रकरणस्य विवक्षितत्वेऽपि आदित्यमुपतिष्ठत इत्यादौ अमन्त्रकरणेऽप्यात्मनेपदोपपादनाय प्रवृत्ते 'उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिषु इति वक्तव्यमि'ति तत्सूत्रीयवार्तिके देवपूजादावप्युपपूर्वात्तिष्ठतेरात्मनेपदविधानाद्गुरोरपि देवप्रतिमात्वेन देवत्वात्तत्तत्पूजायामपि देवपूजात्वविवक्षयोपतिष्ठ इत्यात्मनेपदोपपत्तिरिति ध्येयम् । (मन्त्रकरणे किं भर्तारं उपतिष्ठति यौवनेन । आग्नेय्याऽग्निदेवतर्चा । वार्तिकोदाहरणानि तु । आदित्यमुपतिष्ठते, कथं तर्हि स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वतीति । देवतात्वारोपात् । नृपस्य देवतांशत्वाद्वा । गङ्गा यमुनामुपतिष्ठते उपश्लिष्यतीत्यर्थः । पथिकानुपतिष्ठते मित्रीकरोतीत्यर्थः । पान्थाः सुघ्नमुपतिष्ठते प्राप्नोति इत्यर्थः । इति द्रष्टव्यानि) ॥ ६ ॥

वा०र०— साधकोक्ताविति**यादि** । **पदवाक्येति** । प्रथमविशेषणेन साधकोक्तौ सामर्थ्यप्रतिपादनात् असंशयसंशय इत्यादिवाक्यस्थासंशयपदार्थभूतसंशयराहित्यं उक्तसामर्थ्येनोपपद्यते । तथा प्रतिवादीतिविशेषणेन

बाधकपरिहारे सामर्थ्यप्रतिपादनात् उक्तवाक्यस्थसंशयच्छिदित्युक्तं अन्यसंशयछेतृत्वं एतत्सामर्थ्येनोपपद्यते इति भावः। **प्रमेयमीमांसेति**। कर्मब्रह्ममीमांसेत्यर्थः। **प्रमाणमीमांसेति**। तथाविधं तर्कशास्त्रमित्यर्थः। **उपान्मन्त्रकरणे** इत्यत्रेत्यादि । **आग्नेय्या आग्नीध्रमुपतिष्ठत इत्याद्युपपादनाय इत्यनन्तरं प्रवृत्त** इति शेषोऽभिप्रेतः । प्रवृत्त इत्युत्तरानुसारात् । तेनाग्नेय्येत्यस्यादिपदोपात्तऐन्द्र्या गार्हपत्यमित्यस्य च उदाहरणतया तदुपपादनायेत्यस्य तदुदाहरणसमर्थनाय प्रवृत्ते इत्यर्थलाभः । **तथा चोदाहरणं अन्यदेवेत्याश्रित्य आग्नेय्येत्यादौ तु मन्त्रकरणस्य मुख्याभावात् तत्र कथं आत्मनेपदं इति शङ्कानिरासाय तदुपपादनाय वैवक्षिकमन्त्रकरणं इत्यर्थोऽत्र प्रतिपाद्यतया प्रतीयते । स चायुक्तः । आग्नेय्येत्यादेरुदाहरणत्वात् इति शङ्का गर्भस्रावेण गता । यद्वेत्याद्युपपादनाय** इत्यादौ आत्मनेपदोपपत्त्यर्थं आत्मनेपदसिध्यर्थं **मन्त्रकरणं यद्विवक्षितं वक्तुं इष्टम्** । **अन्यथाऽमन्त्रकरणस्थलेऽप्यात्मनेपद-प्रसङ्गात्**। तस्य मन्त्रकरणस्य **वैवक्षिकत्वेऽपि इति योजनात् नोक्तशङ्कावकाशः**। उपान्मन्त्रकरणे इति सूत्रे मन्त्रः करणं साधकतमं यस्य धात्वर्थस्य स्तुतिरूपस्य तस्मिन् धात्वर्थे वर्तमानात् उपपूर्वकात् तिष्ठतेः आत्मनेपदं भवति । आग्नेय्येत्याद्युदाहरणम् । अग्निदेवताकया ऋचा आग्नीध्रं अग्निविशेषे स्तौतीत्याद्यर्थविशेषात् । तथाचाग्नेय्ये-त्यादावुपपूर्वकः तिष्ठतिः मन्त्रकरणधात्वर्थे वर्तमानः मन्त्रश्च साधकतमं रूपं पारिभाषिकं करणमिति करणशब्दोऽत्र पारिभाषिको विवक्षितः । तदेतदाह **वैवक्षिकमन्त्रेति** । उक्तं च मञ्जर्याम्— पारिभाषिककरणं गृह्यत इति । न तु लुडसंभवात् आहुतिप्रतिपादनेऽपीति **फलितोऽर्थः** । **अनेनोक्तस्थले** उक्तरूपमन्त्रकरणे वर्तमानादेव तिष्ठते-रात्मनेपदविधानात् प्रकृते च मन्त्रकरणाभावात् **उपतिष्ठामीत्येव वाच्यत्वात्** कथं उपपूर्वात्तिष्ठतेरात्मनेपदम् । मन्त्रकरणाभावस्थले भर्तारमुपतिष्ठति यौवनेनेत्यादौ तदभावादिति शङ्का सूचिता । अत्र मन्त्रकरणमात्रमेव प्रकृतव्यावर्तकम् । विवक्षितोक्तिरस्तु सूत्रार्थकथनरूपेण वस्तुस्थितिकथनायेति न तदुपयोगान्वेषणप्रयासः कार्यः । **इत्यादाविति** । आदिपदेन गङ्गायमुनामुपतिष्ठत इत्यादेर्ग्रहणम् । **अमन्त्रकरणेऽपीति** । उक्तं च पदमञ्जर्याम्— अमन्त्रकरणार्थमिदमिति । देवपूजासङ्गतिकरणमन्त्रकरणेति पाठः । **सङ्गतिकरणं** उपश्लेषमात्रम् । **मित्रकरणं** तु मैत्रीसंबन्धः । स्पष्टमेतत् काशिकादौ । **सङ्गतीति**। **मैत्रीति** च लेखकागतम्। अर्थानुवादोऽयं इत्यप्याहुः । ननु अस्तु आदित्यस्य देवत्वेन आदित्यपूजायाः देवपूजात्वेनादित्यं पूजयतीत्यर्थकादित्यं उपतिष्ठत इत्यत्रात्मनेपदसंभवः । प्रकृते तु गुरोः देवत्वाभावात् न तत् पूजाविवक्षायां उपतिष्ठे इत्यात्मनेपदोपपत्तिरित्यतो गौणं देवत्वं उपपादयति **गुरोरपीति**। अत एव स्तुत्यं स्तुतिभिरर्ध्याभिरुपतस्थे सरस्वती। राजानं श्लोकैरुपतिष्ठत इत्यादौ देवतात्वारोपाद्वा राज्ञो देवांशत्वात् वेति समाधिमाहुः इति भावः । कैश्चित् तिष्ठतेः **अर्थेऽवस्थानरूपे यदा मन्त्रकरणं तदा उपपूर्वकात्** तिष्ठतेरात्मनेपदं भवति । **उपतिष्ठत इत्यस्य समीपावस्थानमात्रमेवार्थः** । **मन्त्रस्य समीपावस्थानसाध्यस्तुतिं प्रति उपयोगात् उपस्थानकरणत्वव्याघातोभावः** । **तथा चाग्नेय्येत्यादौ करणत्वान्यथानुपपत्तिलब्धस्तोतुं इत्यनेनान्वयात्** आग्नीध्रं स्तोतुं तत्समीपे अवतिष्ठतीत्येवार्थः । **आदित्यमुपतिष्ठत इत्यत्र तु तत्समीपावस्थानस्यासंभवात् आदित्यं** स्तोतुं तदभिमुखतः आयाति तिष्ठतीति वाक्यार्थः । इति सूत्रार्थादिवर्णनं कृतम् । तन्मतेऽपि आदित्यं उपतिष्ठते इत्यत्र स्तोतुमिति क्रियालाभायोगः । ऐन्द्र्येत्यादौ करणत्वान्यथानुपपत्तिवत् प्रकृते तदभावादिति दूषणमपि आदित्य-मुपतिष्ठत इत्यादावमन्त्रेति वदतैव सूचितमिति सूरयो विदांकुर्वन्तु ॥ ६ ॥

स०न्र०— पदं व्याकरणम्। वाक्यं मीमांसा। प्रमाणं न्यायः॥ ६॥

कुण्डल०— स्वगुरुं श्रीमदक्षोभ्यतीर्थं सेवते **पदवाक्येति**। पदवाक्यप्रमाणज्ञान् विचारात्मकव्याकरण-मीमांसातर्कशास्त्राभिज्ञानित्यर्थः॥

विट्ठ०— **पद्यते** प्रतिपाद्यते शब्दसाधुत्वादिकमत्रेति पदं व्याकरणम्। **वाक्यं** मीमांसाशास्त्रं रूढत्वात्। **प्रमाणं** पदार्थस्वरूपनिर्धारकं तर्कशास्त्रम्।

रस०— यथा देवे तथा गुरावित्युक्तेर्देवेषु तत्तन्माहात्म्यानुसारिभक्तेरिव गुरुष्वपि तादृशभक्तेरुक्तविध-पुरुषार्थपूरकत्वेन स्वानां तदावश्यकतां ज्ञापयन् श्रीगुरुचरणान्विचिन्तयते **पदेति**। अहमक्षोभ्यतीर्थाख्यानेव गुरूनुपतिष्ठ इति योजना गुरुत्वं किं पूर्वेषामिव सर्वान्प्रत्यविशेषेण नेत्याह **ममेति**। तदपि किं न्यासदानेनैव तत्राह गुरूनुपदेशकानिति। यदि भवतामुपदेशकाः सन्ति तर्हि तन्नाम वाच्यम्। स्मृतेः प्रसिद्धतादृशादिविषयत्वा-दित्यतोऽङ्गीकारेण तदाह **अक्षोभ्यतीर्थाख्यानिति**। ननु यद्येषां बहवः पण्डिताः शिष्याः स्युस्तदोपदेशकत्वे विश्वसिमः। एकस्य तु तव नैजप्रतिभयैव अशेषज्ञत्वस्यापि संभवादित्यत उक्तं **श्रीमदिति**। बहुप्राज्ञप्रजावत्वरूप-श्रीमन्त इति उक्तिमात्रमसाधकमित्यतस्तदुपयुक्तिमाह। **पदवाक्यप्रमाणज्ञान्** महाव्याकरणत्रिविधमीमांसाब्रह्मतर्का-भिज्ञानिति। अत्र प्रसिद्धपदपरित्यागेन पद्यते पदानामर्थं तत्त्वतोऽनेनेति यौगिकपदपदस्य प्रयोगो वेदव्याख्यानादौ महाव्याकरणमेवोपयोगी। तदनुसारेणैव वैदिकानां वैदिकानुसारिणां वा प्रकृतिप्रत्ययादि सर्वं निर्वाह्यम्। अन्यत्तु वेदव्याख्यानरूपस्मृत्यर्थानुगुण्ये सत्येवादरणीयम्। तदभावे तु नेत्येतमर्थं सूचयति। तथा मीमांसादिपदं परित्यज्य वाक्यपदं प्रयुञ्जानेनापि ब्रह्मतर्कादिसिद्धमानन्यायानुसन्धाने सति वेदवाक्यसमर्थार्थः चेतसि चकास्ति स एव स्वीकार्यः न तु व्याख्यातृमतिवैश्वरूप्येण वाक्यपरिपीडनादायात इत्यसूचि। एवं प्रमाणपदप्रक्षेपेण ब्रह्मतर्कस्यैव न्यायशास्त्रत्वं गौतमीयस्य तु कल्पनामात्रमूलतया अप्रामाण्यमिति प्रमापितम्। अथवा प्रमाणशिक्षकत्वात्प्रमाणं ब्रह्मतर्कः। उपदेशोपयोगिद्वयं स्वसिद्धान्तसाधनाभिज्ञता परसिद्धान्तपराकरणप्रकाराज्ञता चेति। अत्राद्यं उक्त्वा द्वितीयमाह **प्रतिवादिमदच्छिद इति**। मम गुरूनुपदेशकानित्युक्तं किमुपदिदेशेत्यतः पदादिकं प्रतिवादि-पराकरणप्रकारञ्चेत्येतद्वयमेव न तु साधारणैरधीयमानशब्दशास्त्रादीत्याशयेन वादिविशेषणद्वयम्। अनेन किमपि च वदन्त इत्यत्र वक्ष्यमाणविशिष्टव्याख्यानप्रयोजकत्वाद्युक्ततरं व्याख्यानमिति शिष्यमनोव्यसननिरसनाय सूचितं भवति। अथवैषां कथं भवादृशातुलप्रज्ञोपदेशकत्वमित्यतस्तत्संभावनाय **श्रीमदिति**। तच्च द्वेधेत्याशयेन पदेत्यादि विशेषणद्वयम्। यद्वा भागवतकुलभवानां भवतां गुरुभिर्भगवत्पादविद्यासन्ततिभवैरेव भाव्यम्। अन्येषां तदयोगात्। विद्यासन्ततिजानां हीदं लक्षणम्। यत्सन्ततं मोक्षशास्त्रसुधांबोधिमग्नत्वं दुःशास्त्रदूषणदक्षदीक्षत्वं चेति। यथोक्तं सदा सकलसच्छास्त्रव्याख्यासौख्यामृतान्धिगाः। सर्वे दुर्वादिदुर्वादकाण्डखण्डनमण्डना इति तत्कथमेवमित्यतो विशेषणद्वयम्। नेदमक्षोभ्यतीर्थनाम देवदत्तादिवत्साङ्केतिकं नापि पटादिपदवद्रूढिमात्रेण प्रवृत्तं किन्त्वनन्यसाधारण-धर्मबोधकमपीत्याशयेन विशेषणद्वयम्। तथाहि। **अक्षोभ्यमन्यैश्चालयितुमशक्यं तीर्थं** शास्त्रं यस्य। अपरिमिततया अन्यैरेतावदित्यज्ञेयशास्त्रवानिति। तथान्यैरक्षोभ्यं निष्कृष्टार्थतयोदितं ततश्चालयितुमशक्यं तीर्थं यस्य। अन्यैरपि

विभावनीयबुद्धिकौशल्यवानिति स तथेति । अनेन तत्रोक्तविशेषणोपपाद्यस्य वन्द्यत्वप्रयोजकस्य गुरुत्वकथनेन श्रीमद्गुमारमणेति पद्यं विवृतं भवति । इतरथा मोक्षशास्त्रव्याख्यादेः अन्यत्रापि सत्त्वेन वन्दनप्रयोजकत्वायोगेन गुरुवन्दनस्य आवश्यकता न प्रकटिता स्यादिति । अत्र यद्यपि उपान्मन्त्रकरणे उपादेवपूजासङ्गतिकरण-मित्रकरणपथिष्विति सूत्रवार्तिकोक्तिषु मन्त्रकरणादिषु निमित्तेष्वेकस्याप्ययोगान्नात्मनेपदसंभवस्तथापि वा लिप्सायामिति वक्तव्यमित्युक्तत्वादत्र लिप्सारूपनिमित्तसद्भावात्संभवः । अत्र गुरुत्वस्य सिद्धत्वेनाक्षोभ्यतीर्थानां गुरुत्वेन इच्छाविषयत्वायोगेन भवान्तरेऽपि त एव मे गुरवो भवन्त्विती च्छाविषयत्वं सिध्यति । तेन स्वगुरूणां महोपकारित्वं प्रकटितं भवति । तदभावे तथेच्छायोगात् । यदाहान्यत्र अक्षोभ्यतीर्थगुरुणा शुकवच्छिक्षितस्य मे । वचोभिरमृतप्रायैरिती ति ॥

ल०२०— पञ्चमगुरुत्वमक्षोभ्यतीर्थेष्वस्तीति तान्प्रणमति पदेति । अक्षोभ्यतीर्थाख्यान् मम गुरून् सच्छास्त्रोपदेशकानुपतिष्ठे मनसा पूजयामि । पदं व्याकरणं, वाक्यं मीमांसा, प्रमाणं ब्रह्मतर्कः, तानि जानन्तीति तथेत्यनेन सोपस्करत्वं दर्शितम् । तावन्मात्रज्ञानमस्तीति भ्रान्तिनिवारणाय गुरूनिति विशेष्यम् । ननु गुरूपदिष्टमपि विज्ञानं न तावच्छ्रोतृणां दृढनिरूढं भवति । यावत्प्रतिवादिप्रतर्कितयुक्त्याभासनिरास इत्यत उक्तं प्रतिवादिमद-च्छिद इति । यथोक्तं पूर्वप्रस्थाने । 'दुर्वादिवारणविदारणदक्षदीक्षमिति' । श्रीमन्तः शिष्यसंपत्तिमन्तश्च ते अक्षोभ्य-तीर्थाख्याश्चेत्यनेन बहुशिष्यसंपत्तिर्दर्शिता । तत्र मद्विषये विशेषोऽस्तीत्याह । मम गुरून् । साक्षात्तत्राप्यति-शयेनोपदेशकानिति । यथोक्तं प्रमेयदीपिकायाम् । 'अक्षोभ्यतीर्थगुरुणा शुकवच्छिक्षितस्य मे' इति ॥

अथ परम्परायां द्वितीयं साक्षाद्गुरुं अक्षोभ्यतीर्थं तत्प्रसादसाधनगुणानुवादपूर्वकं मनसा पूजयति पदेति । अत्र मम गुरून्मदुपदेशकानुपतिष्ठ इत्यन्वयः । ननु कस्य शास्त्रस्योपदेशकास्त इत्यत उक्तं पदवाक्यप्रमाणज्ञानिति । व्याकरणमीमांसाब्रह्मतर्काभिज्ञानित्यर्थः । तथाच पदादिशास्त्रत्रयस्योपदेशकास्ते मे । न ह्यन्यज्ञा अन्यदुपदिशन्तीति युज्यत इति भावः । ननु पदादिज्ञानमपि तेषामस्मदादिसाधारणमेवास्ति चेत्कथं त्वदुपदेशसाधनसामर्थ्यमित्यत उक्तं प्रतिवादिमदच्छिद इति । अत्र पदवाक्यप्रमाणज्ञान्प्रतिवादिमदच्छिद इति समभिव्याहारसामर्थ्यात्पदादिशास्त्रेष्वेव ये प्रतिवादिनस्तच्छास्त्राभिज्ञास्तेषां यो मदस्तच्छास्त्रपाण्डित्यातिशयजन्यस्तच्छिदस्ततोऽप्यतिशयितपाण्डित्येन तज्जेतार इति लभ्यते । न ह्यन्यशास्त्रज्ञा अन्यशास्त्रज्ञमदच्छेत्तार इति युज्यते । अनेन पदादिज्ञाने नान्यसाधारणास्ते किं तु तेषु शास्त्रेषु प्रौढा एव । कथमन्यथा प्रतिवादिमदच्छेदकत्वम् । तथाच मदुपदेशसामर्थ्ये का कथन्तेत्युक्तं भवति । अत्र यथा पदवाक्यप्रमाणज्ञान् गुरूनिति विशेषणविशेषाभ्यां पदादिशास्त्रोपदेशका इति सूचितं तथा प्रतिवादिमदच्छिदो गुरूनिति विशेषणविशेषाभ्यां प्रतिवादिमदच्छेदप्रकारोपदेशकाश्चेति सूचितमिति ज्ञातव्यम् । ननु तर्हि गुरूणाममोक्षशास्त्रप्रतिभैव किं नेत्याशयेनोक्तं श्रीमत् मोक्षसंपद्विशिष्टं अक्षोभ्यमन्यैः क्षोभयितुमशक्यं तीर्थं वेदेतिहासपुराणतन्मीमांसारूपं सच्छास्त्रं येषां ते श्रीमदक्षोभ्यतीर्थाः । श्रीमदक्षोभ्यतीर्था इति आख्या येषां ते तथेति । अत्रापि तीर्थस्याक्षोभ्यत्वविशेषणेन मोक्षशास्त्रेऽपि ते प्रौढा एवेति लभ्यते । मम गुरूनिति विशेष-निर्देशेन विशेषतस्तत्प्रीतिपात्रत्वं तद्वर्णिताशेषार्थविधारणशक्तिश्च ममैवास्तीति सूचयति । गुरूनिति पूजार्थम् ।

अत्राक्षोभ्यतीर्थगुरुषु पदवाक्यप्रमाणप्रौढिमवर्णनेन वेदवेदान्तप्रौढिमवर्णनेन तैश्च स्वं प्रति तदुपदेशवर्णनेन स्वस्मिंस्तत्प्रेमपात्रत्वतदुपदिष्टचा यावदर्थग्रहणधारणशक्तिवर्णनेन च टीकाकाराः स्वयमपि पदवाक्यप्रमाणप्रौढा एव । तथा वेदान्तेऽपि विदितवेद्या एव । न शब्दादौ गाढा इत्यादि वक्ष्यमाणोक्तिस्तु शिष्यशिक्षार्थं विनयोक्तिरेव न वस्तुस्थितिः । अन्यथा पूर्वोत्तरविरोधापत्तेरिति सूचितमिति ज्ञातव्यम् ।

चषकः— संशयराहित्यविशेषितान्यदीयसंशयच्छेतृत्वरूपगुरुत्वौपयिकव्याकरणप्रमेयप्रमाणमीमांसाधिगन्तृत्वं विशदयन् चेतसा गुरूणां पूजां विधत्ते पदेति । 'उपान्मन्त्रकरण' इति सूत्रे 'उपादेवपूजासङ्गतिकरणमित्रकरणपथिष्विति वक्तव्यमि'ति वार्तिकादुपोपसृष्टतिष्ठतेः पूजायामात्मनेपदम् । गुरोरपि देवप्रतिमात्वेन देवपूजात्वविवक्षोपपत्तेरिति ध्येयम् ॥ ६ ॥

ए०बा०— अथ तत्त्वनिर्णायकतया गुरुत्वं सूचयन्त एव साक्षाद्गुरूनुपतिष्ठन्ते पदेति । पदवाक्यप्रमाणज्ञान्प्रतिवादिमदच्छिदः । श्रीमदक्ष्योभ्यतीर्थाख्यानुपतिष्ठे गुरून् मम ॥ ६ ॥ पद्यते ज्ञायतेऽनेनेति पदं व्याकरणम् । वाक्यं वार्तिकम् । प्रमाणं न्यायशास्त्रम् । वाक्यार्थज्ञानोपेयन्यायसमर्पकं प्रमेयमीमांसाशास्त्रं वाक्यम् । उद्देशविभागपरीक्षाभिः प्रमाणस्वरूपनिर्धारकं प्रमाणमीमांसाशास्त्रं प्रमाणमित्यपि व्याचक्षते । क्षोभ्यो न भवतीति अक्षोभ्यः । तीर्थे अध्वरे अक्ष्योभ्यः अक्ष्योभ्यतीर्थः । राजदन्तादिषूपसङ्ख्येयतया परनिपातः । श्रीमांश्चासौ अक्ष्योभ्यतीर्थश्च तथोक्तः । श्रीमध्वाचार्यः तस्मात् आख्या नाम येषां ते तथोक्ताः तान् । श्रीमध्वाचार्यप्रदत्तस्वाभिधानान् गुरूनित्यर्थः । श्रीमध्वाचार्यः स्वप्रियशिष्यस्याध्वरमुपगम्य तद्विघातुकान् दुर्मदान् पण्डितंमन्यान् विजित्य विद्राव्य तं धर्मराजं भीम इव साध्वयाजयदिति श्रीसुमध्वविजये नवमसर्गे प्रसिद्धेयं कथा विस्तरभिया तद्वचनानि नेहोदाहरिष्यामः । अथवा श्रीर्विषमस्यास्तीति श्रीमान् सर्पः । तेन क्षोभ्यो न भवतीति अक्ष्योभ्यः श्रीमध्वाचार्यः । तदुक्तं सुमध्वविजये । 'क्वचिदमुं निजघांसुरशान्तिमानुपससर्प ससर्पमयोऽसुरः । त्वरितमुद्यतविस्तृतमस्तकः प्रतिददंशयदैनमविक्षतम् । मृदुपदारुणचारुतराङ्गुलीविहृतिपिष्टतनुः प्रततामस' इत्यादि । शिष्टं प्राग्वत् । यद्वा श्रीः पाण्डित्यसंपत्तिरस्यास्तीति श्रीमान् विद्यारण्यो मायिभिक्षुः तेनाक्षोभ्यश्चासौ तीर्थं गुरुश्चेति श्रीमदक्षोभ्यतीर्थमित्याख्या येषां ते तथोक्तास्तान् गुरून् इत्यर्थः । अस्यैव तात्पर्यकथनं प्रतिवादिमदच्छिद इति । तदुक्तं सत्यनिधिविलासे 'मिथ्यावादीभसंसत्प्रकटितवचनाटोपसिंहस्वनस्य क्षोणीशद्वारदेशोद्धुषितनिजजयापूरिताशान्तरस्य । अक्षोभ्याख्यस्य भिक्षोः प्रथयति जयितामुत्तमारण्यवादे वेदान्ताचार्यनाम्ना विरचितजयपद्यात्मकोऽयं निबन्धः ॥' 'असिना तत्त्वमसिना परजीवप्रभेदिना । विद्यारण्यमहारण्यमक्ष्योभ्यमुनिरच्छिनदि'ति ॥ उपतिष्ठे परमानुग्रहलिप्सयोपगच्छामीत्यर्थः । उपान्मन्त्रकरण इत्यत्र वा लिप्सायामिति वार्तिकादुपपूर्वात्तिष्ठतेः पाक्षिकमात्मनेपदम् । भिक्षुकः प्रभुमुपतिष्ठत इति यथा । वैकल्पिकात्मनेपदकधातुप्रयोगेणात्मनेपदम् । स्वयमविहायैवार्हतेऽन्यस्मा अपि दृढं दास्याम इत्यर्थसूचनायेति प्रतीमः । अत्र च विद्याधिराजगुरवः साक्षिणः । उपादेवपूजासङ्गतिकरणमैत्रीकरणपथिष्विति वाच्यमिति वार्तिकात्, आदित्यमुपतिष्ठत इत्यादाविव गुरौ देवतात्वोपचारेण देवपूजात्वविवक्षयोपातिष्ठतेरात्मनेपदमित्यपि सङ्गिरन्ते ॥ ६ ॥

काशी०— साक्षाद्वरूत्तमति पदेति । पदं व्याकरणं, वाक्यं मीमांसा, प्रमाणं न्यायशास्त्रं, तज्ज्ञान् प्रतिवादिनां मदः स्वपक्षसाधनसङ्कल्पस्तच्छिद इत्यनेन 'असंशयः संशयच्छिद्वुरि'त्युक्तगुरुलक्षणवत्त्वं सूचितम् । उपतिष्ठ इत्यात्मनेपदप्रयोगेण गुरूणां देवावतारत्वं व्यञ्जितम् । देवपूजादावुपपूर्वात्तिष्ठतेरात्मनेपदविधानात् । पूजयामीत्यर्थः ॥ ६ ॥

स्वचिकीर्षितं व्यनक्ति—

सु०— श्रीमदानन्दतीर्थार्यसन्मनःसरसीभुवि ।
अनुव्याख्याननलिने चञ्चरीकति मे मनः ॥ ७ ॥

परि०— स्वचिकीर्षितं व्यनक्ति **श्रीमदिति** ॥ सन्मनोरूपसरस्यां सरोवरे भुवि जात इत्यर्थः । 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्ये'ति पुंवद्भावः । अनुव्याख्यानाख्यकमले चञ्चरीकति चञ्चरीकवद् भ्रमरवत् आचरति । 'इन्दिन्दिरभ्रमरषट्पदचञ्चरीका' इत्यादिशब्दरत्नाकरोक्तेः । इन्दिन्दिरश्चञ्चरीक इति क्वाचित्कामरपाठः प्रक्षिप्तः, अनेककोशेष्वदर्शनात्, तद्वचाख्यातृभिरस्पृष्टत्वाच्च । अनेकधा व्याख्यातुं मनः प्रवर्तत इत्यर्थः । आचारार्थात्क्विबन्ताच्चञ्चरीकशब्दात्तिङ्प्रत्ययः ॥ ७ ॥

गु०दी०— चञ्चरीकति मे मन इत्यत्र चञ्चरीको भ्रमरः तद्वदाचरतीत्यर्थः ।

यादु०— सरःशब्दपर्यायोऽयं सरसीशब्दः । 'कासारः सरसी सर' इत्यभिधानात् । भाषितपुंस्काद्भवीति नलिनविशेषणमित्याहुः । वस्तुतस्तु 'मानयानाभिधानपुल्लिने'त्यादिपुलिङ्गानुशासनसूत्रेण नलिनशब्दस्य पुलिङ्गताऽभिधानादिदं विशेषणमुपपन्नमिति ध्येयम् । **चञ्चरीकतीति** । **चञ्चरीको** भ्रमरः 'इन्दिन्दिरश्चञ्चरीको रोलंबश्चे'त्यभिधानात् । तद्वदाचरतीत्यर्थः ॥ ७ ॥

वं०प०— सन्मनःसरसीभुवि । निर्दुष्टमनोलक्षणसरोवरोत्पन्नेनेत्यस्य नलिनविशेषणत्वेन भु भुनौ भूनीति नपुंसकभूशब्दस्य सप्तमी भुनीति स्यात् । न तु भूः भुवौ भुव इति पुलिङ्गशब्दस्य सप्तमी भुवि इति । अतः कथमनयोः विशेषणविशेष्यभाव इति चेत् । उच्यते । भूशब्दस्य भाषितपुंस्कत्वात्तस्य च तृतीयादिषु 'भाषितपुंस्कं पुंवद्गालवस्ये'ति सूत्रे टादिविभक्तिषु पुंवद्भावोक्तेः भु भुनौ भूनीति नपुंसकत्वेऽपि तृतीयादिविभक्तिषु भुवा भूभ्यामित्यादि पुलिङ्गवदेव भवति । अतो भुवीति युक्तम् । भाषितपुंस्कस्वरूपमुक्तम् 'यन्निमित्तमुपादाय पुंसि शब्दः प्रवर्तते । नपुंसकेऽति तच्चेत्स्याद्भाषितपुंस्कं तदुच्यत' इति । यदा हि सरसीभु नलिनं भेकश्च तदुभयत्रापि तच्छब्दप्रवृत्तौ सरसीभुत्वमेव निमित्तं नान्यदिति भवति भाषितपुंस्कम् । अत एव भाषितपुंस्कत्वाभावात् 'पीलुर्वृक्षः फलं पीलु पीलुने न तु पीलवे । वृक्षे निमित्तं पीलुत्वं तज्जत्वं तत्फले पुनरि'ति प्रत्युदाहरणमभाणीति द्रष्टव्यम् ॥ **चञ्चरीकतीति** । यथा हि भ्रमरः समग्रं पुष्परसं पातुमसमर्थस्तं विहायान्यत्र गन्तुमप्यसमर्थ-

स्तत्रैव परिभ्रमति । तथा भ्रमररूपं मदीयं मनो 'ग्रन्थोऽयमपि बह्वर्थः' इत्याचार्योक्तेः अनुव्याख्यानगतैक-वाक्यस्य समग्रार्थावगाहनं कर्तुमसमर्थं तद्विहायोत्तरानुव्याख्याव्याख्यानाय गन्तुमसमर्थं सत्तत्रैव परिभ्रमति 'वैलक्षण्यं सतश्चापि, स्वभावाज्ञानवादस्य, प्रत्यक्षवच्च प्रामाण्यमि'त्यादिवाक्यानां बहुप्रकारेण व्याख्यानकरण एवासक्तं भवति इत्यर्थः ॥७॥

आनन्दः— चिकीर्षितं निर्दिशति **श्रीमदिति** । सरःशब्दपर्यायः सरसीशब्दः सन्मनः सरसीव तस्या भवतीति सन्मनःसरसीभूः तस्मिन्निति विग्रहः । **चञ्चरीकवदाचरतीति चञ्चरीकति** । सर्वप्रातिपदिकेभ्यः क्विब्वाचार इत्येक इत्यादिनाक्राचारे क्विप् ।

कं०रा०— श्रीमदानन्दतीर्थार्यसन्मनःसरसीभुवीति । तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्येति सूत्रेण भाषितपुंस्कस्याजादितृतीयादिषु वैकल्पिकपुंवद्भावाद् ह्रस्वनुमोरभावः । **चञ्चरीकतीति** । चञ्चरीको भृङ्गः, 'द्विरेफ-पुष्पलिड्भृङ्गषट्पदभ्रमरालयः । इन्दिन्दिरश्चञ्चरीको रोलंबो बंभरश्च सः' इत्यभिधानात् । तद्वदाचरतीत्यर्थः । सर्वप्रातिपदिकेभ्यः क्विबाचार इति चञ्चरीकप्रातिपदिकादाचारार्थे क्विपि सनाद्यन्ता धातव इति धातुसंज्ञायां शसिबादीति द्रष्टव्यम् ।

श्रीनिधि०— चञ्चरीकति भ्रमरवदाचरतीति । चञ्चरीकशब्दादाचारे क्विपि सति सर्वापहारलोपे च सति सनाद्यन्ता धातव इति धातुसंज्ञायां तत्कार्ये लडादौ सति चञ्चरीकतीति रूपनिष्पत्तिरिति ज्ञेयम् । ननु सरसीभुवी-त्यस्य नलिनविशेषणत्वात्तस्य च नपुंसकलिङ्गत्वात् अस्यापि नपुंसकत्वे इकोऽचि विभक्तौ इत्यनेन इगन्तत्वेन नुमि कृते सरसीभुनीति स्यान्न तु भुवीति चेन्न । **सरसीलक्षणभूमौ** उत्पन्ने नलिने इति व्यधिकरणसप्तम्या-श्रयणात् । अथवा तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्येत्यनेन पुंनपुंसकयोरेकं प्रवृत्तिनिमित्तमादाय प्रवृत्तत्वाद् भाषितपुंस्कत्वेन क्लीबत्वेऽपि पुंवद्भावविधानान्नलिनविशेषणत्वं द्रष्टव्यम् ।

वा०चं०— स्वमनश्चञ्चरीकोपमोक्तिव्याजेन चिकीर्षितं व्यनक्ति श्रीमदिति ॥७॥

वा०र०— उपमोक्तिव्याजेनेति । श्रीमदानन्देत्यादिना श्रीमदानन्दतीर्थाचार्यकृतानुव्याख्यानरसग्रहणाय स्वमनःप्रवृत्युक्त्या तद्रसाविष्करणाय तद्व्याख्यानं क्रियत इति प्रतिज्ञासूचनादिति भावः । अत्र गुरवः— कासारः सरसी सर इति वारिवर्गेऽमरोक्तेः सरसी नाम महत्सरः । षिद् गौरादित्वात् ङीष् । ननु नपुंसकलिङ्गनलिन-विशेषणत्वात्सरसीभूशब्दस्य, विशेषणानां च विशेष्यनिघ्नत्वात्तल्लिङ्गप्राप्त्या, इकोऽचि नुमि सरसीभुनीति स्यादिति चेन्न । वा पुंसि पद्मं नलिनमित्यत्र वाशब्दस्य पद्ममारभ्य प्रसूनमित्यन्तेन संबन्धस्य क्षीरस्वामिनोक्तेः पङ्कजनि-कर्तारं पद्ममानयेत्यादिरूपेण योगशाधरशेष्यादौ अभियुक्तप्रयोगदर्शनेन च नलिनशब्दस्य उभयलिङ्गताया एवाकरे स्थितत्वेन अदोषात् । **चञ्चरीकतीति** । चरतीति चञ्चरीको भ्रमरः । भ्रमरः चञ्चरीकः स्यात् रोलम्बो मधुसूदन इत्यादित्रिकाण्डशेषात् तद्वत् आचरतीत्यर्थः । कृषिदूषिभ्यां ईकन् इत्यतः ईकन् इत्यस्य शपृवृत्रात् द्वे रुक्

चाभ्यासस्य इत्यतो द्वेरभ्यासस्येत्यस्य चानुवृत्तौ चरेर्नुमुचेत्यस्य सूत्रस्य चरेरीकन् प्रत्ययः द्वित्वं चास्य भवति । अभ्यासस्य नुम् च भवतीति अर्थात्स्वरतेः ईकन्प्रत्यये द्वित्वे हलादि शेषे अभ्यासस्य नुमि च सति निष्पन्नात् चञ्चरीकशब्दात् सर्वप्रातिपदिकेभ्यः क्विबाचारः इत्यनेनाचारार्थे क्विपि तल्लोपे सनाद्यन्ता धातवः इति धातुसंज्ञायां तिबाद्युत्पत्तौ च चञ्चरीकतीति सिध्यतीति व्युत्पादयन्ति ॥

स०च०— मङ्गलाचरणं कृत्वा चिकीर्षितं निर्दिशति **श्रीमदिति** । सरोवाचकः सरसीशब्दोऽपि प्रसिद्धः । भाषितपुंस्काद्भवीति नलिनविशेषणमुपपन्नम् । **चञ्चरीकतीति** । रोलंबश्चञ्चरीकश्चेत्यभिधानात् चञ्चरीको भ्रमरः तद्वदाचरतीत्यर्थः । अत्र चरतेर्यङ्लुगन्तात् चरफलोश्चेत्यनेनाभ्यासस्य नुग्विधानेन तस्य चानुस्वारोपलक्षणत्वेन अनुस्वारे ईकन्प्रत्यये चञ्चरीक इति जाते तस्मात्सर्वप्रातिपदिकेभ्यः क्विबाचार इत्यनेन क्विपि तल्लोपे 'सनाद्यन्ता धातव' इत्यनेन धातुसंज्ञायां तिङुत्पत्तौ चञ्चरीकतीति रूपसिद्धिरिति द्रष्टव्यम् ॥ ७ ॥

कुण्ड०— अत्यादरेण व्याख्यानोपयोगिनीं व्याख्येये अभिरुचिमाह **श्रीमदानन्देति** । यद्यपि श्रीमदानन्दतीर्थार्यसन्मनःसरसीभुवीत्यस्य नलिनविशेषणतया नपुंसकत्वेन ह्रस्वो नपुंसके प्रातिपदिकस्येत्यनेन ह्रस्वे इकोऽचीत्यनेन नुमि सति सरसीभुनीति भाव्यम् । तथापि तृतीयादिष्विति वैकल्पिकपुंवद्भावात् ह्रस्वनुमोरप्राप्तेः सरसीभुवीति साध्वित्येष्टव्यम् । केचित्तु नलिनशब्दस्य पुलिङ्गत्वानुशासनाद्भुवीति साध्वेवेत्याहुः । **चञ्चरीकतीति** । चञ्चरीको भृङ्गः तद्वदाचरतीत्यर्थः । सर्वप्रातिपदिकेभ्यः क्विब् वा वक्तव्यः इति चञ्चरीकप्रातिपदिकादाचारार्थे क्विपि सनादित्वेन धातुत्वात्तिबादिषु सत्सु चञ्चरीकतीति सिद्धचर्तीति द्रष्टव्यम् ।

विद्व०— **सरसीभुवि** कासारः सरसी सर इत्यभिधानात् सरस्यां भवतीति सरसीभूः तस्मिन्नित्यर्थः । **चञ्चरीकति** भ्रमरवदाचरति ।

रस०— इदानीं ग्रन्थोऽयमपि बह्वर्थो भाष्यं चात्यर्थविस्तरम् । बहुज्ञा एव जानन्ति विशेषेणार्थमेतयोरिति भगवत्पादोक्तबहुज्ञेषु प्रविष्टत्वं प्रबुभुत्सूनां बोधयन् शिष्यमनोबबोधनाय चिकीर्षितं सूचयति **श्रीमदानन्दतीर्थेति** । अनुव्याख्याननलिने मनश्चञ्चरीकति चञ्चरीकवदाचरति । इन्दिन्दिरभ्रमरषट्पदचञ्चरीकाः इत्यादि शब्दरत्नाकरोक्तिः । इन्दिन्दिरो हि मकरन्दपरिपूर्णमरविन्दमवाप्यान्यद्विस्मरति । तथा मनोऽप्यनुव्याख्यानन्नलिनान्तर्गतभावरसास्वादननिरतं न गणयत्येवान्यदिति । तत्रान्येभ्योऽधिकतयासक्तिसूचनायानुभाष्यस्याम्भोजतया चित्तस्य चञ्चरीकतयोक्तिरिति ज्ञेयम् । अनेनेदानीं अनुव्याख्यानव्याख्यानमेव चिकीर्षितमिति द्योतितं भवति । ननु साम्यप्रयोजकधर्मवत्त्वे हि तदुक्तिः संभवति । तत्कथम् अत्रेत्यत आह **मनःसरसीभुवि** । मनोरूपायां सरस्यां भूः तस्मिन्निति । ननु मनस्यज्ञानादिदोषसत्त्वेन तदुद्भवस्यानुभाष्याम्भोजस्यापि दुष्टतया कथं मक्षिकराजभवन्मनोमधुकरराजमनोज्ञत्वमित्यत उक्तम् । सन्निर्दोषमिति । अनुव्याख्यानेऽस्मदतिविशेषस्य मन्दबुद्धिबुद्धचारोहाय नलिनतुल्यताप्रदर्शनेऽपि प्रसिद्धपद्मस्याल्पाल्पकालीनसुखदत्वमस्य तु अनल्पानल्पकालीनानन्ददत्वं, न तत्ततः तदनुगुणानेकगुणपात्रमिति अनल्पमतिभिरनायासेन ज्ञायत इत्याशयेन दशप्रज्ञेत्यनुक्त्वा आनन्ददायिशास्त्रं

यस्येत्यानन्दतीर्थेत्युक्तम् । ननु यद्यस्य ग्रन्थस्य विशिष्टानेकार्थाकृतिगर्भितत्वस्योक्त्या तदा तत्रभवतामतिशयेन सक्तिरस्तदेव कुत इत्यत उक्तं श्रीमदिति । एकैकेनैव पदेनाक्षरेण वा विशिष्टानेकतत्तदधिकारियोग्यार्थ-सूचकत्वसामर्थ्यादिरूपैश्वर्यवन्त इति । भवत्वस्यानेकार्थत्वं न तावता तत्र सक्तिर्युज्यते अतिप्रसङ्गात् । किन्तु तावत्स्वप्यर्थेषु मनःप्रचारे सति । मनःप्रचारश्च श्रुतेष्वेव । न चैतेऽर्थविशेषाः भवद्भिः श्रुतास्तत्कथं तावन्मात्रेण तत्र रतिरित्यतो वा मनश्चञ्चरीकतीति मनसस्तत्साम्यम् । अयमाशयः । तथाहि मधुव्रतो वनव्रातेषु विकसितकुसुम-गतरसलाभाय न पूर्वपरिचयमपेक्षते किन्त्वपरिचितचरमपि रसविशेषं लभत एव तथा मनोऽपीति । ननु संभवति षट्पदे तथा वृत्तिरस्तस्य एतादृशस्वभावत्वात्, न तु मनसि तस्य तथाभावाभावात् । इतरथासाधारणजनमनस्यपि प्रसङ्गादित्यतोऽस्य साधारणमनस्स्वभावत्वाभावेऽपि मुक्तियोग्यपरिपक्वमनस्वभावत्वादश्रुताद्यर्थसक्तिरपि संभवतीति भावेनोक्तं मे मुक्तियोग्यस्य संपादितसाधनस्य मन इति । ननु संसाधितसाधनस्यापि ते मनो नैवंविधार्थगोचरां रतिमाप्नुमलं तत्र बहुज्ञानामेवाधिकारितयाचार्यवरैरेवोक्तत्वादित्यतो वाह मे बहुज्ञगणगणितस्येति । अनेन ब्रह्मसूत्र-भाष्यं यथामति व्याकुर्व इत्युक्तं व्याख्यानं किं स्वबुद्धचनुसारेण यादृशतादृशाल्पार्थप्रदर्शकं यथामतीत्युक्तत्वात् । किं वा यथामतीत्येतद्विनयप्रदर्शनार्थमेव । वस्तुतः साधारणानवगाह्यतदभिप्रेतार्थप्रतिपादकम् । नाद्यः, सर्वेषामपि तत्साध्यज्ञानस्य प्रागेव सिद्धतयाऽकर्तव्यत्वात् । न द्वितीयः, तादृशव्याख्यानस्य बहुज्ञतासाध्यतया तत्र ज्ञापका-भावादित्याशङ्कानिरसनेन तत्पद्यं विवृतं भवति । स्ववचनस्यैव ज्ञापकस्योक्तत्वात् । इदं च विनेयाश्रयेणेति तद्वाक्ये प्रामाण्यं कुत इत्यादि कुचोद्यानवकाश इति । ननु भवन्तस्तावद्बहुज्ञाः ग्रन्थोऽप्ययं बह्वर्थस्तत्रैकस्य मूलस्य कतिपयार्थग्रहणे भवतां बहुज्ञत्वभङ्गः । यावदर्थग्रहणे त्वेकत्रैव विशिष्टव्याख्यानपर्याप्तद्वादशवर्षादिरूपकालविशेष-पर्यवसानापत्त्योत्तरोत्तरमूलार्थाग्रहणप्रसङ्गे न भवदभिमतकार्यसिद्धिप्रसङ्ग इत्यतो द्वितीयमेवाङ्गीकुर्मः । न चोक्तदोषः । नात्र बहुज्ञत्वं विद्यमानयावदर्थग्राहित्वं विवक्षितम्, किन्त्वन्येभ्योऽतिशयेन बह्वर्थग्राहित्वमित्येव । तच्चाल्पतरकाल एव यथाशक्तिग्रहणेऽपि संभवतीति उत्तरमूलार्थग्रहणसंभवात्तावतैव बहुज्ञत्वव्यवहारसंभवाच्चेत्याशयेन वा नलिने मनश्चञ्च-रीकतीत्युक्तम् । न हि पौष्पं मधु मधुकरराजः सामस्त्येन स्वीकरोति किन्तु कियदेव । तावतापि सारग्रहणशीलैः 'अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशली नरः । सर्वतः सारमादद्यात्पुष्पेभ्य इव षट्पद' इत्यादौ सारसङ्ग्रहविषयेऽन्येभ्यो-ऽतिशयेन शिरसा श्लाघ्यत एव तथा, यथा शक्त्यन्याग्राह्यसाराग्राहित्वेनैव बहुज्ञत्वेन बहुमतिर्भवति भावग्राहिणामिति । इदं स्वभाववादाश्रयणेन दृष्टान्तप्रदर्शनादिकं मन्दमतिमत्यपेक्षयैव । वस्तुतस्तु सततश्रीहरिध्यानासादितातीताद्यर्थ-साक्षात्करणयोग्या ये योगिनस्तान्प्रति तु श्रुता एवेत्युत्तरं वक्ष्यीत्याशयेनोक्तमानन्दतीर्थः उपदेशक इति । साम्य-प्रयोजकं धामान्तरे वाह । श्रीमदिति सरसीभूत्ववन्नलिनविशेषणम् । नलिनं विकासादिरूप श्रीमद्भवति । इदमपि सत्प्रजाग्रचयरूप श्रीमदिति । तत्र हेतुमाह सन्मनः सरसीभुवीति । अस्य ग्रन्थस्याप्यानन्दफलकत्वेन सर्वैस्तदभि-रुपादेयत्वप्राप्त्या तत्सिद्धिरिति । ननु भवतु भवतां बहुज्ञगणे निविष्टता भवतु च मूलस्यानेकार्थता तथाऽप्येकस्य मूलस्येक एवार्थ उच्यतां किमनेकार्थकथनेन तद्धि शिष्यार्थमेकं अनुसन्धानमात्रेणैव स्वस्यार्थसिद्धेः । न च कलौ युगे जनिष्यमाणानां प्रायेणाल्पायुषां सुमन्दमतीनां प्रतिक्षणमुपद्रुतानां भवदुक्तानेकार्थग्रहणसामर्थ्यमवसरो वास्ति न चायमस्ति नियमो यत्परेषामुपयोगेऽनुपयोगे वा स्वयं बहुज्ञानावगतोऽनेकार्थविष्करणं कार्यमिति । टीकाकारेषु

तदर्शनात् । इतरथा तेषां बहुगणनिविष्टता त्याज्या भवेत् । शिष्यमत्यनुकूल्यादि चैवं सति भवतीत्यतो वाह श्रीमदानन्दतीर्थेति । यथा हि चञ्चरीकः सारग्रहणायैकं नलिनं प्राप्यैकदा सारं गृहीत्वा न तावतैव परित्यजति । किन्तु पुनःपुनरेव गृह्णाति । तच्च नलिनान्तरे रसमास्वाद्य वा पूर्वं वेति तथा मनोऽपीति । अयमभिसन्धिः । सत्यमेतत् । यद्यहं स्वार्थं परार्थं वानुसन्धायानेकार्थवक्ता स्याम् । न चैवम् । किन्नाम मनोनियामकदेवतापारवश्येनैव । न हि विष्टिपुरुषः किमेवं करोषीति पर्यनुयोगविषयतामापद्यत इति । ननु सरसीभुवीति नपुंसके पुल्लिङ्गे वा । नाद्यः । भुनीत्येव भाष्यतया भुवीत्यस्यानुपपत्तेः । न द्वितीयः । नपुंसकनलिनविशेषणत्वानुपपत्तेः । अत्र सौभाग्यहेतुरदृष्टमित्यादौ हेतुशब्दस्यैव नियतलिङ्गतया समाधानम् । लिङ्गान्तरदर्शनेन नियतलिङ्गत्वाभावादिति चेत् । उच्यते । आद्यं तावदङ्गीकुर्मः । न चोक्तदोषः । तृतीयादिषु भाषितपुंस्कं पुंवद्भाल्लवस्येति सूत्रेण भाषितपुंस्कस्य तृतीयादिविभक्तिषु पुंवद्भावविधानेन भुवीत्यस्योपपत्तेः । सरसीभूशब्दस्य सरसीसमुद्भूतजलचरजन्तुषु प्रवृत्तौ निमित्तभूतस्य सरसीभवत्वस्यैव तदुद्भूतनलिनादावपि प्रवृत्तौ निमित्तत्वेन भाषितपुंस्कत्वात् । यथोक्तं 'यन्निमित्तमुपादाय पुंसि शब्दः प्रवर्तते । नपुंसकेऽपि तच्चेद्भाषितपुंस्कं तदुच्यत' इति । द्वितीयाङ्गीकारेऽपि न दोषः । मानायानाभिधाननलिनेत्यादि लिङ्गानुशासनसूत्रेण नलिनशब्दस्य पुल्लिङ्गताविधानेनोभयोरपि समानलिङ्गत्वसंभवादिति ॥

ल०२०— शिष्यावधानाय चिकीर्षितं सप्रकारं व्यनक्ति श्रीमदिति । अत्र मे मनः अनुव्याख्याननलिने अनुव्याख्यानं तच्चाधकमानन्दतीर्थप्रणीतं सूत्रव्याख्यानरूपं ग्रन्थान्तरं तदूपं यन्नलिनं पद्मं तस्मिंश्चञ्चरीकति चञ्चरीको भ्रमरस्तद्वदाचरतीत्यर्थः । यथा चञ्चरीकः पुष्पेभ्योऽन्यैरुद्धर्तुमशक्यान्नानाविधान् रसान् स्वयमुद्धृत्य मधुरं मधु निर्मिमीते तथा मन्मनोऽपि अनुव्याख्यानोक्तांस्तादृशान् न्यायान् व्यक्तीकृत्य सतां सुधां न्यायसुधां करोतीति चिकीर्षितस्य तथा यथा चञ्चरीकः कस्मिंश्चित्सुगमरसे पुष्पे सकृदेव रसं स्वीकरोति । कस्मिंश्चिद्दुर्गमरसे पुष्पे तु आदावेकं रसं स्वीकृत्य पुनरुत्पत्योत्पत्यरसान्तरमिति बहुवारं स्वीकरोति । कस्मिंश्चित्पुष्पे तु एकदैकरसं गृहीत्वा पुष्पान्तरङ्कृत्वात्तत्रत्यं रसं स्वीकृत्य पुनः पर्यावृत्यागत्य प्राग्गृहीतरसे पुष्पे पुना रसान्तरं स्वीकरोति तथा मन्मनोऽपि कस्यचिन्मूलस्यैकमेवार्थं विषयीकरोति कस्यचिन्मूलस्य तु बहुविधमप्यर्थजातमेकदैव कस्यचिन्मूलस्य तु आदावेकमर्थं विषयीकृत्य मूलान्तरव्याख्यानन्तरं पुनः सिंहावलोकनन्यायेन पूर्वमूलेष्वर्थान्तरं विषयीकरोतीति तदनुसारेणेहापि क्वचिदेकैकार्थनिबन्धनात्मकं क्वचिच्चाशयद्वयं किञ्च 'अपि च' इत्यादिरूपेणानेकार्थनिबन्धनात्मकं क्वचित्सिंहावलोकनन्यायेन व्यवहितार्थनिबन्धनात्मकं इत्यनेकप्रकारोपेतं ग्रन्थीकरोतीति तत्प्रकाराणां च व्यक्तिरिति ज्ञेयम् । अनुव्याख्यानस्य नलिनाभेद उक्तः । अभेदश्चात्र सिंहो देवदत्तस्त्वमसीत्यादाविव सादृश्यस्वरूपो विवक्षितः । सादृश्याभेदसंश्रयादिति श्रुतिपादीयानुभाष्योक्तेः । तथाच यथा पुष्पेषु नलिनं नानारससंपूर्णं तथा ग्रन्थेष्वनुव्याख्यानं तत्तदपेक्षितानेकार्थपरिपूर्णमिति सूचयति । यथोक्तम् । 'ग्रन्थोऽयमपि बह्वर्थो भाष्यं चात्यर्थविस्तरमि'ति । एतत्संभावनायोक्तं श्रीमदिति । श्रीमत् सर्वाधिकार्यपेक्षितस्य मोक्षसाधनबोधसाधनत्वरूपमाहात्म्यविशिष्टं आनन्दतीर्थं मौक्तानन्दसन्दायिशास्त्रं यस्य स श्रीमदानन्दतीर्थः पूर्णप्रमतिः स एवार्यः । अथवा श्रीमानुक्तविशेषणद्वयोपेतशास्त्रनिर्मातृत्वादिमाहात्म्यवान्वा तादृशशास्त्रनिर्मातृत्वप्रयोजकविवक्षितार्थतत्त्वज्ञानादिरूपमाहात्म्यवान् वा आनन्दतीर्थसंज्ञामा

च यः आर्यः पूज्यस्तस्य सन्निर्दुष्टं मन एव सरसी तस्यां भवत्यानिर्भवतीति सरसीभू तस्मिन्नित्यर्थः। तथाच प्रलयेऽप्यपरिलुप्तशास्त्रकर्तृत्वप्रयोजकवृत्तिज्ञानात्तत एवानादिकालं मनसि विपरिवर्तमानसर्वशास्त्रादानन्दतीर्थात्कालविशेषे प्रादुर्भूतस्य अनुव्याख्यानस्योक्तानेकार्थपरिपूर्णत्वादिकं नासंभावितमिति भावः। ननु नलिनपदं नपुंसकमतस्तद्विशेषणमपि सरसीभुनीति स्यात् कयं सरसीभुवीति पुल्लिङ्गमिति चेन्न। नपुंसकलिङ्गत्वेऽपि तस्य भाषितपुंस्कत्वेन पुंवद्भावाङ्गीकारात्। यथोक्तम्। तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्येति। अत्र यत्पदं पुन्नपुंसकयोरेकेनैव प्रवृत्तिनिमित्तेन प्रवर्तते न तद्भाषितपुंस्कमिति न तत्र पुंवद्भावः। यथोक्तम्। पीलुर्वृक्षः फलं पीलुपीलुने न तु पीलवे। वृक्षे निमित्तं पीलुत्वं तज्जत्वं तत्फले पुनरिति। प्रकृते चेदं भेकादौ पुंसि नलिने न नपुंसके च सरसीभूतत्वेनैकेनैव प्रवृत्तिनिमित्तेन प्रवृत्तमिति भाषितपुंस्कत्वात्सरसीभुवीति पुंवद्भावो युक्तः। अथवा नलिनपदमपि पुल्लिङ्गमेव। यथोक्तं लिङ्गानुशासनसूत्रे। मानयानाभिधाननलिनपुलिनेत्यादि। तथाच तद्विशेषणमपि पुल्लिङ्गमेवेति नानुपपत्तिः। ननु 'अथ तत्कृपया ब्रह्मसूत्रभाष्यं यथामति। व्याकुर्वे श्रीमदानन्दतीर्थार्यमुखनिःसृतमि'ति पूर्वप्रस्थानवत्। चिकीर्षितं स्पष्टमेव। किं न प्रतिज्ञातमिति चेन्न। चिकीर्षितप्रकाराणामपि ज्ञापनीयत्वस्योक्तत्वादिति।

चषकः— चञ्चरीकस्यारविन्दगतगन्धाघ्रातृत्वशक्तेरिवात्मीयचेतसोऽनुव्याख्याव्याख्यौपयिकतत्प्रतिपाद्याधिगन्तृत्वशक्तिं स्फोरयन् चिकीर्षितं व्यनक्ति **श्रीमदिति**। तृतीयादिषु भाषितपुंस्कत्वात्पुंवद्भावेन भुवीति नलिनविशेषणं सङ्गच्छते। 'मानयानाभिधाननलिनपुलिनोत्तानशयनासनस्थानचन्दनालानसमानभवनवसनसंभावनविभावनविमानानि नपुंसके चे'ति पुल्लिङ्गाधिकारीये लिङ्गानुशासनसूत्रे चकारेण पुंस्त्वसमुच्चयाद्वा ॥ ७ ॥

ए०बा०— अथ स्वमनश्चञ्चरीकसाम्योक्तिछलेन स्वचिकीर्षितं सूचयति **श्रीमदिति**। **श्रीमदानन्दतीर्थार्यसन्मनःसरसीभुवि। अनुव्याख्याननलिने चञ्चरीकति मे मनः ॥ ७ ॥** श्रीमदानन्दतीर्थार्यस्य सत् समीचीनं मन एव सरसीसरः तस्यां भवतीति सरसीभु तस्मिन् भवतेः क्विप्। तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्येति पुंवद्भावात्सरसीभुवीति साधु। तथा च श्रीहर्षः 'उरो भुवा कुंभयुगेन जृम्भितम्'। 'कासारः सरसीसर' इत्यमरः। सरसीः परिशीलितुं पुरा च श्रीहर्षः। मे मनः चञ्चरीकति। चञ्चरीको भ्रमर इत्युणादिवृत्तिः। चञ्चरीक इवाचरतीत्यर्थे सर्वप्रातिपदिकेभ्यः क्विबाचार इत्याचारक्विबन्ताच्चञ्चरीकशब्दात्सनाद्यन्ता धातव इति धातुसंज्ञायां लट्। मनसश्चञ्चरीकौपम्येन चाञ्चल्याद्यवगतेः। प्रतिपदं स्वावगतयावदाकूतानुद्घाटनं सूचयति। चिकीर्षितस्य मुखतोऽनुक्तिस्तु आनन्दतीर्थभगवद्वचसां विशिष्टव्याख्यानकर्मणि सुराधिकारिणोऽत्रेत्यन्यत्रोक्तार्थमवगमयति ॥ १ ॥ यद्वा चिकीर्षितं सूचयन्तस्तत्पारयितुं सकलवाङ्मनसदेवोत्तमाचार्यं संबोध्याशासते **श्रीमदिति**। यत्तदोरिहाध्याहारः। तीर्थार्यगुरुवर्यमध्वाचार्यः सन्मनः सरसीभुवि। सत्। प्राणः सदिति प्राण इति श्रुतेः। तस्य मनः सरसीभुवि प्राग्वदर्थः। अनुव्याख्यानमेव नलिनं तस्मिन् मे यन्मनश्चञ्चरीक इति तत्तस्मात् श्रीमत् मे मनः आनन्दं वर्धय टुनदि समृद्धावित्यतो लोट्मध्यमपुरुषैकवचनम्। मनोरथं पारयेति प्रार्थनम् ॥ ७ ॥

काशी०— चिकिर्षितं व्यनक्ति **श्रीमदिति**। सन्निर्दोषं सत्स्वनुक्रोशेन द्रवद्वा यन्मनस्तदेव सरसी सरस्तत्रोत्पन्ने मनस्युत्पन्नस्यैव वाक्यस्य वाच्यभिव्यक्तेः। तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्येति

पुंवद्भावविकल्पान्नलिनशब्दे पुलिङ्गत्वस्याप्यनुशासनाद्वा (मानयानाभिधाननलिनपुलिनेत्यादिलिङ्गानुशासनसूत्रेण पुलिङ्गताविधानादिति भावः) भुवीति नुमागमाभावः। चञ्चरीकति भ्रमरवदाचरति व्याख्यानेन रसास्वादने प्रवर्तत इत्यर्थः।

प्रदीपः— यत्कार्यमुद्दिश्य मङ्गलाचरणं कृतं तन्निर्दिशति श्रीमदिति।

स्वमहत्त्वं विनयेन भूषयितुं विनयप्रदर्शनं करोति—

सु०— न शब्दाब्धौ गाढा न च निगमचर्चासु चतुरा
न च न्याये प्रौढा न च विदितवेद्या अपि वयम्।
परं श्रीमत्पूर्णप्रमतिगुरुकारुण्यसरणिं
प्रपन्ना मान्याः स्मः किमपि च वदन्तोऽपि महताम् ॥ ८ ॥

परि०— चञ्चरीकतीत्युक्त्या प्राप्तं स्वमहत्त्वं विनयेन भूषयितुं विनयप्रदर्शनं करोति **न शब्देति**। निगमचर्चासु वेदविचारेषु। क्वचिदपि चेन्न प्रौढिस्तर्हि किं बलं व्याख्यान इत्यत आह **परमिति** ॥ अन्यद्बलमस्तीत्यर्थः। तत्किं गुरुकारुण्यसरणिं प्रपन्ना इति यत्तदेव बलम्। अतो मान्या इत्यन्वयः। एतेन अग्रे वक्ष्यमाणं सर्वं मूलाभिप्रेतमिति ध्वनितम्। किमपि साध्वसाधु वेत्यर्थः। विनयोक्तिरेवैषा। वस्तुतो मयि गुरुकारुण्यसरणिप्रतिपत्तिलब्धशब्दाब्ध्यवगाहादयो व्याख्यानप्रयोजकीभूता धर्माः सन्तीति स्वगतव्याख्योपयुक्तधर्मबाहुल्याभिप्रायेण बहुवचनोक्तिः। यद्वा गाढा इत्यादेः निषेधप्रतियोगितया प्रपन्ना इत्यस्य मान्यत्वोपपादकतयोपात्तत्वेन मान्यत्वादेः विधेयतया च वयमित्येतदविशेषणत्वेन सविशेषणस्य तु नेति निषेधाप्रवृत्तेरस्मदो द्वयोश्चेत्येकस्मिन्नपि बहुवचनं ध्येयम्। श्लोकानां च वक्तव्यबहुत्वेऽपि ग्रन्थगौरवभयात्सङ्क्षेपः।

(प्रत्यक्षरं) प्रतिवाक्यं प्रतिपदमनेकाकूतगर्भिता।
प्रतिभाति सुधाऽथापि ग्रन्थाल्पत्वाय नोच्यते ॥ ८ ॥

यादु०— भगवत्पादकृपामात्रसाध्यत्वान्नात्रानादरः कार्य इत्याह **न शब्दाब्धावित्यादिना**। **निगमचर्चा** मीमांसा। **वेद्यं** परमपरं च तत्त्वम्। अत्र यद्यप्यस्मदो द्वयोश्चेत्यत्र सविशेषणस्य प्रतिषेधो वक्तव्य इत्युक्तत्वात् अहं पण्डितो ब्रवीमीतिवत् अहं प्रपन्नो मान्योऽस्मीत्येव वक्तव्यम्, तथाऽपि बहुत्वारोपमात्रेण बहुवचनोपपत्तिः। अत एवोक्तं दुर्घटवृत्तिकारेण "बहुत्वारोपात् 'न वयं वैयाकरणा' इत्यादिकमुपपादनीयमि"ति। अन्ये तु शब्दाब्धौ गाढा नेति न, निगमचर्चासु चतुराश्च (स्व)न्याये प्रौढाश्च नेति न, विदितवेद्या अपि यद्यपि तथाऽपीति व्याचक्षते। अत्र च न

परटीकाकाराणां व्याख्यानमिवास्मद्व्याख्यानमशेषशास्त्रपरिज्ञानमात्रसाध्यमपि तु गुरुतमश्रीमध्वकृपासाध्यमतो नात्र अनादरलेशः अपि कर्तव्य इत्याहेत्यवतारिका द्रष्टव्या। **किमपि युक्तमयुक्तं वेत्यर्थः**। आपाततोऽयुक्तार्थकमदीयं वचनं मध्वगुरुप्रसादसाध्यत्वाद्युक्तार्थप्रमापकमेव सुधियामिति भावः। चोऽवधारणे, मान्या इत्यनेन संबध्यते ॥ ८ ॥

आनन्दः— स्वगर्वं परिहरति **न शब्दाब्धाविति**। अत्र गाढा इति कृतमज्जना इत्यर्थः। गत्यर्थाकर्मकेति सूत्रेणाकर्मकत्वात्कर्तरि क्तः। अत्र शब्दशास्त्रादिषु गाढत्वादिनिषेधे किञ्चित्तत्र प्रवेशोऽस्तीति सूचयति।

कं०रा०— न शब्दाब्धाविति। न च वाच्यमस्मदो द्वयोश्चेति प्राप्तस्य बहुवचनस्य 'सविशेषणस्य प्रतिषेधो वक्तव्य' इति निषेधाद् वयमिति बहुवचनमयुक्तमिति। 'त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नता इत्यत्रोन्नतत्वं विधीयते। न तु विधेयोऽर्थो विशेषणमित्यादेशो भवत्येवे'ति पदमञ्जर्यां विधेयस्य विशेषणत्वाभावोक्तेर्न शब्दाब्धौ गाढा इत्यादीनां च विधेयत्वेन अविशेषणतया निषेधाप्रवृत्त्या बहुवचनोपपत्तेः। उत्तरार्धेऽपि वयं केवलं श्रीमत्पूर्ण-प्रमतिगुरुकारुण्यसरणिं प्रपन्ना अत एव किमपि च लोकविलक्षणं वदन्तः स्मः तत एव महतामपि मान्याः स्म इति सर्वेषां विधेयत्वमेवेति द्रष्टव्यम्।

श्रीनिधि०— अहङ्कारशान्त्यर्थमाह **न शब्दाब्धाविति**। प्रतीत एवार्थः। अथवा शब्दाब्धौ गाढा न किम्। गाढा एवेत्येवं काक्वा योजना कार्या। काकुर्ध्वनिविकारः। **किंशब्दस्तद्वच्चकत्वेनोपात्त** इति ज्ञेयम्। अथवा नत्रः देहलीदीपन्यायेन पूर्वत्रोत्तरत्र च संबन्धः। अन्तिमस्यावृत्तिः। तथा च परं केवलं यथा भवति तथा श्रीमत्पूर्ण-प्रमतिगुरुकारुण्यसरणिं प्रपन्नाः शब्दाब्धौ गाढा नेति न, किन्तु गाढा एवेत्येवमादि योजना द्रष्टव्या। एवं च किमपि च वदन्तोऽपि महतां मान्याः स्मः। एवं चास्मन्मुखाद्यन्निस्सरति तत्तन्महद्भिः शोधयितुं युक्तमेवेत्यर्थः। अस्यां योजनायां प्रयोजनं तु शिष्याणां निःशङ्का प्रवृत्तिरेव। ननु वयमिति बहुवचनमनुपपन्नम्। ग्रन्थकर्तुः एकत्वात्। ननु अस्मदोद्वयोश्चेति अस्मच्छब्दस्य द्वयोर्द्वित्वे च शब्दादेकत्वे च बहुवचनं वा स्यादिति वचना-दुपपन्नं तदिति चेन्न। सविशेषणस्य प्रतिषेधो वक्तव्यः इति वार्तिकवचनात् सविशेषणस्य चात्र प्रकृतत्वादिति चेन्न। वार्तिकवचनस्य अनित्यतयाऽनादरणीयत्वात्। वैराग्यशतकादौ कुठारा वयमित्यादि बहुप्रयोगस्य दर्शनात्। शिष्यापेक्षया पूजायां वा बहुवचनमिति ज्ञेयम्।

वा०चं०— केवलं गुरुदेवताप्रसादलब्धैतद्ग्रन्थप्रतिपादितपदस्वरूपप्रमाणप्रमेयोपपादकन्यायजाते न अनादरः कार्य इत्येतद्वचञ्जयन्स्वगर्वं परिहरति **न शब्देति**। 'न शब्दाब्धावि'त्यादिना क्रमेण पदवाक्यप्रमाणज्ञ-त्वाभाव उच्यते। महतामित्येतच्चात्र व्यञ्जकं द्रष्टव्यम्। **किमपि चेति** लौकिककारणनिरपेक्षतामाह। अलौकिक-कारणभावात् न अकारणकार्योत्पत्तिरपीत्याह **परमिति**। अत्रास्मदो द्वयोश्चेति बहुवद्भावाद्वयमिति बहुवचनम्। 'त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नता' इत्यादावुन्नतत्वादेः विधेयत्वेन व्यावृत्तावतात्पर्यादविशेषणत्वबन्न शब्दाब्धौ गाढा इत्यादेरपि विधेयत्वेनाविशेषणत्वात्परं श्रीमदित्यादेश्चाविधेयत्वेऽपि हेतुपरतया व्यावृत्तावतात्पर्येण अविशेषणत्वान्नात्र 'सविशेषणस्य प्रतिषेधो वक्तव्य' इति प्रतिषेधस्य प्रसक्तिरिति द्रष्टव्यम्। (प्रतिषेधस्येति। अस्मदो

द्वयोश्चेत्युक्तबहुत्वद्वावप्रतिषेधस्येत्यर्थः । तथा च 'अहं पण्डितो ब्रवीमी'तिवत् 'अहं प्रपन्नो मान्योऽस्मी'ति न प्रयुक्तमिति भावः।) ॥ ८ ॥

वा०२०— प्रतिपादितपदेत्यादि । पदस्वरूपं च प्रमाणं च प्रमेयं च एतेषां उपपादकं यन्न्यायजातं तच्च केवलं गुरुदेवताप्रसादलब्धमिति तादृशोऽनादरो न कार्यः इति योजना । अस्य ग्रन्थस्य न्यायसुधात्वेन तत्रोपदर्शनीय-न्यायानां मध्ये केचन सूत्रभाष्यश्रुत्यादिगतपदस्वरूपोपपादका, केचन सूत्रभाष्योदाहृतप्रमाणोपपादका, केचन सूत्राद्युक्तप्रमेयोपपादका इति विवेकः । एतच्च तत्र तत्र उत्तरग्रन्थे स्फुटं भविष्यति । इत्यादिनेति । शब्दाब्धौ गाढा इत्यत्येन पदशब्दोक्तव्याकरणज्ञत्वाभाव उच्यते इत्यादि ज्ञेयम् । व्यञ्जकाप्रतीतेः शिष्यसमाधानाय स्वयमेवाह महत्तामितीति । किमपि च वदन्तोऽपि परं इत्यादिना लौकिककारणाभावालौकिककारणसद्भावयोः प्रतिपादनेऽपि श्रद्धाजाड्यमूलकमेतत् तन्निर्वाहायालमिति मन्दानां बुद्धिः स्यात् अतो महतामित्युक्तम् । तेन च गुरुदेवताप्रसाद-लब्धन्यायानां महत्संमतत्वप्रतिपादनमुखेन सर्वेषामपि उपादेयमिदम् । न तु तत्र केनापि अनादरः कार्यः इति सूचनादिति भावः । कारणाभावतत्सद्भावप्रतिपादनयोः विरोधं परिहरति किमपि चेत्यादि । यत्तु न शब्दाब्धौ गाढा नेत्यादौ पूर्वोत्तरनञ्द्वयस्य एकत्र संबन्धमाश्रित्य शब्दाब्धौ गाढा नेति न निगमचर्चासु चतुराश्च । न्याये प्रौढाश्च नेति न विदितवेद्याश्च अपि यद्यपि तथापि परं श्रीमत् इत्यादि केचन इत्याचक्षते । तत्तु वाक्यार्थविनोद एव गुरुराजचरणैः पराकृतम् । तथाहि । परं श्रीमत् इत्यादौ हि लौकिककारणाभावालौकिककारणसद्भावयोः प्रतिपादनस्य स्पष्टतया लौकिककारणसद्भावपरत्वेन पूर्वार्धयोजने तद्विरोधापातादिति । यच्च एतत् व्याख्यानोपपादनं अन्यथाख्याति-कृद्भिः कृतम् । न परकीयटीकाकाराणां व्याख्यानमिवास्मत् व्याख्यानं अशेषशास्त्रपरिज्ञानमात्रसाध्यं किन्तु गुरूत्तमश्रीमध्वकृपासाध्यं अपि अतो नात्र अनादरलेशोऽपि कर्तव्यः इत्याह इति अवतारिका द्रष्टव्येत्यादिना । तदपि तत्रैव निराकृतम् । किमपि चेत्यनेन लौकिककारणाभावप्रतिपादनेन विरोधापरिहारात् । न च किमपि चेत्यस्य युक्तम् अयुक्तं वेत्यर्थः । तथा चापाततोऽयुक्तार्थकं मदीयं वचनं मध्वगुरुप्रसादसाध्यत्वात् युक्तार्थप्रापकमेव सुधायां इत्यभिप्रायकत्वात् न तत् विरोध इति वाच्यम् । तथा सति न वैदुष्यभ्रान्त्या न च वचनचातुर्यकुधियेत्येत-त्पद्यसमानार्थकान्तिममूलपद्यविरोधापातात् । न ह्यत्रैव तत्रापि नञ्द्वयस्य एकत्रसंबधमाश्रित्य वैदुष्यभ्रान्त्या नेति न किन्तु वचनचातुर्यकुधिया चेत्यादिव्याख्यानं परस्यापि संमतमिति । किञ्च सकलशास्त्रपरिज्ञानसत्त्वे तद्वचनस्य युक्तताया एव प्राप्त्या युक्तम् अयुक्तं वेत्यर्थायोगः । आपाततो अयुक्तार्थकमपीदमित्यपि शास्त्रपरिज्ञानविरोध्येव । अवतारे शास्त्रपरिज्ञानसाध्ये वचने गुरूत्तममध्वकृपासाध्यत्वेनातिशयस्य प्रतिपादनेनानादरलेशोऽपि न कार्यः इति चोक्तत्वेन भावकथनावसरे अयुक्तत्वमध्वप्रसादेन सुधियां युक्तार्थप्रतिपादकत्वयोः वर्णनस्य तद्विरोधात् पूर्वोत्तरापरामर्शमूलकमिदं तत् व्याख्यानोपपादनं इत्यपि तत्र दूषणं ज्ञेयम् । अन्यत्र प्रायोऽन्यथाख्यातिग्रन्थो वाक्यार्थविनोदे खण्डितस्तत्प्रकारेण तद्दूषणं ज्ञेयम् । यत्र गुरुराजाप्रवृत्तिः तत्र दूषणं अस्माभिः निरूपयिष्यते इत्यवधेयम् । ननु अस्मदर्थजयतीर्थमुनेः एकत्वात् वयमिति बहुवचनायोगः बहुषु बहुवचनमिति सूत्रेण बहुष्वेव तदभ्यनुज्ञानात् इत्यत आह अत्रास्मद् इति । अयमाशयः । अस्मदो द्वयोश्चेति सूत्रे हि जात्याख्यायां इति पूर्वसूत्रादेव

एकस्मिन् बहुवचनमित्यस्यानुवृत्तिरस्ति । जात्याख्यायां इत्येतत् सूत्रीयभाष्यादौ त्वेकस्मिन् बहुवचनं इत्येतत् एवं व्याख्यातम् । एकस्मिन् बहुवचनमिति एकवचनस्य बहुवचनादेशविधानमिति न विवक्षितम् । तथा सति व्रीहिभ्यः आगतः इत्यत्र व्रीहित्वं जातिवाचि व्रीहिशब्दे चतुर्थ्येकवचने ङे इत्यस्य भ्यसिति बहुवचनादेशोत्तरमपि स्थानिवद्भावेन घेर्ङिति इति गुणे व्रीहिभ्यः इति रूपप्रसङ्गात् । किन्तु बहुवचनशब्दस्य पारिभाषिकजसादिग्राहकतामनङ्गीकृत्य वचनमुक्तिः । बहूनामर्थानां वचनं बहुवचनमित्यन्वर्थत्वं चाश्रित्य बहुवचनशब्देन बह्वर्थाभिधानस्य प्राप्तावेकस्मिन्नर्थे च विद्यमाने बहूनां वस्तुतोऽभावरूपसामर्थ्येन वत्यर्थस्यावगम्यमानतया बहूनामिवोक्तिर्भवतीति अर्थलाभादेकोऽर्थो बहुवत् भवतीति एव फलतः प्राप्नोतीत्येवंप्रकारेण एकस्य बहुवद्भावे एव बहुवचनशब्दार्थ इति । उक्तं च महाभाष्ये । किं तर्हि तच्चेकवचनादेश इत्यादि । यावत् रूपादेकोऽर्थो बहुवत् भवतीति तावदेकस्मिन् बहुवचनमिति च । जात्यर्थो बहुवत् भवतीति यावत् इति काशिकावाक्यस्य बहुवचनशब्दोऽयं अन्वर्थः इत्यारभ्य यदि च ज्ञात्यर्थो बहुवत् भवति ततो बहूनामिवोक्तीः भवतीति स एवार्थः संपद्यते इत्याहेति मञ्जर्यां अवतारश्चास्ति । द्विगुरेकवचनमिति सूत्रीयभाष्येऽपि नेदं पारिभाषिकस्य वचनस्य ग्रहणं उच्यते वचनमित्याद्युक्तश्च । एवं एवादौ द्विवचने । तेमयावेकवचनस्य । एत इत् बहुवचने स्याद्विवचनं विभज्येत्यादिसूत्रीयव्याकरणग्रन्थेषु समस्यमाने द्वेकत्वेत्यादिव्याख्याने चान्वर्थतोक्तिरस्ति । तथा च बहूक्तिरूपबहुवचनशब्दार्थस्यातिदेश इति सिद्धेऽस्मद् इति सूत्रेऽप्यतिदिश्यमानस्य बहूक्तिरूपबहुवचनशब्दार्थस्यार्थगतबहुवद्भावरूपेण पर्यवसन्नतया यथा बहुषु बहुवचनं एव एकस्मिन्नस्मदर्थे द्वयोर्वा तयोः बहुभावप्रयुक्तबहुत्वादेव बहुवचनमिति विहितमिति सिद्धचा प्रकृते जयतीर्थमुनेरेकत्वेऽपि अस्मदर्थे तस्मिन् बहुवद्भावो न बहुत्वसत्त्वात् वयमिति बहुवचनमिति । तथाऽस्मदः इत्यर्थग्रहणस्य व्याख्यानात् अस्मदर्थार्थकशब्दमात्रे बहुवचनसिद्धचा ब्रूमः इत्यादि तिङन्तपदे समानाधिकरणपदान्तरेषु च बहुवचनवत् प्रकृते स्म इत्यादि तिङ्पदे गाढा इत्यादि समानाधिकरणपदे च बहुवचनमुपपन्नमित्याद्युपलक्षणया अत्राभिप्रेतं ज्ञातव्यम् । उक्तं च काशिकायाम् । अस्मदो योऽर्थ इत्यादि । वयं ब्रूमः इत्याद्युदाहृतं च मञ्जर्यामपि अस्मदः इत्यभिधेयसंबन्धे षष्ठीत्याह अस्मदो योऽर्थ इति । पञ्चम्यां तु तत्र वर्तमानस्य तिङन्तस्य न स्यात् इति भाव इत्युक्तम् । तथा जात्याख्यायां इति सूत्रीयकाशिकायां जात्यर्थो बहुवत् भवतीति यावत् । तेन तद्विशेषणानामपि संपन्नादीनां बहुवचनं उपपाद्यत इति प्रतिपादितम् । तदनुसारेण एतत्प्रकरणस्यार्थमाश्रित्य प्रवृत्तिसिद्धिः । मञ्जर्यामपि । ततः किं सिद्धं भवतीत्यत आह तेनेति । यदि तु जातिशब्दात् बहुवचनं जसादि विधीयते । ततो विशेषणेभ्यः संपन्नादिशब्देभ्यो न स्यात् इत्यादेरुक्तत्वात् । अत्र च जसादीति फलिताभिप्रायेण । न तु जसादेरेव विधानमन्वर्थः इत्यादि पूर्वोत्तरग्रन्थविरोधापत्तेरिति स्पष्टम् । काशिकावाक्यस्य जातिवाचकशब्दमात्रग्रहणं नेति भावेन संपन्नादिशब्देभ्योऽपि बहुवचनमुपपन्नमित्यर्थं स्फोरयितुं प्रवृत्तस्य संपन्नादिशब्दगतबहुवचनोपपादने एव आरम्भस्य सत्त्वेन मिश्रतया उक्तावपि अदोषात् । यत्तु कुसुमविकासे जात्यर्थो बहुवत् भवतीत्यस्याध्यारोपितबहुत्वं भवतीति व्याख्यानम् । तदपि ग्रन्थमर्मविरुद्धम् । प्रयोगसंरक्षणाय प्रवृत्तलक्षणेषु तत्तद्योगादिनिमित्तेन तत्तत्सुविभक्तिलुडादिलकारात्मनेपदादिविधानेन विधानस्थले च नमो योगे चतुर्थी भवति । माङ्योगे लुङ् सर्वलकारापवादेन भवतीत्यादौ द्वितीयायां चतुर्थीत्वं आरोपितं लटि च लुङ्त्वं आरोपितं इत्याद्यर्थानङ्गीकारेण प्रकृतेऽपि बहुवत् भवतीत्युक्तबहुवद्भावस्य विधानप्राप्तस्यायो

दारा गृहा वर्षा इत्यादिवत् एकस्मिन् बहुवचनापादकत्वसंभवात् । तस्मात् बहवो यथा बहुवचनजसादिभाजः एवमेकोऽर्थः तत् भाग् भवतीति बह्वर्थवत् जसादिभाक्त्वमेव बहुवद्भाव इति मन्तोष्टव्यम् । संमतश्चायमर्थो दुर्घटवृत्तिकृतः इत्यनुपदमेव वक्ष्यामः । यत्तु अन्यथाख्यातौ बहुत्वारोपमात्रेण बहुवचनोपपत्तिः । अत एवोक्तं दुर्घटवृत्तिकारेण । बहुत्वारोपात् न वयं वैयाकरणाः इत्यादिकं उपपादनीयमित्युक्तम् । तन्नास्मदो द्वयोश्चेत्यनेन बहुवद्भावादेव बहुवचनोपपत्तौ आरोपाश्रयणायोगात् । इत्येवं दूषणं वाक्यार्थविनोदे गुरुराजचरणैरुक्तम् । दूषणग्रन्थवाक्येऽपि बहुवद्भावादित्यस्य बह्वर्थवत् जसादिभाक्त्वादित्येवार्थः । एतेन बहुत्वारोप एवास्मद इत्यनेन प्राप्त इति न कश्चिद्दोष इति निरस्तम् । आरोपाश्रयणेन तत्सूत्रप्रवृत्तेः । अस्तु वा तत्राभिप्रायः तथापि विहितारोपाश्रयणं परित्यज्याविहित आरोपाश्रयणं दुष्टमेव । दुर्घटवृत्तौ सविशेषणानां प्रतिषेधो वक्तव्य इत्युक्तम् । कथं न वयं वैयाकरणाः । ईश्वरादिवदेकत्वेऽपि बहुत्वारोपादिति वाक्यविन्यासमद्भावेनान्यथानुवादायोगः । बहुवद्भावेन बहुत्वोपपत्तिं वयं ब्रूम इत्यादावभिप्रेत्यैव सविशेषणविचारपरत्वात् तद्ग्रन्थस्य बहुवचनमात्रोपपादनपरत्वेन योजनाया अन्यार्थकथनापत्तेश्चेति स्पष्टम् । यदि बहुत्वारोपमात्रेण बहुवचनं अस्मद इति सूत्रविहितम् । तत्र सविशेषणानां प्रतिषेधात् निर्विशेषणस्यैव न तु सविशेषणस्य बहुत्वारोपेऽपि बहुवचनमिति । काशिकार्थदुर्घटवृत्तिकृदभिप्रेत्य । तर्हि सविशेषणस्थले बहुवचनोपपत्तये बहुत्वारोपं कथं शरणीकुर्यात् । अथ मन्येत । नेदं वयं इति बहुवचनोपपादनायारोपाश्रयणम् । अपि तु न वयं वैयाकरणाः इत्यादाविव सविशेषणस्थलेऽपि बहुवचनोपपत्त्यर्थं एवेदं तदाश्रयणमिति । तन्न । जयतीर्थमुनेरेकतया वयमिति बहुवचनायोगः इत्येवाशङ्कया बहुत्वारोपात् बहुवचनमिति समाधानप्रकारस्य चैतत् वाक्यात् प्रतीत्या सविशेषणत्वेऽपि इत्यध्याहाराश्रयणेन योजनायाश्च ज्ञापकाभावेन अकर्तव्यतया विशिष्टविषयकत्वानुपपत्तेः । ननु दुर्घटवृत्तिवाक्यस्य सविशेषणविषयकतया तत्संमतिप्रदर्शनादेव अस्मद्वाक्यस्य सविशेषणविषयत्वं अभिप्रेतमिति ज्ञातुं शक्यं इति चेत् न । तर्हि विमलमिदं ग्रन्थाचातुर्यं यदवश्यं वक्तव्यं सर्वमभिप्रेतत्वेनैवोच्यते इत्यापत्तेः । किञ्च न शब्दाब्धाविति प्रतीकोपादानानन्तरं निगमचर्चा मीमांसा वेद्यं परमपरं तत्त्वं बहुत्वारोपमात्रेणेति तत्तत्पदव्याख्यानक्रमानुसारेण वयमिति बहुवचनमात्रार्थत्वेनात्रोपपादनमिति स्पष्टतया प्रकारान्तरकल्पना न युक्ता । नापि आधुनिकपुस्तकगतपाठान्तरकल्पना युक्ता । उक्तवक्ष्यमाणदूषणानां सर्वथा परिहर्तुमशक्यत्वात् । किं मूलं परेषां एवं लेखनमिति चेत् । अवहितमनाः शृणु । स्वामिमिर्व्याख्यानकरणसमये दुर्घटवृत्तौ वयं न वैय्याकरणाः इत्यादौ सविशेषणस्थले बहुत्वारोपाश्रयणेन परिहारः कृतोऽस्ति इत्येवंरूपेणैतत् प्रमेयानुवादः कृतः तत्र एकदेशश्रवणाभावाद्वा स्मरणाभावाद्वा दुर्घटवृत्तौ वयं न वैय्याकरणा इत्यत्र बहुत्वारोपात् इत्युक्तमिति स्वामिवाक्यैकदेशं श्रुतवद्भिः विशिष्टार्थज्ञानाभावादेकदेशमात्रमपूर्वार्थलाभबुद्धिमात्रेण लिखितम् । अत एव दुर्घटवृत्तिविसंवाद इति । अभ्युपेत्य चेदमुदितम् । वस्तुतस्तु सविशेषणविचारः परोक्तटीकानुसारेण वैय्याकरणत्वाभावस्य विधेयतया व्यावृत्तावतात्पर्येण विशेषणत्वाभावात् । प्रकृतेऽपि च विशेषणत्वाभावेनास्मद इति सूत्रादेव बहुवचनोपपत्तेः । अस्य परिहारत्वमेव नास्ति इति तदाश्रयणेन प्रकृते समाधानायोगः । दुर्घटवृत्तौ तु न वयमित्यस्योपलक्षणयानुवाद्यविशेषणकविशेष्यस्थलपरत्वात् न तदनुपपत्तिः । वक्ष्यते चेदम् । एतदनुपपत्तिप्रकारं मनसि कृत्वैव टीकाकृत् यज्ञर्युक्तसमाधिं वक्ष्यतीत्यास्तां तावत् । ननु विशेषणस्य प्रतिषेधो वक्तव्यः इति अस्मदो

द्वयोश्चेति सूत्रीयवृत्तौ जात्याख्यायामित्येतत्सूत्रीयापर आह। अस्मदः सविशेषणस्य प्रयोगे च इदमपि सिद्धं भवति। अहं पटुः ब्रवीमि अहं पण्डितो ब्रवीमीति भाष्ये च विशेषणयुक्तास्मदर्थस्य बहुवद्भावनिषेधावगतेः प्रकृते च न शब्दाब्धौ गाढा इत्यादिविशेषणयुक्तत्वात् अस्मदः कथं वयं इति बहुवद्भावेनापि बहुवचनमित्यतो मञ्जर्युक्तरीत्या समाधिमाह त्वं राजा वयमपीति। आदिपदेन ख्यातत्वं विभवैः यशांशिकवचो हृष्टाः प्रतन्वन्ति नः। इत्थं मानधनातिदूरमुभयोरप्यावयोरन्तरं यद्यस्मासु पराङ्मुखोऽसि वयमप्येकान्ततो निस्पृहा इति पादत्रयस्यैवंजातीयस्थलस्य सङ्ग्रहः। दुर्घटवृत्तिकृतौ तु यत्रैवंविधेयविशेषणकता नास्ति किन्तु अहं देवदत्तो ब्रवीमि अहं एतद्विषये निपुणो ब्रवीमि इत्यादिवत् अनुवाद्यविशेषणकता तत्र सविशेषणत्वप्रयुक्तबहुवद्भावनिषेधप्राप्तौ बहुत्वारोपं विना गत्यभावात् तदाश्रयणेन समाधेयमित्याशयेनारोपाभिधानं कृतमिति न विरोधः। न वयं वैय्याकरणाः इत्येतत्तु विधेयविशेषणकमेवेति नात्रोदाहरणतया अङ्गीकर्तुं शक्यमित्युदाहरणान्तरोपलक्षणमेवेति प्रागेवोक्तमिति ज्ञातव्यम्। अविशेषणत्वबदिति। व्यावृत्तिप्रत्ययजनकस्यैव विशेषणतया उन्नतत्वादेः व्यावृत्तिस्वरूपयोग्यत्वेऽपि अत्र व्यावृत्तावतात्पर्येण विधान एव च तात्पर्येण व्यावर्तकत्वाभावात् अविशेषणत्वमित्यर्थः। श्रीमदित्यादेश्चेत्यादिपदेन किमपि च वदन्तोऽपीत्यस्य ग्रहणम्। हेतुपरतयेति। किमपि वदन्तोऽपि परं श्रीमत् पूर्णप्रमतिगुरुकारुण्यसरणिं प्रपन्ना इत्याभ्यां लौकिककारणशून्यत्वालौकिककारणवत्त्वयोः सत्त्वात् मान्या इत्येवं प्रतिपादनस्य प्रतीतेः हेतुपरत्वमिति ज्ञेयम्। अत्रापि व्यावृत्तावतात्पर्येणेत्यस्य पूर्ववदेव व्याख्यानं द्रष्टव्यम्। तं त्वा वयं जडधिय इत्यादौ तुच्छाद्यसत्त्वात् तदनाश्रयणम्। अथवा उपलक्षणमिदं तं त्वा वयमित्यादौ सविशेषणत्वेऽपि बहुवचनदर्शनात् सविशेषणस्यापि प्रतिषेधः। प्रायिकोऽनो नात्र तत् प्रसङ्ग इत्यपि ज्ञेयम्। अत एव उत्तमत्त्वाभावस्यैव इत्येतत् ऋग्भाष्यटीकाव्याख्या गुरुपादैरन्यतमत्वेनास्य प्रतिषेधस्योक्तिरिति ज्ञेयम् ॥ ८ ॥

स०व्र०— भगवत्पादकृपामात्रसाध्यत्वान्नानादरः कार्य इत्याह न शब्दाब्धाविति। निगमचर्चा मीमांसा। वेद्यं परमपरं च तत्त्वम्। अन्ये तु शब्दाब्धौ गाढा नेति न, निगमचर्चासु चतुराश्च, न्याये प्रौढाश्च नेति न, विदिनवंद्याश्चापि यद्यपि तथापीति व्याचक्षते। अत्र च न परटीकाकाराणां व्याख्यानमिवास्मद्व्याख्यानमशेषशास्त्रपरिज्ञानसाध्यं, अपि तु गुरूत्तमश्रीमध्वकृपासाध्यमतो नानादरः कर्तव्य इत्यवतारिका द्रष्टव्या। किमपि युक्तमयुक्तं वेत्यर्थः। आपाततोऽयुक्तार्थकमपि मदीयवचनं मध्वगुरुप्रसादसाध्यत्वाद्युक्तार्थं मान्यमेव महतामिति भावः। चोऽवधारणे, मान्या इत्यनेन संबन्धः। 'अस्मदो द्वयोश्चे'तिसूत्रात् वयमिति बहुवचनम्। न च 'सविशेषणस्य प्रतिषेधो वक्तव्य' इति वचनात् बहुवचनायोग इति वाच्यम्। त्वं राजा वयमित्यादिप्रयोगदर्शनेन निषेधस्य प्रायिकत्वादिति ॥ ८ ॥

कुण्डल०— इदानीं स्वानहङ्कारद्योतनाय देवाधिकारिकानुव्याख्यानव्याख्याने नेदानींतनव्याकरणादिशास्त्रपरिशीलनमात्रमेव प्रयोजकं किन्तु महाव्याकरणादिशास्त्रविमर्शनमेव। तथापि सर्वपुरुषार्थप्रापकगुरुकृपापात्रत्वान्ममायं व्याख्यानोद्यमः संभावित एवेत्याह न शब्दाब्धाविति। महाव्याकरणशास्त्रादावित्यर्थः। यद्वा स्वस्य अनहङ्कारताद्योतनायेदानींतनशब्दशास्त्रादौ न गाढा इत्यायुक्तिः। निगमचर्चा मीमांसा। न्यायः तर्कः। न च

विदितेति । श्रुतिस्मृतीतिहासपुराणादिप्रतिपाद्यं सर्वं न विदितवन्त इत्यर्थः । तथाच सर्वशास्त्रकुशलानां सर्वज्ञानामेव तद्भाष्यव्याख्याने अधिकार इति भावः । तथापि "यस्य देवे परा भक्ति"रित्यादिश्रुत्युक्तदिशा गुरुप्रसादस्य सर्वार्थ-प्रकाशकत्वात् तत्पात्रस्य ममायं प्रयत्न उचित इत्याह अपीति । तथापीत्यर्थः । किमपीति । साधारणव्युत्पन्नै-रवगन्तुमशक्यमपूर्वप्रमेयमित्यर्थः । यद्यप्यत्र श्लोके वयमिति बहुवचनमनुपपन्नम् । अस्मदो द्वयोश्चेतिसूत्रशिष्टस्य बहुवचनस्य सविशेषणस्य प्रतिषेधो वक्तव्य इति वार्तिकेन निषेधात् । पटुरहं ब्रवीमि गार्ग्योऽहं ब्रवीमि इत्यादिप्रयोगस्य काशिकादावुदाहृतत्वात् । तथापि न शब्दाब्धौ गाढा इत्यादीनां विधेयतया विशेषणत्वाभावेन निषेधाप्रवृत्त्या बहुवचनोपपत्तेः । अत एव पदमञ्जर्यां 'त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः' इत्यत्रोन्नतत्वमेवाभिधीयते न तु विधेयोऽर्थो विशेषणमिति आदेशो भवत्येवेति विधेयस्य विशेषणत्वनिषेधः प्रतिपादितः । अन्ये तु वयमिति बहुवचनमारोपितं बहुत्वमादायेत्याहुः । न शब्दाब्धौ गाढा इत्यादेः शब्दाब्धौ गाढा नेति नेतीति योजनेत्यप्येके ब्रुवते ॥

विद्व०— स्वाहङ्कारं खण्डयति **न शब्दाब्धाविति । निगमचर्चा** मीमांसा । **न्याये** तर्कशास्त्रे । विदितं वेद्यं परापरतत्त्वम् । वयं शब्दाब्धौ गाढा न, परं तथापि श्रीमदाचार्यकृपामार्गप्राप्ताः किमपि यत्किञ्चिद्वदन्तोऽपि महतां मान्या स्मः । अत्र शब्दाब्धौ गाढा नेति नेत्येवं नत्रा वृत्या एकस्यैव नञः काकुस्वरार्थकत्वेन वा अनुव्याख्यान-व्याख्यानोपयुक्तपाण्डित्यमस्तीति प्रतिपादयितुमयं श्लोक इत्यप्याहुः । ननु अस्मदो द्वयोश्चेत्यत्र प्राप्तस्य सविशेषणस्य प्रतिषेधो वक्तव्य इति वार्तिकोक्तेः कथमत्र बहुवचनमिति चेन्न । तदुक्तेरनित्यत्वात् । बहुत्वारोपाद्बहुवचनोपपत्तेरत एवोक्तं दुर्घटवृत्तिकारेण बहुत्वारोपान्न वयं वैयाकरणा इत्यादिकं उपपादनीयमिति ।

रस०— अधुना टीकाकृत्पूज्यचरणः श्रीगुरुचरणचरणारविन्दानुदिनानुसरणासादितशुभतममनोगुणानां निरवग्रहश्रीहर्यनुग्रहदूरीकृतदुरितगणानां निजसुगुणानामेव मदुदीरितामिव नेवतृतीयरुजतुतामितमतिकृतिगतिमित-मेयलवेष्वमितान्तरान्तराया प्रतिबद्धश्रद्धातिशयोत्पत्तिस्ततस्तत्र नवनवविशेषव्युत्पत्तिर्न तु निरङ्कुशतः श्रवणानुसरण-विगलिताखिलसुगुणप्रत्याशानां प्रतिक्षणं प्रत्यवतिष्ठमानप्रत्यूहपाशानां सुदुराशानामिति स्वमनोगतमात्मीयजन-मनोगतमापादयंस्तदर्थमनुव्याख्याननलिने मे मनश्चञ्चरीकतीत्युक्त्याऽनुव्याख्यानया विशिष्टव्याख्या क्रियत इति सूचितम्, तदयुक्तम् । व्याख्यानं हि पूर्वपूर्वप्रयुक्तपदविजातीयैः सजातीयार्थप्रतिपादकैरप्यनेकैः पदैर्गभीराणि नानाजातीयानि वाक्यानि कल्पयित्वाऽन्यानिवार्यमानोपन्यासेन तत्तन्मूलाभिहिताभियुक्तसंप्रदायागतार्थसमर्थनरूपं प्रेक्षावदीक्षास्पदं तेभ्यो मान्यत्वप्रदं च मूलमपि साधारणानवग्राह्यमनेकार्थगर्भं च । न चेदृशमूलस्येदृशं व्याख्यानं अनधिगतव्याकरणमीमांसान्यायशास्त्राणां चिरगुरुकुलवासानासादितगोप्यज्ञेयविशेषाणां शक्यकरणम् । न चेदं विशेषणद्वयमेषु संभावितकल्पनां कथञ्चिदल्पकालगुरुकुलवाससत्त्वेऽप्युक्तविधस्याभावेन तस्यैव गोप्यप्रमेय-प्राप्त्युपायत्वेन द्वितीयविशेषणाभावात् । आद्यविशेषणकल्पनस्य तु मुमूर्षुशष्कुलीभक्षणशक्तिसंभावनातुल्यत्वा-दशक्यकरणे प्रवृत्तौ च प्रेक्षावत्त्वहानेरिति । तदानींतनमन्दमतिमनोवचनशङ्कापिशाचपीडामात्सर्यमहाग्रहानुग्रहोपगूढं परिहरन् अनुव्याख्यानगन्तृसाधारणानवधारणीयार्थानुसन्धानोपोद्बलितामलनिजमानससमुदितालौकिकार्थसाक्षा-

त्कारसमुद्भूतनिजानन्दसुधांभोधिनिमग्नोऽपि श्रीगुरुचरणभक्तिरसलहरीवशेन क्वाप्यात्यन्तिकावस्थानमनापन्न इवा-न्तिकविनतविद्यातनयानभिमुखीकृत्य स्वविहारप्रकारं वाग्विस्तरेण सूचयति न शब्दाब्धाविति । अपि यद्यपि वयं शब्दाब्धौ शब्दविचारपरे व्याकरणशास्त्रे गाढा अवगाहमानाः निद्रादिपरित्यागपूर्वकसन्ततावर्तनोर्ध्वदेशनिरीक्षण-क्लेशासादितानुसन्धानवन्तो नेति । एतत्सूचनायैव व्याकरणादिप्रसिद्धपदं विहाय शब्दाब्धाविति । अभिज्ञपदमवज्ञाय गाढा इति चोक्तम् । निगमचर्चासु वेदविचाररूपे मीमांसाशास्त्रे चतुराश्चातुर्यवन्तः । व्यवहितानामपि वाक्यानां किञ्चिदेकवाक्यतासंपादनं क्वचिच्चैकस्थानस्थितानां तत एवैकवाक्यताया प्रतीयमानानामपि भिन्नवाक्यतासमर्थनम् । अन्यत्रैकस्मिन्नेव वाक्ये किञ्चिदनुवादकं किञ्चिद्विधायकमिति द्विधाकल्पनमित्याद्यनेकविचारप्रकाशप्रतीक्षणप्रकटित-वाक्यप्रबन्धनिबन्धनाभिनिवेशवन्तो नेति । एतद्वचञ्जनायैव पूर्वतन्त्र इति प्राज्ञा इति चानुक्त्वा निगमचर्चेति चतुरा इति च निवेशितम् । अत एव प्रायपाठादेकवचने प्रयोक्तव्येऽपि विचारप्रकारबहुत्वदर्शनाय बहुवचनम् । तेन च तावदनुसन्धानाय सविशेषः सूचितो भवति । न केवलं शब्दाब्धावेव गाहाभाववन्तः किन्तु निगमचर्चासु चतुरा न च चातुर्याभाववन्तश्चेति । व्याख्यानोपयोगि धर्माभावसमुच्चये चशब्दः । एवमुत्तरत्रापि ज्ञेयम् । न्याये युक्तिशास्त्रे प्रौढाः प्रौढिमोपेताः भाष्यकारादि भाषितप्रमेयजाते स्वबुद्ध्या लाघवयुक्तिं साधिकां प्रकल्प्य कस्यचिदधीरणकस्यापि स्वीकरणं किञ्चिद्बाधकं च हेतुं संपाद्य तदनुदिततद्विरोधिप्रमेयप्रकल्पनमित्यादि बहुविधवैयात्योपेता नेति । अत एव गौतमशास्त्रे शिक्षिता इत्यादि पदपरित्यागेन न्याये प्रौढा इति निबद्धम् । विदितं विविधविनेयवञ्चनेन विजनवनादा-वविरतगुरुपदसेवासु ज्ञातं वेद्यं महता प्रयत्नेनापि ज्ञेयं गोप्यं प्रमेयं यैस्ते तथा नेति । एतदर्थमेवाधीतोत्तरतन्त्रा इत्यनभिधाय विदितवेद्या इति वचनम् । आद्यार्धगतमपि पदमावर्तनीयम् । द्वितीयार्धगतं द्वितीयं तावदित्यर्थः । तथापि व्याख्योपयोगिधर्माभावेऽपि तत एवोक्तविधतत्कर्तृत्वाभावेऽपि महतां तावन्मान्याः स्म इत्यादौ योज्यम् । मान्यत्वप्रयोजकधर्माभावेऽपि तथात्वे अकारणकार्योत्पत्तिः स्यादित्यतः सोऽप्यस्तीत्याह किमपि चेति । चशब्द आवर्तनीयः । एको हेत्वर्थे । किमपि च वदन्तः स्म तस्मादेवेति । किमपि विलक्षणं शब्दाब्ध्यवगाहादिमद्भिरन्यैः सर्वथापि प्रतिपादयितुमशक्यमध्यात्मसंज्ञितं मोक्षान्तरङ्गसाधनबोधविषयीभूतं गोप्यं परतत्त्वं तद्बोधानाद्युपयुक्तं प्रतीकविशेषादिरूपमपरतत्त्वं चेति समुच्चये द्वितीयः । तथा किमपि शब्दाद्यवगाहादिमद्भिरपि परीक्षकैर्निबद्धुमशक्य-मुक्तविधपदसमुदायं वा पदनिवहरूपवाक्यनिचयं वा मानव्रातं वा तत्त्वबोधोपयोगिपरीक्षकव्युत्पादनीयप्रमेयजातं वा वदन्तः प्रतिपादयन्त इति । मा भून्मान्यत्वप्रयोजकोक्तविधव्याख्यानकर्तृत्वासत्त्वेनोक्तापत्तिरुक्तविधव्याख्यानप्रयो-जकधर्माभावेऽपि तत्कर्तृत्वाङ्गीकारेण तु स्यादेवेत्यतस्तत्प्रयोजकस्यापि भावान्नोक्तापत्तिरिति भावेनाह गुरुकारु-ण्यसरणिं प्रपन्नाः स्मः तस्मादेवेति । नन्वेवं स्ववचनविरोधप्रसक्तिः । गुरुकारुण्यस्यापि व्याख्योपयोगि धर्म-निविष्टस्य तन्निमित्तकव्याख्यानकर्तृत्वरूपमान्यत्वोपयोगिधर्मस्य च स्वीकारादित्यत उक्तम् । परं केवलं गुरुकारुण्य-सरणिमिति । अयमाशयः । विशिष्टव्याख्याने शब्दाब्ध्यवगाहादिव प्रधानं साधनम् । गुरुप्रसादस्तु सहकारि-मात्रमुक्तादृशप्रयोजकं प्रयोज्य निबन्धनिर्मातृत्वमेव निखिलनिषेध्यतानियामकमिति चान्ये मन्यन्ते । तन्महतां मतमतिवर्तत इति बोध्यान्बोधयितुं प्रागुरुकरुणासचिवानां तेषामस्मद्व्याख्याने मुख्यसाधनतयाऽभावोऽभिहितः तादृशसामग्रीसमुद्भूतव्याख्यानकर्तृत्वस्य महन्मान्यत्वे इदानीं तु गुरुकारुण्यमेवेतरनिरपेक्षतयोक्तविधव्याख्याने मुख्यं

साधनं तदेव च तदुपयोगि सर्वं संपादयतीति किंशब्दाब्ध्यवगाहादिना । तथा तत्संभवनिबन्धनिर्मातृत्वमेव महन्महनीयताप्रापकमित्यभिधीयत इति क्वोक्तप्रसक्तिप्रसर इति । ननु गुर्वनुग्रहरूपसहकारिसमवहितशब्दाब्ध्यवगाहादिरूपमुख्यसाधनजन्यस्यापि व्याख्यानस्य बहुतन्त्रपरिचयवद्भिर्विनिर्जितानेकविद्वत्परिषद्भिर्महद्भिरतिश्लाघ्यताया दर्शनेन कथं तत्कर्तृत्वस्य महन्माननीयत्वनिमित्ततानिषेध इत्यतो बृहतामिति वक्तुं शक्येऽपि महतामित्युक्तम् । अयमभिसन्धिः । नात्रोक्तविशेषणवन्तो महान्तोऽभिमताः । किन्तु परतत्त्वविद्याब्धौ प्रवीणा एव । यथोक्तम् । 'महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये । ये वा मयीशे कृतसौहृदार्था जनेषु देहं भरवार्तिकेषु । गृहेषु जायात्मजरातिरासु न प्रीतियुक्ता यावदर्थाश्च लोक' इत्यादि । न च ते तथाविधा इति युक्तमुक्तमिति । ननु भवतु भवत्कृतैर्भवदभिमतमहन्महनीयता भवतु चशब्दशास्त्राद्यभिमतिमति कुत्रचिद्विषये महाजनाभिमतमहन्मान्यता तदभाववत्यलौकिके विषये लौकिकेऽपि विषयविशेषे तु कथं तन्मान्यं प्रत्युत तन्निन्द्यतैव प्रसक्तेत्यतः किमपि च व्यावर्तत । अपिर्गर्हायाम् । वस्त्वर्थः । अपि प्रोक्तशास्त्रेण तदुदितलक्षणवद्भिर्महद्भिश्च जनाविगर्हितं मूढबहुजनाभिमतैर्महद्भिस्तु किं तन्माननया कस्य प्रयोजनस्य प्राप्तिस्तन्निन्दया वा क्षतिरिति । कुतो न प्राप्तिरित्यतः प्राप्तव्यायाः सर्वस्याः शुभपरम्परायाः एकस्मादेवैतस्मादवाप्तत्वादिति भावेन गुरुकारुण्यरूपां शुभपरम्परासरणिं मार्गम् इत्युक्तम् । ग्रन्थनिर्माणोपयोगिप्रतिभाततो विशिष्टव्याख्यानिर्माणम् । ततो महद्भिर्माननाविशिष्टभगवद्दृष्ट्याद्यन्तरङ्गसाधनादर्शनेन क्वचित्प्रमेयविशेषे विरोधिदर्शनोत्पन्नमनश्चाञ्चल्येन चेतःपूर्वं क्लिश्यमाना इदानीमेतद्दर्शितसाधनविशेषेणैतदुक्तमानविशेषमुषितचाञ्चल्येन मनसा महदुपास्यमस्मदाशास्यमाप्ता अहो अनेन भारतभुव्यवतरणफलमलाभीति तदीयानुरागविषयत्वरूपा ततो इतोऽतिशयितगुरुकृपाव्यक्तिस्ततो मौक्तानन्दाभिव्यक्तिरित्येवंरूपायाः साधनमिति । नन्वेतदतिरिक्तस्यापि प्राप्तव्यस्य शुभस्य सत्त्वात्कथमेतदित्यत उक्तम् । वयं जातापरोक्षजातनिविष्टा इति । अपरोक्षिणां त्वेतदन्यत्प्रयोजनं नास्तीति सुप्रसिद्धमिति । वक्ष्यति च । निष्कामभगवदर्थश्रुत्यादिविहितकर्मानुष्ठानेन शुद्धान्तःकरणस्य रागादिदोषक्षये जातभगवदुक्तेः श्रवणमनननिदिध्यासनाभ्यासवतः परमभागवतस्य भगवत्साक्षात्कारे जाते प्रसन्नो भगवानारब्धानि कर्माणि विनाश्य भागवतधर्मप्रवृत्तये ज्ञानिनं कमपि कालमवस्थापयंस्तदर्थं प्रारब्धकर्माण्यवशेष्य तत्फलोपभोगे सति तान्यपि विनाश्य प्रकृतिबन्धान्मोचयतीत्यादिना । ननु प्राप्तव्याभावेऽपि प्राप्तप्रयोजनक्षतिः किं न स्यादित्यत्राप्येतदेवोत्तरं यतो गुरुकारुण्यसरणिं प्रपन्ना इति । गुरूणामन्यकृतविघ्नपरिहारसामर्थ्याभावात्तत्प्रसादोऽकिञ्चित्कर इत्यतो यदा यत्कृपालेशपात्रस्य गौरीमलगात्रस्याशेषविघ्नविनाशकत्वं तदा किं वक्तव्यं स्वाधीनसार्वजनीनप्रवृत्तिमतस्तस्य प्राणेश्वरस्येत्याशयेन श्रीमदिति गुरुविशेषणम् । ननु प्राणेश्वरस्य तादृशशक्तिसद्भावेऽपि भवदीयगुरोः किमायातम् । न ह्यन्यगतेन सामर्थ्ये नान्यत्कारणतामश्नुत इत्यतः असुरेव पूर्णप्रमतिनाम्नाऽस्मद्गुरुतां गत इत्याशयेन पूर्णप्रमतिश्चासौ गुरुश्चेत्युक्तम् । यथाहुरन्यत्र । ये भवन्ति जनाः सन्तः प्राज्ञाः सौजन्यशालिनः । तोषन्ते मत्कृतौ यान्ति किमन्यैः पशुसन्निभैरिति । वक्ष्यति च । न हि जगति निन्द्योऽस्मि विदुषामिति । ननु लोके सुचिरसुवादिनातितोषितगुरूणामपीदृशग्रन्थरचनशक्त्यदर्शनात्कथं कारुण्यस्य तत्कारणत्वमित्यतोऽन्यप्रसादस्य तत्कारणत्वाभावेऽप्यस्येन्द्रियार्थादिनियामकत्वतयैतत्प्रसादस्येदृशत्वमव्याहतमिति भावेन वा श्रुत्यादिसिद्धाशेषप्रजाप्रवर्तकत्वज्ञानदातृत्वरूपश्रीमांश्चासौ

पूर्णप्रमतिश्चासौ गुरुश्चेत्युक्तम् । ननु मान्या स्मः किमपि च वदन्तोऽपि महतामित्येतदयुक्तम् । तथाहि । महान्तस्तावत्त्रिविधाः । तत्राद्याः प्रायेण विदितवेद्याः युक्तिभिः साधितसाध्याः बाधितबाध्याश्च । ते च क्वचिद्वेद्यांशे कुत्रचित्साधकयुक्त्यंशे एकत्रबाधकांशे वा परापेक्षाः । द्वितीयास्तु । साकल्येन ज्ञातस्वयोग्यज्ञेयजाताः साधकैः साध्यं साधयन्तो बाधकैरन्यदवजानते । ते तु न क्वचिदपि परानपेक्षन्ते । अन्त्यास्त्वपरिमितप्रातिभादिमन्तः स्वतोऽधिकशून्या एव । तत्र प्रथमैः प्रागुदीरितदिशा सम्यक् पूज्यता युज्यत एव । अन्यैस्त्वात्मन एव महतो मन्यमानैः कथं मान्यतामनुमन्यामहे । अन्तिमैरस्त्वसंभावितैव संभावना । तदेवं महद्भिरेव मान्यताया अभावेन महतां तावन्मान्याः स्म इति महन्माननीयताबलेन किमन्यमाननयेत्यन्यमाननावज्ञानं न मनोज्ञमित्यतः प्रथमपक्षस्य पराकुर्वतैवोररीकृतत्वाद्वितीये तावदुत्तरमाह तेषामपि महतां मान्याः स्म इति । ननूक्तं न ते परापेक्षा इति । सत्यम् । किं मेयविषये किं वा मानविषये । नाद्य इत्याह । किमपि च वदन्तः किञ्चापि चेति प्रमेयजातं प्रतिपादयन्त इति । ते यस्मिन्परतत्त्वविषये अपरतत्त्वविषये वा एकं गोप्यं विशेषं वदन्ति तत्र वयमनेकविषयं वदन्तः स्म इति । नापि द्वितीय इत्याह किमपि च वदन्त इति । ननु तेऽपि साधकं बाधकं वा मानं किञ्चापि चेति वदन्त्येव तत्कथमेतत् । मैवम् । चशब्दः आवर्तनीयः । किञ्चेत्यस्य स्थानेऽपि चेति वदन्तोऽपि चेत्यस्य स्थाने अन्यच्चेत्येवमुत्तरत्रेत्यतो युक्तमुक्तमिति । तृतीयेऽप्येतदवोत्तरम् । महतामपि वस्तुतः स्वतोऽधिकशून्यानामपि मान्याः स्म । इति न चैतदसंभावितम् । यतो महतामुत्तमत्वेन निश्चितानामपि गुरूणां किमपि स्वापेक्षया । अल्पं वदन्तोऽपि शिष्या मान्या दृष्टा अत इति । गुरुणा श्लाघिताः शिष्या लोके ख्यातिं लभन्त इत्यतो गुरुश्लाघ्यता सुप्रसिद्धेवेति । अतो मान्यपदस्यानेकार्थतया अभिप्रेतार्थापरिज्ञानमूलमेवेदं तृतीयपक्षनिराकरणमिति । पूर्णबोधं गुरुमपि परमं गुरुं च म इत्यत्र मुनिकुलतिलकं चेति चशब्दसंबन्धेन पूर्णबोधं चेति त्रयं वन्द्यमित्यन्यथाप्रतीतिं वा पराचष्टे । पूर्णप्रमतिरेव गुरुरिति । अनेनैक एवात्र वन्द्यतयाऽभिप्रेतस्तस्यैव च विशेषणद्वयमिति सूचितम् । परमगुरुश्चेत्यनुक्तिस्तु तत्र विवादाभावात् । अत एव गुरुत्व एव विप्रतिपत्तिं सूचयितुं मे अन्यशिष्यतया प्रसिद्धस्य गुरुमिति तत्रैवोक्तम् । एतदेव सूचयितुमानन्दतीर्थादिपदं परित्यज्य बोधपदसमानार्थस्य प्रमतिपदस्य प्रयोगः । नन्वेकस्यैव कथं विरुद्धं विशेषणद्वयमुपपद्यते । एकापेक्षया साक्षादुपदेष्टृत्वपरंपरयोपदेष्टृत्वरूपगुरुत्वपरमगुरुत्वयोर्विरुद्धत्वात् । अन्येषां गुरुत्वप्रसिद्धिविरोधश्च तथा सति स्यादित्यतो विवक्षाविशेषेण सामञ्जस्यादित्याशयेनाह पूर्णप्रमतिरेव मुख्यो गुरुरन्ये तु तत्कारुण्यसरणिं प्रपन्ना एव मान्या गुरव इति । अयमाशयः । गुरुस्तावत् द्विविधः । मुख्योऽमुख्यश्चेति । तत्र मम मुख्यगुरुस्तु वायुरेव । नान्यः । सर्वज्ञकल्पस्य गुरुणा सर्वज्ञेनैव भाव्यत्वात् । तदेतदभिसन्धायोक्तं पूर्णप्रमतिरेवेति । अमुख्यस्तु कोऽपि वा भवति । अमुख्यस्तु तत्रापि मादृशस्य गुरवो भवन्तः मद्गुरुकारुण्यसरणिं प्रपन्ना एव । यथा ह्यच्युतप्रेक्षतीर्था अच्युतानुग्रहविशेषेणैव पूर्णप्रमतिगुरुतां गताः इतरथा तदयोगात् । एतदेवाभिप्रेत्य लोकमर्यादारक्षणाय मान्या एव न तु मुख्यगुरव इत्यर्थकं मान्यपदम् । अत एवान्यत्र प्रणम्य श्रीमदानन्दतीर्थाचार्यं परं गुरुमिति मुख्यत्वार्थकः परशब्द आचार्यशब्दश्चेति । न चैवम् । विरोधावकाशः । स किं मुख्ययोरथ मुख्यामुख्ययोर्वा तृतीयेऽपि विवेक्तव्यम् । किं मुख्यपरमगुरुत्वामुख्यगुरुत्वयोः किं वा मुख्यगुरुत्वामुख्यपरमगुरुत्वयोरिति । नाद्यः । गुरुत्वस्वीकारेऽपि परमगुरुत्वानङ्गीकारेण समावेशस्यैवाभावेन विरोधचोदनानवकाशात् । अत एव न द्वितीयः । परमगुरुत्वोररीकृतावपि गुरुत्वास्वीकारात् ।

न तृतीयः द्वयोरप्यनङ्गीकारात्। चतुर्थे समावेशोऽपि वसने वास्तवशौक्ल्यौपचारिककार्ष्ण्ययोर्दर्शनेन विरोधाभावात्। गुरुत्वप्रसिद्धिविरोधोऽप्यत एव परिहृतः। अमुख्यगुरुत्वविषयत्वात्तस्याः। अनेनैवोपतिष्ठे गुरूनिति स्वपदं च विवृतं भवति। नन्वेवमपि पूर्णप्रमतिषु गुरुत्वप्रतिपत्तिव्यवहारादेरनुपपत्तिः। तथा सत्यन्येषामपि स्वस्वगुरुपरित्यागेनापरेष्वपि तदापत्तेरिति चेत्। अत्र प्रष्टव्यम्। किं मुख्यगुरुस्वरूपनिर्धारणवतां तदापाद्यते तद्रहितानां वा। द्वितीयस्तावदयुक्त एव। तत्स्वरूपमविदुषामेते मम मुख्यगुरव इति प्रयोगादेरसंभवात्। आद्ये उत्तरमाह। श्रीमत्पूर्णप्रमतिगुरुकारुण्यसरणिं मार्गं तत्कृतोपदेशादिकं सर्वं प्रपन्ना अनुसन्दधाना इति तादृशानामापादने इष्टापत्तिरिति। ननु पूर्णप्रमतिरेव ममोत्तमो गुरुरन्ये तु तदाज्ञया गुरव इत्येवंविधमलौकिकं वचनमन्येषां न हृदयङ्गमिति शिष्यमनोगतामाशङ्कां वा परिहरति। किमपि च वदन्तश्च तथापि महतां योगप्रभावलब्धालौकिकार्यसाक्षात्कारवतां तावन्मान्या स्म अन्यैस्तु किमिति। नन्वथापि न भवतां महन्मान्यता युक्ता। सा चानुव्याख्यानविशिष्टव्याख्यानकर्तृत्वनिमित्ता। न च तद्युक्तं टीकाकारैरेव व्याख्यातत्वात्। व्याख्यातव्याख्यानं च पिष्टपेषणवदकार्यमेव। अकर्तव्यं कुर्वाणस्याप्रेक्षावत्वादित्यतो वाह। परं च, व्याख्यानानन्तरमपि वदन्तः व्याख्यास्यन्तः तथापि महतां मान्याः स्म इति। न चोक्तदोषः निष्प्रयोजनत्वाप्रयोजनत्वाभ्यां वैषम्येण पिष्टपेषणकर्तुरिव व्याख्यातस्य व्याख्यातुरप्रेक्षावत्वाभावाद्युक्तैव महन्मान्यतेत्याशयेन व्याख्याने प्रयोजनमाह। किमपि प्रयोजनमस्तीति। अनवसरदुरवधतयेदं प्रयोजनमित्यनभिधाय किमपीत्युक्तम्। तच्च स्पष्टीकरिष्यति। एतेन सङ्गम्यन्ते गुरोर्गिर इत्युक्तगुरुत्वनिर्धारणेन तत्पद्यं विवृतं भवति एतेनैव पूर्णबोधानपि गुरून् पूर्णबोधान्गुरूनपीत्यादिकं च विवृतं वेदितव्यमिति सकलमकलङ्कम् ॥

अथवा यत्पदवाक्येत्यत्र विशिष्टव्याख्योपयोगिधर्मवत्त्वं सूचितं तद्विनयेन भूषयन् स्वानुग्राह्यास्तत्प्रकारं शिक्षयति न शब्देति। अत्र शब्दस्याभिधया निरूपणेन पदपदेन प्रसिद्धव्याकरणपरिग्रह्यतीतिं पराकरोति। तस्य परिमितत्वात्। अथवा मादृशानामेवैवं वचनं विनयादिसूचकं न त्वन्येषां तस्यानन्ततया तद्विषयपदन्यासस्यैवाभावादिति सूचयत्यनेन। एतदर्थमेव गाढा अवगाह्यमाना उन्मज्जमाना इति पदं प्रयुङ्क्तेति। वाक्यपदाभिमतमर्थं दर्शयति निगमेति। भवतु सोऽर्थः कथं तावता ततो मीमांसालाभ इत्यतस्तयोरङ्गाङ्गिभावबोधनाय तथाप्रयोग इत्याशयेन तं व्यनक्ति चर्चेति। वेदेतिकर्तव्यतारूपमीमांसासु तिसृषु नैकैव विवक्षिता किन्तु सर्वापीत्यनुशयेनोक्तं चर्चास्विति। अनेनान्येषामेवं वचनं न स्वकार्यकारीति स्फोरयति। मीमांसास्वप्रवेशादेव। अत एवाह चतुरा इति। यत्प्राक्प्रमाणशिक्षकतया प्रमाणं ब्रह्मतर्क इत्युक्तम्। तत्र तावदेव किन्तु न्यायशिक्षकत्वान्न्यायशास्त्रमित्यप्युच्यते। इत्याशयेनाह न्याय इति। यद्वक्ष्यति। 'प्रमाणन्यायसच्छिक्षा क्रियते तर्कशास्त्रत' इति। अत एव तदेव न्यायशास्त्रवाक्येन दृढयति अभिन्नमितीति तत्त्वनिर्णयोदाहृतं ब्रह्मतर्कवाक्यमवतारितम्। अनेनैवं वचनमन्येषां वक्तृणां न मनोरञ्जनमिति सूचयति। प्रमाणन्यायादि शिक्षकस्यागाधतया सुप्रसिद्धस्यान्यैरवधातुमशक्यत्वात्। अत एवाह प्रौढा इति। प्रतिवादीति द्वितीयविशेषणाभिप्रेतमर्थं प्रकटयति न च विदितेति। तत्प्रकारमेवोक्तिविशेषेण शिक्षयति। किमपि च युक्तमयुक्तं वा प्रमेयं वदन्तः स्म इति। भङ्ग्यन्तरमप्याह। तथापि महतां मान्याः स्म इति। अन्यदर्शयति प्रपन्ना इति। मान्यादिपदार्थयोजनादि यथासंभवं प्राग्वदिति॥

नन्वेकैकस्य मूलस्य कतिपयार्थग्रहणे बहुज्ञत्वभङ्गः यावदर्थग्रहणे त्वेकत्रैव विशिष्टव्याख्यानपर्याप्त-द्वादशवर्षादिरूपकालविशेषपर्यवसानापत्त्योत्तरमूलव्याख्यानाभावप्रसङ्ग इत्याशङ्कायां नात्र बहुज्ञत्वं विद्यमान-यावदर्थग्राहित्वं किन्त्वन्येभ्योऽतिशयेन बह्वर्थग्राहित्वम् । तच्चाल्पतरकाल एव यथाशक्तिग्रहणेऽपि संभवती-त्युत्तरव्याख्यानं युक्तं तावतैव बहुज्ञत्वव्यवहारश्चोपपन्न इति चञ्चरीकतीति निदर्शनेनोपपादितं तत्रैषा शङ्केति । विद्यमानयावदर्थग्राहित्वमेव बहुज्ञत्वमित्युच्यतां किमनेन । न चोत्तरमूलव्याख्यानानुपपत्तिः । बहुज्ञान्तरस्य तत्र व्यापारसंभवात् । एवमुत्तरत्रापि । न चानेककर्तृकत्वे कथायितव्यप्रसङ्गः । तादृशस्यापि देवमीमांसाशास्त्रस्योपा-देयत्वदर्शनात् । न च तत्र भगवदाज्ञापूर्वकत्वेन समाधानम् । अत्रापि साम्यात् । आचार्याज्ञापूर्वकत्वस्य वक्तुं शक्य-त्वात् । आनन्दतीर्थगुरुकृपामात्रसाध्यत्वे न शक्यसमाधानत्वाच्चेति । तामेतां शिष्यमनोगतामाशङ्कां वा निरस्यति न शब्देति । वयं बहुज्ञाभिमताः सर्वेऽपि शब्दाब्धौ गाढा नेत्यन्वयः । अत एव चञ्चरीकति मे मन इत्येकवचनस्य प्रसक्तत्वेऽपि बहुत्वद्योतनाय बहुवचनम् । तत्रासङ्कोचव्यञ्जनायापिपदं च प्रायुङ्क । अत्र शब्दप्रमाणानां 'इत्येव श्रुतयोऽशेषाः पञ्चरात्रमथाखिलम् । मूलरामायणं चैव भारतं स्मृतयोऽखिलाः । वैष्णवानि पुराणानि सात्वतयोगौ परावपि । ब्रह्मतर्कश्च मीमांसेत्यनन्तः शब्दसागर' इत्यादिसिद्धानन्त्यद्योतनायाब्धिशब्दप्रयोगः । विचारार्थकचर्चापदेन गृहीतानां तदङ्गन्यायानां 'अनन्ता युक्तयश्चैव प्रत्यक्षागममूलका' इत्यादिसिद्धापरिमितत्वावबोधाय चर्चास्विति बहुवचनम् । न्यायशब्द एतमेवार्थमुत्तमम् अन्यावकाशरहितं प्रकाशयति सादरमित्याद्युदीरितोपक्रमादितात्पर्य-लिङ्गपरः तेषामेकविषयत्वेनाविरोधसूचनायैकवचनम् । 'प्रत्यक्षमैश्वरं चैव रमादीनामशेषतः । मुक्तानामप्यमुक्ताना-मि'त्याद्युदीरितानां न प्रत्यक्षेष्वस्माकमप्रवेश इति वक्तुं न च विदितेति । यत एवमतो वयं सर्वेऽपि किमपि कियदेव जानन्तः स्मः न केवलं जानन्तः स्मः किमप्येव वन्दन्तः स्मः । इदमपि नास्मच्छक्त्यायत्तमित्याह प्रपन्ना इति । तत एव महतां मान्याः स्मः अन्यत्सर्वं प्राग्वत् । इदमुदितं भवति । स्यादयं भवतां मनोरथः यद्ययं ग्रन्थः यथाकथञ्चिद्बह्वर्थः स्यात् । न चैवम् । किन्त्वनन्तैर्वेदादिशब्दप्रमाणैरनन्तैरीश्वरादिप्रत्यक्षैरनन्ताभिर्युक्तिभिरनन्त-वाक्यानामुपक्रमाद्यानुगुण्यादिना पूर्वतममनन्तं प्रमेयनिचयं निश्चाययतीत्याशयमर्थः, 'अनन्तोऽर्थः प्रकटितस्त्वयाणौ भाष्यसङ्गहे । एषु दभ्रमतीन् दभ्रान् हसत्युच्चैः सतां सभा । चिन्तामणींश्चिन्तयन्तां मितानप्यमितार्थदान् । ग्रन्थेभ्य एभ्योऽगाधेभ्यो युक्तयो नो दुरुद्धराः । मनोमान्द्यात्ततो ग्रन्थं व्यक्ततर्कततिं कुर्वि'त्यनेकमानसिद्धम् । न च दृशे मिलितानामप्यस्माकमवकाशः । इदं तु अत्यन्तासंभावितं यदनन्तप्रत्यक्षप्रत्यक्षीकरणम् । यदा हि पुष्करादि-नीचदेवतामारभ्येश्वरपर्यन्तमपरोक्षवतामपि यथाशक्त्यनेकप्रत्यक्षप्रत्यक्षं भवतीति प्रवादः का वार्ता तदावश्य-वेद्योक्तदेवतास्वरूपवेदनहीनानां स्वातिरिक्तैकपुरुषप्रत्यक्षरहितानामित्यतो युक्तमेवोक्तं बहुज्ञत्वमिति ॥

यद्यपि,

अमन्दमतिटीकाकृत्प्रबन्धततिसंमतम् ।
मेयं साकल्यतो वक्तुं नेयं मर्त्यसभा क्षमा ।
तथापि स्वीयकृत्यत्वात्क्रियते किञ्चिदात्मकैः ॥

किञ्च,

यावन्तोऽर्थाः प्रभासन्ते तावन्तो गदितुं पुनः ।
शक्यन्ते नैव यावन्तः वक्तुं शक्या जनैरिह ।
निबन्धुं नैव तावन्त इति सर्वानुभूतिगमिति ॥

इति पद्यप्रबन्धव्याख्या ॥

ल०१०— यद्यप्यनुव्याख्यानव्याख्यानोपयुक्तं पदवाक्यप्रमाणादिपारङ्गतत्वं ममास्त्येव । तथाप्यनुव्याख्यानमशेषाधिकार्यपेक्षिताशेषमोक्षसाधनबोधसाधनत्वाद्यनेकमाहात्म्योपेतमित्युक्तम् । एतादृशस्य व्याख्यानं तु न परभाष्यव्याख्यानमिव पदादिशास्त्रपरिचयमात्रसाध्यम् । किन्तु तत्तदधिकारिस्वरूपतत्तद्योग्यतातत्तत्परिपाकतत्तद्योग्यमोक्षसाधनाद्यपरोक्षादिसंपन्नविशिष्टाचार्यकारुण्यैकसाध्यम् । गुरुकारुण्यस्यैवान्तरसर्वसाधनसाधनपूर्वकं कार्यसाधने मुख्यसाधनत्वात् । विशिष्टाचार्यश्च प्रकृतव्याख्येयनिर्माता पूर्णप्रमत्याचार्य एव । स एव सर्वेषां मम च गुर्ल्मया तु तत्कारुण्यसरणिर्मुख्यसाधनभूता संपादितेति न ममासाध्यं चिकीर्षितानुव्याख्यानव्याख्यानमिति बोध्यान् बोधयन् गुरुकारुण्यस्य तत्कार्यप्रदर्शनेन मुख्यत्वं पदादिशास्त्रपरिचयाद्यवान्तरसाधनस्य तु विद्यमानस्याप्यविद्यमानत्ववर्णनेनामुख्यत्वं च बोधयति न शब्देति । अत्र एकस्मिन्नयमिति बहुवचनेन व्याख्यानप्रयोजकीभूताः पदवाक्यप्रमाणज्ञानित्यादिना प्रागेव सूचिताः सर्वेऽपि धर्मा मयि सन्तीति दर्शयति । पुनस्त्वानेव न शब्देत्यादिना स्वयमेव निषेधति । तेन च व्याहतिपरिहाराय 'नासदासीन्नोसदासीदि'त्यादाविव ते मुख्यसाधनतया न सन्ति । अमुख्यसाधनतया तु सन्तीत्यभिप्रायव्यञ्जनेन तेषाममुख्यसाधनत्वमुपपादितं भवति । एतेन स्वस्मिन्नतिविनयोऽपि प्रदर्शितः । अत्र वयं, शब्दः शब्दशास्त्रं स एवाब्धिः सोऽब्धिरिवेति वा शब्दाब्धिः अगाधत्वात् अथवा शब्दा एवापः, ताः धीयन्तेऽस्मिन्निति शब्दाब्धिः शब्दशास्त्रम्, तस्मिन्नगाढाः दृढाः प्रतिवादिप्रतर्किताति बहुलयुक्तितरङ्गैश्चञ्चला नेत्याद्यन्वयः । निगमचर्चासु निगमानां ब्रह्मदेवकर्मविषयाणां चर्चाः विचारणाः । अथवा शास्त्रप्रकरणाद्यर्चाकरणन्यायनिबन्धनात्मिकास्तिस्रो ब्रह्मदेवकर्ममीमांसास्तासु चतुराश्च न । तथा न्याये न्यायशास्त्रे प्रौढाश्च न । मीमांसाशास्त्रं प्रमाणप्रमेयात्मकं युक्त्यादिप्रमाणोपन्यासपूर्वकमेव प्रमेयनिर्णयपरत्वात् । अत एव चर्चेत्युक्तम् । निगमचर्चास्विति तत्र परिचयः प्रतिषिद्धः । तत्र तावदेव विज्ञेयम् । अपि तु मीमांसाशास्त्रनिर्णीतप्रमेयमात्रसंग्रहपरशास्त्राद्वा सत्यकामादिवत्तावन्मात्रोपदेशाद्वा सुलभोपायात्प्रमेयमात्रज्ञानमपि नास्तीत्याह न च विदितेति । वेद्यं स्वतन्त्रं परतन्त्रं च प्रमेयम् । परं केवलम् । श्रीमदिति । श्रीमन्तः संप्रदायप्रवर्तकपद्मनाभतीर्थादिबहुशिष्यसंपत्तिमन्तश्च ते पूर्णा अधिकारिवर्गापेक्षया संपूर्णा प्रकृष्टा तत्तदधिकारिस्वरूपादिसाक्षात्करणदक्षा मतिर्येषां ते तथा तन्नामानश्च ते गुरवश्च तेषां कारुण्यसरणिं कारुण्यमार्गं प्रेमप्रवाहमिति यावत् । प्रपन्ना· प्राप्ता इत्यर्थः । ननु अथ तत्कृपयेति पूर्वप्रस्थान इव पूर्वप्रणतानां सर्वेषां कारुण्यस्य कार्यसाधकत्वे कथनीये किं पूर्णप्रमतिगुरुकारुण्यस्यैकस्यैव तत्कथ्यत इति चेन्न । श्रीमदिति विशेषणेन उपसर्जनतया पद्मनाभतीर्थादिकारुण्यपरम्पराया अभिप्रेतत्वात् । अत एव कारुण्यमित्येवानुक्त्वा कारुण्यसरणिमित्याह । एकस्यैव विशिष्योक्तिस्तु परममुख्यतामापनायेति हृदयम् । गुरुकारुण्यस्य मुख्यत्वं बोधयितुमनन्यसाध्यं तत्कार्यमाह मान्याः स्म इत्यादि । अत्र

गुरुकारुण्यसरणिं प्रपन्ना मान्या स्म इति समभिव्याहारादेव ज्ञेयं गम्यमितिवत् तयोः साध्यसाधनभावो विज्ञायते । वयं गुरुकारुण्यसरणिं प्रपन्नाः किमपि च यत्किञ्चिदपि वदन्तोऽपि किञ्चापि चेति वदन्तः स्मः तत एव महतां मान्याः स्म इति योजना । अयं भावः । अस्माकं परममुख्यगुरवस्तावत्पूर्णप्रज्ञाचार्याः प्रसिद्धाः मुख्यगुरवस्तु पद्मनाभतीर्थादयः । अस्माभिस्तेषामेषां च कारुण्यानि संपादितानि । अत एव पूर्वं ते सर्वेऽपि वन्दिताः प्रार्थिताश्च । तत्राद्यगुरूणां कारुण्यं परममुख्यम् । द्वितीयानां तु मुख्यम् । तदेतत्परममुख्यमुख्यभेदेन द्विविधमपि कारुण्यं अनुव्याख्यानव्याख्यानस्य शास्त्रपरिचयाद्यमुख्यकारणापेक्षयामुख्यमेव कारणं भवति । तद्भावात्सनिश्चयोऽप्यस्मासु तत्कार्यदर्शनादेव सिध्यति । तथाहि । महतां सभायां प्रमाणविषये प्रमेयविषये वा प्रसक्तौ तत्र वक्तव्यबहुत्वेऽपि आदावस्माभिरल्पमेवोच्यते । तदेव तेषां किञ्चापिचेत्यादिरूपेण बहुविधं भवति । एवमादिविधं केवलपदादिशास्त्रपरिचयाद्यसाध्यं गुरुकारुण्यैकसाध्यं कार्यं पश्यन्तस्तेऽप्यतितरामस्मान्मानयन्तीति । तस्मान्मुख्यामुख्यभेदेन अनेकविधसाधनसामग्रीसंपन्नानामस्माकं नानुव्याख्यानव्याख्यानमसंभावितमिति । अत्र श्लोकानां वक्तव्यार्थबहुत्वेऽपि तावद्गणनि शक्त्यभावादेवोपरम्यते । यथोक्तं गुरुभी रसरञ्जिन्याम् । अमन्दमतिटीकाकृत्प्रबन्धतति-संमतम् । मेयं सा कल्पतो वक्तुं नेयं मर्त्यसभाक्षमेति ॥ अधिकं तु गुर्व्यां रसरञ्जिन्यां द्रष्टव्यम् ।

चषकः— आचारक्विबन्तप्रकृतिककर्तृसाधनप्रत्ययान्तनिर्देशापादितामात्मनो महत्तां विनयातिशयेन संस्कुर्वन् भगवत्पादप्रसक्त्येकविहितप्रकृतग्रन्थनिरूपितार्थजातं नावजानीयादिति च ध्वनयन्स्वावलेपकर्मकमन्दाधिकरणकप्रतीतिमपनिनीषति **न शब्देति** । **'अस्मदो द्वयोश्च'** एकत्वे द्वित्वे च विवक्षितेऽस्मदो बहुवचनं वा स्यादिति विहितस्य 'सविशेषणस्य प्रतिषेधो वक्तव्य' इति प्रतिषेधात्पुरुहं ब्रवीमीतिवत् प्रपन्नोऽहं मान्योऽस्मीत्येव भवितव्यतया कथमयं बहुवचनान्तनिर्देश इति शङ्का, 'त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नता' इत्यादौ औन्नत्यादेः विधेयतया व्यावृत्तिबोधनतात्पर्यविरहेण तद्धेतुत्वरूपविशेषणत्वाभावेन व्यावृत्तिप्रतीतिजनकविशेषणावच्छिन्नविशेष्यकसमभिव्याहृतपदार्थान्तरप्रतीतिस्थल एव वार्तिकावतारात् प्रकृते तदनवतारात्साधुतेव, तयैव दिशा सोपपादनीयेति निरसनीयेति स्थितम् ॥ ८ ॥

ए०बा०— केवलभगवत्पादकरुणारूपालौकिकसाधननिष्पाद्येऽस्मिन्ग्रन्थे नानादरलेशः कार्य इत्यभिप्रेत्य स्वगर्वमपि परिहरन्ति **नेत्यादिना** । **न शब्दाब्धौ गाढा न च निगमचर्चासु चतुरा न च न्याये प्रौढा न च विदितवेद्या अपि वयम् । परं श्रीमत्पूर्णप्रमतिगुरुकारुण्यसरणिं प्रपन्ना मान्याः स्मः किमपि च वदन्तोऽपि महताम् ॥ ८ ॥** निगमचर्चास्विति बहुवचनं मीमांसात्रयाभिप्रायेण । विदितं वेद्यं परमपरं च तत्त्वं यैस्ते तथोक्ताः । किमपि चेति गाढा इत्यादिष्वपि संबध्यते । प्रपन्ना इति यत्तदेव लौकिकं साधनम् । अतो मान्या स्म इत्यन्वयः । अनेनेह वक्ष्यमाणं सर्वमपि मूलाभिप्रेतमिति ध्वनितम् । किमपि साध्वसाधु वा वदन्त इत्यर्थः । कृत्यानां कर्तरि चेति महतामिति षष्ठी । एवमग्रेऽपि । यद्वा किमादिशब्दत्रयं शब्दस्वरूपपरम् । किञ्च अपिश्च किमपी ताभ्यां सहितौ च तौ चौ चेति शाकपार्थिवादिषूपसङ्ख्येयतया समासः । ताविति वदन्त इत्यर्थः । अन्ये तु न परटीका-

काराणामिवास्मद्विवरणमशेषशास्त्रार्थपरिज्ञानमात्रसाध्यमपि तु गुरूत्तमश्रीमध्वाचार्यकरुणासाध्यमतो नात्रानादरलेशः कार्य इत्यभिप्रेत्याह नेत्यादिना। वयमपि यद्यपि शब्दाब्धौ व्याकरणशास्त्रे गाढा नेति न। कृतव्याकरणशास्त्रनदीवगाहा एवेति भावः। निगमचर्चासु चतुराश्च न्याये प्रौढाश्च नेति न। तत्र तत्र चतुराः प्रौढाश्चेति भावः। विदितवेद्याश्च व्याख्यानोपयोगिसामग्रीसंपन्ना इति यावत्। तथापि श्रीमत्पूर्णप्रमतिगुरुकारुण्यसरणिम्। श्रीमाननन्तः तेन तद्वच-नेनेति यावत्। पूर्णप्रमतिः श्रीमन्मध्वशास्त्रश्रवणस्य मोक्षः फलमिति प्रकृष्टं ज्ञानं येषां ते श्रीमत्पूर्णप्रमतयः सनकादिमुनयः तेषां गुरुः श्रीमध्वाचार्यः। तस्य कारुण्यं करुणैव सरणिः पद्धतिः तां प्रपन्ना इति यत्तत एव मान्या स्मः। इतरत् मान्यतायामप्रयोजकमिति भावः। कारुण्यं करुणा घृणा। सरणिः पद्धतिः पद्येति चामरः। कदाचिच्छ्रीमध्वाचार्यस्य व्याख्यां श्रोतुं स सनकादिमुनिः गगनेऽल्पदृष्टतनुः सहस्रमस्तकोऽनन्तोऽभ्युपेत्य तां श्रुत्वा ननन्द, तदा ते मुनयः किमस्य व्याख्यानश्रवणस्य फलमिति तमुपसन्नाः पप्रच्छुः। तदा सः निर्दुःखानन्दानुभव-लक्षणो मोक्ष एव तस्य मुख्यं फलमित्युज्जगारेति सुमध्वविजय एकादशसर्गे प्रसिद्धेषा कथा। श्रीमतो हरेः पूर्णप्रमतिरिच्छा मनोरथो येनासौ तथोक्तः। 'वेदान्तमार्गपरिमार्गणदीनदूनाः दैवीः प्रजा विशरणाः करुणापदं नः। आनन्दयेः सुमुखभूषितभूमिभागो रूपान्तरेण मम सद्गुणनिर्णयेने'त्यादिसुमध्वविजयोक्तेः। स चासौ गुरुश्चेति वा। मतिबुद्धिपूजार्थेभ्यश्चेति सूत्रे मतिशब्दस्येच्छार्थतया वैयाकरणैर्विवरणात्। तस्येत्यादि प्राग्वत्॥ २॥ पूर्णप्रमतिः पूर्णबोधश्च गुरुवः प्राक् प्रणता भारत्यादयश्च श्रीमत्पूर्णप्रमतिगुरवः। कुरुपाण्डवन्यायेनेयमुक्तिः। श्रीमन्तश्च ते पूर्णप्रमतिगुरवश्च तेषां कारुण्यसरणिमिति वा॥ ३॥ तदुक्तमन्यत्र। व्याख्यास्ये भगवद्गीताभाष्यं तत्करुणाबलादिति। तेषां करुणाबलादिति तदर्थः श्रीमति विष्णौ पूर्णा प्रमतिरिच्छा यस्येति वा श्रीमतो हरेः पूर्णा प्रमतिरिच्छा यस्मिन्निति वा पूर्णप्रमतिः स चासौ गुरुश्चेति वा यस्याहमाप्त आप्तेभ्यो यो म आप्ततमः सदेति आचार्योक्तेः। श्रीमति विष्णौ पूर्णप्रमतिरिच्छा यस्याः सा तथोक्ता लक्ष्मीः सा गुरुर्यस्येति वा। 'वव्रे परं सर्वगुणैरपेक्षितं रमामुकुन्दं निरपेक्ष-मीप्सितमि'ति भागवतोक्तेः। तस्य कारुण्यसरणिमिति प्राग्वत्। एवमेव विवृत्त्यन्तराणि सूक्ष्मेक्षणैरूहनीयानि। यद्वा पूर्वार्धे ह्यस्मच्छब्दव्यतिरिक्ताः सर्वे बहुवचनान्ताः काकुभिर्निषेधमवगमयन्ति। शब्दाब्धौ गाढा न। किन्तु गाढा एवेत्यादिरर्थः। नत्रां पृथगन्वयः। शिष्टं समानम्। अत्र गाढा इत्यादेः निषेधप्रतियोगितया काकुत्वेऽप्यमान्यत्वोप-पादकतया प्रपन्ना इत्यस्य च मान्यत्वोपपादकतया मान्यत्वस्य च विधेयतयास्मच्छब्दस्याविशेषणत्वेन सविशेषणस्य प्रतिषेध इति निषेधाप्रवृत्तेः त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नता इत्यादाविवास्मदो द्वयोश्चेत्येकस्मिन्नपि बहुवचनमिति वदन्ति। अन्ये त्वात्मन एकत्वेऽपि बहुत्वारोपाद्बहुवचनम्। तदुक्तं दुर्घटविवृतौ। बहुत्वारोपान्न वयं वैयाकरणा इत्यादिकमुपपादनीयमितीत्यभिदधति। एके त्वात्मनि गुरावेकेषामिति वचनाद्वयमिति बहुवचनम्। एतेन श्रीमदक्ष्योभ्यतीर्थाख्यानित्यादिकमपि विवृतमिति मन्यते। स्वस्मिन् शब्दशास्त्रनदीवगाहादिव्याख्यानोपयोगि-धर्मबाहुल्यज्ञापनाय बहुवचनमित्यपरे। वयं तु त्यदादीनामिथः सहोक्तौ यत्परं तच्छिष्यत इत्युक्तेः पूर्वशेषोऽपि दृश्यत इति भाष्योक्तेर्वा व्याख्यानान्तरसाहित्येन एते चाहं च वयमिति वैकशेषमाश्रित्य बहुषु बहुवचनमिति बहुत्वविवक्षया बहुवचनमिति मन्यामहे। अत एव किमपि वदन्तोऽपीत्यवक्षत्। तथा च भागवते 'अहो वयं धन्यतमा यदत्र त्यक्ताः पितृभ्यां न विचिन्तयाम इती'ति॥ ८॥

काशी०— ननु ग्रन्थोऽयमपि बह्वर्थ इत्याचार्यैरनुव्याख्यानस्यातिगम्भीरत्वोक्तेः सर्वज्ञत्वमन्तरेण तद्व्याख्यानमयुक्तम् । अन्यथा व्याख्याने प्रेक्षावदुपेक्षणीयतापत्तेरित्याशङ्कां विनयेन वारयति **नेति** । **वयं न शब्दाब्धौ गादा** इत्यादिना पदवाक्यप्रमाणब्रह्मशास्त्रानभिज्ञत्वमुच्यते । किमपि प्रसिद्धनिबन्धानुसारि तदननुसारि वा वदन्तश्च । तथाऽपि गुरुकारुण्यसरणिमत्यन्तं प्रपन्ना अतो महतामपि मान्याः स्म इति योजना । तेनास्मदो द्वयोश्चेत्येकस्मिन्विकल्पविहितबहुवचनस्य पटुरहं ब्रवीमीत्यादाविव सविशेषणस्य प्रतिषेध इति न प्रतिषेधः । प्रपन्नत्वादेर्विधेयत्वेन विशेषणत्वाभावात् । यद्वा । स्वगतोक्तधर्मबाहुल्यापेक्षया बहुवचनं द्वित्वैकत्वयोरेवोक्तवार्तिकेन बहुवचनप्रतिषेधात् । यद्वा । अहमन्ये शिष्याश्च वयमित्येकशेषाश्रयणान्न दोषः । तथा चानुव्याख्यानव्याख्यानोपयुक्त-शब्दाब्धिगाढत्वादेः स्वतोऽभावेऽप्याचार्यानुग्रहलब्धतत्त्वावबोधमूलकत्वादुपादेयमेवेदं व्याख्यानमिति हृदयम् ॥ ८ ॥

प्रदीपः— देवतागुरुप्रसादपूर्वत्वात् नात्र ग्रन्थेऽनादरः कार्य इत्याह **न शब्दाब्धाविति** । भारतीभर्तुः पूर्णबोधस्य करुणायां शब्दाद्यज्ञत्वमसंभावितमित्याशयः ।

॥ अनुव्याख्यानकृतां मङ्गलाचरणम् ॥

॥ अनुव्याख्यानस्थे आद्यपद्ये नारायणप्रणामः ॥

आद्यपद्यस्य अवतरणिका—

१ **सु०— भगवता बादरायणेन प्राणिनां निःश्रेयसाय प्रणीतमपि ब्रह्ममीमांसाशास्त्रं असाधुनिबन्धान्धतमसाऽवकुण्ठितत्वेन अप्रणीतमिव मन्यमानो भगवानानन्दतीर्थमुनिः यथाऽऽचार्याभिप्रायम् अस्य भाष्यं विधाय अनुभाष्यमपि करिष्यन् विलीनप्रकृतितया स्वयमन्तरायविधुरोऽपि अनवरतमीश्वरप्रवणकायकरणवृत्तिरपि नारायणप्रणामादिकं प्रारि-प्सितस्यानन्तरायपरिसमाप्तेः प्रचयस्य च हेतुतयाऽविगीतशिष्टाचारपरम्परादिना अवगत-मवश्यं करणीयं शिष्यान् ग्राहयितुं ग्रन्थादौ निबध्नाति— नारायणमिति ।**

परि०— भाष्यादिवैयर्थ्यशङ्कां निराह **भगवतेत्यादिना** ॥ **असाध्विति** । असमीचीन-ग्रन्थाख्यान्धतमसेन प्रतिबद्धतत्त्वज्ञानजननशक्तिकत्वेनाप्रणीतमिवेत्यर्थः । सूत्रकृतेः पूर्वं विद्यमानयोः साधुजनमनोगतसंशयविपर्ययथोरनपगमादिति भावः ॥ **यथाचार्याभिप्रायं** सूत्रकाराभिप्रायमनतिक्रम्य ॥ **अस्य** ब्रह्ममीमांसाशास्त्रस्य ॥ अनुभाष्यमपीति तत्कृत्यमन्वपि चेत्यादावग्रे व्यक्तम् ॥ ग्रन्थादौ निबन्धनेन प्रणामादिकं कृतमिति तावदवगम्यते, अन्यथा तदयोगात् । तच्चेतरजनकृतमिव विघ्नविघातार्थमिति, इदानीमेव कृतमिति च प्रतीयते । तत्प्रतीतिद्वयं निरसितुं स्वयमित्याद्यप्यन्तं विशेषणद्वयम् ॥ प्रणामादिकं

प्रणामस्तवनादिकम् ॥ **अविगीतेति** । अविप्रतिपन्नव्यासादिशिष्टानामाचारेण मन्वादिशिष्टानामाचार इत्येवमाचारपरम्परया तदनुमितश्रुत्यादिना चावगतमित्यर्थः ॥ श्रुत्यनुमानप्रकारश्चाग्रे 'तत्र तारेत्ये'तदवतारिकायां व्यक्तः ।

यादु०— अनुव्याख्यानमङ्गलाचरणयोः कर्तव्यतामुपपादयन्नाद्यपद्यमवतारयति **भगवतेत्यादिना** । विधायेत्यनन्तरं 'स्वयं कृताऽपि तद्व्याख्येत्यत्र वक्ष्यमाणप्रयोजनाये'ति शेषः । **नारायणप्रणामादिकमवश्यं करणीयम् अवश्यकरणीयत्वेन विशिष्टं नारायणप्रणामादिकमवश्यं करणीयमिति शिष्यान्ग्राहयितुमित्यर्थः** । नन्वस्तु निबन्धः शिष्यान्ग्राहयितुं, किन्तु ग्रन्थारम्भसमये कृतस्यैव नारायणप्रणामस्य; अकृतस्य नमामीत्यादिरूपेण निवेशने प्रतारकत्वप्रसङ्गात् । न च तत्करणमत्र संभवति, आनन्दतीर्थमुनेर्विलीनप्रकृतितया जीवन्मुक्तत्वेन स्वत एवान्तरायविधुरत्वेन तत्करणे उक्तप्रयोजनाभावात् । न च परमास्तिकत्वभाववत्त्वात्तत्करणमिति वाच्यम्, तेनानवरतमीश्वरश्रवणकायकरणवृत्तित्वस्यैव लाभेनारम्भसमये विशेषेण तत्करणालाभात् इत्याशङ्क्याह **विलीनप्रकृतितयेत्यादि** । शिष्यान्ग्राहयितुमित्यतःपरं कृतमिति शेषः । प्रणामादिकमित्यत्रादिपदेन स्तुतिर्ग्राह्या । निबध्नातीत्यतःपूर्वं गुणप्रधानभावेनेति शेषः ।

तथा चान्तरायविधुरोऽप्यनवरतमीश्वरश्रवणकायकरणवृत्तिरपि सन्निहितशिष्यान्ग्राहयितुमारम्भसमये विशेषेण कृतं नारायणप्रणामादिकमसन्निहितशिष्यानपि ग्राहयितुं गुणप्रधानभावेन निबध्नातीति योजना द्रष्टव्या ।

आनन्दः— तर्हि व्याख्यातृत्वोपयोगिसमग्रगुणाभावेऽपि किञ्चित्प्रवेशसत्त्वमात्रेण व्याख्यानकरणमयुक्तम् । अनुभाष्यकरणस्य प्रयोजनाभावात् । न च सूत्रार्थज्ञानमेव प्रयोजनमिति वाच्यम् । तेनापि प्रयोजनाभावात् । न च तत्त्वज्ञानद्वारा मोक्षः प्रयोजनमिति वाच्यम् । तस्य वेदादिनैव संभवात् । न च वेदार्थज्ञानस्य सूत्रैर्विनापि संभवेन तज्ज्ञानार्थं भाष्यानुभाष्यकरणस्यायुक्तत्वात् । न च वेदार्थस्यातिदुर्ज्ञेयत्वात् सूत्रैर्विना तज्ज्ञानासंभवेन सूत्राणां च यथावदर्थपरतया ज्ञातानामेव यथावद्वेदार्थज्ञानहेतुत्वात्, यथावत्सूत्रार्थज्ञानाभावे यथावद्वेदार्थज्ञानाभावेन तत्त्वज्ञानासंभवेन मोक्षभावप्राप्तेर्यथावत्सूत्रार्थज्ञानार्थं भाष्यानुभाष्यकरणं युक्तं इति वाच्यम् । तथापि सङ्करादिप्रणीतभाष्यादेरेव सूत्रार्थज्ञानसंभवेन तेन वेदार्थज्ञानस्यापि संभवेन तत्त्वज्ञानद्वारा मोक्षस्यापि संभवान्न भाष्यानुभाष्यकरणं युक्तमित्याशङ्क्यायामाह **भगवतेत्यादि** । अत्रानन्दतीर्थमुनिरस्य भाष्यं विधायानुभाष्यमपि करिष्यन् नारायणप्रणामादिकं निबध्नातीति संबन्धः । जैमिन्यादिसूत्राणि परित्यज्यास्यैव व्याख्याने को हेतुरित्यत उक्तं **भगवतेति** । अपिर्हेत्यर्थे । यतो भगवता बादरायणेन प्रणीतमत एवेत्यर्थः । ब्रह्मसूत्राणामुन्मत्तप्रणीततुल्यतानिवारणाय भगवतेत्युक्तं तथापि विप्रलम्भेनोक्तमिति किं न स्यादित्यत उक्तं **प्राणिनां निःश्रेयसायेति** । तथाच न विप्रलम्भमूलत्वमिति भावः । असाध्वित्यनेन सङ्करादिप्रणीतभाष्यादेस्तत्त्वज्ञानानुपयोगित्वं सूचयति । अत्रासाधुपदस्यावृत्तिः । एवं चासाधूनां येऽसाधवो निबन्धाः तल्लक्षणं यदन्धतमसं तेनावकुण्ठितं तस्य भावस्तत्त्वमिति विग्रहः । परकृतनिबन्धानामसाधुत्वं च समयपादे स्फुटम् । अवसमन्धेभ्यस्तमस इत्यनेनाचि समागतेऽन्धन्तमसमिति सिद्ध्यति । अत्रावकुण्ठितत्वं नाम प्रतिबद्धत्वं तत्त्वज्ञानानुत्पादकत्वमिति यावत् । अप्रणीतमिवेतीवशब्दस्तु प्रणीतत्वव्याघातपरिहारार्थः ।

प्रणयनाप्रणयनयोर्व्याहतत्वात्। अप्रणीतसाम्यं तु तत्त्वज्ञानानुपयुक्तत्वमेव। यद्वाऽसाधुनिबन्धान्धतमसप्रतिबन्धेन स्वस्य तत्त्वज्ञानानुत्पादकत्वाभावेऽपि **अन्येषां तदनुत्पादकत्वादप्रणीतमिवेत्युक्तम्**। अन्यसूत्रव्याख्यातृवन्नायं व्याख्यातेति द्योतयितुं भगवानित्युक्तम्। **अस्य भगवत्त्वेऽपि विघ्नलम्भादिनैतत्कृतमिति किं न स्यादित्यत उक्तं यथाचार्याभिप्रायमिति**। आचार्यो वेदव्यासस्तदभिप्रायमनतिक्रम्येत्यर्थः। न च भाष्येणैवालं, अनुभाष्यकरणेन प्रयोजनाभावादिति वाच्यम्। **संक्षेपविस्ताराभ्यामिति न्यायादुभयकरणस्याविरुद्धत्वात्**। संक्षेपविस्तरकरणं च शिष्याणां सुबोधार्थमेवेति भावः। **नन्वानन्दतीर्थस्य विघ्नवत्त्वे दोषवत्त्वात्तत्प्रणीतग्रन्थस्यापि दोषवत्त्वेन न तत्राश्वास इत्यत उक्तं अन्तरायविधुरोऽपीति**। ननु अन्तरायविधुरत्वमयुक्तम्। बीजाभावादित्यतो हेतुमाह **विलीनप्रकृतितयेति**। सर्वथाऽज्ञानमिथ्याज्ञानादिरूपस्वकार्यानापादकप्रकृतिमत्तयेत्यर्थः। तथा चान्तरायविधुरत्वं संभवतीत्यर्थः। नन्वन्तरायविधुरत्वे **प्रणामरूपमङ्गलकरणमयुक्तम्**। प्रयोजनाभावादित्यत उक्तम् **अनवरतमित्यादि**। ईश्वरप्रवणा तदेकनिष्ठा कायकरणवृत्तिरस्य स **तथोक्तः**। **तथा चेश्वरप्रणामकरणस्वभावत्वान्न विरोधः**। तथापि ग्रन्थारम्भे मङ्गलकरणमयुक्तम्। ग्रन्थारम्भे तत्करणस्य **विघ्नध्वंसार्थत्वादित्यत उक्तं शिष्यानिति**। एवमुत्तमस्य वन्द्यः क इत्यत उक्तं **नारायणेति**। साफल्यसप्रमाणकत्वप्रदर्शनार्थं **प्रारिप्सितस्येत्यादि**। **प्रचयस्य** ग्रन्थविस्तरस्य।

श्रीनिधि०— निबन्धाः प्रबन्धविशेषाः। **आचार्यः** भगवान् बादरायणः। वृत्तिशब्दः कायकरणशब्दाभ्यां संबद्ध्यते।

वा०चं०— ननु प्रामाण्यविषयादिमत्त्वदुर्गमार्थत्वानां व्याख्येयत्वप्रयोजकतया प्रकृतशास्त्रे च तदभावात्, तद्भावेऽपि वा भाष्यान्तराणां सत्त्वेनैतद्भाष्यानुभाष्ययोरेवाकर्तव्यत्वेन तदनन्तरायपरिसमाप्त्यादेः प्रयोजनस्यासंभवात्, विलीनप्रकृतितयाऽनवरतमीश्वरप्रवणकायकरणतया भवदभ्युपेतभाष्यकारस्य ग्रन्थारम्भ एवान्तरायविरहोद्देशेन मङ्गलकृतेरस्त्वया वक्तुमशक्यत्वाच्चाचारपरम्पराया अन्धपरम्परात्वसंभवेन प्रमाणाभावाच्च, नारायणप्रणामादेरकर्तव्यतया ग्रन्थे निवेशनस्य च प्रयोजनाभावेन सुतरामनुपपत्तेरसङ्गतमेतत्प्रथमपद्यमित्यत आह **भगवतेति**। अत्र ज्ञानवैराग्यैश्वर्यसमर्पकभगवच्छब्देन विवक्षितार्थतत्त्वज्ञानविवक्षाकरणपाटवानां लाभेन, प्राणिनां निःश्रेयसायेति वक्तृप्रीतिविषयत्वतत्त्वज्ञानयोग्यत्वलाभेन, वक्त्रानुकूल्यश्रोत्रानुकूल्ययोः निःश्रेयसाय प्रणीतमित्यनेनैव प्रसङ्गानुकूल्यस्य च सिद्धया, आप्तोक्ततयाऽप्रामाण्यशङ्कायाः वेदार्थभूतपरब्रह्मनिर्णायकन्यायग्रथनपरेण ब्रह्ममीमांसाशास्त्रशब्देन वेदादीतिकर्तव्यतात्वलाभेन विषयादिराहित्यशङ्कायाः, निबन्धेति व्याख्यानरूपनिबन्धप्रवृत्युक्त्या दुर्गमार्थत्वाभावशङ्कायाः, एतद्ग्रन्थयोर्भाष्यानुभाष्यशब्दौ प्रयुज्य यथाऽऽचार्याभिप्रायमिति तदर्थकथनेनान्यत्र नितरां बन्धकत्वार्थकनिबन्धशब्दं प्रयुज्याचार्याभिप्रायाननुसारित्वरूपासाधुत्वेन तद्विशेषणेनैतयोरन्येन गतार्थत्वशङ्कायाः, अविगीतशिष्टेत्यन्धपरम्परात्वशङ्कायाः, विलीनेत्यादिकायकरणवृत्तिरपि शिष्यान् ग्राहयितुमित्यन्तेन भाष्यकारस्य ग्रन्थारम्भ एवान्तरायविरहोद्देशककृत्यनुपपत्तिशङ्कायाः ग्रन्थनिबन्धनानुपपत्तिशङ्कायाश्च, परिहारेण; पद्यं सङ्गतमिति द्रष्टव्यम्।

वा०र०— भगवता बादरायणेन इत्यादिविशेषणानां प्रयोजनसद्भावात् न वैयर्थ्यं इति दर्शयितुं क्रमेण तद्वचावृत्त्य शङ्कोत्थापनं कुर्वन् भगवतेत्याद्यवतारवाक्यमेवावतार्य तत्तदंशेन तत्तच्छङ्कापरिहारप्रकारं च क्रमेण दर्शयति ननु प्रामाण्येत्यादिना सङ्गतमिति द्रष्टव्यमित्यन्तेन। प्रकृतशास्त्र इति। व्याख्येयत्वेन प्रकृतब्रह्ममीमांसाशास्त्र इत्यर्थः। भाष्यान्तराणामिति। सङ्करादिप्रणीतपत्तच्छास्त्रभाष्याणामित्यर्थः। एतद्भाष्यानुभाष्ययोरेवेति। यद्यपि तत्त्वप्रकाशिकायाम् अविद्यापटलपिहितनयनैरित्यादिना भाष्यारम्भः समर्थितः तथापि सूत्रव्याख्येयत्वप्रयोजक-प्रामाण्यादि तत्र न व्युत्पादितम्। किन्तु यथावद्व्याख्यानरूपभाष्यप्रवृत्तौ निमित्तमात्रमुक्तम्। अत्र तु सूत्रस्य व्याख्येयत्वप्रयोजककथनेन व्याख्येयतां समर्थ्य यथावद्व्याख्यानकर्तव्यतापि समर्थ्यते इति। विशिष्टविषयकत्वात् अनुभाष्यस्येव भाष्यस्यापि ग्रहणं युक्तम्। किञ्चानुभाष्यं तावत् भाष्यार्थस्यष्टीकरणमिति वक्ष्यते। स्पष्टीकरणं च क्वचित् अनुक्तांशस्य उक्तिरिति वक्ष्यमाणमूलानुसारेणानेकविधं भवतीति व्याख्यानरूपतात्पर्यपर्यवसायि। ततश्चान्यैर्व्याख्यातत्वात् भाष्यानुभाष्ये एव कर्तव्ये इत्यस्य सूत्राणां अन्यैर्व्याख्यानतया भाष्यव्याख्यानस्यैव अकर्तव्यत्वात् तत्स्पष्टीकरणरूपानुव्याख्यानस्यापि अकर्तव्यत्वमिति फलितं भवति। अत एव मूलं यथाचार्याभिप्रायं अस्य भाष्यं विधायेत्यनुभाष्यमपि इति च भाष्यानुभाष्यशब्दाभ्यां निर्देशपूर्वकं क्रमः प्रतिपादितः। अप्रणीतमिव मन्यमानः इत्यस्योभयप्रवृत्तिहेतुतापि उक्तरीत्या विशिष्टव्याख्यानसमर्थनात् युक्तेति युक्तमेवोभयग्रहणम्। तथाच बुद्धया विवेकेन सूत्राणामेवाव्याख्येयत्वात् व्याख्येयत्वेऽपि वा न भाष्यं कार्यम्। तत एव तद्व्याख्यानरूपानुभाष्यं च न कार्यं इति लाभात् तदनन्तरायेत्यत्र च बुद्धया विविक्तचरमोपस्थितानुभाष्यस्यैव परामर्शोपपत्तेर्न कश्चिद्दोष इति ज्ञेयम्। यद्यपि भाष्येणानुभाष्यस्य गतार्थतापरिहारोपयोगितया व्याख्येयत्वेऽपि भाष्येणैव चारितार्थ्यात् अनुभाष्यं व्यर्थमित्यपि बुद्धया विवेकमाश्रित्यैव व्याख्यातुं शक्यते तथापि तच्छङ्कापरिहारस्यावतारवाक्ये मूलेऽप्रतीतेः न तथा योजनीयम्। अत एव भगवतेत्यादिविशेषणप्रयोजननिरूपणावसरेऽपि टीकाकृता उभयोरप्यव्याख्यानेन गतार्थतापरिहारमात्रं वर्णितम्। यद्यपि च भाष्यं विधायानुभाष्यमपि करिष्यन् इत्यनेनैवान्वपि चाहमेव स्वयं कृतापि इत्युत्तरग्रन्थानुसारेण प्रयोजनविशेषः सूचितः इति वक्तुं शक्यत्वात् नोभयोः साम्येन गतार्थताशङ्कोत्थापनं तत्परिहारवर्णनं युक्तमित्याभाति। तथापि बुद्धया विवेकेन सङ्क्षेपविस्तररूपोभयोरप्यन्येन गतार्थतापरिहार एव भाष्यं विधायेत्यादावभिप्रेतम्। भाष्येण गतार्थतायां उत्तरत्रानुभाष्ये एव परिहरिष्यमाणत्वेनात्र तच्छङ्कापरिहारयोः भानाभावात्। स्पष्टीभविष्यति चैतत् द्वितीयपद्यव्याख्यानावसरे स्वयं कृतापीत्येतत् व्याख्यावसरे च मूले इत्यलम्। परिसमाप्त्यादेः इत्यादिपदेन प्रचयपरिग्रहः। विलीनेति। अन्तरायविधुरत्वेनेति पूर्णायम्। अनवरतमीश्वर-प्रवणकायेति पाठः। अनवरतकायेत्यपाठेऽपि अनवरतमीश्वरप्रवणकायेत्येवार्थः। अत्रान्तरायविरहोद्देशेन मङ्गलकृतेः वक्तुमशक्यत्वे विलीनप्रकृतित्वं हेतुः। ग्रन्थारम्भ एव मङ्गलकरणस्य वक्तुमशक्यत्वे ईश्वरप्रवणेति हेतुरिति विवेकः। प्रयोजनस्यासंभवेन समुच्चयार्थश्चकारः। अङ्गीकृत्य च मङ्गलस्य प्रारिप्सितपरिसमाप्त्यादिफलकत्वप्रयोजनासंभवो व्युत्पादितः। वस्तुतस्तु मङ्गलस्य तत्प्रयोजनकत्वे प्रमाणाभावात् न तस्य तथात्वं इत्याह आचारेति। प्रयोजनासंभवसमुच्चयाय चशब्दः। प्रणामादेः इत्यादिपदेन स्तुतिपरिग्रहः। नतिस्तुत्युभयपरत्वेनापि पद्ययोजनायाः करिष्यमाणत्वात्। एतत्पद्यमिति। व्याचिख्यासितनया बुद्धिसंविधानं मूलकारीयमाश्रित्य एतदिति निर्देशः। अनेन

एवं शङ्कक्रमयोजना सूचिता । इदं पद्यं असङ्गतम् । न चैतत् मङ्गलोपनिबन्धार्थमिति वाच्यम् । प्रयोजनाभावेनेह मङ्गलस्यैवाननुष्ठेयत्वेन तदुपनिबन्धस्य सुतरामकर्तव्यत्वात् । न च एतद्ग्रन्थपरिसमाप्त्यादिकमेव इह तत् प्रयोजनमिति वाच्यम् । एतद्ग्रन्थस्यैव प्रयोजनाभावेनानारम्भणीयत्वात् । न च ब्रह्मसूत्रव्याख्यानाय भाष्यम् । तत्प्रपञ्चनाय चायं ग्रन्थः इत्येवं सूत्रव्याख्यानमेव प्रयोजनमिति वाच्यम् । सूत्राणां व्याख्येयत्वप्रयोजकप्रामाण्यादि शून्यतया अव्याख्येयत्वेन तद्व्याख्यानस्य प्रयोजनत्वायोगात् । व्याख्येयत्वे वा भाष्यकारान्तरैरेव व्याख्याततया तद्व्याख्यानाय भाष्यस्य तत्प्रपञ्चरूपैतदनुभाष्यस्य चाकर्तव्यत्वात् । यथाचार्याभिप्रायव्याख्यानतायाश्चात्राप्यसिद्धेः । अस्तु वोक्तक्रमेण एतद्व्याख्यानमावश्यकम् । तथापि न तत्परिसमाप्त्यादिप्रयोजनाय मङ्गलावश्यकता । मङ्गलस्य परिसमाप्त्यादिहेतुत्वे आचारपरम्परामात्रस्य निर्मूलत्वेनाप्रमाणत्वात् प्रमाणान्तरस्य चाभावात् । अस्तु वा प्रारिप्सितपरिसमाप्त्यादिप्रयोजनादिमङ्गलफलम् । तथापि भवदभिमताचार्यस्य विलीनप्रकृतितयान्तरायविरहोद्देशेन मङ्गलानुष्ठानायोगात् तदनुद्देश्ये चानवरतमीश्वरप्रवणकायकरणवृत्तितया ग्रन्थारम्भ एव तदनुष्ठानायोगः । अस्तु वा तदनुष्ठानमपि । तथापि तदुपनिबन्धस्तु न कार्यः **प्रयोजनाभावात् इति** । **इत्यत आहेति** । इत्याशङ्काः परिहरन् आद्यपद्यं सङ्गमयति इत्यर्थः । उक्ताशङ्कानां परिहारकानंशानुपादाय तत्तदंशेन तत्तच्छङ्कापरिहारप्रकारं च शिष्यानुग्रहाय दर्शयति **अत्र ज्ञानेत्यादिना सङ्गतमिति द्रष्टव्यमित्यन्तेन** । **ज्ञानवैराग्येति** । ऐश्वर्यस्य समग्रस्येत्यादिप्रमाणादिति भावः । ज्ञानमात्रस्य प्राणभृन्मात्रसाधारण्यात् अत्र मुख्यं ज्ञानं सर्वविषयकमेव लभ्यते । प्रमाणेऽपि मुख्यामुख्यन्यायाश्रयणात् । समग्रस्येत्यस्य लिङ्गवचनव्यत्यासेन ज्ञानवैराग्यविशेषणत्वाङ्गीकाराभिप्रायाद्वा । तथा च विवक्षितार्थतत्त्वज्ञानस्य ज्ञानसमर्पकत्वोपाधिना करणपाटवस्य च सकलैश्वर्यसमर्पकत्वोपाधिना लाभेनेत्यर्थः । निःश्रेयसाय प्रणीतमित्यनेनैवेति वक्ष्यमाणतया तत्र एवकारस्यान्यार्थं उपादाने तत्पदद्वयेनेति लाभेनात्र भगवता प्रणीतमिति संबन्धमाश्रित्य भगवच्छब्दस्य ज्ञानाद्यर्थकतायाः प्रोच्यमानतया प्रणीतमिति प्रणयनरूपकार्येण विवक्षापि कारणीभूता सिद्धेति भावेन विवक्षाकरणपाटवानामित्युक्तिः । वैराग्यसमर्पकत्वोक्तिस्तु एवं वक्त्राद्यानुकूल्येनाप्तोक्ततया अप्रामाण्यशङ्कायाः परिहारेण इत्युत्तरत्र वक्त्राद्यानुकूल्यमात्रेणाप्त्यैकदेशेनाप्तवाक्यतालाभवर्णनात् तत्र चास्तु वक्त्राद्यानुकूल्यं वक्तुर्विप्रलिप्सामूलत्वेनाप्रामाण्यं च भवतु इति शङ्कोदयात् तद्वारणाय श्रोतृप्रसङ्गाननुकूलतैकनिबन्धनायाः विप्रलिप्सायाः तयोरानुकूल्येऽभावः सिद्धः इति वक्ष्यमाणरीत्या आप्तोक्ततयेत्यनेनाविप्रलिप्साघटितसमस्तापिसङ्गावप्रतिपादनस्याभिप्रेततयाऽवश्यवक्तव्यत्वात् तत्सूचनाय तदुभयानुकूल्यज्ञापितावविप्रलिप्साया अपि भगवच्छब्देनैव । वस्तुतोऽभिधानमस्तीति ज्ञापनायेति न तदुक्तेर्वैय्यर्थ्यम् । यत्र तु ज्ञानैश्वर्येत्येव पाठः, तत्रापि प्रागुक्तरीत्या विवक्षायाः प्रणीतमित्यनेनैव लाभमाश्रित्योक्तरीत्यैव अविप्रलिप्सायापि लाभमाश्रित्य आप्तोक्ततया अप्रामाण्यशङ्कापरिहार इति वर्णनीयम् । तत्र वैराग्योक्तिप्रसक्त्यभावात् तदुक्तिसङ्गतिविचारानवकाशः । यत्र तु पूर्वत्र वैराग्यपदं परत्र च तत्त्वज्ञानाविप्रलिप्साकरणपाटवानामित्येव पाठः । तत्रापि वैराग्योक्तिरविप्रलिप्सालाभार्थतया स्पष्टैव । विवक्षाया अपि प्रतीतत्वोक्त्या लाभ इत्यभिप्रेतम् । वक्त्राद्यानुकूल्यलाभवर्णनमपि भगवच्छब्दसमर्पिततत्त्वज्ञानकरणपाटवरूपार्थद्वयात् प्रणीतमित्युक्तविवक्षातश्चेति त्रितयमूलकत्वाभिप्रायेणैव । अविप्रलिप्सा तु पूर्वोक्तरीत्या आप्तवाक्यतासिद्ध्युपयोगिनीति सूचनाय । वस्तुतो भगवच्छब्दसमर्पिता

आयातीति मनसि कृत्वा कीर्तितेति न कश्चिद्दोषः इति सूरिभिरालोचनीयम्। लाभेनेत्येतद्वयस्य वक्त्रानुकूल्यश्रोत्रानुकूल्ययोरित्यत्र बुद्ध्या विवेकेन वक्त्रानुकूल्यश्रोत्रानुकूल्यस्य इति द्वयेन क्रमेण संबन्धः । अनुकूल्ययोरित्यस्य सिद्धचेदिति वक्ष्यमाणेन संबन्धः। आप्तोक्ततयेति तु वक्ष्यमाणरीत्या अनुकूलवक्त्रादिमत्त्वसिद्धाप्तवाक्यत्वेन प्रामाण्यानुमानमिति दर्शयितुं इति ज्ञातव्यम्। शङ्कायाः इत्यस्य परिहारेणेत्युत्तरेणान्वयः। एवं उत्तरस्थलपञ्चकेऽपि। **वेदादीतिकर्तव्यतात्वेति** । वेदादीनां च ब्रह्ममोक्षमुमुक्षुरूपविषयादिमत्तायाः सिद्धत्वेन तदितिकर्तव्यतारूपब्रह्ममीमांसाशास्त्रस्यापि विषयादिलाभात् विषयादिराहित्यशङ्कायाः परिहारो युक्त इत्याशयः। यद्यपि ब्रह्ममीमांसापदेन ब्रह्माख्यो विषयः प्राणिनां निःश्रेयसाय इत्यनेन तु अधिकारिप्रयोजने सूचिते इत्यपि वक्तुं शक्यम् । तथापि वेदादीतिकर्तव्यतारूपस्य पृथक्प्रामाण्यानभ्युपगमात् इत्युत्तरमूलं मनसि कृत्वा शास्त्रैकदेशसंबद्धप्रकरण इव वेदादिद्वारकमेव विषयोऽद्यानीतमिति ज्ञेयम्। **तदर्थकथनेनेति** । भाष्यानुभाष्ययोः सङ्क्षेपविस्तररूपत्वेन विशेषसत्त्वेऽपि सूत्रव्याख्यानत्वाविशेषात्। **यथाऽऽचार्याभिप्रायमिति** । तदुभयविशेषणस्य चाचार्याभिप्रायमनतिक्रम्य वर्तमानत्वार्थकस्याचार्याभिप्रायानुसारित्वपर्यवसन्नस्य 'सूत्रार्थो वर्ण्यते यत्रे'ति भाष्यलक्षणपर्यालोचनया च प्राप्तस्य इतरव्याख्यानव्यावृत्तस्यात्रोपादानेनाचार्याभिप्रायानुसारित्वरूपे एव भाष्यत्वानुभाष्यत्वे इत्यर्थकथनलाभादिति भावः। यद्वाऽर्थः प्रयोजनम्। तथा तयोः च **भाष्यानुभाष्ययोः यथा आचार्याभिप्रायमित्यनेनाचार्याभिप्रायानुसारेण** व्याख्यानरूपप्रयोजनस्य कथनेन इत्यर्थ इति न **कश्चिद्दोषः**। **नितरामिति**। उपलक्षणं चेदम्। अन्धतमसेनोपमेये इत्यपि ज्ञेयम्। सम्यक् ज्ञानप्रतिरूपत्वरूपत्वात् तमस्त्वस्य। **तद्विशेषणेनेति**। चशब्दोऽत्राध्याहार्यः। मूलेऽवकुण्ठितत्वं प्रतिबद्धत्वम्। तत्त्वज्ञानाजनकत्वमिति यावत्। **विलीनेत्यादीति**। आदिना प्रकृतितया अन्तरायविधुरोऽप्यनवरतमीश्वरप्रवणेत्यस्य सङ्ग्रहः। **करणवृत्तिरपीति पाठः**। (यपदं लेखकदोषात्।) वृत्तिरपीत्यनन्तरं शिष्यान् इत्याद्यनुवादेन शिष्यान् ग्राहयितुं इत्यस्य तत्रैव संबन्ध इति सूचितम्। **ग्रन्थारम्भ एवेति** । विलीनप्रकृतितया अन्तरायविधुरत्वात् नान्तरायविरहोद्देशेन मङ्गलकृतिरुपपन्नेति। **अनवरतमीश्वरप्रवणकायवृत्तित्वात्** ग्रन्थारम्भ एव तत्कृतिरनुपपन्नेत्येतत् उभयं सङ्कृत्य अवतारे ग्रन्थारम्भे एवान्तरायेत्यादेः उक्तत्वात् तदनुसारेण एवात्रोभयमेकीकृत्य ग्रन्थारम्भे एवेत्याद्युक्तम्। उपनिबन्धविचारपरोत्तरग्रन्थस्थद्वितीयतृतीयप्रकारानुसारेणाचार्योऽपि मङ्गलं करोतीत्यर्थस्य लाभात् मङ्गलनिबन्धमात्रं अत्रोक्तमिति न शङ्कनीयम्। परिहारप्रकारस्तु एवं अभिप्रेतः। विलीनप्रकृतितया अन्तरायविधुरोऽपि शिष्यान् ग्राहयितुं मङ्गलं करोति। अनवरतमीश्वरप्रवणकायकरणवृत्तिरपि शिष्यान् ग्राहयितुं एव विशेषतो ग्रन्थारम्भ एव लोकानां व्यक्ततया मङ्गलं करोतीत्येवं तत्कृतेरनुपपत्तिर्नास्तीति। **निबन्धनानुपपत्तीति**। शिष्यान् ग्राहयितुमित्यंशेनैव शिष्यशिक्षाख्यप्रयोजनसद्भावेन निबन्धस्य आवश्यकत्वप्रतिपादनादिति भावः। **मूले अप्रणीतमिवेत्यादि** । वस्तुतः प्रणीतत्वेऽपि तत्त्वज्ञानानुत्पादकत्वरूपाप्रणीतसादृश्यात् अप्रणीतत्वमिति व्यञ्जयितुमेवेत्युक्तम्। यथाचार्याभिप्रायं भाष्यविधाने सामर्थ्यमुक्तं भगवान् इत्यादि भाष्यं विधायानुभाष्यं करिष्यन् इत्येतत्तु अनुभाष्यकरणे सिद्धे तत्प्रामाण्यानुबन्धकरणं इति पूर्वोक्तरीत्या सङ्गमत्वं वक्तुं इति ज्ञातव्यम्। **अवश्यकरणीयं** अवगतत्वादेवावश्यकरणीयतया प्राप्तमित्यर्थः। अन्यथा प्रणामादिकं अवश्यं करणीयमित्युक्ते वाक्यसमाप्तिर्विज्ञायते। कृधातोः कर्मणि अनीयर् प्रत्ययस्याहार्ये विद्यमानेन कर्तृयोग्यत्वस्य तदर्थत्वात्। स्वयं कृतापि

इत्येतत् व्याख्यानं मूलगतं वक्तव्यम्। वक्तव्यं इत्यत्र वेति ज्ञेयम्। अत्र गुरवः शिष्याणां सन्निहितासन्निहितभेदेन द्वैविध्यात् सन्निहितानां कृतिदर्शनोपदेशादिना मङ्गलकर्तव्यतावुद्धिसंभवेऽपि येऽसन्निहिताः तेषां ग्रन्थकारीय-मङ्गलकृतिदर्शनयोगेन शिक्षाया अनुपपत्तिरिति तदर्थं अयं उपनिबन्ध इति विशेषविषयत्वं वदन्ति। चन्द्रिकाटीकायां तु गुरुभिर्निरूपितं अनुसृत्याधिकं च किञ्चित् उच्यते। तथाहि। शिष्यान् ग्राहयितुं निबध्नातीत्यनेन शिष्यशिक्षार्थं नमामि इत्यादिर्निबन्धः इत्युक्त्या निबन्धस्य प्रणामाद्यङ्गतया स्वातन्त्रेण वा समाप्त्यननुकूलतया वैयर्थ्यमित्येतच्छङ्का निराकृता। तथाहि। न हि ग्रन्थो व्यसनितया क्रियते। किन्तु 'यावत् कीर्तिर्मनुष्याणां पुण्यलोकेषु गीयते। तावद्वर्षसहस्राणि विष्णुलोके महीयते' इत्युक्तेः सत्कीर्त्यनुवृत्तये तत्राप्रचरता तेन सत्कीर्तिः अनुवर्तयितुं शक्या। न चाशिक्षिताः शिष्याः मङ्गलं कुर्युः। न च तेषां मङ्गलाकरणे ग्रन्थाध्ययनाध्यापने भवतः शास्त्रस्यायुष्मत्पुरुष-कत्वादिकं वा। कदाचित् कस्यचित् अन्तरा विघ्नानुत्पादेऽपि बहुलं तदुत्पादात्। यथोक्तं श्रेयांसि बहुविघ्नानीति तदेवं ग्रन्थारम्भे मङ्गलाचरणविषयशिष्यशिक्षैव युक्तेति तदर्थोपनिबन्धः सार्थकः। अत एव उत्तरमूले कृतं च निवेशितं चेत्यादिप्रतिपादनम्। नमस्काराधिकारग्रथनसूचने शिष्यशिक्षार्थमिति तत्त्वप्रकाशिकाया अपि अयमेवार्थः। अथवा शिष्यान् ग्राहयितुं निबध्नातीत्यस्य शिष्यशिक्षायै निबन्धरूपं मङ्गलमाचरतीत्यर्थः। शिष्यशिक्षायाः इति आनुषङ्गिकप्रयोजनत्वोक्तिः। समाप्तेरेव उपनिबन्धरूपमङ्गलफलत्वात्। दधिदर्शनादिमङ्गलस्य ग्रन्थादौ निबन्धा-भावेऽपि इष्टसिध्यर्थिनां पुरुषाणां तत्र कर्तव्यतावुद्धिवत् नतिस्तुत्योरपि कर्तव्यतावुद्धेः उपनिबन्धाभावेऽपि संभवेन तच्छिक्षायाः मुख्यतः प्रयोजनतायाः अयोगात्। किञ्च प्रचरद्ग्रन्थेषु सहस्रशः नमस्कारोपनिबन्धनेन शिष्यशिक्षायाः संभावितत्वेऽपि उत्तरोत्तरेषां ग्रन्थकाराणां नमस्काराद्युपनिबन्धदर्शनात् अवगच्छामो यत् प्रणामवाचकनमःशब्दादिवत् तदनुमापकलिपेरपि विघ्नानुत्पादोद्देशेनैव करणम्। अत एव विघ्नो मा भूदिति। केचित् उल्लिखन्त्यपि। कृतेऽपि मङ्गलान्तरे विघ्नहेतुबलीयस्त्वसंभावनायां मङ्गलप्राचुर्यार्थनमस्कारकरणवत् कृतेऽपि तस्मिन् उक्तप्रयोजनाय तदुपनिबन्धरूपमङ्गलान्तरानुष्ठानोपपत्तेश्च। अन्यार्थमपि कृतस्यान्यार्थतायाः दर्शनात्। शिष्यशिक्षाऽपि आनुषङ्गिकी सिद्धचत्येव। 'मीनातिमीनोतिदीङां ल्यपि चे'ति षष्ठाद्यसूत्रीयमहाभाष्ये अन्यार्थमपि कृतं अन्यार्थं भवति। तद्यथा। शाल्यर्थं कुल्याः प्रणीयन्ते। ताभ्यश्च पानीयं पीयते। उपस्पृशन्ते शाल्यश्च भाव्यन्ते इति अन्यार्थस्यापि अन्यार्थतायाः प्रतिपादितत्वात्। एतदभिप्रायेणैव शिष्यान् ग्राहयितुं इत्यादिरूपोक्तिः। तस्मादयं मङ्गलोपनिबन्धरूपं मङ्गलस्याचार एव। अत एव मङ्गलमाचरन्तीत्येव टीकाकृत् अवतारयामास। चन्द्रिकापि आचरतीति। वस्तुतस्तु नमामीत्यादिको मङ्गलाचार एव। शब्दात्मकवाचनिकनमस्काराचारो हि असौ। त्रिविधनमस्कारस्यापि सैद्धान्तिकतया सर्वग्रन्थेष्वपि नमःशब्दादिप्रयोगस्य वाचनिकनमस्कारताया एव न्याय्यत्वात्। एवं निखिलपूर्णगुणैकदेहं इत्यादेः स्तुतिरूप-शब्दाप्रतिपादकतया स्तुतिरूपमङ्गलोपनिबन्धत्वायोगेन एतेषां विशेषणानां एव उक्तप्रतिपादकशब्दत्वेन स्तुतित्वं वाच्यम्। न लिपिरचनया नमःशब्दादिरूपनमस्कारज्ञानत्वेन स्तुतिपदज्ञानेन च शिष्यशिक्षापि संभवत्येवेत्य-न्यार्थस्यान्यार्थत्वमेवाङ्गीकृत्य शिष्यशिक्षाप्यानुषङ्गिकी सिद्धचत्येव। तस्मात् मङ्गलमात्रवाचकत्वाभावेऽपि वाचनिकमङ्गलाचारत्वं युक्तम्। तदभिप्रायेणैवाचरन्तीति टीकाद्युक्तिः। तत्त्वसंख्यानमिथ्यात्वखण्डनयोः किमपि मङ्गलाचरणं कस्मान्नानुष्ठितं इत्याद्युक्तिश्च। निवेशनमेव मङ्गलानुष्ठानं न भवति। कायकादीनां अनेकेषां मङ्गलाचरणानां

सत्त्वात् इति ग्रन्थपर्यालोचने निवेशनमपि मङ्गलानुष्ठानमिति प्रतीतेश्च । अत एवोत्तरपथावतारावसरे मूले मङ्गलाचरणस्यावश्यकत्वात् तदाचरणपुरःसरमिति प्रतिपादयित्वापि शिष्यशिक्षायै च एतद्ग्रन्थे निवेशनमित्युक्तम् । मङ्गलवादे तु मङ्गल एव मङ्गलाचरणशब्दप्रयोगो अनेकधा करिष्यते मूलादौ । तत्त्वप्रकाशिकायामपि मङ्गलाचरणस्य आवश्यकत्वादिति । तदेवं सङ्गरेण प्रयोगानुसारेणोक्तपक्षत्रयान्यतमपक्षस्य यत्र स्वरसतोऽवगमः तत्र तत्पक्षाश्रयणेन उपपत्तिर्विधेया । अत एव च प्रमाणलक्षणप्रकरणटीकासु आद्यन्तयोरादिमात्रेऽन्तमात्रे वा यथाक्रमं इष्टदेवतानतिपूर्वकमिति स्वेष्टदेवतां प्रणमतीति प्रणतिनुतिपुरःसरं इति स्तुतिप्रणामाभ्यां प्रीणयतीति परममङ्गलं नरसिंहस्तवनरूपं आदावाचरतीति नारायणस्तवनं ततीतिप्रार्थनारूपं आदितो मङ्गलमाचरतीति परमेश्वरप्रणामस्तवने विधत्त इति तादृशमेव स्तुवन् प्रकरणान्तेऽपि नमस्करोतीति अन्तेऽपि मङ्गलाचरणस्यावश्यं कर्तव्यत्वात् नारायणस्तुतिप्रणामौ करोतीति देवताप्रणामं आचरतीति भगवत्प्रणाममाचरतीति उक्तयः । गुरूनपि नमतीति देवतात्वेन गुरुत्वेन चान्तेऽपि नमतीति तत्त्वप्रकाशिकायां आद्यन्तयोः पौनःपुन्येन प्रणमतीति संबोध्य स्तौतीति चैतं मूलान्ते वासुदेवं नमतीति गीतातात्पर्यटीकायां प्रणामस्तवने कुर्वन् इति ऋग्भाष्यटीकायां चेत्येवमाचारत्वाभिप्रायेण प्रयोगाः । अन्यत्रापि च तथा प्रयोगा सर्वेऽप्युपपन्ना इत्यलम् । यत्तु अन्यथाख्यातौ कृतमिति शेष इति प्रतिपादनादिकं तदुक्तरीत्योपनिबन्धोक्तिगतिपरिज्ञानाभावमूलमिति स्पष्टम् । शिष्यशिक्षायाः आनुषङ्गिकप्रयोजननया शिष्यान् ग्राहयितुं निबन्धरूपं मङ्गलमाचरतीत्येवार्थोपपत्त्या शेषपूरणस्यानावश्यकत्वात् । तत्त्वनिर्णयटीकासंबन्धव्याख्यानदूषणावसरेऽधिकं चास्तीति तदत्र ज्ञेयम् । स्थितप्रज्ञस्य का भाषेति इत्येतत् गीताभाष्यटीकायां न च प्रश्नाकरणे तदुपनिबन्धनं संभवतीत्युक्तं तु नात्र साधकम् । प्रकृते निबन्धस्यैव मङ्गलाचारत्वात् इति ज्ञेयम् ॥

स०ङ्ग०— नारायणमिति मङ्गलाचरणस्याभिमतदेवतास्तुतिप्रणतिलक्षणस्य कर्तव्यतामकर्तव्यताशङ्कानिराकरणेनोपपादयति भगवतेत्वादिना निबध्नातीत्यन्तेन ग्रन्थेन । अकरणीयत्वशङ्कानिरासश्च श्लोकव्याख्यानप्रकारेण अवसेयः । नारायणप्रणामादिकम् अवश्यकरणीयं अवश्यकरणत्वेन विशिष्टं नारायणप्रणामादिकं अवश्यं करणीयमिति शिष्यान् ग्राहयितुमित्यर्थः । नन्वस्तु निबन्धः शिष्यान् ग्राहयितुम् । स किं ग्रन्थारम्भसमये कृतस्य नारायणप्रणामस्याकृतस्य वा । न तावद् द्वितीयः अकृतनिवेशने प्रतारकत्वप्रसङ्गात् । नापि कृतस्येति युज्यते, तस्य विलीनप्रकृतितया स्वत एवान्तरायविधुरत्वेन तत्करणप्रयोजनाभावात् । न च परमार्थिकत्वभावत्वादारम्भसमये तत्करणमिति वाच्यम्, तेनानवरतमीश्वरश्रवणकायकरणवृत्तित्वस्यैव लाभेनारम्भसमये विशेषेण तत्करणे निमित्तालाभादित्यत उक्तम् विलीनप्रकृतितेत्यादि वृत्तिरपीत्यन्तम् । आरम्भसमये कृतस्यैव नारायणप्रणामस्य निबन्ध इत्याद्यपक्ष एवाभिमतः । न च तदा विशेषेण तत्करणे प्रयोजनाभावः, सन्निहितशिष्यशिक्षाया एव प्रयोजनत्वसंभवात् । तथाचान्तरायविधुरोऽप्यनवरतमीश्वरश्रवणकायकरणवृत्तिरपि सन्निहितशिष्यान् ग्राहयितुं कृतं नारायणप्रणामं असन्निहितशिष्यानपि ग्राहयितुं निबध्नातीति योजना द्रष्टव्या ।

कुण्ड०— ननु अनवरतमनुष्ठीयमाननारायणस्तवननमनादिरूपमङ्गलस्य तन्निवर्त्यविघ्नादिविधुरस्य भगवतो भाष्यकारस्य विशिष्य मङ्गलाचरणे कथं प्रसक्तिः । तस्य ग्रन्थादौ निवेशने च किं प्रयोजनमित्यत आह

भगवतेति । असाधुनिबन्धेति । ब्रह्मसूत्रादिविरुद्धनिबन्धेत्यर्थः । प्रपञ्चयिष्यते चैतदितरभाष्याणामसाधुनिबन्धत्वं तत्र तत्र । एतेनासाधुनिबन्धत्वं निर्वक्तुमशक्यमिति केनचिदुक्तं निरस्तम् **यथाचार्याभिप्रायमिति** । अनेन भाष्यकारान्तरैः सूत्रकारानभिमतस्य स्वोत्प्रेक्षितार्थस्यैव सूत्रार्थतया स्वस्वभाष्येषु प्रतिपादितत्वेन तेषां सूत्रार्थोपयोगित्वाभावेन यथा सूत्रकाराभिप्रायं प्रवृत्तस्य श्रीमध्वमुनिप्रणीतभाष्यस्यैव सूत्रोपयोगितया अवश्यमुपादेयत्वेन अतिगहनगम्भीरार्थस्य स्पष्टीकरणायानुभाष्यकरणस्याप्यौचित्येन तदादौ शिष्टाग्रगण्यस्य भगवतो भाष्यकारस्य विलीनप्रकृतितया निरन्तरायस्यापि शिष्टाचारपरिपालनाय मङ्गलाचरणं विशिष्य प्रसक्तमेवेति सूचितं भवति । शिष्यान् ग्राहयितुं इत्यनेन मङ्गलस्य ग्रन्थतो ग्रथने प्रयोजनमुक्तं भवति ।

वि०— बादरायणस्य नारायणत्वज्ञापनाय समस्तागमनिर्णायकसूत्रप्रणयनसमर्थनाय चोक्तं **भगवतेति**। असाधुभिः सङ्करादिभिः निबध्यते इत्यसाधुनिबन्धनं दुर्भाष्यम् । असाधु च तत् निबन्धनं चेति वा । **आचार्यः** सूत्रप्रणेता । **विलीनप्रकृतितयेति** । अनादितोऽपि दग्धपटन्यायेनाविद्यमानप्रकृतितयेत्यर्थः । भगवत्प्रणामस्येश्वरप्रीतिमन्तरेण उद्दिष्टप्रयोजनतां प्रकारान्तरेण वारयितुमुक्तम् **अनवरतमिति** ।

ल०र०— ननु नारायणं निखिलपूर्णगुणैकदेहमित्यादिकं ग्रन्थं व्याख्यातुमयं देवतादिप्रणामः । न चायं व्याख्यातव्यः । अर्थविवक्षापूर्वकस्यैव पौरुषेयवाक्यस्य व्याख्यातव्यत्वात् । न हि मातृकामात्रव्याख्याने प्रेक्षावान् प्रवर्तते । न चास्यार्थविवक्षापूर्वकत्वे प्रमाणमस्ति । प्रणयनमात्रस्य व्यभिचारित्वात् । प्रेक्षावत्प्रणयनस्य चानिश्चयात् । निश्चये वा विषहरमन्त्रस्येव जपादिनाभ्युदयसिद्धये निर्माणोपपत्तेः । गृहीतसङ्केतेरर्थप्रतिभासो विषहरमन्त्रेऽपि समानः । न चार्थविवक्षापूर्वकत्वमात्रेण उपादेयतया व्याख्यानं युक्तम् । विप्रलम्भकादिवाक्यव्याख्यानप्रसङ्गात् । किं नामेष्टसाधनतावबोधकत्वे याथार्थ्ये च सति । न चास्य याथार्थ्यादौ मानमस्ति । तद्भावेऽपि तथाविधवाक्यान्तरपरित्यागेनास्यैव व्याख्याने कारणं वक्तव्यम् । किञ्च ग्रन्थ एवायं नारम्भणीयः । कुतोऽस्य व्याख्येयताचिन्ता । आरम्भणीयता च प्रेक्षावत्प्रवृत्तिविषयस्यैव । तद्विषयताऽपि विषयप्रयोजनाधिकारिसंबन्धवत्येव । न चास्य तत्संबन्धोऽस्ति । किञ्च दुर्गमार्थस्यैव व्याख्येयत्वम् । न चात्र तदस्ति । किञ्चास्य ब्रह्ममीमांसाशास्त्रस्यान्यैरेव व्याख्यातत्वान्न पुनरिदं भाष्यकृता व्याख्यातव्यम् । तथापि स्वप्रणीतभाष्येणैव कृतव्युत्पादनमिदं शास्त्रमिति किमनेन व्युत्पादनेन । यद्वाख्यानायायं देवतादिप्रणामः । तथापि भाष्यकृतो नारायणप्रणामरूपं मङ्गलाचरणमयुक्तम् । फलप्रमाणयोरभावेन मङ्गलस्यावश्यकरणीयत्वाभावात् । फलं हि समाप्त्यादिप्रतिबन्धकविघ्ननिवारणम् । न चात्र तत्संभवति । भाष्यकारस्य विलीनप्रकृतितया अन्तरायविधुरत्वात् । नापि तत्र प्रमाणम् । श्रुत्यादीनामनुपलम्भात् । तथापि पुरुषान्तरस्येव ग्रन्थारम्भकाल एव तदाचरणमयुक्तम् । भाष्यकारस्य तत एवानवरतमीश्वरश्रवणकायकरणवृत्तितया नारायणे मनआदिकरणप्रावण्यापरपर्यायप्रणामरूपमङ्गलस्य सर्वदा विद्यमानत्वात् । तथापि ईश्वरस्तुतेरपि मङ्गलत्वात्तां विहाय नमामीतिप्रणाममात्राचरणे विशेषकारणाभावः । तथापि तदुपनिबन्धनं निर्निबन्धमित्याद्यधिकारिमनोगताशङ्काः परिहर्तुं भगवांष्टीकाकारः किं व्याख्यानस्य पृथग्याथार्थ्यादिव्युत्पादनप्रयासेन यावदुत्सर्गतो व्याख्येययाथार्थ्यादिनैव व्याख्यानेऽपि तत्सिद्धयतीत्याशयेन व्याख्येये ब्रह्ममीमांसाशास्त्रे याथार्थ्यादिकं

सहेतुकमनुवदन् 'कर्मकर्त्रोत्सर्गतोभिदा। अभेदोऽपि विशेषे स्याद्बली सोऽप्यनपोदित' इति वक्ष्यमाणदिशोत्सर्गस्य अपवादाभावे बलिष्ठत्वादपवादविषयं तत्कारणविशेषं भाष्यकारीयव्याख्यानेऽपवादप्रयोजकीभूतं ततो वैलक्षण्यं च दर्शयन् भाष्यादौ साक्षादपि याथार्थ्यादिकमुपपादयन् भाष्यादिप्रयोजनं च प्रतिपादयन् मूलमवतारयति भगवतेत्यादिना।

अयमत्र परिहारप्रकारः। अत्र तावद्भगवतेत्यारभ्य ब्रह्ममीमांसाशास्त्रमित्यन्तेन व्याख्येयं वक्ष्यमाणयाथार्थ्या-नुवादः। तत्र शास्त्रपदेन शिष्यते यथास्थितं प्रतिपाद्यते तत्त्वमनेनेति शास्त्रमिति व्युत्पत्त्या याथार्थ्यरूपसाध्यानु-वादः। शास्त्रं चाप्रमाणं चेत्यस्य विप्रतिषिद्धत्वात्। युक्तिमूलत्वश्रुतिमूलत्वाप्तवाक्यत्वरूपास्त्रयस्तावद्धेतवः। तत्र युक्तिमूलत्वाख्यहेत्वनुवादो मीमांसेति युक्त्यनुसन्धानरूपत्वान्मीमांसायाः। श्रुतिमूलत्वरूपहेत्वनुवादो ब्रह्मेति। ब्रह्म वेदस्तदर्थः परंब्रह्म वा। तस्य मीमांसा ब्रह्ममीमांसा। सकलवेदार्थभूतस्य परब्रह्मणो विष्णोः स्वरूपनिर्णयार्था मीमांसेति यावत्। आप्तवाक्यत्वरूपहेत्वनुवादो बादरायणेन प्रणीतमपि। आप्तवाक्यतायां हेतुरनुकूलवक्त्रादिमत्त्वम्। तत्र विवक्षितार्थतत्त्वज्ञानं करणपाटवं विवक्षा चेति त्रयं वक्तुरनुकूल्यं नाम। तत्त्वज्ञानयोग्यता वक्तुः प्रीतिविषयता चेति द्वयं श्रोतुः। श्रोतृप्रयोजनोद्देशः प्रसङ्गस्य। तत्र विवक्षितार्थतत्त्वज्ञानानुवादो भगवतेति। 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणे'ति वचनात्समग्रज्ञानविज्ञानयोर्भगशब्दार्थत्वात्। करणपाटवस्यापि अनुवादो भगवतेति। शरीरेन्द्रियादिपाटवरूपसमग्रवीर्यस्यापि तदर्थत्वात्। विवक्षाया अप्यनुवादो बादरायणेन प्रणीतमिति। एतेन ब्रह्ममीमांसाशास्त्रस्यार्थविवक्षापूर्वकत्वमप्युक्तं भवति। प्रणयनात्। न च प्रणयन-मात्रस्य व्यभिचारित्वादित्युक्तमिति वाच्यम्। प्रेक्षावत्प्रणयनस्याभिप्रेतत्वादित्याशयेनोक्तं भगवता प्रेक्षावता बादरायणेन प्रणीतमिति। ब्रह्ममीमांसाशास्त्रं बादरायणप्रणीतत्वस्य बादरायणे प्रेक्षावत्त्वस्य च बहुमानसिद्धत्वात्किं तन्निश्चायकमत्र वक्तव्यम्। उत्तरत्र तु तदपि स्फुटीभविष्यतीति भावः। श्रोत्रानुकूल्यानुवादः प्राणिनामिति। निःश्रेयस-पदसमभिव्याहृतस्यात्र प्राणिपदस्यावश्यं मुक्तियोग्यजीवपरतया मुक्तियोग्यजीवानां च तत्त्वज्ञानस्वरूपतया अनादितो भगवत्प्रीतिपात्रतायाश्च वक्ष्यमाणबहुमानसिद्धत्वात्। प्रसङ्गानुकूल्यानुवादो निःश्रेयसायेति। एतेन यदुक्तं निश्चयं वा विषहरमन्त्रस्येव जपादिनाऽभ्युदयसिद्धये निर्माणोपपत्तेरिति तदपि निरस्तम्। अभ्युदयाद्यवान्तरप्रयोजनस्य जपादिमात्रेण सिद्धावपि निःश्रेयसाख्यमुख्यप्रयोजनस्यार्थविवक्षापूर्वकत्वं विना तावन्मात्रेणासिद्धेः। मोक्षो हि भगवत्प्रसादैकसाध्यः। 'यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेणे'ति श्रुतेः। प्रसादश्च गुणोत्कर्षज्ञानसाध्यः। 'न तादृशी प्रीतिरीड्यस्य विष्णोर्गुणोत्कर्षज्ञानरि यादृशी स्यादि'ति श्रुतेः। गुणोत्कर्षज्ञानं च ब्रह्ममीमांसाशास्त्रस्य गुणोत्कर्षविवक्षापूर्वकत्वं विहाय केवलजपादिना कथं सिध्यति, कथन्तरां भगवत्प्रसादः कथन्तमां मोक्ष इति। एतैरेव हेतुभिरस्य शास्त्रस्य मोक्षादीष्टसाधनावबोधकत्वं च सिद्धम्। एतेनैवास्य शास्त्रस्य विषयादिसंबन्धो दर्शितो भवति। तत्र ब्रह्ममीमांसेति ब्रह्मपदेन परब्रह्मरूपविषयस्य प्राणिनां निःश्रेयसायेति निःश्रेयसपदेन मोक्षाख्यप्रयोजनस्य प्राणिपदेन मोक्षयोग्यरूपाधिकारिणां च संबन्धप्रदर्शनादिति ज्ञेयम्। तथा चास्य प्रेक्षावत्प्रवृत्तिविषयत्वादारम्भणीयताऽपि समर्थिता भवति। एवं सूत्रव्याख्याने भाष्यसहितानुव्याख्याने व्याप्त्यैव व्याख्येयप्रयोजकयाथार्थ्यादिसिद्धयर्थं व्याख्येयब्रह्ममीमांसाशास्त्रेऽनुपदवक्ष्यमाणमपि याथार्थ्यादिकमादावेवानूद्य

यया व्याख्या तत्सिद्धिस्तस्याः सापवादत्वादपवादविषयं तत्कारणविशेषं भाष्यकारीयव्याख्यानेऽपवादाभाव-प्रयोजकीभूतं ततो वैलक्षण्यं च दर्शयति **असाध्वित्यारभ्य करिष्यन्नित्यन्तेन**। तत्रासाधुनिबन्धेत्यनेनासाधूना-मसुरप्रकृतीनां भारतीविजयादीनां संबन्धिनो ये निबन्धाः सूत्रव्याख्यानरूपा एकविंशतिभाष्यग्रन्था इत्यपवादविषयाः असाधवरसूत्राचार्याभिप्रेतार्थविरुद्धार्थप्रतिपादका ये निबन्धा इति विपरीतार्थप्रतिपादकत्वरूपस्तत्कारणविशेषश्च प्रदर्शितो भवति। निबन्धानामन्धतमसत्वेन ब्रह्ममीमांसाशास्त्रप्रतिबन्धकत्वेन च वर्णनमपि तमेव कारणविशेषं द्रढयति। एतेन किञ्चास्य ब्रह्ममीमांसाशास्त्रस्यान्यैरेव व्याख्यातत्वान्न पुनरिदं भाष्यकृता व्याख्यातव्यमित्येतदपि निरस्तम्। व्याख्यातृणामन्येषामसुरत्वेन मिथ्याज्ञानित्वात्तद्व्याख्यानस्य विपरीतार्थप्रतिपादकत्वाच्चेति। यथा-चार्याभिप्रायमस्य भाष्यं विधायानुभाष्यमपि करिष्यन्नित्यनेन भाष्यकारीयव्याख्याने सूत्राचार्याभिप्रेतार्थप्रति-पादकत्वरूपं ततो वैलक्षण्यं दर्शितम्। तत्संभावनायोक्तं **भगवानानन्दतीर्थमुनिरिति**। नन्वानन्दतीर्थमुनिरपि भाष्यानुभाष्ये चकारेत्यत उक्तं प्रणीतमपि ब्रह्ममीमांसाशास्त्रं आचार्याभिप्रेतार्थज्ञानाजनकत्वादप्रणीतमिव मन्यमान इति। अभिप्रेतार्थज्ञानाजनकत्वे हेतुरसाधुनिबन्धान्धतमसेनावकुण्ठितत्वेन प्रतिबद्धत्वेनेति। किञ्च यदा चैवमपवादाभावे व्याख्येययाथार्थ्यादिनैव सिद्धचत्प्रामाण्यादिकं भाष्यानुभाष्ययोरुपादेयतया व्याख्येयत्वरूपेष्ट-सिद्धचैव भवति। तदा सुतरां साक्षात्त्वस्मिन्नेव सिद्धचत्प्रामाण्यादिकमित्याशयेन तयोः साक्षादपि प्रामाण्यादि दर्शयति **प्राणिनामित्यादिना करिष्यन्नित्यन्तेन**। तत्र भाष्यानुभाष्ययोस्तेनैव पदेन भाष्यते यथास्थितं वर्ण्यते सूत्रार्थजातमनेनेति व्युत्पत्त्या यथावस्थितार्थप्रतिपादकत्वरूपं प्रामाण्यं दर्शितं भवति। आनन्दतीर्थः भाष्यं विधाय अनुभाष्यमपि करिष्यन्नित्यनेन तद्धेतुरासवाक्यत्वम्। आप्तवाक्यतायां हेतुषु त्रिषु भगवान्मुनिरित्याभ्यां शास्त्रकर्तृत्वार्थकेनानन्दतीर्थपदेन च वक्तानुकूल्यम्। प्राणिनामित्यनेन श्रोत्रानुकूल्यम्। असाधुनिबन्धान्ध-तमसावकुण्ठितत्वेनाप्रणीतमिव मन्यमानो यथाचार्याभिप्रायमित्यनेन प्रतिबन्धनिरासपूर्वकं सम्यग्ज्ञाननन-लक्षणप्रयोजनोद्देशरूपं प्रसङ्गानुकूल्यम्। अस्य ब्रह्ममीमांसाशास्त्रस्य वेदार्थनिर्णायकन्यायनिबन्धनात्मकशास्त्रस्येति यावत्। भाष्यं विधायानुभाष्यमपि करिष्यन्नित्यनेन भाष्यानुभाष्ययोरपि श्रुतिमूलत्वं युक्तिमूलत्वं च। पूर्ववदेतैरेव हेतुभिरिष्टसाधनावबोधकत्वं च। अनेन चास्य याथार्थ्ये मानमस्तीत्याशङ्कायाः परिहारः। भगवानानन्दतीर्थमुनिः भाष्यं विधायानुभाष्यमपि करिष्यन्नित्यनेन प्रेक्षावत्प्रणीतत्वं तत एवार्थविवक्षापूर्वकत्वं च भाष्यादौ प्रेक्षावत्प्रणी-तत्वं सुप्रसिद्धमिति नानिश्चयशङ्कावकाशः। निःश्रेयसायेत्यनेनाभ्युदयमात्रसिद्धचर्थमप्रणीतत्वं चेत्येवं व्याख्येय-गतं सर्वमपि यथायथं दर्शितं भवति। एतेन तद्भावेऽपि तथाविधवाक्यान्तरपरित्यागेनास्यैव व्याख्याने कारणं वक्तव्यमित्येतदपि निरस्तं भवति। व्याख्येयब्रह्ममीमांसाशास्त्रवदनयोरपि आप्तवाक्यत्वादिहेतुत्रयावसितानुत्तम-प्रामाण्याख्यकारणसद्भावात्। अत्र प्रस्तुतत्वादनुभाष्यमात्रे प्रामाण्यादिव्युत्पादनस्य सङ्गतत्त्वेऽपि प्रसङ्गात् समानन्यायेन भाष्येऽपि तदुपपादयितुमुभयोर्ग्रहणम्। तथापि स्वप्रणीतभाष्येणैव कृतव्युत्पादनमिदं शास्त्रमिति किमनेन व्युत्पादनेनेत्याशङ्कापरिहारायोक्तं भगवानानन्दतीर्थमुनिर्भाष्यं विधायानुभाष्यमपि करिष्यन्निति। प्रेक्षाव-त्प्रणीतत्वात्तत्प्रयोजनमेवेदम्। न हि प्रेक्षावान्निष्प्रयोजने प्रवर्तते। तद्विशेषावधारणं तु अन्यपि चाहमेवेत्यत्र भविष्यतीति भावः। एतेनास्य दुर्गमार्थत्वं चोक्तं भवति। 'ग्रन्थोऽयमपि बह्वर्थो भाष्यं चात्यर्थविस्तरमि'ति

वक्ष्यमाणमूलस्मारकेण भाष्यं विधायेति भाष्यपदेन वक्तृत्वस्य सूचनादिति । अस्य ब्रह्ममीमांसाशास्त्रस्य भाष्यं विधायानुभाष्यमपि करिष्यन्नित्यनेनेष्टानिष्टप्राप्तिपरिहारसाधनवेदनहेतुवेदनिर्णायकभाष्यादित्वेनापीष्टसाधनावबोधकत्वं सिद्धयति । तदेवं प्रदर्शितदिशा यथायथं व्याख्येयत्वप्रयोजकसर्वधर्मोपेतत्वान्निरङ्केऽनुव्याख्यानस्य व्याख्येयत्वे यदुक्तं तथापि भाष्यकृता नारायणप्रणामरूपं मङ्गलाचरणमयुक्तमित्यादिना नारायणप्रणामादिवैयर्थ्यं तत्परिहारायोक्तं विलीनप्रकृतितयेत्यादि । तत्र विलीनप्रकृतितया अन्तरायविधुरोऽप्यनवगतमीश्वरप्रणवकायकरणवृत्तिरपीत्यनेन शङ्कितुः शिष्यस्य प्रतिवादिनो वा मतं स्वमतत्वादङ्गीकरोति । न हि प्रतिवाद्यपि सर्वथाप्रेक्षावान् । अत्र नारायणप्रणामादिकं शिष्यान्ग्राहयितुं ग्रन्थादौ निबध्नातीत्यन्वयः । आदिपदेन स्मृतिर्ग्राह्या । अनेनेश्वरस्तुतेरपि मङ्गलत्वात्तां विहाय नमामीति प्रणाममात्राचरणे विशेषकारणाभाव इत्याशङ्कायाः परिहारः । शिष्यानसन्निहितान्सन्निहितांश्च ग्राहयितुं ज्ञापयितुं निबध्नाति प्रणामादिबोधकपदात्यक्वर्णसमुदायोच्चारणरूपनिबन्धनं करोतीत्यर्थः । किं विशिष्टं ग्राहयितुमित्यत उक्तम् अवश्यं करणीयमिति । अवश्यकरणीयत्वविशिष्टमित्यर्थः । केन मानेनावश्यकरणीयमवगतमित्यत उक्तम् अविगीतशिष्टाचारपरम्परयाऽवगतमिति । अविगीतः संप्रतिपन्नो यः शिष्टानां प्रेक्षावतां व्यासादीनामाचारो नारायणप्रणामादिविषयस्तस्य या परम्परा तदाचारान्मन्वादिशिष्टाचारस्तदाचारात्तदन्यशिष्टाचार इत्येवंरूपा तयाऽवगतमवश्यं करणीयं प्रमितमित्यर्थः । किं फलसाधनत्वेनावगतमित्यत उक्तं प्रारिप्सितस्यानुत्तरायपरिसमाप्तेः प्रचयस्य च हेतुतयेति । अयं भावः । निबन्धनेन तावद्ग्रन्थकारेण प्रणामादिकं कृतमिति अनुमीयते । अन्यथा परमाप्तस्य प्रतारकत्वप्रसङ्गात् । ततोऽस्माभिरपि तत्करणीयमिति शिष्यैः प्रणामादिकं करणीयं ज्ञायते । 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इत्युक्तेः । नन्वग्रन्थनिबन्धनेन प्रणामस्य गुरुकृतत्वानुमानद्वारा स्वकरणीयत्वज्ञानमसन्निहितानामेव शिष्याणाम् । न तु सन्निहितानाम् । तेषां प्रत्यक्षत एव दर्शनेन साक्षादेव तज्ज्ञानसंभवात् । अतः कथमुभयविधानमपि शिष्यान्प्रति निबन्धनेन करणीयत्वज्ञापनमिति चेन्न । तेनावश्यकरणीयत्वज्ञापनस्याभिप्रेतत्वात् । तथाहि । न वयं तेन प्रणामादिकस्य करणीयतामात्रं ज्ञापयितुमुद्यताः । येनैवं परिचोदना स्यात् । किं नामावश्यकरणीयताम् । न हि प्रत्यक्षदर्शिनोऽपि सा ज्ञातुं शक्यते । तत्र यादृच्छिकत्वस्यापि शङ्कनात् । निबन्धनकरणे तु सा ज्ञातुं शक्यत एव । अनावश्यकत्वस्य तदयोगात्कृतिवन्निबन्धनस्यापि प्रमाणान्तरत्वाच्च । प्रमाणसंग्रहस्यावश्यकत्वज्ञापक इति सुप्रसिद्धमेवेति । तथाच सन्निहितानामावश्यकत्वस्यासन्निहितानां चावश्यकत्वकरणीयत्वयोरुभयोरपीति विशिष्टस्योभयविधानस्यापि निबन्धनेन ज्ञापितत्वात् काऽत्र कथन्तेति । अत एवावश्यमिति शिष्यानिति सामान्यपदं च प्रयुक्तमिति ज्ञेयम् । ननु फलप्रमाणयोरभावेन प्रणामादिकस्यैवाकरणीयत्वात्कुतोऽवश्यकता ज्ञाप्यते । निबन्धनेनापीति चेन्नैवम् । उभयोरपि भावात् । तथाहि । फलाभावस्तावत् किं सर्वेषां किं वा आनन्दतीर्थमुनेरेव । नाद्यः । शिष्याणामविलीनप्रकृतितया सान्तरायत्वेन प्रारिप्सितानन्तरायपरिसमाप्त्यादेः फलस्य भावात् । न द्वितीयः । तस्य विलीनप्रकृतितयान्तरायविधुरत्वेनान्तरायपरिसमाप्त्यादिफलाभावेऽपि शिष्यज्ञापनफलस्योक्तत्वात् । शिष्यार्थमपि कर्तव्यत्वाच्च । यतो मङ्गलाचरणपुरःसराणि शास्त्राणि वीर्यवन्ति भवन्त्यायुष्मत्पुरुषकाणि चेति वक्ष्यमाणत्वात् । नापि प्रमाणाभावः । शिष्टाचारस्य तदनुमितश्रुतेर्वा प्रमाणस्य भावात् । श्रुत्यनुमानप्रकारं

अविगीतपदप्रयोजनं च 'तत्र तारे'त्येतद्व्याख्यावसरे स्वयमेव स्पष्टीकरिष्यति। न च लीलयापि कस्यचिच्चिष्टाचारसंभवात्स कथं तत्र प्रमाणमिति वाच्यम्। शिष्टाचारपरम्पराया: प्रमाणत्वात्। न ह्यनेकेषां प्रेक्षावतां लीलयैकविधा प्रवृत्तिरुपलब्धेति। एतेन प्रणामादेर्वस्तुतोऽवश्यकरणीयत्वसद्भावेऽस्तु निबन्धनेन तज्ज्ञापनम्। न च तदस्ति। प्रमाणाभावात्। न ह्यप्रामाणिकं शिष्यान्प्रति ज्ञापयितुं भवतीत्येतदपि समाहितं भवति। अकरणीये शिष्टाचारायोगात्। अनावश्यके तत्परम्परायोगाच्चेति। ननु तथापि निबन्धनेन ग्रन्थादौ भाष्यकृता प्रणामादिकं कृतमिति नानुमातुं शक्यते। तस्यानवरतमीश्वरप्रवणकायकरणवृत्तित्वेन तदानीमेव तत्कृत्यनुपपत्त्या बाधादिति चेन्न। सर्वदा विद्यमानस्याप्युक्तदिशा शिष्यज्ञापनाय तदानीं प्रकटितत्वात्। यत्पूर्वं नास्ति तस्योत्पादनमेव कृतिर्यदस्ति तस्य प्रकटनमेव सेति न बाधः। अत एव नमामीति मूलानुसारान्नमनादिकमिति वक्तव्ये प्राकट्यद्योतनाय प्रणामादिकमिति प्रशब्द इति। अधिकं तु गुर्व्यां रसरङ्गिण्यां द्रष्टव्यम्।

चषक:— अथ प्रकृतशास्त्रव्याचिख्यासैव भाष्यकृतो नोपपद्यते; व्याख्येयाभिमतस्य अप्रामाण्यनिर्विषयत्वानतिगूढार्थप्रतिपादकत्वरूपव्याख्यानकर्मतानिबन्धनव्यतिरेकित्वात्, तदुपगमेऽपि वृत्तिकारान्तरप्रणीतवृत्त्यन्तरैरेवैतदर्थाधिगतेः, स्वप्रणीतैकतरवृत्त्यैव निर्वाहे वृत्त्यन्तरानर्थक्यस्य दुष्परिहरत्वात्, प्रतियोगिनमन्तरेण ध्वंसोत्पत्तेरयोगेन विलीनेतिविशेषणद्वयविशेषिततयोररीकृतभाष्यकृतः साधनाभावनियन्त्रितान्तरायांकुरोत्पादायोगनिबन्धनतद्ध्वंसोद्देश्यकतदारम्भकालावच्छिन्नमङ्गलकृतेरतिदुस्थत्वाच्च। प्रज्ञाचक्षुष्कपारम्पर्यरूपतायाः सूपगमत्वात्तदाचारपारम्पर्यस्य तस्यैवाकर्तव्यत्वफलराहित्यायत्ततदुपनिबन्धचिकीर्षायोगेन दुःशकं प्रथमपद्योत्थानमित्यतस्तदवतारयति भगवतेत्यादिना। प्रणीतमित्यन्तेनाप्तिनियन्त्रितप्रामाण्यस्य, तद्विशेष्यवाचकपदेन विषयस्य, निबन्धपदोपादानेन अतिदुर्घटार्थत्वस्य च ध्वनिततया आद्यशङ्कायाः; असाधुपदस्य यथेत्याद्यव्ययीभावस्य चोपादानेन द्वितीयस्याः, अपिना प्रयोजनसद्भावद्योतनेन तृतीयस्याः, तुमनन्तेन चतुर्थ्याः षष्ठ्याश्च, शिष्टेत्यनेन पञ्चम्याश्च, समाहितत्वेनाद्यपद्यं सङ्गच्छत इति ध्येयम्।

काशी०— ननु शास्त्रमेवेदमनुपादेयमनवधृतप्रामाण्यकत्वात्। उपादेयत्वे वा भाष्यान्तरैरेव तदर्थावगमान्न पुनर्व्याख्येयम्। तथात्वे वा भाष्येणैवालम्, कृतमनुभाष्येण। अस्तु वा तदपि। तदादौ विशिष्टमङ्गलाचरणं व्यर्थम्। तस्य विघ्नविघातादिहेतुत्वे मानाभावात्। तद्भावेऽपि भाष्यकर्तुरविघ्नत्वात्। फलान्तरस्य च भगवति नित्यप्रावण्येनैवोपपत्तेः। तन्निबन्धनं तु नितरामनर्थकमित्याशङ्क्याह: परिहरन्नाद्यपद्यमवतारयति भगवतेत्यादि। अत्र प्रणीतमित्यन्तेनाप्तिमूलत्वं ब्रह्ममीमांसापदेन श्रुतियुक्तिमूलत्वं (अत्र तन्त्रेण ब्रह्मणो विष्णोः संबन्धि यद्ब्रह्म वेदजातं तस्य मीमांसान्यायनिबन्धनात्मकवाक्यानीत्यर्थादुक्तलाभः) च सूचयता शास्त्रस्य प्रामाण्यमुपपादितम्। असाध्वित्यादिना निबन्धान्तराणामन्यथाव्याख्यानत्वरूपासाधुत्वोक्त्या भाष्यस्यान्धतमसेत्यादिना च तन्निरासेन भाष्यार्थस्य स्पष्टताहेतोरनुव्याख्यानस्य च सार्थक्यमुक्तं भवति। प्रणामादिकमित्यादिना स्तुतिपरिग्रहः। परम्परादिनेत्यादिपदेन शिष्टाचारानुमितश्रुत्यादिसङ्ग्रहः। अनेन मङ्गलस्य विघ्नविघातादिहेतुत्वे प्रमाणमुक्तम्। अवश्यकरणीयं ग्राहयितुं अवश्यकरणीयत्वेन बोधयितुं ग्रन्थादौ विशेषतः कृतेति शेषः। तथाच शिष्यशिक्षार्थं निबन्धनं निबन्धनार्थं च करणं अकृतस्य प्रामाणिकैरनिबन्धनादित्युक्तशङ्कापरिहार इति भावः।

गूढ०— तर्हि व्याख्यातृत्वोपयोगिसमग्रगुणाभावेऽपि किञ्चित्प्रवेशसत्त्वमात्रेण व्याख्यानकरणमयुक्तम् । अनुभाष्यकरणस्य प्रयोजनाभावात् । न च सूत्रार्थज्ञानमेव प्रयोजनमिति वाच्यम् । तेनापि प्रयोजनाभावात् । न च तत्त्वज्ञानद्वारा मोक्षः प्रयोजनमिति वाच्यम् । तस्य वेदादिनैव संभवात् । न च वेदार्थज्ञानार्थमेव सूत्राणां प्रणीतत्वेन तज्ज्ञानार्थं भाष्यानुभाष्यकरणस्यायुक्तत्वात् । न च वेदार्थस्यातिदुर्ज्ञेयत्वेन सूत्रैर्विना तज्ज्ञानासंभवेन सूत्राणां च यथावदर्थपरतया ज्ञातानामेव यथावद्वेदार्थज्ञानहेतुत्वात्, यथावत्सूत्रार्थज्ञानाभावे यथावद्वेदार्थज्ञानाभावेन तत्त्वज्ञानासंभवेन मोक्षाभावप्राप्तेर्यथावत् सूत्रार्थज्ञानार्थं भाष्यानुभाष्यकरणं युक्तमिति वाच्यम् । तथापि सङ्कर्षादिप्रणीतभाष्यादेरेव सूत्रार्थज्ञानसंभवेन तेन च वेदार्थज्ञानस्यापि संभवेन तत्त्वज्ञानद्वारा मोक्षस्यापि संभवान्न भाष्यानुभाष्यकरणं युक्तमित्याशङ्क्यायाह **भगवतेत्यादि** । अत्र आनन्दतीर्थमुनिरस्य भाष्यं विधायानुभाष्यमपि करिष्यन् नारायणप्रणामादिकं निबध्नातीति संबन्धः । जैमिन्यादिसूत्राणि परित्यज्यास्यैव व्याख्याने को हेतुरित्यत उक्तं **भगवतेति** । अपिः हेत्वर्थे । यतो भगवता बादरायणेन प्रणीतमत एवेत्यर्थः । ब्रह्मसूत्राणामुन्मत्तप्रणीततुल्यतानिवारणाय भगवतेत्युक्तम् । तथापि विप्रलम्भेनोक्तमिति किं न स्यादित्यत उक्तं **प्राणिनां निःश्रेयसायेति** । तथाच न विप्रलम्भमूलत्वमिति भावः । **असाध्वित्यनेन** सङ्कर्षादिप्रणीतभाष्यादेरन्तत्त्वज्ञानानुपयुक्तत्वं सूचितम् । अत्रासाधुपदस्यावृत्तिः । एवं च असाधूनां ये असाधवो निबन्धाः तल्लक्षणं यदन्धतमसं तेनावकुण्ठितं तस्य भावस्तत्त्वमिति विग्रहः । परकृतनिबन्धानामसाधुत्वं च समयपादे स्फुटम् । अवगमबन्धभ्यस्तमस इत्यनेनाचि समागते अन्धन्तमसमिति सिध्यति । **अत्रावकुण्ठितत्वं** नाम प्रतिबद्धत्वं तत्त्वज्ञानानुत्पादकत्वमिति यावत् । अप्रणीतमिवेतीवशब्दस्तु प्रणीतत्वव्याघातपरिहारार्थः । प्रणयनाप्रणयनयोर्व्याहतत्वात् । अप्रणीतसाम्यं तु तत्त्वज्ञानानुपयुक्तत्वमेवेति । यद्वा असाधुनिबन्धान्धतमसप्रतिबन्धेन स्वस्य तत्त्वज्ञानानुत्पादकत्वाभावेऽपि अन्येषां तदनुत्पादकत्वादप्रणीतमिवेत्युक्तम् । अन्यसूत्रव्याख्यातृवन्नायं व्याख्यातेति द्योतयितुं भगवानित्युक्तम् । अस्य भगवत्त्वेऽपि विप्रलम्भादिनैतत्कृतमिति किं न स्यादित्यत उक्तम् **यथाचार्याभिप्रायमिति** । आचार्यो वेदव्यासः तदभिप्रायमनतिक्रम्येत्यर्थः । न च भाष्येणैवालम्, अनुभाष्यकरणेन प्रयोजनाभावादिति वाच्यम् । सङ्क्षेपविस्ताराभ्यामिति न्यायादुभयकरणस्याविरुद्धत्वात् । सङ्क्षेपविस्तरकरणं च शिष्याणां सुबोधार्थमेवेति भावः । नन्वानन्दतीर्थस्य विघ्नवत्त्वे दोषवत्त्वात्तत्प्रणीतग्रन्थस्यापि दोषवत्त्वेन न तत्राश्वास इत्यत उक्तम् **अन्तरायविधुरोऽपीति** । ननु अन्तरायविधुरत्वमयुक्तम् । बीजाभावादित्यतो हेतुमाह **विलीनप्रकृतितयेति** । सर्वथा अज्ञानमिथ्याज्ञानादिरूपस्वकार्यानापादकप्रकृतिमत्तयेत्यर्थः । तथा चान्तरायविधुरत्वं संभवतीत्यर्थः । नन्वन्तरायविधुरत्वे प्रणामरूपमङ्गलकरणमयुक्तम् । प्रयोजनाभावादित्यत उक्तम् **अनवरतमित्यादि** । ईश्वरप्रवणा तदेकनिष्ठा कायकरणवृत्तिरस्य स तथोक्तः । तथा चेश्वरप्रणामकरणस्वभावत्वान्न विरोधः । तथापि ग्रन्थारम्भे मङ्गलकरणमयुक्तम् । ग्रन्थारम्भे तत्करणस्य विघ्नध्वंसार्थत्वादित्यत उक्तं **शिष्यानिति** । एवमुत्तमस्य वन्द्यः क इत्यत उक्तं **नारायणेति** । साफल्यसप्रमाणकत्वप्रदर्शनार्थं **प्रारिप्सितस्येत्यादि** । **प्रचयस्य** ग्रन्थप्रसिद्धेः ।

प्रदीपः— नारायणमिति । मङ्गलाचरणस्याभिमतदेवतास्तुतिलक्षणस्य कर्तव्यतामकर्तव्यभावशङ्कानिराकरणेनोपपादयति **भगवतेत्यादिना निबध्नातीत्यन्तेन ग्रन्थेन** ।

॥ आद्यपद्यस्थशब्दानां अन्वयः अर्थश्च सोपपत्तिकः ॥
॥ अभिमतसिद्धयङ्गतया शब्दार्थविवरणम् ॥

स्तुतिपदैः आर्थिकपुनरुक्तेः स्तुतित्वमेव समाधानं अभिप्रेत्य शब्दार्थविवरणम्—

२ अनुव्याख्यानम्—

नारायणं निखिलपूर्णगुणैकदेहं
निर्दोषमाप्यतममप्यखिलैः सुवाक्यैः ।
अस्योद्भवादिदमशेषविशेषतोऽपि
वन्द्यं सदा प्रियतमं मम सन्नमामि ॥ १ ॥

सु०— अत्र नारायणं सन्नमामीत्यन्वयः । उत्तमपुरुषप्रयोगादेव 'अहम्' इति लभ्यते । 'सम्' इति भक्त्याद्यतिशयसाहित्यलक्षणां प्रणामस्य सम्यक्तामाह । तथाविध एव हि नारायणप्रणामो भवत्यभिमतसिद्धेरङ्गम् । **निखिलेत्यादीनां** तु प्रणामकर्मणा नारायणेन विशेषणतया संबन्धः ।

परि०— द्वितीयान्तविशेषणानां विशेष्यद्वारा क्रियान्वयो, न साक्षादिति वक्तुं वाक्यव्यवहिततया अन्वयाप्रतीतेर्वा, नारायणमित्यपि विशेषणमिति भ्रमनिरासाय विशेष्यमिति सूचनाय वाऽऽह **इत्यन्वय** इति ॥ कर्त्रनुक्तेर्न्यूनतामाशङ्क्य ममेत्यस्यैव विपरिणामेन कर्तृत्वभ्रमनिरासाय वाऽऽह **उत्तमेति** । 'अस्मद्युत्तम' इति सूत्रेऽस्मच्छब्दे उपपदत्वेन श्रूयमाणेऽश्रूयमाणे वा तदर्थविवक्षायामुत्तमपुरुषो भवतीत्युक्त्या तदविनाभावादहमित्यस्येति भावः ॥

यादु०— व्यवहितत्वादन्वयं दर्शयति **अत्र नारायणमिति** । नन्वकर्तृकक्रियानुपपत्तेरगमकमेतद्वाक्यम् । न च तिङ्प्रयोगादेव कर्तृलाभः । तथाऽप्युत्तमपुरुषापेक्षितस्य कर्तृविशेषस्यालाभादित्यत आह **उत्तमपुरुषेति** । 'अस्मद्युत्तम' इत्यत्र 'समानाधिकरणे स्थानिनी'त्यस्यानुवृत्याऽप्रयुज्यमानेऽप्यस्मदि उत्तमपुरुषविधानादिति भावः ॥ ननु नारायणं सन्नमामीत्यनयोर्व्यर्थनिकपदव्यवधानात्सान्निध्याभावः । निखिलेत्यादिद्वितीयान्तानां च नमामीत्यनेनावर्तितेन साक्षादन्वये वाक्यभेदापत्तिरित्यत आह **निखिलेत्यादीनां त्विति** । तथाच साक्षात्संबन्धाभावान्न वाक्यभेदापत्तिरिति भावः ।

आनन्दः— अत एवावश्यकरणीयमिति व्यवहितत्वादन्वयमाह **अत्रेति**। नमामीत्येतावतैवालं समित्युपसर्गस्य किं प्रयोजनमित्यत आह **समितीति**। ननु नमनमात्रेणैवेष्टसिद्धेः संभवान्न सम्यक्तायाः प्रयोजनमित्यत आह **तथाविध एव हीति**। तथाच नमनमात्रस्याभिमतसिद्धावन्वयव्यतिरेकाभ्यां व्यभिचारात्सम्यक्ताविशिष्टनमनमेवाभिमतसिद्धयङ्गमिति भावः। अरुणयेत्यादि तृतीयान्तपदार्थानां प्रत्येकं क्रयशेषत्ववदत्रापि निखिलेत्यादि द्वितीयान्तपदार्थानां प्रत्येकं क्रियान्वयप्रतीतिनिवारणायाह **निखिलेत्यादीनां त्विति**। सर्वेषामपि पदानां विशेष्यपदत्वात्कथं नारायणपदेनान्वयः इत्यत उक्तम् **विशेषणतयेति**। तथा च नारायणपदमेव विशेष्यपदमन्यानि तु तद्विशेषणानीति अन्योन्यान्वयो युज्यत इति भावः।

कं०रा०— **उत्तमपुरुषप्रयोगादिति**। अस्मद्युत्तम इत्यनुशासनादिति भावः।

श्रीनिधि०— निखिलपूर्णगुणैकदेहं इत्यनेनैवार्थान् निर्दोषत्वादेरपि लाभात् पुनरुक्तिरित्यत आह **तत्रार्थिकपुनरुक्तेरिति**।

वा०चं०— नन्वत्र नमनक्रियायाः **सकर्मकत्वान्निखिलेत्यादीनामनेकेषां** कर्मकारकाणां मिलितानामेकक्रियान्वयानुपपत्त्या, प्रत्येकं क्रियान्वये च वाक्यभेदापत्त्या, **विशेषनियामकाभावेनैकस्यैव** क्रियान्वयासंभवात् सन्निधानादन्त्यस्यैव क्रियान्वये विधिष्य **नम्यस्वरूपनिर्धारणानापत्तेर्न** कर्मक्रियान्वयोऽत्र युक्त इत्यत आह **अत्रेति**। अत्र चैकस्यैव नमनकर्मकतयोपपादनेन प्रत्येकमिलितपक्षोक्तदोषद्वयस्य, रूढपदोपादानेन विशेषनियामकाभावरूपदोषस्य, विष्णौ निरूढपदोपादानेन अन्तिमदोषस्य च निवृत्तिरिति द्रष्टव्यम्।

ननु नमामीति कर्तृतिङा कर्तृमात्रलाभेऽपि तस्य परकर्तृत्वेऽप्युपपत्त्या स्वमात्रकर्तृत्वसमर्पकाहमित्यनुक्तेर्न्यूनतेत्यत आह **उत्तमेति**। अत्र यदोपपदनियमो— युष्मद्युपपदे मध्यम एव न प्रथमोत्तमौ, — अस्मद्युपपदे उत्तम एव न प्रथममध्यमौ, शेषे प्रथम एव न मध्यमोत्तमावित्येवमाकारकनियमस्य तुल्यजातीयापेक्षत्वात् — तदा युष्मदो मध्यमेन शेषस्य च प्रथमेन नियमितत्वेन तयोरुत्तमं प्रत्यप्राप्तेरुत्तमं प्रति स्वनियमितास्मद एवोपपदत्वमार्थिकमित्युत्तमप्रयोगादहमित्यस्यार्थिको लाभः। ('युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः'। तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः स्यात्। स्थानिनीत्यस्य व्याख्यानमप्रयुज्यमान इति। 'अस्मद्युत्तमः'। तथाभूतेऽस्मद्युत्तमः स्यात्। 'शेषे प्रथमः'। मध्यमोत्तमयोरविषये प्रथमः स्यात्)। उपपदनियमे युष्मदस्मदी नियते, पुरुषाः शेषश्चानियता इति प्रथम इत्येतावतैवोच्यमानेन नियमो विज्ञायते। अत्र नियम्यान्तराभावात् प्रथम एव नियम्यः। यत्र च प्रथमाप्रथमप्रसङ्गस्तत्रैव चैवंविधो नियमः कर्तव्यः। शेष एव च तत्प्रसङ्ग इति तत्रैव नियमो विज्ञायत इति शेषग्रहणं व्यर्थम्। पुरुषनियमे तु मध्यमोत्तमौ नियतौ युष्मदस्मदी अनियते शेषश्च। तत्र युष्मदस्मदोरपि प्रथमप्रसङ्गे शेष एव प्रथम इति नियमः कर्तव्यः। न चान्तरेण शेषग्रहणमेवं शक्यते कर्तुमिति कर्तव्यं शेषग्रहणमिति शेषग्रहणं कुर्वतः सूत्रकारस्याभिमतो युष्मद्येव मध्यम अस्मद्येवोत्तमः शेष एव

प्रथम इत्येवमाकारपुरुषनियमो यदा तदोत्तमपुरुषस्यास्मदर्थं विनाऽसंभवात्साक्षादेवोत्तमपुरुषप्रयोगादहमित्यस्य लाभो न तु पूर्ववदार्थिक इत्युभयथाऽप्यहमित्यस्य लाभान्न न्यूनतेत्याशयः ॥ एवकार उभयथाऽर्थलाभसंभवेऽपि लाघवमेतत्पक्षोद्बलकमिति सूचयति।

अत्र विवक्षितं समित्यस्यार्थमाह **समिति**। तद्विवक्षायां नियामकमाह **तथाविध इति**। अनेनोत्तरव्याख्याने विशिष्टेष्टाधिकृतत्वानां वन्द्यत्वप्रयोजकतयाऽभिमतानां मध्ये विशिष्टाधिकृतत्वयोः विशिष्यवन्द्यत्वप्रयोजकत्व-वदिष्टत्वस्य तदभावाद्भक्त्यादिसहकृतत्वरूपविशेषणद्वारैव तदिति यदभिप्रेतं तदपि समर्थितं भवति।

ननु तथाऽपि निखिलेत्यादिभिर्विजातीयैर्व्यवधानान्नारायणमित्यस्य नमामीत्यनेनान्वयानुपपत्तिः । नारायणस्यैव प्रणामकर्मत्वे निखिलेत्यादीनां तदभावात्तत्र द्वितीयानुपपत्तिश्च। न च निखिलेत्यादीनां प्रणामकर्मणा नारायणेन संबन्धान्न विजातीयव्यवधानं नापि द्वितीयानुपपत्तिरिति वाच्यम्, 'गुणानां च परार्थत्वादि'ति न्यायेन कारकाणां क्रियान्वितस्वार्थबोधकत्वव्युत्पत्त्या परस्परसंबन्धस्यासंभवात्तादृशसंबन्धस्याभावात् । यादृशतादृश-संबन्धस्य द्वितीयानुपपादकत्वाच्चेत्यतो विशेषणानां पृथक्कारकत्वाभावाद्विशेष्यनिघ्नत्वाच्च विशेष्यविशेषणभावा-भ्युपगमे न व्यवधानं नापि द्वितीयानुपपत्तिरित्याह **निखिलेत्यादीनां त्विति**।

वा०र०— **एकक्रियान्वयानुपपत्त्येति**। तथा क्रियान्वयादर्शनात् इति भावः। क्रियाकारकसंबन्धस्यैव वाक्यार्थत्वेऽपि प्रकृतेऽहं नमामीति संबन्धे विवादाभावात् कर्मणा संबन्धस्यैव विवादविषयत्वात् तद्विचार एव क्रियते इत्याशयेन च कर्मकारकाणां इत्यादिकमुक्तम्। न कर्मक्रियान्वयो युक्त इत्यपि। हरिं गुरुं च भजस्वेत्यादौ चशब्दबलेन प्रत्येकमेव क्रियान्वयस्य दृष्टत्वेऽपि मिलितस्य क्रियान्वयो न। तत्रापि प्रकृतेऽपि चशब्दयोजने तु प्रत्येकमिति द्वितीयपक्षप्रवेश इति भावः। तमपि पक्षं निराह **प्रत्येकमिति**। सहत्वावगमाभावे तु चशब्देन प्रत्येकमन्वयबोधः। प्रकृतेऽपि मिलितानामेव क्रियान्वययोगेनाहं च त्वं च वृत्रहन् संयुज्यावेत्यादाविवान्यसहत्वावगमाभावेन प्रत्येक-मन्वये वाच्ये वाक्यभेदप्रसङ्गः। 'संभवत्येकवाक्यत्वे वाक्यभेदो हि दूषणं' इत्युक्तेः। प्रकृते च एकवाक्यत्वस्य वक्ष्यमाणरीत्या संभवात् तस्य दूषणमेवेति भावः। **एकस्यैवेति**। तत्रापि नारायणमित्यस्यैव तदन्वये नियामका-भावमात्रम्। इतरेषां तदन्वये तु विशिष्यनम्यस्वरूपनिर्धारणापत्तिश्च दोष इत्यपि ज्ञेयम्। नियामकमाश्रित्य पक्षान्तर-शङ्कायामाह **अन्यस्यैवेति**। प्रागभिप्रेतदूषणेनैवं निराह **विशिष्येति**। **उक्तदोषद्वयस्येति**। मिलितानामेकक्रिया-न्वयादर्शनि वाक्यभेदापत्तिरूपदोषद्वयस्येत्यर्थः। **कर्तरि तिङ् इति**। क्रियाया इति शेषः। लः कर्मणि इत्यनेन कर्तरि लकारविधानात् तस्य तिङादेशात् तिङः कर्त्रर्थतया तेन कर्त्रलाभ इत्यर्थः। **तस्येति**। तिङा लब्धस्य कर्तृमात्रस्वपर-साधारण्येन परकर्तारमादायाप्युपपत्त्या नमनक्रियां प्रति स्वस्यैव यत् कर्तृत्वं तत्समर्पकत्वाभावात् अन्यच्च तत्समर्प-कस्य अभावेनाहमित्यस्यैव च तत्समर्पकतया तस्य चात्र प्रयोगात् न्यूनतेत्यर्थः। इतिशब्दस्यार्थशास्त्रे शब्दार्थकता-संपादकत्वात् अहमित्यस्येत्यस्याहमितिपदस्येत्यर्थः। मूलेऽप्यहमितीत्यस्याहंपदमित्यर्थः। यत्तु व्यवहितत्वात् अन्वयं दर्शयति **अत्रेतीति**। अत्रावतारकरणमन्यथाख्यातौ तदसत्। नारायणपदस्य नम इति क्रियान्वयसिद्धयुत्तर-

कालीनत्वात् एतच्चिन्तायाः तादृशान्वयप्रदर्शनप्रयोजकत्वासंभवात् तादृशान्वयसिद्धवत्कारणेदमिति चेत् न । कर्मकारकत्वस्य सर्वत्र विशिष्टतया नियामकाभावात् । ननु विशेषणान्तरेणान्वये नम्यस्वरूपनिर्धारणाभावः । आयातीति नारायणपदेनैवान्वयो वाच्यः इति सिद्धमिति चेत् । तथा सति नमतिक्रियाया नारायणमित्यनेनान्वये नम्यस्वरूपनिर्धारणमायातीत्येव युक्तेः उपन्यसनीयतया प्रकारान्तरेणावतारायोगात् इत्यादिकं पण्व्याख्यानदूषणं वाक्यार्थविनोदे गुरुराजकृतं अवसेयम् । एवं तत्र तत्र बहुस्थलेषु तदूषणं तत एव प्रतिपत्तव्यम् । उत्तमपुरुष-प्रयोगात् अहमितिपदस्य लाभेऽपि आर्थिकत्वसाक्षात्त्वरूपावान्तरविशेषं वक्तुं तद्विशेषस्याश्मद्युत्तमः इत्यादि-सूत्रीयोपपदनियमार्थत्वरूपपक्षभेदाधीनत्वात् उक्तपक्षभेदोपपादनपूर्वकं तत्तत्पक्षेऽहमित्यस्य प्राप्तिं च विवेकेनाह अत्र यदेत्यादिना आशय इत्यन्तेन । उपपदनियमः इत्यस्येत्येवमाकार इति वक्ष्यमाणेन संबन्धः । अत्रपदेत्येव-माकार उपपदनियमोऽभिमतः तदेति योज्यम् । यत्र युष्मदस्मदौ तदन्यश्च सह विवक्षितावन्यदा त्यदादीनि सर्वैर्नित्यं इत्यनेनान्यैः सह वचने त्यदादीनि विशिष्यन्ते मिथस्तु परार्णीति प्रतिपादनात् दृश्यमाणाभ्यां अपि युष्मदस्मभ्या मध्यमोत्तमाभ्यामेव भवतः इत्यादिकं प्रमेयान्तरं धातुवृत्तौ । पुरुषनियमकथनस्थलेऽभिमत इति वक्ष्यमाणत्वात् । यद्यपि महाभाष्यकृता किमयं उपपदनियमः । युष्मदि मध्यम एव । अस्मद्युत्तम एवेति । युष्मदस्मदोर्योपपदनियमो दर्शितः तथापि समानन्यायतया शेषे पक्षेऽपि उपपदनियमस्य प्राप्तस्य परित्यागायोग इति भावेन शेषे प्रथम एवेत्यादिकं उक्तम् । अत एव मञ्जर्यां उपपदनियमो वा स्यात् युष्मद्युपपदे मध्यम एव । अस्मद्युपपदे उत्तम एव । शेषे प्रथम एवेतीति त्रितयमप्युक्तं भाष्यकारेणापि । अथोपपदनियमः इत्यादिग्रन्थे शेषनियमार्थं शेषे प्रथम एव भवति नान्य इति इत्युक्तमिति न कश्चित् दोषः इति ज्ञातव्यम् । ननु यतो एवकारः ततोऽन्यत्र तत्फलमिति न्यायेन मध्यम एवेत्याद्येवकारेण युष्मद्युपपदे प्रथमोत्तमनिवारणार्थम् । अस्मद्युपपदे प्रथममध्यमनिवारणं इत्यादिकं वाच्यम् । न च तत् युक्तम् । युष्मदादौ उपपदे मध्यमाद्यतिरिक्तप्रत्ययान्तरस्यापि निवारणस्य मध्यम एवेत्याद्येवकारेण कृतत्वप्राप्त्या शतृशानचृतृजादेरपि व्यावृत्तिप्राप्त्या कुर्वस्त्वं कुर्वाणस्त्वं कर्ता त्वं कारकस्त्वं कुर्वन्नहं इत्यादिप्रयोगानुपपत्तिप्रसङ्गात् इत्यतः तुल्यजातीयव्यावृत्तेः । नियमफलत्वात् इति कैय्यटाद्यनुसृत्य मध्यम एवेत्यादिनियमेनान्यव्यावृत्तौ प्रतीय-मानायां तुल्यजातीयप्रथमोत्तमादिनियम्यविशेषस्यैवोपस्थित्या तस्याः तद्विशेषमात्रविषयकत्वेन विजातीयशत्रादि-प्रत्ययान्तरस्य तत्रानुपस्थितत्वेन तद्विषयकत्वाभावादित्याशयेनाह नियमस्य तुल्यजातीयेति । नियम्येन तुल्य-जातीयं यत् तदपेक्षितत्वात् नियम्यतुल्यजातीयव्यावृत्तिफलकत्वादिति फलितोऽर्थो ज्ञेयः । युष्मदो मध्यमेनेति । यतः एवकारः ततोऽन्यत्र फलमिति तत् प्रागुक्तन्यायेन युष्मद्युपपदे मध्यम एवेत्यनेन प्रथमोत्तमसंबन्धव्यावृत्तौ कृतायां मध्यमेन युष्मदो नियमितत्वम् । एवं प्रथम एवेत्यनेनापि शेषस्य मध्यमोत्तमसंबन्धव्यावृत्तिमुखेन प्रथमेन नियमित-त्वमित्यर्थः । तयोरिति । युष्मच्छब्दयोरित्यर्थः । अप्राप्तेः । उपपदत्वेनाप्राप्तेरित्यर्थः । उपपदत्वमार्थिक-मिति । अस्मद्युपपदे उत्तम एवेति । नियमेन अस्मद्युपपदस्य पुरुषान्तरसंबन्धव्यावृत्तौ कृतायामपि उत्तमपुरुषस्य नोपपदान्तरसंबन्धव्यावृत्तिः क्रियते । उपपदनियमपक्षे तद्व्यावृत्तिप्रापकाभावात् । ततश्च उच्चकृड्लेन उत्तमेनास्मदो नियमितत्वेऽपि नोत्तमबलात् अस्मद एव उपपदत्वं सिध्यति । अत एव पुरुषनियमपक्षे उत्तमस्यास्मदर्थं विना असंभवात् उत्तमं प्रति अस्मद एव उपपदत्वमिति साक्षादेव उत्तमेन अस्मदो लाभः इति वक्ष्यते । उत्तमं प्रति अस्मद

एव यदुपपदत्वं तस्य यदार्थिकत्वं तदुपपादनायैव युष्मदो मध्यमेनेत्यादि पूर्वग्रन्थ इति द्रष्टव्यम्। **आर्थिको लाभ इति**। अनेन उत्तमपुरुषप्रयोगात् अहमिति लभ्यते इत्येतत्प्रयोगात् अहं इत्येतदर्थतो लभ्यत इत्येवमेकेन प्रकारेण व्याख्यातं भवति। एवं सूत्रकारानभिप्रेतोपपदनियमपक्षानुसारेणाहमित्यस्य लाभमुपवर्ण्य तदभिप्रेतपुरुषनियमपक्षानुसारेण तल्लाभमुपवर्णयिष्यन् सूत्रकारानभिमतिमूलतया उपपदनियमपक्षे भाष्यकाराद्युक्ताम् अनुपपत्तिं वदन्नेव पुरुषनियमपक्षस्य उपपन्नतां चाह **उपपदनियम इत्यादिना**। उपपदनियमे शेषग्रहणं व्यर्थमिति संबन्धः। ननु उपपदनियमेऽपि शेषग्रहणं कर्तव्यमेव। **युष्मदस्मदी नियतौ मध्यमोत्तमौ**। तयोः शेषेऽपि प्राप्तौ शेषे प्रथम एव भवति नान्य इति शेषस्य नियमार्थं तस्यावश्यकत्वात् इत्यतः **तद्वैयर्थ्यमुपपादयितुं** शेषग्रहणं विनापि शेषनियामकत्वलाभात् न तस्यावश्यकता इत्याह **युष्मदस्मदीति। नियतेति**। उपपदनियमे शेषग्रहणं कर्तुमशक्यम्। तद्धि क्रियमाणं युष्मदस्मदोः नियतत्वेऽपि मध्यमोत्तमयोः अनियततया शेषेऽपि प्रसक्तौ तन्निवारणार्थमिति वाच्यम्। तच्चायुक्तम्। प्रथमो भवतीत्येतन्मात्रस्य नियमार्थत्वे तेन यत्र प्रथमः अन्यश्च प्राप्नुतः तत्र प्रथम एव भवतीत्येवमन्यव्यावृत्तेः सिद्धचा शेषे मध्यमोत्तमव्यावृत्तेः अन्ययासिद्धत्वादित्यर्थः। ननु उपपदनियमार्थमेव शेषग्रहणं आवश्यकम्। असति हि शेषग्रहणे निमित्तान्तराभावेन शेषरूपस्य उपपदस्य नियमो न सिद्धचेत् इत्यत आह **तत्रेति**। प्रथम इत्येवोक्तौ प्रथमातिरिक्तनियम्यान्तरप्रापकपदान्तरस्याभावेन तत्प्रापितपदार्थान्तरनियमस्यासंभवेन नियम्यान्तराभावादित्यर्थः। तथापि शेषग्रहणाभावे शेषे प्रथम एव भवतीति नियमः कथं सिद्धचेदित्यत उक्तं स्पष्टयति **यत्र च प्रथमेति**। युष्मदि मध्यम एव अस्मदि उत्तम एवेति युष्मदस्मदोर्नियतत्वात्तयोः पुरुषान्तरं न भवतीति। मध्यमोत्तमयोस्त्वनियतत्वात् उच्छृङ्खलयोः तयोः शेषेऽपि प्रसङ्गे प्रथम इत्येतावदेव सूत्रमारभ्यमाणं सिद्धे प्रथमे पाक्षिकप्राप्तमध्यमोत्तमनिवारणाय प्रथम एव भवति न मध्यमोत्तमाविति नियमार्थः संपद्यते। यथा समे देशे यजेत व्रीहीनवहन्तीत्यादौ पाक्षिक्यां प्राप्तौ नियम इति भावः। यथा उपपदनियमपक्षे शेषग्रहणं व्यर्थं तथा न पुरुषनियमपक्ष इति तस्य सूत्रकाराभिमतत्वं युक्तं इत्येवं पुरुषनियमस्य उपपन्नतामाह **पुरुषनियमे त्विति**। युष्मद्येव मध्यमः अस्मद्येव उत्तमः इति वक्ष्यमाणनियमार्थः। **मध्यमोत्तमाविति**। युष्मद्येवेत्यादिनियमे यतः एवकारः ततोऽन्यत्रावधारणमिति न्यायेन मध्यमादेः युष्मदस्मद्वचां नियतत्वप्राप्त्या मध्यमोत्तमौ युष्मदस्मद्वचां नियतौ युष्मदस्मदोस्तु उच्छृङ्खलतया नियतत्वाभावः। एवं प्रथम एवेति सूत्रे प्रारब्धे प्रथमोऽपि अनियत एव। उपपदनियमपक्ष इव प्रथमपक्ष एवेति। नियमस्य अत्रानुपयोगात्। तन्नियमेऽपि प्रथमस्य उच्छृङ्खलतायाः अनिवारणात्। तथा च प्रथमस्य उच्छृङ्खलतया युष्मदस्मदोरपि प्रथमः प्रसक्तो भवति। ततः तयोः तन्निवारणार्थं शेष एव प्रथमः इत्येवमाकारकः पुरुषस्य प्रथमस्य शेषेण नियमः कर्तव्यो भवतीत्यर्थः। अत्रानियते इत्यनन्तरं प्रथमश्चेति मञ्जर्युक्तः पाठः शेषश्चेति पाठेऽपि शेषप्रथमश्चेत्येवार्थः। प्रथमस्येव शेषस्यापि अनियतत्वात्। तदनित्यत्वोक्तिस्तु मध्यमोत्तमयोः नियतत्वेऽपि युष्मदस्मदोरनियतत्ववत् इह शेषस्यापि अनियतत्वमिति वस्तुस्थितिप्रदर्शनायान्तेन प्रथमस्य युष्मदस्मच्छब्देषु प्रसक्तिरिति सूचितमित्यपि वदन्ति। **प्रथमश्चेत्यनन्तरं लिङ्गवचनविपरिणामेनानियत इति वर्तते**। तत्रेत्यस्य तथा सतीत्यर्थः। तस्य च प्रथमस्य मध्यमोत्तमवत् **केनचिन्नियतत्वं भवतीत्यर्थः। न चान्तरेणेति। शेषे प्रथमः इत्येतावत् सूत्रं विनेत्यर्थः**। एवं शङ्क्यते। एवंविधो नियमः शङ्क्यते इत्यर्थः। प्रथमः इत्येतावन्मात्रेण उक्तनियमालाभात् तल्लाभाय विशिष्टं सूत्रं कर्तव्य-

मिति भावः । एतेन उपपदनियमपक्षे शेषग्रहणवैयर्थ्यवत् पुरुषनियमपक्षे प्रथमग्रहणानर्थक्यमिति इत्येव पूर्णत्वात् इत्यपि निरस्तम् । प्रधानभूतविधेयसमर्पके सति तच्छेषभूतांशस्यैव सार्थक्यव्यर्थत्वविचारावकाशोऽपि शेषांशं उपादाय प्रधानसमर्पकभावव्यर्थताविचारानवकाशात् । अधिकारानुवृत्तिसत्त्व एव तद्भागव्यर्थत्वप्रसक्तेरिति ज्ञेयम् । एवं शेषग्रहणान्यथानुपपत्त्या सूत्रकाराभिमतत्वेन पुरुषनियमं उपपाद्य तत्फलमाह **तद्योक्तमेति** । **अस्मदर्थं विनेति** । अस्मत्त्येव उत्तमः इति तस्यास्मदादिनियमितत्वात् अस्मदर्थं विना असंभवादित्यर्थः । **साक्षादेवेति** । अस्मद एव उपपदत्वं आर्थिकं उपपदनियमपक्षे । न च एवं पुरुषनियमपक्षे । अस्मद एव उपपदनायाः अस्मत्त्येव उत्तम इति नियमादेव प्राप्तेरिति भावः । उत्तमपुरुषप्रयोगादेवेत्येवकाराभिप्रायमाह **एवकार इति** । **उभयथा** अर्थतः साक्षात् इत्युभयथेत्यर्थः । **लाघवमिति** । पुरुषनियमे युष्मदस्मदोः मध्यमे न इत्यादि प्रागुक्तरीत्या गौरवानाश्रयणात् इति भावः । अनेन एवकारं बुद्ध्या विविच्य पक्षद्वयोपपादनानन्तरं तत्रावान्तरविशेषसूचकतया स व्याख्येय इति सूचितं भवति । तत्त्वनिर्णयटीकाव्याख्याने तु गुरुचरणैरध्याहारे गौरवं अनध्याहारे लाघवं इति वर्णकान्तरं उक्तमित्यदोषः । अहमित्युक्त्या तल्लाभसंभवेऽपि अनुक्तावपि तल्लाभे लाघवं उपोद्बलकं इति सूचयितुं एवशब्द इति, अपि तथैवेति ज्ञेयम् । **विवक्षितमिति** । 'धात्वर्थं बाधते कश्चित् कश्चित् तमनुवर्तते । तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधे'ति वचनात् उपसर्गाणां त्रिविधत्वेऽपि प्रकृते मङ्गलाचरणविरोधापत्त्या धात्वर्थबाधकत्वरूपाद्यप्रकारस्य प्रतिषेध इत्यादाविव असंभवेऽपि णमुधातुनैव प्रकीर्तीभावरूपस्य धात्वर्थस्य प्रतिपादनेनोपसर्गस्य प्राचार्य इत्यादाविव धात्वर्थवाचकत्वासंभवेऽपि प्रजयति इत्यादाविव धात्वर्थविशेषकत्वं युक्तमिति भावेन धात्वर्थगतातिशयरूपं विवक्षितं सं इत्युपसर्गस्यार्थमाहेत्यर्थः । मूले आहेत्यस्योपसर्गाः वाचकाः इति पक्षे वक्तीति द्योतका इति पक्षे च द्योतयतीत्यर्थो बोध्यः । **तद्विवक्षायामिति** । उपसर्गार्थभूतातिशयस्य प्रकृते वक्तुं इष्टत्व इत्यर्थः । मूले तथाविध एवंति एवकारेण तथाभूतस्य समभिव्याहारेणानङ्गत्वमित्युक्तं भवति । **उत्तरव्याख्यान इति** । अथवा कुतो नारायणस्य इत्युत्तरयोजनायामित्यर्थः । **विशिष्यबन्धत्वेति** । भक्त्यादिसहकृतवन्दनकर्मत्वरूपविशिष्टमध्ये वन्दनकर्मत्वरूपबन्धत्वाख्यो विशेष्यांशः भक्त्यादिसहकृतत्वं तु वन्दनविशेषणमिति भावः । अत एव वक्ष्यति इष्टत्वस्य वन्दनविशेषणीभूतभक्त्यादिद्वारा विशिष्टबन्धत्वनिमित्ततामिति । **इष्टत्वस्येति** । बन्धत्वरूपं यत् विशेष्यं साक्षात् तत्प्रयोजकत्वाभावादित्यर्थः । **विशेषणद्वारा** । बन्धत्वविशेषणद्वारा यमभिप्रेतमिति । वन्दनं खलु भक्त्याद्युपेतमित्यादेः तथोजनायां वक्ष्यमाणत्वादिति भावः । **समर्थितमिति** । कुतो भक्त्याद्युपेतमेव वन्दनं सफलमित्याशङ्कायाः तथाविधस्यैव शङ्काशून्यत्वेनाभिमतसिद्धयकत्वादिति हेतोस्त्राभिधानेन परिहारादिति भावः । **विजातीयैरिति** । नारायणमिति कर्मकारकासंबद्धैरित्यर्थः । अनेन पदोपस्थित्यनुकूलव्यापारे निष्फलस्यान्वयबोधविरोधिव्यवधानस्याभावः आसत्तिः अत्र सा नास्तीति नान्वयसंभवः इत्युक्तं भवति । **अन्वयं अङ्गीकृत्याह नारायणस्त्वेवेति** । नम इति क्रियान्वयस्य तत्रैवाङ्गीकारादिति भावः । **द्वितीयानुपपत्तिरिति** । क्रियया ऽऽप्तुं इष्टतमत्वरूपकर्मलक्षणाभावेन कर्मणि द्वितीयानुपपत्तिरित्यर्थः । **नारायणेन संबन्धादिति** । ततश्च विशेष्यासंबद्धत्वं नास्तीति न विजातीयत्वमित्यर्थः । **नापि द्वितीयेति** । नारायणमित्यत्र क्रियासंबन्धप्रयुक्तकर्मत्वे तत्संबद्धनिखिलेत्यादावपि तत् क्रियानिमित्तकमेव कर्मत्वमिति युक्ता द्वितीयेति भावः । **गुणानां च परार्थत्वादिति न्यायेनेति** । गुणानां

त्वपरार्थत्वात् असंबन्धः समत्वात् स्यादिति तृतीयस्य प्रथमपादे जैमिनिसूत्रम् । अधिकरणशरीरं शास्त्रदीपिका-शास्त्रमालावृत्त्यनुसारेण लेख्यमस्ति । अत्र परं क्रियाप्रधानं गुणाः कारकं अप्रधानम् । कारकस्य क्रियाशेषत्वेन प्रतिपाद्यत्वादित्यर्थं मनसि कृत्वाह **कारकाणामिति** । संप्रदानसूत्रव्याख्यानावसरे वक्ष्यते चेदम् । कारकाणां क्रियान्वितस्वार्थबोधकत्वव्युत्पत्त्या **निखिलेत्यादीनां अन्योन्यान्वययोग्यत्वेन** नारायणमिति विशेषकारकेण संबन्धाभावात् । यन्नारायणसंबन्धेन द्वितीयोपपादनीया **तादृशस्ये(निखिलेत्यादिविशेषणयोः)त्यर्थः** । **ततश्च** क्रियान्वितार्थप्रतिपादकत्वमिव क्रियान्वितान्वितार्थप्रतिपादकत्वमपि नास्तीति अबोधकत्वमेव तेषां स्यादित्याशयः । उक्तं च तर्कताण्डवे । नानाविशेषणकएकविशेष्यकबोधे श्यामो युवा लोहिताक्ष इत्यादौ विशेषणानां अन्योन्यान्वययोग्यतयान्वितान्वयासंभवेनेति ज्ञेयम् । **यादृशतादृश इति** । विशेष्यभूतनारायणमित्यनेन सहपठितत्वादिरूपसंबन्धस्येत्यर्थः । तथा सति सहपठितकर्त्रादावपि क्रियान्वितार्थसंबन्धित्वात् कर्मत्वापत्तिरिति भावः । अत्र प्रकरणे निखिलेत्यादीनां इत्यादिमूलटीकयोः निखिलगुणैकदेहत्वादिधर्मरूपविशेषणार्पकविशेषणपदानां इत्यादिरूपेण नारायणेनेत्यस्य नारायणान्वितविशेषणाभिधानरूपः संबन्ध इति पदस्यार्थस्य च सङ्केरणाव्यवहारेऽपि तत्र तत्र योग्यतया विशेषणतया ग्रहणमिति ज्ञेयम् । एवं **कारकाणामित्यस्य** कारकवाचिपदानां इत्यर्थः । **कारकत्वाभावादिति** । कारकवाचिपदत्वाभावादित्यर्थः । **विशेष्येति** । यत्र हि एकविभक्त्यन्तपदवाच्यत्वरूपसामानाधिकरण्यघटितं विशेषणत्वमस्ति तानि विशेषणपदानि विवक्षितानि तेषां च न यथा क्रियापेक्षकारकान्तरपदत्वं किन्तु विशिष्यवाचिपदे यत् विभक्तिलिङ्गादिकं तदुपेतत्वरूपविशेष्यनिघ्नत्वमिति प्रकृतविशेषणानामपि तथात्वमिति भावः । तदेवं यादृशतादृशसंबन्धानङ्गीकारात् विशेषणविशेष्यभावसंबन्धस्यैवाङ्गीकारात् न विजातीयव्यवधानम् । विशेष्यान्वितक्रियामादायैव क्रियाकारकसंबन्धरूपवाक्यार्थप्रत्ययजनकत्वसंभवात् विशेष्यपदविभक्त्यादेरेव विशेषणपदगतत्वनियमात् कर्मत्वेन द्वितीयोपपत्तिश्चेत्यर्थः । एतेन एतदपि परास्तम् ।

स०व्र०— व्यवहितत्वादन्वयं दर्शयति **अत्र नारायणमिति** । नन्वकर्तृकक्रियानुपपत्तेरगमकमेतद्वाक्यमित्यत आह **उत्तमपुरुषेति** । अस्मद्युत्तम इत्यप्रयुज्यमाने प्रयुज्यमानेऽप्यस्मद्युपपदे उत्तमपुरुषविधानसामर्थ्यादिति भावः । ननु धातुनैव प्रतीभावविधानादुपसर्गो व्यर्थ इति चेन्न । तद्गतातिशयविशेषद्योतकत्वादित्याह **सम्मितीति** । प्रमाणमात्रेणाभिमतसिद्धेः किं भक्त्याद्यतिशयेनेत्यत आह **तथाविध एवेति** । नारायणं सन्नमामीत्यन्वये व्यर्थनिकपदव्यवधानेन सन्निद्धचभावः । निखिलेत्यादिद्वितीयान्तानां नमामीत्यनेनावर्तितेन साक्षादन्वये वाक्यभेदापत्तिरित्यत आह **निखिलेत्यादीनामिति** । तथाच साक्षात्संबन्धाभावान्न वाक्यभेदापत्तिरिति भावः ।

कुण्डल०— नमनक्रियां प्रति कर्मकारकस्य नारायणस्य नम्यताप्रयोजकधर्मप्रतिपादनाय प्रवृत्तानि निखिलेत्यादिविशेषणानि नमनकर्मणा नारायणेन संबन्धयितुं क्रियाकारकयोजनां दर्शयति **अत्र नारायणमिति** । ननु पदानां योग्येतरान्वितार्थबोधकस्वाभाव्येन प्रकृते च क्रियापेक्षितकर्तृसमर्पकपदाभावेन तदप्रतीतेः सकर्तृकक्रियासमर्पकत्वाभावेन वाक्यमपर्यवसितमेव स्यादित्यत आह **उत्तमपुरुषेति** । अस्मद्युत्तम इति

पाणिनिसूत्रेणास्मच्छब्दे प्रयुज्यमाने वा अप्रयुज्यमाने वा तदर्थमात्रावगमे उत्तमपुरुषः स्यादिति प्रतिपादनात् नमामीत्युत्तमपुरुषप्रयोगादेव प्रकृते अहमिति कर्तुर्वा तत्समर्पकपदस्य वा लाभेन वाक्यं पर्यवसन्नमेवेति भावः । ननु कर्तृकर्मकारकान्वितक्रियावेदकस्य प्रकृतवाक्यस्य शान्ताकाङ्क्षत्वान्निखिलेत्यादिविशेषणानां कुत्रान्वय इत्यत आह **निखिलेत्यादीनां त्विति** ।

ल०२०— एवं व्याख्येयत्वप्रयोजकप्रामाण्यादिव्युत्पादनेनानुव्याख्यानस्य व्याख्येयत्वं समर्थ्य प्रारिप्सितानन्तरायपरिसमाप्त्यादिफलहेतुतया शिष्टाचारादिप्रमाणसिद्धतया प्रणामादेरवश्यकरणीयतां प्रसाध्य तामेवावश्यकरणीयतां शिष्यान्ग्राहयितुं निबन्धनमिति निबन्धनप्रयोजनप्रदर्शनमिषेणाद्यपद्यस्यापि सार्थक्यं दर्शितम् । अथ व्याख्यानमवसरप्राप्तम् । तदनेकविधम् । क्वचिदन्वयप्रदर्शनम् । क्वचिदपेक्षितपदादिपूरणम् । क्वापि पदार्थवर्णनम् । कुत्रचिद्वाक्यार्थकथनम् । क्वचिद्भावबर्णनम् । क्वचित्प्रयोजनप्रदर्शनम् । क्वचिदुपरि प्रामानुपपत्तिनिवारणम् । क्वचिदवान्तरमहातात्पर्यवर्णनम् । क्वचिदस्पष्टीकृतार्थस्य स्पष्टीकरणमित्यादि । तत्र पदानां परस्परमन्विताना-मेवार्थधीजनकत्वादवश्यमादावन्वये वक्तव्ये तत्र कारकाणां साक्षादेव क्रियान्वयः पदान्ताराणा तु परम्परयेति सांव्यावहारिकीं रीतिमनुरुन्धानस्तावत्कारकस्य साक्षात्तदन्वयं दर्शयति **अत्रेति** । आद्यपद्य इत्यर्थः । ननु नमनक्रियायाः सकर्मकत्वान्नारायणमिति कर्मोक्तिवत्तत्कर्तृकत्वादहमिति कर्त्रुक्त्यापि भाव्यमित्यत आह **उत्तमेति** । अस्मद्युत्तमः । अस्मच्छब्दे उपपदत्वेन श्रूयमाणेऽश्रूयमाणे तदर्थविवक्षायामुत्तमपुरुषो भवतीति सूत्रवार्तिकाभ्या-मुत्तमपुरुषस्यास्मदर्थकर्त्रविनाभावोक्तेः उत्तमपुरुषेणैव तदाक्षेपसंभवादत्रोत्तमपुरुषप्रयोगादेवाहमिति कर्ता लभ्यते । अतः क्रियायाः सकर्तृकत्वेऽपि न तल्लाभार्थं पृथगहमिति कर्त्रुक्त्या भाव्यमिति भावः । ननु पदार्थ एव हि वाक्यार्थे समन्वीयते । स च वाच्यो वा लक्ष्यो वा । न चात्राहमर्थः कर्तोत्तमपुरुषस्य वाच्यो लक्ष्यो वा । किन्त्वाक्षेप्यः । न चाक्षेप्यस्य कार्यान्वययोरिवार्थिकार्थस्य वाक्यार्थे समन्वयः शाब्दव्यवहारे दृष्टः । अतः कथमुत्तमपुरुषाक्षेप्य-स्याहमर्थस्य प्रकृतवाक्यार्थे समन्वय इति चेन्न । अदर्शनात्कार्यान्वययोरार्थिकार्थयोर्वाक्यार्थे समन्वयाभावेऽपि गवादिपदानां जातावेव शक्तिर्व्यक्तिलाभस्त्वाक्षेपादिति वदतां मीमांसकानां मते शाब्दव्यवहारे एवाक्षेपलभ्यायाः व्यक्तेर्नामानयेति वाक्यार्थे कर्मकारकतयाऽन्वयदर्शनात् । आक्षेप्यस्य तत्संभवात् । सूत्रवार्तिकाभ्यामेवाविना-भावाख्यशक्त्यसंबन्धस्य प्रदर्शितत्वात् उत्तमपुरुषेणाहमर्थकर्तृलक्षणासंभवाल्लाक्षणिकार्थस्याहमर्थस्य पदार्थत्वादेव प्रकृतवाक्यार्थे समन्वये बाधकाभावाच्च । ननु संपदार्थस्य साक्षात्क्रियायामन्वयोऽस्ति न वा । नेति पक्षे साक्षात्क्रियान्वयप्रदर्शनावसरे तत्पाठो न स्यात् । आद्ये कस्तस्यार्थः । किं वा तदन्वयप्रयोजनमित्यतः तत्राद्यमङ्गीकृत्योभयपक्ष्याह **समितीति । तथाविध एवेति** । न केवलो नापि साधारणसम्यक्त्वविशिष्ट इत्येवार्थः । **हिशब्दः** प्रमाणप्रसिद्धौ । एवं कारकस्य साक्षात्क्रियान्वयं प्रदर्श्य पदान्तराणामपि तद्द्वारा तदन्वयमभिप्रेत्य तेषां कर्मकारके नारायणेऽन्वयं दर्शयति **निखिलेत्यादीनां त्विति । प्रणामकर्मणेति** । विशेषणेन नारायणे क्रिया-संबन्धप्रदर्शनेन तदन्वितानामपि पदान्ताराणां तद्द्वारा क्रियासंबन्धमभिप्रेति **विशेषणतयेति** । विशेषणविशेष्य-भावेनेत्यर्थः । उपलक्षणमेतत् । विशेषणसंबन्धितयेत्यपि द्रष्टव्यम् । तेन सुवाक्यैरित्यादीनां नान्वयानुपपत्तिः ।

अत्र विशेषणतया संबन्ध इत्यनेन निखिलेत्यादीनां नारायणविशेषणत्वमुक्तम् । विशेषणं च व्यावर्तकत्वम् । तच्चासाधारणधर्मप्रतिपादनेन । ते चासाधारणधर्माविदितपदपदार्थसङ्कतीनां निखिलेत्यादिपदैः प्रतीयमाना गुण-पूर्णत्वदोषदूरत्वादयः सर्वोत्तमत्वोपपादकाश्च भवन्ति । न केवलं देवदत्ते दण्ड इव व्यावृत्तिबुद्धिमात्रजनकाः । तादृशधर्मप्रतिपादनं तु स्तुतिरेवेति सिद्धम् ।

चषकः— अथात्र फलावच्छिन्नव्यापारबोधकतारूपसकर्मकतापन्नप्रकृतनमनक्रियायामेकत्र द्वयमितिरीत्या कर्मविभक्त्यन्तसप्तकोपस्थाप्यानामन्वयमुपेत्य तादृशविभक्त्यन्तोपस्थाप्यवृत्तयो यावत्यः प्रकारतास्तत्तन्निरूपकत्व-कूटविशेषिता या प्रकृतक्रियानिष्ठविशेष्यता तन्निरूपकान्वयधीस्वीकारे, क्रियाभेदस्य कर्मभेदनिबन्धनतासिद्धान्त-विरोधप्रसङ्गेन, तादृशविभक्त्यन्तोपस्थाप्यप्रातिस्विकरूपावच्छिन्नानामावर्तितधातूपस्थाप्यतादृशरूपावच्छिन्ने-ष्वन्वयोपगमे न्यायनयदिशा चैत्रः पत्राणि पुष्पाणि फलानि चिनोतीत्यादौ तत्तत्कर्मकधातूपस्थाप्यक्रिया-न्विताख्यातार्थनिष्ठप्रकारतानिरूपितचैत्रनिष्ठनानाविशेष्यताशालिन्याः, पाणिनीयदिशा प्रथमान्तार्थविशेष्यतापन्ना-ख्यातार्थनिष्ठप्रकारतानिरूपिततत्तत्कर्मकक्रियानिष्ठनानाविशेष्यताशालिन्या, अन्वयबुद्धेः समुदयेन तत्तज्जनकता-रूपवाक्यभेदस्येव प्रकृतेऽपि तदिशा तत्प्रसङ्गेन एकस्यैव कर्मविभक्त्यन्तस्य क्रियानिरूपितविशेषणतापन्नं तत्प्रकृत्यर्थविशेषित(तं यत्तत्त)तत्प्रत्यायकत्वमितरेषां साधुत्वार्थविभक्त्यन्तानां कर्मविभक्त्यर्थविशेषणीभूत-प्रकृत्यर्थनिष्ठविशेष्यतानिरूपिताभेदसंसर्गावच्छिन्नप्रकारतापन्नावगमकत्वमित्युपगमे च कर्मविभक्त्यन्तत्व-तत्साधुत्वार्थविभक्त्यन्तत्वावधारणा(का)भावेनानिर्णयप्रसङ्गेन; नमस्कार्यव्यक्तिगोचरानवधृतिप्रसङ्गेन, सन्निहिते-स्तदवधारकत्वासंभवेन, कर्मविभक्त्यन्तक्रियावाचकयोरन्वयो दुरुपपाद इत्यतोऽभिधत्ते अत्रेति । नारायणपदे विष्णुनिरूपिता लोकवेदप्रत्यायितसमुदायवृत्तिरेव, एतत्पदाभिधेयस्य द्वितीयान्तषट्कोपस्थाप्यनिरूपित-विशेष्यताप्रतीतिजनिका सती, मिलितप्रातिस्विककल्पद्वयाभिहितक्षत्यपनेत्र्यपि भवतीति सामञ्जस्यमवसेयम् ।

अथात्र संपदसमभिव्याहृतनमतेस्तिङ्वाच्यकर्तृवाचकयुष्मदस्मच्छेषान्यतमासमभिव्याहृततयाऽन्वय-बोधौपयिकतद्धर्मिकतदन्यतमनिरूपितासत्तिज्ञानविरहनियन्त्रितान्वयबोधानुपपत्तिप्रसञ्जनं दुर्वारमित्यत आह **उत्तमपुरुषेति** ॥ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः अस्मद्युत्तमः शेषे प्रथमः । अत्र भाष्यकारः किं लादेशविधानवाक्येनैकवाक्यत्वाद्विद्धचर्थमिदम्, अथ विहितेषु लादेशेषु नियमार्थमित्याशयेन किमर्थमिदमुच्यत इति प्रश्नभाष्येण प्रश्नं कुर्वाणस्तत्रैकवाक्यतापक्ष इतरेतराश्रयदोषपरिहाराय भाविनी संज्ञा आश्रयितव्येति प्रतिपत्ति-लाघवार्थं वाक्यभेदेन नियमपक्षं प्रदिदर्शयिषुर्युष्मच्छेषवचनं नियमार्थं नियमार्थोऽयमारम्भः अथैतस्मिन्नियमार्थे विज्ञायमाने किमयमुपपदनियमः युष्मद्येव मध्यमः अस्मदि एवोत्तमः, आहोस्वित्पुरुषनियमः युष्मदि मध्यम एव । अस्मदि उत्तम एव इति कल्पद्वयं प्रदर्श्य यदि पुरुषनियमः शेषग्रहणं कर्तव्यं शेषे प्रथम इति । किं कारणं मध्यमोत्तमौ नियतौ । युष्मदस्मदी अनियते तत्र प्रथमोऽपि प्राप्नोति तत्र शेषग्रहणं कर्तव्यं प्रथमनियमार्थं शेष एव प्रथमो भवतीति नान्यत्रेति पुरुषनियमपक्षे निर्बाधं शेषग्रहणसार्थक्यमभिधाय अथाप्युपपदनियमः । एवमपि शेषग्रहणं कर्तव्यम् । शेषे प्रथम इति युष्मदस्मदी नियते मध्यमोत्तमावनियतौ तौ शेषेऽपि प्राप्नुतस्तत्र शेषग्रहणं कर्तव्यं शेषे प्रथम एव

भवति नान्य इति यथा श्रुते शेषग्रहणसार्थक्यमभिधाय उपपदनियमे शेषग्रहणं शक्यमकर्तुं कथं युष्मदस्मदी नियतं मध्यमोत्तमावनियतौ शेषे प्राप्नुतस्ततो वक्ष्यामि प्रथमो भवतीति तन्नियमार्थं भविष्यति यत्र प्रथमश्चान्यश्च प्राप्नुतस्तत्र प्रथम एव भवतीति शेषग्रहणमुपपदनियमपक्षे प्रत्याचख्यावितिं उपपदनियमपक्षे युष्मच्छेषयोर्मध्यमप्रथमाभ्यां नियमिततया तयोरुत्तमं प्रत्युपपदत्वाप्राप्तेरुत्तमं प्रति स्वनियमितात्मद एवोपपदत्वमर्थात्सिद्धमित्यार्थिकलाभेऽपि पुरुषनियम एव शेषग्रहणं कुर्वतः सूत्रकारस्य तथा भाष्यकृतश्चाभिप्रेतः। इत्यस्मदर्थमन्तरेणोत्तमपुरुषस्यागंभवेनोत्तमपुरुषस्य साक्षादेव अस्मदर्थाक्षेपकतेति न तदनिर्देशनिबन्धनन्यूनतेति भावः। ममेति षष्ठीविपरिणामेनैव प्रथमां कल्पयिष्यतीति तस्यैव कर्तृवाचकतां मन्दाः प्रतिपद्येरन्निति वा आहेत्यप्यवतारितम्। आत्मयुत्तम इत्यत्र समानाधिकरणे स्थानिनीत्यस्यानुवृत्त्या अप्रयुज्यमानेऽप्यस्मदि उत्तमपुरुषविधानादिति भाव इत्यपि स्थितम्।

समिति द्युपसर्गध्वनितसम्यक्ताया नानात्वेन प्रकृतीपायिकीं तां दर्शयति भक्तीत्यादि। तथाविध इति। 'सङ्ख्याया विधार्थे धा' इति सूत्रव्याख्यानावसरे विधाशब्दो यत्रार्थे प्रसिद्धस्तत्रैव यथा स्यात्तादृशश्चार्थः प्रकार एवेत्याकरोक्त्या प्रकारवचनो विधाशब्दस्तथापदेन कृतबहुव्रीहिर्विशेष्यनिघ्न इति तादृशसम्यक्तारूपप्रकारविशिष्ट इत्यर्थः। अभिमतेति प्रकृतनिष्ठाप्रकृत्यंशस्यावगत्यर्थकत्वेऽप्युपसर्गविशेषसमभिहारादिनेच्छार्थकताऽऽश्रियते, निष्ठा च कर्मणि तथाच ग्रन्थप्रणेतृकर्तृकेच्छाविषयीभूतप्रारिप्सितसमापनप्रचयादिसिद्धिरित्यर्थः।

कर्तृलकारान्तकर्मविभक्त्यन्तयोर्योजनाप्रदर्शनेनैव ध्वनितमाशयमाविर्भावयति निखिलेत्यादीनां त्विति॥ असति विशेषानुशासने विशेष्यविशेषणवाचकपदयोः समानलिङ्गवचनकतानियमस्य स्थितत्वेकस्य कर्मविभक्त्यन्तत्वेऽपि तद्विशेषणवाचकषष्ठ्यन्तस्य साधुतानिर्वाहायैव तत्र द्वितीयान्ततोरीकृत्या न विजातीयव्यवधानायत्ताऽऽसत्तिज्ञानविरहनियन्त्रितान्वयबोधानुपपत्तिप्रसङ्गनावकाश इति भावः। सत्यन्तोपादानफलं तु वरणाः ग्रामः, चक्षाः पुरुषं यस्य वाष्टिकाः? पुरुषं पश्य, सीता रामदारा इत्यादेः साधुतानिर्वाहः।

काशी०— नारायणपित्यादेरन्तिमद्वितीयान्तविशेषणत्वाग्रमनिरासायाह अत्रेति। अन्वयो विवक्षित इति शेषः। नारायणपदस्य रूढत्वेन यौगिकपदान्तरविशेषणत्वायोगादिति भावः। नन्वत्र कर्तृविशेषानुक्तेर्न्यूनतेत्यत आह उत्तमेति। अस्मयुत्तम इति सूत्रे समानाधिकरणे स्थानिन्यपीत्यनुवृत्तेरस्मद्यप्रयुज्यमानेऽपि सामानाधिकरण्यमात्रेणोत्तमपुरुषविधानेन प्रकृते तदध्याहारस्यावश्यकत्वादिति भावः। ननु समित्यस्य वैयर्थ्यम्। याथार्थ्यरूपसम्यक्त्वस्य स्वतस्त्वेनैव लाभादत आह समितीति। अत्र भक्तिशब्देन स्नेहो विवक्षितो न तु माहात्म्यज्ञानमपि। नमनस्यैव तद्रूपत्वात्। आदिनाऽधिकारादिपरिग्रहः। ननु नमनेनैव फलसिद्धेर्भक्त्यादिवैयर्थ्यमत आह तथाविध इति। भक्त्याधतिशयसहित इत्यर्थः। यद्यपि प्रियतममित्यनेन भक्त्यतिशयो दर्शितः। तथाऽपि तत्पूर्वकप्रणामस्याभिमतसिध्यङ्गत्वसूचनाय संशब्द इति भावः। ननु निखिलेत्यादीनां नमामीत्यनेन साक्षादन्वये वाक्यभेदः। नारायणमित्यनेनान्वये च तत्पूर्वं प्रयोगापत्तिः। विशेषणस्य पूर्वत्वनियमादित्यत आह निखिलेत्यादीनामिति। नारायणपदस्य परमभागवतलिङ्कत्वेन शास्त्रार्थवाचितया मुख्यत्वेन च प्रथमं प्रयोगेऽपि तात्पर्यबलेनोत्तरत्र योजनया विशेष्यत्वोपपत्तेरिति भावः।

गूढ०— व्यवहितत्वादन्वयमाह **अत्रेति**। नमामीत्येतावतैवालं समित्युपसर्गस्य किं प्रयोजनमित्यत आह **समितीति**। ननु नमनमात्रेणैवेष्टसिद्धेः संभवान्न सम्यक्तायाः प्रयोजनमित्यत आह **तथाविध एव हीति**। तथाच नमनमात्रस्याभिमतसिद्धावन्वयव्यतिरेकाभ्यां व्यभिचारात् सम्यक्तविशिष्टनमनमेवाभिमतसिद्धावङ्गमिति भावः। एकहायन्या इत्यादितृतीयान्तपदार्थानां प्रत्येकं क्रयशेषत्ववदत्रापि निखिलेत्यादिद्वितीयान्तपदार्थानां प्रत्येकं क्रियान्वयप्रतीतिनिवारणायाह **निखिलेत्यादीनां त्विति**। सर्वेषामपि पदानां विशेष्यपदत्वात्कथं नारायणपदेनान्वयः इत्यत उक्तं **विशेषणतयेति**। तथाच नारायणपदमेव विशेष्यपदमन्यानि तु विशेषणानीत्यन्योन्यान्वयो युज्यत इति भावः।

प्रदीपः— अकरणीयत्वशङ्कास्तन्निरासाश्च श्लोकव्याख्यानप्रकारेणावसेयाः। नन्वनेकपद-व्यवहितत्वात् न नारायणशब्दस्य नतौ कर्मतया संबन्धः संभवतीत्याशङ्क्याह **अत्रेति**। भिन्नप्रयोजनानेकपदव्यवधाने सत्यसंबन्धः स्यात्। अत्र च कर्मविशेषणत्वादेकप्रयोजनत्वादाकाङ्क्षाविच्छेदाभावादव्यवधानान्नतिक्रियायां नारायणस्य कर्मत्वं संभवतीत्यर्थः। ननु सत्यपि कर्मणि कर्तुरनिर्देशादकर्तृकक्रियानुपपत्तेरगमकमेतत् वाक्यमित्याशङ्क्याह **उत्तमेति**। स्थानिन्यप्रयुज्यमानेऽपि उत्तमपुरुषविधानात् सामर्थ्यात् उत्तमपुरुषादेव समानाधिकरणस्थान्यवगम इति भावः। ननु धातुनैव प्रह्वीभावाभिधानात् उपसर्गो व्यर्थ इति चेन्न। तद्धितातिशयविशेषद्योतकत्वादित्याह **समितीति**। प्रणाममात्रेणाभिमतसिद्धौ किं भक्त्यतिशयेनेत्यत आह **तथाविध एवेति**। प्रणामक्रियायां नारायणस्यैव कर्मत्वात्तस्य च नारायणमित्येव पूर्णत्वात् निखिलेत्याद्यानर्थक्यं न तावत्संबन्धाभावात्तदित्याह **निखिलेत्यादीनां त्विति**।

३ सु०— प्रयोजनं च स्तुतिपदानां विशेष्यप्रशंसैव। तत्रार्थिकपुनरुक्तेः स्तुतित्वमेव समाधानमवधातव्यम्।

परि०— नन्वेतावन्ति विशेषणानि व्यर्थानि। यदि विशेष्यस्तुत्यर्थानि तथापि न कृत्यं पश्याम इत्यत आह **प्रयोजनं चेति**। **प्रशंसैवेत्युक्तस्तवनं च तत्प्रीत्यर्थमिति भावः॥ नन्वेवं गुणपदेन सार्वज्ञसर्वस्वातन्त्र्यादिगुणोक्त्या अज्ञानपारतन्त्र्यादिदोषाभावलाभान्निर्दोषमिति पुनरुक्तम्, 'जन्माद्यस्येति सूत्रेण गुणसर्वस्वसिद्धये। ब्रह्मणो लक्षणं प्रोक्तम्' इति वक्ष्यमाणदिशा अस्योद्धवादिदमित्युक्त्यैव गुणपूर्णतालाभान्निखिलपूर्णगुणेति च पुनरुक्तम्, उद्धवादिदमित्युक्त्या देहस्यापि लाभाद्देहमिति च पुनरुक्तमित्यत आह तत्रार्थिकेति**।

गु०दी०— निर्दोषत्वादिशब्दभेदेऽपि तेषां सर्वेषां गुणत्वेन निखिलपूर्णगुणैकदेहमित्यनेनैव गतार्थत्वात्। **आर्थिकपुनरुक्तेः** इत्युक्तम्। स्तोतारो हि महाराज, राजकुलोत्तंस, नृपशिखामणे, इत्यर्थैक्येऽपि शब्दभेदमात्रात् स्तुवन्ति तथेहापीति भावः।

यादु०— प्रथमं दोषं परिहरति **प्रयोजनं चेति** । तथाच सप्रयोजनं व्यवधानं न दोषायेति भावः । नन्वेवं विशेष्यप्राशास्त्यरूपैकार्थविषयकत्वात्पदानामर्थतः पौनरुक्त्यमित्यत आह **तत्रेति** । तत्र तेषु स्तुतिपदेषु । **आर्थिकपुनरुक्तेरिति** । एकार्थविषयकत्वेन प्राप्तपुनरुक्तेरित्यर्थः ॥ **स्तुतित्वमेवेति** । स्तुतिरूपार्थवादस्य अयमेव स्वभावो यत्सर्वैरपि स्वपदैर्लक्षणया स्तुत्या प्राशास्त्यप्रतिपादनमिति भावः । केचित्तु निखिलपूर्णगुणैकदेहं निर्दोषमित्यनयोरार्थिकस्य गुणमाणिक्यविशदप्रभाजालोल्लासोपहतसकलावद्यतमसेत्युक्तन्यायेन निखिलेत्यनेन अर्थात्प्राप्तस्य निर्दोषत्वस्य निर्दोषमिति पुनर्वचनात्पुनरुक्तिरिति व्याचक्षते । अपरे तु नारायणशब्देनैव वक्ष्यमाण-रीत्या गुणपूर्णतादेरभिधानात्पुनर्निखिलेत्याद्यभिधाने पुनरुक्तिरित्यर्थ इत्याहुः ॥

आनन्दः— नन्वेतैर्विशेषणैः कृतायाः स्तुतेर्वैयर्थ्यात्तदर्थकैतद्विशेषणानामपि वैयर्थ्यमेवेत्यत आह **प्रयोजनं चेति** । प्रशंसया च प्रशंस्य प्रीत्या परमपुरुषार्थो भवतीति भावः । ननु मायिमते सत्यादिपदैः ब्रह्मस्वरूपमात्रकथनवदत्रापि निखिलेत्यादिपदानां विशेष्यप्रशंसामात्रपरत्वे फलैक्यात्पौनरुक्त्यमित्यत आह **तत्रार्थिकपुनरुक्तेरिति** । **तत्र** विशेष्यप्रशंसापरत्वे । **नन्वार्थिकी पुनरुक्तिरित्यस्य** कोऽर्थः किमेकार्थत्वात्पुन-रुक्तिरिति वाऽर्थादनुपपत्त्या एकार्थत्वात्पुनरुक्तिरिति वा । **नाद्यः अर्थभेदस्याग्रे** वक्ष्यमाणत्वेन एकार्थत्वाभावात् । न द्वितीयः । अनुपपत्त्या एकार्थत्वस्य संपूर्णशास्त्रेऽपि सत्त्वेन **तस्यापि पुनरुक्तत्वापत्तेः** इति चेत् मैवम् । अर्थ-संबन्धिनी आर्थिकी सा चासौ पुनरुक्तिश्चेति **विग्रहः** । एवं च **अर्थशब्दस्य** प्रयोजनपरत्वात् तत्संबन्धिनी पुनरुक्तिः प्रशंसारूपफलैक्यसंबन्धिनी पुनरुक्तिरित्यर्थः । **एवं च न कश्चिद्दोषः** । **तस्याः** समाधानं स्तुतित्वमेव । स्तुतौ पौनरुक्त्यस्य दोषत्वाभावात् । प्रशंसायाः विचित्रत्वादिति भावः । केचित्तु वक्ष्यमाणन्यायेन नारायणशब्दस्यापि निरवद्याखिलपूर्णगुणार्थत्वात्पुनरुक्तिमाशङ्क्याह तत्रेतीत्याहुः ।

कं०रा०— ननु निखिलपूर्णगुणेत्यादिविशेषणानां किं प्रयोजनमित्यत आह **प्रयोजनं चेति** । स्तवनं च तत्प्रीत्यर्थमिति भावः । नन्वस्योद्धवादिदमिति नारायणस्य जगज्जन्मादिकारणत्वोक्त्या अपूर्णस्य पारतन्त्र्यादि-दोषयुक्तस्य च जगज्जन्मादिकारणत्वायोगेन पूर्णगुणत्वनिर्दोषत्वादिलाभात् निखिलपूर्णगुणैकदेहं निर्दोषमित्यादि-विशेषणपदानामार्थिकी पुनरुक्तिरित्यत आह **तत्रेति** । **तत्र** तेषु स्तुतिपदेषु । स्तुतावार्थिकपुनरुक्तिर्न दोष इति भावः ।

वा०चं०— ननु निखिलेत्यादीनां नारायणेन विशेषणतया संबन्धे तैः विशेष्यस्येतरव्यावृत्तिमात्र-लाभेऽपि नारायणप्रणामादिकमित्यत्रादिपदसंग्राह्यतया भवदभिमतस्तुतिरूपार्थकत्वं तेषां न सिद्ध्येदित्यतो व्यावर्तकमात्रदण्डादिविशेषणानां तथात्वेऽपि स्तुतिसमर्पकविशेषणपदानां विशेष्यप्रशंसाप्रयोजनकत्वं नानुपपन्न-मित्याह **प्रयोजनं चेति** । विशेषणत्वाभ्युपगमेऽपि न पूर्वाभ्युपेततत्प्रशंसारूपप्रयोजनपरित्याग इत्येवशब्दः । ननु तथाऽपि निखिलेत्यादिविशेषणलब्धगुणपूर्णत्वस्य निर्दोषत्वस्य च प्रभाजालोल्लासोपहतेत्युक्तरीत्याऽविना-भावेनैकोक्तावप्यन्यसिद्धेरन्यस्य प्रयोजनाभाव इत्यत आह **तत्रेति** ॥ विशेषणत्वेऽपि प्रशंसाप्रयोजनकत्वे हेतुतयोपन्यस्तस्तुतिपदस्यैवार्थिकपौनरुक्त्यपरिहारेऽपि हेतुत्वमित्येवशब्दः ॥ यश्चार्थादर्थो न स चोदनार्थ इति

न्यायेनार्थात्तल्लाभेऽपि शब्दात्तदलाभादार्थिकपौनरुक्त्यस्य न दूषणत्वम्। दूषणत्वे वा प्रकृते सप्रयोजनत्वान्न तस्य दूषणत्वमित्यभिप्रायेणैतत्समाधानमतो न वक्ष्यमाणविरोध इति हृदयम्।

वा०२०— निखिलेत्यादीनां विशेषणत्वाभ्युपगमपक्षेऽपि विशेषणस्य विशेषणान्तरं विशेष्येऽन्वयाङ्गीकारे विशेषणेऽपि विशेषणसत्त्वापातात्। विशेषणं स्वविशेषणेनान्वितं सत् पश्चात् द्वितीयविशेष्येणान्वीयत इत्यङ्गीकारे चान्योन्यान्वयायोग्यानां विशेषणानां अन्योन्यान्वयाभ्युपगमप्रसङ्गेन व्याघातप्राप्तेः विशेषणपक्षोऽपि अयुक्त इति। चैत्रः श्यामो वा युवा लोहिताक्षः इत्यादौ नानाविशेषणक एकविशेष्यकबोधस्थले यथा विशेषणानां विशेषणान्तर-संबन्धे अन्यविशेषणसंबन्धो नाङ्गीक्रियते। विशेषणं स्वविशेषणसंबन्धं सत् विशेष्येण पश्चात् संबध्यते इत्यन्वितान्वयो वा नाङ्गीक्रियते तथा प्रकृतेऽपि नानाविशेषणक-एकविशेष्यकबोधाङ्गीकारेण उक्तप्रकारद्वयस्याप्राप्तेः तत्पक्षीयानुपपत्तेः अनवकाशहतत्वात्। उक्तं च तर्कताण्डवे आसत्तिवादे। नानाविशेषणक-एकविशेष्यकबोधे विशेषणानां अन्योन्यान्वयायोग्यतया अन्वितान्वयासंभवेनेतीति द्रष्टव्यम्। व्यावर्तकमात्रेति। न तु विशेष्यप्रशंसोपयुक्तानामपीति मात्रार्थः। तथात्वेऽपि व्यावृत्तिमात्रप्रयोजनकत्वेऽपि स्वस्वरूपनिर्धारणहेतुलक्षणपरतयेति। ननु एकेनाकारेण प्रतिपन्नस्य केनचिदाकारान्तरेण प्रतिपत्तिहेतुभूतमेवोपलक्षणम्। यत्रायं कासारः स देवदत्तकेदारः यत्र पताका तद्देवदत्तग्रहमित्यादौ तथा दृष्टेः। न तु इह नारायणः केनचित् आकारेण देवदत्तकेदारादिवत् प्रतिपन्नः। अतः कासारादेः केदाराद्युपलक्षणत्ववत् निखिलेत्यादिविशेषणानां नारायणीयाकारान्तरेण प्रतिपत्तिः तद्धेतुत्वेन विलक्षणतया नारायणलक्षकत्वं न संभवति। न चैकेन लक्षणेन प्रतिपन्नाकारस्य द्वितीयं लक्षणं उपलक्षणमिति वाच्यम्। तथा सति लक्षणवाक्यद्वयस्येतरेतरप्रतिपन्नाकारापेक्षतापत्त्या अन्योन्याश्रयप्रसङ्गात्। लक्षणवाक्यान्तराङ्गीकारे चक्रकादिप्रसङ्गः। नापि सास्नादेः विशेषणतया गवादिलक्षणवत् तेषां विशेषणतया नारायणलक्षकत्वम्। विशेषणानां स्वाश्रये स्वेतरधर्मव्यावर्तकतायाः सास्नादौ दर्शनेन एकस्मिन् विशेष्ये अनेकविशेषणायोगात् अनेकविशेषणाश्रयस्य अनेकत्वप्रसङ्गात्। यत्र पुनः चैत्रः श्यामो युवा लोहिताक्षः इत्यादौ चैत्रादिरूपविशेष्यैक्यं प्रमाणान्तरप्रतिपन्नं तत्रैव एकस्मिन्नपि विशेष्येऽनेकविशेषात् लक्षणयोगः स्वीक्रियते। अन्यथा तत्रापि विशेष्यभेदप्रसङ्गोऽवर्जनीयः। प्रकृते तु निखिलेत्यादिलक्षणैरेव नारायणस्य लिलक्षयिषितत्वेन प्रमाणान्तरेण विशेष्यैक्यप्रतिपत्तेरभावात् नैकस्मिन् अनेकविशेषणयोगसंभवः। न च सत्यं ज्ञानमित्यादौ ब्रह्मपदस्येवेह नारायणपदस्यैव ऐक्यात् एकमेव विशेष्यमिति वाच्यम्। खण्डो मुण्डो पूर्णशृङ्गो गौः इत्यादौ गोपदैक्येऽपि व्यावर्तकभेदेन गोव्यक्तिभेदप्रतीतेर्दर्शनेन विशेष्यपद-ऐक्यमात्रस्य तदैक्यप्रापकत्वायोगात्। अन्यथा खण्डादिविशिष्टापि एकैव गोव्यक्तिः स्यात्। सत्यं ज्ञानमिति लक्षणवाक्यस्थलेऽप्युक्तानुपपत्तिसाम्येन तदृष्टान्तानुपपत्तेश्च। तत्कथं निखिलेत्यादीनां लक्षणत्वनिर्वाह इति चेत्। मैवम्। विशेषणानां स्वाश्रये स्वविरोधिधर्मव्यावर्तकत्वस्यैव खण्डः इत्यादौ दर्शनेऽपि स्वातिरिक्तपशुत्वादिरूपा-विरोधिधर्मव्यावर्तकत्वाभावेन प्रकृते च निखिलेत्यादीनां परस्परविरोधशून्यतया चैत्रः श्यामः इत्यादाविव एकविशेष्येऽपि अनेकविशेषणसत्त्वोपपत्त्या विशेष्यभेदाप्रसङ्गेन विशेषणत्वस्यैवोपपत्तेः। सत्यज्ञानादिलक्षण-वाक्येऽपि उक्तरीतिरेव। यतो वेत्यादिलक्षणवाक्ये तु ज्ञायन्ते जीवन्ति प्रयन्तीत्यादिना उक्तजन्मादिलक्षणानां

विरोधप्रतीतावपि तेषां कालभेदेनाविरोधस्य सर्वसंमतत्वेन तल्लक्षणानां विशेष्यभेदानापादकत्वमिति सिद्धमेव । वस्तुतस्तु लयकालेऽपि सर्गाद्यभावशक्तय: इत्यादिस्मृतिसिद्धाया: सामर्थ्यरूपाया: सृष्ट्यादिकारणताया: सत्त्वादिति चन्द्रिकोक्तरीत्या जन्मादीनां सामर्थ्यरूपाणां न विरोध इति न तद्विचारस्येह प्रसङ्ग: । यदि तु खण्डत्वमुण्डत्वादिकं कालभेदेन विवक्षित्वा विशेष्यैक्याशयेन खण्डो मुण्ड इत्यादिवाक्यप्रयोग: । तदा विशेष्यैक्येऽपि खण्डत्वादेरविरोधात् यतो वेत्यादिवाक्यतुल्यत्वमेवेत्यलम् । **पूर्वाभ्युपेतेति** । प्रणामादिकमित्यादिपदोपात्तस्तुतिकरणाय पद्यावतारिकानुसारेण निखिलेत्यादिविशेषणानां नारायणस्तुत्यर्थकत्वमिति व्याख्यातं भवति । व्यवधायकविशेषणानां प्रशंसार्थकत्वोक्त्यैवोक्ता सति लक्षणे निष्फलत्वेति व्यवधानविशेषणात् प्रकृते च सफलव्यवधानसत्त्वात् आसत्तिसंभव इति सूचितम् । अधिकं तर्कताण्डवे आसत्तिवादे ज्ञेयम् । पदतदर्थसाधारणविशेषणादिशब्दानां यथायोग्यमर्थो ग्राह्य इति प्रागेवोक्तम् । **अविनाभावेनेति** । यत्र निखिलगुणपूर्णत्वं तत्र निर्दोषत्वमिति व्याप्तेरवगमादिति भाव: । **अन्यसिद्धेरिति** । पूर्वाभिहिताऽविनाभूतार्थान्तरसिद्धेरित्यर्थ: । **अन्यस्येति** । अविनाभूतार्थप्रतिपादकपदस्येत्यर्थ: । स्तुतित्वमेवेत्येवशब्दस्य तात्पर्यमाह **विशेषणत्वेऽपीति** । विशेषणत्वाभ्युपगमेऽपि सप्रयोजनत्वं संभवतीत्यत्र हेतुतया प्रागुपन्यस्तं स्तुतिपदानामित्यनेनोपन्यस्तं यत्स्तुतिपदत्वं इति योज्यम् । मूले शब्दत: पुनरुक्ति: स्तुतौ न दोष: किन्तु अर्थत: इत्येव शब्द इत्यस्याहु: । कथं तर्हि अन्विताभिधानवादे आर्थिकी पुनरुक्तिर्न दूषणं यच्चार्थादर्थ: इत्याद्युच्यते इत्यत: पुनरुक्त्यभावाभावविवेकेन तद्दोषत्वतदभावविवेकेन च उत्तरग्रन्थानुगुण्येनैवैतत् वाक्यार्थं द्वेधा वदन् उत्तरग्रन्थविरोधं परिहरति **यच्चार्थादर्थ** इत्यादिना । अर्थात् प्राप्तो योऽर्थ: स चोदनार्थ: इति वाक्यार्थो न भवतीत्यर्थ: ॥

स०व्र०— प्रथमदोषं परिहरति **प्रयोजनं चेति** । सप्रयोजनपदव्यवधानं न दोषायेति भाव: । प्राप्तस्तु प्रणामक्रियायां नारायणस्यैव कर्मत्वात् तस्य च नारायणमित्यनेनैव पूर्णत्वात् निखिलेत्याद्यानर्थक्यमाशङ्क्य न तावत्संबन्धाभावात्तदित्याह **निखिलेत्यादीनां त्विति** । नापि प्रयोजनाभावादित्याह **प्रयोजनं चेतीत्याहु:** । नन्वेवं विशेष्यप्रशंसारूपैकार्थविषयकत्वात्पदानामर्थत: पौनरुक्त्यमित्यत आह **तत्रेति** । तत्र तेषु स्तुतिपदेषु । **आर्थिकपुनरुक्ते:** अर्थादागतपुनरुक्ते:, एकार्थविषयत्वेन प्राप्तपुनरुक्तेरित्यर्थ: । न शब्दत: पुनरुक्तिरियमिति भाव: । **स्तुतित्वमेवेति** । स्तुतिरूपार्थवादस्यायमेव स्वभावो यत्सर्वैरपि पदै: विशेष्यप्राशस्त्यप्रतिपादनमिति भाव: । केचित्तु तत्र निखिलपूर्णगुणैकदेहं निर्दोषमित्यनयोरार्थिकस्य गुणमाणिक्यविशदप्रभाजालोल्लासोपहतसकलावद्यतमस इत्युक्तिन्यायेन निखिलेत्यनेनार्थात्प्राप्तस्यादोषत्वस्य निर्दोषमिति पुनर्वचनात्पुनरुक्तिरित्याचक्षते । अपरे तु नारायणशब्देनैव गुणपूर्णतादेरभिधानात्पुनर्निखिलेत्याद्यभिधाने पुनरुक्तिरित्यर्थ इत्याहु: । यद्वा निखिलेत्यादीनां न क्रियापदान्वय: । नारायणपदस्यैव तेनान्वयात् । नापि नारायणमित्यनेन । तेनान्वयस्यैवानुपपत्तेरित्यतो विशेष्यविशेषणभाव: संबन्ध इत्याह **नारायणविशेषणतयेति** ॥ नन्वेतावता नतिस्तुत्युभयपरत्वमस्य श्लोकस्योक्तं भवति । तच्चायुक्तम् । तथात्वे वाक्यभेदापत्तेरित्यत आह **प्रणामकर्मणेति** । समप्रधानतया नतिस्तुत्युभयपरत्व एव वाक्यभेदस्य दोषत्वम् । प्रकृते च गुणप्रधानभावेनोभयपरत्वान्न वाक्यभेददोष इति भाव: ॥ ननु

निखिलपूर्णगुणैकदेहमित्यनेनानन्तगुणपूर्णत्वे उक्ते तस्य दोषाभावव्याप्तत्वेन निर्दोषत्वस्यार्थतो लाभेन पुनस्तस्य निर्दोषमित्यभिधाने पौनरुक्त्यम् । एवं निर्दोषत्वस्य गुणपूर्णत्वव्याप्तत्वेन यत्किञ्चिद्गुणाभावे तस्यैव दोषत्वेन सकलदोषराहित्यस्यैवासंभवात् निर्दोषमित्यनेनैव तल्लाभात् निखिलपूर्णगुणैकदेहमित्यनेन तदभिधाने पौनरुक्त्यमित्यत आह **तत्रेति** । स्तुतौ शब्दतोऽपि पौनरुक्त्यं न दोषः । किं पुनस्त्वर्थत इति द्योतनार्थमिवशब्दः ॥ **यश्चार्थादर्थो न स चोदनार्थ** इति समाधाने स्थिते **समाधानान्तरमेतदित्यदोषः** ।

कुण्डल०— विशेषणानां प्रयोजनं बहुधा प्रतिपादयति **प्रशंसैवेत्यादिना** । **आर्थिकपुनरुक्तेस्त्विति** । नागयणस्य महायोगविद्वद्वृढिष्ठां अपर्यायानन्तवैदिकशब्दप्रतिपाद्यत्वरूपाधिकृतत्वप्रतिपादनपरेण आप्यतमप्यखिलैः सुवाक्यैरिति विशेषणेनैव तत्तच्छब्दप्रवृत्तिलक्षणानन्तकल्याणगुणानामर्थाल्लाभान्निखिलपूर्णगुणेत्यस्य आर्थिकी पुनरुक्तिरित्यर्थः । यद्वा अस्योद्भवादिदमित्यनेन नारायणस्य जगज्जन्मकारणत्वोक्त्या पूर्णगुणस्याज्ञानपारतन्त्र्यादिदोषप्रयुक्तस्य च जगज्जन्मादिकारणत्वायोगात् पूर्णगुणत्वनिर्दोषत्वादेर्लाभात् निखिलपूर्णगुणैकदेहं निर्दोषमित्यादि विशेषणानामार्थिकी पुनरुक्तिरित्यर्थः । अन्ये तु तत्र स्तुतिपदेषु विशेष्यप्राशस्त्यरूपैकार्थविषयकत्वेन प्राप्तपुनरुक्तेरित्यर्थ इत्यप्याहुः । केचित्तु निखिलपूर्णगुणैकदेहं निर्दोषमित्यनयोरार्थिकस्य गुणमाणिक्यविशदप्रभाजालोल्लासोपहतसकलावद्यतमस इत्युक्तन्यायेन निखिलेत्यनेनार्थात्प्राप्तस्य निर्दोषत्वस्य निर्दोषमित्यनेन पुनरुक्तमिति व्याचक्षते । अपरे तु नारायणशब्देनैव वक्ष्यमाणरीत्या गुणपूर्णतादेरभिधानात्पुनर्निखिलेत्याद्यभिधाने पुनरुक्तिरिति व्याकुर्वते । **स्तुतित्वमेवेति** । स्तुतावार्थिकी पुनरुक्तिर्निर्दोषायेति भावः ।

विद्व०— "दोषाभावो गुण इति प्रसिद्धो लौकिकेष्वपी"ति दोषाभावस्य गुणत्वोक्तेः वेदप्रतिपाद्यत्वजगज्जन्मादिकर्तृत्वादेश्च शुभधर्मत्वेन गुणत्वात् गुणैकदेहमिति गुणात्मदेहोक्त्या विशेषबलेनार्थतो निर्दोषत्वादिगुणवत्त्वलाभात् पुनरुक्तिरित्यत आह **आर्थिकपुनरुक्तेरिति** । स्तुतौ उक्तविवरणस्यादोषत्वादिति भावः ।

ल०र०— निखिलेत्यादिपदानां स्तुतिपरत्वम् । तत्र स्तुतेरेकपदेन द्वाभ्यां वा संभवात्किं निखिलेत्यादीनां बहूनां पदानां प्रयोजनमित्यत आह **प्रयोजनं चेति** । अथवा क्रियायां कर्मतया नारायणस्य संबन्धोऽस्ति निखिलेत्यादिपदानां तु कुत्र संबन्धः । यत्र संबन्धस्तत्र तत्प्रयोजनं च किम् । तत्प्रयोजनमपि एकस्यैव पदस्य स्यात् । पदान्तराणां तु बहूनामवैयर्थ्याय प्रयोजनान्तराणि वाच्यानि टीकारीत्या शक्यानि निखिलेत्यादीनां त्वित्यादिना आद्यां शङ्कां परिहृत्य द्वितीयां परिहरति **प्रयोजनं चेति** । निखिलेत्यादीनां त्विति वर्तते । स्तुतिपदान्यस्तुतिः साक्षात्परम्परया वा गुणोत्कर्षप्रतिपादनं तत्परपदानामिति हेतुगर्भविशेषणम् । **विशेष्यप्रशंसेति** । यत्र पदैर्गुणोत्कर्षः प्रतिपिपादयिषितंस्तद्विशेष्यं तस्य प्रशंसामाहात्म्यविशेषज्ञापनमित्यर्थः । निखिलेत्यादिपदानां प्रयोजनं च विशेष्यप्रशंसा । स्तुतिपदत्वात् । स्तुतिपदत्वं चोक्तदिशा सिद्धमित्युक्तं भवति । तृतीयां परिहरति **विशेष्यप्रशंसैवेति** । न ततोऽन्यानि प्रयोजनान्तराणि वाच्यानीत्येवार्थः । अयं भावः । निखिलेत्यादिपदसमुदायस्य प्रयोजनं विशेष्यप्रशंसेत्यत्र स्तुतिपदत्वं हेतुतयोक्तम् । तदेकस्मिन्निवानेकेष्वपि समानम् । तथाच पदान्तराणां विशेष्य-

प्रशंसाप्रयोजनकत्वाभावेन ऐकान्तिकं कथमेकस्यापि पदस्य विशेष्यप्रशंसा प्रयोजनं साधयेत् । अतः सर्वपदसाधारणं स्तुतिपदत्वं हेतुं वदता टीकाकृता निखिलेत्यादिसर्वपदानामपि प्रयोजनं विशेष्यप्रशंसैवाङ्गीकृतेति ज्ञायते । न च वैयर्थ्यम् । प्रशंसायामेव वैशिष्ट्यवैशद्ययोरङ्गीकारात् । कथमन्यथा साधारणं हेतुं वदन् पदान्तराणां प्रयोजनान्तराभावं स्वयमेवाभिप्रेत्य पुनरेकेन पदेन विशेष्यप्रशंसायां सिद्धायामपि तदर्थमेव बहूनि पदान्युपादत्तादिति । एवं निखिलेत्यादिपदानां विशेष्यप्रशंसया सप्रयोजनत्वमभिधाय तत्र प्रयोजनैक्येन प्राप्तां वैयर्थ्यशङ्कां च दूरतो निधायायवार्थैक्येन प्राप्तां पौनरुक्त्यशङ्कां परिहरति तत्रेति । तेषु पदेष्वित्यर्थः । ननु कथमर्थैक्यनिमित्ता पुनरुक्तिः । पदानां परस्परं विभिन्नार्थतया प्रतीयमानत्वादित्यत उक्तम् आर्थिकपुनरुक्तेरिति । तथाहि । निखिलपूर्णगुणत्वेनेन वक्ष्यमाणदिशा निखिलगुणत्वं पूर्णगुणत्वं चोक्तम् । ताभ्यां च 'प्रच्युतोऽशेषदोषैः सदा पूर्तिन' इत्युक्तेर्निर्दोषत्वस्य तथा शते पञ्चाशदिति न्यायेन वक्ष्यमाणदिशा गुणैकदेहत्वस्यापि 'आप्यतमभि'त्यादिविशेषणचतुष्टयप्रतिपाद्यानां वेदादिमुख्यार्थत्वादिद्वादशगुणानां चार्थात्सिद्धत्वेन पुनर्गुणैकदेहमित्यादिपदषट्केनापि तेषामेव चतुर्दशधर्माणामुक्तौ पुनरुक्तिः । किञ्च षडपदानां क्रमेणैवार्थबोधकत्वस्य प्रायिकत्वात्तत्रापि स्तुतिपदानां विशेष्यप्रशंसामात्रप्रयोजनकानां क्रमस्यैवाभावाच्च कदाचिन्निर्दोषमित्यादिविशेषणानामपि विशेष्येण नारायणेनादावन्वयः संभावितः । तत्र निर्दोषमित्यनेन दोषात्यन्ताभावाभिधानादोषात्यन्ताभावानन्तगुणयोर्भगवन्मात्रनिष्ठतया समव्याप्तत्वात्तयोश्च प्रसिद्धयप्रसिद्धिभ्यां परस्परं गम्यगमकभावस्य सर्वैरङ्गीकृतत्वाद्यथाऽनन्तगुणस्य प्रसिद्धतादशायां तेन दोषात्यन्ताभावस्य सिद्धिस्तथा दोषात्यन्ताभावस्य प्रसिद्धतादशायां तेनान्तर्भावितपूर्णगुणत्वादिचतुर्दशगुणस्यानन्तगुणस्यार्थात्सिद्धौ पुनर्निखिलगुणपूर्णगुणेत्यादिविशेषणैस्तस्यैवार्थस्योक्तौ पुनरुक्तिः तथा 'अखिलैः सुवाक्यैराप्यतमभि'त्यनेनानन्तवेदादिमुख्यवाच्यत्वकथनेनैव 'इत्याद्यन्यत्र नियतैरपि मुख्यतयोदितः । शब्दैरतोऽनन्तगुणो यच्छब्दा योगवृत्तयः ।', 'तस्मान्महागुणो विष्णुर्नाम्नामपुनरुक्तित' इत्याद्युक्तदिशान्तर्भावितपूर्णगुणत्वादिद्वादशगुणस्यानन्तस्य तत्साध्यतया निर्दोषत्वस्य चार्थात्सिद्धत्वेन पुनर्निखिलपूर्णगुणेत्यादिविशेषणैरपि तस्यैवार्थस्योक्तौ पुनरुक्तिः । तथा 'जन्माद्यस्येति सूत्रेण गुणसर्वस्वसिद्धये । ब्रह्मणो लक्षणं प्रोक्तमि'त्याद्युक्तेरस्योद्भवादिदमित्यनेनार्थादन्तर्भावितान्यगुणानन्तगुणसिद्धौ तत एव निर्दोषत्वस्य च सिद्धौ पुनरन्यैरपि विशेषणैस्तदभिधाने पुनरुक्तिः । तथा अशेषविशेषतोऽपि वन्यमित्यनेन सर्वोत्तमत्वरूपव्याप्यप्रतिपादनेनैव तद्व्यापकतयान्तर्भावितगुणान्तरानन्तगुणस्य निर्दोषत्वस्य चार्थात्सिद्धौ पुनर्विशेषणैस्तदुक्तौ पुनरुक्तिः । तथा मम प्रियतममित्यनेन प्राणनायकतस्य नारायणविषयप्रेम्णः कार्यभूतस्य कथनेन तत्कारणानन्तानवद्यकल्याणगुणत्वज्ञानविषयतया तादृशानन्तगुणसिद्धौ तत एव निर्दोषत्वस्य च सिद्धौ पुनर्विशेषणैस्तद्वर्णने पुनरुक्तिरित्यार्थिकार्थस्य वर्ण्यमानार्थैक्येन पुनरुक्तिरिति । स्तुतित्वमेव स्तुतिपदत्वमेव । स्वभावोऽयं स्तुतिपदानां यथार्थादुक्तानामप्यर्थानां पुनः पुनः प्रतिपादनमित्येवंरूपमेव समाधानमवधातव्यम् । न पुनरार्थिकपुनरुक्तेरदूषणत्वरूपं समाधानमित्येवार्थः । नन्वार्थिकपुनरुक्तेरदूषणत्वमेव समाधानमनभिधाय समाधानान्तरकथने दूषणत्वमेव तस्या अङ्गीकृतं भवति । तथा चार्थिकी तु पुनरुक्तिरदूषणम् । यश्चार्थादर्थो न स चोदनार्थ इति न्यायादिति वक्ष्यमाणविरोध इति चेदेवंवदतः कोऽभिप्रायः । किमार्थिकस्य पुनरुक्तिरदूषणमिति किं वा आर्थिकी पुनरुक्तिरस्तथेति । आद्येऽपि तस्यार्थिकी

पुनरुक्तिर्विवक्षिता उत श्रौतीति । द्वितीयेऽपि आर्थिकी पुनरुक्तिः किमार्थिकार्थस्योत श्रौतस्येति । तत्र पक्षचतुष्टय-मध्ये द्वितीयपक्षव्यतिरिक्तेषु त्रिषु पक्षेषु संप्रतिपत्तिः । श्रौतस्यार्थिकस्य वार्थस्यार्थात्पुनरुक्तेः सर्वत्रापि संभवा-दवर्जनीयत्वेन सर्वैरङ्गीकार्यत्वात् । वक्ष्यमाणस्य चैतत्पक्षत्रयविषयकत्वात् । अत एवाद्यसूत्रे ब्रह्मशब्दोक्तस्य गुणपूर्णत्वस्य द्वितीयतृतीयसूत्रयोरर्थादुक्तिर्युक्ता । आर्थिकस्य श्रौती पुनरुक्तिर्विवक्षितेति द्वितीये तु सा दूषणं भवत्येव । प्रतिपादनस्य प्रतिपत्त्यर्थत्वात्पागेव सिद्धस्यार्थस्य प्रतिपादनार्थं शब्दप्रयोगवैयर्थ्यापादकत्वात् । प्रकृतापि पुनरुक्तिर्द्वितीयैवेति तस्या दूषणत्वमङ्गीकृत्य स्तुतित्वमेव समाधानं वक्तव्यम् । नान्यदित्येवमन्नाव-हितैर्भाव्यमित्याशयेनोक्तम् अवधातव्यमिति । अत एवात्रार्थिकस्य पुनरुक्तिरिति वक्ष्यमाणे चार्थिकी पुनरुक्ति-रिति विजातीयः प्रयोग इति । अधिकं तु गुर्व्यां रसज्ञिन्यां द्रष्टव्यम् ।

चषकः— ननूक्तदिशा पदषट्कोपस्थाप्यानां प्रणामकर्मीभावान्नारायणविशेषणतयान्वयभानोपगतेः फलराहित्येन, क्रियाकर्मवाचकयोरासत्तिभञ्जकपदान्तरकृतव्यवहितिकतया तदुपगमस्य चानुपलम्भबाधिततया असामञ्जस्यमित्याशङ्क्याह ईशप्रीतिजनकस्तुतिफलत्वोपलब्धेर्न क्षतिरिति समाधत्ते प्रयोजनं चेति । एवकार-स्तत्रोपलभ्यमानतामाचष्टे । अत एवैतदभिप्रायकनारायणप्रणामादिकमित्यादिपदोपादानं सङ्गच्छत इति ध्येयम् । आर्थिकेति । पूर्णगुणत्वनिर्दोषत्वयोर्हेतुहेतुमद्भावेन हेतूक्त्यैव हेतुमतोऽपि लाभात् निर्दोषमिति पुनर्वचनमिति व्याकर्तारोऽर्थापयन्ति । विशेष्यप्राशस्त्यरूपैकार्थविषयकत्वात्पदानामर्थतः पौनरुक्त्यमित्यर्थापनं स्थितम् । अभिधास्यमानदिशा नारायणपदेनैव गुणपूर्णतादिरपि सेत्स्यतीति पुनस्तदभिहितौ तदित्यपि मन्वते । गुणपदेन सार्वज्ञसर्वस्वातन्त्र्यादिगुणोक्त्या अज्ञानपारतन्त्र्याद्यभावलाभात् निर्दोषमिति पुनरुक्तम् । उद्भवादिदमित्युक्त्यैव गुणपूर्णता देहवत्तापि सेत्स्यतीति पूर्णगुणेति, देहमिति, तदिति च निबन्धान्तरे विन्यस्तम् ।

काशी०— ननु प्रयोजनाभावान्निखिलेत्यादीनां नारायणविशेषणत्वमयुक्तमित्याशङ्क्य पञ्चधा प्रयोजनं विवक्षुः साधारणं तावदाह प्रयोजनं चेति । निन्दार्थवादपदानां प्रशंसार्थत्ववारणाय स्तुतीति गुणकथनरूपेत्यर्थः । विशेष्यस्य नारायणस्य प्रशंसा प्राशस्त्यप्रतिपत्तिर्गुणाधिक्यधीरिति यावत् । तत्प्रयोजनं च तत्प्रीतिस्तन्नमनादौ क्षिप्रप्रवृत्त्यादिश्चेति भावः । अत्रैवकारेणोत्तरकल्पेष्वपि प्रशंसारूपप्रयोजनानुवृत्तिः सूचिता । नन्वेवं निखिलगुणत्व-निर्दोषत्वनिखिलवेदादिवेद्यत्वजगज्जन्मादिहेतुत्वानामन्योन्यमविनाभूतत्वेनैकोक्तावन्यलाभात्तत एव मुख्यवन्य-त्वादेरपि लाभसंभवादर्थतः पुनरुक्तिरित्यत आह तत्रेति । प्रशंसार्थत्वपक्षे स्तुतिपदेष्वार्थिकपुनरुक्तिदोषशङ्कायाः स्तुतित्वमेव परिहारोपाय इत्यर्थः । यत्र शाब्दपुनरुक्तेरपि दोषत्वं दुर्लभम् । आदरातिशयेन प्रशंसारूपप्रयोजनवत्त्वात् । का कथा तत्रार्थिकपुनरुक्तेः स्फुटप्रतिपत्तिहेतोर्दोषत्वे पक्षान्तरे तु प्रयोजनान्तरमपि वक्ष्यत इति भावः । यादुपते त्वार्थिकपुनरुक्तेः प्रशंसारूपैकार्थविषयकत्वेन प्राप्तपुनरुक्तेः स्तुतित्वमेव समाधानम् । स्तुतिरूपार्थवादस्य सर्वैरपि स्वपदैः संभूय प्राशस्त्यप्रतिपादकत्वस्वाभाव्यादिति व्याख्यातम् । तत्र यद्यप्येतावद्विशेषणानामेव प्राशस्त्यबोधक-त्वमिति नियन्तुमशक्यत्वात्प्रत्येकमपि विशेषणानां प्राशस्त्यबोधकत्वमस्त्येव । तथाऽपि प्रत्येकबोध्यप्राशस्त्यात्

समुदायबोध्यप्राशस्त्यस्य विलक्षणत्वान्न पुनरुक्तिः । न चैवं प्रत्येकबोध्यप्राशस्त्यानामपि मिथो विलक्षणत्वान्न पुनरुक्तिप्राप्तिरिति वाच्यम् । तेषामैक्यभ्रममूलकपुनरुक्तिशङ्काया एवात्र विवक्षितत्वात् । नारायणपदस्य निखिलेत्यादीनां च वक्ष्यमाणक्रमेणैकार्थतया पुनरुक्तिरत्र विवक्षितेत्यप्याहुः ।

गूढ०— नन्वेतैर्विशेषणैः कृतायाः स्तुतेर्वैयर्थ्यात्तदर्थकैतद्विशेषणानां वैयर्थ्यमेवेत्यत आह **प्रयोजनं चेति**। प्रशंसया च प्रशंस्यप्रीत्या परमपुरुषार्थो भवतीति भावः । ननु मायिमते सत्यादिपदैर्ब्रह्मस्वरूपमात्रकथनवदत्रापि निखिलेत्यादिपदानां विशेष्यप्रशंसामात्रपरत्वे फलैक्यात्पौनरुक्त्यमित्यत आह **तत्रार्थिकपुनरुक्तिरिति** । तत्र विशेष्यप्रशंसापरत्वे । नन्वार्थिकी पुनरुक्तिरित्यस्य कोऽर्थः । किमेकार्थत्वात्पुनरुक्तिरिति वा । अर्थादनुपपत्त्या एकार्थत्वात्पुनरुक्तिरिति वा । नाद्यः । अर्थभेदस्याग्रे वक्ष्यमाणत्वेन एकार्थत्वाभावात् । न द्वितीयः । अनुपपत्त्या एकार्थत्वस्य संपूर्णशास्त्रेऽपि सत्त्वेन तस्यापि पुनरुक्तत्वापतेरिति चेन्मैवम् । अर्थसंबन्धिनी आर्थिकी । आर्थिकी चासौ पुनरुक्तिश्चेति विग्रहः । एवं चार्थशब्दस्य प्रयोजनपरत्वात्तत्संबन्धिनी पुनरुक्तिः प्रशंसारूपफलैक्यसंबन्धिनी पुनरुक्तिरित्यर्थः । एवं च न कश्चिद्दोषः । तस्याः समाधानं स्तुतित्वमेव, स्तुतौ पौनरुक्त्यस्य दोषत्वाभावात् । प्रशंसाया विचित्रत्वादिति भावः । केचित्तु वक्ष्यमाणन्यायेन नारायणशब्दस्यापि निरवद्याखिलपूर्णगुणार्थत्वात्पुनरुक्तिमाशङ्क्याह **तत्रेति** इत्याहुः ।

प्रदीप:— नापि प्रयोजनाभावादित्याह **प्रयोजनं चेति** । वक्ष्यमाणन्यायेन नारायणशब्दस्यापि निरवद्याखिलपूर्णगुणार्थत्वात् पुनरुक्तिमाशङ्क्याह **तत्रेति** । एवं पदजातं सामान्यतो व्याख्याय विशेषतो व्याचक्षाण एवावान्तरव्यावर्त्याशङ्कासद्भावान्न पुनरुक्तिरिति ।

॥ नम्यत्वप्रयोजकतया विशेषणानां व्याख्यानम् ॥

अशेषविशेषतोऽपि वन्द्यम् इत्यादि विशेषणानां व्याख्यानम्—

४ सु०— अथवा । कुतो नारायणस्य नम्यत्वम् । तथात्वेऽपि कुतोऽन्यासु देवतासु सतीषु तस्यैव नमनमिति । अत्रोक्तम्— अशेषविशेषतोऽपि वन्द्यमिति । विशिष्यते वस्त्वेभिरिति विशेषाः, असाधारणधर्माः । अशेषाश्च ते विशेषाश्च । अपिः अभिव्याप्तौ । यावन्तो वन्द्यत्वनिमित्तभूता धर्माः तेभ्यो विशेषेभ्योऽपि हेतुभ्यो वन्द्यम् । तथा अशेषात् वन्द्यत्वेन समाशङ्कितात्पद्यापद्यभवादेर्जगतो विशेषः अतिशयः अशेषविशेषः सर्वोत्तमत्वम् । ततो हेतोः सतीष्वन्यासु देवतासु वन्द्यमिति ॥

एतदुभयं कथं नारायणस्येत्यतोऽभिहितम्— निखिलेत्यादि ।

परि०— अन्यथापि स्तुतिसंभवादेतैरेव विशेषणैः स्तुतौ न किञ्चिद्बीजमित्यत आह **अथवेति** ॥ आद्यचोद्यं निरसितुमाह **विशिष्यत इति** । व्यावर्त्यत इत्यर्थः ॥ **यावन्त इति** । विशिष्टत्वेष्टत्वाधिकृतत्वरूपा इति भावः ॥ द्वितीयचोद्यं निराह **तथेत्यादिना** ॥ **पद्मेति** । श्रीब्रह्मादेरित्यर्थः ।

एतदुभयमिति । वन्द्यत्वप्रयोजकासाधारणधर्मवत्त्वं, सर्वोत्तमत्वं चेत्येतदुभयमित्यर्थः ॥ **निखिलेत्यादीति** । विशेषणपञ्चकमित्यर्थः ।

यादु०— **अपिरभिव्याप्तावि**ति । न चाशेषेत्यनेन गतार्थता । यावन्तो वन्द्यत्वनिमित्तभूता धर्मा लोके प्रसिद्धास्तेषां सर्वेषां प्रकृतेऽभिव्याप्तिः, असङ्कोचेन वृत्तिरिति यावत् । तथाच 'यावन्तो ब्राह्मणाः ते सर्वेऽप्याकार्याः' इत्यादाविवासङ्कोचव्यञ्जनम् अपिशब्दप्रयोजनम् इत्याशयात् । एवमग्रेऽपि ।

बं०प०— **एतदुभयमिति** । वन्द्यत्वप्रयोजकीभूतधर्माणामत्र सत्वं, पद्मापद्मभवादेर्जगतः सकाशात् सर्वोत्तमत्वरूपातिशयश्चेत्युभयमित्यर्थः ॥

आनन्दः— ननु स्तुतिपदानां विशेष्यप्रशंसामात्रप्रयोजनत्वे एभिरेव विशेषणैः स्तुतिकरणे बीजाभाव इत्यतः पक्षान्तरमाह **अथवेति** । अनभ्यत्वशङ्कायां नभ्यत्वोपपादकत्वं विशेषणानां वक्तव्यम् । सैव कथमित्यतोऽस्य नभ्यत्वं कुतः अस्यैव नभ्यत्वं च कुत इत्याशङ्काद्वयमाह **कुत इति** । अशेषविशेषत इत्यत्र विशेषणं विशेष इति भावसाधनत्वे विशेषो व्यावृत्तिः । एवं चाशेषव्यावृत्तेरित्यर्थः प्रतीयते तदसङ्गतम् । नभ्यत्वे हेतुप्रश्ने व्यावृत्तिकथनस्यासङ्गतत्वात् इत्यतो व्याचष्टे **विशिष्यत इति** । एवं च करणे घञिति भावः । वन्द्यत्वे हेतोः पूर्वमनुक्तत्वात्समुच्चायकापि-शब्दवैय्यर्थ्यमित्यत आह **अपिरभिव्याप्ताविति** । अभिव्याप्तिमेवाह **यावन्त इति** । अस्यैव नभ्यत्वं कुत इत्येतत्परिहारत्वेनापि अशेषेति पदं व्याचष्टे **तथेति** । अशेषाद्विशेष इति पञ्चमीति योगविभागात्समासः । **एतदुभयमिति** । वन्द्यत्वप्रयोजकासाधारणधर्मवत्त्वं सर्वोत्तमत्वं चेत्युभयमित्यर्थः ।

श्रीनिधि०— अभिव्याप्तौ साकल्ये ।

बा०चं०— प्रणामकर्मनारायणविशेषणानां प्रणामोपयुक्तार्थप्रतिपादनेन प्रणामप्रयोजकत्वमेव स्वरसं न तु प्रयोजनान्तरार्थकस्तुतिपरत्वमित्यभिप्रेत्याह **अथवेति** । अत्र निखिलेत्यादिविशेषणत्रयस्य वन्द्यत्वप्रयोजकवैशिष्ट्योपपादकत्वस्य वन्द्यान्तरादतिशयप्रतिपादकत्वस्य च वक्ष्यमाणरीत्या स्पष्टत्वात्तदुपपादसमर्पकस्याशेषविशेषतोऽपीत्यस्य द्वेधा व्याख्यानमुचितमित्यभिप्रेत्य द्वेधा तन्निबन्धौ शङ्कां दर्शयति **कुत इत्यादिना** ॥ विशेषतोऽपीत्यपिशब्दस्य समुच्चायकत्वासंभवात् 'सर्वकर्माण्यपि सदा कुर्वाणः' इति गीतातात्पर्यनिर्णय 'एकमपि कर्म तदनादरेण न कार्यमि'त्यादिना आचार्यैरभिव्याप्त्यर्थतया तस्य व्याख्यातत्वात् 'सर्वेऽप्यानेयाः' इत्यादिलोकव्यवहारसिद्धत्वाच्चाशेषपदसङ्कोचप्रतीतिं वारयितुमभिव्याप्त्यर्थतया तं व्याख्याति **अपिरिति** ।

वा०र०— **प्रयोजकत्वमेव स्वरसमिति** । प्रणामप्रयोजककथनपरत्वात् पारंपरिकप्रणामप्रयोजकत्वेन वर्णनं स्वरसमित्यर्थः । **प्रयोजनान्तरेति** । विशेष्यप्रशंसारूपेत्यर्थः । प्रणामकर्मनारायणविशेषणानां इत्यनेनैव नारायणं सन्नमामीत्येतावतस्तु मङ्गलाचरणपरत्वं इत्येतत् पूर्वत्रेवात्रापि समाधानमिति ध्वनितम् । एवं उत्तरत्रापि योजनाषट्के नारायणं सन्नमामीत्ययमंशः मङ्गलार्थक इति सिद्धवत्कृत्यैव विशेषणान्तरप्रयोजनकथनमात्रं क्रियते । अत एव अनेनोच्यन्ते इत्यादिरूपेण विशेषणनिर्देशस्य मूले सत्त्वेऽपि विशेषणानि व्याख्याय तानि व्याख्यातीत्यादि तद्विवरणं टीकायाम् । चतुर्थपञ्चमपक्षयोः श्लोकः इत्युक्तिरपि पूर्वोत्तरबहून्यनुसारेण मङ्गलस्मर्पकभागातिरिक्तश्लोक इति सिद्धेर्विशेषणेष्वेव पर्यवसन्नेति न दोष इति ज्ञेयम् । **स्तुतिपदत्वमिति** । स्तुतिपदत्वेन वर्णनं न स्वरस-मिति संबन्धः । **वक्ष्यमाणरीत्या स्पष्टत्वात् इति** । यद्यपि तत्र वैशिष्ट्योपपादनायेत्यादिग्रन्थपर्यालोचनया वैशि-ष्ट्योपपादकत्वमेवोत्तरत्र प्रतीयते न तु वन्द्यान्तरात् अतिशयप्रतिपादकत्वमपि । तथापि तदुभयं कथं इत्यतो-ऽभिहितमित्युत्तरमूले निखिलेत्यादिकानामेव वैशिष्ट्योपपादनमुखेन वन्द्यान्तरात् अतिशयोपपादकत्वमपि । आप्य-तमं इत्यादेश्चाधिकृतत्वादिप्रतिपादनमुखेन उक्तातिशयोपपादकत्वमपि अस्तीति भावेनैव एतत् उभयमित्यादेः उक्तत्वात् निखिलेत्यादिना वैशिष्ट्योपपादनाय प्रतिपाद्यधर्माणां स्वातन्त्र्यादिसर्वगुणपूर्णत्वादिसर्वसत्तादिप्रद-त्वादिघटिततया सर्वोत्तमत्वोपपादकत्वमपि अर्थः सिद्धत्येवेति सिद्धत्वात् उभयपरत्वमस्य युक्तम् । अत एवांतर-मूले सर्वोत्तमत्वप्रतिपादनाभाव इति वदन्तोऽपि निरस्ताः । अत एव च स्वव्यतिरिक्तत्वेति विशेषणोपादानेन अशेषविशेषतोऽपि इत्यस्योद्भवादिद इत्यत्र संबन्धादिकं व्याकुर्वता च पद्मापद्मभवादिसर्वकारणतया सर्वोत्तमत्व-प्रतिपादनं प्रदर्शितमिति ज्ञेयम् । **तदुपपाद्येति** । विशेषणत्रयोपपाद्याशेषविशेषेभ्यो वैशिष्ट्यादिभ्यो वन्द्यत्वादि-समर्पकस्येत्यर्थः । उपलक्षणं चैतत् । आप्यतमं इत्येतत् विशेषणस्यापि वन्द्यत्वप्रयोजकाधिकृतत्व-प्रदर्शकत्वस्य वन्द्यान्तरात् अतिशयप्रतिपादकत्वस्य चेत्यादिकमपि द्रष्टव्यम् । वन्दनं खलु भक्त्याद्युपेतमेव सफलमित्युत्तरमूलानुसारेण वन्द्यत्वस्य साक्षात् इष्टत्वाप्रयोजकत्वात् न तदुपलक्षणतयापि व्याख्यानप्रवृत्तिरिति न दोषः । **कुत इति** मूले वन्द्यत्वप्रयोजकाभावादित्यर्थः । **तथात्वेऽपि** तत्प्रयोजकत्वेऽपीत्यर्थः । **अन्यास्त्विति** । तत्प्रयोजकस्य तत्रापि सत्त्वादिति भावः । विशेषणशब्दस्य भावसाधनत्वेऽशेषव्यावृत्तिप्राप्या तस्याश्च कुतो वन्द्यत्व इति प्रश्नपरिहारायोगात् । करणसाधनतामाश्रित्याह **विशेष्यत इति** । करणे घञ् इति भावः । **गीतातात्पर्येति** । अष्टादशाध्यायस्येति शेषः । **सङ्कोचेति** । सर्वेभ्यः कामेभ्यो दर्शपौर्णमासौ जुहोति इत्यादौ सङ्कोचदर्शनात् इति भावः । **अभिव्याप्तिमेव दर्शयति यावत इति** । यावत् तावत् च सकल्ये इत्यभिधानात् सकला इत्यर्थः । यच्छब्दवत् तच्छब्दसापेक्षतया तेभ्य इत्युक्तिर्युज्यते । एवं कुतो नम्यत्वं इत्याशङ्कानिरासपरतया अशेषेत्यादिविशेषणं योजयित्वा कुतः तस्यैव नम्यत्वमिति द्वितीयशङ्कानिरासपरत्वेनापि तत् योजयति **तथेति** । **अशेषात् विशेष इति** । पञ्चमीति योगविभागात् समास इति भावः । **एतदुभयमिति** । वन्द्यत्वप्रयोजकविशेषधर्मवत्त्वं सर्वोत्तमत्वं चेत्युभयमित्यर्थः ॥

स०र०— एवं पदजातं सामान्यतो व्याख्याय विशेषतो व्याचक्षाण एव तद्व्यावर्त्यशङ्कासद्भावात् न पुनरुक्तिरिति प्रकारान्तरमाह **अथवेत्यादिना** ॥ **अपिरभिव्याप्ताविति** । न चाशेषेत्यनेन गतार्थता, यावन्तो

वन्द्यत्वनिमित्तभूता धर्मा लोके प्रसिद्धास्तेषां प्रकृतेऽभिव्याप्तिरसङ्कोचेन वृत्तिरिति विवक्षितत्वात् । तथा च तेभ्यो विशेषेभ्योऽपि; **तेभ्यः** सर्वेभ्यः **विशेषेभ्यः** प्रकृते विद्यमानेभ्य इत्यर्थः । यावन्तो ब्राह्मणास्ते सर्वे आकार्या इत्यादाविवासंकोचव्यञ्जनम् अपिशब्दप्रयोजनमिति हृदयम् । एवमग्रेऽपि ।

कुण्डल०— नन्वपिशब्दिताभिव्याप्तेरशेषपदेनैव लाभादपिपदमनपेक्षितमेवेत्यत आह **यावन्त इति** । अशेषपदस्यासङ्कोचेन सर्वविशेषपरत्वज्ञापनार्थमेवापिशब्दोऽपेक्षित इति भावः । **एतदुभयमिति** । वन्द्यत्व-प्रयोजकयावद्धर्मवत्त्वं सर्वोत्तमत्वं चेत्येतदुभयमित्यर्थः ।

विद्व०— **अपिरभिव्याप्ताविति** । यावन्तो ब्राह्मणास्ते सर्वे व्याकरणीया इत्यादाविव सर्वशब्दस्या-सङ्कुचितार्थत्वव्यञ्जकत्वरूपाभिव्याप्तौ वर्तत इत्यर्थः । अतो नाशेषशब्देन गतार्थता । विशेषेभ्यो वन्द्यमित्यत्र विशेषेभ्यः नम्यत्वप्रयोजकासाधारणकार्येभ्यो हेतुभ्यो वन्द्यमित्यर्थः । एतदुभयं नम्यत्वप्रयोजकासाधारणधर्म-वत्त्वमितरदेवताभ्योऽतिशय इत्येतदुभयम् ।

ल०र०— एवं पद्यपदानि अत्र नारायणं सन्नमामीत्यन्वय इत्यन्वयप्रदर्शनव्याजेन कानिचिन्नम्यत्व-प्रतिपादनपराणि । निखिलेत्यादीनां तु प्रणामकर्मणा नारायणेन विशेषणतया संबन्ध इति संबन्धप्रदर्शनव्याजेन कानिचित् नम्ये नारायणे निखिलगुणत्वादिविशेषणसमर्पणेन स्तुतिपराणीति विभागेन व्याख्यायाधुना ग्रन्थोऽयमपि बहुर्थ इत्याचार्योक्तं योग्यानुभवमापयन् सर्वाण्यपि पदानि साक्षात्परम्परया वा नम्यत्वप्रतिपादनपराणि सन्ति, प्रकारान्तरेण स्तुतिपराण्यपि भवन्तीत्याशयेन तानि प्रकारान्तरेण व्याख्यातुमवतारयति **अथवेति** । पूर्वव्याख्यानप्रकारात्प्रकारान्तरद्योतकोऽथवेति निपातसमुदायः । एवमुत्तरत्रापि । तत्र पूर्वव्याख्यान एव नारायणं सन्नमामीति नारायणस्य नम्यत्वमुक्तमित्यविवादम् । तत्रापि नमामीत्यनेन नम्यत्वमात्रं सन्नमामीति संपदसहितेन तु तस्यैव नम्यत्वमुक्तम् । तत्राद्ये हेतुं पृच्छति **कुत इति** । हेतोरिति शेषः । प्रतिज्ञामात्रस्यासाधकत्वादिति भावः । विशेषविषयविचारस्य सामान्यसिद्धचधीनत्वात्सामान्यमङ्गीकृत्य विशेषे द्वितीये हेतुं पृच्छति **तथात्वेऽपीति** । नम्यत्वेऽपीत्यर्थः । **अन्यासु देवतासु** पद्यापद्यभवादिदेवतासु । इदं च प्रश्नसंभावनायोक्तम् । अन्यथाऽनन्यगतिकतया तस्यैव नमनमिति सिद्धत्वादिति भावः । अथवा प्रेक्षावत्कृतत्वान्नम्यत्वं तावत्सहेतुकमिति सिद्धमेव । हेतवश्च वन्दारुजनवृन्दाभिमताविशिष्टत्वादयो बहवः सन्ति । वक्ष्यति च स्वयमपि वन्द्यत्वनिमित्तभूता धर्मा इति बहुवचनेन तत्राद्ये हेतुविशेषं पृच्छति कुत इति । हेतुभ्य इति वक्ष्यमाणत्वादत्रापि हेतोरिति शेषः । विशिष्टत्वादिषु कस्माद्धेतोरित्यर्थः । द्वितीयेऽपि हेतुविशेषं पृच्छति **तथात्वेऽपीति** । **कुत इति** । अन्यदेवतास्ववर्तिनः कस्माद्धेतोरित्यर्थः । अथवा नारायणं सन्नमामीति यन्नारायणस्य नम्यत्वमितरप्रहाणेन नम्यत्वं चोक्तम् । तत्र हेत्वभावादाद्यमाक्षिपति **कुत इति** । किमाक्षेपे । तत एव द्वितीयमप्याक्षिपति **तथात्वेऽपीति** । इत्यत्र प्रश्नद्वये आक्षेपे च । उक्तं प्रतिवचनद्वयमिति शेषः । अशेषविशेषत इति समासस्य कर्मधारयत्वं तत्पुरुषत्वं चास्ति । तत्र कर्मधारयमाश्रित्याद्यप्रश्नप्रतिवचनपरतया तं व्याख्यातुमर्थान्तरप्रतिभासवारणाय तद्घटकं विशेष्यं विशेषपदं तावद्वचाचष्टे **विशिष्यत इत्यादिना** । विशिष्यते धर्मविशेषवत्तया क्रियते । अभिमतं विग्रहं दर्शयति अशेषाश्च ते

विशेषाक्षेति । सर्वशब्दपर्यायोऽशेषशब्दो न तु निःशेषत्वार्थकः । अपिशब्दस्य त्वाभिव्याप्त्यादयोऽनेकेऽर्थाः संभाविताः । तत्रायमभिव्याप्त्यर्थ इत्याह अपीरिति । अपिशब्द इत्यर्थः । अभिव्याप्तावितिं । समभिव्याहृतपदार्थासङ्कोचे इत्यर्थः । वाक्यार्थमाह यावन्त इत्यादि । बन्धत्वनिमित्तभूता धर्मा इत्यत्र बन्धत्वेत्यनेन धर्मविशेषप्रदर्शनम् । निमित्तभूता धर्मा इत्यनेन चासाधारणधर्मेषु येमिरीति करणव्युत्पत्तिलब्धस्य बन्धत्वनिमित्तत्वस्य प्रदर्शनमिति ज्ञेयम् । अशेषेभ्योऽपीत्यनेनापिपदस्य बुद्ध्या विविक्तेनाशेषपदेनान्वयं सूचयति । अयं भावः । यत्तावत्सृष्टं प्रतिज्ञामात्रस्यासाधकत्वात् कुतो नारायणस्य नम्यत्वमिति बन्धत्वहेतुत्वरूपसत्त्वम् । तत्र बन्धत्वनिमित्तभूतासाधारणधर्मवत्त्वाद्बन्धत्वमित्युत्तरम् । एतेन हेत्वभावान्नम्यत्वाक्षेपोऽपि गर्भस्रावेण निरस्तः । यदप्यत्र पृष्टं प्रेक्षावत्कृतत्वान्नम्यत्वं तावत्सहेतुकमित्यादिना विशिष्टत्वादिष्वनेकेषु हेतुषु मध्ये हेतुविशेषत्वरूपम् । तत्र सङ्कोचे मानाभावाद्वा विनिगमनाविरहाद्वा विभवाद्वा यावन्तो बन्धत्वनिमित्तभूता धर्मास्तेभ्योऽशेषेभ्योऽपि हेतुभ्यो बन्धत्वमित्युत्तरमिति । अशेषविशेषत इति समासस्य तत्पुरुषत्वमाश्रित्य द्वितीयप्रश्नप्रतिवचनपरतया व्याख्याति तथेत्यादिना । नन्वशेषादविवक्षिताज्जगतो विशेषोऽपि यःकश्चनान्यदेवतासाधारणः कथमन्यासु देवतासु सतीषु तस्यैव नम्यत्वसाधकः स्यादित्यतोऽशेषविशेषपदविवक्षितार्थाहाह अशेषादिति । बन्धत्वेन समाशङ्कितात् । कुतोऽन्यासु देवतासु सतीषु इत्यत्रेति शेषः । पद्मापद्मभवादेरिति । तत्रत्यदेवतापदार्थानुवादः । तथाच पापप्रभवादिदेवताप्रतियोगिकोऽतिशायी यः कोऽपि नान्यदेवतासाधारणः किं पुनः सर्वोत्तमत्वरूपः स इत्याशयेनोक्तं सर्वोत्तमत्वमिति । तत एव हेतोरिति । अशेषविशेषरूपादेव हेतोरित्यर्थः । एतेनात्रापिशब्दो यथाश्रुतस्यानोऽवधारणार्थस्येत्युक्तं भवति । अयं भावः । अत्रापि यत्पृष्टं नम्यत्वविशेषे हेतुत्वरूपसत्त्वं तत्राशेषाद्विशेषस्य धर्मविशेषापरपर्यायातिशयस्य सत्त्वाद्विशेषतो बन्धत्वमित्युक्तमित्युत्तरम् । एतेन नम्यत्वविशेषाक्षेपोऽपि पूर्ववदेव निरस्तः । यदपि पृष्टं तथात्वेऽपि कुत इत्यादिना अन्यदेवतास्ववृत्तिनः कस्माद्भिमित्तादन्यासु देवतासु सतीषु तस्यैव नमनमिति तत्रोत्तरम् । बन्धत्वेन समाशङ्कितात्पद्मापद्मभवादेर्जगतस्सकाशाद्यो विशेषःसर्वोत्तमत्वापरपर्यायोऽतिशायोऽन्यदेवतास्ववर्तमानस्तत एव हेतोः सतीष्वन्यासु देवतासु बन्धमितीति । एवं च नारायणं सन्नमामीतिपदैः साक्षादुक्ते नम्यत्वसामान्ये तद्विशेषे च हेतुसमर्पकतयाऽशेषविशेषतोऽपि बन्धमित्यादि पदानि योजयित्वा तत्राशेषविशेषतोऽपीत्येतदुक्तहेतुद्वयोपपादकतयाऽवशिष्टविशेषणषट्कं योजयितुमवतारयति एतदुभयमिति । अत्र बन्धत्वसामान्यनिमित्तसमुदायं तद्विशेषनिमित्तं सर्वोत्तमत्वं चैतच्छब्देन परामृशति । कथमित्याक्षेपे प्रश्ने च । तच्छब्देन परामृष्टेषु चतुर्षु मध्ये आक्षेपः सर्वोत्तमत्वविशिष्टत्वोभयविषयः तत्र विशिष्टत्वस्य प्रकृते नारायणे सर्वोत्तमत्वसहचरितोत्तमत्वरूपतया तयोरन्यत्रादर्शनादन्याप्यसंभावनाशङ्कोदयात् । अत एव निखिलेत्यादिविशेषणत्रयेण तत्संभावकमुक्तम् । प्रश्नस्त्विष्टत्वाधिकृतत्वोभयविषयः । तयोरौपाधिकयोरत एवेतरसाधारणयोर्नारायणेऽसंभावनाशङ्कानुदयात् । किन्तु किंरूपे तत्र ते इति तत्स्वरूपविषयप्रश्नमात्रोदयात् । अत एव प्रियतमाप्यतमप्यखिलैः सुवाक्यैरिति विशेषणाभ्यां तदुभयस्वरूपमात्रं प्रदर्शितमित्यवधेयम् । अभिहितमिति । अन्यथा स्वयमनवस्थितहेतुद्वयस्यान्योपपादकत्वायोगादुक्तमनुपपन्नं स्यादिति भावः । निखिलेत्यादीत्यतःपरं विशेषणषट्कमिति शेषः ।

चषकः— प्रकृतनमनक्रियाकर्मीभवन्नारायणे विशेषणषट्कप्रमापकतुल्यकक्षापन्नाखिलद्वितीयान्तानां फलान्तरोद्देश्यकस्तुतितात्पर्यकत्वाशयं प्रकाश्य; संप्रति तदेकतरस्य बीजाभावनियन्त्रिततादृशक्रियाकर्मत्वानुपपत्तिशङ्कायाः तादृशव्यक्त्यन्तराप्रणतिपूर्वकैतत्प्रणतिकर्मत्वानुपपत्तिशङ्कायाश्च व्युदसनतात्पर्यकतां, शिष्टतत्पञ्चकस्य च तदभिहितार्थसमर्थनतात्पर्यकतां प्रकाशयति **अथवेत्यादि** ।

विपूर्वकशिष्टेः करणसाधनघञन्ततामाश्रित्य व्यावर्तकधर्मप्रमापकतामभिधत्ते **विशिष्यत इति** । अथ 'उपदेशेऽजनुनासिक इत्' इति सूत्रं व्याचक्षाणेन भाष्यकृता 'उपदेश इति घञ्, अयं करणसाधनः? न सिध्यति परत्वात् ल्युट् प्राप्नोति, न ब्रूमो कर्तरि च कारकसंज्ञायामिति, किं तर्हि हलश्चेति संज्ञायामिति वर्तते, न चैषा संज्ञा'इत्यादिना एवं च कृत्वा घञ् न प्राप्नोती'त्यनेन करणे घञो दूषिततया करणसाधनघञन्तता विशेषशब्दस्य न सङ्गच्छत इति चेत् सत्यम् । तत्रैव एवं तर्हि कृत्यल्युटो बहुलमित्येव घञ् भविष्यतीति उपदेशशब्दस्य करणसाधनतया भाष्यवृत्त्यादिषु व्याख्याततया, तद्वत्प्रकृतेऽपि संभवात्, विशेषशब्दस्यापि परीक्षकव्यवहारादिना व्यावर्तकसंज्ञात्वावगमेन हलश्चेत्यपि भविष्यति । 'ईश्वरं गुरुमपि भजस्वे'त्यादाविव प्रातिस्विकधर्मद्वयावच्छिन्ननानाकर्मताकैकधात्वपस्थाप्यान्वयित्वरूपसमुच्चयबोधकत्वासंभवेन गीतातात्पर्यनिर्णये 'सर्वकर्माण्यपि सदा कुर्वाण' – इति प्रतीकव्याख्यावसरे **'एकमपि कर्म तदनादरेण न कार्यमि'त्यादिना** भगवत्पादैरभिव्याप्तिगमकतया विवृततया, 'यावन्तो ब्राह्मणास्ते सर्वेऽप्याकार्या' इत्यादाविव समभिव्याहृताशेषपदार्थतावच्छेदकीभूतव्यासज्यवृत्तिधर्मनिष्ठपर्याप्तिसंबन्धावच्छिन्नावच्छेदकताकपदार्थान्तरान्वयितारूपाभिव्याप्त्यर्थतया व्याकुरुते **अपिरिति**। तथाच न तादृशाशेषादिपदार्थतावच्छेदकीभूततादृशधर्मसामानाधिकरण्यमात्रविशेषिततादृगन्वयितारूपः सङ्कोच इति भावः । एवमुपरिष्टादपि बोध्यम् ॥ **यावन्त इत्यादि** । **विशेषपदोत्तरपञ्चम्या** निरूपकतासंबन्धेन वन्द्यपदार्थतावच्छेदकान्वयिज्ञापकत्वं प्रत्याय्यते । तथाच विशिष्टेष्टाधिकृतत्वादिरूपयावद्धर्मनिष्ठा या व्यासज्यधर्मावच्छिन्ना ज्ञापकता, तन्निरूपकवन्द्यत्वाश्रयीभूतमित्यर्थः ।

काशी०— ननु विशेष्यप्रशंसाया विशेषणान्तरैरपि संभवादेतद्विशेषणानामेवोपादाने किञ्चिदसाधारणं प्रयोजनं वाच्यम् । एवं वाच्यार्थस्य प्रकृतोपयुक्तत्वसंभवे प्रशंसामात्रे तात्पर्यमयुक्तम् । एवं विशेष्यप्रशंसया तन्नम्यत्वमात्रसिद्धावपि तस्यैव ग्रन्थादौ नम्यत्वं न सिद्धचेदतस्तदुपपादकत्वं तावद्विशेषणानामाह **अथवेति** । नम्यत्वं ग्रन्थादौ नम्यत्वम् । आद्यशङ्कोत्तरत्वेन व्याख्याति **विशिष्यत इति** । अवन्द्याद्व्यावर्त्यत इत्यर्थः । **अवन्द्यसाधारणस्याप्यवन्द्यान्तरव्यावर्तकत्वसंभवादाह असाधारणधर्मा इति**। अपिशब्दस्य समुच्चायकत्वायोगादाह **अपिरभिव्याप्तावि**ति। अभिव्याप्तिः कात्स्न्र्येन संबन्धः । असाधारणधर्माणां कात्स्न्र्येन वन्दनहेतुत्वान्वयव्यञ्जकोऽपिशब्द इत्यर्थः । अपिचशब्दाभ्यां धर्मसमुच्चय एव न तु धर्मिणस्तस्यैक्यादिति भावेन त इत्युक्तम् । न चाशेषशब्देनैव तादृशान्वयलाभादपिशब्दो व्यर्थ इति वाच्यम् । अशेषशब्दस्य कदाचित्सङ्कोचसंभवात् । न च विशेष्यवाचकपदान्तरसमभिव्याहृताशेषशब्दस्य विशेष्यतावच्छेदकव्यापकाशेषत्वबोधकतानियमाविशेषत्वव्यापकाशेषत्वस्यैव लाभान्न सङ्कोचसंभव इति वाच्यम् । उपचारेणापि क्वचित्सङ्कोचसंभवेन (अनेकत्वमात्रपरत्वसंभवेन)

विशेषाश्चेति । सर्वशब्दपर्यायोऽशेषशब्दो न तु निःशेषत्वार्थकः । अपिशब्दस्य त्वाभिव्याप्त्यादयोऽनेकेऽर्थाः संभाविताः । तत्रायमभिव्याप्त्यर्थ इत्याह अपिरिति । अपिशब्द इत्यर्थः । अभिव्याप्ताविति । समभिव्याहृतपदार्थासङ्कोचे इत्यर्थः । वाक्यार्थमाह यावन्त इत्यादि । बन्धत्वनिमित्तभूता धर्मा इत्यत्र बन्धत्वेत्यनेन धर्मविशेषप्रदर्शनम् । निमित्तभूता धर्मा इत्यनेन चासाधारणधर्मेषु येभिरिति करणव्युत्पत्तिलब्धस्य बन्धत्वनिमित्तत्वस्य प्रदर्शनमिति ज्ञेयम् । अशेषेभ्योऽपीत्यनेनापिपदस्य बुद्ध्या विविक्तेनाशेषपदेनान्वयं सूचयति । अयं भावः । यत्तावत्पृष्टं प्रतिज्ञामात्रस्यासाधकत्वात् कुतो नारायणस्य नम्यत्वमिति बन्धत्वहेतुत्वरूपसत्त्वम् । तत्र बन्धत्वनिमित्तभूतासाधारणधर्मवत्त्वाद्बन्धत्वमित्युत्तरम् । एतेन हेत्वभावान्नम्यत्वाक्षेपोऽपि गर्भस्रावेण निरस्तः । यदप्यत्र पृष्टं प्रेक्षावत्कृतत्वान्नम्यत्वं तावत्सहेतुकमित्यादिना विशिष्टत्वादिष्वनेकेषु हेतुषु मध्ये हेतुविशेषस्वरूपम् । तत्र सङ्कोचे मानाभावाद्वा विनिगमनाविरहाद्वा विभवाद्वा यावन्तो बन्धत्वनिमित्तभूता धर्मास्तेभ्योऽशेषेभ्योऽपि हेतुभ्यो बन्धत्वमित्युत्तरमिति । अशेषविशेषत इति समासस्य तत्पुरुषत्वमाश्रित्य द्वितीयप्रश्नप्रतिवचनपरतया व्याख्याति तथेत्यादिना । नन्वशेषादविवक्षिताज्जगतो विशेषोऽपि यःकश्चनान्यदेवतासाधारणः कथमन्यासु देवतासु सतीषु तस्यैव नम्यत्वसाधकः स्यादित्यतोऽशेषविशेषपदविवक्षितार्थावाह अशेषादिति । बन्धत्वेन समाशङ्कितात् । कुतोऽन्यासु देवतासु सतीषु इत्यत्रेति शेषः । पद्मापद्मभवादेरिति । तत्रत्यदेवतापदार्थानुवादः । तथाच पापप्रभवादिदेवताप्रतियोगिकोऽतिशायो यः कोऽपि नान्यदेवतासाधारणः किं पुनः सर्वोत्तमत्वरूपः स इत्याशयेनोक्तं सर्वोत्तमत्वमिति । तत एव हेतोरिति । अशेषविशेषरूपादेव हेतोरित्यर्थः । एतेनात्रापिशब्दो यथाश्रुतस्यानोऽवधारणार्थश्चेत्युक्तं भवति । अयं भावः । अत्रापि यत्पृष्टं नम्यत्वविशेषे हेतुत्वरूपसत्त्वं तत्राशेषाद्विशेषस्य धर्मविशेषापरपर्यायातिशयस्य सत्त्वाद्विशेषतो बन्धत्वमित्युक्तमित्युत्तरम् । एतेन नम्यत्वविशेषाक्षेपोऽपि पूर्ववदेव निरस्तः । यदपि पृष्टं तथात्वेऽपि कुत इत्यादिना अन्यदेवतास्ववृत्तिनः कस्मान्निमित्तादन्यासु देवतासु सतीषु तस्यैव नमनमिति तत्रोत्तरम् । बन्धत्वेन समाशङ्कितात्पद्मापद्मभवादेर्जगतस्सकाशाद्यो विशेषःसर्वोत्तमत्वापरपर्यायोऽतिशायोऽन्यदेवतास्ववर्तमानस्तत एव हेतोः सतीष्वन्यासु देवतासु बन्धमितीति । एवं च नारायणं सन्नमामीतिपदैः साक्षादुक्ते नम्यत्वसामान्ये तद्विशेषे च हेतुसमर्पकतयाऽशेषविशेषतोऽपि बन्धमित्यादि पदानि योजयित्वा तत्राशेषविशेषतोऽपीत्येतदुक्तहेतुद्वयोपपादकतयाऽवशिष्टविशेषणपञ्चकं योजयितुमवतारयति एतदुभयमिति । अत्र बन्धत्वसामान्यनिमित्तसमुदायं तद्विशेषनिमित्तं सर्वोत्तमत्वं चैतच्छब्देन परामृशति । कथमित्याक्षेपे प्रश्ने च । तच्छब्देन परामृष्टेषु चतुर्षु मध्ये आक्षेपः सर्वोत्तमत्वविशिष्टत्वोभयविषयः तत्र विशिष्टत्वस्य प्रकृते नारायणे सर्वोत्तमत्वसहचरितोत्तमत्वरूपतया तयोरन्यत्रादर्शनादत्राप्यसंभावनाशङ्कोदयात् । अत एव निखिलेत्यादिविशेषणत्रयेण तत्संभावकमुक्तम् । प्रश्नस्त्विष्टत्वाधिकृतत्वोभयविषयः । तयोरौपाधिकयोरत एवेतरसाधारणयोर्नारायणेऽसंभावनाशङ्कानुदयात् । किन्तु किंरूपे तत्र ते इति तत्स्वरूपविषयप्रश्नमात्रोदयात् । अत एव प्रियतममाप्यतममप्यखिलैः सुवाक्यैरिति विशेषणाभ्यां तदुभयस्वरूपमात्रं प्रदर्शितमित्यवधेयम् । अभिहितमिति । अन्यथा स्वयमनवस्थितहेतुद्वयस्यान्योपपादकत्वायोगादुक्तमनुपपन्नं स्यादिति भावः । निखिलेत्यादीत्यतःपरं विशेषणपञ्चकमिति शेषः ।

चषकः— प्रकृतनमनक्रियाकर्मीभवन्नारायणे विशेषणषट्कप्रमापकतुल्यकक्षापन्नाखिलद्वितीयान्तानां फलान्तरोद्देश्यकस्तुतितात्पर्यकत्वाशयं प्रकाश्य; संप्रति तदेकतरस्य बीजाभावनियन्त्रिततादृशक्रियाकर्मत्वानुपपत्तिशङ्कायाः तादृशव्यक्त्यन्तराप्रणतिपूर्वकैकतत्प्रणतिकर्मत्वानुपपत्तिशङ्कायाश्च व्युदसनतात्पर्यकतां, शिष्टतत्पञ्चकस्य च तदभिहितार्थसमर्थनतात्पर्यकतां प्रकाशयति **अथवेत्यादि** ।

विपूर्वकशिष्टेः करणसाधनघञन्ततामाश्रित्य व्यावर्तकधर्मप्रमापकतामभिधत्ते **विशिष्यत इति** । अथ 'उपदेशेऽजनुनासिक इत्' इति सूत्रं व्याचक्षाणेन भाष्यकृता 'उपदेश इति घञ्, अयं करणसाधनः? न सिध्यति परत्वात् ल्युट् प्राप्नोति, न ब्रूमो कर्तरि च कारकसंज्ञायामिति, किं तर्हि हलश्चेति संज्ञायामिति वर्तते, न चैषा संज्ञा'इत्यादिना एवं च कृत्वा घञ् न प्राप्नोती'त्यनेन करणे घञो दूषिततया करणसाधनघञन्तता विशेषशब्दस्य न सङ्गच्छत इति चेत् सत्यम् । तत्रैव एवं तर्हि कृत्यल्युटो बहुलमित्येव घञ् भविष्यतीति उपदेशशब्दस्य करणसाधनतया भाष्यवृत्त्यादिषु व्याख्याततया, तद्वत्प्रकृतेऽपि संभवात्, विशेषशब्दस्यापि परीक्षकव्यवहारादिना व्यावर्तकसंज्ञात्वावगमेन हलश्चेत्यपि भविष्यति । 'ईश्वरं गुरुमपि भजस्वे'त्यादाविव प्रातिस्विकधर्मद्वयावच्छिन्ननानाकर्मताकैकधातूपस्थाप्यान्वयित्वरूपसमुच्चयबोधकत्वासंभवेन गीतातात्पर्यनिर्णये 'सर्वकर्माण्यपि सदा कुर्वाण' – इति प्रतीकव्याख्यावसरे 'एकमपि कर्म तदनादरेण न कार्यमि'त्यादिना भगवत्पादैरभिव्याप्तिगमकतया विवृततया, 'यावन्तो ब्राह्मणास्ते सर्वेऽप्याकार्या' इत्यादाविव समभिव्याहृताशेषपदार्थतावच्छेदकीभूतव्यासज्यवृत्तिधर्मनिष्ठपर्याप्तिसंबन्धावच्छिन्नावच्छेदकताकपदार्थान्तरान्वयितारूपाभिव्याप्त्यर्थतया व्याकुरुते **अपिरिति**। तथाच न तादृशाशेषादिपदार्थतावच्छेदकीभूततादृशधर्मसामानाधिकरण्यमात्रविशेषिततादृगन्वयितारूपः सङ्कोच इति भावः । एवमुपरिष्टादपि बोध्यम् ॥ **यावन्त इत्यादि** । विशेषपदोत्तरषष्ठ्या निरूपकतासंबन्धेन वन्द्यपदार्थतावच्छेदकान्वयिज्ञापकत्वं प्रत्याय्यते । तथाच विशिष्टेष्टाधिकृतत्वादिरूपयावद्धर्मनिष्ठा या व्यासज्यधर्मावच्छिन्ना ज्ञापकता, तन्निरूपकवन्द्यत्वाश्रयीभूतमित्यर्थः ।

काशी०— ननु विशेष्यप्रशंसाया विशेषणान्तरैरपि संभवादेतद्विशेषणानामेवोपादाने किञ्चिदसाधारणं प्रयोजनं वाच्यम् । एवं वाच्यार्थस्य प्रकृतोपयुक्तत्वसंभवे प्रशंसामात्रे तात्पर्यमयुक्तम् । एवं विशेष्यप्रशंसया तन्नम्यत्वमात्रसिद्धावपि तस्यैव ग्रन्थादौ नम्यत्वं न सिद्ध्येदतस्तदुपपादकत्वं तावद्विशेषणानामाह **अथवेति** । नम्यत्वं ग्रन्थादौ नम्यत्वम् । आद्यशब्दोत्तरत्वेन व्याख्याति **विशिष्यत इति** । अवन्द्यद्वयावर्त्यत इत्यर्थः । अवन्द्यसाधारण्यस्याप्यवन्द्यान्तरव्यावर्तकत्वसंभवादाह **असाधारणधर्मा इति**। अपिशब्दस्य समुच्चायकत्वायोगादाह **अपिरभिव्याप्ताविति**। अभिव्याप्तिः कात्स्न्र्येन संबन्धः। असाधारणधर्माणां कात्स्न्र्येन वन्दनहेतुत्वान्वयव्यञ्जकोऽपिशब्द इत्यर्थः। अपिचशब्दाभ्यां धर्मसमुच्चय एव न तु धर्मिणस्तस्यैक्यादिति भावेन त इत्युक्तम्। न चाशेषशब्देनैव तादृशान्वयलाभादपिशब्दो व्यर्थ इति वाच्यम् । अशेषशब्दस्य कदाचित्सङ्कोचसंभवात् । न च विशेष्यवाचकपदान्तरसमभिव्याहृताशेषशब्दस्य विशेष्यतावच्छेदकव्यापकाशेषत्वबोधकतानियमाविशेषत्वव्यापकाशेषत्वस्यैव लाभान्न सङ्कोचसंभव इति वाच्यम्। उपचारेणापि क्वचित्सङ्कोचसंभवेन (अनेकत्वमात्रपरत्वसंभवेन)

तन्निवर्तकत्वेनापिशब्दसार्थक्यात् । एवमग्रेऽपि । नन्वसाधारणस्याप्युदासीनधर्मस्य वन्दनाहेतुत्वादपिशब्दासङ्गतिः । एवमसाधारणधर्माणां समुदितानां वन्द्यत्वप्रयोजकत्वे एकैकाश्रयस्य वन्द्यत्वानुपपत्तिरतो विवक्षितार्थमाह **यावन्त इति** । असाधारणपदेनापि **वन्द्यत्वनिमित्तभूतधर्मा एव विवक्षितास्तेषां च प्रत्येकमेव वन्द्यत्वप्रयोजकत्व-**मभिप्रेतमिति भावः । द्वितीयशङ्कोत्तरत्वेनापि व्याख्याति **तथेति** । अत्राशेषशब्दस्य बुद्धिस्थाशेषपरत्वमिति ज्ञापयितुं पद्मादेर्बुद्धिस्थतालाभाय **वन्द्यत्वेन समाशङ्कितादित्युक्तम्** । वैलक्षण्यमात्रस्य प्रकृतानुपयुक्तत्वादाह **अतिशय इति** । परिमाणाद्यतिशयस्यापि तथात्वाच्छक्तिज्ञानाद्यतिशय एवात्र विवक्षित इत्याशयेनाह **सर्वोत्तमत्वमिति** । अत्रापिशब्दस्योक्तार्थत्वायोगादाह **सतीष्वपि देवतासु वन्द्यमिति** । देवतान्तरत्यागेन वन्द्यमित्यर्थः । यद्यपि कुतोऽस्य नम्यत्वं कुतश्चास्यैव नम्यत्वमिति शङ्काद्वयपरिहाराय सर्वोत्तमत्वमेवोक्तम् । विशिष्टप्रयोजकस्य विशेष्यप्रयोजकत्वावश्यंभावात् । न च सर्वोत्तमत्वं देवतान्तरत्यागमात्रे प्रयोजकं न तु वन्द्यत्वेऽपीति वाच्यम् । तथा सति वैशिष्ट्यस्य वन्द्यत्वप्रयोजकत्वानुपपत्तेः । न हि वैशिष्ट्यमात्रं तत्प्रयोजकं न तु निरतिशयवैशिष्ट्यरूपं सर्वोत्तमत्वमिति युज्यते । तथाऽप्यधिकृतत्वादेर्देवतान्तरनिष्ठत्वे तस्यापि वन्द्यत्वापत्तिः । उक्तन्यायेन देवतान्तरस्य वैशिष्ट्यप्रयुक्तवन्द्यत्वायोगेऽप्यधिकृतत्वादिप्रयुक्तवन्द्यत्वसंभवादित्याशङ्कावारणाय कर्मधारयोऽप्यनुसृतः । एतेन अधिकृतत्वादेरपि वक्ष्यमाणक्रमेण नारायणैकनिष्ठतया तत एव तस्यैव वन्द्यत्वसिद्धेरशेषाद्विशेष इति तत्पुरुषानुसरणं व्यर्थमित्यपास्तम् । अधिकृतत्वप्रयुक्तवन्द्यत्वायोगेऽपि देवतान्तरस्य वैशिष्ट्यप्रयुक्तवन्द्यत्वशङ्कावारकतया तत्पुरुषानुसरणसार्थक्यात् । **एतदुभयमिति** । वन्द्यत्वनिमित्तभूतयावद्धर्मवत्त्वं सर्वोत्तमत्वं च कथं कुतः कीदृशं चेत्यर्थः । तत्र वैशिष्ट्यसर्वोत्तमत्वयोः स्वाधिकरणवेष्टसाधनसामर्थ्यसर्वाधिकसद्गुणत्वरूपयोः प्रकारान्तराभावा-त्प्रमाणमात्रे प्रश्नः । अधिकृतत्वेष्टत्वयोस्तु प्रकारेऽपि किमेकदेशवेद्यानुग्राह्यादिसाधारणं तद्व्यावृत्तं वेति प्रश्नो-ऽवगन्तव्यः । नन्वेतदुभयमिति कथम् । उत्तरत्र सर्वोत्तमत्वोपपादनादर्शनादिति चेत् । अत्र वैशिष्ट्योपपादनाये-त्युत्तरवाक्ये निखिलेत्यादिविशेषणत्रयस्य वैशिष्ट्यवन्द्यान्तरातिशयोभयोपपादकत्वं विवक्षितम् । अन्यथा बहुगुण-त्वादिमात्रेण वैशिष्ट्यसिद्धेर्निखिलेत्यादेरस्वारस्यं स्यादिति वाक्यार्थचन्द्रिकारीत्या परिहारः । यादुपत्यरीत्या तु वैशिष्ट्यपदेन सर्वोत्तमत्वरूपवैशिष्ट्यस्यैव विवक्षितत्वान्न दोषः । न चैवं वन्द्यत्वप्रयोजकवैशिष्ट्यलाभः । तस्य तद्घटकत्वादिति । परमते तु पारतन्त्र्यादिदोषराहित्यायुक्त्या सर्वोत्तमत्वमप्यर्थादुपपादितमित्युक्तम् । मम त्वेवं प्रतिभाति । एतदुभयं कथं नारायणस्येति विशेषणपञ्चकस्यैवावतारितत्वात्पञ्चानामपि सर्वोत्तमत्वोपपादकत्व-मवगम्यते । वैशिष्ट्योपपादनाय विशेषणत्रयमित्यादिवदत्रापवादाभावात् । न च निखिलगुणत्वनिर्दोषत्व-जगज्जन्मादिकारणत्वानां निरुक्तसर्वोत्तमत्वं विनाऽनुपपत्त्या तदुपपादकत्वेऽपि कथमखिलवेदवेद्यत्वादेरन्तदुप-पादकत्वमिति वाच्यम् । सर्वगुणत्वं विना सर्ववेदवेद्यत्वस्य सर्वाधिक्यं विना सर्वतोमुख्यवेद्यत्वस्य चानुपपत्त्या तयोरपि सर्वोत्तमत्वोपपादकत्वावश्यंभावात् । एवमाचार्याणामृजुतया तत्प्रियतमत्वादेर्विना सर्वोत्तमत्वानुपपत्ते-स्तस्यापि तदुपपादकत्वमिति ।

गूढ०— ननु स्तुतिपदानां विशेष्यप्रशंसामात्रप्रयोजनत्वे एभिरेव विशेषणैः स्तुतिकरणे बीजाभाव इत्यतः पक्षान्तरमाह **अथवेति** । अनम्यत्वशङ्कायां नम्यत्वोपपादकत्वं विशेषणानां वक्तव्यम् । सैव कथमित्य-

तोऽस्य नम्यत्वं कुतः अस्यैव नम्यत्वं च कुत इति शङ्काद्वयमाह **कुत इति**। अशेषविशेषत इत्यत्र विशेषणं विशेष इति भावसाधनत्वे विशेषो व्यावृत्तिः। एवं चाशेषव्यावृत्तेरित्यर्थः प्रतीयते तदसङ्गतम्। नम्यत्वे हेतुप्रश्ने व्यावृत्तिकथनस्यासङ्गतत्वादित्यतो **व्याचष्टे विशिष्यत इति**। एवं च करणे घञिति भावः। वन्द्यत्वे हेतोः पूर्वमनुक्तत्वात् समुच्चायकापिशब्दवैयर्थ्यमित्यत आह **अपिरभिव्याप्ताविति**। अभिव्याप्तिमेवाह **यावन्त इति**। अस्यैव नम्यत्वं कुत इत्येतत्परिहारत्वेनापि अशेषेति पदं व्याचष्टे **तथेति**। अशेषाद्विशेष इति पञ्चमीति योग-विभागात् समासः। **एतदुभयमिति**। वन्द्यत्वप्रयोजकासाधारणधर्मवत्त्वं सर्वोत्तमत्वं चेत्यर्थः।

प्रदीपः— प्रकारान्तरमाह **अथवेत्यादिना**।

॥ वन्द्यत्वप्रयोजकत्रिविधधर्मोपपादकतया विशेषणानां व्याख्यानम् ॥

वन्द्यानां देवतानां त्रैविध्यम्—

५ **सु०— त्रिविधा हि देवता वन्द्या भवति। विशिष्टा अधिकृता इष्टा चेति॥ न हि देवतावन्दनं व्यसनितया क्रियते। किन्तु विघ्नविघातादिप्रयोजनापेक्षितया। विशिष्टैव देवता तस्येष्टे॥ अधिकृता च स्वविषयग्रन्थप्रबोधादिकं संपादयति॥ वन्दनं खलु भक्त्याद्युपेतमेव सफलम्। तच्चेष्टायामेव देवतायामुपपद्यत इति।**

परि०— तत्र विशेषणत्रयेण विशिष्टत्वम् अन्याभ्यामधिकृतत्वेष्टत्वे, इति वक्तुं वन्द्यत्व-प्रयोजकधर्मास्तावदाह **त्रिविधा हीत्यादिना उपपद्यत इत्यन्तेन**॥ विशिष्टा वन्द्या इत्येतद्व्यनक्ति **न हीति**॥ अधिकृता वन्द्या इत्येतद्व्यनक्ति **अधिकृता चेति**॥ इष्टा वन्द्या इत्येतद्व्यनक्ति **वन्दनमिति**॥ इतिशब्दो हेत्यर्थः। इतिहेतोस्त्रिविधा वन्द्येति पूर्वेणान्वयः।

यादु०— तत्र विशिष्टत्वस्य वन्द्यत्वप्रयोजकत्वमुपपादयितुमाह **न हीति**। अधिकृतत्वस्य तदुपपादयति **अधिकृता चेति**॥ इष्टत्वस्यापि तदुपपादयितुमाह **वन्दनं खल्विति**।

आनन्दः— कानि वन्द्यत्वप्रयोजकानीत्यतस्तान्याह **त्रिविधा हीति**। तत्र विशिष्टत्वस्य वन्द्यत्व-प्रयोजकत्वं अन्वयव्यतिरेकाभ्यामुपपादयति **न हीति**। विघ्नविघातादीत्यादिशब्देन प्रचयगमनपरिग्रहः। विशिष्टैवेत्येवशब्देन व्यतिरेक उक्तः। अधिकृतत्वस्य प्रयोजकत्वमुपपादयति **अधिकृता चेति**। प्रबोधादिक-मित्यादिशब्देन अवधारणादिपरिग्रहः।

कं०रा०— विशिष्टेति । विशिष्टत्वं उत्तमत्वम् । अधिकृतत्वं प्रकृतग्रन्थप्रतिपाद्यत्वम् । **तस्येष्ट इति** । अधीगर्थदयेषां कर्मणीति षष्ठी ।

श्रीनिधि०— विशिष्टा सर्वोत्कृष्टा इत्यर्थः ।

वा०चं०— ननु निखिलेत्यादिविशेषणानामन्यत्राभावेन वन्द्यत्वप्रयोजकत्वानिश्चयात्कथमेषां तत्प्रयोजकत्वेनोक्तिरित्यतो निखिलेत्यादिविशेषणत्रयस्य वन्द्यत्वप्रयोजकत्वेनान्यत्रोपलब्धवैशिष्ट्योपपादकतया; अखिलैः सुवाक्यैराप्यतममिति, सदा प्रियतमं ममेति, प्रकृताधिकृतेष्टस्वरूपप्रदर्शकविशेषणयोश्च तत्प्रयोजकत्वेन अन्यत्रोपलब्धाधिकृतेष्टत्वरूपसामान्यमुखेन वन्द्यत्वप्रयोजकप्रतिपादकत्वसंभवान्नानुपपत्तिरित्यभिप्रेत्याह **त्रिविधा हीति** । अत एव वैशिष्ट्योपपादनायेत्यधिकृतत्वप्रदर्शनायेतीष्टत्वप्रदर्शनमिति वैचित्र्यम् । विशिष्टाधिकृतत्वयोः वन्द्यत्वनिमित्ततामुपपादयन्निष्टत्वस्य वन्दनविशेषणीभूतभक्त्यादिद्वारा विशिष्यवन्द्यत्वनिमित्ततामुपपादयति **न हीत्यादिना** ।

वा०र०— इत्यादिविशेषणानामिति। विशेषणपदानां येऽपि निखिलपूर्णगुणैकदेहत्वादयः तेषां इत्यर्थः। अन्यत्रेत्युक्त्या यावन्तो वन्द्यत्वनिमित्तभूताः इत्यत्र वन्द्यत्वनिमित्ततया लोकप्रसिद्धा इत्यर्थः कार्यः इति सूचयति **उक्तिरिति** । विशेषणत्रयादिनेति शेषः । **एतत्प्रकरणे विशेषणशब्दः** प्रयुज्यमानः तत्र तत्र वाक्येऽर्थानुसारेण क्वचित्शब्दपरः क्वचिच्चार्थपर इति प्रागुक्तं स्मर्तव्यम् । इत्यतः इत्यनन्तरं साक्षात् प्रयोजकत्वाभावेऽपीति शेषः । विशेषणत्रयस्येत्यनन्तरं सर्ववैशिष्ट्योपपादकस्येति पूरणीयम् । **वैशिष्ट्योपपादकतयेत्यस्य** वैशिष्ट्यसामान्योपपादनतात्पर्यकतयेत्यर्थः । सर्ववैशिष्ट्ये प्रतिपादिते गुणवत्त्वेत्यादेः वक्ष्यमाणत्वात् । प्रतिपादकत्वाभावात् । उपपादकतयेत्युक्तम् । उपपादकतयेत्यस्य वन्द्यत्वप्रयोजकप्रतिपादकत्वसंभवादिति वक्ष्यमाणेन संबन्धः । **प्रकृताधिकृतेष्टेति** । प्रकृते ये अधिकृतेष्टे इति प्रकृतत्वोभयविशेषणं अधिकृतेष्टत्वेत्यत्र अधिकृतत्वे इष्टत्वेति योज्यम् । तथा चाधिकृतत्वसामान्यं च तदुभयप्रतिपादनमुखेन । तद्रूपपुरस्कारेणेति यावत् । **मुखेनेत्यनन्तरं** इत्येवंरूपभेदेनेति पूरणीयम् । वन्द्यत्वप्रयोजकप्रतिपादकत्वं सामान्यम् । विशेषणत्रयादेः प्रकारभेदेन संभवति इत्याशयः । एवमत्रोक्तं भवति । वन्द्यत्वप्रयोजकत्वेन निखिलेत्यादिविशेषणानामेवात्रोक्तिर्नाभिमता । अपि तु यानि वन्द्यत्वप्रयोजकानि विशिष्टत्वादीनि तानि निखिलपूर्णत्वादिभिः सिध्यन्ति । तत्सिद्धतत्प्रयोजकैरेव वन्द्यत्वमित्यभिमतम् । विशिष्टत्वादिसिद्धिरपि उक्तविशेषणैः । वैशिष्ट्यस्योपपादनम् । अधिकृतइष्टत्वयोस्तु प्रतिपादनमित्यनेकस्वरूपेण । तथा निखिलेत्यादि यत् सिद्धं सर्वं वैशिष्ट्यं परमाधिकृतत्वं परमेष्टत्वं च तदेव वन्द्यत्वप्रयोजकतया नाभिमतम् । भगवतोऽन्यत्र तत्त्रयाभावेन तस्य वन्द्यत्वप्रयोजकतया निश्चयायोगात् । किन्तु वन्द्यत्वप्रयोजकतया यानि लोके कृत्स्नानि विशिष्टत्वेष्टत्वाधिकृतत्वानि सामान्यानि तेषामेवात्र प्रतिपादने तात्पर्यम् । सर्ववैशिष्ट्यादिप्रतिपादनं तु उक्तसामान्यानि प्रकृते कान् विशेषान् आदाय पर्यवसानीति शङ्कावारणाय विशेषपर्यवसानप्रदर्शनार्थमिति न दोष इति। **नानुपपत्तिरिति** । निखिलेत्यादीनामेव वन्द्यत्वप्रयोजकतयोक्तिर्न संभवति । उक्तविशेषणसिद्धार्थपुरस्कारेऽपि

तस्यार्थस्य सर्ववैशिष्ट्यादिरूपत्वं तस्य चान्यत्राभावेन तत्प्रयोजकतानिश्चयात् अन्यत्र सतः तत्प्रयोजकस्य च सामान्यतो वैशिष्ट्यादेरत्राप्रतिपादनात् निखिलेत्यादिविशेषणानां वन्द्यत्वप्रयोजकाभिधायत्वोक्त्यनुपपत्तिरित्यनुपपत्तिर्नेत्यर्थः। वैशिष्ट्योपपादकतयेत्यादिना प्रागुक्तं विशेषणेषु अवान्तरविशेषं मूलाभिप्रेतत्वेनाह **अत एवेति**। वैशिष्ट्यांशेऽधिकृतत्वेष्टत्वाभ्यां विशेषस्य मूलकाराभिप्रेतत्वादेवेत्यर्थः। निखिलेत्यादिविशेषणैः सिद्धानां वैशिष्ट्यादीनामपि वन्द्यत्वप्रयोजकता नैकप्रकारेण किन्तु अवान्तरविशेषः तत्रास्तीति मूलाभिप्रायं दर्शयन् उत्तरवाक्यमवतारयति **विशिष्टत्वाधिकृतत्वयोरिति**। एतयोरपि उपपादने प्रकारभेदसत्त्वेऽपि इष्टत्ववत् विशेषणद्वारकत्वाभावसाम्यात् उपपादयन्निति **सामान्येनोक्तिरिति** ज्ञेयम्। **मूले विघ्नविघातादीत्यादिपदेन** प्रचयपरिग्रहः। **तस्येति** अधीगर्थदयेशां कर्मणि इति षष्ठी। **प्रबोधादिकं इत्यादिपदेन** तदर्थावधारणादिपरिग्रहः। **न हीत्यादिनेति**। अनेन न हीत्याद्युत्तरग्रन्थानुसारेण त्रिविधा हि देवता वन्द्येत्यत्र विशिष्टत्वादिकं समकक्षत्वेन वन्द्यत्वप्रयोजकतया मूलकारस्य नाभिप्रेतमिति ज्ञायते इत्युक्तं भवति।

कुण्डल०— विशिष्टेति। विशिष्टा सर्वोत्तमा। अधिकृता प्रकृतग्रन्थप्रतिपाद्या। **इष्टा** परमप्रेमास्पदभूता देवता वन्द्या भवतीत्यर्थः। **तस्येष्ट इति**। अधीगर्थदयेषां कर्मणीति द्रष्टव्यम्।

विद्व०— नम्यताप्रयोजकासाधारणधर्मानाह **त्रिविधा हीति**। विशिष्टत्वादेर्वन्द्यत्वप्रयोजकत्वं क्रमेणोपपादयति **न हीत्यादिना**।

ल०र०— अत्र निखिलेत्यादिविशेषणपञ्चकस्य वन्द्यत्वसामान्यनिमित्तसमुदायोपपादकत्वज्ञानस्य याथातथ्येन निमित्तसमुदायज्ञानं विनाऽसंभवात्तं तथा शिष्यान् ज्ञापयन् अशेषविशेषत इत्यादि वाक्यार्थकथनावसरे यावन्तो वन्द्यत्वनिमित्तभूता धर्मास्तेभ्योऽशेषेभ्योऽपि हेतुभ्यो वन्द्यमित्यत्र हेतुभ्य इति हेतुषु बहुत्वस्य धर्मा इति सामान्यत एव धर्मस्वरूपस्य वन्द्यत्वनिमित्तभूता इति धर्माणां वन्द्यत्वनिमित्तत्वस्य चोक्त्या प्रसक्ताः। बहुत्वस्यापर्यवसानात्कियन्तस्ते सामान्यतो निर्देशस्य विशेषप्रतिपत्त्यजनकत्वात्के ते। तेषां वन्द्यत्वनिमित्तत्वं च किं साक्षादुत परम्परयेत्याशङ्क्याश्च परिहरति त्रिविधा हीत्यादिनोपपद्यत इत्यन्तेन। तत्र त्रिविधेत्यनेनाद्यशङ्कायाः परिहारः। **विशिष्टा** वैशिष्ट्योपेता। **वैशिष्ट्यं** चोत्कृष्टत्वम्। **अधिकृता** प्रकृतग्रन्थप्रतिपाद्या। **इष्टा** फलसाधनरूपा। अनेन द्वितीयशङ्कायाः परिहारः। विशिष्टत्वादिरूपास्त इति। तृतीयां परिहर्तुं विशिष्टत्वादीनां वन्द्यत्वनिमित्तत्वमुपपादयन्नादौ तावद्विशिष्टस्य तदुपपादयति न हीति। न हीत्यतःपरं ग्रथारम्भे इति शेषः। **व्यसनितयेति**। कुलधर्मादौ क्रियमाणक्रियान्तरवत्फलाभावेऽप्यादावेवमवश्यमनुष्ठेयमित्याग्रहेणेत्यर्थः। **क्रियत इति**। अन्यथा कर्तुरपेक्षावत्त्वं वा क्रियायाः सातत्यं वा स्यादिति भावः। विघ्नविघातादीत्यादिपदेन प्रारिप्सितपरिसमाप्तिप्रचयपरिग्रहः। **विशिष्टैवेति**। न त्वविशिष्टा न चाधिकृता नापीष्टेत्येवार्थः। तस्य प्रयोजनस्य। कर्मणि षष्ठी। ईष्टे दातुं समर्था। अनेन विशिष्टत्वस्य देवतायां वन्दनकर्त्रपेक्षितविघ्नविघातादिफलप्रदानसामर्थ्यनिश्चयजननद्वारैव वन्द्यत्वनिमित्तत्वं न साक्षादित्युक्तं भवति। एवं विशिष्टत्वस्य वन्द्यत्वप्रयोजकत्वमुपपाद्याधिकृतत्वस्यापि तदुपपादयति **अधिकृता चेति**। वन्द्यत्वहेतुसमुच्चये

अधिकृतैव न त्वनधिकृतेष्टा विशिष्टा चेत्यवधारणे वा चशब्दः । ग्रन्थप्रबोधः ग्रन्थजन्यः प्रबोधः । आदिपदेन तदर्थं मननावधारणादिकं ग्राह्यम् । संपादयतीति । तथा चाधिकृतत्वस्य देवतायां वन्दनकर्त्रपेक्षितप्रकृतग्रन्थप्रबोधादि-संपादकत्वनिश्चयजननद्वारैव वन्द्यत्वनिमित्तत्वमिति भावः । इष्टत्वस्यापि तदुपपादयति वन्दनं खल्विति । भक्तिपदं तदतिशयपरम् । आदिपदेन श्रद्धातिशयो ग्राह्यः । तच्च भक्त्याद्युपेतं वन्दनं च । इष्टायामेवेति । न त्वनिष्टायां विशिष्टायामधिकृतायामपि देवतायामित्येवार्थः । उपपद्यत इति । अयं भावः । वन्दनं तावन्न हि देवतावन्दनं व्यसनितया क्रियत इत्यादिना सफलमित्युक्तम् । सफलत्वं च तस्येतिकर्तव्यतासहितस्यैव । न केवलस्य । अदर्शनात् । इतिकर्तव्यता चात्र भक्त्याद्यतिशयोपेतत्वम् । भक्त्याद्यतिशयश्चेष्टायामेव देवतायां भवति । नान्यस्याम् । तत्र वस्तुतो वैशिष्ट्यादिके सत्यपि तत्प्रयुक्तभक्त्यादिमात्रे सत्यपि च स्वापेक्षितफलालाभे भक्त्याद्यतिशयानुदयस्य सर्वानुभवसिद्धत्वात् । तथा चेष्टत्वस्य वन्दनं कर्त्रपेक्षितफलाय वन्दने भक्त्यादीतिकर्तव्यतासंपादनद्वारैव वन्द्यत्व-निमित्तत्वमिति । विशिष्टत्वादीनां वन्द्यत्वप्रयोजकत्वोपपादने सामान्य इति शब्दः । अत्र कुतोऽन्यासु देवतासु सतीष्वित्यादि बहुस्थलेषु देवतापदप्रयोगे न देवतावन्द्यत्व एवेदं विशिष्टत्वादिनिमित्तत्रयं न गुर्वादिवन्द्यत्व इति सूचयति । तत्र गुरुत्वपितृत्वमातृत्वादीनामेव निमित्ततयोपलम्भात् । अत एव वन्द्यत्वनिमित्ताशेषासाधारणधर्मपरतया विशेषपदनिर्वचनावसरे देवतागुर्वादिसर्ववन्द्यसङ्ग्रहाय विशिष्यते वस्त्वेभिरिति वस्तुपदमेव प्रयुक्तं न तु देवतेति । तेन सर्वत्रापि वन्द्यत्वे यदि विशिष्टत्वादित्रयमेव निमित्तं स्यात्तर्हि देवतातिरिक्तगुर्वादीनां वन्द्यतैव न स्यादित्याशङ्का परिहृता भवति । गुर्वादिष्वपि गुरुत्वादिनिमित्तैः संप्रतिपन्ननम्यताया अपरित्यागात् । तत्राप्यन्यदेवतावन्द्यत्वे इदं विशिष्टत्वादिनिमित्तत्रयमेव । अत एव त्रिविधा हि देवता वन्द्या भवतीत्यादिना सामान्यत एवोपपादनं कृतम् । नारायणाख्यदेवतावन्द्यत्वे तूभयमपि निमित्तं भवति । तदेवं पितरं पतिं गुरुतमं वन्दे रमावल्लभमिति टीकोक्तेः । 'भवायनस्त्वं भव विश्वभावन त्वमेव माताऽत्मसुहृत्पतिः पिता । सत्त्वं सद्गुरुर्नः परमं च दैवतमि'ति भागवतोक्तेश्च । त्रिवृत्कुर्वत उपदेशादित्यादिसूत्रभाष्यानुभाष्येषु पितृत्वस्योपासनापरपर्यायवन्दनार्थं स्पष्टमुक्तत्वाच्च । तेनाशेषेति सविशेषणेनाशेषाश्च ते विशेषाश्चेति बहुवचनान्तेन चात एव सङ्कोचानर्हेण विशेषपदेनैव निमित्तत्रयलाभात् पुनस्तदर्थमशेषविशेषतोऽपीत्यसङ्कोचव्यञ्जकं मूलेऽपिपदं यावन्तो वन्द्यत्वनिमित्तभूता धर्मास्तेभ्यो अशेषेभ्योऽपि हेतुभ्यो वन्द्यमिति तद्व्याख्यानं चायुक्तं स्यादित्याशङ्कापि परिहृता भवति । नारायणं प्रकृष्टाप्रकृष्टानां सर्वेषामपि वन्द्यत्वनिमित्तानां सद्भावात्तत्र केषाञ्चित्सङ्कोचाशङ्कायामेकमप्यविहाय निरुपचरितैः सर्वैरपि निमित्तैर्नारायणो वन्द्य इतीमं विशेषं द्योतयितुं मूलेऽपिपदस्य यावन्त इत्यादि तद्व्याख्यानस्य च युक्तत्वसंभवात् । तथापि नारायणं निखिलेत्यादिविशेषणपञ्चकेन विशिष्टत्वादिधर्मत्रयस्यैवोपपादनं तु प्राधान्याभिप्रायेण वा प्रकृतत्वाभिप्रायेण वा युक्तमिति ।

चषकः— अथ कथमेतत् । नारायणपक्षकवन्द्यत्वसाध्यकदर्शितधर्मसंबन्धकप्रयोगस्याभिप्रेततायां, हेतुवाक्यघटकपदानां प्रयोजनाभावे प्रयुक्तनिग्रहासिद्धिप्रसङ्गेन प्रत्येकहेतुताकल्पस्याश्रयितव्यतया, धूमालोक-भस्मनिष्ठवह्निनिरूपितज्ञापकतासु तत्तद्वृत्तिधूमत्वादिरूपप्रातिस्विकधर्माणामेव अवच्छेदकतावत् प्रकृतेऽपि वैशिष्ट्यादिवृत्तितथाविधधर्माणामेव तत्तद्वृत्तिज्ञापकतावच्छेदकतया व्यासज्यवृत्तिधर्मस्य तदनवच्छेदकतया

असामञ्जस्यमिति चेत्; मैवम्, धूमालोकभस्मभ्यो वह्निमानित्यादिनिर्देशानुरोधेन व्यासज्यवृत्तिधर्मावच्छिन्नत्वस्य पारिभाषिकतद्व्यापकतात्मकतया क्षतिविरहात्। न च प्रातिस्विकज्ञापकतायां न धूमादित्रितयवृत्तिधर्मव्यापकतेति वाच्यम्, वह्निनिरूपितज्ञापकतात्वेन व्यापकतायाः निर्बाधत्वादित्यलं सूक्ष्मेक्षिकया।

एतदुभयं वन्द्यत्वप्रयोजकधर्मसाकल्यवन्द्यान्तरावधिकोत्तमत्वोभयम्। नारायणे धर्मिणि वन्द्यत्वसाधक-निखिलेत्यादिविशेषणानां पक्षीकृतेशान्यस्मिन्नभावेन, तत्र प्रकृतसाध्यनिरूपितव्याप्तेर्दुर्ग्रहतया, तैर्न सङ्गच्छत इति निदर्शनगृहीतसाध्यनिरूपितव्याप्तिकविशिष्टत्वेष्टत्वाधिकृतत्वरूपप्रधानसाधनान्तर्गतोत्तमत्वरूपवैशिष्ट्यानुमापक-प्रमापकद्वितीयान्तत्रिकस्य निखिलगुणपूर्णावद्यगन्धवैधुर्यविश्वोत्पादकत्वादिनियन्त्रितसर्वोत्तमत्वप्रतिपादने बहुगुण-वत्त्वरागादिदोषदूरत्वबहुजनकत्वादिनिबन्धनमुत्तमत्वं कैमुत्येन सेत्स्यति; इत्याशयेन व्युत्पाद्यशिष्टद्विकस्य प्रधानसाधनद्वयप्रत्यायकतां, तत्रापीष्टत्वं वन्दनक्रियाविशेषणीभूतभक्त्यादिसाहित्यसंपादन एवोपयोक्ष्यते न विशेष्यांश इत्याशयेन आद्यशङ्कां, सर्ववैशिष्ट्यसर्ववेदप्रतिपाद्यत्वानन्योद्देश्यकवेदकरणप्रतिपादनक्रियाकर्मत्वान्य-तरात्मकाधिकृतत्वसार्वकालिकातिशयितभाष्यकारीयप्रीतिविषयत्वानामीशासाधारणानां प्रतिपादनेन द्वितीयशङ्कां चापाचिकीर्षुर्व्याकुरुते **त्रिविधा हीत्यादिनाऽवधेयमित्यन्तेन**।

काशी०— निखिलेत्यादीनां वन्द्यत्वनिमित्तभूतयावद्धर्मप्रतिपादकत्वं न प्रत्येकमपि तु संभूयैवेति दर्शयि-ष्यते। तच्च वैशिष्ट्यादित्रयस्यैव वन्द्यत्वनिमित्तत्वे संभवति। निखिलेत्यादीनां तावन्मात्रप्रतिपादकत्वादतस्त्रयाणामेव वन्द्यत्वनिमित्तमाह **त्रिविधा हीति**। ननु जडतत्त्वप्रतिपादकग्रन्थेष्वधिकृतस्यापि तस्य न वन्द्यत्वमस्ति। अस्ति च गुवदि. । यद्वक्ष्यति गुरुत्वेनात्र प्रणामाचरणादित्यतो नाधिकृतत्वादेर्वन्द्यत्वनिमित्तत्वसंभव इत्याशङ्क्याह **देवतेति**। देवतावन्द्यत्वस्यैवात्र विवक्षितत्वान्न दोष इति भावः। विशिष्टत्वादीनां क्रमेण वन्द्यत्वनिमित्ततामुप-पादयति **न हीति**। **व्यसनितयेति**। यदकरणे चित्तक्षोभस्तच्चिकीर्षा व्यसनम्। यथा पद्माभ्यासाहितकरपरिस्पन्दादि-चिकीर्षा। **विशिष्टेति**। देवता तुष्टा सती तस्य प्रयोजनस्येष्टे साधिका भवति। अधिकृता च देवता तुष्टा स्वप्रतिपादकग्रन्थनिष्पादकशब्दार्थस्फूर्त्यादिकं ददातीत्यर्थः। **तच्चेति**। भक्त्यादिविशिष्टवन्दनमित्यर्थः। इत्यतो वन्द्येति संबन्धः। तथाच समर्थप्रसादद्वारा निर्विघ्नपरिसमाप्त्यादिसाधनभक्त्यादिविशिष्टवन्दनविषयत्वे सामर्थ्यरूप-विशिष्टत्वस्य द्वारनिर्वाहकत्वादधिकृतत्वस्य सहकारिसंपादकत्वादिष्टत्वस्य च विशिष्टकारणनिर्वाहकत्वा-न्निमित्तत्वमिति भावः। नन्वेवं देवतावन्दने विशिष्टत्वादीनां त्रयाणामप्यपेक्षिततया प्रत्येकं वन्द्यत्वनिमित्तत्वा-नुपपत्तिः। न च तेषां समुदितानामेवात्र निमित्तत्वमभिप्रेतमिति युक्तम्। धर्मादिकं वन्दनीयं स्यादिति ग्रन्थविरोधात्। धर्मादेरधिकृतत्वेऽपि विशिष्टत्वादिविरहेण वन्द्यत्वाप्रसक्तेः। व्याख्यातृणां स्वर्गस्रक्चन्दनादेः प्रियत्वादिमात्रेण वन्द्यत्वापादनविरोधाच्चेति चेन्न। अधिकृतत्वमात्रेण प्रबोधादिकामस्य विशिष्टत्वादिमात्रेण फलान्तरकामस्य च देवतावन्दनदर्शनात्। भक्तिसामान्यस्योभयत्र घटकत्वेऽपि वक्ष्यमाणेष्टत्वघटकविशिष्टभक्तेर्विशिष्याघटकत्वाच्च। विशिष्टत्वादीनां पृथग्वन्द्यत्वनिमित्तत्वमावश्यकम्।

गूढ०— कानि वन्द्यत्वप्रयोजकानीत्यत आह **त्रिविधा हीति** । तत्र विशिष्टत्वस्य वन्द्यत्वप्रयोजकत्वमन्वयव्यतिरेकाभ्यामुपपादयति **न हीति** । विघ्नविघातादीत्यादिशब्देन प्रचयगमनपरिग्रहः । विशिष्टैवेत्येवशब्देन व्यतिरेक उक्तः । अधिकृतत्वस्य प्रयोजकत्वमुपपादयति **अधिकृता चेति** । प्रबोधादिकमित्यादिशब्देनावधारणादिपरिग्रहः ।

वैशिष्ट्योपपादकतया विशेषणत्रयस्य व्याख्यानम्—

६ **सु०— तत्र वैशिष्ट्योपपादनाय निखिलपूर्णगुणैकदेहं निर्दोषं अस्योद्भवादिदम् इति विशेषणत्रयम् । निखिलाः निश्शेषाः पूर्णाः प्रत्येकमप्यनवधिकाः गुणाः आनन्दादयः । एकशब्दः केवलार्थः । त एव देहो यस्य न पुनः प्राकृतादिरिति तथोक्तः ॥ निष्क्रान्तो दोषेभ्यः पारतन्त्र्यादिभ्य इति निर्दोषः ॥ अस्य प्रत्यक्षादिप्रमाणसिद्धतया बुद्धिसन्निहितस्य स्वव्यतिरिक्तप्रपञ्चस्य उद्भवः उत्पत्तिः आदिः अस्येति उद्भवादि जन्माद्यष्टकं तद्यथासंभवं ददातीति उद्भवादिदः तम् । अस्येति संबन्धमात्रे षष्ठी । अशेषविशेषतोऽपि इत्येतत् अस्योद्भवादिदमिति अनेनापि संबध्यते । वियदधिकरणादिव्युत्पाद्यसमस्तावान्तरभेदसहितोद्भवादिदमिति ॥**

परि०— ततः किमित्यत आह **तत्रेति** । त्रेधा वन्द्यत्वे सतीति वा, विशेषणपञ्चकमध्य इति वाऽर्थः ॥ एकशब्दस्य सङ्ख्यार्थत्वेन गुणविशेषणत्वे 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन' इत्यनेनैकशब्दस्य प्रथमान्तनिर्देशेन समासविधानात् 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्युपसर्जनसंज्ञायां उपसर्जनं पूर्वमिति पूर्वनिपातो, निखिलेत्यनेन विरोधश्च प्राप्नोतीत्यत आह **एकशब्द इति** । एके मुख्यान्यकेवला इत्युक्तेः । 'दोषैकदृक्पुरोभागी दीर्घसूत्रश्चिरक्रिय' इत्यमरे 'नियतिकृतनियमरहितां ह्लादैकमयीमि'ति काव्यप्रकाशे च प्रयोगात्सङ्ख्यार्थस्यैवैकशब्दस्य पूर्वकालैकेति सूत्रे निर्देशः, न केवलार्थस्येति न दोष इति भावः ॥ केवलार्थैकशब्दस्य गुणविशेषणत्वे लब्धार्थमाह **त एवेति** ।

'निरादयः क्रान्ताद्यर्थे पञ्चम्ये'त्युक्तेराह **निष्क्रान्तो दोषेभ्य इति** । पारतंन्त्र्यादिभ्य इत्युक्त्या कथं सर्वोत्तमत्वं नारायणस्येत्येतदंशोऽप्युपपादितो ध्येयः ॥ ईश्वरस्य जन्मलयाद्यभावोक्तिपरैः असंभवस्त्वित्याद्यधिकरणैरविरोधाय वा, व्याघातपरिहाराय वाऽऽह **स्वव्यतिरिक्तेति** । एतेनापि सर्वोत्तमत्वमस्योपपादितं ध्येयम् ॥ **जन्माद्यष्टकमिति** । 'गुणव्यत्यय एतस्मिन्मायावर्त्त्वादधीशितुः । न पौर्वापर्यमिच्छन्ति नद्यां भ्राम्यद्वमेरिवे'ति तृतीयस्कन्धोक्त्या पौर्णमास्यमावास्यातिथ्योरिव

जन्मस्थित्यादेरिदंप्राथम्याभावेऽपि लब्धजन्मन एव स्थितिलयादीति जन्मन आदित्वमुपेत्य जन्मादीत्युक्तम् ॥ **यथासंभवमिति** । जन्मस्थितिलयनियमनानि सर्वस्य, ज्ञानाज्ञानबन्धमोक्षान् ब्रह्मादिचेतनस्य, तत्रापि मोक्षं सतामेव इत्येवंरूपेणेत्यर्थः ।

'चतुर्थी संप्रदाने' इति चतुर्थ्या भाव्यम्, कथम् 'अस्य' इति षष्ठीत्यत आह **संबन्धमात्र इति** । न तु संप्रदानत्वमप्यत्र विवक्ष्यत इति मात्रपदार्थः । 'कर्मणा यमभिप्रैति स संप्रदानमि'ति सूत्रे 'अचोन्त्यादिटी'त्यादाविव लघुसंज्ञायाः कार्यत्वेऽपि 'संप्रदानम्' इति गुरुसंज्ञाकरणमन्वर्थत्वविज्ञानार्थम्। तेन, बहुमानपूर्वं स्वस्वत्वत्यागेन परस्वत्वापादनादिरूपदानं यत्र, तत्रैव संप्रदानसंज्ञा, नत्वन्यत्र रजकस्य वस्त्रं ददातीत्यादौ इति वृत्त्यादावुक्तेः इहापि संप्रदानसंज्ञाऽभावात् 'षष्ठी शेष' इति षष्ठ्येवेति भावः ॥ यद्वोद्भवादीतिपदस्य नित्यसापेक्षत्वात्समास इत्युपेत्य कर्मत्वसंप्रदानत्वविशेषौदासीन्येन संबन्धसामान्याश्रयेणोद्भवादीत्यनेन, तद्दमिति ददातिना वाऽन्वय इति भावेनाह **संबन्धमात्र इति** ॥ अथवा अस्येति षष्ठी कर्तरि चेत् आदिपदोक्तपालनादिनाऽनन्वयः, तस्य जगत्कर्मकत्वात्; कर्मणि चेदुद्भवादिना अनन्वयः तस्य तत्कर्तृकत्वादत आह **संबन्धमात्र इति** ॥ ननु 'स्वव्यतिरिक्तप्रपञ्चस्ये'ति व्याख्या न युक्ता, प्रकृतिजीवकालवेदादेर्नित्यस्य जन्माद्ययोगादित्यत आह **अशेषेति** ॥ तथात्वे कोऽर्थ इत्यत आह **वियदिति** । विशेषत इति तृतीयार्थे तसिरित्युपेत्यार्थमाह **अवान्तरभेदसहितेति** । 'न वियदश्रुतेः' । 'एतेन मातरिश्वा व्याख्यातः' । 'क्षोऽत एव' इत्येतेष्वधिकरणेषु नित्यस्यापि पराधीनविशेषावास्तिरूपजनिरुच्यते । प्रकृतेः जडस्य परिणामः, तदभिमानिश्रियः सिसृक्षुत्वम्, गगनस्य मूर्तसंयोगित्वम्, मातरिश्वादिजीवस्य देहयोगः, इन्द्रियाणामुपचयः, इत्यादिरूपेण व्युत्पाद्याशेषविशेषसहितो य उद्भवः; तथा जीवानां प्रकृतैतावत्त्वं हीत्यत्रोक्तदिशा अन्नादिदानेन, अन्येषां नित्यानामुत्तरकालसंबन्धादिना स्थितिरित्यादि, तथा संहृतिरपि कार्यस्य जडस्य ध्वंसः, जीवानां देहलयः, श्रियोऽत्यन्तसामीप्यमित्यादि; तदादिदमित्यर्थः ।

गु०दी०— तत्र वैशिष्ट्योपपादनाय इत्यत्र सर्वोत्तमत्वरूपवैशिष्ट्योपपादनायेत्यर्थः । संप्रदानाख्यसंबन्धविशेषापेक्षायां "संप्रदाने चतुर्थी"ति वचनात् अस्मै उद्भवादिदमिति स्यादिति शङ्कापरिहाराय "एकशतं षष्ठ्यर्था" इति सामान्यतः सकलसंबन्धेष्वपि षष्ठीविधानात् । **संबन्धमात्रे षष्ठी** इत्युक्तम् ।

यादु०— तत्र वैशिष्ट्योपपादनायेति । अत्र वैशिष्ट्यं तु सर्वोत्तमत्वरूपमेव विवक्षितम् । अत 'एतदुभयं कथं नारायणस्येत्य'वतार्य सर्वोत्तमत्वप्रतिपादनमुत्तत्र पृथङ् न कृतमित्यवधेयम् ॥ **केवलार्थ इति** । सङ्ख्यार्थत्वे पूर्वनिपातः स्यादिति भावः । 'निरादयः क्रान्ताद्यर्थे पञ्चम्ये'ति वचनादाह **निष्क्रान्त इति** ।

नन्वस्येति कथं षष्ठी । न तावत् कर्तरि षष्ठी, भगवत एव कर्तृत्वात्; नापि कर्मणि, उद्भवादेरेव कर्मत्वात्; हेत्वादिरूपार्थान्तरस्य च असंभवादित्यत आह संबन्धमात्र इति । तथाच 'षष्ठी शेष' इत्यनेनैवात्र षष्ठीति भावः । सौत्रशेषशब्दार्थकथनाय संबन्धमात्र इत्युक्तम् । उक्तादन्यः शेष उच्यते । कर्मादयश्च प्रातिपदिकार्थपर्यन्ताः पूर्वमुक्ताः । अतस्तदन्यो यः संबन्धः स एव शेषशब्देन विवक्षित इति ॥ षष्ठ्यर्थभूतानां स्वस्वामिभावादिसंबन्धानामनेकत्वात्सर्वेषां सामान्यरूपेण ग्रहणाय मात्रपदम् ॥ केचित्तु "ननु दानकर्मणोद्धवादिनाऽस्य जगतोऽभिप्रेततया संप्रदानत्वात्तत्र चतुर्थ्या भाव्यम्, अस्येति षष्ठी कथमित्यत आह अस्येतीति । एवं च विवक्षातः कारकाणि भवन्तीत्युक्तत्वेन संप्रदानत्वस्य अविवक्षितत्वात् 'षष्ठी शेष' इति संबन्धमात्रे विहिता षष्ठ्येव युक्ता । यद्यप्युद्धवादौ न स्वस्वत्वपरित्यागरूपदानकर्मत्वम्, ईश्वरस्य सर्वदा सर्वेश्वरत्वात्, तथाच न संप्रदानत्वप्राप्तिः, तथाऽपि परस्वत्वापादनमात्रस्यापि दानशब्दार्थतया कन्यादानादौ प्रसिद्धत्वेनात्र कथञ्चित्संप्रदानत्वप्राप्तिसंभवः" इत्याहुः ॥ विषयधिकरणादीति । तत्र हि क्वचित्पराधीनविशेषावाप्तिः, क्वापि देहलाभः, कुत्रचित्स्वरूपलाभः, इत्यनेकप्रकारेणोद्धव कथितः । ल्योऽपि 'विपर्ययेणे'त्यत्रोत्पत्तिक्रमवैपरीत्येन प्रतिपादित इत्यवधेयम् ।

बं०प०— 'निरादयः क्रान्ताद्यर्थे पञ्चम्ये'ति वचनात् निष्क्रान्तो दोषेभ्य इत्युक्तम् ॥ स्वव्यतिरिक्तप्रपञ्चस्य पञ्चाप्यवयवादिप्रपञ्चस्य ॥ रमायामज्ञानबन्धयोरभावेन जन्माद्यष्टकस्य प्रत्येकं सर्वत्राभावात् यथासंभवम् इत्युक्तम् । विषयधिकरणेति । 'तस्मात्तद्वशतैव हि । उत्पत्तिरत्र कथिते'त्येवं पराधीनविशेषावाप्तिरूपमुत्पत्तिमभिधाय, तदवान्तरभेदाः पराधीनविशेषाः 'सिसृक्षुत्वविशेषं तत् साक्षाद्भगवदिच्छया । प्राप्यैव सृष्टेत्युदिता प्रधानं विकृतेरपि । पुमांसो देहसंबन्धात्सृष्टिमन्त इतीरिताः', 'मूर्तसंबन्धपरतन्त्रविशेषयुक् । स्वमेवोत्पत्तिमन्नाम वेदस्यापीश्वरेच्छया । व्यक्तिर्नाम विशेषोऽस्ति' इत्यादिनोपपादिता द्रष्टव्याः ।

आनन्दः— ननु निखिलपूर्णेत्यत्र निखिलपूर्णशब्दयोरेकार्थत्वात्पौनरुक्त्यम् । किञ्च दुःखादीनामपि गुणशब्दवाच्यत्वस्य प्रसिद्धत्वात्तद्धत्वं प्रतीयते । किञ्च अत्रैकशब्दस्य संख्यार्थकत्वे गुणशब्दान्वयेन निखिलपूर्णपदाभ्यां विरोधः पूर्वकालेति सूत्रेण पूर्वनिपातश्च स्यादित्यतो व्याचष्टे निखिला इति । एकशब्दस्य केवलार्थत्वं व्यावृत्त्यभाव इत्यत आह न पुनरिति । अत्रादिशब्देन भौतिकपरिग्रहः । न च भौतिकस्यापि प्राकृतत्वात्पृथग्ग्रहणायोग इति वाच्यम् । भौतिकभिन्नस्य शुद्धप्राकृतस्यापि सत्त्वादिति भावः । निष्क्रान्त इति । बहुव्रीहेरन्यपदार्थप्रधानत्वाद्धेतिपदार्थप्रधानः षष्ठीतत्पुरुषो निरादयः क्रान्ताद्यर्थे पञ्चम्येत्यनेन निराकृतः । नन्वस्योद्धवादिदमित्ययुक्तम् । अस्येतीदंशब्दस्य प्रत्यक्षवाचित्वेन जगतश्चाप्रत्यक्षत्वेन तत्रेदंशब्दप्रयोगासंभवात् । यदि बुद्धिसन्निहितत्वेन तत्रास्येति प्रयोगस्तदा स्वस्यापि जगन्मध्ये प्रवेशेन स्वस्यापि स्वयमुद्धवादिद इति प्रतीयते । तच्च प्रमाणविरुद्धम् । उद्धवादिदमित्यत्रातद्गुणसंविज्ञानबहुव्रीहिणा स्थितिमात्रकर्तृत्वं प्रतीयेत । तच्चोत्पत्तिस्थितीत्यादि प्रमाणविरुद्धमित्यतो व्याचष्टे अस्येति । जन्माद्यष्टकं सर्वस्य ददातीत्युक्ते श्रीमुक्तादेरपि अज्ञानादि ददातीति स्यात् । तच्चायुक्तम् । प्रमाणविरोधादित्यत उक्तं यथासंभवमिति । यस्य यावत्प्रमाणसिद्धं तस्य तावद्ददातीति न प्रमाणविरोधः । ननु

अस्योद्भवादिदमित्यत्र समासाभावो न युक्तः। अस्येति षष्ठ्याः कृद्योगलक्षणत्वात् कृद्योगलक्षणा षष्ठी न समस्यत इति वचनादेतदुद्भवादिदमिति स्यादित्यत आह **अस्येति**। **संबन्धमात्रे षष्ठीति**। नेयं कृद्योगलक्षणा षष्ठी। किन्तु संबन्धसामान्ये षष्ठी। तथाच नानेन समासप्राप्तिः। न चैवमपि षष्ठीति सूत्रेण समासप्राप्तिरिति वाच्यम्। महाविभाषया वाक्यत्वस्य संभवात्। यद्वा रुद्राय गां ददातीत्यत्र दानकर्मणा अभिप्रेयमाणत्वेन रुद्रायेत्यत्र चतुर्थीवत् प्रकृतेऽपि दानकर्मणा उद्भवादिना जगतो अभिप्रेयमाणत्वादस्येत्यत्र चतुर्थ्या भवितव्यमित्यत्राह **अस्येति**। तथाच विवक्षातः कारकाणि भवन्तीति न्यायात्संप्रदानत्वस्याविवक्षितत्वात् **संबन्धसामान्ये षष्ठीत्वस्याभिप्रेतत्वात् चतुर्थीप्रसङ्ग** इति भावः। ननु कर्तृकर्मणोः कृतीति कृत्प्रयोगे **कर्तरि कर्मणि षष्ठी स्यादिति षष्ठीविधानादस्येति षष्ठी कर्तरि वा कर्मणि** वा। नाद्यः। तथा सति उद्भवं प्रति जगतः कर्तृत्वापत्तितः परमात्मनस्तदभावापत्तेः। न द्वितीयः। उद्भवादिदमिति कृत्प्रत्ययं प्रति उद्भवादेरेव कर्मत्वेन जगतः कर्मत्वासंभवादित्यत आह **अस्येति**। **संबन्धमात्रे षष्ठीति**। न च मात्रशब्दोऽनर्थकः। संबन्धे षष्ठीत्येतावदेवास्तु इति वाच्यम्। तथा सति संबन्धविशेषमादाय जगत्कर्मकोद्भवदातृत्वमेव स्यान्न तु जगत्कर्तृकोद्भवादिदातृत्वम्। संबन्धमात्र इत्युक्तेः जगत्कर्मको वा जगत्कर्तृको वा यावज्जगत्संबन्ध्युद्भवः तावतः सर्वस्यापि दातृत्वं सिद्धचतीति युक्तं तद्ग्रहणमिति भावः। यद्वा कर्मषष्ठीपक्षे जगत्कर्मकोद्भवादिदमित्यर्थः स्यात्। एवं च जगन्मध्यपतितस्य जीवजातस्य देहयोगद्वारा उत्पत्तिमत्त्वेन साक्षादुद्भवकर्मत्वाभावात् श्रियश्च पारतन्त्र्यरूपोत्पत्तिमत्त्वेन साक्षादुद्भवकर्मत्वाभावात् उद्भवादिदातृत्वं न सिद्धचेदित्यतः संबन्धमात्र इत्युक्तम्। तथाच साक्षात्परम्परासाधारणसंबन्धेन जगत्कर्मकोद्भवादिदमित्यर्थः। एवं च यस्य साक्षात्स्वरूपेणोद्भवादि यस्य च देहयोगद्वारा यस्याप्यभिमानिद्वारा यस्याश्च पारतन्त्र्यरूपेण साक्षाद्वा परम्परयोद्भवादि तस्य सर्वस्यापि दातृत्वं सिद्धचतीति भावः। अशेषपदसंबन्धलभ्यमर्थमाह **वियदिति**।

कं०रा०— अस्येतीदंशब्देन प्रत्यक्षसन्निधापितप्रपञ्चमात्रपरामर्शे नारायणस्य सकलजगत्कारणत्वं नोक्तं स्यादित्यतस्तं शब्दं प्रमाणसिद्धतया बुद्धिसन्निहितसकलप्रपञ्चपरत्वेन व्याचष्टे **प्रत्यक्षादीति**। नन्वस्येतीदंशब्दनिर्दिष्टप्रपञ्चस्योद्भवादिदाने कर्मणा यमभिप्रैति स संप्रदानमिति संप्रदानतयाऽस्मा इति चतुर्थ्या भाव्यमित्यत आह **संबन्धमात्र इति**। नात्र प्रपञ्चस्य संप्रदानत्वविवक्षा। किन्तु शेषत्वविवक्षैव। अतः षष्ठी शेष इति षष्ठ्युपपत्तिरिति भावः। **वियदधिकरणादीति**। तत्राभूत्वाभवनलक्षणः पराधीनविशेषावासिलक्षण इत्यादिरूप उद्भवस्यावान्तरभेदो वक्ष्यत इति भावः।

श्रीनिधि०— **एकशब्दः** एकत्वबद्वचनः। **तथा च निखिलपूर्णगुणैरैक्यमापन्नो यस्य देहः स तथोक्तः**। एवं च देहस्य गुणात्मकत्वमुक्तं भवतीति चन्द्रिकोक्तार्थः। ननु कर्मणा यमभिप्रैति स संप्रदानमित्यनेन दानकर्मत्वाभिमते संप्रदानसंज्ञाविधानात् इदंशब्दस्य संप्रदानसंज्ञायां चतुर्थी संप्रदान इति चतुर्थ्या भाव्यम्। तथा चास्मै इति स्यात्। अस्येति षष्ठी कथं इत्यत आह **अस्येति**। **संबन्धमात्रे षष्ठीति** संप्रदानसंप्रयोजकत्वाकारेण संबन्धो न विवक्षित इति भावः। अथवा अस्येति षष्ठी किं जन्यजनकभावे उत रक्ष्यरक्षकभावादौ। नाद्यः। आदिपदगृहीतस्थित्यादिदमित्यनेनानन्वयापत्तेः। न द्वितीयः। उद्भवपदेनानन्वयप्रसङ्गात्। अथोच्येत। अस्योद्भवादिदं अस्य स्थित्यादिदं इति प्रत्येकं बुद्धचा विवेकेन अन्वय इति। तन्न। स्थित्यादिसप्तानां एकेनैवादिशब्देन गृहीतत्वेन प्रत्येकं

संबन्धानुपपत्तेरित्यत आह अस्येति । संबन्धमात्र इति । संबन्ध इति संबन्धः सामान्याकारेणैव विवक्षितः । न तु विशेषाकारेणेति भावः ।

वा०वृ०— सर्वविशेषणानां वैशिष्ट्यादिसर्वप्रतिपादकत्वप्रतीतिमपाकरोति तत्रेत्यादिना । निखिलपूर्ण-गुणत्वपारतन्त्र्यादिराहित्यसकलजगज्जनकत्वादिना सर्वविशिष्टे प्रतिपादिते गुणबन्धरागादिराहित्यबहुजनकत्वादि-प्रयुक्तवैशिष्ट्यमुपपादितं भवतीति किमुत इत्याशयेन संमुग्धतया वैशिष्ट्योपपादनायेत्युक्तमिति ध्येयम् । यद्वा । प्रकृते निखिलेत्यादिविशेषणानां वैशिष्ट्यं बन्धान्तरादतिशयश्चेत्युभयोपपादकत्वाभिप्रायेण वैशिष्ट्योपपादनायेत्युक्तमिति द्रष्टव्यम् । निखिलानां पूर्णगुणा इति समासशक्तिः, निखिलपूर्णशब्दयोरैकार्थ्येन द्वन्द्वानुपपत्तिशङ्काम् एकशब्दस्य सङ्ख्यार्थत्वेन पूर्वनिपातशङ्कां, सत्त्वादिगुणकदेहत्वस्य जीवादिसाधारण्यापादकत्वाद्देहशब्दस्य रागद्वेषमोहार्थत्वेन प्रसिद्धेस्तद्राहित्यस्य पद्मापद्मबधाद्यतिशयाहेतुत्वात्स्वपुत्राद्युद्भवादिवत्त्वस्य सर्वसाधारण्यात्तेषां सर्वविशिष्टोपपाद-कत्वमिति शङ्कां च परिहरति निखिलेत्यादिना ।

एकशब्दः केवलार्थ इति ॥ सङ्ख्यार्थत्वे ह्येकशब्दस्य न तावदत्र पूर्वेण विशेषणसमासोऽङ्गीकर्तुं युक्तः, तस्य 'दिक्सङ्ख्ये संज्ञायामि'ति संज्ञायामेव नियमितत्वेन प्रकृते त्वेकशाठीत्यादाविव विशिष्टशब्दस्य संज्ञात्वाभावेन तदसंभवात्; अतः सङ्ख्यार्थकैकशब्दस्य समानाधिकरणेन समासविधानार्थं प्रवृत्तेन पूर्वकालैकेति सूत्रेणैव स वाच्यः । (सर्वजरत्पुराणनवकेवलाः समानाधिकरणेनेति सूत्रशेषो द्रष्टव्यः) न चासौ वक्तुं शक्यः, तथा सति तस्य पूर्वकालै-केति समासशास्त्रे प्रथमानिर्दिष्टतया 'प्रथमानिर्दिष्टं समास उपसर्जनमि'त्युपसर्जनत्वेन 'उपसर्जनं पूर्वमि'ति पूर्वनिपातप्रसङ्गात् । निखिलपूर्णगुणा एको देहो यस्येति बहुव्रीह्याश्रयणेऽपि 'बहुव्रीहौ सर्वनामसङ्ख्ययोः प्राङ्निपातो वक्तव्य' इति सङ्ख्यायाः प्राङ्निपातनियमादेकशब्दस्य पूर्वनिपातप्रसङ्ग एव । अत एवानित्यैकरूपा इत्यादा-वनित्यमेकं रूपं येषामिति त्रिपदबहुव्रीह्याश्रयणमभियुक्तानाम् । चतुर्थे (४.२/५५७२) च अनुमानमेकं शरणं यस्येति त्रिपदबहुव्रीह्याश्रयणं टीकाकाराणामपि । केवलार्थत्वे तु न तत्प्रसङ्ग इत्युक्तरीत्या समासाश्रयमप्युपपन्न-मिति भावः । यद्यप्यत्र टीकाकृदभिमते बहुव्रीहौ सङ्ख्यार्थत्वप्रयुक्तपूर्वनिपातवारणेऽप्येकशब्दस्य न सर्वनामत्व-प्रयुक्तपूर्वनिपातवारणं संभवतीत्यनर्थकमेव केवलार्थत्वाश्रयणम् । न च केवलार्थस्यासर्वनामत्वाभ्युपगमदोष इति वाच्यम् । 'एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा । साधारणे समानेऽपे सङ्ख्यायां च प्रयुज्यत' इत्यभिधानात्सन्त्येकशब्दस्याष्टावर्थाः । तत्रैकशब्दः सङ्ख्यायां नित्यैकवचनान्तः । अन्येषु तु सप्तसु बचनान्तरमपि स्यादेव । एके एकेनापीति यथेत्यभियुक्तव्याख्यानेन केवलार्थस्यापि तस्य सर्वनामत्वस्य स्थितेः ॥ तथाऽप्येको देह एकदेहः, निखिलपूर्णगुणा एकदेहो यस्येति त्रिपदबहुव्रीह्याश्रयणे न दोषः, एकदेहशब्दस्यासर्वनामतया पूर्वनिपाताभावसंभवात् । न चैवमेकं रूपमेकम्, अनित्यमेकरूपं येषामित्यन्यत्र त्रिपदबहुव्रीह्याश्रयणवत्, एकं शरणमेकशरणम् अनुमानमेकशरणं यस्येति तथोक्तः, इत्युत्तरग्रन्थीयटीकाकारीयत्रिपदबहुव्रीह्याश्रयणवच्च, सङ्ख्या-र्थत्वेऽप्येकशब्दस्य त्रिपदबहुव्रीह्याश्रयणेऽसंख्यार्थत्वादेवैकदेहशब्दस्य पूर्वनिपाताभावसंभवात्; तस्य केवलार्थ-त्वाश्रयणं व्यर्थमिति वाच्यम् । अर्थाधिक्यलाभायैव तदाश्रयणात् । अत एव केवलार्थत्वविवक्षाव्यावर्त्यप्रदर्शनं न पुनः प्राकृतादिरिति ध्येयम् ।

'ननु कर्मणा यमभिप्रैति स संप्रदानमि'ति सूत्रे (दानस्य कर्मणा यमभिप्रैति स संप्रदानसंज्ञः स्यात् ।) 'अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम् । प्रेरणानुमतिभ्यां च लभते संप्रदानतामि'त्यत्र च कर्तुर्दानशेषभूतं दानकर्मणामुमिष्टतममनिराकरणात्प्रेरणादनुमत्या वा संप्रदानतां लभत इत्युक्तत्वादीश्वरस्य दानकर्मणोद्भवादिना आमुमिष्टतमस्यानिराकुर्वतोऽस्येति निर्दिष्टस्य जगतः संप्रदानत्वाच्चतुर्थ्या भाव्यम् । (अन्वर्थसंज्ञाबलेनाह दानस्येति । तेनाजां नयति ग्रामं, हस्तं निदधाति वृक्षे, इत्यादौ नातिप्रसङ्ग इति भावः । दानं चापुनर्ग्रहणाय स्वत्वनिवृत्तिपूर्वकं परस्वत्वापादानम् । अत एव रजकस्य वस्त्रं ददातीत्यादौ न भवति । तत्र हि ददातिर्भक्तिः । एतच्च वृत्तिमतम् । भाष्यमते तु नान्वर्थतायामाग्रहः, खण्डिकोपाध्यायस्तस्मै चपेटां ददातीति प्रयोगात् । रजकस्य ददातीति शेषत्वविवक्षायां बोध्यम् । न चैवमजां नयति ग्राममित्यत्रातिप्रसङ्गः । यमभिप्रैतीत्युक्त्या हि यमिति निर्दिष्टस्य शेषत्वं, कर्मणश्च शेषत्वं लभ्यते, ग्रामस्य चाजां प्रति शेषत्वं नास्ति) । न च स्वसत्तापरित्यागेन परसत्तापादनस्य दानपदार्थस्य जगत उद्भवादिविषये ईश्वरेणाकरणान्न चतुर्थीति वाच्यम्; 'वृक्षाय जलं ददाति, खण्डिकोपाध्यायः शिष्याय चपेटिकां ददाति, न शूद्राय मतिं दद्यादि'त्यादौ चतुर्थ्युपपत्त्यर्थं किञ्चिदुद्दिश्यापुनर्ग्रहणाय स्वद्रव्यत्यागमात्रस्य दानशब्दार्थतया विवक्षणीयत्वेन पदमञ्जर्यामुक्तत्वात् प्रकृते मतिदानादिवद्यथाकथञ्चित्यागस्य प्रतिपादयितुं शक्यत्वात्, भाष्यकारेण क्रियामात्राश्रयणेन ददातिकर्मणेत्यस्यानाश्रितत्वाच्च संप्रदानचतुर्थ्या भवितव्यमित्यतो विवक्षातः कारकाणि भवन्ती-त्युक्तेः संप्रदानस्य शेषत्वविवक्षायां युक्ताऽऽस्येति षष्ठीत्याह **अस्येतीति**।

वा०र०— सर्वविशेषणानामिति । निखिलेत्यादिपञ्चविशेषणानामित्यर्थः । **वैशिष्ट्यादीत्यादिपदेन** अधिकृतत्वादिपरिग्रहः । प्रत्येकमिति शेषः । एतेन मिलितानां सर्वविशेषणानां भागतो वैशिष्ट्यादिप्रतिपादकत्वम् । वस्तुतः सत्त्वात् तत्प्रतीत्यपाकरणायोगः इति शङ्कानवकाशः । निखिलेत्यादिविशेषणत्रयस्य वन्द्यत्वप्रयोजकत्वेन अन्यत्रोपलब्धवैशिष्ट्योपपादक इति प्रागुक्तं उपपादयति **निखिलपूर्णेत्यादिना** । **गुणवत्त्वेति** । बहुगुणवत्त्वेत्यर्थः । तत्त्वप्रकाशिकायां यो हि बहुगुणः निर्दोषः शास्त्रज्ञेयः अधीतशास्त्रगम्यः स हि वन्द्यो भवतीत्युक्तेः । **संमुग्धतयेति** । सर्ववैशिष्ट्यलोकसिद्धवैशिष्ट्यसाधारण्येनेत्यर्थः । अयमर्थः । निखिलपूर्णगुणत्वादिभिः अन्यत्राविद्यमानैः अन्य-स्मात् विष्णोः आधिक्यरूपोऽतिशय एव सर्ववैशि[illegible] तस्मिन् प्रतिपादिते सति वैशिष्ट्यमात्रं गुणवत्त्वादि-प्रयुक्तं सर्ववैशिष्ट्यान्तर्गततया कैमुत्येनैव सिद्धमिति अनेनैव वन्द्यत्वप्रयोजकविशिष्टत्वोपपादनाय गुणवत्त्वादेः प्रतिपादनीयतया निखिलगुणेत्यादिनाऽधिकप्रतिपादनं व्यर्थं इत्याशङ्कापि परास्ता । तत्प्रतिपादनस्यानेनैव सिद्धेः । वन्द्यान्तरादतिशयप्रतिपादनाय च सर्ववैशिष्ट्यस्योक्तत्वात् इति वैशिष्ट्यं वन्द्यान्तरातिशययोः प्रकृततया वन्द्यान्तरातिशयव्यावर्तनाय वैशिष्ट्येति वचनमिति स्पष्टत्वात्सामान्योक्तेरभिप्रायान्तरकल्पनाक्लेशेन किं इत्याशयेन प्रकारान्तरमाह **यद्वा प्रकृत इतीत्याहुः** । वस्तुतस्तु अत्र पक्षे वैशिष्ट्यपदेन सर्ववैशिष्ट्यं गृहीत्वा अनेन वन्द्यान्तरा-दतिशयप्रतिपादनसिद्धिं चाश्रित्य गुणवत्त्वादिप्रयुक्तं यत् वन्द्यत्वप्रयोजकं विशिष्टत्वमात्रं तत् सिद्धिः कैमुत्येने-त्यङ्गीकर्तव्यं भवतीत्यपरितोषादेतदुभयं कथमिति पूर्वमूलानुसारेण वैशिष्ट्यपदस्योभयविधवैशिष्ट्यपरत्वमेव । तत्र पूर्णगुणत्वादिसिद्धं सर्ववैशिष्ट्येन वन्द्यान्तरादतिशयसिद्धनिखिलगुणत्वाद्यन्तर्गतबहुगुणत्वादिसिद्धवैशिष्ट्यसामान्येन

तु बन्धत्वप्रयोजकेन बन्धत्वसिद्धिरित्येवं वैशिष्ट्यद्वयसङ्कथाय संमुग्धतया वचनमिति प्रकारान्तमाह यद्वा प्रकृत इति । वैशिष्ट्योपपादनायेत्युक्तमित्यत्र संमुग्धतयेति शेषः । एकार्थत्वस्फोरणाय उत्तरमूलमनुसृत्य निखिलपदं निःशेषेत्यर्थतोऽनुवदति निःशेषेति । पदार्थभेदे द्वन्द्वस्य साधुत्वात् प्रकृते च प्रमाणप्रमेय इत्यादाविव तद्भेदाभावादिति भावः । पूर्वनिपातेति । वक्ष्यमाणरीत्येति शेषः । एषां इति । सत्त्वादिगुणैकदेहत्वादीनामित्यर्थः । सर्वशास्त्राधिकरणीय'तत्रानन्दादयो गुणाः' इत्याद्यनुभाष्यसंबन्धिमूले शुभेषु मूर्धाभिषिक्ताः आनन्दादयः इत्युपपादनात् अत्र आनन्दादय इति गुणकीर्तनं मूले । अ इति ब्रह्म इति ऐतरेयभाष्ये 'पारतन्त्र्यात्यनाज्ञानजनिनाशादिवर्जित' इति वाक्यनिर्णयरूपप्रमाणानुसारेण तस्मात् पारतन्त्र्यात्यगुणत्वादिसर्वबन्धुत्वभावविरुद्धत्वभावं अज्ञानसुखात्यत्व-पारतन्त्र्योत्पत्त्याद्युक्तेः पारतन्त्र्यादिभ्यः इत्युक्तं मूले इति ज्ञेयम् । एकशब्दः केवलार्थ इतीति । यद्यपि एकशब्दस्य संख्यार्थत्वेन पूर्वनिपातशङ्कां परिहरतीति पूर्वोक्तमात्रेणैतद्विचारस्यावानेवेति ग्रन्थमर्यादया सिद्धमिति पुनरस्यद्विचारो व्यर्थ इति भाति । तथापि तदेव विवरीतुं केवलार्थत्वोक्तयनन्तरमपि प्राप्तानुपपत्तिपरिहाराय च पुनः प्रतीकोपादान-पूर्वकं शङ्कां विवृत्य तत्परिहारकतया मूल्योजनादिकमिति न दोष इति ज्ञेयम् । अयं च ग्रन्थः सदागमैकविज्ञेयं इत्येतत् उपपादकजयतीर्थ्युपपादनाय स्वामिशिक्षितप्रकारमनुसृत्य गुरुराजचरणैः उक्तप्रयोजनद्वयार्थमत्र निक्षिप्तः । स्वाम्याज्ञानुसारि गुरुप्रवृत्तावित्र स्थले अन्यत्राप्यावश्यकाधिकप्रमेयोपकरणेऽपि दोषाभाव इति तु सर्वसुधिया-मनुमतमेव । आनन्दमयाधिकरणाग्रिमे स्पष्टयिष्यते । विशेषणसमास इति । विशेषणं विशेष्येण बहुलं इत्यनेन विशेषणवाचकनिखिलपूर्णगुणशब्दस्य विशेष्यवाचकएकशब्देन समासे इत्यर्थः । संज्ञायामेवेति । दिग्वाचक-संख्यावाचकशब्दयोः संज्ञायामेव समासो भवतीति प्रतिपादनादिति भावः । एकशाठीत्यादाविवेति । इत्यादौ यथा संज्ञात्वाभावः एवं प्रकृतेऽपि विशिष्टस्य संज्ञात्वाभावेनेत्यन्वयदृष्टान्तः । अतः संख्यार्थकस्यैकशब्दस्येति । असंज्ञास्थले इति पूरणीयम् । संज्ञात्वाभावेनेति । पूर्वानुसारात् । पदैकेन । आनुमानिकसदागमैक इत्याद्युपपादनावसरे असंज्ञास्थल इति स्पष्टमुक्तेश्च । अत्राधिकप्रमेयप्रतिपादनाभावस्तु भक्तिपादीयपदैकेनापि उत्तरेणेत्यनुभाष्य-मूलटीकायाम् । ननु भवेदेवं यदि पूर्वकालैकेति सूत्रं संख्यार्थकएकशब्दस्यैव पूर्वनिपातविधायकं स्यात् तदेव कुतः इति चेत् उच्यते । विशेषणं विशेष्येणेत्यादि ग्रन्थेनास्य सूत्रस्य तत्परतायाः स्पष्टं प्रतिपादयिष्यमाणत्वात् । तत्रैव तज्ज्ञेयत्वाशयेन । तत्प्रपञ्चश्चात्राधिकरणत्रे निपुणतरं करिष्यते सोऽपि तत्रैवावधेयः । निखिलपूर्णगुणाः एको देहो यस्येत्यादि एतदुपपादनं च उत्क्रान्तिपादीयानुमानैकशरणस्येत्येतत् अनुव्याख्यानमूलटीकायां अनुमानं एकं शरणं यस्य इत्यादिग्रन्थे तत्प्रपञ्चस्मदीये द्रष्टव्यम् । समासद्वयमपीति । गुणशब्देन एकशब्दस्य विशेषणसमासो बहुव्रीहिर्वा उपपन्न इत्यर्थः । अत्र विशेषणसमासस्योपपन्नत्वाभिधानं न प्रकृताभिप्रायेण बहुव्रीहिमात्रोक्तेः । किन्तु सदागमैकविज्ञेयं इत्यादिस्तृतीयोक्तानुपपत्तिपरिहारायाभिप्रेतार्थकथनमेवेति तत्रत्यविशेषणसमासोपपत्तिरित्यभि-प्रायेण । अत एवोत्तरवाक्येऽत्र टीकाकृदभिमत इति वक्ष्यतीति ज्ञेयम् । यद्यप्यत्रेति । ननु एकशब्दस्य संख्यार्थत्वे पूर्वनिपातानुपपत्तिशङ्कापरिहारस्य केवलार्थत्वोक्त्यभिप्रायतया वर्णनवत् सर्वनामत्वप्रयुक्तपूर्वनिपातानुपपत्तेरपि परिहारस्य टीकाकारीयकेवलार्थत्वोक्तिभावतया वर्णयितुं शक्यत्वेनानुपपत्तिद्वयपरिहारं अभिधाय पश्चादेव भाव इति वक्तव्यतया संख्यार्थत्वपक्षीयानुपपत्तिपरिहारस्य भावतया वर्णनोत्तरं बहुव्रीहिसमर्थनस्योपरि चर्चान्तं कुतः

स्वीकृतमिति चेत्। सत्यम्। सदागमैकविज्ञेयं इत्यादिव्याख्यावसरे मूलकृता संख्यार्थस्यैव पूर्वनिपातो न केवलार्थस्येति वर्णनेन संख्यार्थत्वपक्षे विशेषणसमासपक्षीयपूर्वनिपातानुपपत्तिवत् अत्र प्रदर्शितबहुव्रीहिपक्षेऽपि प्राप्ततदनुपपत्तिरपि समानन्यायतया परिहृतप्राया। ततः टीकाकृतापि तावन्मात्रं भावतयाऽभिहितम्। वक्तव्याश्रयणेन सर्वनामत्व-प्रयुक्तपूर्वनिपातनिवारणं तु नान्यत्रोक्तम्। अतोऽनुच्यमानं कथं गम्यते इति न्यायेन स्वयं अन्यत्रानभिहितस्यात्र प्रत्येतुं अशक्यतया मूलेऽभिप्रेतत्वे विद्यमानेऽपि चर्चात्वेनैवाभिधानं उचितमिति तथैवाभिधानं कृतम्। यत्र विशिष्य ग्रन्थकारोक्तिर्नास्ति तत्र बहोरपि भावतया वर्णनेऽपि न दोषः। अन्यत्रोक्तमात्रं भावत्वेन वर्णनीयं इत्यत एव चतुर्थे अनुमानैकशरणस्येत्यत्रत्यमूलकारीयद्विपदबहुव्रीह्याश्रयणोपपादनावसरे संख्यार्थत्वप्रयुक्तपूर्वनिपातनिवारणमात्रं प्रयोजनतया वर्णिते न तु सर्वनामत्वप्रयुक्तपूर्वनिपातनिवारणमित्यादि ज्ञेयम्। मूले केवलार्थत्वविवक्षाव्यावृत्त्यमाह न पुनरिति। आदिना भौतिकग्रहः। **निष्क्रान्त इति**। निरादयः क्रान्ताद्यर्थे पञ्चम्येत्युक्तः तत्पुरुषसमासः। समासप्राबल्यात् बहुव्रीहिमकृत्वा स्वीकृतः। जगतः पूर्वम् अप्रकृतत्वेऽपि बुद्धिस्थत्वमेव मुख्यं प्रकृतत्वम्। ग्रन्थप्रकृतत्वं तु तल्लिङ्गतया उपयुक्तं अतो बुद्धिस्थत्वात् परामर्शोपपत्तिः इत्याह **अस्येत्यादिना**। प्रामाणिकत्वस्य स्वस्मिन्नपि सत्त्वेन स्वोद्भवादिदातृत्वस्यासंभवस्तु नात्माश्रुतेरित्यादिविरोधात् अयोग इत्यत उक्तं **स्वव्यति-रिक्तस्येति**। समासव्यासयोगतः इत्युक्तिं मनसि कृत्वाह **यथासंभवमिति**। **जन्माद्यष्टकमिति**। अत्रावृत्त्यादि-पदमेलनेनार्थकथनम्। अधिकं जन्माधिकरणे वैशेषिकपरीक्षायां वक्ष्यामः। **कर्मणा यमभिप्रैतीति**। अत्र सूत्रे इत्युक्तत्वादिति वक्ष्यमाणेनान्वयः। सूत्रस्य हि अयमर्थः। दानस्य कर्मणा अयमर्थं कर्ताभिप्रैति ईप्सति सकारकभूतोऽर्थः संप्रदानसंज्ञः स्यात् इति सम्यक् प्रदीयतेऽस्मै तत् संप्रदानमित्यन्वर्थमहासंज्ञाकरणात् कर्मणेत्यत्र दानस्येति लाभात्। तेन अजां नयति ग्राममित्यत्र नयतिक्रियाकर्मणा अजया संबध्यमानस्य ग्रामस्य ददाति-क्रियाकर्मणा गवा संबध्यमानस्य विप्रस्येव संप्रदानसंज्ञानापत्तिः कर्मणेति तृतीयाबलात् करणभूतेनेति विवक्षयापि ग्रामस्य संप्रदानतानापत्तिरिति वृत्त्यभिप्रेते प्रकारान्तरे तु उपाध्यायाय गामित्यत्र शिष्यो दीयमानया गवा उपाध्यायं अभिप्रैति इत्युक्ते शिष्यस्योपाध्यायसंबन्धे गोः करणत्ववत् अजायाः पुरुषग्रामसंबन्धे करणत्वमेवेति वदन्तं प्रति उक्तातिप्रसङ्गवारणायोगात् अभिप्रपूर्वकस्य इणः ईप्सितेना समानार्थकत्वात् ईप्सतीति लाभे यं ईप्सतीति उक्ते यमिति निर्दिष्टस्य संप्रदानत्वरूपं शेषित्वं कर्मणेति निर्दिष्टस्याप्रधानत्वरूपं शेषत्वं च प्रतीयत इति। गां प्रति शेषिभूतविप्रस्य संप्रदानत्वेऽपि ग्रामस्याजां प्रति शेषिभावाभावात् संप्रदानतानापत्तेरिति प्रकारान्तरेऽपि यदि अजाग्रामयोरपि शेषशेषिभावो विज्ञायत एवेति कश्चित् ब्रूयात्। तं प्रति तत्समाधानायोगात् नीवह्योर्हरतेश्चापीति नयतेर्द्विकर्मकेषु पाठात् संप्रदानसंज्ञायां च द्विकर्मकता न स्यादित्यतोऽवग्राहस्य संप्रदानतेति समाधेयमिति मन्तव्यम्। ददातिकर्मणेति विवक्षामनाश्रयतो भाष्यकारस्य पक्षेऽप्येवमेव समाधेयम्। परं त्वन्वर्थसंज्ञाकरणात् ददातिकर्मणेत्येव विवक्षितमिति वृत्त्यभिप्रेतपक्षानुसारेण दानस्येति प्राप्यत एव। तदेवमुक्तिप्राप्तिं मनसि निधाय सूत्रव्याख्यानरूप-हरिकारिकायां संप्रदानत्रैविध्योक्तावपि सूत्रे तदनुक्तेः सूत्रोदाहरणमात्रे असहमानः उक्तसूत्रव्याख्यानरूपहरिवाक्यं यदीत्यन्यत्रोक्तं उदाहृत्य तद्वचाख्यानेनैव सूत्रव्याख्यानसिद्धिं मन्वानः तत्कारिकाव्याख्यानं कुर्वन् तल्लक्षणस्य प्रकृते सङ्गतिप्रतिपादनेन चतुर्थीप्रसक्तिमुपपादितवान् टीकाकारः इति ज्ञेयम्। त्यागाङ्गमित्यस्य व्याख्यानं दानशेष-

भूतमिति। त्यागो दानम्। तस्याङ्गं शेषभूतमिति मञ्जर्यामुक्तेः। कारकाणां क्रियार्थत्वात् दानक्रियायाः अप्रधानत्वात् तन्निष्पत्त्युपयोगि संप्रदानं अप्रधानत्वात् शेषभूतम्। गुणानां च परार्थत्वात् असंबन्धः समत्वात् स्यादिति पूर्वोदाहृतन्यायादिति भावः। आमुमिष्टतममिति। उपाध्यायो हि शिष्यस्य गवामुं इष्टतमः तदात्मार्थमिव गोदानस्य करणात्। संप्रदानस्यानेकविधत्वकारिकोक्तं सङ्गाह्याह अनिराकरणादित्यादि। इदमत्राभिप्रेतम्। संप्रदानं त्रिविधं अनिराकर्तृ प्रेरकं अनुमन्तृ चेति। आद्यं यथा। सूर्याय अर्घ्यं ददातीति। नात्र सूर्यः प्रार्थयते। न चानुमन्यते। नापि निराकरोति। प्रेरकं यथा विप्राय गां ददातीति। विप्रो हि मह्यं गां देहीति दातारं प्रेरयति स तेन प्रेरितो ददाति। अनुमन्तृ यथा। उपाध्यायाय गां ददातीति। उपाध्यायो हि न पूर्वं प्रार्थितवान् अथ च दीयमानां अनुमन्यते भद्रं कृतमितीति। ईश्वरस्येति। ईश्वरकर्तृकदानाख्यक्रियाकर्मणा उदयादिनेत्यर्थः। अनिराकुर्वतः इत्यनेनानिराकर्तृरूपसंप्रदानविशेषोऽयमिति प्रतिपादितम्। चतुर्थीति। अस्मा इति चतुर्थीत्यर्थः। प्रसिद्धं दानपदार्थं आश्रित्य संप्रदानत्वाभावमाशङ्क्ते न च स्वेति। परित्यागेनेति। तृतीया सहार्थे। स्वस्वत्वपरित्यागेन सहितपरस्वत्वापादनं दानपदार्थः इत्युक्तं भवति। अयमाशयः। यद्यपि न तावत् स्वस्वत्वे विद्यमाने परस्वत्वापादनं दानम्। उभयस्वत्वस्य विरुद्धत्वात्। नापि स्वस्वत्वं परित्यज्य परस्वत्वापादनं दानम्। स्वयमेव स्वत्वत्यागे तस्य त्यक्तस्य उदासीनतया दानार्हत्वाभावेन तस्मिन् परस्वत्वापादनायोगात्। अत एवोक्तम्। स्वस्वत्वे विद्यमाने तु परस्वत्वं न विद्यतेत्युक्ते तु संप्रदानत्वं औदासीन्यात् न सिध्यतीति। तथापि स्वस्वत्वं परित्यजन् परस्वत्वं आपादयतीति योऽर्थः स एव ददातीत्यनेनैवोच्यते। स्वस्वत्वपरित्यागोपक्रमपरस्वत्वापादनपर्यन्तसमुदायो दानमिति फलति। न चैवं सति उक्तदोषप्रसक्तिरिति। अत्र स्वस्वत्वेति परस्वत्वेति च स्वशब्दयुक्तः पाठः स्वरस एव। स्वसत्तेत्यादिपाठे तु स्वाधीनसत्तेति पराधीनसत्तेति व्याख्येयम् अकरणादिति। उद्धवादिकं प्रति ईश्वरस्य स्वामितायाः अपाये सर्वस्वामित्वभङ्गापत्तिरिति भावः। न चतुर्थीति। संप्रदानत्वाभावात् न चतुर्थीत्यर्थः। दानशब्दार्थस्य यथोद्धवादिविषये संभवः तथा दानशब्दार्थं सहेतुकं वैय्याकरणसंमत्याह वृक्षायेत्यादिना। जलदानादौ स्वत्वपरित्यागाभावेऽपि अपुनर्ग्रहणाय स्वद्रव्यत्यागमात्ररूपत्ववत् प्रकृतेऽपि कथञ्चित् त्यागमात्रमेव दानं न तु दानकर्मणि स्वत्वत्यागः अङ्गीक्रियत इति न सर्वस्वामित्वभङ्ग इत्याशयः। करतलप्रहारश्चपेटिकेति हरदत्तः। न शूद्रायेति। 'नोच्छिष्टं न हविः कृतम्। न चास्योपदिशेद्धर्मान् न चास्य व्रतमादिशेत्॥' इति मनुवाक्यशेषः। ननु दाने प्रवृत्ते हि संप्रदानसंज्ञा प्रवृत्तिः। तथा चादाने प्रतिषिद्धे संप्रदानसंज्ञायाः अप्रवृत्तेः कथं शूद्रायेति चतुर्थीति चेत्। न। प्रतिषेधस्य प्राप्तिपूर्वकत्वात् पूर्वं प्रतिषेधविषयोपदर्शनं कर्तव्यं इत्यतः पूर्वं संज्ञा विधेया। ततो नञा संबन्धः कार्यः। अप्रदर्शितविषयस्य ज्ञातुमशक्यत्वात्। अत एव कटं न करोति। परशुना न छिनत्ति। न नखेनेत्यादिषु तथैव समाधेयम्। उक्तं च। लब्धरूपे क्वचित् किञ्चित् तादृगेव निषिध्यते। विधानमन्तरेणातो न निषिद्धस्य संभवः इति बलिदानादिवदित्यत्रापि एवमेव समाधिः। ननु नायं दानपदार्थो युक्तः। रजकस्य वस्त्रं ददातीत्यादौ परस्वत्वापादनपर्यन्तस्वस्वत्वपरित्यागरूपोक्तदानपदार्थाभावेनास्य तदर्थत्वं नास्तीति कैय्यटैरुक्तेरिति चेत्। न। तत्र पुनर्ग्रहणेऽपि उपमानात् ददातीति प्रयोगोपपत्तेः। उक्तं च मञ्जर्याम्। रजके पुनः ग्रहणात् दानाभावः। उपमानात् ददातिप्रयोगः। तत्र कारकस्य शेषत्वात्। नटस्य शृणोतीतिवत् षष्ठीति। उपमानं चेत्थम्। तट्टीकाकाराः वर्णयन्ति। एवं नामा स्वामि साधुः। यत्

कत्योऽयं रजकः कुत्रेदं वसनं नेष्यति। कथमस्य निर्णेजनं करिष्यति। किं वापावृपिष्यति। कदा पुनरानेष्यति इति नैवं विचिकित्सति वसनार्पण इतीति। एवं संप्रदानशब्देऽन्वर्थबलेन दानस्य कर्मणेति लभ्यते इति वृत्तिकारमतमाश्रित्य दानपदार्थनिरूपणेन चतुर्थीप्राप्तिरुपवर्णिता। अधुना तत्संज्ञायाः अन्वर्थत्वमनाश्रित्य कर्मसामान्याश्रयणेनैव संप्रदानसंज्ञायाः भाष्यकारेणाश्रयणात् प्रकृते दानशब्दार्थासंभवेऽपि भाष्याभिप्रेतकर्मणा यमभिप्रैति इत्युक्तलक्षणसत्त्वात् न चतुर्थ्यनुपपत्तिः इत्याह भाष्यकारेणेति। क्रियामात्राश्रयणेनेति। कर्मणीत्यत्रोक्तकर्मत्वं हि क्रियानिरूपितम्। सा च क्रिया न दानरूपा। तथा सति 'यदङ्ग दाशुषे त्वं अर्यम्णे चरुं निर्वपेत्' इत्यादिवैदिकप्रयोगाणां खण्डिकोपाध्यायः। 'शिष्याय चपेटिकां ददाति' इत्यादि लौकिकप्रयोगाणां चानुपपत्तिप्रसङ्गात्। किन्तु क्रियामात्रमेव दानत्वादिविशेषानालिङ्गितम्। तथाच ददातिकर्मणेत्यनाश्रयस्य लक्षणं क्रियामात्राश्रयणमित्थंभूतलक्षणे तत्र तृतीया। कर्मत्वरूपकक्रियामात्रमाश्रित्य क्रियाकर्मणा आसुं इष्टतमं इत्येवाभिप्रेत्य ददातिकर्मणेत्यस्यानाश्रयणादित्यर्थः। तथा सति अजां नयति ग्राममित्यत्र ग्रामस्य संप्रदानत्वं स्यादिति चेन्न। यमभिप्रेतीत्युक्त्या यमिति निर्दिष्टस्य शेषित्वावगत्या कर्मणश्च शेषत्वावगत्या विप्रायेत्यत्र विप्रस्येव ग्रामस्य शेषित्वाभावेन संप्रदानत्वप्रसङ्गात्। उपपादितं चैतत्प्रागेव। अस्येत्युक्तजगतस्तु दानकर्मोद्भवादिकं प्रति शेषित्वात् स्यादेव संप्रदानभावः। ननु कर्मग्रहणं किमर्थमित्यादिभाष्ये ददाति कर्मणेति न विवक्ष्यतेऽपि तु क्रियामात्रमेव कर्मणेति विवक्षितमिति तन्न प्रतीयते। उक्तप्रयोगास्तु कथञ्चित्समाधेया इति न मञ्जर्युक्ततदन्यथानुपपत्त्या भाष्यकाराभिप्रेतत्वकल्पना युक्तेति चेदत्र ब्रूमः। शयनक्रियया पतिमभिप्रैति तदाभिमुख्येन शेत इत्यर्थक 'पत्ये शेत' इत्युदाहरणे शयनक्रियायाः क्रियान्तरस्याप्रतीयमानतया तदपेक्षकर्तुरीप्सिततममित्युक्तपारिभाषिककर्मत्वाभावेन कर्मणा यमित्युक्तलक्षणाभावात्पत्युः संप्रदानत्वाप्राप्त्या चतुर्थ्यनुपपत्तिशङ्कायां क्रियया यमभिप्रैति तमाणं संप्रदानं भवतीत्यर्थकक्रियाग्रहणं कर्तव्यमिति वार्तिकं प्रवृत्तम्। तेन पत्युः क्रियया यमभिप्रैति तमाणत्वात्संप्रदानत्वसंभव इति सिध्यति। तदेतद्वार्तिकं भाष्यकारः प्रत्याचख्यौ। तथाहि कां क्रियां करिष्यसि किं कर्म करिष्यसीति पवनखननादनादिक्रियाकर्तारमनुपलभ्यप्रश्ने पचनादि कर्म कुर्व इत्युत्तरे लोके क्रियायामपि कर्मेति व्यवहारादस्ति तावत्क्रियाया अपि कर्मत्वम्। क्रियार्थोपपदस्य च कर्मणि स्थानिन इत्यनेन सूत्रकृता क्रियावाचकस्य तुमुन्नन्तस्याप्रयुज्यमानस्यापि कर्मणि कारके चतुर्थीविधानात्तदनुसारेण फलान्याहर्तुं यातीत्यर्थकफलेभ्यो यातीत्यत्र प्रतीयमानक्रियापेक्षयापि कारकत्वसंभवः इत्यस्य सूत्रकारेण ज्ञापनात् प्रतीयमानक्रियापेक्षयापि कारकत्वे स्थिते प्रकृतेऽपि प्रतीयमानक्रियान्तरापेक्षया कर्मत्वं क्रियायाः संभवत्येवेति क्रियान्तराश्रयणेऽपि तत् क्रियया ईप्सिततत्वाभावेऽपि च पारिभाषिकं कर्मत्वमस्त्येव। प्रतीयमानं क्रियान्तरं कथमिति चेत्। इत्थम्। एष मनुष्यः प्रेक्षापूर्वकारी भवति संबुध्या तावत् क्वचिदर्थे पश्यति इदं ईदृशं इति। तदृष्टं प्रार्थयते अपि मे इदं स्यादिति। ततः तदुपायभूतां क्रियां पश्यति अस्याः तत्फलं इति ततः प्रार्थयते कथमिदं निष्पद्यतामिति। ततः साधनानि समवधाय तां कर्तुमध्यवस्यतीति। अत एवोक्तप्रकारेण साध्यावस्थायाः अपि क्रियायाः पारिभाषिककर्मत्वेन तद्विशेषणस्यापि कर्मत्वेन कर्मणि द्वितीयान्तानि शोभनं पचतीत्यादौ शोभनं इत्यादिक्रियाविशेषणपदानीति स्थितमाकरे। तदेवं संप्रदानप्रार्थनावध्यवसायैः क्रियायाः आप्यमानत्वात् युक्तं पारिभाषिककर्मत्वमिति कर्मणा यमभिप्रैति इत्यनेनैव संप्रदानत्वसिद्धचा पत्ये शेते इत्यादावपि सन्दर्शनादि-

क्रियान्तरापेक्षया कर्मत्वसिद्धेः संप्रदानत्वप्राप्त्युपपत्त्या न तदर्थक्रियया यमभिप्रैति तत्संप्रदानं इत्येवं विधानान्तरं आरभ्यमिति । नन्वेवं सति कटं चिकीर्षुः करणक्रियया कटमभिप्रैति इत्यतः कटं करोति इत्यत्रापि कटस्य संप्रदानत्वप्राप्तिः । तथा च निरवकाशकर्मसंप्रदानसंज्ञाभ्यां कटं कटायेत्युभयथा प्रयोगापत्तिरिति चेत् । अत्र वदन्ति । पत्ये शेते इति अकर्मकस्थले सावकाशायाः संप्रदानसंज्ञायाः निरवकाशकर्मसंज्ञया बाधात् न प्रयोगद्वयापत्तिः । गत्यर्थकर्मणि द्वितीया चतुर्थ्यांविति सूत्रं त्वावश्यकमेव । अप्राप्तचतुर्थी संप्रदानत्वात् । भाष्ये तत् प्रत्याख्यानं तु प्रौढवादमात्रेणेति । अन्ये तु सन्दर्शनादिक्रियाणां शयनक्रियया भेदस्य विवक्षया कर्मत्वापत्तावपि कटकरणरूपक्रियायाः सन्दर्शनादिभेदस्याविवक्षितत्वात् अभेदस्यैव विवक्षितत्वात् कर्मत्वानापत्तेः । ग्रामं गच्छतीत्यादिषु गत्यर्थेषु तु भेदाभेदयोः अपि विवक्षितत्वात् उभयसंज्ञासमावेशाभ्युपगमात् इत्येवं सन्दर्शनादिप्रतीयमानक्रियान्तरभेदाभेदविवक्षाया नियतविषयत्वेन क्वचित् तत्क्रियाश्रयणेन कर्मत्वप्राप्तावपि कटमित्यादौ प्रयोगद्वयानापत्तिः । प्रयोगमूलत्वात् व्याकरणस्मृतेः कटायेत्यादिप्रयोगाभावे तत्र तदापादनयोगः । अत एव गत्यर्थकर्मणीति सूत्रप्रत्याख्यानं च भाष्यकारीयं युक्तं इति मञ्जर्यनुसारेणाह । तस्मात् भाष्यकारेण प्रतीयमानक्रियान्तरापेक्षया क्रियायाः अपि पारिभाषिककर्मत्वाभ्युपगमात् शेते इत्यादौ च शयनादिक्रियायाः दानकर्मत्वाभावेऽपि प्रतीयमानसन्दर्शनादिक्रिया कर्मत्वमात्रेण शयनादिकर्मणाऽभिप्रेयमाणस्य पत्यादेः युक्तं संप्रदानत्वं इति भाष्यकारेणोक्तमिति सिद्धौ दानकर्मणेत्यनाश्रितमिति सिद्धमिति सूरयो विदांकुर्वन्तु । विवक्षातः कारकाणि भवन्ति इत्युक्तेरिति । साधकतमं करणं इति सूत्रे हि क्रियासिद्धौ यत् प्रकृष्टोपकारकं विवक्षितं तत् साधकतमं करणसंज्ञं भवति इति प्रकृष्टोपकारकत्वेन विवक्षितस्य करणसंज्ञाप्रतिपादनेनाधिकरणादेरपि विवक्षाधीनकरणत्व-कर्तृत्वादीति प्राप्तम् । उत्कृष्टकरणेनैवान्यतुल्यत्वदर्शनात् प्रकर्षमित्थंभावस्य कोऽनुकुर्यात् अबालिशः इत्यनेन सर्वकरणानामपि क्रियासिद्धचर्थतया प्रकर्ष एकस्यायुक्तः इत्याक्षिप्य क्रियायाः परिनिष्पत्तिः यत् व्यापारादनन्तरं विवक्ष्यते । यदा यत्र करणत्वं तदा स्मृतमिति करणलक्षणपरिष्कारो हरिकारिकायां कृतः । तत्र वक्ष्यते इत्यनेनाधिकरणादिरूपाणामपि स्थाल्यादीनां विवक्षाधीनं करणत्वमस्तीति सूचितम् । उक्तं च । वस्तुतः तन्निर्देश्यं न हि वस्तुव्यवस्थितम् । स्थाल्या पच्यते इत्येषा विवक्षा दृश्यते यत इति । तेन करणत्वेनानिर्देश्यं व्यपदेशानर्हं वस्तुतत्वतः व्यवस्थितं नास्ति । सर्वस्यैव विवक्षया करणव्यपदेश्यत्वात् इति तदर्थः । एतावता हीदं उक्तं भवति । गौः सर्वान् प्रति गौरेव न तु कांश्चित्प्रति अगौरितिवत् कारकत्वं तत् व्याप्यं कर्तृत्वादिकं च न नियतं किन्तु विशेषणविशेष्यभाववत् अनियतमेव । तथाच कयाचित् धातुव्यक्त्योपस्थापितेऽर्थे किं कर्त्रादिकमिति जिज्ञासायां प्रकृतधातुव्यक्त्युपात्तव्यापाराश्रयतया विवक्षितः कर्ता भवति । व्यापारव्यधिकरणफलाश्रयः कर्मकर्तृकर्मद्वारक-संबन्धेन व्यापारस्य फलस्य वाऽश्रयोऽधिकरणमिति किल स्थितिः । तथापि यदा पच्यर्थो व्यापारोऽधिश्रयण-तण्डुलावपनेयोपकर्षादिः विवक्षितः तदा देवदत्तः तद्व्यापाराश्रयः कर्ता । ज्वलनस्य तदर्थत्वविवक्षायां एधांसि कर्तृतया प्राप्तानि । तण्डुलधारणादिव्यापारस्य पच्यर्थत्वविवक्षायां च स्थाली कर्त्री अवयवविभागादिः तदर्थ इति विवक्षायां च तण्डुलाः कर्तारः । कर्तुस्तु सकलसाधनविनियोगकारितया न करणादित्वम् । एवं तत्र तत्र करणाधिकरणादीनां कारकाणां विवक्षावशेन कर्त्रादित्वं द्रष्टव्यमिति । तदेवं करणत्वादिकारकत्वस्य प्रयोक्तृविवक्षाधीनत्वस्योक्तत्वा-

दित्यर्थः। एवं करणे कृते त्रिविधरूपे तु अष्टादशगीताभाष्यगताधिष्ठानादि करण एवान्तर्भूतमित्येतत् वाक्यस्य टीकायां कांस्यपात्र्यां भुङ्क्ते दैवेन कृतमन्यथेत्यादिवत् साधकतमत्वेन विवक्षितत्वात्। विवक्षातः कारकाणि भवन्तीति वचनात् इतिवत् प्रतिपादितम्। तत्र विवक्षातः इत्यस्योक्तमेवोपपादनं द्रष्टव्यम्। उक्तेः वचनादिति पदद्वयेन तथाविधं वैय्याकरणानां वाक्यं अस्तीति ज्ञायते इति द्रष्टव्यम्। **संप्रदानस्य शेषत्वविवक्षयेति**। षष्ठीशेष इति सूत्रभाष्ये एवं तर्हि कर्मादीनां अविवक्षाशेषः कथं पुनः सतो नामा विवक्षा भवति। सतोऽप्यविवक्षा भवति तत् यथा अलोमिका एडिका अनुदरावस्येति असतश्च विवक्षा भवति। समुद्रकुण्डिकाविन्ध्योवर्धितक इत्युक्तेरसतो विवक्षा दृष्टान्ततयोक्तेति कैय्यटोक्तेश्च। यथा बहुयानीयसंभवप्रतिपादनाय कुण्डिकायामसतोऽपि समुद्रत्वस्य मूले स्थूलमग्रे सूक्ष्मं संस्थानविशेषयुक्तं अन्नं बर्द्धितकं इत्युच्यते तस्य महत्वप्रतिपादनाय विन्ध्यत्वस्य चासत एव विवक्षैव नलोमिकेत्यादौ सतामपि लोम्नां लोमकार्यकरणेन सतोऽप्युदरस्य महत्त्वाभावेन चाविवक्षा दृश्यते इति सिद्धत्वात् प्रकृतेऽपि संप्रदानत्वस्याविवक्षायां तद्रूपशेषत्वप्राप्त्या तद्विवक्षायामित्यर्थः। न तु शेषत्वस्यापि पृथक् विवक्षा कार्या। उक्तकैय्यटविरोधात्। विशेषसंबन्धे सामान्यस्यावश्यंभावात्संबन्धसामान्यमसन्नेति प्रकृते विशेषाविवक्षा सामान्यविवक्षेति प्रमेयान्तरत्वात् उभयविवक्षोक्तिरिति वा। अत एव घटते युक्तिदृष्टिस्तु पुरुषेणेति उपासनापादीयानुव्याख्यामूले शेषविवक्षायां षष्ठी विहिता। न चात्र **शेषविवक्षेति** प्रतिपादितम्। कर्मादिभ्योऽन्यत्वरूपं शेषत्वं चेत्तद्विवक्षापि संभवतीत्यप्याहुः। एषां कर्मणि शेषत्वेन विवक्षिते इत्यधीगत्यर्थसूत्रीयवृत्त्यादौ पूर्णगुणेति सूत्रे शेषत्वविवक्षैव च नियतासु हितार्थयोगे करणस्येत्याहुरिति मञ्जर्यादौ च प्रयोगोऽप्युक्तरीत्या उपपाद्यः। **युक्तेति**। घ्नतः पृष्टं ददाति रजकस्य वस्त्रं ददाति इत्यादिप्रयोगदर्शनात् अत्रापि षष्ठी शेष इत्यनेनैव षष्ठीत्युक्तेत्यर्थः। संबन्धमात्र इति मूले मात्रपदस्य न तु कारक इत्यर्थः। मूले **इत्यनेनापीति**। सन्निधियोग्यतयोस्तौल्यादिति भावः। योग्यत्वमेव विशदयति **वियदिति** मूलम्। सहितेति वदता सहार्थे तृतीयान्तात् विशेषतः इति तसिरयं इत्युक्तं भवति॥

स०व्र०— तत्र वैशिष्ट्योपपादनायेति। अनेनैव विशेषणत्रयेण सर्वोत्तमत्वमप्युपादितमवगन्तव्यम्। अतः " 'एतदुभयं कथं नारायणस्ये'त्यवतार्य सर्वोत्तमत्वोपपादनमुत्तरत्र न कृतमतो न्यूनता" इत्यपास्तम्॥ **एकशब्दः केवलार्थ इति**। सङ्ख्यार्थत्वे पूर्वनिपातः स्यादिति भावः॥ ननु दानकर्मत्वेनास्य जगतोऽभिप्रेततया संप्रदानत्वात्तत्र चतुर्थ्या भाव्यम् अस्येति षष्ठी कथमित्यत आह **अस्येति**। एवं च 'विवक्षातः कारकाणि भवन्ती'त्युक्तत्वेन संप्रदानत्वस्याविवक्षितत्वात्, शेषे षष्ठीति संबन्धमात्रे विहिता षष्ठ्येवेति भावः॥ अत्र यत्तु वदति 'दानं हि स्वस्वत्वपरित्यागेन परस्वत्वापादनम्। तथाच संप्रदानत्वप्राप्तेरेवाभावाद्वचर्थमिदम्' इति; तन्न परस्वत्वापादनमात्रस्यापि दानशब्दार्थत्वेनाभियुक्तैर्व्याख्याततयाऽत्र संप्रदानत्वप्राप्तिसंभवात्।

कुण्डल०— भगवद्देहस्य प्राकृतत्वराहित्यलाभायैकशब्दार्थमाह **एकशब्दः केवलार्थः इति**। निरादयः क्रान्ताद्यर्थे पञ्चम्येति वार्तिकात् **समासमाह निष्क्रान्त इति**। अस्येत्यस्य प्रत्यक्षमात्रसिद्धप्रपञ्चमात्रपरत्वे सर्वकारणत्वं न सेत्स्यतीत्यत आह **प्रत्यक्षादीति**। **यथासंभवमिति**। जन्माद्यष्टकमध्ये यस्य वस्तुनो यत् संभावितं तावत् प्रददातीत्यर्थः। नन्वस्योद्भवादिदमित्यत्र कर्मणा यमभिप्रैतीति सूत्रेणास्येति षष्ठीनिर्दिष्टस्य जगतः

संप्रदानसंज्ञायां संप्रदाने चतुर्थीतिसूत्रेण चतुर्थ्यां अस्मै इति भाव्यम् इत्यत आह अस्येतीति । संप्रदानत्वस्याविवक्षिततया षष्ठी शेषेति सूत्रविहिता संबन्धसामान्ये षष्ठीत्यर्थः । विषयधिकरणेति । न विषयधुतेरित्यधिकरणे न्युत्पाद्यः पराधीनविशेषावाप्तिलक्षणो देह्योगलक्षणः । अमृत्वाभवनादिरूपः उद्धवस्यावान्तरभेदस्तत्सहितोद्धवादिदमित्यर्थः ।

विद्व०— एकशब्दो केवलार्थ इति । सङ्ख्यार्थकत्वे पूर्वकालैकेति सूत्रेण एकशब्दस्य पूर्वनिपातः स्यादिति भावः । भगवद्देहानामनन्तत्वे चैकत्वानुपपत्तेरिति वा । ननु अस्योद्धवादिदमित्यत्रास्मा इति चतुर्थ्या भाव्यम् । कर्मणा यमभिप्रैति स संप्रदानमित्युक्तेर्दानक्रियां प्रति कर्मणा उद्धवादिना अस्य जगतो विषयतयाऽभिप्रेतत्वेन संप्रदानत्वात् संप्रदाने चतुर्थीति संप्रदाने चतुर्थीविधानात् तथाच अस्येति षष्ठी न युज्यते इत्यत आह अस्येति । संप्रदानत्वाकारेणात्र संबन्धो न विवक्षितः विवक्षातः कारकाणि भवन्तीत्युक्तेः । षष्ठी शेषेति संबन्धमात्रे विहिता षष्ठ्यैवोचितेति भावः । ईश्वरस्य सदा सर्वस्वामित्वेनोद्धवादेः स्वत्वपरित्यागाभावाद्रजकस्य वस्त्रं ददातीनिवदस्येति साधु इति न वाच्यम् । स्वत्वपरित्यागं विना परस्वत्वापादनमात्रस्यापि दानशब्दार्थकतया कन्यादानादौ प्रसिद्धेः संप्रदानत्वप्राप्तिः । रजकस्य स्वत्वापादनस्यैवाभावेनोपचरितमेव तत्र दानमिति तत्र षष्ठी युज्यत इति द्रष्टव्यम् ।

ल०२०— एवं शङ्कात्रयं परिहृत्यैकोत्त्यैव बन्धत्वनिमित्तसमुदायं च यथावत्त्येन ज्ञापयित्वा अवसरप्राप्तं निखिलेत्यादिविशेषणपञ्चकस्य बन्धत्वसामान्यनिमित्तसमुदायोपपादकत्वं विभागेन दर्शयति तत्रेति । विशेषणपञ्चकं इत्यर्थः । विशेषणत्रयार्थज्ञानाभावे तस्य वैशिष्ट्योपपादकत्वं दुरधिगममतो ज्ञानार्थं तदर्थानाह निखिला इत्यादिना उद्धवादिदमित्यन्तेन । अवैयर्थ्याय निखिलपूर्णपदयोर्विभिन्नार्थावाह निखिला इत्यादिना । निःशेषाः अनन्ता इति यावत् । अनवधिकाः अपरिच्छिन्नाः । शाखेष्वन्यत्रापि गुणपदप्रयोगादत्र तत्प्रतीतिवारणाय गुणपदार्थमाह गुणा आनन्दादय इति । दोषेषु पारतन्त्र्यस्येव गुणेष्वानन्दस्य श्रैष्ठ्यात्कण्ठत उक्तिः । अत एव तदपि कण्ठत एव वक्ष्यति । इयांस्तु विशेषः । आनन्दार्थमेव बहुगुणानामपेक्षणीयत्वेनोद्देश्यत्वादानन्दस्य गुणेषु सति पारतन्त्र्ये तदुपजीव्यः बहवोऽपि दोषास्तत्राश्रीयन्त इत्युपजीव्यत्वात्पारतन्त्र्यस्य दोषेषु श्रैष्ठ्यमिति । ज्ञानशक्त्यादय आदिपदार्थाः । नन्वेकशब्दः किं संख्यार्थः । उत एके मुख्यान्यकेवला इत्यभिधानान्मुख्यार्थो वान्यार्थः केवलार्थो वा । सर्वत्रापि स किं गुणविशेषणं देहविशेषणं वा । आद्ये न तावत्संख्यार्थः । भगवद्देहस्यैकगुणात्मकत्वप्राप्त्या 'आनन्दज्ञानशक्त्यादिदेहं विष्णुं वु ये जना' इति वृद्धव्याख्यादिविरोधात् । भगवद्गुणस्यैकत्वे निखिलेत्यनेन विरोधाच्च । संख्यार्थस्यैकशब्दस्यापूर्वादिशब्दानां समानाधिकरणेन समासविधायके 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेने'ति सूत्रे एकशब्दस्य प्रथमाविभक्त्या निर्देशात्तस्य 'प्रथमानिर्दिष्टं समास उपसर्जनमि'ति उपसर्जनसंज्ञायामुपसर्जनं पूर्वमित्यनेन पूर्वनिपातप्रसङ्गश्च । नापि मुख्यार्थोऽन्यार्थश्च । तावता भगवतो मुख्यादिगुणात्मकदेहसिद्धावपीतरनिषेधकाभावेनान्यदेहरहितत्वालाभात् । नापि केवलार्थः । व्यावर्त्याभावात् । द्वितीयेऽपि न तावत् संख्यार्थः । भगवद्देहस्यैकत्वे 'तस्य ह वा एतस्य परमस्य त्रीणि रूपाणि कृष्णो रामः कपिल' इति । 'तस्य ह वा एतस्य परमस्य पञ्चरूपाणि दशरूपाणि शतरूपाणि सहस्ररूपाण्ययुतरूपाणी'त्यादिश्रुतौ बहुरूपोक्त्यैव बहुदेहानामप्युक्तत्वेन तद्विरोधात् । नापि

मुख्यार्थोऽन्यार्थश्च । इतरनिषेधकाभावे नान्यदेहरहितत्वालाभात् । नापि केवलार्थः । भगवतो देहमात्राङ्गीकारे इन्द्रियगुणक्रियाभावप्रसङ्गात् । देहस्य निखिलपूर्णगुणात्मकत्वासिद्धेश्चेत्याशङ्क्य पक्षान्तराण्यनङ्गीकृत्य केवलार्थत्वमाह **एकशब्दः केवलार्थ इति** । तदेव व्यनक्ति **त एवेति** । गुणा एवेत्यर्थः । अनेकशब्दो गुणविशेषणमेवेत्युक्तं भवति । एतत्पक्षोक्तदोषं परिहर्तुं तद्व्यावृत्त्यं दर्शयति **न पुनरिति** । भूतदेहादिरादिपदार्थः । निरादयः क्रान्ताद्यर्थे पञ्चम्येत्युक्त्यनुसारेण विग्रहप्रदर्शनपूर्वकं व्याचष्टे **निष्क्रान्त इति** । दोषेभ्य इत्यनेन मूले निरुपपदं दोषपदमशेषदोषपरमिति सूचयति । दुःखाज्ञानादय आदिपदार्थाः । अस्येत्यनेन सन्निहितकतिपयार्थग्रहणे तदुद्भवादिदातृत्वस्य वैशिष्ट्यानुपपादकतया तदनूद्य व्याख्याति **अस्य प्रपञ्चस्येति** । विश्वविस्तारस्येत्यर्थः । ननु कालादिव्यवहितस्य प्रपञ्चस्य सन्निधानाभावात्कथमस्येतीदंशब्देन परामर्श इत्यत उक्तं **बुद्धिसन्निहितस्येति** । बुद्धिविषयस्येत्यर्थः । सत्यं सन्निहितस्यैवेदंशब्देन परामर्श इति । तथापि सन्निधानं बौद्धमेव मुख्यम् । कालिकादिकं त्वत्रैवोपयुज्यते । अतीतादिप्रपञ्चस्य च बौद्धं तदस्तीति नानुपपत्तिः । ननु प्रमाणाभावात्कथं बौद्धमपि सन्निधानमित्यत उक्तं **प्रत्यक्षादिप्रमाणसिद्धतयेति** । अनुमानागमावादिपदार्थौ । नन्वीदृशप्रपञ्चस्येदंशब्देन परामर्शे भगवतोऽपि तथात्वादिदंशब्देन परामर्शप्राप्त्या कथं स्वस्कन्धारोहणवद्विरुद्धं स्वोत्पत्त्यादिदानमित्यत उक्तं **स्वव्यतिरिक्तेति** । ननूद्भवादिदमिति समासार्थः किं जन्माद्यष्टकं किं वा जन्मादिचतुष्टयमेव । नाद्यः । प्राग्जगज्जन्मस्थेमप्रलयेति चतुष्टयपरतया तद्व्याख्यानानुपपत्तेः । न द्वितीयः । लक्षणसूत्रादिविरोधात् । तत्र हि जिज्ञासासूत्रे जिज्ञासाविधायकसर्वश्रुतिविचारस्य प्रस्तुतत्वात्तद्गतसर्वलक्षणपरत्वमेव युक्तम् । अत एव तद्भाष्यानुभाष्ययोर्लक्षणाष्टकस्योपन्यासः कृत इतीति चेन्न । प्रथमपक्षस्यैवाभिप्रेतत्वात् । न च जगज्जन्मस्थेमेति तद्व्याख्यानानुपपत्तिः । तस्य विवक्षाविशेषेण प्रवृत्तत्वादित्याशयेनोद्भवादिदमिति समासं व्याचष्टे **उद्भव इति** । आदिः प्रथमघटकः । यथा विश्वाद्यष्टके विश्व इति भावः । अस्येत्यन्यपदार्थमाह **जन्माद्यष्टकमिति** । नन्वस्योद्भवादिदमित्यनेन सर्वस्यापि प्रपञ्चस्य जन्माद्यष्टकस्यैव दानं प्रतीयते । तदनुपपन्नम् । नित्यादावभावादित्यतो 'विष्णुनास्य समस्तस्य समासव्यासयोगत' इति तत्त्वसंख्याने मूलं मनसि निधायाह **तद्यथासंभवमिति** । तदुक्तं तत्त्वसंख्यानटीकायामिदमुक्तं भवति । उक्तधर्मेषु यत्र तत्त्वे अल्पीयांसः संभवन्ति तत्र तावन्तो विष्ण्वधीनाः ज्ञातव्याः । यत्र बह्वस्तत्र तावन्तः, सर्वथास्वरूपस्वभावावश्यं तदधीनाविति । तत्र स्थितिनियमौ सर्वस्य । सृष्टिसंहृती नित्यानित्यस्यानित्यस्य च । अज्ञानं भावरूपं दुःखसृष्टस्य । ज्ञानाभावस्तु सर्वस्य । बोधनं चेतनस्य । सुखं प्राक्तमसो विना । दुःखं दुःखास्पृष्टं विनेत्यादि द्रष्टव्यमिति । तथाच प्रपञ्चसामान्ये जन्माद्यष्टकं ददाति । न तु प्रतिव्यक्ति तदाननियम इति भावः । व्याख्येयस्य द्वितीयान्तत्वादाह **तमिति** । एवं पूर्वत्रापि पठितव्यमिति भावः । विवक्षातः कारकाणि भवन्तीत्युक्तेः संप्रदानस्याविवक्षितत्वाद्भजकस्य वस्त्रं ददातीत्यादिवच्छेषविवक्षयेयं षष्ठीत्याह **अस्येति संबन्धमात्रे षष्ठीति** । तथाच षष्ठी शेष इति सूत्रेण संबन्धसामान्ये षष्ठीति भावः । नन्वस्य प्रपञ्चस्येति प्रातिपदिकार्थकथनानन्तरमेव तदुत्तरषष्ठ्यर्थो वर्णनीयः । सत्यम् । तथाप्युद्भवादिदमिति समासार्थवर्णनानन्तरमेव प्रपञ्चस्य दानकर्मत्वप्रतीत्या कर्मणा यमभिप्रैति संप्रदानमिति संप्रदानसंज्ञायां संप्रदाने चतुर्थीति चतुर्थीप्रसक्तौ विवक्षातः कारकाणि भवन्तीत्युक्त्या संप्रदानत्वाविवक्षया प्राप्तषष्ठ्यर्थवर्णनस्येदानीमवसरप्राप्तिरिति । ननु युक्तं टीकाकारीयं व्याख्यानं युक्तं च विवक्षातः कारकाणि भवन्तीति । तथापि मूलकारस्य कुतः

प्रपञ्चे संप्रदानत्वाविवक्षासंबन्धित्वविवक्षा चेति चेन्न । स्वस्वत्वपरित्यागपूर्वकपरस्वत्वापादनं हि मुख्यं दानम् । कर्मणा यमभिप्रैति स संप्रदानमिति सूत्रे च मुख्यदानोद्देश्यस्यैव संप्रदानसंज्ञाया अभिप्रेतत्वात्प्रपञ्चस्य तादृशज्ञानोद्देश्यत्वाभावात्तत्र संप्रदानत्वाविवक्षायाः परिशेषाद्रजकस्य वस्त्रं ददातीत्यादिवत्संबन्धित्वविवक्षायाश्च संभवात् । ननु नित्यादिषु जन्माद्यष्टकस्य बाधवारणाय समासव्यासयोगत इति मूलं मनसि निधाय यथासंभवमित्युक्तम् । तदनुपपन्नम् । वक्ष्यमाणवियदधिकरणादिविरोधापत्तेः । तत्र नित्यानामप्युत्पत्त्यादिसमर्थनात् इत्यतस्तयोरविरोधाय मूलमेव योजयति अशेषविशेषत इति । इत्यनेनापीति । न केवलं बन्ध्यमित्युत्तरेण किन्तु पूर्वेणास्योद्भवादिदमित्यनेनापीत्यपिशब्दार्थः । किमुक्तं भवतीत्यत आह वियदधिकरणादीति । आदिपदेन जन्माद्यष्टकेऽवान्तरभेदप्रतिपादकसर्वाधिकरणपरिग्रहः । अशेषपदार्थः समस्तस्येति । तत्रापि शब्दार्थासङ्कोचव्यञ्जनं वियदधिकरणादिव्युत्पाद्येति । अपिशब्दयोजना तु बुद्ध्या विवेकेन पूर्ववद्बोध्या । विशेषपदार्थोऽवान्तरभेदेति । सहितेत्यनेन तृतीयान्तात्तसिरिति सूचयति । इदमुक्तं भवति । तत्त्वसंख्यानमूलं प्रसिद्धोत्पत्त्यादिविवक्षया यथासंभवाभिप्रायम् । वियदधिकरणादौ व्युत्पाद्यास्तु न प्रसिद्धोद्भवादयः । किन्तु तदवान्तरभेदरूपाः । ते तु नित्यादिप्रपञ्चेऽपि संभवन्तीति विषयभेदान्न तयोर्विरोध इति । तदेतदभिसन्धायावान्तरभेदसहितोद्भवादिदमित्युभयमप्युक्तमिति ध्येयम् । जन्माद्यष्टके वियदधिकरणादौ व्युत्पाद्यावान्तरविशेषेषु । जन्मनि तावत् । पराधीनविशेषिता रूपोद्भवो नित्यादिसर्वसाधारणः । तद्विशेषस्तु । मूर्तसंबन्धो गगनस्य । सिसृक्षुत्वं रमायाः । नियतविशिष्टानुपूर्वीकत्वेनार्थबोधकशक्त्यावि र्भावो वेदस्य । विकारो जडप्रकृतेः । देहसंबन्धो जीवस्य । प्रवाहि जन्मकालप्रवाहस्य । उपचयो महदादीनामित्यादिरूपो ज्ञेयः । स्थितौ तु पराधीनविशेषित्वेनैवावस्थानं सर्वसाधारणस्थितिः । तद्विशेषस्तु । रमायां कदापि मरणाभावरूपा स्थितिः । अन्यत्र चेतने देहाधिष्ठानेनावस्थानम् । अचेतनस्य स्वरूपेणावस्थानमित्यादिरूपो ज्ञेयः । संहारे तु । पराधीनविशेषिताविरहरूपः संहारः सर्वसाधारणः । तद्विशेषस्तु । हरेरत्यन्तसामीप्यं लय्यो लक्ष्म्याः । तदितरचेतनानां देहवियोगः । अचेतने जन्यस्य स्वरूपेण विनाशः । नित्येषु प्रवाहिनाशः कालप्रवाहस्य । मूर्तसंबन्धवियोगो गगनस्य । नियतविशिष्टानुपूर्वीकत्वेनार्थबोधकशक्तितिरोभावो वेदस्य । अपचयो महदादीनामित्यादिरूपः । नियमने तु व्यापारेषु प्रेरणं चेतनाचेतनसाधारणं नियमनम् । तद्विशेषस्तु । चेतने रमायामाज्ञान्तर्गतितिर्नियमनम् । अन्यत्र विधिनिषेधाभ्यां बन्धः । अचेतने नित्ये गगनादौ नित्यात्मना अवकाशदानादिरूपतत्तद्व्यापारानुकूलतया च प्रेरणम् । अनित्ये च घटादावनित्यात्मना जलाहरणादितत्तद्व्यापारानुकूलतया च प्रेरणमित्यादिरूपः । ज्ञाने तु ज्ञानसामान्यं रमादिचेतनमात्रसाधारणम् । तद्विशेषस्तु । रमायां नित्याविर्भूतो भगवदितरसर्वसाक्षात्कारः । अन्यत्र तु यथायोगं ज्ञानोत्पादनमित्यादिरूपः । अज्ञाने च । अज्ञानपदवाच्यं रमादिसर्वचेतनसाधारणमज्ञानम् । तद्विशेषस्तु । रमायां ईशसाकल्यविषये ज्ञानाभावोऽज्ञानम् । तदितरेषु च यथायोगं भावरूपमप्यज्ञानं इत्यादिरूपः । बन्धे तु । संसारबन्धो विरिञ्चादिसर्वचेतनसाधारणः । तद्विशेषस्तु । विरिञ्चादीनां लिङ्गदेहादिसंबन्धो बन्धः । तदन्येषां तु कामादिसंबन्धोऽपीत्यादिरूपः । मोक्षे तु । अन्यथारूपं हित्वा स्वरूपेण व्यवस्थितिरूपो योग्यायोग्यचेतनसाधारणो बोधः । तद्विशेषस्तु सात्त्विकजीवानामात्यन्तिकदुःखनिवृत्तिसहितपरमानन्दाविर्भावः । तामसानां त्वात्यन्तिकसुखनिवृत्तिसहितकेवलदुःखाविर्भाव इत्यादिरूप इत्यादिस्तत्र तत्रोक्तो

विशेषो ज्ञातव्यः । अयं भावः । वन्द्यत्वसामान्यप्रयोजकं वैशिष्ट्यापरपर्यायत्वमुत्तमत्वम् । इतरग्रहाणेन वन्द्यत्वं प्रयोजकं तु सर्ववैशिष्ट्यापरपर्यायं सर्वोत्तमत्वम् । तदुभयोपपादकविशेषणत्रयमध्ये निखिलपूर्णगुणैकदेहमित्याद्येन विशेषणेन बहुगुणत्वं पूर्णगुणत्वं चेति द्वयं प्रतीयते । निर्दोषमिति द्वितीयेनापि बहुदोषदूरत्वं सर्वथा दोषदूरत्वं चेति द्वयम् । अस्योद्भवादिदमिति तृतीयेनापि बहूत्पादकत्वं जगदुत्पादकत्वं चेति द्वयम् । तत्र विशेषणत्रयेणापि यदाद्यं प्रतीयते तदेव वन्द्यत्वसामान्यप्रयोजकवैशिष्ट्योपपादकम् । यद्वितीयं प्रतीयते तदेवेतरग्रहाणेन वन्द्यत्वप्रयोजक-सर्वोत्तमत्वोपपादकमिति विवेको द्रष्टव्य इति । ननु वन्द्यत्वप्रयोजकेषु विशिष्टत्वस्य विशेषणत्रयमप्युपपादकमिति कुतो योज्यते । एकैकेनापि तत्संभवात् । सत्यम् । 'विरोधः सर्ववैशिष्ट्ये यो द्वितीये निरस्यते । नारायणस्य त्वध्याय' इति युक्तिपादीयानुव्याख्याने उत्तमत्वापरपर्यायवैशिष्ट्योपपादकं जन्मादिसूत्रोक्तं लक्षणमित्युक्तम् । 'जन्माद्यस्येति सूत्रेण गुणसर्वस्वसिद्धये । ब्रह्मणो लक्षणं प्रोक्तमि'त्यानन्दमयनयानुव्याख्याने च साधनतया जगज्जन्मादि-कारणत्वं तत्साध्यतया निखिलपूर्णगुणत्वं 'प्रच्युतोऽशेषदोषैः सदा पूर्तित' इत्युक्तेस्तत्साध्यतया निर्दोषत्वं च जन्मादिसूत्रोक्तमित्युक्तम् । अत उत्तरमूलानुसारेण जन्मादिसूत्रोक्तलक्षणत्रयप्रतिपादकं निखिलेत्यादिविशेषणत्रयमपि वैशिष्ट्योपपादकमिति योजितमिति । नन्वस्तु मूलानुसाराद्विशेषणत्रयमपि वैशिष्ट्यस्योपपादकं तथाऽप्यवशिष्टं विशेषणद्वयमपि कुतो न तदुपपादकम् । सर्ववैशिष्ट्यापरपर्यायसर्वोत्तमत्वे विशेषणपञ्चकस्याप्युपपादकत्वदर्शनात् । मैवम् । अवशिष्टविशेषणद्वयार्थस्यैवाधिकृतत्वेष्टत्वरूपतयाऽधुना विप्रतिपन्नत्वेन ताभ्यां तदुपपादनायोगात् । न हि वन्द्यत्वनिमित्तधर्मत्रयेऽपि विप्रतिपन्नं प्रति तत्रैवैकेनान्यसाधनं युक्तम् । अत एवेमामेवोपपत्तिं विभावयितुं अधिकृतेष्टत्वरूपविप्रतिपन्नार्थकत्वम् अवशिष्टविशेषणयोरस्तीति प्रदर्शनायोत्तरत्राधिकृतत्वप्रदर्शनाय 'आप्यतम-मप्यखिलैः सुवाक्यै'रितीतीष्टत्वप्रदर्शनं, 'सदा प्रियतमं ममेती'ति चोभयत्रापि प्रदर्शनपदं प्रयोक्ष्यते । पूर्वत्र तु बहुगुणत्वादिधर्मत्रयस्य विप्रतिपन्नवैशिष्ट्यादन्यतया तदुपपादकत्वं नानुपपन्नमित्याशयं विभावयितुं तत्र वैशिष्ट्योपपादनायेत्युपपादनपदं प्रयुक्तम् । ननु तर्ह्यधिकृतत्वेष्टत्वयोरपि निखिलेत्यादिविशेषणत्रयमुपपादकं स्यात् । न स्यात् । अप्रयोजकत्वात् । बहुगुणादिमतोऽप्यधिकृतत्वेष्टत्वनियमाभावात् । अधिकृतत्वेष्टत्वयोः परस्परोप-पाद्योपपादकभावस्तु न शङ्कार्हः । उभयोरपि विप्रतिपन्नत्वादिति दिक् ।

चषकः— एकशब्द इति । ह्रादैकमयीतिकाव्यप्रकाशाद्युदाहरणानि टीकाकृद्भिरेवान्यत्रोपन्यस्तानीति सह्रुच्चार्थकताराहित्येन न पूर्वनिपातापत्तिरिति भावः ।

ननु 'कर्मणा यमभिप्रैति स संप्रदानमि'ति सूत्रे 'वृक्षाय जलं ददाति, खण्डिकोपाध्यायः शिष्याय चपेटिकां ददाति, रजकाय वस्त्रं ददाति, न शूद्राय मतिं दद्यात्, विप्राय कन्यां ददाती'त्यादि गौणोदाहरणाद्यनुरोधेन गौणददात्यर्थ-विवक्षावश्यंभावेन भाष्यकृता 'श्राद्धाय निगर्हते, युद्धाय सन्नह्यते, पत्ये शेते' इत्याद्यनुरोधेन क्रियाग्रहणमपि कर्तव्यमिति, 'ददाति कर्मणे'त्यस्यानाश्रयेण क्रियामात्रस्याश्रयणाच्च संप्रदानचतुर्थ्या भवितव्यमित्यतो 'विवक्षातः कारकाणि भवन्ती'त्युक्तेः संप्रदानस्य शेषत्वविवक्षायां युक्ताऽस्येति षष्ठीत्याह अस्येतीत्यवतारयन्ति ॥ नन्वस्येति कथं षष्ठी । न तावत्कर्तरि भगवत एव कर्तृत्वात्, नापि कर्मणि उद्भवादेरेव कर्मत्वात्, हेत्वादिरूपार्थान्तरस्य

चासंभवादत आह **संबन्धमात्र इतीत्यप्यवतार्य, तथाच 'षष्ठी शेष' इत्यनेनैवात्र षष्ठीति भाव इत्यपि व्याकुर्वते संबन्धमात्र इति** । संप्रदानचतुर्थी कर्तृकर्मणोरित्यनुशिष्टा षष्ठी च संप्रदानत्वकर्तृत्वकर्मत्वरूपसंबन्धत्वव्याप्यधर्मावच्छिन्नप्रकारताशालिशाब्दधीप्रयोजिकेति तादृगन्वयबोधतात्पर्यविरहान्न क्षतिरिति संबन्धत्वरूपसामान्यधर्मावच्छिन्ननिरूपकतासंसर्गावच्छिन्नप्रकारताशाल्यन्वयबोधोत्पादप्रयोजिका शैषिकी षष्ठ्येवेत्याशयः । **संबध्यत इति** । तन्त्रावृत्त्याश्रयणेनेति भावः ॥ **अवान्तरेति** । विशेषावान्तरदेहलाभस्वरूपलाभमिसृधुत्वमूर्तसंबन्धावान्तरवैचित्र्यसहितेत्यर्थः ।

काशी०— प्रकृते तु त्रयाणामप्युक्तरीत्या प्रयोजकत्वात्तदुक्तिः । **तत्रेति** । निमित्तत्रयमध्ये विशेषणपञ्चकमध्ये वेत्यर्थः । **विशेषणत्रयमिति** । यद्यपि तृतीयेनैव वैशिष्ट्यसिद्धिः । तथाऽप्याद्यस्य संभवकत्वेन द्वितीयस्य बाधकनिरासकत्वेन द्वयोरपि वैशिष्ट्यघटकाधिक्योपपादकत्वेन वा वैशिष्ट्योपपादकत्वसंभवात्त्रयोक्तिः । (परिमळकृतस्त्वन्यतमविशेषणेनैव वैशिष्ट्यसिद्धेरितरयोः स्वरूपकीर्तनपरत्वमेवेति वदन्ति । अत एवैतदरुच्यैव यद्वेति पक्षान्तरमवतारितवन्तः) । समासान्तरानुपयोगात्कर्मधारयमाह **निखिला इति** । निखिलशब्दस्योपचारेण बाहुल्यमात्रार्थत्वशङ्कानिरासार्थमाह **निःशेषा इति** । आपेक्षिकपूर्णत्वस्य प्रवाहतोऽनवधिकत्वस्य च व्यावृत्तये प्रत्येकमनवधिका इति प्रातिस्विकरूपेण देशकालपरिमाणकृतपरिच्छेदशून्या इत्यर्थः । सत्त्वादिगुणव्यावृत्त्यर्थमाह **आनन्दादय इति** । नन्वेकशब्दो यदि सङ्ख्यार्थस्तदा तस्य गुणशब्देन कर्मधारयस्तावदयुक्तः । तद्धितार्थकपूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेनेति सूत्रे एकशब्दस्य प्रथमानिर्दिष्टत्वेनोपसर्जनत्वादुपसर्जनं पूर्वमिति पूर्वनिपातापत्तेः । देहशब्देन कर्मधारयेऽपि वैयर्थ्यादिदोषादित्यत आह **एकशब्द इति** । केवलार्थः गुणमिश्रदेहसाहित्यशून्यार्थः । तथात्वे विवक्षितसमासं सूचयन् लब्धमर्थमाह **त एवेति** । यद्यपि गुणा एके देहा यस्येति त्रिपदबहुव्रीहिरनुपपन्नः । बहुव्रीहौ सर्वनामसङ्ख्ययोरुपसङ्ख्यानमिति वार्तिकेन सर्वनाम्नः पूर्वनिपातनियमनात् । केवलार्थत्वेऽप्येकशब्दस्य सर्वनामकार्यदर्शनेन सर्वनामत्वस्य सर्वसंमतत्वात् । तथाऽपि नात्र त्रिपदबहुव्रीहिरभिमतः किन्तु निखिलपूर्णगुणशब्दस्यैकशब्देन विशेषणं विशेष्येणेति कर्मधारयस्ततो द्विपदबहुव्रीहिः । एकशब्दस्य च विशेष्यत्वान्न पूर्वनिपातः । उक्तं च शास्त्रैकसमधिगम्यत्वादिति न्यायविवरणटीकायां शास्त्रं च तदेकमसहायं चेति शास्त्रैकम् । विशेषणविशेष्यभावस्य कामचारित्वात् । सङ्ख्याबचनस्यैवैकशब्दस्य पूर्वकालैकेति समासविधानादिति । न चैवं भक्तिपादे पदैकेनाप्युत्तरेणेत्यत्रैकशब्दो मुख्यार्थः । पदेष्वेकं पदैकमाद्यपदेनेत्यर्थः । कर्मधारयत्वे तु पूर्वकालैकेत्येकपदस्य पूर्वनिपातः स्यादिति सुधाविरोध इति वाच्यम् । पूर्वकालैकेत्यनेन कर्मधारयत्व इति व्याख्यानेन तद्धितस्य सङ्ख्यार्थत्व एव पूर्वनिपातापत्तिपरत्वात् । न चैवं मुख्यार्थकैकशब्दस्य विशेष्यत्वे कर्मधारयसंभवात्तत्पुरुषसमासानुसरणवैयर्थ्यमिति वाच्यम् । एकत्रामुख्यस्याप्यन्यत्र मुख्यत्वसंभवेन प्रकृतपदेषु मुख्यत्वलाभाय तदनुसरणात् । अधिकं तु वक्ष्यामः । उत्क्रान्तिपादेऽनुमानैकशरणस्येत्यादावनुमानं च तदेकं चेति कर्मधारयमुपेक्ष्यैकं च तच्छरणं चेति कर्मधारयोक्तिस्त्वेकशब्दस्य सङ्ख्यार्थत्वाभिप्रायेणेति च वक्ष्यते । वाक्यार्थचन्द्रिकायां तु पूर्वोक्तशङ्कानिरासार्थमेको देह एकदेह इति कर्मधारयगर्भद्विपदबहुव्रीहिमाश्रित्यार्थाधिक्यलाभाय केवलार्थत्वानुसरण-

मित्युक्तम् । तत्रैकशब्देन प्राकृताद्यभिन्नत्वरूपैकैवल्यस्य विवक्षितत्वादीश्वरस्य प्राकृतादिदेहराहित्यलाभ इत्यवधेयम् । परिमळे त्वेकशब्दस्य गुणविशेषणत्वमुक्तम् । तत्र मयूरव्यंसकादित्वेन विशेषणोत्तरसमासोऽवसेयः । क्रियाद्यात्मक-देहव्यवच्छेदशङ्काव्यावृत्त्यर्थमेवकारव्यवच्छेद्यं स्पष्टयति न पुनरिति । आदिनाऽपरिच्छिन्नत्वादिपरिग्रहः । तन्त्रान्तरे रागद्वेषमोहानामेव दोषत्वप्रसिद्धेराह पारतन्त्र्यादिभ्य इति । यद्यपि गुणेष्वानन्दस्य मुखतो गृहीतत्वाद्दोषेषु तद्विरोधिनो दुःखस्य मुखतो ग्रहणमुचितम् । तथाऽप्यानन्दस्य स्वातन्त्र्यादिफलत्वेन तदनुमापकत्वबहुःखादेः पारतन्त्र्यफलत्वेन पारतन्त्र्याभावस्य दुःखाद्यभावानुमापकत्वात्तस्यैव मुखतो ग्रहणम् । प्रपञ्चस्येदं पदार्थत्वोपपादनम् । प्रत्यक्षादीति । स्वरसत्तादिनियामकत्वोक्तिवैयर्थ्यादाह स्वव्यतिरिक्तेति । सर्वसंबन्धिनो जन्मादिचतुष्टयस्यैवात्र विवक्षितत्वं वारयति जन्माद्यष्टकमिति । नन्वेवमस्येत्यस्यानन्वयः । सर्वस्य जन्माद्यष्टकाभावादत आह यथासंभवमिति । ननु ददातीति कथम् । परस्वत्वापादकस्वस्वत्वत्यागरूपदानस्यायोगात् । ईश्वरस्वत्वस्य सर्वत्र सर्वदैव सत्त्वादिति चेदत्राहुः । परस्वत्वापादनमात्रस्य कन्यादानादौ दानपदार्थत्वदर्शनादिह तावन्मात्रस्य विवक्षितत्वान्न दोष इति । वस्तुतो जडं प्रति परस्वत्वापादनरूपदानस्याप्यनुपपत्त्या प्रकृते कृतिरेव ददात्यर्थः । जन्मादिकर्तृत्वस्यैव प्रतिपिपादयिषितत्वात् । ईश्वरव्यतिरिक्तस्यैव करणफलभागिताज्ञापनाय गौणप्रयोगसंभवात् । तथा चोक्तम् । 'स्रक्ष्ये हि चेतनगणा-न्सुखदुःखमध्यसंप्राप्तये तनुभृतामि'ति । नन्वस्येति षष्ठी कथं प्रपञ्चस्य दानक्रियायां कर्मभूतोद्भवादिसंबन्धित्वेन कर्त्रभिप्रेतत्वरूपसंप्रदानतया चतुर्थीप्राप्तेः । न च विप्राय गां ददातीत्यादौ त्यागरूपदानजन्यगवादिवृत्तिस्वत्वभागितया विप्रादेरिव प्रपञ्चस्य तादृशदानजन्योद्भवादिवृत्तिस्वत्वभागितया कर्त्रभिप्रेतत्वाभावान्न संप्रदानत्वमिति वाच्यम् । शत्रवे भयं ददातीत्यादावुत्पादनरूपदानकर्मभयसंबन्धित्वेन शत्र्वादेरिव प्रकृतेऽपि संप्रदानत्वोपपत्तेः । न च प्रपञ्चस्योद्भवादौ कर्तृत्वेनान्वयात्कर्तरि कृद्योगानुशिष्टा षष्ठीति युक्तम् । उद्भवादिपदस्य कृदन्तत्वाभावेन तदर्थे जन्माद्यष्टके कर्तृत्वेन तदन्वययोगादित्यत आह अस्येतीति । षष्ठीशेष इत्यनेनात्र संबन्धसामान्यार्था षष्ठीत्यर्थः । (संप्रदानचतुर्थी कर्तृकर्मणोरित्यनुशिष्टा । षष्ठी च संप्रदानत्वत्वकर्तृत्वत्वकर्मत्वत्वरूपसंबन्धत्वव्याप्यधर्मावच्छिन्नप्रकाराताशालि-शाब्दधीजनिकेति तादृगन्वयबोधतात्पर्यविरहान्न क्षतिरिति संबन्धत्वरूपसामान्यधर्मावच्छिन्ननिरूपकता संसर्गा-वच्छिन्नप्रकाराताशाल्यन्वयबोधोत्पादप्रयोजिका शैषिकषष्ठीत्याशयः ।) संबन्धश्च दानप्रपञ्चयोर्विषयिविषय-भावादिरेवेति संप्रदानत्वाविवक्षया न चतुर्थीति भावः । वस्तुत उद्भवाद्यन्वयिनी शेषषष्ठ्येवात्र विवक्षिता । तत एव प्रपञ्चसंबन्ध्युद्भवादिकर्तृत्वलाभात् । संबन्धश्चाश्रयाश्रयिभाव एव । न चैवं समासाघटकषष्ठ्यन्तपदसापेक्षत्वेनासाम-र्थ्यादुद्भवादिपदस्य समासानुपपत्तिरिति वाच्यम् । नित्यसापेक्षत्वेन समासोपपत्तेः । नन्वस्योद्भवादिदमित्ययुक्तम् । नित्यस्याकाशादेः स्वरूपलाभरूपोद्भवाद्यभावात् । अत एव यथासंभवमित्युक्तमिति चेत् । सत्यम् । तथाऽपि लब्धजन्मनः स्थित्यादीति स्थित्यादिप्रयोजकत्वेन सार्वत्रिकत्वादुद्भवस्य मुखतो ग्रहणमित्यभिप्रायासङ्गतेरित्यत आह अशेषेति । तृतीयार्थे तसिरिति भावेनोद्भवादौ तदर्थान्वयमाह वियदिति । न वियदश्रुतेरित्याद्यधिकरणेषु नित्यस्याकाशादेर्मूर्तसंयोगः प्रकृतेः परिणामो जीवानां देहलाभः श्रियः सिसृक्षत्वमितरेषां स्वरूपलाभ इत्येवं व्युत्पादितानेकविधोद्भवादेरत्र यथासंभवं विवक्षितत्वान्नोक्तदोषः । न चैवमनेकार्थत्वं दोषः । सामान्यतः पराधीन-विशेषावाप्तेरुद्भवपदार्थत्वात् । लयोऽप्येवमनेकविधो बोध्यः ।

गूढ०— ननु निखिलपूर्णेत्यत्र निखिलपूर्णशब्दयोरेकार्थत्वात् पौनरुक्त्यम्। किञ्च दुःखादीनामपि गुणशब्दवाच्यत्वस्य प्रसिद्धत्वात्तद्वत्वं प्रतीयते। किञ्चाद्वैकशब्दस्य संख्यार्थत्वे गुणशब्दान्वयेन निखिलपूर्णपदाभ्यां विरोधः पूर्वकालैकेतिसूत्रेण पूर्वनिपातश्च स्यादित्यतो व्याचष्टे निखिला इति। एकशब्दस्य केवलार्थत्वे व्यावृत्त्यभावः इत्यत्राह न पुनरिति। अत्रादिशब्देन भौतिकपरिग्रहः। न च भौतिकस्यापि प्राकृतत्वात्पृथक्ग्रहणायोग इति वाच्यम्। भौतिकमिश्रस्य शुद्धप्राकृतस्यापि सत्त्वादिति भावः। निष्क्रान्त इति। बहुव्रीहेरन्यपदार्थप्रधानत्वाद्वृत्तिपदार्थप्रधानः षष्ठीतत्पुरुषः निरादयः क्रान्ताद्यर्थे पञ्चम्येत्यनेन निराकृतः।

नन्वस्योद्भवादिदमित्ययुक्तम्। अस्येतीदंशब्दस्य प्रत्यक्षवाचित्वेन जगतश्चाप्रत्यक्षत्वेन तत्रेदंशब्दप्रयोगासंभवात्। यदि च बुद्धिसन्निहितत्वेन तत्रास्येति प्रयोगस्तदा स्वस्यापि जगन्मध्ये प्रवेशेन स्वस्यापि स्वयमुद्भवादिद इति प्रतीयेत। तच्च प्रमाणविरुद्धम्। उद्भवादिदमित्यत्रातद्गुणसंविज्ञानबहुव्रीहिणा स्थितिमात्रकर्तृत्वं प्रतीयेत, तच्चोत्पत्तीत्यादिप्रमाणविरुद्धमित्यतो व्याचष्टे अस्येति। जन्माद्यष्टकं सर्वस्य ददातीत्युक्ते श्रीमुक्तादेरपि अन्नानादि ददातीति स्यात्। तच्चायुक्तं प्रमाणविरोधादित्यत उक्तम् यथासंभवमिति। यस्य यावत् प्रमाणसिद्धं तस्य तावद्ददातीति न प्रमाणविरोधः। ननु अस्योद्भवादिदमित्यत्र समासाभावो न युक्तः। अस्येति षष्ठ्याः कृद्योगलक्षणत्वात् कृद्योगलक्षणा षष्ठी न समस्यत इति वचनादेतदुद्भवादिदमिति स्यादित्यत आह अस्येति संबन्धमात्रे षष्ठीति। नेयं कृद्योगलक्षणा षष्ठी। किन्तु संबन्धसामान्ये षष्ठी। तथाच नानेन समासप्राप्तिः। न चैवमपि षष्ठीति सूत्रेण समासप्राप्तिरिति वाच्यम्। महाविभाषया वाक्यत्वस्य संभवात्। यद्वा रुद्राय गां ददातीत्यत्र दानकर्मणा अभिप्रेयमाणत्वेन रुद्रायेत्यत्र चतुर्थीवत् प्रकृतेऽपि दानकर्मणा उद्भवादिना जगतो अभिप्रेयमाणत्वादस्येत्यत्र चतुर्थ्या भवितव्यमित्यत्राह अस्येति। तथाच विवक्षातः कारकाणि भवन्तीति न्यायात्संप्रदानत्वस्याविवक्षितत्वात् संबन्धसामान्ये षष्ठीत्वस्याभिप्रेतत्वात् चतुर्थीप्रसङ्ग इति भावः।

ननु कर्तृकर्मणोः कृति। कृत्प्रत्यययोगे कर्तरि कर्मणि च षष्ठी स्यादिति षष्ठीविधानादस्येति षष्ठी कर्तरि वा कर्मणि वा। नाद्यः। तथा सत्युद्भवं प्रति जगतः कर्तृत्वापातेन परमात्मनस्तदभावापत्तेः। न द्वितीयः। उद्भवादिदमिति कृत्प्रत्ययं प्रत्युद्भवादेरेव कर्मत्वेन जगतः कर्मत्वासंभवादित्यत आह अस्येति संबन्धमात्रे षष्ठीति। न च मात्रशब्दोऽनर्थकः। संबन्धे षष्ठीत्येतावदेवास्त्विति वाच्यम्। तथा सति संबन्धविशेषमुपादाय जगत्कर्मकोद्भवदातृत्वमेव स्यात्, न तु जगत्कर्तृकोद्भवदातृत्वम्। संबन्धमात्र इत्युक्तेः। जगत्कर्मको वा जगत्कर्तृको वा यावान् जगत्संबन्ध्युद्भवस्तावतः सर्वस्यापि दातृत्वं सिध्यतीति युक्तं तद्ग्रहणमिति भावः। यदा कर्मषष्ठीपक्षे जगत्कर्मकोद्भवादिदमित्यर्थः स्यात्। एवञ्च जगन्मध्ये पतितस्य जीवजातस्य देहयोगद्वारोत्पत्तिमत्त्वेन साक्षादुद्भवकर्मत्वाभावात्। श्रियश्च पारतन्त्र्यरूपोत्पत्तिमत्त्वेन साक्षादुद्भवकर्मत्वाभावात् उद्भवादिदातृत्वं न सिध्येदित्यतः संबन्धमात्र इत्युक्तम्। तथाच साक्षात्परंपरासाधारणसंबन्धेन जगत्कर्मकोद्भवादिदमित्यर्थः। एवं च यस्य साक्षात्स्वरूपतः उद्भवादि यस्य च देहयोगद्वारा यस्याप्यभिमानिद्वारा यस्याश्च पारतन्त्र्यरूपेण साक्षाद्वा परंपरयोद्भवादि तस्य सर्वस्यापि दातृत्वं सिध्यतीति भावः। अशेषपदसंबन्धलभ्यमर्थमाह वियदिति।

अधिकृतत्वप्रदर्शकतया विशेषणद्वयव्याख्यानम्—

७ **सु०— अधिकृतत्वप्रदर्शनाय आप्यतममप्यखिलैः सुवाक्यैरिति । अपिशब्दो वन्द्यत्वे हेतुसमुच्चयार्थः । अभिव्याप्तौ वा । अपौरुषेयत्वेन तन्मूलत्वेन वा अनाशङ्कित-दोषत्वादिना शोभनानि वाक्यानि वेदादीनि ब्रह्मसूत्रादीनि च सुवाक्यानि, तैः अखिलैरपि आप्यतमं अतिशयेन प्रतिपाद्यम् ॥ यदि व्याचिख्यासितेन ब्रह्ममीमांसाशास्त्रेण तन्निर्णे-तव्यार्थेन वेदादिना च प्रतिपाद्य इति नारायणो वन्दनीयः । हन्त तर्हि तत एव धर्मादिकं प्राणादिकं वा वन्दनीयं स्यात् । न स्यात् । तस्य नारायणप्रतिपत्त्यङ्गतया वेदाद्येक-देशप्रतिपाद्यत्वात् । अस्य पुनरनन्यार्थतया अखिलवेदादिवेद्यत्वात् । तथाविधमेव चाधिकृतत्वमुच्यत इत्याशयवता आप्यतममिति अखिलैरिति चोक्तम् ॥**

परि०— **हेतुसमुच्चयार्थ इति**। 'न केवलं विशिष्टत्वात् अधिकृतत्वादपि वन्द्यमि'ति समुच्चयार्थ इत्यर्थः । अखिलैरित्युक्तावपि तन्मध्ये किञ्चिदपि नान्यपरमिति द्योतनाय यावदर्थकमप्यपिपदमिति भावेनाह **अभिव्याप्तौ वेति** । अत एव आह **अखिलैरपीति** ॥ पदवर्णस्वरादिरूपेणापि प्रतिपाद्यत्व-मित्यभिप्रेत्याभिव्याप्तौ वेत्युक्तमित्यप्याहुः ॥ तमप्प्रत्ययाखिलशब्दापिपदानां कृत्यं व्यनक्ति **यदी-त्यादिना** ॥ **तस्येति** । धर्मादिः प्राणादेश्चेत्यर्थः । 'अन्यार्थं तु जैमिनिरि'त्यादिना वक्ष्यमाणन्यायेन नारायणप्रतीत्यङ्गत्वं ज्ञेयम् ॥ एतावता धर्मादिरधिकृतत्वं न निरस्तमिति वन्द्यत्वं प्राप्तमत आह **तथाविधमेवेति** । अनन्यार्थतयाऽखिलवेदादिवेद्यमेवेत्यर्थः ॥ **अखिलैरिति चोक्तमिति** । अखिलै-रपीति चोक्तमित्यभिव्याप्त्यर्थकमपिपदं च ध्येयम् । अन्यथा धर्मादिरखिलवेदाप्रतिपाद्यत्वेऽपि 'ता वा एताः सर्वा ऋच' इत्यत्रैतरेयभाष्ये सर्ववेदाभिधेयत्वं वायोरप्यस्तीत्युक्त्या प्राणस्याप्यखिलवेदप्रति-पाद्यत्वादखिलपदं तद्व्यावर्तकं न स्यात्, व्यर्थं चाभिव्याप्त्यर्थकमपिपदं स्यात्; तस्मिन् सति तु 'पूर्वप्रसिद्धवर्जं तु शक्रान्ता देवता मताः' इति ऋग्भाष्योक्तदिशा, 'मन्त्रादिवद्वे'त्यत्रोक्तन्यायेन च विष्णुसूक्तपुरुषसूक्तलक्ष्मीसूक्ताद्यन्यत्रैव प्रतिपाद्यत्वाद्भवति व्यावर्तकमखिलपदम्।

यादु०— अखिलैरित्यस्य तमपश्च प्रयोजनं वक्तुम् आह **यदि व्याचिख्यासितेनेत्यादिना** । अधिकृतत्वमात्रं कर्मकाण्डप्रतिपाद्ये धर्मादौ, ब्रह्मकाण्डप्रतिपाद्ये प्राणादौ च व्यभिचारीति भावः ॥ नन्वेतावताऽप्यधिकृतत्वस्य व्यभिचारो नोद्धृत इत्याशङ्क्यायामाह **तथाविधमेवेति** । अनन्यापेक्षया वेदादिवेद्यं, सकलवेदादिवेद्यं चेत्यर्थः । इदं च हेतुद्वयमतो न वैयर्थ्यम् ।

आनन्दः— अभिव्याप्तिमेवाह **अनाशङ्कितेत्यादिना**। तमवर्थकथनम् **अतिशयेनेति**। न चाखिलैरित्यनेनैव अतिव्याप्त्यर्थस्योक्तत्वात्तदर्थापिशब्दवैयर्थ्यमिति वाच्यम्। अखिलशब्दस्य सङ्कोचपरिहाराय अभिव्याप्त्यर्थकापिशब्दप्रयोगादिति भावः। नन्वाप्यतममित्यस्याधिकृतत्वप्रतिपादकत्वे अखिलतमपोर्वैयर्थ्यम्। वेदप्रतिपाद्यमित्यनेनैवाधिकृतत्वप्रतिपादनसंभवादित्यतस्तं निरसनीयामाशङ्कामाह **यदीति**। आप्यतममित्यखिलैः सुवाक्यैरिति चोक्तमिति। न च धर्मादावखिलवेदप्रतिपाद्यत्वस्य वाऽतिशयेन तत्प्रतिपाद्यत्वस्य वा असंभवेनाखिलतमपोरन्यतरेणैव तद्व्यावृत्तिसंभवादुभयोर्मध्ये एकस्य वैयर्थ्यं स्यादिति वाच्यम्। वेदप्रतिपाद्यमित्युक्ते धर्मादावतिप्रसक्तौ सत्यां तदर्थमखिलैरित्युक्ते श्रीदेव्या अपि स्वावरसूक्तेषु मुख्यतः प्रतिपाद्यत्वेन विष्णुसूक्ते त्वन्यार्थ(त्वमुख्यार्थ)प्रतिपाद्यत्वेनाखिलवेदप्रतिपाद्यत्वस्य सत्त्वेन तद्व्यावृत्त्यर्थं तमपोग्रहणम्। तस्याश्चातिशयेन तत्प्रतिपाद्यत्वाभावान्न तत्रातिप्रसङ्गः। तद्वनिनैवोभयव्यावृत्तिसंभवादखिलपदवैयर्थ्यमिति न च वाच्यम्। वेदैकदेशेऽतिशयेन विष्णोः प्रतिपाद्यत्ववत्तदेकदेशान्तरे रुद्रस्याप्यतिशयेन प्रतिपाद्यत्वमिति शङ्कानिवारणार्थत्वेन वैयर्थ्याभावात्। तथाचातिशयेनाखिलवेदप्रतिपाद्यत्वं सिद्ध्यतीति भावः। अत एव गतिसामान्यादिति सूत्रमर्थवदिति भावः।

श्रीनिधि०— **नारायणप्रतिपत्त्यङ्गतयेति**। तदुक्तं "चरितं वैष्णवानां तु विष्णूद्रेकाय कथ्यत" इति। राजसंबन्धि राजाद्युत्कर्षवर्णनस्य तदुत्कर्षज्ञानार्थत्वदर्शनात्।

वा०चं०— अत्रापिपदस्य यथास्थितस्य समुच्चयार्थतायाः एव वक्तव्यत्वात्साक्षाद्वन्द्यत्वहेतोरस्य वन्द्यत्वहेतुवैशिष्ट्यहेतुभिर्निखिलेत्यादिभिः साक्षात्साध्येन समुच्चयासंभवात्परमसाध्यसमुच्चयमभिप्रेत्याह **अपीति**। अत एवास्वरसाद्भिन्नक्रमत्वमभ्युपेत्यार्थान्तरं तस्याह **अभीति**।

वा०र०— **अत्रेति**। व्याख्येयत्वेन प्रकृतं बुद्धावत्रेति निर्दिष्टम्। **यथास्थितस्येति**। वक्ष्यमाणभिन्नक्रमत्वव्यावृत्तये यथास्थितस्येत्युक्तम्। **समुच्चयार्थताया एवेति**। अर्थान्तरस्यात्रानुपयोगात् इति भावः। **हेतोरस्येति**। अखिलैः सुवाक्यैः आप्यतमत्वस्येत्यर्थः। **साक्षात्साध्येनेति**। वैशिष्ट्यहेतूनामिति पूरणीयम्। विपरिणामेन तृतीयान्तस्यैवानुवृत्तिर्वा। तथा च तेषां यत् साक्षात्साध्यं वैशिष्ट्यं रूपं तेन तदादायेत्यर्थः। समुच्चयासंभवोपपादनायैव साक्षात् वन्द्यत्वेति हेतुगर्भं विशेषणं प्रागुक्तम्। साक्षात् वन्द्यत्वहेतोः साक्षात् तद्धेतुना वन्द्यत्वरूपसाध्य एव समुच्चयो युज्यते। न तु साध्यान्तरे तत्साध्यान्तरसाधनसाधनैः सह समुच्चयो युज्यते इत्यर्थः। यद्वा आप्यतमत्वस्य यत् साक्षात्साध्यं तेन तदुपायेन तदादायेति योज्यम्। निखिलेत्यादीनां साक्षात् वन्द्यत्वसाध्यकत्वाभावात् इत्याशयः। वन्द्यत्व इति मूलगतसप्तमीपाठानुसारेण साक्षात्साध्य इति सप्तमीपाठस्तु स्वरस एव। **परमसाध्यसमुच्चयेति**। निखिलेत्याद्युक्तहेतूनां वैशिष्ट्यद्वारा परमसाध्यहेतुताया अपि सत्त्वात् साक्षात् परंपरासाधारणवन्द्यत्वहेतूनां वन्द्यत्वरूपसाध्यसमुच्चयमित्यर्थः। **अस्वरसादिति**। श्रुतहेतौ साक्षात् पारंपर्यस्याविवक्षारूपादित्यर्थः। **भिन्नक्रमत्वमिति**। अखिलैरपि सुवाक्यैरिति स्थानान्तरसंबन्धमित्यर्थः। तस्य भिन्नक्रमत्वमित्यपि योज्यम्। अभिव्याप्तिश्चाखिलवाक्येषु नैकमपि अन्यप्रापकं इत्येवंरूपा। एतच्च प्रागेव विवृतमिति

भावः। नाटकादिसाधारणसुश्राव्यत्वरूपशोभनत्वव्यावृत्त्यर्थः। **मूले अनाशङ्क्येति**। आदिना तन्मूलत्वपरिग्रहः। वेदादीनीत्यत्रादिपदेन निर्णेतव्येतिहासादेः सङ्ग्रहः। **तमबोऽर्थोऽतिशयेनेति**। सुवाक्यैराप्यत्वोक्तिमात्रेण अधिकृतत्वलाभात् तमपोऽखिलपदस्य च वैय्यर्थ्यमित्यतः तद्व्यावृत्त्यशङ्काप्रदर्शनपूर्वकं तन्निवर्तकतया तदुपयोगमाह **यदि व्याचिख्यासितेनेत्यादि मूलम्। तत एव उक्तशास्त्रवेदादिप्रतिपाद्यत्वादेव**। कर्मकाण्डप्रतिपाद्यत्वभेदात् धर्मादिकं प्राणादिकमिति पृथक् निर्देशः। **ततश्च धर्मादावधिकृतत्वस्य बन्धत्वव्यभिचारित्वात् न तत् प्रयोजकत्वं इति** भावः। ननु अस्तु अन्यप्रतिपत्त्यङ्गतया वेदैकदेशवेद्यात् धर्मादिरनन्यार्थतया निखिलवेदादिप्रतिपाद्यस्य ब्रह्मणो वैलक्षण्यम्। तथापि अधिकृतत्वस्य व्यभिचारो न परिहृतः इत्यत उक्तं **मूले तथाविधमेवेति**। यद्धि यत्राधिकृतं इत्युच्यते तस्यानन्यार्थतया सकलप्रतिपाद्यत्वमेवाधिकृतशब्दप्रवृत्तिनिमित्तं उपलब्धम्। ततश्च तादृशनिमित्तवदेवाधिकृतमित्युच्यते स तथा भूतधर्मादिव्यावृत्तिः। प्रकृताधिकृतो भगवांस्तु सकलसुवाक्यैः अनन्यार्थतया प्रतिपाद्य इति परमाधिकृतत्वात् अधिकृतत्वं तस्य युक्तमित्याशयः। अत्र च एकदेशप्रतिपाद्ये एकदेशेऽपि भगवत्प्रतिपत्त्यङ्गतया प्रतिपाद्ये धर्मादावनन्यार्थतया निखिलेत्याद्युक्तार्थयोः अभावेन तदर्थयोरन्यतरविवक्षयैव तद्व्यावृत्तिसिद्धावपि उभयोपादानं अनन्यार्थतया वेदादिवेद्यत्वं निखिलवेदादिवेद्यत्वमिति निमित्तद्वयाभिधानाभिप्रायेण। तदपि विभवादिति गुरवः। मम प्रियतममित्येतावतैव पूर्तेः। **सदेत्यस्य तमपश्च वैयर्थ्य इत्याशङ्कापरिहाराय** अत्रापि पूर्ववत् इति मूले अखिलैराप्यतममित्यखिलपदतमपोरिव **प्रयोजनमित्यतिदेशः कृतः**। तत्र प्रागुक्तं संपूर्णं प्रयोजनं अतिदिश्यत इति भ्रान्तिं निराकर्तुं एकदेशोपादानेनोपयुक्ताधिकवचनेन चातिदिश्यमानप्रयोजनं दर्शयन्नुक्तप्रयोजनातिदेशपरत्वेश्च न मूलं अवतारयति।

स०ब्र०— अखिलैरित्यस्य तमपश्च प्रयोजनं वक्तुमाह **यदि व्याचिख्यासितेनेत्यादिना**। अधिकृतत्वमात्रं कर्मकाण्डप्रतिपाद्ये धर्मादौ, ब्रह्मकाण्डप्रतिपाद्ये प्राणादौ च व्यभिचरतीति भावः॥ नन्वेतावताऽधिकृतत्वस्य व्यभिचारो नोद्धृत इत्याशङ्क्यायामाह **तथाविधमेवेति**। अनन्यापेक्षया वेदादिवेद्यं, सकलवेदादिवेद्यं, चेत्यर्थः। इदं च हेतुद्वयमतो न वैयर्थ्यम्।

कुण्डल०— **धर्मादिकमिति**। कर्मब्रह्मकाण्डाद्यवान्तरतात्पर्यविषयत्वाद्धर्मादिरिति भावः। धर्मप्राणादेः धर्मादिकमिति कदाचित् प्रियत्वेऽपि सर्वदातिशयेन च प्रियत्वाभावात् सदाशब्देन तमपा च धर्मादिव्यावृत्तिलक्षणप्रयोजनमवधेयमित्यर्थः।

वि०— तर्हि तत एव धर्मादिकं वन्दनीयमिति न च वाच्यम्। जैमिनिसूत्रादिनैव धर्मादिः प्रतिपाद्यत्वेन ब्रह्ममीमांसाशास्त्रेणाप्रतिपाद्यत्वात्। **तत एवेति कथमुक्तमिति**। धर्मादिरप्यत्रेश्वरशेषतया प्रतिपाद्यत्वोररीकरणात्। परन्तु मन्दमतीनां स्पष्टं न प्रतीयते।

ल०र०— एवं विशेषणपञ्चके निखिलेत्यादिविशेषणत्रयस्य प्रतिज्ञातं वैशिष्ट्योपपादकत्वं तदर्थकथनेनैवोपपाद्य तत्राप्युपपाद्यातिरिक्तोपपादकप्रदर्शनेन विशेषणैस्तदुपपादनमपि स्वार्थद्वारा परंपरयेत्येतदप्यर्थादुप-

पाद्यधुनाऽवशिष्टविशेषणद्वये आप्यतममप्यखिलैः सुवाक्यैरित्यस्याधिकृतत्वोपपादकत्वमाह **अधिकृतत्वेति** । अत्राधिकृतत्वप्रदर्शनायेति साक्षादधिकृतत्वप्रतिपादकत्वोक्त्या अस्य विशेषणस्य न पूर्ववत्परंपरया किन्तु साक्षादेवाधिकृतत्वोपपादकत्वमिति सूचयति । तेन विशेषणैरुपपादनमपि कथं किं साक्षादुत परम्परयेत्याशङ्का परिहृता भवति । इतीत्यतःपरं विशेषणत्रयमित्युक्तविशेषणपदस्य वृद्धया विवक्षयानुवृत्तिर्वा शेषो वा बोध्यः । निखिलेत्यादिना वैशिष्ट्यस्य हेतूनां प्रसक्तत्वात्तैः सह समुच्चयप्रसक्तावाह **अपिशब्द इति** । **समुच्चयार्थ इति** । न केवलं वैशिष्ट्याद्वेयं किन्त्वधिकृतत्वादपीति समुच्चयार्थ इत्यर्थः । पूर्ववत्समभिव्याहृतपदार्थासङ्कोचव्यञ्जनायापि-शब्दस्यार्थान्तरमाह **अभिव्याप्तौ वेति** । व्यवस्थितविकल्पार्थो वाशब्दः । यस्य निखिलेत्याद्युक्तहेतुभिर्वैशिष्ट्यमात्रं बुद्धिस्थं तं प्रति हेत्वन्तरसमुच्चयार्थः । यस्य चाखिलपदार्थसङ्कोचशङ्का हि तां अखिलवाक्यप्रतिपाद्यत्वे पुनर्धर्मादिसाधारण्यशङ्का तं प्रत्यभिव्याप्त्यर्थ इति । उभयवन्तं प्रति तु वाशब्दश्चशब्दार्थः । ननु कथमनेन विशेषणेनाधिकृतत्वप्रदर्शनमित्यतस्तावद्वाक्यार्थमाह **अपौरुषेयत्वेनेत्यादि** । अपौरुषेये पौरुषेये च वाक्ये दोषानाशङ्कादौ क्रमेण हेतुद्वयम् । अपौरुषेयत्वेन तन्मूलत्वेन वेति । व्यवस्थितविकल्पार्थो वाशब्दः । दोषत्वादिनेत्यादिपदेन निश्चितप्रामाण्यकत्वपरिग्रहः । अनाशङ्कितदोषत्वादिना शोभनानीत्यनेनेदमेव शोभनत्वं प्रकृतोपयुक्तत्वं न शब्दार्थालङ्कारवत्त्वरूपमिति सूचयति । वेदादीनीत्यादिपदेनाशेषनिर्णेतव्यपरिग्रहः । साक्षा-द्व्याचिख्यासितत्वरूपं वैशेष्यं द्योतयितुं **ब्रह्मसूत्रादीनि चेति पृथगुक्तिः** । अभिव्याप्त्यर्थत्वपक्षेऽपिशब्दस्य विवक्षितस्थले अन्वयं दर्शयति **अखिलैरपीति** । **नन्वधिकृतत्वं** प्रकृतग्रन्थप्रतिपाद्यत्वम् । तच्चात्र विशेषणं सुवाक्यैराप्यमित्येतावतैव प्रदर्शितं भवतीत्यधिकमधिकमित्यतोऽधिकस्याप्यधिकृतत्वप्रदर्शन एवोपयोगं वक्तुं अधिकांशव्यावर्त्यामाशङ्कां दर्शयति **यदीत्यादिना** । अत्र ब्रह्ममीमांसाशास्त्रेण वेदादिना चेत्याभ्यां प्रकृत-ग्रन्थस्वरूपानुवादः । व्याचिख्यासितेन तन्निर्णेतव्यार्थेनेत्याभ्यां तु तत्र प्रकृतत्वप्रकाशप्रदर्शनमिति ज्ञेयम् । हन्त इत्यास्वादने वाक्यालङ्कारे वा । तत एव प्रकृतग्रन्थप्रतिपाद्यत्वादेव । एवेति प्रकृतग्रन्थप्रतिपाद्यत्वे साम्य-मभिप्रैति । धर्मादिकमित्यादिपदेन नारायणप्रतिपत्त्यङ्गाचेतनपरिग्रहः । प्राणादिकमित्यादिपदेन तादृशचेतनपरिग्रहः । वेत्यनास्थायाम् । अत एव तत्येत्येकारयैव परामर्शः । **वन्दनीयं स्यात्** । नारायणसाम्येनेति शेषः । एवमाशङ्कां प्रदर्श्य तन्निरासाय प्रकृतग्रन्थप्रतिपाद्यत्वे वैषम्यं वदन् साम्यं प्रतिषेधति **न स्यादिति** । **अस्य** नारायणस्य । पुनःशब्दस्तुशब्दार्थे । तत्सूचितं विशेषं व्यनक्ति **अनन्यार्थतयेत्यादि** । सामान्यमुखेनाधिकांशोपयोगमधुनाह **तथाविधमिति** । प्रकृतग्रन्थेऽनन्यार्थतया सर्वत्र प्रतिपाद्यमित्यर्थः । एवेति प्रतिपाद्यसामान्यं व्यावर्तयति । चशब्दो हिशब्दार्थः । प्रसिद्धौ चेत्यतः परं वस्त्विति शेषः । उच्यते परीक्षकैः । अयं भावः । यद्ग्रन्थनन्यार्थतया सर्वत्र च यत्र प्रकृतग्रन्थे प्रतिपाद्यं तदेव तत्राधिकृतमिति हि बहुपरीक्षकप्रसिद्धम् । अत्र सर्ववेदाभिधेयत्वं वायोरप्यस्तीति महाभूतिभाष्योक्तेः । सर्ववेदप्रतिपाद्यस्य वायोः सर्ववेदाधिकृतत्ववारणाय **अनन्यार्थतयेति** । 'शैवे च स्कान्दे ।' 'अपचादपि कष्टत्वं ब्रह्मेशानादयः सुराः । तदैवाच्युतयान्त्येव यदैवत्वं पराङ्मुख इति ।' ब्राह्मे च ब्रह्मवैवर्ते । 'नाहं न च शिवोऽन्ये च तच्छक्त्येकांशभागिनः । बालः क्रीडनकैर्यद्वत्क्रीडतेऽस्माभिरच्युत इती'ति सूत्रभाष्योक्तेः । स्कान्दे ब्रह्मवैवर्ते चानन्यार्थतया प्रतिपाद्यस्याच्युतस्य तत्राधिकृतत्ववारणाय सर्वत्रेति । अनन्यार्थस्य वेदैकदेशप्रतिपाद्यस्य

धमदिस्तदधिकृतत्ववारणाय तु पदद्वयमपीति सर्वस्यावश्यकत्वात् । प्रकृते प्रकृतग्रन्थः पौरुषेयापौरुषेयभेदेन सर्वस्यापि कस्यचिद्वाचिख्यासिततया कस्यचिन्निर्णेतव्यार्थतया चेति सर्वस्यापि प्रकृतत्वात् । तत्रानन्यार्थतया सर्वत्रापि नारायणस्यैव प्रतिपाद्यत्वात्तस्यैवाधिकृतत्वं न धर्मादीनाम् । तेषां यादृशं प्रतिपाद्यत्वं तादृशं वन्द्यत्वं तु नानिष्टम् । न चैवंविधं नारायणस्याधिकृतत्वमुक्तविशेषणे तमबखिलपदाभ्यां विना प्रतीयत इत्यस्त्येवाधिकृतत्व-प्रदर्शन एवाधिकांशस्योपयोग इति । अपिपदस्य तु अखिलपदार्थासङ्कोचव्यञ्जनेनाखिलपदार्थसङ्कोचशङ्कानिवर्तक-तयैवोपयोगः न त्वधिकृतत्वघटकतया । अत एव मध्यस्थमप्यपिपदं विहाय तथाविधमेव चाधिकृतमुच्यत इत्याशयवता आप्यतममप्यखिलैरिति चोक्तमिति पदद्वयस्यैव प्रयोजनं प्रदर्शितम् । तथा चाप्यतममप्यखिलैः सुवाक्यैरिति विशेषणेन यथा वन्द्यत्वसामान्यप्रयोजकमुक्तविधमधिकृतत्वमुपपादितम्, तथा तस्यानन्यसाधारणत्वात् तेनेतरप्रहाणेन वन्द्यत्वप्रयोजकं सर्वोत्तमत्वं चोपपादितं भवतीति ।

चषकः— समुच्चयार्थ इति । निखिलेत्यादिविशेषणत्रिकस्यापि वैशिष्ट्यद्वारा वन्द्यत्वसाधन एव तात्पर्योपगतेरिति भावः ॥ दर्शितत्रिकस्य किञ्चिदद्वारकप्रधानसाध्यसाधनीभूताधिकृतत्वतुल्यकक्ष्यापन्नता-विरहात्समुच्चायकता न सूपपादेत्यरुचिं मन्वानः कल्पान्तरं श्रयते **अभीति** ॥ तमपोऽखिलैरित्यस्य च प्रयोजन-मभिधित्सते **यदीत्यादि** । स्ववृत्तिकर्मतानिरूपकत्वसंसर्गेण प्रकृत्यर्थप्रकथनविशेषितसन्प्रत्ययार्थेच्छाविषयी-भूतेनेत्यर्थः । कर्मब्रह्मकाण्डभेदेन व्यभिचारनिरूपकाधिकरणद्वयोपादानम् । **तथाविधमिति** । अखिलवेदादि-करणकेतरप्रतीत्यनुद्देश्यकप्रतिपादनक्रियाकर्मत्वरूपसमुदितार्थस्य हेतुतायां हेतुतावच्छेदकघटकविशेषणयोः वैकल्पिकफलकतया मतभेदेन निग्रहासिद्धिप्रसङ्गेनानन्योद्देश्यकतादृशक्रियाकर्मत्वस्य साकल्यांशघटिततादृश-क्रियाकर्मत्वस्य च पार्थक्येन(नैव) तद्धेतुत्वोपगतेरुक्तक्षत्यनवकाशादिति हृदयम् ।

काशी०— अपिशब्देन वन्द्यत्वहेतोर्वैशिष्ट्यहेतुना समुच्चययोगादाह **अपिशब्द इति** । निखिलेत्यादि-विशेषणत्रयलब्धवैशिष्ट्यादिरूपवन्द्यत्वहेतुसमुच्चयार्थ इत्यर्थः । अदोषत्वरूपशोभनत्वोपपादनम् । **अनाशङ्क्येति** । तदुपपादनं वेदस्यापौरुषेयत्वेन पुराणादेस्तन्मूलत्वेनेति वेदादीत्यादिना पुराणादिनिर्णेयग्रन्थपरिग्रहः । निर्णायकत्वेन ब्रह्मसूत्राणां पृथगुक्तिः । अतिशयोऽनन्यार्थत्वं विशेषणे तृतीयाप्रतिपत्तौ तदन्वयः । एतेन विष्णोरुक्तविधाधिकृतत्वे 'सर्वे वेदा यत्पदमामनन्ति, वेदैश्च सर्वैरहमेव वेद्यः', 'तत्तु समन्वयादि'त्यादिसुवाक्यमेव प्रमाणमित्यपि सूचितम् । तमप्प्रत्ययाखिलपदयोः प्रयोजनं वक्तुमाक्षिपति **यदीति** । ननु स्वचिकीर्षितग्रन्थप्रतिपाद्यतायाः स्ववन्द्यत्व-प्रयोजकत्वेन विवक्षितत्वात्कथं ब्रह्मसूत्रप्रतिपाद्यत्वेनाचार्यवन्द्यत्वमुच्यत इत्यत आह **व्याचिख्यासितेनेति** । व्याख्यानस्य पृथक् प्रामाण्याभावेन तदुपकृतव्याख्येयप्रतिपाद्यत्वमेव तत्प्रतिपाद्यत्वमिति भावः । तर्हि ब्रह्मसूत्रप्रतिपाद्यताऽपि कथमित्यत आह **तन्निर्णेतव्यार्थेनेति** । संभूय वेदशास्त्रप्रतिपाद्यत्वस्यैव विवक्षितत्वान्न दोष इति भावः । धर्मप्राणेति तद्देवतोक्तिः **साभिसन्धिः समाधत्ते न स्यादिति** । **अनन्यार्थतयेति** । अनन्यप्रतिपत्त्यङ्गतयेत्यर्थः । तेनाधिकारिविशेषान्प्रति मोक्षार्थतया वेदादिवेद्यत्वेऽपि न दोषः । मा भूद्भगदिरुक्तविधं प्रतिपाद्यत्वं प्रतिपाद्यत्वमात्रेण वन्दनीयत्वं तु स्यादित्यतोऽभिसन्धिमुद्घाटयति **तथाविधमिति** । अनन्यार्थतया

वेदादिवेद्यमखिलवेदादिवेद्यं वेत्यर्थः। न च विष्णोर्ब्रह्मादीन्प्रति पदसमन्वयादिनाऽखिलवेदादिवेद्यत्वेऽप्यस्मदादीन्प्रति तथात्वानुपपत्तेरिति वाच्यम्। अखिलवेदादिमहातात्पर्यविषयत्वस्यैवात्र विवक्षितत्वेन सर्वाधिकारिसाधारण्योपपत्तेः। अत एव पौरुषेयग्रन्थान्तरेष्वप्यधिकृतत्वनिर्वाहः। नन्वाद्ये धर्मादिर्धर्मजिज्ञासादावधिकृतत्वं न स्यात्। अन्यार्थं तु जैमिनिरिति न्यायेन धर्मादिर्ब्रह्मप्रतिपत्त्यङ्गत्वेन तद्वेद्यत्वादिति चेन्न। तत्प्रतिपाद्यान्तरप्रतिपत्त्यनङ्गत्वस्य विवक्षितत्वात्। ब्रह्मणश्च तदप्रतिपाद्यत्वात्। अखिलैरिति चोक्तमित्यत्राखिलैरपीति ग्राह्यम्।

गूढ०— अभिव्याप्तिमेवाह अनाशङ्कितेत्यादिना। तमबर्थकथनम् अतिशयेनेति। न च अखिलैरित्यनेनैवाभिव्याप्त्यर्थस्योक्तत्वात्तदर्थकापिशब्दवैयर्थ्यमिति वाच्यम्। अखिलशब्दस्य सङ्कोचपरिहारायाभिव्याप्त्यर्थकापिशब्दप्रयोगादिति भावः। नन्वाप्यतममित्यस्याधिकृतत्वप्रतिपादकत्वे अखिलतमपोर्वैयर्थ्यम्। वेदप्रतिपाद्यमित्यनेनैवाधिकृतत्वप्रतिपादनसंभवादित्यतस्तन्निवर्तनीयामाशङ्कामाह यदीति। आप्यतममित्यखिलैः सुवाक्यैरिति च उक्तमिति। न च धर्मादावखिलवेदप्रतिपाद्यत्वस्य वा अतिशयेन प्रतिपाद्यत्वस्य वाऽसंभवेनाखिलतमपोरन्यतरेणैव तद्व्यावृत्तिसंभवादुभयोर्मध्ये एकस्य वैयर्थ्यं स्यादिति वाच्यम्। वेदप्रतिपाद्यमित्युक्ते धर्मादावतिप्रसक्तौ सत्यां तदर्थमखिलैरित्युक्ते श्रीदेव्या अपि स्वावरसूक्तेषु मुख्यतः प्रतिपाद्यत्वेन विष्णुसूक्ते त्वन्यार्थं (अमुख्यार्थ)प्रतिपाद्यत्वेन निखिलवेदप्रतिपाद्यत्वस्य सत्त्वेन तद्व्यावृत्त्यर्थं तमपो ग्रहणम्। तस्याश्चातिशयेन तत्प्रतिपाद्यत्वाभावान्न तत्रातिप्रसक्तिः। तद्धनिनैवोभयव्यावृत्तिसंभवादखिलपदवैयर्थ्यमिति न च वाच्यम्। वेदैकदेशेऽतिशयेन विष्णोः प्रतिपाद्यत्ववत्तदेकदेशान्तरे रुद्रस्याप्यतिशयेन प्रतिपाद्यत्वमिति शङ्कानिवारणार्थत्वेन वैयर्थ्याभावात्। तथा चातिशयेनाखिलवेदप्रतिपाद्यत्वं सिध्यतीति भावः। अत एव गतिसामान्यादिति सूत्रमर्थवदिति भावः।

इष्टत्वप्रदर्शकतया विशेषणव्याख्यानम्—

८ सु०— इष्टत्वप्रदर्शनं सदा प्रियतमं ममेति। अत्रापि पूर्ववत् सदापदस्य तमपश्च प्रयोजनमवधेयम्।

परि०— पूर्ववदिति। पूर्वत्रानयोर्यत्प्रयोजनमुक्तं तदत्र ज्ञेयमिति नार्थः। किन्तु 'यथा अन्यार्थतया वेदैकदेशप्रतिपाद्यस्य धर्मादेः प्राणादेश्चाधिकृतत्ववारणायाप्यतममिति तमप्प्रत्ययः अखिलादिपदं च प्रयुक्तम्। तथात्रापि धर्मादेः प्राणादेश्च प्रियत्वमेव न तु प्रियतमत्वम्। तदपि धर्मादेर्भगवत्प्रतिपत्त्यङ्गत्वदशायाम्, काम्यतादशायां तु प्रियत्वमपि नास्ति; प्राणादेर्भगवदङ्गत्वेनैव प्रियत्वं न तु स्वतः। तथाच तयोः कदाचित्प्रियत्वमात्रेऽपि न तयोर्नम्यत्वप्रयोजकेष्टत्वम्। अनाद्यनन्तकालमतिशयेनानन्यार्थतया प्रियत्वरूपनम्यत्वप्रयोजकमिष्टत्वं नारायणस्यैव। अतस्तस्यैव नतिरिति द्योतनाय सदेति प्रियतममिति चोक्तम्' इति व्याख्येयमित्यर्थः।

यादु०— अत्रापि पूर्ववदिति। इष्टत्वमात्रं स्रक्चन्दनादौ व्यभिचारि, अनन्यार्थतयेष्टत्वं च तमबर्थभूते सुखे व्यभिचारि; अतः सदेति। वैषयिकसुखं च न सदेष्टमिति भावः॥ नन्वेवमपि ऋष्यादिस्वरूपसुखे व्यभिचारः, अतो ममेति। न चैवं मम सदा प्रियत्वादित्येवास्त्विति वाच्यम्; तथाच ममैकान्तिनः सदा प्रियत्वात्, मम प्रियतमत्वात् इति हेतुद्वये तात्पर्यमतो न वैयर्थ्यशङ्का इति; भारत्यादावपि गतत्वात्, प्रियतमत्वादित्युक्ते च न तत्र व्यभिचारः, तस्या अन्यार्थतयैव प्रियत्वादिति ध्येयम्॥ एवं च पूर्ववदित्यस्य पूर्वन्यायेनेत्यर्थो बोध्यः॥ इयांस्तु विशेषः। अत्र विशिष्टो हेतुः, पूर्वत्र हेतुद्वयमिति।

वं०प०— पूर्ववदिति। सदापदस्य तमपश्च प्रयोजनम्, पूर्ववत् पूर्वन्यायेनावधेयम्। यथा अखिलैराप्यतममित्यत्र धर्मादौ व्यभिचारपरिहारो विशेषणप्रयोजनमेवमत्रापि भगवान्वन्द्यो भवितुमर्हति ममैकान्तिनः सदा प्रियतमत्वात्, मम प्रियतमत्वादिति विवक्षिते हेतुद्वये व्यभिचारपरिहारायेदं विशेषणद्वयमित्यर्थः॥ तप्रकारश्चाद्ये हेतौ वैषयिकसुखे व्यभिचारपरिहाराय सदेति विशेषणम्। द्वितीयहेतौ मम प्रियत्वस्य स्रक्चन्दनादौ व्यभिचारवारणाय प्रियतमत्वादित्युक्तम्, अनन्यार्थतयेष्टत्वस्य तमबर्थत्वान्न व्यभिचार इति।

आनन्दः— ननु मम प्रियमित्येतावतैवेष्टत्वप्रतिपादने संभवति सदा तमपोरानर्थक्यमित्यत आह अत्रापीति। प्रियमित्युक्ते धमदिरपि प्रियत्वात्तस्यापीष्टत्वेन वन्दनं स्यादित्यतः प्रियतममित्युक्तम्। कदाचित् अतिशयेन प्रियत्वे लोकवत् कदाचिद्वन्दनीयत्वं स्यात्। अतः सदेत्युक्तं इति पूर्ववत् तमबखिलपदवत्सदापदस्य तमपश्च प्रयोजनमुपपादनीयमित्यर्थः।

कं०रा०— पूर्ववदिति। धर्मप्राणादिकस्य कदाचित्प्रियत्वेऽपि सदाऽतिशयेन प्रियत्वाभावात् सदाशब्देन तमपा च धर्मादिव्यावृत्तिलक्षणं प्रयोजनं लभ्यत इति ज्ञातव्यमित्यर्थः।

श्रीनिधि०— अत्रापि पूर्ववदिति। यदि प्रियत्वान्नारायणो वन्दनीयः तर्हि तत एव देहादिकं धर्मादिकं वा वन्दनीयं स्यात्। देहादेरिष्टसाधनत्वेन प्रियत्वात्। ब्रह्मादेश्च प्राणादेश्च प्रेरकत्वेन प्रियत्वात्। अतः सदा प्रियतममित्युक्तम्। तत्राद्यस्य सदा प्रियत्वाभावात् वन्दनीयत्वाभावः। द्वितीयस्य प्रियतमत्वाभावादिति पूर्ववद्व्याख्येयमित्यर्थः।

वा०चं०— स्वर्गादेरनित्यत्वेन सदा प्रियत्वाभावाद्धमदिरन्यार्थतयैव प्रियत्वादस्य पुनः सदाऽनन्यार्थतया प्रियत्वात्तथाविधमेव चेष्टत्वमुच्यत इत्याशयवानाह अत्रापीति।

वा०र०— स्वर्गादेरित्यादिना। अस्तु स्वर्गादिव्यावृत्तं भगवतोऽनन्यार्थतया सदाप्रियत्वम्। तावतापि इष्टत्वस्य स्वर्गादौ व्यभिचारस्तु दुर्वार इत्यत उक्तं **तथाविधमेव च इष्टमिति**। इत्याशयेनाहेत्यत्राहेत्यस्य सदापदतमपोः प्रागुक्तप्रयोजनातिदेशेन सार्थक्यमाहेत्यर्थः। प्रयोजनातिदेशो आशयप्रदर्शनेन निवृत्तः। धमदिः अन्यार्थतया एवेत्यनेन सदाप्रियत्वोपगमसूचनादस्य विशिष्टस्यैव हेतुत्वद्वये तात्पर्यमित्यपि ज्ञेयम्।

स०त्न०— अत्रापि पूर्ववदिति। इष्टत्वमात्रं सक्चन्दनादौ व्यभिचारि, अनन्यार्थतयेष्टत्वं च तमबर्थभूतं सुखे व्यभिचारि; अतः **सदेति**। वैषयिकं सुखं च न सदेष्टमिति भावः॥ नन्वेवमपि मध्यमाधिकारिस्वरूपसुखे व्यभिचारः, अतो **ममेति**॥ न चैवं मम सदा प्रियत्वादित्येवास्त्विति वाच्यम्, भारत्यादौ व्यभिचारात्। अतः प्रियतमत्वादित्युक्ते तु न तत्र व्यभिचारः; तस्या अपि अन्यार्थतयैव प्रियत्वादिति॥ **पूर्ववत्** पूर्वन्यायेन। इयांस्तु विशेषः। अत्र विशिष्टो हेतुः, पूर्वत्र हेतुद्वयमिति।

वि०त्न०— "ग्रन्थोऽयमपि बह्वर्थो भाष्यं चात्यर्थविस्तरम्। बहुज्ञा एव जानन्ति विशेषेणार्थमेतयोः" इत्युक्तेर्भाष्यादौ च तद्विवरणं कृतमेव। वक्ष्यति च **अत्रापि पूर्ववदिति**।

ल०र०— इदानीं विशेषणपञ्चके परिशिष्टविशेषणस्य वन्द्यत्वप्रयोजकत्वे परिशिष्टेष्टत्वोपपादकत्वमाह **इष्टत्वेति। प्रदर्शनमिति**। प्रदर्श्यतेऽनेनेति व्युत्पत्त्या प्रदर्शकमित्यर्थः। नन्वत्र विशेषणं प्रियमित्यनेनैवेष्टत्वस्य प्रदर्शितत्वात्किमधिकांशेनेत्यत आह **अत्रापीति**। इष्टत्वप्रदर्शकविशेषणेऽपीत्यर्थः। कथमित्यत उक्तं **पूर्ववदिति**। ननु सदापदस्य पूर्वं प्रयोजनानुक्तेः कथमनिदेश इत्यत उक्तम् **अवधेयमिति**। तथाच पूर्ववदित्यस्य पूर्वमनयोर्यथा प्रयोजनमुक्तं तथात्रापि वक्तव्यमिति नार्थः। किन्त्वधिकृतत्वप्रदर्शके पूर्वविशेषणे येन प्रकारेणाधिकांशप्रयोजनमुक्तं तेनैव प्रकारेणास्मिन्नपि विशेषणेऽधिकांशप्रयोजनं वक्तव्यमितीत्युक्तं भवति। अत्राधिकांशप्रदर्शनं **सदापदस्येत्यादि**। तत्प्रकारश्च यदीष्ट इति नारायणो वन्दनीयः। **हन्त** तर्हि तत एव धर्मादिकं प्राणादिकं वा वन्दनीयं स्यात्। न स्यात्। तस्य नारायणप्रतिपत्त्यङ्गतया कदाचिदिष्टत्वात्। अस्य पुनरनन्यार्थतया सदैवेष्टत्वात्। तथाविधमेव चेष्टमुच्यत इत्याशयवता प्रियतममिति सदेति चोक्तमित्युक्तरूपेणावधेयम्। अयमाशयः। यद्धन्वनन्यार्थतया सदा च यस्य प्रियं तत्तस्येष्टमुच्यते। अत्राप्यनन्यार्थतया प्रियस्यानित्यवैषयिकसुखस्येष्टत्ववारणाय **सदेति**। सदाप्रियस्य प्राणस्य तद्धारणायानन्यार्थतयेति। धर्मदिवारणाय तूभयमपीति सर्वस्यावश्यकत्वात्। नन्वेवमपि नित्यसुखेऽनन्यार्थतया सदेष्टत्वस्यापि सत्त्वात्तस्यापीष्टत्वापत्तिरिति चेत्। किमेकान्तिनां नित्यसुखस्येष्टता आपाद्यते उतानैकान्तिनाम्। नाद्यः। एकान्तानां न कस्यचित्। 'अर्थे नारायणो देवः सर्वमन्यत्तदर्थकमि'ति समस्ताध्यायगीताभाष्योक्तेरनेषामन्यार्थतयैतस्यापीष्टत्वात्तमपा तद्धारणात्। न द्वितीयः। अनभिव्यक्तिदशायां प्रियत्वाभावेन सदापदेन तद्धारणात्। एतादृशं चेष्टत्वं नारायणस्यैव न धर्मप्राणादीनाम्। तेषां यादृशमिष्टत्वं तादृशं वन्द्यत्वं तु नानिष्टम्। न चैवंविधं नारायणस्येष्टत्वं सदापदतमप्रत्ययाभ्यां विना प्रतीयत इत्यस्येवेतत्प्रदर्शन एवाधिकांशाभ्योपयोग इति। **ममेति**पदं तु प्रियशब्दस्य साकांक्षत्वात्तत्संबन्धितयैवोपात्तं न त्वनिष्टत्वघटकतया तावत एव निर्दुष्टत्वात्। अत एव पूर्ववत् सदापदस्य तमपश्च प्रयोजनमवधेयमिति पदद्वयस्यैवं प्रयोजनमुक्तम्। तथाच सदा प्रियतमं ममेति विशेषणेन यथा वन्द्यत्वसामान्यप्रयोजकमुक्तविधमिष्टत्वमुपपादितं तथा तस्यानन्यसाधारणत्वात्तेनैवेतरग्रहाणेन वन्द्यत्वप्रयोजकं सर्वोत्तमत्वं चोपपादितं भवतीति। एवं सर्वाण्यपि पञ्चपदानि साक्षात्परंपरया वा नम्यत्वप्रतिपादनपराणीत्युपपादयतैवात्र नारायणो नम्यस्तत्प्रयोजकयावद्धर्मवांश्च। तथा इतरग्रहाणेन नम्यस्तत्प्रयोजकसर्वोत्तमत्ववांश्च। तदुभयोपपादकनिखिलपूर्णगुणत्वनिर्दोषत्वजगज्जन्मादिकारणत्वानन्तवेदादिमुख्यप्रतिपाद्यत्वसदाप्राणप्रियतमत्ववांश्च

इत्यादिरूपेण धर्मविशेषसमर्पणेन प्रकारान्तेण स्तुतिपराण्यपि तानि भवन्तीत्युक्तं भवतीत्यवधेयम्। अधिकं तु गुर्व्यां रसरञ्जन्यां द्रष्टव्यम्।

चषकः— पूर्ववदिति। षष्ठ्यन्ताद्वतिः, उपमेये षष्ठीदर्शनात्॥ "स्वर्गादिरनित्यत्वेन सदाप्रियत्वाभावाद्धर्मादिरन्यार्थतयैव प्रियत्वादस्य पुनः सदाऽनन्यार्थतया प्रियत्वात्तथाविधमेव चेष्टत्वमुच्यत इत्याशयेनाह **अत्रापीति**" इति ममेत्यंशस्य हेतुतावच्छेदकघटकतामनङ्गीकुर्वाणा एव व्याकुर्वते। 'इष्टत्वमात्रं सक्चन्दनादौ व्यभिचारि, अनन्यार्थतयेष्टत्वं च तमर्थभूतं सुखे व्यभिचारि; अतः **सदेति**। वैषयिकसुखं च न सदेष्टमिति भावः॥ नन्वेवमपि ऋष्यादिस्वरूपसुखे व्यभिचारः, अतो **ममेति**। न चैवं मम सदा प्रियत्वादित्येवास्त्विति वाच्यम्, विपक्षे भारत्यादावपि गतत्वात्। प्रियतमत्वादित्युक्ते तु न तत्र व्यभिचारः, तस्या अप्यन्यार्थतयैव प्रियत्वादिति ज्ञेयम्। एवं च पूर्ववदित्यस्य पूर्वन्यायेनेत्यर्थो बोध्यः। इयांस्तु विशेषः। अत्र हि विशिष्टो हेतुः, पूर्वत्र हेतुद्वयम्' इत्यपि व्याचक्षिरे। "**पूर्ववदिति**। पूर्वत्रानयोर्यत्प्रयोजनमुक्तं तदत्र ज्ञेयमिति नार्थः। किन्तु यथा अन्यार्थतया वेदैकदेशप्रतिपाद्यस्य धर्मादेः प्राणादेश्चाधिकृतत्ववारणाय **आप्यतममिति** तमप्प्रत्ययोऽखिलपदं च प्रयुक्तम् तथाऽत्रापि धर्मादेः प्रियत्वमेव, न तु प्रियतमत्वं; तदपि **धर्मादेर्भगवत्प्रतिपत्त्यङ्गत्वदशायां**, काम्यतादशायां तु प्रियत्वमपि नास्ति इति प्राणादेर्भगवदङ्गत्वेनैव **प्रियत्वं**, न तु स्वतः; तथाच तयोः कदाचित्प्रियत्वमात्रसत्त्वेऽपि न तयोर्नम्यत्वप्रयोजकेष्टत्वम्। अनाद्यनन्तकालमतिशयेनानन्यार्थतया प्रियत्वरूपनम्यत्वप्रयोजकमिष्टत्वं नारायणस्यैव, नान्येषामिति द्योतनाय सदेति, प्रियतममिति चोक्तमिति व्याख्येयमित्यर्थः" इत्यपि निबध्नन्ति।

अत्र च सदाप्रियतमत्वं, मम प्रियतमत्वं चेति स्वतन्त्रहेतुद्वयमेव सौधाक्षरानुपूर्वीसामञ्जस्यानुरोधेनावसीयते। तत्र विपक्षभूतभारत्यादावाचार्यस्वरूपसुखे चेशोद्देशेन प्रिये ऋष्यादिस्वरूपसुखस्य मुक्तिदशायामनुभूयमानतया तत्कालीनातिशयितप्रीतिविषयतासत्त्वेऽपि, संसारदशायामननुभूयमानतया तत्कालीनतादृशप्रीतिविषयत्वस्य दुरुपपादतया, सार्वकालिकतादृशप्रीतिविषयत्वहेतोस्तत्र चानैकान्त्यानवकाशेन तद्वचावृत्तिफलकतया न ममेत्यंशस्याद्यहेतुतावच्छेदकघटकतयोपादानम्, किन्तु वैषयिकसुखादावनैकान्त्यव्युदसनाय द्वितीयहेतुशरीरघटकतयैव तत्; इति प्रतिसन्दधतां वाक्यार्थचन्द्रिकाकृतां परिमळकृतां च पन्थानमनुरुन्धानाः गुरुपादा अपि, तद्दिशा प्रकृतेऽपि हेतुद्वयमेवाभिप्रेतं ग्रन्थकृतामिति न्यभांत्सुर्भावप्रकाशिकायाम्।

काशी०— तेनाखिलशब्दमात्रलभ्यस्य पूर्वप्रसिद्धपुरुषसूक्तादिभिन्नाखिलवेदादिवेद्यत्वस्य प्राणादिसाधारणत्वेऽपि नातिप्रसङ्ग इति परिमळे। **पूर्ववदिति**। **अखिलैः सुवाक्यैराप्यतममित्यत्राखिलपदतमप्प्रत्ययोरिवेत्यर्थः**। धर्मप्राणादिव्यावृत्तये सदापदस्य तमपश्चोपादानम्। धमदिश्च न सदा प्रियत्वं नाप्यनन्यार्थतयेति तद्वचावृत्तिः। ममेत्युक्तिस्तु विष्णोरिष्टत्वे स्वानुभवरूपप्रमाणसूचनाय तत्तदिष्टत्वं ततद्वन्यत्वनिमित्तमिति ज्ञापनाय चेति भावः। नन्वन्तःकरणवृत्तिविशेषरूपायाः प्रीतेरनित्यत्वात्कथं सदातनत्वम्। न चात्मस्वरूपभूतप्रीतिरेवात्र विवक्षिता। तथा सति वन्दनस्य वृत्त्यात्मकभक्तिनिरपेक्षत्वापत्तेः। देवतान्तरसाधारण्याच्चेति चेन्न। सदेत्यनेन तत्कालोद्रिक्त-

स०र०— अत्रापि पूर्ववदिति । इष्टत्वमात्रं सक्चन्दनादौ व्यभिचारि, अनन्यार्थतयेष्टत्वं च तमवर्थभूतं सुखे व्यभिचारि; अतः सदेति । वैषयिकं सुखं च न सदेष्टमिति भावः ॥ नन्वेवमपि मध्यमाधिकारिस्वरूपसुखे व्यभिचारः, अतो ममेति ॥ न चैवं मम सदा प्रियत्वादित्येवास्त्विति वाच्यम्, भारत्यादौ व्यभिचारात् । अतः प्रियतमत्वादित्युक्ते तु न तत्र व्यभिचारः; तस्या अपि अन्यार्थतयैव प्रियत्वादिति ॥ पूर्ववत् पूर्वन्यायेन । इयांस्तु विशेषः । अत्र विशिष्टो हेतुः, पूर्वत्र हेतुद्वयमिति ।

वि०— "ग्रन्थोऽयमपि बह्वर्थो भाष्यं चात्यर्थविस्तरम् । बहुज्ञा एव जानन्ति विशेषेणार्थमेतयोः" इत्युक्तेर्भाष्यादौ च तद्विवरणं कृतमेव । वक्ष्यति च अत्रापि पूर्ववदिति ।

ल०र०— इदानीं विशेषणपञ्चके परिशिष्टविशेषणस्य वन्द्यत्वप्रयोजकत्वं परिशिष्टत्वोपपादकत्वमाह इष्टत्वेति । प्रदर्शनमिति । प्रदर्श्यतेऽनेनेति व्युत्पत्त्या प्रदर्शकमित्यर्थः । नन्वत्र विशेषणे प्रियमित्यनेनैवेष्टत्वस्य प्रदर्शितत्वात्किमधिकांशेनेत्यत आह अत्रापीति । इष्टत्वप्रदर्शकविशेषणेऽपीत्यर्थः । कथमित्यत उक्तं पूर्ववदिति । ननु सदापदस्य पूर्वं प्रयोजनानुक्तेः कथमनिदेश इत्यत उक्तम् अवधेयमिति । तथाच पूर्ववदित्यस्य पूर्वमनयोर्यथा प्रयोजनमुक्तं तथात्रापि वक्तव्यमिति नार्थः । किन्त्वधिकृतत्वप्रदर्शके पूर्वविशेषणे येन प्रकारेणाधिकांशप्रयोजनमुक्तं तेनैव प्रकारेणास्मिन्नपि विशेषणेऽधिकांशप्रयोजनं वक्तव्यमितीत्युक्तं भवति । अत्राधिकांशप्रदर्शनं सदापदस्येत्वादि । तत्प्रकारश्च यदीष्ट इति नारायणो वन्दनीयः । हन्त तर्हि तत एव धर्मादिकं प्राणादिकं वा वन्दनीयं स्यात् । न स्यात् । तस्य नारायणप्रतिपत्त्यङ्गतया कदाचिदिष्टत्वात् । अस्य पुनरनन्यार्थतया सदैवेष्टत्वात् । तथाविधमेव चेष्टमुच्यत इत्याशयवता प्रियतममिति सदेति चोक्तमित्युक्तरूपेणावधेयम् । अयमाशयः । यद्धन्वनन्यार्थतया सदा च यस्य प्रियं तत्तस्येष्टमुच्यते । अत्राप्यनन्यार्थतया प्रियस्यानित्यवैषयिकसुखस्येष्टत्ववारणाय सदेति । सदाप्रियस्य प्राणस्य तद्वारणायानन्यार्थतयेति । धर्मदिवारणाय तूभयमपीति सर्वत्र्यावश्यकत्वात् । नन्वेवमपि नित्यसुखेऽनन्यार्थतया सदेष्टत्वस्यापि सत्त्वात्तस्यापीष्टत्वापत्तिरिति चेत् । किमेकान्तिनां नित्यसुखस्येष्टता आपाद्यते उतानेकान्तिनाम् । नाद्यः । एकान्तानां न कस्यचित् । 'अर्थे नारायणो देवः सर्वमन्यत्तदर्थकमि'ति गजमाध्यायगीताभाष्योक्तेस्तेषामन्यार्थतयैतस्यापीष्टत्वात्तमपा तद्वारणात् । न द्वितीयः । अनभिव्यक्तिदशायां प्रियत्वाभावेन सदापदेन तद्वारणात् । एतादृशं चेष्टत्वं नारायणस्यैव न धर्मप्राणादीनाम् । तेषां यादृशमिष्टत्वं तादृशं वन्द्यत्वं तु नानिष्टम् । न चैवंविधं नारायणस्येष्टत्वं सदापदतमप्रत्ययाभ्यां विना प्रतीयत इत्यस्येवेतत्प्रदर्शन एवाधिकांशस्योपयोग इति । ममेतिपदं तु प्रियशब्दस्य साकांक्षत्वात्तत्संबन्धितयैवोपात्तं न त्वनिष्टत्वघटकतया नावत एव निर्दुष्टत्वात् । अत एव पूर्ववत् सदापदस्य तमपश्च प्रयोजनमवधेयमिति पदद्वयस्यैवं प्रयोजनमुक्तम् । तथाच सदा प्रियतमं ममेति विशेषणेन यथा वन्द्यत्वसामान्यप्रयोजकमुक्तविधमिष्टत्वमुपपादितं तथा तस्यानन्यराधारणत्वात्तेनैवेतरग्रहाणेन वन्द्यत्वप्रयोजकं सर्वोत्तमत्वं चोपपादितं भवतीति । एवं सर्वाण्यपि पदानि साक्षात्परंपरया वा नम्यत्वप्रतिपादनपराणीत्युपपादयतैवात्र नारायणो नम्यस्तत्प्रयोजकयावद्धर्मवांश्च । तथा इतरग्रहाणेन नम्यस्तत्प्रयोजकसर्वोत्तमत्ववांश्च । तदुभयोपपादकनिखिलपूर्णगुणत्वनिर्दोषत्वजगज्जन्मादिकारणत्वानन्तवेदादिमुख्यप्रतिपाद्यत्वसदाप्राणप्रियतमत्ववांश्च

इत्यादिरूपेण धर्मविशेषसमर्पणेन प्रकारान्तेण स्तुतिपराण्यपि तानि भवन्तीत्युक्तं भवतीत्यवधेयम्। अधिकं तु गुर्व्यां रसरञ्जन्यां द्रष्टव्यम्।

चषकः— पूर्ववदिति। षष्ठ्यन्ताद्धतिः, उपमेये षष्ठीदर्शनात्॥ "स्वर्गादिरनित्यत्वेन सदाप्रियत्वाभावाद्धमदिरन्यार्थतयैव प्रियत्वादस्य पुनः सदाऽनन्यार्थतया प्रियत्वात्तथाविधमेव चेष्टत्वमुच्यत इत्याशयेनाह अत्रापीति" इति ममेत्यंशस्य हेतुतावच्छेदकघटकतामनङ्गीकुर्वाणा एव व्याकुर्वते। 'इष्टत्वमात्रं सक्चन्दनादौ व्यभिचारि, अनन्यार्थतयेष्टत्वं च तमबर्थभूतं सुखे व्यभिचारि; अतः सदेति। वैषयिकसुखं च न सदेष्टमिति भावः॥ नन्वेवमपि ऋष्यादिस्वरूपसुखे व्यभिचारः, अतो ममेति। न चैवं मम सदा प्रियत्वादित्येवास्त्विति वाच्यम्, विपक्षे भारत्यादावपि गतत्वात्। प्रियतमत्वादित्युक्ते तु न तत्र व्यभिचारः, तस्या अप्यन्यार्थतयैव प्रियत्वादिति ज्ञेयम्। एवं च पूर्ववदित्यस्य पूर्वन्यायेनेत्यर्थो बोध्यः। इयांस्तु विशेषः। अत्र हि विशिष्टो हेतुः, पूर्वत्र हेतुद्वयम्' इत्यपि व्याचक्षिरे। "पूर्ववदिति। पूर्वत्रानयोर्यत्प्रयोजनमुक्तं तदत्र ज्ञेयमिति नार्थः। किन्तु यथा अन्यार्थतया वेदैकदेशप्रतिपाद्यस्य धमदिः प्राणादेश्चाधिकृतत्ववारणाय आप्यतममिति तमप्रत्ययोऽखिलपदं च प्रयुक्तम् तथाऽत्रापि धमदिः प्रियत्वमेव, न तु प्रियतमत्वं; तदपि धमदिर्भगवत्प्रतिपत्त्यङ्गत्वदशायां, काम्यतादशायां तु प्रियत्वमपि नास्ति इति प्राणादेर्भगवदङ्गत्वेनैव प्रियत्वं, न तु स्वतः; तथाच तयोः कदाचित्प्रियत्वमात्रसत्त्वेऽपि न तयोर्नम्यत्वप्रयोजकेष्टत्वम्। अनाद्यनन्तकालमतिशयेनानन्यार्थतया प्रियत्वरूपनम्यत्वप्रयोजकमिष्टत्वं नारायणस्यैव, नान्येषामिति द्योतनाय सदेति, प्रियतममिति चोक्तमिति व्याख्येयमित्यर्थः" इत्यपि निबध्नन्ति।

अत्र च सदाप्रियतमत्वं, मम प्रियतमत्वं चेति स्वतन्त्रहेतुद्वयमेव सौधाक्षरानुपूर्वीसामञ्जस्यानुरोधेनावसीयते। तत्र विपक्षभूतभारत्यादावाचार्यस्वरूपसुखे चेशोद्देशेन प्रिये ऋष्यादिस्वरूपसुखस्य मुक्तिदशायामनुभूयमानतया तत्कालीनातिशयितप्रीतिविषयतासत्त्वेऽपि, संसारदशायामननुभूयमानतया तत्कालीनतादृशप्रीतिविषयत्वस्य दुरुपपादतया, सार्वकालिकतादृशप्रीतिविषयत्वहेतोस्तत्र चानैकान्त्यानवकाशेन तद्व्यावृत्तिफलकतया न ममेत्यंशस्याद्यहेतुतावच्छेदकघटकतयोपादानम्, किन्तु वैषयिकसुखादावनैकान्त्यव्युदसनाय द्वितीयहेतुशरीरघटकतयैव तत्; इति प्रतिसन्दधतां वाक्यार्थचन्द्रिकाकृतां परिमळकृतां च पन्थानमनुरुन्धानाः गुरुपादा अपि, तद्दिशा प्रकृतेऽपि हेतुद्वयमेवाभिप्रेतं ग्रन्थकृतामिति न्यभांत्सुर्भावप्रकाशिकायाम्।

काशी०— तेनाखिलशब्दमात्रलभ्यस्य पूर्वप्रसिद्धपुरुषसूक्तादिभिन्नाखिलवेदादिवेद्यत्वस्य प्राणादिसाधारणत्वेऽपि नातिप्रसङ्ग इति परिमळे। पूर्ववदिति। अखिलैः सुवाक्यैराप्यतममित्यत्राखिलपदतमप्रत्ययोरिवेत्यर्थः। धर्मप्राणादिव्यावृत्तये सदापदस्य तमपश्चोपादानम्। धमदिश्च न सदा प्रियत्वं नाप्यनन्यार्थतयेति तद्व्यावृत्तिः। ममेत्युक्तिस्तु विष्णोरिष्टत्वे स्वानुभवरूपप्रमाणसूचनाय तत्तदिष्टत्वं तत्तद्धन्यत्वनिमित्तमिति ज्ञापनाय चेति भावः। नन्वन्तःकरणवृत्तिविशेषरूपायाः प्रीतेरनित्यत्वात्कथं सदातनत्वम्। न चात्मस्वरूपभूतप्रीतिरेवात्र विवक्षिता। तथा सति वन्दनस्य वृत्त्यात्मकभक्तिनिरपेक्षत्वापत्तेः। देवतान्तरसाधारण्याच्चेति चेन्न। सदेत्यनेन तत्कालोद्रिक्त-

प्रीतिविशिष्टसदातनसजातीयोत्कृष्टप्रीतिविषयत्वस्य विवक्षितत्वात्। तत्कालोद्रिक्तप्रीतिरधुना वृत्तिरूपा। मुक्तौ च स्वरूपभूता। तद्विशिष्टसदातनी इष्टेष्टसाधनविषयप्रीतिषूत्कृष्टा च प्रीतिः स्वरूपभूतैवेति तद्विषयत्वाद्विष्णोरिष्टत्वोपपत्तिः। न च विष्णुभक्तेरपि मोक्षार्थत्वात्कथमनन्यार्थत्वमिति वाच्यम्। एकान्त्यपेक्षया तल्लक्षणोक्तेः। अनन्यप्रीत्यर्थत्वं वा विवक्षितम्। विष्णुभक्तेर्मोक्षार्थत्वेऽप्यनन्यप्रीत्यर्थत्वान्न दोषः। यादुपत्ये तु प्रियत्वमात्रं सक्चन्दनादौ। अनन्यार्थतया प्रियत्वं च वैषयिकसुखे व्यभिचार्यतः सदेति। ऋष्यादिस्वरूपसुखे व्यभिचारवारणाय ममेति। ममैकान्तिनः सदाप्रियत्वात्प्रियतमत्वादिति हेतुद्वये तात्पर्यमतो न वैयर्थ्यशङ्केत्युक्तम्। यद्यपीदं न सर्ववन्द्यत्वप्रयोजकं अन्येष्टत्वस्यान्यवन्द्यत्वप्रयोजकत्वेऽन्येषां भक्त्याद्यनपेक्षतापातात्। तथाऽपि प्रकृतत्वादेकान्तिवन्द्यत्वप्रयोजकमिदमुभयमुक्तम्। अन्यवन्द्यत्वप्रयोजकं सदा प्रियत्वमेव। भगवतोऽप्यन्यान्प्रति मोक्षार्थत्वेनानन्यार्थतानुपपत्तेः। न च ऋष्यादिस्वरूपसुखे व्यभिचारः। साधने विष्णोरिव फलेषु स्वरूपसुखस्योत्कृष्टप्रीतिविषयत्वादिति वाच्यम्। स्वस्य स्ववन्द्यत्वादर्शनेन तत्तद्भिन्नतदिष्टस्यैव तद्वन्द्यत्वनियमोपगमादिति तदाशयः। वाक्यार्थचन्द्रिकायां तु स्वगदिरनित्यत्वेन सदा प्रियत्वाभावाद्धमदिरन्यार्थतयैव प्रियत्वादित्यादिग्रन्थेन विशिष्टरूपमेकविधमेवेष्टत्वं विवक्षितम्। तत्र सदेत्यनेनोक्तार्थविवक्षायां न धर्मादौ व्यभिचाराप्रसक्तिरतः तत्कालोद्रिक्तप्रीतिविशिष्टसदातनप्रीतिविषयत्वमेव विवक्षितम्। विष्णुपूजादिरूपधर्मस्य मुक्तावप्यनुवर्तमानत्वेन तत्र सदा प्रियत्वसत्त्वेन व्यभिचारवारकतया तमबर्थोपादानम्। विष्णोः सर्वान्प्रत्यनन्यार्थतया प्रियत्वम्। ऋष्यादिस्वरूपसुखे व्यभिचारवारणं पूर्ववदेव। न चैवमधिकृतत्वस्यापि विशिष्टैकरूपत्वापत्तिः। तत्प्रकारातिदेशस्यैवात्र कृतत्वादिति वाच्यम्। इष्टापत्तेः। न चैवमखिलवेदवेद्यत्वस्यानन्यार्थतया वेदवेद्यत्वस्य च व्यभिचाराभावादन्यतरवैयर्थ्यमिति वाच्यम्। यतोऽखिलवेदवेद्यत्वमखिलवेदतात्पर्यविषयत्वरूपम्। तच्च यदा सर्वोत्कृष्टत्वविशिष्टे विष्णौ तदा तदुपसर्जने सर्वस्मिन्नप्यक्षतमित्यतिव्याप्तिवारणार्थमनन्यार्थतयेत्युक्तम्। अनुपसर्जनतयेत्यर्थः। अखिलपदादाने कर्मादिपरावान्तरवाक्यतात्पर्यविषयत्वस्य कर्मादावतिव्याप्तिरतस्तदप्यावश्यकमिति तदाशयः। परिमळाभिप्रायोऽप्येवमेव। अत्राखिलपदतमप्प्रत्यययोर्वैकल्पिकपक्षे पृथग्व्यावृत्त्यनुक्तेः स्वारस्यं समुच्चयपक्षे विकल्पसूचकवाकाराद्यनुक्तेः स्वारस्यमित्यवधेयम्। यद्यपि पूर्वमिष्टत्वस्य निर्विघ्नपरिसमाप्त्यादिप्रयोजकवन्दनविशेषणीभूतभक्त्यादिसाहित्यसंपादकतयैव वन्द्यत्वनिमित्तत्वमुक्तम्। तत्र न सदातनत्वादेरावश्यकता। तात्कालिकतदर्यभक्त्यादिनाऽपि तन्निर्वाहात्। तथाऽपि सदातनत्वादिविशिष्टभक्तिसहितवन्दनस्यैव महाफलहेतुत्वात्। तादृशवन्दनविषयत्वे तद्विशिष्टभक्तिविषयत्वरूपेष्टत्वस्यैव निमित्तत्वम्। प्रकृतशास्त्रस्य च महाफलसाधनत्वात्तदङ्गस्य वन्दनादेरुक्तविधभक्तियुक्तत्वमावश्यकमेवेति ध्येयम्।

गूढ०— ननु मम प्रियमित्येतावतैवेष्टत्वप्रतिपादने संभवति सदातमपोरानर्थक्यमित्यत्राह **अत्रापीति**। प्रियमित्युक्ते धमदिरपि प्रियत्वात्तस्यापीष्टत्वेन वन्दनं स्यादित्यतः प्रियतममित्युक्तम्। कदाचिदतिशयेन प्रियत्वे लोकवत् कदाचिद्वन्दनीयत्वं स्यात्। अतः सदेत्युक्तमिति पूर्ववत् तमबखिलपदवत्सदापदस्य तमपश्च प्रयोजनमुपपादनीयमित्यर्थः।

॥ प्रकारान्तरैः विशेषणानां व्याख्यानम् ॥

विभवात् अनेकलक्षणपरतया विशेषणानां व्याख्यानम्—

९ **सु०— यद्वा, "नानिर्धारितस्वरूपस्य प्रणामो युक्तः, न चान्तरेण लक्षणं वस्तुनिर्धारणमित्यतो विभवादनेकानि नारायणस्य लक्षणान्यनेनोच्यन्ते । तत्र निखिलेत्यनेन निखिलगुणत्वं, पूर्णगुणत्वं, स्वतो गुणैकदेहत्वं चेति विवक्षाभेदेन त्रीणि लक्षणान्युदितानि । निर्दोषमित्यनेनैकम् । आप्यतममित्यनेन वेदादिमुख्यार्थत्वम् अखिलवेदाद्यर्थत्वं चेति द्वयम् । अस्येत्यनेनाष्टौ । अशेषेत्यनेन मुख्यवन्द्यत्वमुक्तम् अशेषाद्विशेषेण वन्द्यमिति । सदेत्यनेन परमप्रेमयोग्यत्वमुक्तम् । तस्य अनानुभाविकत्वादसंभवमाशङ्क्य सदा ममेत्युक्तम् । अन्येषामपि ज्ञानोत्तरकालमिदमानुभाविकं मम तु सदेति । अपिशब्दो लक्षणसमुच्चये ।"**

परि०— ननु नम्यत्वप्रयोजकवैशिष्ट्यस्याधिकृतत्वादेरिवैकेन विशेषणेनाप्युक्तिसंभवाद्विशेषणत्रयोक्तिर्निर्बीजेत्यत आह **यद्वेति** ॥ **वैयर्थ्यनिरासायोक्तं विभवादिति** । ऐश्वर्याधिक्यादित्यर्थः । **अनेन** आद्यपद्येन ॥ **स्वत इति श्रीमुक्तयोर्व्युदासाय** ॥ **अस्येत्यनेनेति** । अस्योद्भवादिदमित्यनेनेत्यर्थः ॥ **सदेत्यनेनेति** । सदा प्रियतमं ममेत्यनेनेत्यर्थः ॥ **सदाममेतिपदयोर्लक्षणासंभवपरिहारः फलमित्याह तस्येति**। परमप्रेमयोग्यत्वस्येत्यर्थः ॥ **तर्हि ममेत्येकमेवालमित्यत आह अन्येषामिति**। अन्येषां जीवानां ज्ञानिनां भगवदपरोक्षानन्तरं भगवतः परमप्रेमयोग्यत्वमनुभवसिद्धम्, मम त्वनाद्यनन्तकालम्; अतो यावद्द्रव्यभावीदं हरेर्लक्षणं, न कदाचिदागतमिति द्योतनाय सदेत्युक्तमित्यर्थः । प्रेमयोग्यत्वं च निरुपाधिकेष्टत्वम् ।

यादु०— नारायणमिति द्वितीयाविभक्त्यर्थभूतकर्मत्वरूपनम्यत्वोपपादकतापेक्षया नारायणप्रातिपदिकार्थनिर्धारणार्थत्वमन्तरङ्गमित्याशयेनाह **यद्वा नानिर्धारितेति** ॥ ननु वस्तुनिर्धारणस्यैकेनैव लक्षणेन संभवात्किमनेकलक्षणोक्त्येत्यत आह **विभवादिति** । **त्यब्लोपनिमित्तेयं पञ्चमी, विभवम्** ऐश्वर्यमपेक्ष्येति । तज्ज्ञापनायेति यावत् । ततश्च प्रसङ्गान्नारायणस्यैश्वर्यमपि ज्ञापयितुमनेकलक्षणोक्तिरियमिति भावः ।

आनन्दः— वन्द्यत्वप्रयोजकविशिष्टत्वाधिकृतत्वेष्टत्वोपपादकत्वेनैतानि विशेषणानि व्याख्यायाधुना लक्षणपरत्वेनापि व्याचष्टे **यद्वेति** । नन्वेकेनैव लक्षणवचनेनैव स्वरूपनिर्धारणसंभवादनेकेषां लक्षणानां वैयर्थ्यमित्यत आह **विभवादिति** । ज्ञानाधिक्यादिरूपसामर्थ्यविशेषादित्यर्थः । अल्पज्ञेन खलु एकं लक्षणमुच्यते आचार्यस्य तु सर्वज्ञत्वादनेकलक्षणवचनं युक्तमिति भावः । अथवा नारायणस्य एकत्वात्तस्य कथमनेकानि लक्षणानीत्यत उक्तं

विभवादिति । सर्वोत्तमत्वादिरूपैश्वर्यवत्त्वादित्यर्थः । तथा च महदैश्वर्यवत्त्वात्तस्यानेकलक्षणानि युज्यन्त इति भावः । ननु प्रथमविशेषणेन निखिलपूर्णगुणैकदेहत्वं लक्षणमुक्तम् । तत्र पूर्णनिखिलपदयोर्वैयर्थ्यम् । पूर्णगुणत्वस्य निखिलगुणत्वस्यैव वा लक्षणत्वसंभवात् इत्यतो यथा न वैयर्थ्यं तथा लक्षणान्याह तत्रेति । गुणैकदेहत्वस्य लक्ष्यत्वे अपि सत्त्वात्तदर्थं स्वत इत्युक्तम् । तस्याश्च स्वातन्त्र्येण गुणैकदेहत्वाभावान्नातिप्रसङ्गः । नन्वत्रैवं विशेषणविशेष्यभावो न प्रतीयते इत्यत उक्तं विवक्षाभेदेनेति । वक्तुरिच्छाभेदेनेत्यर्थः । वेदादीति । अत्रादिपदेन पुराणपरिग्रहः । एवं च वेदमुख्यार्थत्वं पुराणमुख्यार्थत्वमिति लक्षणद्वयम् । न च वाच्यत्वेन वेदमुख्यार्थत्वस्य धर्मादावपि सत्त्वादतिव्याप्तिरिति वाच्यम् । अनन्यार्थतया वेदप्रतिपाद्यत्वस्य विवक्षितत्वेन दोषाभावात् । अखिलवेदार्थत्वं चेति । यद्यप्युक्तरीत्या अखिलवेदार्थत्वस्य श्रीदेव्यामपि सत्त्वेनातिव्याप्तिस्तथापि समन्वयाध्यायोक्तन्यायेन परमुख्यवृत्त्या स्वरूपवर्णपदादिरूपाखिलवेदप्रतिपाद्यत्वस्य तत्राभावेन नातिव्याप्तिः । पूर्वं तु रमापतिः परमात्मेत्यर्थप्रतिपादने रमाया अपि प्रतिपाद्यत्वमस्तीत्यर्थविवक्षया तथोक्तमिति न तेन विरोधः । कथमनेन मुख्यबन्धत्वमुक्तमित्यत आह अशेषादिति । विशेषेण सर्वोत्तमत्वादिरूपविशेषेण । परमप्रेमयोग्यत्वस्य लोके पुत्रादौ दृष्टत्वेन परमात्मनि चादृष्टत्वेनासंभवादं लक्षणमित्याशङ्कापरिहारत्वेन ममेति पदमवतारयति तस्येति । तथाप्यन्येषामनानुभाविकत्वात्तदसत्कल्पमेव । एकं प्रत्येव सिद्धस्यार्थस्य सिद्धत्वव्यवहाराभावादित्यनस्तत्परिहारत्वेन सदापदार्थमाह अन्येषामपीति । अपिशब्द इति । अन्यस्त्वमिव्याप्त्यर्थ इति भावः ।

कं०रा०— नानिर्धारितस्वरूपस्येति । त्वत्तोऽहमपकृष्टो मत्तस्त्वमुत्कृष्ट इत्यनुसन्धानपूर्वकत्वात् प्रणामस्य वस्तुस्वरूपनिर्धारणाभावे प्रणामो न युक्त इति भावः । न चान्तरेणेति । लक्षणज्ञानं विनेत्यव्यावृत्तनयया वस्तुनिर्धारणं नेत्यर्थः । कारणानीति । वस्तुनिर्धारणद्वारा अभिवादने प्रणामे कारणानीत्यर्थः । विभवादनेकानीति पाठे विभवादिश्वर्यलक्षणदारिद्र्याभावादनेकानीत्यर्थः । त्रीणीति । समुदितस्यैकलक्षणत्वे व्यर्थविशेषणत्वप्रसङ्गादिति भावः । एवमुत्तरत्रापि द्रष्टव्यम् । निर्दोषमित्यनेनेति । निर्दोषमित्यनेनैकं लक्षणमुदितमित्यन्वयः । न च वाच्यं निर्दोषपदेन दोषान्यत्वं दोषसंसर्गाभाववत्त्वं चेति लक्षणद्वयमुदितमिति वक्तुं शक्यत्वात्कथमेवमुच्यत इति । निर्गता दोषा यस्मात्स निर्दोष इति दोषसंसर्गाभावस्यैव प्रतीतेः । न चैवमपि दोषसंसर्गाभावस्य प्रागभावध्वंसरूपत्वे लक्षण्यसंभवः अत्यन्ताभावरूपत्वे तु प्रामाणिकस्य तदसंभव इति वाच्यम् । स्वानुयोगिकदोषप्रतियोगिकसंसर्गविशेषात्यन्ताभाववत्त्वस्य निर्दोषपदेन विवक्षितत्वादिति ।

वा०चं०— एवं नमामीति क्रियासमभिव्याहृतद्वितीयाविभक्त्यर्थनम्यत्वोपपादकतया निखिलेत्यादीनि नारायणविशेषणानीति व्याख्याय, प्रकृत्यर्थभूतनारायणस्वरूपनिर्धारणहेतुलक्षणपरतयाऽपि तानि व्याख्याति यद्वेति ॥ अत्र विशिष्टस्य लक्षणत्वे निखिलपूर्णपदयोरन्यतरवैयर्थ्यापातात्, तन्नर्मलक्षणद्वयपरत्वे गुणानां देहविशेषणत्वेन नारायणविशेषणत्वाभावेन देहपदवैयर्थ्यशङ्काऽनुदयेऽप्येकपदवैयर्थ्यापातात्; गुणानां नारायणविशेषणत्वं, गुणपदावृत्तिं, तृतीयलक्षणे स्वातन्त्र्यं च विवक्षित्वा त्रीणि लक्षणानि ज्ञातव्यानीत्याह तत्रेति । ममेत्यनेन स्वं प्रत्यनुभवसिद्धत्वोक्तावपि 'एकस्य प्रतिभातं तु कृतकाद्य विशिष्यत' इत्युक्तरीत्या प्रामाणसंभवशङ्कानिवृत्त्यर्थं

गदापदाभिप्रायमाह **अन्येषामिति** । प्रथमापिशब्दस्याभिव्याप्त्यर्थत्वमेवाङ्गीकृत्य द्वितीयोऽपिशब्द उक्तवक्ष्यमाण-समुच्चयार्थ इत्याह **अपीति** । अपिशब्दौ लक्षणसमुच्चय इति पाठे तूभयोरपि लक्षणसमुच्चयार्थत्वमेवेत्यर्थः ।

वा०र०— **द्वितीयाविभक्तीति** । कर्मत्वमात्रस्य द्वितीयाविभक्त्यर्थत्वेऽपि नमनक्रियाकर्मत्वरूपनम्यत्व-बह्वर्थत्वप्राप्तिरित्यत उक्तं **नमामीति क्रियासमभिव्याहृतेति** । विभक्तिविशेषणं चैतत् । **लक्षणपरतयापीति** । तस्यान्तरङ्गतया पूर्वपिक्षया स्वरसत्वादिति भावः । अत एव प्राक् स्वरसमिति उतरत्र ज्यायस्त्वादित्यादितत्तत्पक्षेषु वचनमिति ज्ञेयम् । **न चान्तरेणेति मूलम्** । **सजातीयविजातीयस्वेतरसमसमस्तवस्तु व्यावृत्ततया लक्ष्यावधारण-स्वलक्षणाज्ञानप्रयोजनताया** सिद्धत्वादिति भावः । **अनेकलक्षणवैयर्थ्यशङ्कानिरासायोक्तं मूले विभवादिति** । विभवं च वस्तुविभवं वस्तृविभवं चेति द्वयम् । **अनेनेति** मूलस्य निखिलपूर्णगुणैकदेहं इत्यादिविशेषणसमुदायेनेत्यर्थः । निखिलेत्यादीनां त्विति प्रागुक्तेः । **अत्र विशिष्टस्येति** । एतद्योजनायां **निखिलेति प्रथमविशेषणोक्तविशिष्टस्येत्यर्थः** । यद्वा निखिलेति प्रथमविशेषणे लक्षणपरे विशिष्टस्येत्यर्थः । **लक्षणद्वयेति** । निखिलगुणैकदेहत्वं पूर्णगुणैकदेहत्वमिति लक्षणद्वयेत्यर्थः । **देहपदवैयर्थ्येति** । अनेनैव तद्वैयर्थ्यमपि लक्षणत्रयविवक्षाप्रयोजकत्वेन वर्णयन्तोऽपहस्तिताः । गुणानां नारायणेत्यतः प्राक् तदुभयपरत्वं परित्यज्येति शेषः । **त्रीणि लक्षणानीत्युत्तरेण संबन्धः** । तल्लाभप्रकारवर्णनाय विवक्षाभेदेनेति मूलोक्तस्य विवरणं **गुणानामित्यादि** । **स्वातन्त्र्येति** । गुणैकदेहमित्यनेन हि गुणदेहत्वविशिष्ट-प्राकृतादिराहित्यं विलक्षणमायाति तस्य लक्ष्म्यादावनतिप्रसक्त्यर्थं स्वातन्त्र्यं विशेषणीयम् । तदपि न स्वातन्त्र्येण विशेषणम् । येन तावन्मात्रस्यानतिप्रसक्ततया विशेष्यवैयर्थ्यापत्तिः स्यात् । अपि तु स्वतो यद्गुणैकदेहत्वमिति स्वातन्त्र्यं गुणैकदेहत्वनिष्ठप्रकारः । तथाच स्वातन्त्र्यगुणैकदेहत्वयोगवद्रूपैकधर्मिनिष्ठत्वं प्रतीयते धूमप्रागभावा-दित्यादाविव च यथोक्तविशेषणविशेष्यभावे वैयर्थ्यशङ्कानुदय इति गुरुचरणाः । कथं मुख्यबन्धत्वमनेन लभ्यत इत्यत उक्तं मूले **अशेषादित्यादि** । **अनानुभविकत्वादिति** मूले प्रमाणान्तरविरहादनुभवरूपप्रमाणस्य चाभावेना-प्रामाणिकत्वात् तल्लक्षणस्यासंभव इत्यर्थः । **ममेत्युक्तम्** इत्यस्य मास्तु प्रमाणान्तरं मदीयानुभव एव प्रमाणं स्यादित्याशयेनोक्तमित्यर्थः । **इत्युक्तरीत्येति** । अनेकानुभवसिद्धत्वाभावप्रयुक्तासंभवशङ्केत्यर्थः । अपिशब्द इत्येकवचनपाठे कोऽपि शब्द इति न ज्ञायते । सन्निधिपुरस्कारेऽपि प्रथमापिशब्दार्थाकथनप्रयुक्तं न्यूनतैवेत्यतो-ऽभिप्रायमाह **प्रथमापिशब्दस्येति** ।

स०व्र०— नारायणमितिद्वितीयाविभक्त्यर्थभूतनमनकर्मत्वरूपनम्यत्वोपपादकापेक्षया नारायणप्रातिपदि-कार्थनिर्धारणार्थत्वमन्तरङ्गमित्याशयेनाह **यद्वा नानिर्धारितेति** ॥ **स्वत इति** । स्वातन्त्र्येण इत्यर्थः । न चात्र स्वातन्त्र्यमात्रस्यैव लक्षणत्वे दोषाभावात् व्यर्थविशेष्यत्वमिति वाच्यम् । एकधर्मिनिष्ठत्वेन विशेषणविशेष्ययो-रुपस्थितावेव व्यर्थत्वादेश्चिन्तनीयत्वेन, प्रकृते च स्वातन्त्र्यस्य गुणैकदेहत्वनिष्ठतया प्रतीयमानत्वेन, तस्य च लक्ष्यनिष्ठतयाऽप्रतीयमानत्वेन एकधर्मिनिष्ठत्वेनाप्रतीतेर्न तन्न्यायविषयत्वम् । यथोक्तविशेषणविशेष्यभावे दोषा-भावादिति भावः । अत एव समयचरणे नित्यपरिमाणत्वादित्यत्रापि न वैयर्थ्यमिति ध्येयम् ।

कुण्डल०— नानिर्धारितस्येति । वन्दनीयस्य स्वरूपनिर्धारणाभावे तत्र महत्त्वबुद्धेरभावेन तत्प्रयुक्तः प्रणामो न युक्त इत्यर्थः । नन्वेकेनैव लक्षणेनेतरव्यावृत्ततया वस्त्ववधारणसंभवात् अनेकलक्षणकथनं न सफलमित्यत आह **विभवादिति** । बहुलक्षणसंपत्तिद्योतनमेवानेकलक्षणाभिधानस्य प्रयोजनमिति भावः । अत्र समुदायस्य लक्षणत्वं लक्षणशरीरगतविशेषणानां व्यावृत्त्यप्रसिद्धेः प्रत्येकमेव लक्षणत्वं वाच्यमिति अव्याप्त्यादिदोषाभावादिति भावेनाह **निखिलेत्यनेनेत्यादिना** । **निर्दोषत्वमित्यनेनेति** । ननु निरादयः क्रान्ताद्यर्थ इति वचनात् निष्क्रान्तो दोषेभ्य इति वा निर्गता दोषा यस्मादिति वा समासे सति दोषप्रागभावप्रध्वंसयोर्भगवल्लक्षणत्वासंभवेन दोषात्यन्ताभावस्यैव निर्दोषशब्दितस्य भगवल्लक्षणत्वं वाच्यम् । तच्च न संभवति । अज्ञानपारतन्त्र्यादिदोषाणां संसर्गस्य भगवदितरत्र प्रामाणिकतया अप्रामाणिकस्य निषेधायोगादिति चेन्मैवम् । भगवदनुयोगिकदोषप्रतियोगिकसंसर्गस्याप्रामाणिकतया तदत्यन्ताभावस्य भगवति साधनसौलभ्यात् । **वेदादिमुख्यार्थत्वमिति** । अत्र धर्मादावतिव्याप्तिनिरासाय **मुख्यार्थत्वमिति** । परममुख्यार्थत्वमित्यर्थः । **अखिलवेदार्थत्वमिति** । अत्राप्यखिलपदं पूर्ववदतिव्याप्तिनिरासाय । एवं च धर्मादेरवान्तरतात्पर्यविषयतया वेदैकदेशप्रतिपाद्यत्वेऽप्युक्तविधत्वाभावान्नानयोरतिव्याप्तिरिति भावः । **अष्टाविति** । जगज्जन्मादेरष्टसंख्याकत्वेन प्रातिस्विकतत्कारणत्वानामप्यष्टसंख्याकत्वादित्यर्थः । ननु अशेषविशेषतो वन्द्यमित्यनेन मुख्यवन्द्यत्वं कथं लब्धमित्यत आह **अशेषादिति** । **सदेत्यनेनेति** । सदा प्रियतममित्यनेनेत्यर्थः ।

विट्ठ०— प्रियत्वं स्रक्चन्दनवनितानामप्यस्ति अतः **सदेति** । सदा प्रियत्वं स्वस्वरूपस्यास्ति अतः प्रियतममित्युक्तमिति ।

ल०र०— एवं सर्वाण्यपि पद्यपदानि साक्षात्परंपरया वा नम्यत्वोपपादकानि भूत्वा स्तुतिपराण्यपि भवन्तीत्येकेन प्रकारेण व्याख्यायाथाचार्योक्तौ विश्वासजननाय प्रकारान्तरेणापि तानि तथैव व्याख्यातुमवतारयति **बद्धेति** । पूर्वं नारायणं सन्नमामीति संपदसहितेन नमामीत्यनेनेतरप्रहाणेन नमनरूपं वा भक्तिश्रद्धातिशयसहितनमनरूपं वा प्रकृष्टं नमनमुक्तम् । तदयुक्तम् । प्रणामस्य प्रणम्य वस्तुस्वरूपावधारणं कारणम् । न त्वनिर्धारितस्वरूपस्य प्रणामो युक्तः । स्वरूपावधारणस्य च लक्षणं प्रमाणं च प्रयोजकं न ह्यन्तरेण ताभ्यां वस्तुनिर्धारणम् । तत्रापि लक्षणेन स्वेतरसमस्तवस्तुव्यावृत्ततया स्वरूपे प्रतिपादिते प्रमाणाकाङ्क्षा जायत इति लक्षणस्यैव प्राथम्यात्तावत्तदभावादित्याशङ्कते **नानिर्धारितस्वरूपस्येति** । वस्तुन इति शेषः । अन्तरेण विना । उभयत्रापि व्यतिरेकप्रदर्शनेन कारणत्वं स्पष्टीकृतं ज्ञेयम् । इतिशब्दः शङ्कासमाप्तौ । अतस्तत्परिहारनिमित्तम् । नन्वेकेनापि लक्षणेन वस्तुस्वरूपावधारणसंभवात्किमनेकलक्षणोक्त्येत्यत उक्तं **विभवादिति** । लक्षणदारिद्र्याभावादित्यर्थः । अथवा विभवात् ल्यब्लोपनिमित्ता पञ्चमी । विभवज्ञापनमपेक्ष्येति यावत् । विभवो हि शुभतमानेकधर्मवत्त्वरूपमैश्वर्यम् । तज्ज्ञापनं चानेकलक्षणोक्तिं विना न संभवतीति अनेकानि नारायणस्य लक्षणानि वक्तव्यानीति । अथवा विशिष्टो मोक्षे भवः । विभवो मोक्षस्तस्मात् हेतौ पञ्चमी । मोक्षनिमित्तम् । मोक्षो हि गुणपूर्णत्वदोषदूरत्वजगज्जन्मादिकर्तृत्वाद्यनेकधर्मज्ञानसाध्य इति तदर्थमनेकानि नारायणस्य लक्षणानि वक्तव्यानीति । अनेकानीत्यतःपरं नम्यस्येति शेषः । अनेन पद्येन । पूर्वयोजनायां प्रायेण निखिलेत्यादि विशेषणानामेकैकधर्मपरतया व्याख्यातत्वादत्रापि विशेषणाना-

मेकैकलक्षणपरत्वमेव सर्वत्रेति भ्रमवारणाय मूलाभिप्रेतमाह **तत्रेति**। पद्ये विशेषणेषु वेत्यर्थः। ननु निखिलेत्यादि-विशेषणानां विशिष्टैकलक्षणपरत्वज्ञानं कुतो भ्रमः। **यत्रिवारणायाशेषविशेषणेन त्रीणि लक्षणान्युदितानीत्यादि** वक्तव्यम्। पूर्वत्र विशिष्टस्य विशेषणवदत्रापि विशिष्टस्य लक्षणत्वे बाधकाभावात्। न हि संभवत्यविशिष्टमेव लक्षणं न विशिष्टमिति। दूषणत्रयराहित्यस्योभयत्रापि साम्यादिति चेन्न। अभिप्रायसद्भावात्। तथाहि। पूर्वयोजनायां प्रियतममाप्यतममप्यखिलैः सुवाक्यैरिति विशेषणद्वये **इष्टत्वाधिकृतत्वरूपहेतुद्वयस्वरूपप्रतिपादकत्वविवक्षा**। अत एव तद्विशेषणद्वय एव पदानां कृत्यमुक्तम्। निखिलेत्यादिविशेषणत्रये तु विशिष्टसर्वोत्तमत्वरूप-हेतुद्वयसंभावकत्वविवक्षा। अत एव संभावकविशेषणेषु वैयर्थ्यादिशङ्कानवकाशाद्विशिष्टस्य संभावकधर्मत्वे बाधका-भावान्न पदकृत्यमुक्तम्। अस्यां तु योजनायां प्रणामापेक्षितनारायणस्वरूपावधारणाय सर्वैरपि विशेषणैर्नारायणस्य लक्षणान्युच्यन्त इति विवक्षास्ति। लक्षणवाक्ये च यावन्ति पदानि लक्षणदूषणवारणसमर्थानि तावन्त्येव प्रयोज्यानि नाधिकानि। निग्रहस्थानापत्तेः। यथा हेतुवाक्ये हेतुदूषणनिवारणपराण्येव पदानि। तथा च निखिलपूर्णगुणैकदेहमिति लक्षणवाक्यस्य विशिष्टैकधर्मपरत्वे विशेषणान्तरवैयर्थ्याद्बाधकात्तथा भ्रमवारणाच्चात्र निखिलगुणत्वं पूर्णगुणत्वं गुणैकदेहत्वं चेति त्रीण्येव लक्षणानि विवक्षितानीति। एवमन्यत्रापि ज्ञेयम्। तमेतमभिप्रायं मनसि निधायोक्तं **विवक्षाभेदेन त्रीणि लक्षणान्युदितानीति**। पूर्वयोजनायामस्य विशेषणस्य हेतूपपादकविशिष्टैकधर्मप्रतिपादकत्व-स्याभिप्रेतत्वाद्गुणपदस्य तत्र देहमात्रविशेषणत्वविवक्षा। अत्र तु धर्मत्रयप्रतिपादकत्वस्याभिप्रेतत्वान्नारायणदेहो-भयविशेषणत्वविवक्षा। एवं विशेषणविशेष्यभावविवक्षाभेदेनानेन विशेषणेन त्रीणि लक्षणान्युदितानीति ज्ञेयम्। इदमप्युक्तम्। **विवक्षाभेदेन त्रीणि लक्षणान्युदितानीति**। ननु तथापि निखिलेत्यनेन त्रीणि लक्षणान्युदितानीत्यनु-पपन्नम्। आद्ययोर्द्वयोर्निर्दुष्टत्वेन लक्षणत्वेऽपि चरमस्य रमादावतिव्याप्तेस्तदसंभवात्। यद्यतिव्याप्तिपरिहाराय स्वत इति विशेषणमुपादीयते तदा स्वतो गुणवत्त्वस्य स्वतो गुणदेहवत्त्वस्य वा लक्षणत्वसंभवेन शेषवैयर्थ्यमिति चेन्न। विवक्षाविशेषसद्भावात्। तथाहि। नात्र मूलकृता गुणैकदेहपदेन स्वतो गुणैकदेहपदतो गुणैकदेहसाधारणं गुणैक-देहत्वमात्रं लक्षणतया विवक्षितम्। येनातिव्याप्तेस्तदलक्षणं स्यात्। किन्तु गुणैकदेहपदस्य निरुपपदत्वेन मुख्यार्थाभिधायकत्वान्मुख्यामुख्ययोर्मुख्ये संप्रत्यय इति न्यायाच्च स्वतो गुणैकदेहत्वमेव तथा विवक्षितम्। तथाच नातिव्याप्तिर्न वा शेषवैयर्थ्यम्। **मुख्यार्थस्यैव लक्षणत्वाद्गुणैकदेहमित्येतावन्मात्रस्य लक्षणपदत्वाच्च**। स्वतो गुणैकदेहमिति स्वतःपदं तु गुणैकदेहमिति लक्षणपदविवक्षितार्थविवक्षयैवोक्तम् **न तु लक्षणघटकतयेति**। इदमप्युक्तं स्वतो गुणैकदेहमिति विवक्षाभेदेन मुख्यार्थविवक्षाविशेषेण त्रीणि लक्षणान्युदितानीति। अस्तु वा स्वतःपदमपि लक्षणघटकम्। गुणैकदेहत्वस्य रमादावतिव्याप्तिपरिहाराय स्वतःपदसार्थक्यसंभवात्। अनेनैव सर्वलक्षणदोषपरिहारो भविष्यतीति शिष्टं व्यर्थमिति चेत्। तर्हि स्वरूपकथनार्थं तदुक्तमस्तु। यथोक्तं स्वयमेव विष्णुतत्त्वनिर्णयटीकायाम्। 'न चैकमेव युगपद्बहुधा भ्रान्तौ दृश्यत' इत्येतन्मूलव्याख्यावसरे हेतुवाक्यपदकृत्यम्। किं चैकस्मिन्नात्मनि सर्वं जगत्कल्पितं न भवति। युगपद्बहुधा दृश्यमानत्वात्। आत्मा वा युगपद्बहुधा दृश्यमानस्याधिष्ठानं न भवति। एकत्वादित्यनुमानद्वयस्य व्याप्तिमुपपादयति न चेति। **येनैतयोरनुमानयोर्व्याप्तिर्भज्येतेति** शेषः। आदौ रजतत्वेन दृष्टं पश्चाच्छुक्तिकात्वेन दृश्यत इत्यतो भ्रान्ताविवत्युक्तम्। भ्रान्तावेव रज्जुखण्ड-सर्प-माला-बलीवर्दमृत्त्वेन क्रमेण दृश्यते

तत्परिहारार्थं युगपदित्युक्तम् । अनेनैव सर्वव्यभिचारपरिहारो भविष्यतीति चेत् । तर्हि स्वरूपकथनार्थं भ्रान्तावित्युक्तमिति । लक्षणवाक्यस्यापि हेतुवाक्यसमानयोगक्षेमत्वात् । इयांस्तु विशेषः । यद्धेतुवाक्ये व्यभिचार-निरूपकमधिकरणं तदेव लक्षणवाक्येऽतिव्याप्तिनिरूपकमधिकरणमिति । स्वेतरसमस्तव्यावृत्तेर्लक्षणप्रयोजनत्वेन तत्साधनदशायां तस्यैव हेतुत्वाच्च । अधिकं तु गुर्व्यां रसरञ्जन्यां द्रष्टव्यम् । एकं लक्षणमुदितमिति व्यत्ययेनानुवर्तते । एवमुत्तरत्रापि । ननु निर्दोषत्वं पारतन्त्र्यादिसमस्तदोषाभावः । तत्र पारतन्त्र्याभावो लक्षणमित्यविवादम् । निर्दुष्टत्वात् । तदितरदोषाभावोऽपि लक्षणं भवत्येव । पूर्ववत्स्वतस्त्वविवक्षया रमायामतिव्याप्तिपरिहारसंभवात् । अतः कथं निर्दोषमित्यनेन विशेषणेनैकं लक्षणमुदितमित्युच्यत इत्यतोऽत्रापि विवक्षाभेदेनेत्यनुवर्तनीयम् । तथा च पूर्वं गुणैकदेहपदेन लक्षणान्तरप्रतीतौ तस्मात्पराधीनतापरिहाराय स्वतस्त्वविवक्षा कार्यैव । अत्र निर्दोषमितिपदेन तु न विशिष्यपारतन्त्र्यादिदोषाभावः प्रतीयते । येन लक्षणद्वयकल्पनावकाशः । निष्क्रान्तो दोषेभ्यः पारतन्त्र्यादिभ्य इति व्याख्यानं तु गुणा आनन्दादय इतिवत् वस्तुस्थितिज्ञापनाय । न तु पदात्तथा प्रतिभासमपेक्ष्य । किन्तु निर्मक्षिकमित्यादाविव सामान्यतो दोषत्वावच्छिन्नदोषाभाव एक एवेत्यनेन विवक्षाविशेषेण निर्दोषमित्यनेनैकं लक्षणमुदितमित्युक्तं ज्ञेयम् । आप्यतममित्यनेनाप्यतममप्यखिलैः सुवाक्यैरित्यन्तपरिग्रहः । अनेनाप्यनेक-लक्षणोक्तिरित्यनेकलक्षणोक्तिसमुच्चायकोऽपिशब्दः । इति द्वयमिति । नन्वाप्यतममप्यखिलैः सुवाक्यैरित्येत-त्पूर्वयोजनायामेकधर्मप्रतिपादनपरतया व्याख्यातत्वात् कथमत्र लक्षणद्वयप्रतिपादकतया व्याख्यायत इत्यतोऽत्रापि विवक्षाभेदेनेति अनुवर्तनीयम् । तथाच पूर्वयोजनायामाप्यतममप्यखिलैः सुवाक्यैरितिविशेषणस्याधिकृतत्वप्रति-पादकत्वं विवक्षितम् । अधिकृतत्वं च प्रकृतग्रन्थे अनन्यार्थतया सर्वत्र प्रतिपाद्यत्वमित्युक्तम् । तच्च तमप्प्रत्यया-खिलपदे विना न केवलेन सुवाक्यैराप्यमिति विशेषणेन प्रतिपादयितुं शक्यमिति तत्र विशिष्टस्यापि विशेषणस्यैक-धर्मप्रतिपादकत्वमावश्यकम् । अत्र त्वस्य लक्षणप्रतिपादकत्वं विवक्षितम् । लक्षणवाक्ये च लक्षणदोषपरिहारप्रयोजन-कपदस्यैव निवेशनीयतया तमप्प्रत्ययाखिलपदयोरन्यतरवैयर्थ्यपरिहारायास्य लक्षणद्वयप्रतिपादकत्वं विवक्षितमिति भावः । नन्वखिलवेदाद्यर्थत्वं वायोरप्यस्ति । मैवम् । अभिव्याप्त्यर्थकापिशब्दस्याप्यत्राभिप्रेतत्वादसङ्कुचिता-खिलवेदार्थत्वस्य तत्राभावात् । अत एवात्रापि शब्दस्य लक्षणसमुच्चायकत्वानुक्तिः । अस्येत्यनेनाष्टाविति । अत्रापि विवक्षाभेदेनेत्यनुवर्तते । तथा चास्य विशेषणस्य पूर्वयोजनायां संभावकसमर्पकत्वे न सार्थक्यम् । अत एव तत्र न वैयर्थ्यशङ्कापि । अस्यां तु लक्षणप्रतिपादकत्वविवक्षा । तत्र चैकैकस्यानतिप्रसक्ततया शेषवैयर्थ्यात्पृथगष्टावपि लक्षणान्यनेन सार्थकानीत्युक्तं भवति । अशेषेत्यनेन । अशेषविशेषतोऽपि वन्द्यमित्यनेन । मुख्यवन्द्यत्वम् । अतिशयितवन्द्यत्वम् । वन्दनकर्तृत्वासमानाधिकरणं तत्कर्मत्वमित्युक्तं भवति । रमादावतिव्याप्तिवारणाय मुख्येत्युक्तम् । निवृत्ता विवक्षाभेदेनेति पदानुवृत्तिः । उक्तदिशैव सामञ्जस्यात् । अत एव तावन्मात्रे तस्यानुवृत्तिसूचनार्थमष्टाविति तत्रैवोक्तमिति भावः । ननु प्रागत्र समासद्वयमाश्रितम् । तत्रैतल्लक्षणप्रतीतिः किं समासाश्रयणे न भवतीत्यतोऽत्र विवक्षितं समासमनुवदति अशेषाद्वन्द्यत्वेन समाशङ्कितात्पद्मापद्मभवादे-र्जगतो विशेषेणातिशयेन सर्वोत्तमत्वेन वन्द्यमितीति । नन्वनिर्धारितस्वरूपस्य वन्द्यत्वायोगात् स्वरूपावधारणाय लक्षणमुच्यते । तत्र वन्द्यत्वस्य लक्षणत्वेऽन्योन्याश्रयः । वन्द्यत्वरूपलक्षणसिद्धौ लक्ष्यस्वरूपावधारणम् । सति

तस्मिंस्तत्सिद्धिरिति चेन्मैवम् । वन्द्यत्वेऽपि भेदात् । नारायणं सन्नमामीति हि भाष्यकारैः शिष्याः शिक्ष्यन्ते । युष्माभिरपि नारायणो वन्दनीय इति । ततः कोऽसौ नारायण इति तैः पृष्टः भाष्यकारो लक्षणान्याह । ततः परमाप्तोक्तत्वाल्लक्षणान्तराणीव सर्ववन्द्यत्वमपि लक्षणं जानन्त्येवेति न च लक्ष्यनारायणस्वरूपमवधार्य तत्र स्ववन्द्यत्वं न जानन्तीति । अतोऽपि लक्षणे मुख्यत्वविशेषणम् । **सदेत्यनेन सदाप्रियतमं ममेत्यनेन । परमप्रेमयोग्यत्वमिति ।** परमप्रेमविषयत्वयोग्यत्वमित्यर्थः । तत्र प्रियतममित्यस्यार्थः परमप्रेमविषयत्वेति । सदा ममेत्येतल्लब्धार्थो योग्यत्वमिति । तल्लाभप्रकारमेव व्यनक्ति । **तस्येत्यादि । तस्य** परमप्रेमयोग्यत्वस्य । **अनानुभाविकत्वादिति ।** अनुभवविषयत्वाभावादित्यर्थः । **असंभवमाशङ्क्येति ।** परमप्रेमविषयत्वस्य प्रेमाख्यान्तरपदार्थ.....

चषकः— नारायणपदप्रकृतिकबहिरङ्गद्वितीयोपस्थापितप्रकृतनमनक्रियानिरूपितकर्मत्वनिर्वाहकगोचरप्रतिपत्त्यनुकूलतया तद्वितीयान्तषट्कं व्याख्याय संप्रति अन्तरङ्गतत्प्रकृत्यंशप्रतिपाद्यनारायणस्वरूपनिर्धारकलक्षणतात्पर्यकतया तद्व्याकर्तुं कल्पान्तरमनुसरति **यद्वेति** ॥ नम्यत्वप्रयोजकवैशिष्ट्यस्याधिकृतत्वादेरैवैकेन विशेषणेनाप्युक्तिसंभवाद्विशेषणत्रयोक्तिर्निर्बीजेत्यत आह **यद्वेतीत्यपि** निबन्धान्तरीयो विन्यासः ॥ अनेकोक्तेः फलवत्तां व्यनक्ति **विभवादिति** ॥ अथ गुणैकदेहत्वं गुणानात्मकदेहशून्यत्वे सति गुणात्मकदेहवत्त्वरूपं पर्यवस्यति । सत्यन्तोपादानफलं तु मुक्तात्मस्वतिप्रसङ्गविधूननम् । **समुदितस्यापि** रमायामनतिप्रसङ्गाय स्वत इत्युपादाने स्वत्वमात्रस्यैवेतरानतिप्रसक्तस्य तल्लक्षणत्वसंभवेन **शेषवैयर्थ्यं** दुर्वारमिति चेन्मैवम्, गुणकर्मान्यत्वे सति सत्त्वं द्रव्यलक्षणमित्यतः सामानाधिकरण्यप्रत्यासत्त्यान्यत्वान्तविशिष्टसत्त्वमिति प्रतीतिवद्भावप्रधानस्वशब्दप्रकृतिकसमभ्यर्थतसिना स्वत्वे सति गुणैकदेहत्वमित्यतोऽपि तादृशप्रत्यासत्त्या स्वत्वविशिष्टं तल्लक्षणमित्यर्थप्रतीत्या तत्र विशेष्यांशानुपादाने तादृशप्रत्यासत्त्या स्वत्ववैशिष्ट्यरूपोर्वीरितांशस्यासंभवप्रसङ्गेन समुदितोपादानावश्यंभावात् । न भविष्यत्क्रियेत्यनुव्याख्याप्रतीकव्याख्यावसरे 'देवदत्त कृतः किं त्वया कटः क्रियते वे'ति पृष्टः प्रत्याह 'न मया कृतो नापि क्रियते किन्तु कार्य' इति, तेन प्राप्नोति भविष्यत्क्रियाः कार्यं भविष्यत्त्वावच्छिन्नक्रियात्वं क्रियागतभविष्यत्त्वं वा कार्यतेतीति तत्कार्यलक्षणनिरूपकसौधाक्षरविन्यासे क्रियात्वरूपविशेष्यांशानुपादाने दर्शितभङ्गचनादरे सामानाधिकरण्यप्रत्यासत्त्या भविष्यत्त्वविशिष्टत्वरूपतदवच्छिन्नत्वस्य लक्ष्याभिमते प्रतीत्यसंभववारणातिरेकेण प्रयोजनं न स्यादिति विभावनीयम् ।

काशी०— ननु नारायणस्य लक्षणमनभिधाय नम्यत्वोपपादनमयुक्तम् । लक्षणेन स्वरूपनिर्धारणानन्तरमेव नम्यत्वोपपादकाकाङ्क्षोदयादित्यतो लक्षणपरतयाऽपि व्याचष्टे **यद्वेति** । अनिर्धारितत्वरूपस्य अनम्यव्यावृत्तत्वेनानिश्चितस्वरूपस्य । **लक्षणं** लक्षणज्ञानम् । शिष्याणामिति शेषः । **अनेन** अखिलेत्यादिविशेषणजातेन । अनेकलक्षणोक्तिवैयर्थ्यवारणायोक्तम् **विभवादिति** । विभवमपेक्ष्य । ऐश्वर्यातिशयज्ञापनायेति यावत् । तच्च शिष्याणामादरातिशयार्थमिति भावः । निखिलपूर्णगुणैकदेहवत्त्वस्यैकलक्षणत्वे निखिलादिपदवैयर्थ्यमालोच्याह **तत्रेत्यादिना । निखिलगुणवत्त्वमिति । यद्यपि** नारायणे निखिलगुणवत्त्वमसंभवि । जडजीवगुणाभावात् । न च निखिलगुणवत्त्वं नाम गुणत्वव्यापकसमुदायत्वावच्छिन्नवत्त्वं गुणत्वव्यापकत्वं च गुणवृत्ति-

यावज्जातिसमानाधिकरणत्वरूपं विवक्षितम् । ईश्वरगुणसमुदायत्वस्य च सुखत्वज्ञानत्वादिरूपतादृशायावज्जाति-समानाधिकरणत्वान्न दोष इति वाच्यम् । व्यक्तिभेदभिन्नतादृशायावज्जातिसमानाधिकरणत्वस्यैव तत्रानुपपत्तेः । प्रातिस्विकरूपेण तावज्जातिज्ञानाभावाल्लक्षणस्यासर्वज्ञदुर्ज्ञेयत्वापत्तेश्च । तथाऽपि स्वरूपतो गुणवृत्तिजात्यव-च्छिन्नवृत्तित्वाभावानधिकरणत्वरूपगुणत्वव्यापकत्वस्य विवक्षितत्वान्न दोषः । ईश्वरीयगुणसमुदायत्वं जीवादि-गततत्तत्सुखादिवृत्तित्वाभावसत्त्वेऽपि सुखवृत्तित्वं नास्तीत्याप्रत्ययेन स्वरूपतः सुखत्वाद्यवच्छिन्नवृत्तित्वा-भावानधिकरणत्वस्याक्षतत्वात् । स्वरूपत इत्यादेर्गुणवृत्तिजातिनिष्ठनिरवच्छिन्नावच्छेदकताकवृत्तित्वनिष्ठप्रति-योगिताकाभावार्थकत्वेन तत्तत्सुखत्वाद्यवच्छिन्नवृत्तित्वाभावस्य सुखत्वनिष्ठतत्तावच्छिन्नावच्छेदकताकत्वेऽपि तन्निष्ठनिरवच्छिन्नावच्छेदकताकत्वाभावेन व्यावृत्तेः । वस्तुतस्तु स्वरूपतो गुणवृत्तिजात्यवच्छिन्नाभावानधिकरण-त्वमेव लाघवाल्लक्षणार्थः । ईश्वरे सुखं नास्तीत्यादिप्रत्ययाभावेन स्वरूपतः सुखत्वाद्यवच्छिन्नाभावानङ्गीकारात्तल्लक्षण-समन्वयः । गुणपदेन नित्यगुणस्य विवक्षितत्वात् । नानित्यगुणमात्रवृत्त्यनुमितित्वाद्यवच्छिन्नाभावसत्त्वेऽप्यसंभवः । गुणत्वं च प्रामाणिकव्यवहारसिद्धो दोषव्यावृत्तो जातिविशेषः । एवं भगवद्देहस्य निखिलगुणात्मकत्वं निरुक्त-समुदायत्वाश्रयत्वरूपम् । स्वरूपतो गुणवृत्तिजात्यवच्छिन्नप्रतियोगिनाकभेदानधिकरणत्वरूपं वा विवक्षितम् । अतस्तस्य जडजीवगुणानात्यकत्वेऽपि न क्षतिर्नाप्यसर्वज्ञदुर्ज्ञेयत्वमिति ध्येयम् । पूर्णत्वं च न देशकालापरिच्छिन्न-त्वम् । अपकर्षानाश्रयपरिमाणवत्त्वादिरूपं बोध्यम् । देहवत्त्वस्य सर्वजीवसाधारणत्वाद्गुणेति । गुणदेहवत्त्वस्य च सर्वजीवसाधारणत्वादेकेति । गुणैकदेहवत्त्वस्यापि रमायामतिव्याप्तेः स्वत इति । ननु स्वतःशब्दोक्तस्वातन्त्र्यस्य धर्मिविशेषणत्वे तस्यैव लक्षणत्वसंभवाच्छेषवैयर्थ्यम् । देहविशेषणत्वे गुणैकपदस्य गुणविशेषणत्वेऽप्येकपदस्य वैयर्थ्यमिति चेन्न । गुणैकदेहवत्त्वं हि गुणेतरदेहशून्यत्वे सति देहवत्त्वम् । तत्र स्वातन्त्र्यस्य गुणविशेषणत्वेऽपि यथा सन्निवेशेनोक्तवैयर्थ्यानवकाशात् । ननु च गुणैकदेहवत्त्वस्य धर्मिविशेषणत्वेन तल्लक्षणत्वलाभेऽपि गुणानामतथात्वात्कथं निखिलगुणवत्त्वपूर्णगुणवत्त्वयोस्तल्लक्षणत्वलाभ इति चेदत्राहुः । निखिलाः पूर्णाश्च गुणाः यस्येति बहुव्रीहिः । गुणपदावृत्त्या गुणैकदेहपदस्य निखिलपूर्णगुणपदेन कर्मधारये गुणे स्वातन्त्र्यं विवक्षित-मित्युक्तलक्षणत्रयलाभ इति । अत्र यद्यपि पूर्वोक्तयोजनायां निखिलगुणैकदेहवत्त्वपूर्णगुणैकदेहवत्त्वरूपलक्षण-द्वयलाभसंभवात् । यथासंनिवेशो वैयर्थ्याभावाच्च । गुणपदावृत्त्यादिकमयुक्तम् । न चाधिकलक्षणलाभाय तदिति युक्तम् । स्वतःपदपूरणमन्तरेण तदलाभात् । पदपूरणादिना लक्षणसंपादने च स्वतो गुणवत्त्व स्वतो देहवत्त्व स्वतो गुणदेहवत्त्व पूर्णदेहवत्त्वादेरपि संपादनसंभवेन लक्षणत्रयमात्रोक्तेरयुक्तेः । तथाऽपि सूत्रस्थब्रह्मशब्देन निखिलगुणवत्त्वपूर्णगुणवत्त्वरूपलक्षणयोरेव लाभात्तदनुसारेण तयोर्ग्रहणम् । देहाभावादिना तदभावशङ्कावारणाय तृतीयलक्षणोक्तिः । द्वितीयसूत्रानुसारेणोक्तलक्षणाष्टकोपपादकत्वेन निर्दोषत्वमभिप्रेतम् । निखिलगुणवत्त्व-पूर्णगुणवत्त्वसाधकतया सकलवेदार्थत्वमुख्यवेदार्थत्वयोरभिधानम् । वस्तुतस्तु वस्तुनिर्धारणफलतया मुख्यवेद्यत्वमुक्तम् । तच्चानन्यसाध्यफलसाधनवन्दनविषयत्वपर्यवसितफलरूपत्वेन परमप्रेमयोग्यत्वप्रणयनम् । परमप्रेमप्रयोजकेष्टत्वेष्टसाधनत्वादिविशिष्टत्वं तदर्थः । एवमेषां लक्षणानां निद्वसङ्गतिकत्वेनावश्यवक्तव्यत्वा-त्तन्मात्रपरत्ववर्णनं युक्तम् । अत एव सदा प्रियतमं ममेति शब्दलभ्यमपि सदाऽऽचार्यप्रियत्वाचार्यप्रियतमत्वरूप-

लक्षणद्वयमुपेक्ष्यार्थलभ्यं परमप्रेमयोग्यत्वमेव विवक्षितम् । अस्यैव प्रकृतसङ्गतत्वात् । अथवा यथोक्तयोजनायां गुणानां साक्षाद्धर्म्यविशेषणत्वेऽपि गुणाभिन्नदेहवत्त्वस्य धर्मिविशेषणत्वेनैव गुणवत्त्वस्याप्यर्थतस्तद्विशेषणत्वलाभेन लक्षणत्रयलाभसंभवान्न गुणपदावृत्तेरावश्यकता । न च गुणाभिन्नदेहवत्त्वस्य तादृशदेहस्वरूपतया न ततो गुणाश्रयत्वलाभ इति वाच्यम् । संबन्धमात्रस्य बहुव्रीह्यर्थतया विवक्षाभेदेनोभयलाभसंभवात् । एवं स्वतःपदमपि न पूरणीयम् । मुख्यामुख्यन्यायेन पूर्णविशेषणबलाद्वा स्वतन्त्रगुणलाभादिति पारतन्त्र्यादिदोषविशेषाभावस्य लक्षणत्वसंभवेऽप्यविवक्षितत्वमभिप्रेत्याह **एकमिति** । दोषसामान्याभाववत्त्वरूपमित्यादिः । लक्षणमुदितमिति विपरिणतमनुषज्यते । श्रियोऽपीशगतविशेषाज्ञानरूपदोषवत्त्वान्नातिव्याप्तिः । अखिलवेदादितात्पर्यविषयत्वमनन्यार्थतया वेदादिवेद्यत्वं च निखिलगुणत्वाद्यसाधकत्वादविवक्षितमित्याशयेनाह **द्वयमिति** । मुख्यार्थत्वं निरवधिकप्रवृत्तिनिमित्तत्वम् । अखिलवेदार्थत्वं च योगेनाखिलवैदिकपदवाच्यत्वम् । जन्माद्यष्टकहेतुत्वस्यैकलक्षणत्वभ्रमभङ्गायाष्टाविति । मुख्येति फलतो वन्दनविशेषणम् । मुख्यत्वं चानन्यसाध्यमोक्षसाधनत्वमनन्यप्रसादार्थत्वं वा सर्वोत्तमत्वप्रमितिपूर्वकत्वं वेति विशेषणभेदभिन्नानेकलक्षणानामप्युक्तसङ्गतिमत्त्वेनात्र विवक्षितत्वादेकमित्यादिसङ्गत्यानिर्देशो न कृतः । मुख्यवन्द्यत्वस्य नोत्तरलक्षणवदार्थिकत्वमिति भावेनोक्तमित्युक्तम् । तदुपपादयति **अशेषादिति** । वन्द्यान्तरादित्यर्थः । न च वन्द्यान्तराद्विशेषस्य वन्द्यविशेषणतया वन्दने मुख्यत्वलाभस्यार्थिकत्वमेवेति वाच्यम् । अयमस्मादधिकवन्द्य आधिक्येन वन्द्य इत्यनयोरेकार्थत्वानुरोधेन पञ्चम्या वन्द्यान्तरकर्मकवन्दनावधिकत्वस्यैव बोधनात् । तदन्विताधिक्यरूपविशेषस्य वन्द्यपदार्थघटकवन्दन एवान्वयात् । मुख्यवन्दनविषयत्वमात्रस्य लक्षणत्वेऽपि मुख्यत्वव्यावर्त्यप्रदर्शनार्थमशेषादित्युक्तमित्यभिप्रायः । परमप्रेमयोग्यत्वं विवक्षितमिति शेषः । उक्तमित्यस्यानुषङ्गो वा । अर्थादुक्तमित्यर्थः । प्रियतमत्वोक्त्या तत्प्रयोजकतद्योग्यतालाभादिति भावः । तर्हि सदा ममेति व्यर्थमत आह **तस्येति** । ननु मम प्रियतममित्यनेनैव परमप्रेमयोग्यत्वमाचार्यस्यानुभाविकमिति सिद्धचति । योग्यतानिश्चयमन्तरेण परमप्रेमानुपपत्तेरतः सदापदानर्थक्यमित्याशङ्क्य तदभिप्रायमाह **अन्येषामपीति** । **इतीति** । सूचयितुमिति शेषः । पूर्वेणैव संबन्धः । एतत्सूचनं च शिष्याणां कारणबाधेन परमप्रेमानुपपत्तिशङ्कानिरासार्थम् । न च कालान्तरीणानुभवस्य कथं कारणत्वमिति वाच्यम् । परमप्रेमरूपकार्यस्यापि ज्ञानोत्तरकालीनत्वात् । परमत्वं च वक्ष्यमाणपरावस्थारूपमुत्तमप्रसादहेतुत्वादिरूपं वा विवक्षितम् । अत एव विशेषणभेदेन लक्षणभेदादत्रापि लक्षणसङ्गत्यानुक्तिः । प्रथमापिशब्दस्याभिव्याप्त्यर्थत्वमुपेत्याह **अपिशब्द इति** । अपिशब्दावित्यपि पाठः ।

गूढ०— वन्द्यत्वप्रयोजकविशिष्टत्वाधिकृतत्वेष्टत्वोपपादकत्वेनैतानि विशेषणानि व्याख्याय अधुना लक्षणपरत्वेनापि व्याचष्टे **यद्वेति**। नन्वेकेनैव लक्षणवचनेनैव स्वरूपनिर्धारणसंभवादनेकलक्षणानां वैयर्थ्यमित्यत आह **विभवादिति** । ज्ञानाधिक्यादिरूपसामर्थ्यविशेषादित्यर्थः । अल्पज्ञेन खलु एकं लक्षणमुच्यते । आचार्यस्य तु सर्वज्ञत्वादनेकलक्षणवचनं युक्तमिति भावः । यद्वा नारायणस्य एकत्वात् तस्य कथमनेकानि लक्षणानीत्यत उक्तं **विभवादिति**। सर्वोत्तमत्वादिरूपैश्वर्यवत्त्वादित्यर्थः । तथाच महदैश्वर्यवत्त्वात्तस्यानेकलक्षणानि युज्यन्ते इति भावः ।

ननु प्रथमविशेषणेन निखिलपूर्णगुणैकदेहत्वं लक्षणमुक्तम् । तत्र पूर्णनिखिलपदयोर्वैयर्थ्यम् । पूर्णगुणत्वस्य निखिलगुणत्वस्य वा लक्षणत्वसंभवादित्यतो यथा न वैयर्थ्यं तथा लक्षणान्याह तत्रेति । गुणैकदेहत्वस्य लक्ष्यमात्रेऽपि सत्त्वात्तदर्थं स्वत इति । तस्याश्च स्वातन्त्र्येण गुणैकदेहत्वाभावान्नातिप्रसङ्गः । नन्वत्रैवं विशेषणविशेष्यभावो न प्रतीयते इत्यत उक्तं विवक्षाभेदेनेति । वक्त्रिच्छाभेदेनेत्यर्थः । वेदादीत्यत्रादिपदेन पुराणपरिग्रहः । एवं च वेदमुख्यार्थत्वं पुराणमुख्यार्थत्वमिति लक्षणद्वयम् । न च वाच्यत्वेन वेदमुख्यार्थत्वस्य धर्मादावपि सत्त्वादतिव्याप्तिरिति वाच्यम् । अनन्यार्थतया वेदप्रतिपाद्यत्वस्य विवक्षितत्वेन दोषाभावात् । अखिलवेदार्थत्वं चेति । यद्यप्युक्तरीत्या अखिलवेदार्थत्वस्य श्रीदेव्यामपि सत्त्वेनातिव्याप्तिस्तथापि समन्वयाध्यायोक्तन्यायेन परममुख्यवृत्त्या स्वरूपवर्णपदादिरूपाखिलवेदप्रतिपाद्यत्वस्य तत्राभावेन नातिव्याप्तिः । पूर्वं तु स्मार्तपतिः परमात्मेत्यर्थप्रतिपादने स्मार्ता अपि प्रतिपाद्यत्वमस्तीत्यर्थविवक्षया तथोक्तमिति न तेन विरोधः । कथमनेन मुख्यवेद्यत्वमुक्तमित्यत आह अशेषादिति । विशेषेण सर्वोत्तमत्वादिरूपविशेषेण । परमप्रेमयोग्यत्वस्य लोके पुत्रादौ दृष्टत्वेन परमात्मनि चादृष्टत्वेन असंभवादलक्षणत्वमित्याशङ्कापरिहारत्वेन ममेति पदमवतारयति तस्येति । तथाप्यन्येषामनादिभाविकत्वात्तदसत्कल्पमेव । एकं प्रत्येव सिद्धस्यार्थस्य सिद्धत्वव्यवहाराभावादित्यतस्तन्निर्णयागार्थत्वेन सदापदार्थमाह अन्येषामपीति । अपिशब्द इति । अन्यस्त्वभिव्याप्त्यर्थ इति भावः ।

उक्तानेकलक्षणोपपादकतया विशेषणानां व्याख्यानम्—

१० सु०— अथवा "निखिलेत्याद्युक्तलक्षणोपपन्नतया नारायणः केन प्रमाणेन प्रतिपत्तव्यः, इत्यतः सुबाक्यैराप्यम् इत्युक्तम् । 'ननु वेदाद्येकदेशो अन्यथाऽप्युच्यते । न । तत्प्रतीतेः अपरामर्शपूर्वकत्वात्' इत्याशयेन अखिलैः इत्युदितम् । 'तर्हि धर्माद्यसिद्धिः स्यात्, तस्य प्रमाणान्तरागोचरत्वात् । मैवम् । अमुख्यया वृत्त्या धर्मादिरपि वेदादिवेद्यत्वात्' इत्याशयवता आप्यतमम् इत्यभिहितम् । अपिशब्दो वक्ष्यमाणप्रमाणसमुच्चयार्थः । सकलजगन्निमित्तकारणत्वादिहेतुभिरपि उक्तलक्षणो नारायणः प्रत्येतव्य इत्यभिप्रेत्योक्तम् अस्येति ।"

परि०— ननु विभवादनेकलक्षणोक्तावप्येवंरूपेणैव लक्षणानि वाच्यानीत्यत्र न बीजमस्तीत्यतः सर्वस्योपयोगमाह **अथवेत्यादिना दुःखादिदोषरहितश्चेत्यन्तेन** ॥ तमपोऽग्रे पृथक्कृत्यं वक्तुमाप्यमिति प्रतीकोक्तिः ॥ वक्ष्यमाणप्रमाणेत्युक्तम् । तद्वचनक्ति **सकलेति** । आदिपदाज्जगत्पालकत्वसंहर्तृत्वनियन्तृत्वाद्यष्टौ हेतवो ग्राह्याः । उक्तं हि भागवते 'कर्तृत्वात्सगुणं ब्रह्मे'ति । वक्ष्यति च भाष्यकारोऽप्यानन्दमयनये । 'जन्माद्यस्येतिसूत्रेण गुणसर्वस्वसिद्धये । ब्रह्मणो लक्षणं प्रोक्तमि'तीति भावः ।

न हि जगज्जन्मादिकर्तुर्दोषाः संभवन्तीति जगत्कर्तृत्वादिनैव गुणसर्वस्ववन्निर्दोषताऽपि सिद्धचतीति भावेनोक्तलक्षण इत्युक्तम् ।

गु०दी०— **विभवादनेकानि लक्षणानीत्यनेन** निखिलपूर्णगुणैकदेहत्वनिर्दोषत्वादिग्रन्थोक्तसकल-लक्षणानि संगृह्यन्ते । उपपादनीयप्रमेयविशेषसद्भावान्निखिलपूर्णगुणैकदेहत्वादिकमेव विवेचितम् । निर्दोषत्वे तु तदभावान्न पृथक् तस्य विवेचनमिति ज्ञातव्यम् ।

यादु०— सुवाक्यैराप्यतममस्योद्भवादिदमित्येतत् लक्षणपरतया व्याख्याय लक्षणप्रतिपादकप्रमाण-परतयाऽपि व्याख्याति **अथवेत्यादिना** ।

वं०प०— तदेव प्रमाणं दर्शयति **सकलेति** ।

आनन्दः— ननु तथापि उक्तलक्षणविशिष्टे नारायणे प्रमाणाभावान्न तद्वन्दनं युक्तमित्यतो लक्षणपरत्वेन व्याख्यातमपि सुवाक्यैराप्यमित्येतत्प्रमाणपरत्वेनापि व्याचष्टे **अथवेति** । तथापि सुवाक्यैराप्यमित्यनेनैव प्रमाणस्योक्तत्वादखिलैरित्येतद्वचर्थमित्यतस्तन्निवर्त्याशङ्कामाह **नन्विति** । वेदाद्येकदेशे केवलो निर्गुणश्च नेहनानेत्यादाविति शेषः । **तत्प्रतीतेरिति** । **अन्यथाप्रतीतेरित्यर्थः** । उपक्रमोपसंहारादिरूपपरामर्शे तु पूर्णगुणरूप एव प्रतीयत इति भावः । तथापि तमपो वैयर्थ्यमित्यतः **तन्निवर्त्याशङ्कामाह तर्हीति** । अस्मिन्पक्षेऽपिशब्दार्थ-माह **अपिशब्द इति** । तथाप्यनुग्राहकयुक्तिरहितस्य वाक्यस्यार्थप्रमापकत्वाभावेन प्रकृतेऽनुग्राहकाभावात्कथं केवलवाक्येन विशिष्टार्थसिद्धिरित्यतोऽनुमानप्रदर्शनपरत्वेनास्योद्भवादिदमित्येतद्वचाचष्टे **सकलमिति** ।

कं०रा०— **अथवेति** । अस्मिन्पक्षे निखिलेत्यादिकं लक्षणप्रदर्शनपरम् । सुवाक्यैराप्यतममित्यादिकं तु नारायणे प्रमाणप्रदर्शनपरमिति भावः । **अन्यथाऽप्युच्यत इति** । निखिलपूर्णगुणेत्याद्युक्तलक्षणवैपरीत्येन वेदाद्येकदेशो नारायणः प्रतिपाद्यत इति कथं वेदेनोक्तलक्षणविशिष्टो नारायणः प्रतिपत्तव्य इति भावः । **अपरामर्शेति** । वेदैकदेशे आपाततोऽन्यथाप्रतीतावप्यखिलवेदविचारे क्रियमाणे उक्तलक्षणविशिष्टनारायणः प्रतीयत इति वेदेन तल्लक्षण-विशिष्टनारायणसिद्धिर्युक्तेति भावः । **तर्हीति** । **नारायणस्य यदखिलसुवाक्यप्रतिपाद्यत्वं तर्हीत्यर्थः** । **अमुख्ययेति** । अपरममुख्ययेत्यर्थः । **अपिशब्द इति** । अस्योद्भवादिदमित्यत्र सकलजगन्निमित्तकारणत्वादिना नारायणसिद्धे-र्वक्ष्यमाणत्वात् तत्प्रमाणसमुच्चयार्थोऽपिशब्द इत्यर्थः ।

वा०चं०— लक्षणेन व्यावृत्तस्वरूपस्य बुद्धारूढत्वेऽपि, मानाधीनत्वान्मेयसिद्धेः, लक्षणोक्तिमात्र-परत्वादपि लक्षणप्रमाणोभयपरत्वस्य ज्यायस्त्वात्; उभयपरतया श्लोकं योजयति **अथवेति** ॥ **अन्यथाऽपीति** । निर्गुणत्वदोषित्वादिनेत्यर्थः ॥ **तर्हीति** । निखिलवेदैरुक्तगुणविशिष्टनारायणस्यैव वचन इत्यर्थः ।

वा०र०— **मानाधीनत्वादिति** । लक्षणविशिष्टे प्रमाणाकाङ्क्षायां तदनुक्तौ तदसिद्ध्यापत्त्या प्रमाणोक्ते-रावश्यकत्वादित्यर्थः । **श्लोकं योजयतीति** । **सुवाक्यैराप्यतममस्योद्भवादिदमिति** विशेषणद्वयं लक्षणपरत्वेन

प्राग्योजितमेव प्रमाणपरत्वेनेदानीं योजयतीत्यर्थः । प्रमाणस्य सुवाक्यैराप्यतममित्यनेनैवाभिधानसिद्धेरखिलैरित्यस्य वैयर्थ्यमित्यतः प्रयोजनान्तरस्य विद्यमानत्वान्न वैयर्थ्यमित्याशयेन तद्व्यावर्त्याशङ्कामुत्थापयति ननु वेदादीति मूलम् । एकदेशे केवलो निर्गुणश्चेत्यादौ । ततश्चागमस्यैकदेशेन सत्प्रतिपक्ष इति भावः । आशयप्रदर्शनं तत्प्रतीतेरिति । अपरामर्शेति । निर्गुणत्वाभिधायिवाक्ये साक्षी चेतेति गुणाभिधायकपूर्वभागविरोधापत्त्या सर्वथा गुणगन्धित्यस्य तदर्थत्वाङ्गीकारः पूर्वापरामर्शपूर्वकः जनितोतविष्णोरित्यादिदोषाभिधायिवाक्येषु यथाश्रुतार्थो जन्माधिकरणे वक्ष्यमाणप्रकारेण धर्मिणा हि प्रमाणविरोधाद्यपरामर्शपूर्वक इत्यर्थः । प्रमाणान्तरेति मूलम् । न हि धर्मादिसिद्धिः स्यान्नित्यवाक्यं विना क्वचिदिति वक्ष्यमाणत्वादिति भावः । आप्यतममित्यभिहितमिति मूले तमवाभिहितमित्यर्थः । वक्ष्यमाणेति मूलम् । अस्योद्भवादिदमित्युक्तप्रमाणेत्यर्थः । उत्पत्तिकारणत्वरूपं लक्षणं कुलालादिसाधारण्य-निरासायोपादानकारणत्वनिरासाय च सकलजगन्निमित्तेति विशेषितम् । आदिपदेन सकलजगत्स्थित्यादिकारण-त्वादिपरिग्रहः ।

कुण्डल०— ननु वेदपुराणाद्येकदेशे नारायणस्यापूर्णगुणत्वाज्ञानपारतन्त्र्यजन्मादेः प्रतिपादनात्कथं वेदस्तस्य निखिलपूर्णगुणैकदेहत्वादिलक्षणविशिष्टत्वे प्रमाणमिति शङ्कते नन्विति । अपरामर्शपूर्वकत्वादिति । वेदाद्येकदेशजन्यप्रतीतेरुपक्रमाद्यनुसन्धानसचिवसर्ववेदविमर्शाजन्यत्वेन भ्रान्तित्वादिति भावः । तदुक्तम् । 'अन्वयं वैकदेशेन शास्त्रस्यार्थः प्रतीयते । अन्यच्च परिपूर्णेन समस्ताङ्गोपसंहृताविं'ति । तर्हीति । सर्वनिगमानां नारायण-प्रतिपादकत्वमित्यर्थः । अमुख्ययेति । अपरमुख्ययेत्यर्थः । वक्ष्यमाणप्रमाणेति । अखिलजगज्जन्मादिकारणत्व-लक्षणवक्ष्यमाणप्रमाणेत्यर्थः ।

चषकः— प्रकृतपद्यघटकपदद्वयीमुक्तलक्षणप्रमाणतात्पर्यकतयाऽपि व्याकुरुते अथवेत्यादिना । निरूपकतया प्रत्युपसृष्टपद्यार्थाधिगत्यन्वयिनी प्रकारता तत्तन्प्रकृतिकतृतीययोपस्थाप्यते ।

काशी०— अप्रमितैर्लक्षणैर्वस्तुनिर्धारणायोगादागमानुमानरूपप्रमाणद्वयपरतया विशेषणद्वयं व्याचष्टे अथवेति । वेदादिना लक्षणं दुरवधारणमित्याशङ्कते नन्विति । एकदेशे 'केवलो निर्गुणश्च' 'जनितोऽत विष्णो'रि-त्यादौ । तत्प्रतीतेः निर्गुणत्वजन्यत्वादिप्रतीतेः । अपरामर्शपूर्वकत्वात् वाक्यान्तरविरोधाद्यविचारमूलत्वात् विष्णो-रखिलवेदादिवेद्यत्वेन निर्गुणत्वादिश्रुतेर्निरवकाशगुणत्वादिश्रुत्यविरुद्धार्थकत्वस्यैव न्याय्यत्वादिति भावः । तर्हीति । विष्णोरखिलवेदवेद्यत्व इत्यर्थः । विष्णोरिव धर्मादिरपि महायोगरूपमुख्यवृत्त्या वेदादिवेद्यत्वे तस्यापि गुणपूर्णतापत्तिरत उक्तमुख्यया वृत्त्येति । न चैवं युगपद्वृत्तिद्वयविरोधः । तस्याप्रामाणिकत्वात् । वाक्यभेदशङ्का तु टीकायामेव परिहृतेति भावः । अभिव्याप्त्यर्थस्यापिशब्दस्यापेक्षितसमुच्चयार्थतामप्याह वक्ष्यमाणेति । अस्येत्यनेनेत्यादिः । सकलेति । सकलवस्तुसृष्ट्यादिकर्तृत्वलिङ्गैरित्यर्थः । प्रत्येतव्यः अनुमानव्यः । यद्यपि पूर्वकल्पेऽप्यखिलैरित्यादेरुक्तरीत्या प्रमाणपरत्वमस्ति एवमेतत्कल्पेऽप्युद्भवादिहेतुत्वस्य लक्षणत्वमनुमतम् । अतथाभूतस्य निखिलगुणत्वाद्यनुमापक-त्वानुपपत्तेः । 'जन्माद्यस्येति सूत्रेण गुणसर्वस्वसिद्धये । ब्रह्मणो लक्षणं प्रोक्तमि'त्यनुव्याख्यानविरोधाच्च । तथाऽपि

पूर्वकल्पे निखिलगुणवत्त्वपूर्णगुणवत्त्वानुमापकलक्षणसूचकत्वमखिलैरित्यादेरनन्यव्यावर्तकत्वमात्रमुद्भवादिहेतुत्वस्य विवक्षितम्। एतत्कल्पे च निखिलेत्याद्युक्तयावल्लक्षणवत्तायामागमानुमानप्रदर्शकत्वमनयोरिति विशेषः।

गूढ०— ननु तथापि उक्तलक्षणविशिष्टे नारायणे प्रमाणाभावान्न तद्वन्दनं युक्तमित्यतो लक्षणपरत्वेन व्याख्यातमपि सुवाक्यैराप्यमित्येतत्प्रमाणपरत्वेनापि व्याचष्टे **अथवेति** । तथापि सुवाक्यैराप्यमित्यनेनैव प्रमाणस्योक्तत्वादखिलैरित्येतद्वचर्थमित्यतस्तन्निवर्त्याशङ्कामाह **नन्विति** । वेदाद्येकदेशे केवलो निर्गुणश्च नेह नानेत्यादाविति शेषः। **तत्प्रतीतेरिति**। अन्यथाप्रतीतेरित्यर्थः। उपक्रमोपसंहारादिरूपपरामर्शो तु पूर्णगुणरूप एव प्रतीयत इति भावः। तथापि तमपो वैयर्थ्यमित्यतस्तन्निवर्त्याशङ्कामाह **तर्हीति**। अस्मिन्पक्षे अपिशब्दार्थमाह **अपिशब्द इति**। तथाप्यनुग्राहकयुक्तिरहितस्य वाक्यस्यार्थप्रमापकत्वाभावेन प्रकृतेऽनुग्राहकाभावात्कथं केवलवाक्येन विशिष्टार्थसिद्धिरित्यतोऽनुमानप्रदर्शनपरत्वेनास्योद्भवादिदमित्येतद्व्याचष्टे **सकलमिति**।

जगज्जन्मादिकारणत्वासंभवपरिहारकतया विशेषणानां व्याख्यानम्—

११ सु०— यद्वा, " 'नारायणस्य देहसद्भावे दुःखादिदोषानुषङ्गः, तदभावे ज्ञानादिगुणाभावः। उभयथाऽपि जगज्जन्मादिकारणत्वासंभवः' इत्याशङ्क्योक्तम् निखिलपूर्णगुणैकदेहं निर्दोषमिति। देहवत्त्वाद् ज्ञानादिगुणपूर्णः, तस्यापि निखिलपूर्णगुणमात्रत्वेन दुःखादिदोषरहितश्चेति।"

परि०— ननु जन्मादिहेतुत्वमेवाशरीरस्यायुक्तमिति वादिनं प्रति कथं तत्साधनम्। किञ्च जन्मादिहेतुत्वमेव जन्मादिसूत्रे लक्षणत्वेन प्रसिद्धमित्यतोऽस्त्विदमेव लक्षणम्, एतदुपपादकत्वेन निखिलेत्यादिप्राप्तमिति भावेनाह **यद्वेति** ॥ **दुःखादिदोषेति**। 'करणवच्चेन्न भोगादिभ्य' इत्यादिना सूत्रकृतैव पत्युरधिकरणे तथा वक्ष्यमाणत्वादिति भावः॥ **ज्ञानादिगुणाभाव इति**। 'अन्तवत्त्वमसर्वज्ञता वे'ति वक्ष्यमाणसूत्रादिति भावः॥ **तस्यापीति**। 'विकरणत्वान्नेति चेत्तदुक्तम्, आह च तन्मात्रमि'त्यादिषु सूत्रेषु तथा वक्ष्यमाणत्वादिति भावः।

यादु०— निखिलपूर्णगुणैकदेहं निर्दोषमिति विशेषणद्वयं लक्षणपरतया व्याख्यातमिदानीं तदसंभवपरिहारार्थतयाऽपि व्याचष्टे **यद्वा नारायणस्येति**।

आनन्दः— निखिलेत्येतदपि प्रकारान्तरेण व्याचष्टे **यद्वेति**। तदभावे ज्ञानादिगुणाभाव इति। यद्यपीश्वरज्ञानादेर्नित्यत्वान्न तस्योत्पत्तौ देहापेक्षा तथापि नित्यस्यापि द्रव्यत्वस्य गुणवत्त्वनियतत्ववन्नित्यस्यापि देहादेर्ज्ञानादिनियतत्वादित्याशयेन तदभावे ज्ञानादिगुणाभाव इत्युक्तमिति भावः। तथापि दुःखादिप्रसङ्ग इत्यत्राह **तस्यापीति**।

कं०रा०— **यद्वेति** । अस्मिन्पक्षे अस्योद्भवादिदमित्यादिकं नारायणस्य लक्षणप्रदर्शनपरम् । निखिलेत्यादिकं तु जगज्जन्मादिकारणत्वरूपलक्षणस्यासंभवरूपानुपपत्तिनिरासकमिति द्रष्टव्यम् ।

वा०चं०— साधकत्वबाधकपरिहारस्याप्यावश्यकत्वेन लक्षणप्रमाणोक्तिमात्रपरत्वादपि विशेषणद्वयस्य बाधकपरिहारार्थत्वाभ्युपगमेऽर्थविशेषलाभं मन्वानः पक्षान्तरमाह **यद्वेति** ।

वा०र०— **अर्थविशेषलाभमिति** । साधकत्वसद्भावबाधकाभावविशिष्टलक्षणकथनपरत्वसिद्धिरूपप्रयोजनमित्यर्थः । अनेनात्र पूर्वपक्षया स्वारस्यमुक्तं भवति । निखिलेत्यादिविशेषणद्वयस्य पृथक्करणे आप्यतममित्यादिविशेषणस्य प्रमाणपरत्वेन पृथक्करणे च अशेषविशेषतोऽपीत्याद्युक्तमुख्यवन्यत्वपरमप्रेमयोग्यत्वरूपलक्षणद्वयमेवात्र उच्यत इति ज्ञेयम् । दुःखादीति मूलम् । तत्सामग्रीसद्भावादिति भावः । **तदभाव इति** । यद्यपीश्वरज्ञानादेरनादिनित्यत्वान्नोत्पत्तौ देहापेक्षा तथापि तदविनाभूतत्वं ज्ञानादेरस्तीति तदभावे अभावः स्यादेवेति हृदयंनेदमुक्तम् ।

स०व्र०— सुबाक्यैराप्यतममस्योद्भवादिदमित्येतल्लक्षणपरतया व्याख्यातम्, इदानीमसंभवपरिहारार्थतयाऽपि व्याचष्टे **यद्वा नारायणस्य देहसद्भाव इति** ।

वि०— आप्यतममित्यादिकं निखिलेत्यादिनोक्तलक्षणस्योपपादकप्रमाणपरतया व्याख्यायेदानीं अस्योद्भवादिदमित्येतल्लक्षणपरमित्यभिप्रेत्य तत्रासंभवपरिहाराय निखिलेत्याद्युच्यत इति व्याचष्टे **यद्वा नारायणस्येति** ।

चषकः— बाधकव्युदसनतात्पर्यकतयाऽपि पदद्वयं व्याचिख्यासुः कल्पान्तरमुत्प्रेक्षते **यद्वेति** ।

काशी०— लक्षणपरं निखिलेत्यादिविशेषणद्वयं जगज्जन्मादिकर्तृत्वरूपहेत्वसिद्धिशङ्कावारकत्वेनापि व्याख्याति **यद्वेति** । न च साध्यस्य हेतुसाधकत्वे परस्पराश्रयः । गुणपूर्णत्वादेर्वह्न्यादिवत्प्रयोजकत्वेन तत्संभावनाया हेतुसंभावनामात्रहेतुत्वात् । जगत्कर्तृत्वादेश्च धूमादिवत्प्रयोज्यत्वेन तन्निश्चयस्य साध्यनिश्चयहेतुतया दोषाभावात् । **उभयथाऽपीति** । आद्ये जननादिदुःखवत्त्वेन पारतन्त्र्यादन्ते च देहाधीनज्ञानेच्छाद्यभावान्न सकलकर्तृत्वसंभव इति भावः । **गुणपूर्ण इति** । गुणपूर्णत्वसंभावनाविषय इत्यर्थः । तेन देहवत्त्वमात्रस्य गुणपूर्णत्वासाधकत्वेऽपि नानुपपत्तिः । न च देहाभावे ज्ञानादिगुणाभावस्यैव शङ्कितनया देहवत्त्वेन तन्निरासमात्रस्य कर्तव्यत्वाद्गुणपूर्णतापर्यन्तोक्तिरसङ्गतेति वाच्यम् । गुणाभावे गुणपूर्णत्वमत्यन्तासंभावितमिति शङ्कामिप्रायात् । अनाद्यनन्ताचिन्त्यजगन्निर्माणादेर्गुणपूर्णत्वमन्तरेणासंभवात्तत्संभवाय गुणपूर्णत्वस्य संभवनियतत्वाच्च देहस्य यत्किञ्चिद्गुणात्मकत्वे तद्विरोधिदोषशङ्काया गुणस्यापूर्णत्वे तदपाये दोषशङ्कायाश्चापत्तेर्निखिलपूर्णेति । गुणदेहवत्तदन्यदेहस्यापि सत्त्वे तत्प्रयुक्तदोषवत्त्वापत्तेर्गुणमात्रत्वादित्येकशब्दार्थ उक्तः । गुणेतरदेहरहित्यादिति यावत् । तादृशदेहस्यैव दुःखादिप्रयोजकत्वादिति भावः । अत्र दुःखस्यैव साक्षात्कर्तृत्वोपयोग्यानन्दोद्रेकविरोधित्वान्मुखतो ग्रहणमिति मन्तव्यम् ।

गूढ०— निखिलेत्येतदपि प्रकारान्तरेण व्याचष्टे **यद्वेति**। **तदभावे ज्ञानादिगुणाभाव इति**। यद्यपि ईश्वरज्ञानादेः नित्यत्वात्तस्योत्पत्तौ देहापेक्षा नास्ति तथापि नित्यस्यापि द्रव्यत्वस्य गुणवत्त्वनियतत्त्ववन्नित्यस्यापि देहादेः ज्ञानादिनियतत्वादित्याशयेन तदभावे ज्ञानादिगुणाभाव इत्युक्तमिति भावः। तथापि दुःखादिप्रसङ्ग इत्यत्राह **तस्यापीति**।

प्रदीपः— विधान्तरेण श्लोकं व्याख्याति **यद्वेति**।

नारायणशब्दस्य विशिष्टगुणवाचकतया विशेषणानां व्याख्यानम्—

१२ सु०— अथवा " 'नायं नारायणशब्दो डित्थादिशब्द इव भगवति साङ्केतिको, घटादिशब्द इव वा रूढिमात्रप्रवृत्तः। किन्तु विशिष्टगुणानप्याचष्ट इति ज्ञापयंस्तदर्थमनेन कथयति। एतदपि स्तुत्यर्थमित्यवगन्तव्यम्।"

परि०— नन्वेवमस्तु विशेषणानामर्थवत्त्वं यदि नारायणनतिरेवात्र युक्ता स्यात्। सैवायुक्ता, ब्रह्मतन्त्रारम्भे ब्रह्मनतेरेव कार्यत्वादित्यतः **'ओतत्ववाची ह्योङ्कारो वक्त्यसौ तद्गुणोतताम्। स एव ब्रह्मशब्दार्थो नारायणपदोदित'** इति, **'दोषारच्छिद्रशब्दानां पर्यायत्वं यतस्ततः। गुणा नारा इति ज्ञेया-स्तद्वान्नारायणः स्मृतः। ब्रह्मशब्दोऽपि हि गुणपूर्तिमेव वदत्ययमि'**ति च वक्ष्यमाणदिशा गुणपूर्ति-वाचिब्रह्मशब्दसमानार्थवाचित्वान्नारायणशब्दस्य तदर्थो ब्रह्मैवातो ब्रह्मतन्त्रारम्भे नारायणनतिः युक्तेति भावेन प्रयोजनान्तरमाह **अथवेति॥ साङ्केतिक इति**। अस्माच्छब्दादयमर्थो बोद्धव्य इतीच्छया नियमित इत्यर्थः॥ **विशिष्टगुणानपीति**। न केवलं रूढः किन्तु निखिलपूर्णगुणत्वनिर्दोषत्वादीन् इतरासाधारणान् गुणानप्याचष्ट इत्यर्थः॥ **तदर्थं नारायणशब्दार्थम्॥ अनेन श्लोकेनेत्यर्थः॥** स्तुत्यर्थमित्युपलक्षणं, ब्रह्मशब्दसमानार्थत्वसूचनार्थं चेत्यपि ध्येयम्॥ **निखिलेत्यनेनैव** ब्रह्मपदसमानार्थत्वलाभादितरनिरुक्ति-सार्थक्याय स्तुत्यर्थमित्येवोक्तम्॥

यादु०— पदार्थनिर्धारकलक्षणकथनात्मकतापेक्षया पदव्याख्यानरूपत्वस्यान्तरङ्गज्ञापकतामभिप्रेत्याह **अथवा नारायण इति॥ साङ्केतिक इति**। शब्दवृत्त्याभावेऽपीदमनेन शब्देन वाच्यमस्त्विति कस्यचिदिच्छामात्रेण बोधक इत्यर्थः॥ **विशिष्टगुणानिति**। अनन्यसाधारणान्धर्मानित्यर्थः। तेन महायोगोऽयमिति सूचयति।

नराणामिमे नारा इत्यादिकं तस्येदमित्यर्थे विहिताण्प्रत्ययव्याख्यानमित्यवगन्तव्यम्॥ ईयतेऽस्मि-न्नित्यधिकरणे व्युत्पन्नस्य ल्युडन्तायनशब्दस्य नपुंसकत्वनियमाभावात्पुलिङ्गता न विरुध्यत इत्यग्रे विभावयिष्यति।

वं०प०— विशिष्टगुणान् लोकविलक्षणगुणान्।

आनन्दः— ननु तथापि महायोगविद्वूढिभ्यां नारायणशब्दस्य विष्णुपरत्वेन तेनैवोक्तस्य सर्वस्याप्यर्थस्य वक्तुं शक्यत्वादेतेषां विशेषणानां वैयर्थ्यमित्यतो नारायणशब्दार्थकथनरूपत्वान्नैतेषां विशेषणानां वैयर्थ्यमित्याह **अथवेति**। एकस्य पित्रादेरेव यत्र पुत्रादिरूपे वस्तुनि **यच्छब्दप्रयोगे स्वातन्त्र्यं तच्छब्दप्रयोगः सङ्केतः** यत्र वस्तुनि यच्छब्दप्रयोगे कस्यापि स्वातन्त्र्याभावः **सार्वजनीनप्रसिद्धिरिति** यावत्। **सैव रूढिरित्यनयोर्भेद** इति द्रष्टव्यम्। ननु नारायणशब्दो विशिष्टगुणपर इत्यर्थकथनेन प्रयोजनाभावात्तदर्थकैतद्विशेषणानां वैयर्थ्यमित्यत आह **एतदपीति**। नारायणशब्दस्य विशिष्टगुणपरत्वकथनमित्यर्थः।

कं०रा०— **एतदपीति**। नारायणशब्दस्य विशिष्टगुणरूपार्थकथनमपीत्यर्थः।

वा०चं०— एवं प्रकृत्यर्थनारायणस्वरूपनिर्धारणहेतुलक्षणादिपरतया विशेषणानि व्याख्याय प्रकृत्यर्थ-कथनपरतयाऽपि तानि व्याचष्टे **अथवेति** ॥ अर्थगतप्रवृत्तिनिमित्तमनपेक्ष्य वक्त्राभिप्रायेण अर्थप्रत्यायकत्वं **साङ्केतिकत्वम्** अखण्डशक्ती **रूढिः**।

वा०र०— **प्रकृत्यर्थेति**। अनेन हि न केवलमव्यवहितपक्षापेक्षया अतिशयोऽपि तु लक्षणपरतया योजनात्रयादपीति ध्वनितम्। **प्रकृत्यर्थकथनपरतयापीति**। तस्यान्तरङ्गतया पूर्वापेक्षया स्वरसत्वादित्युक्तमनेन भवतीति ज्ञेयम्। प्रवृत्तिनिमित्तमनपेक्ष्यार्थप्रत्यायनशक्तत्वरूपं रूढत्वमभिप्रेत्य योगव्यावृत्तां पदनिष्ठां रूढिं लक्षयति **अखण्डेति**। तादृशरूढिमद्रूढमिति शेषः। वृत्तिविचारावसरे त्विदं स्पष्टीभवतीति भावः। नारायणशब्दस्य विशिष्टगुणाभिधायकत्वप्रदर्शनस्यापि प्रयोजनसद्भावात्र वैयर्थ्यमित्याह **एतदपीत्यादि** मूलम्। उक्तं प्रदर्शन-मपीत्यर्थः। उपलक्षणं चैतत्। नारायणशब्दस्य ब्रह्मशब्दसमानार्थतया शास्त्रार्थवाचकत्वान्नारायण एव शास्त्रार्थ इति दर्शयितुं चेत्यपि ज्ञेयम्।

स०ब्र०— पदार्थनिर्धारणापेक्षया व्याख्यानस्यान्तरङ्गतामभिप्रेत्याह **अथवा नायं नारायणशब्द इति**। अर्थगतं प्रवृत्तिनिमित्तमनपेक्ष्य वक्तुरभिप्रायमात्रेणार्थप्रत्यायकः शब्दः साङ्केतिक इत्युच्यते। तादृश एव वक्त्राभिप्राय-मन्तरेणार्थप्रत्यायको रूढः। नैवंविधो नारायणशब्दोऽपि तु रूढोऽप्यर्थगतप्रवृत्तिनिमित्तापेक्षित्वाद्यौगिकोऽपि भवति ॥

कुण्डल०— **साङ्केतिक इति**। वृत्त्यभावेति अञ्जनकृतसङ्केतमात्रेण प्रवृत्त इत्यर्थः। **रूढिमात्रेति**। समुदायशक्तिमात्र इत्यर्थः।

चषकः— विशेष्यवाचकपदोपस्थाप्यावधारकलक्षणप्रत्यायकतातः तत्पदविवरणरूपता ज्यायसीत्यभि-प्रेत्य भङ्ग्यन्तरमनुसरति **अथवेति**। **साङ्केतिकः** नदीवृद्धचादिशब्द इवार्थनिरूपितशक्तिलक्षणान्यतररूपवृत्ति-मन्तरेणापि प्रणेतृपरिभाषयार्थप्रतीतिजनकः ॥ **रूढिमात्रप्रवृत्तः** प्रकृतिप्रत्ययसमुदायवृत्तिव्यावर्त्यवृत्तिधर्मा-वच्छिन्नाधारताकाभिधावृत्तिनिबन्धनः ॥ **विशिष्टेति**। असाधारणेत्यर्थः।

काशी०— ननु नारायणशब्दादेव लक्षणादिलाभसंभवे पृथक् तदभिधानं व्यर्थमित्याशङ्क्य तथाऽपि तदर्थमविदुषां तदर्थज्ञानार्थतया विशेषणानि सार्थकानीत्याशयेनाह **अथवेति** । कस्यचिदज्ञस्य सङ्केतेनापि नारायणशब्दप्रयोगसंभवादयमिति आचार्यप्रयुक्त इत्यर्थः । अस्माच्छब्दादयमर्थो ज्ञातव्य इति स्वतन्त्रवक्तुरिच्छा सङ्केतः रूढिरखण्डशक्तिः । **विशिष्टगुणानिति** । असाधारणधर्मानित्यर्थः । एतेन नारायणपदे णत्वनिर्वाहक-त्वेनापिशब्दसूचिता रूढिर्न पङ्कजादिपद इव योगार्थस्यातिप्रसक्तत्वादुपेयते किन्तु श्रुत्यादिप्रमाणबलादिति सूचितम् । ननु निखिलेत्यादेर्नारायणशब्दसमानार्थत्वे सह्प्रयोगानुपपत्तिः । न च नारायणशब्दस्य योगार्थ-विशिष्टरूढ्यर्थबोधकत्वात्केवलयोगार्थबोधकविशेषणपदानां न तत्समानार्थत्वमिति वाच्यम् । शुक्लपटः शुक्लः पङ्कजं पङ्कजन्यमित्यादाविव विशेषणस्य विशेष्यत्वेन निराकाङ्क्षत्वादन्वयानुपपत्तेरिति चेन्न । नारायणशब्दस्य वक्ष्यमाणव्युत्पत्त्या गुणाश्रयत्वादिविशिष्टमात्रवाचितया तत्तात्पर्यलभ्यनिखिलत्वाद्यधिकांशघटितार्थकानां निखिले-त्यादीनां निराकाङ्क्षत्वाभावात् । विशेषणतापर्यास्यधिकरणस्य विशेष्यत्व एव निराकाङ्क्षत्वोपगमात् । अत एव जन्यं कर्तृजन्यमित्यादयो व्यवहाराः । वस्तुतो रूढ्या आपो नारा इति स्मृतिसिद्धयोगरूढ्या वा नारायणशब्दस्य विशेष्यसमर्पकत्वान्न कश्चिद्दोषः । नन्वत्र नारायणशब्दार्थकथनमनर्थकम् । लक्षणादेः साक्षादभिधानेऽपि लाभात् । न चाविशेषः । निखिलेत्यादिभिर्नारायणशब्दार्थं प्रतीत्य ततो लक्षणाद्यनुसन्धाने प्रतिपत्तिगौरवादित्यत आह **एतदपीति** । उक्तगौरवयुक्तमपि नारायणशब्दार्थकथनं निखिलपूर्णगुणैकदेहवत्त्वादिनिमित्तैस्तत्पदप्रतिपाद्योऽसा-वित्येव स्तुत्यर्थमित्यर्थः । एतत्कल्पे लक्षणादेरविवक्षितत्वे त्वपिपदास्वारस्यं नारायणशब्दस्येतोऽप्यधिकार्थ-त्वेनैतावन्मात्रकथने बीजाभावप्रसङ्गश्चेति बोध्यम् । **परिमळे** तु ब्रह्मतन्त्रारम्भे नारायणनमनमसङ्गतमित्याशङ्क्य तच्छब्दयोरेकार्थत्वसिद्धये निखिलेत्यादिकमुक्तमित्याशयेनाह **अथवेति** । स्तुत्यर्थमित्युपलक्षणम् । ब्रह्मशब्द-समानार्थत्वसिद्धचर्थं चेति ग्राह्यम् । निखिलेत्यादिविशेषणेनैव तल्लाभादितरनिरुक्तिवैयर्थ्यनिरासाय स्तुत्यर्थत्वोक्तिरिति व्याख्यानम् । अत्र यद्यपि स एव ब्रह्मशब्दार्थो नारायणपदोदित इति ब्रह्मनारायणशब्दयोरेकार्थत्वं साक्षाद्वक्ष्यते ।

गूढ०— ननु तथापि महायोगविद्बुद्धिभ्यां नारायणशब्दस्य विष्णुपरत्वेन तेनैवोक्तस्य सर्वस्याप्यर्थस्य वक्तुं शक्यत्वादेतेषां विशेषणानां वैयर्थ्यमित्यतो नारायणशब्दार्थकथनरूपत्वान्नैतेषां विशेषणानां वैयर्थ्यमित्याह **अथवेति** । एकस्य पित्रादेरेव यत्र पुत्रादिरूपवस्तुनि यच्छब्दप्रयोगे स्वातन्त्र्यं तच्छब्दप्रयोगः सङ्केतः यत्र वस्तुनि यच्छब्दप्रयोगे कस्यापि स्वातन्त्र्याभावः सार्वजनीनप्रसिद्धिरिति यावत्सैव रूढिरित्यनयोर्भेद इति द्रष्टव्यम् । ननु नारायणशब्दो विशिष्टगुणपर इत्यर्थकथनेन प्रयोजनाभावात्तदर्थकैतद्विशेषणानां वैयर्थ्यमित्यत आह **एतदपीति** । नारायणशब्दस्य विशिष्टगुणपरत्वकथनमित्यर्थः ।

प्रदीपः— नारायणशब्दव्याख्यानपरतयापि **व्याचष्टे अथवेति** । अर्थगतं प्रवृत्तिनिमित्तं अनपेक्ष्य वक्त्रभिप्रायमात्रेणार्थप्रत्यायकः शब्दः सांङ्केतिक इत्युच्यते । तादृश एव वक्त्रभिप्रायमन्तरेणार्थप्रयुक्तो रूढः नैवं-विधो नारायणशब्दोऽपि तु रुढोऽप्यर्थगतप्रवृत्तिनिमित्तापेक्षत्वाद्यौगिकोऽपि भवति । ईयतेऽस्मिन्नित्यधिकरणव्युत्प-त्तायनशब्दस्य नपुंसकत्वनियमाभावात् पुल्लिङ्गता न विरुध्यते ।

आनन्दः— ननु तथापि महायोगविद्वद्रूढिभ्यां नारायणशब्दस्य विष्णुपरत्वेन तेनैवोक्तस्य सर्वस्याप्यर्थस्य वक्तुं शक्यत्वादेतेषां विशेषणानां वैयर्थ्यमित्यतो नारायणशब्दार्थकथनरूपत्वान्नैतेषां विशेषणानां वैयर्थ्यमित्याह **अथवेति**। एकस्य पित्रादेरेव यत्र पुत्रादिरूपे वस्तुनि यच्छब्दप्रयोगे स्वातन्त्र्यं तच्छब्दप्रयोगः सङ्केतः यत्र वस्तुनि यच्छब्दप्रयोगे कस्यापि स्वातन्त्र्याभावः सार्वजनीनप्रसिद्धिरिति यावत्। सैव रूढिरित्यनयोर्भेद इति द्रष्टव्यम्। ननु नारायणशब्दो विशिष्टगुणपर इत्यर्थकथनेन प्रयोजनाभावात्तदर्थकैतद्विशेषणानां वैयर्थ्यमित्यत आह **एतदपीति**। नारायणशब्दस्य विशिष्टगुणपरत्वकथनमित्यर्थः।

कं०रा०— एतदपीति। नारायणशब्दस्य विशिष्टगुणरूपार्थकथनमपीत्यर्थः।

वा०चं०— एवं प्रकृत्यर्थनारायणस्वरूपनिर्धारणहेतुलक्षणादिपरतया विशेषणानि व्याख्याय प्रकृत्यर्थ-कथनपरतयाऽपि तानि व्याचष्टे **अथवेति**॥ **अर्थगतप्रवृत्तिनिमित्तमनपेक्ष्य** वक्त्राभिप्रायेण अर्थप्रत्यायकत्वं **साङ्केतिकत्वम्** अखण्डशक्तौ रूढिः।

वा०र०— प्रकृत्यर्थेति। अनेन हि न केवलमव्यवहितपक्षापेक्षया अतिशयोऽपि तु लक्षणपरतया योजनात्रयादपीति ध्वनितम्। **प्रकृत्यर्थकथनपरतयापीति**। तस्यान्तरङ्गतया पूर्वपिक्षया स्वरसत्वादित्युक्तमनेन भवतीति ज्ञेयम्। प्रवृत्तिनिमित्तमनपेक्ष्यार्थप्रत्यायनशक्तत्वरूपं रूढत्वमभिप्रेत्य योगव्यावृत्तां पदनिष्ठां रूढिं लक्षयति **अखण्डेति**। तादृशरूढिमद्रूढमिति शेषः। वृत्तिविचारावसरे त्विदं स्पष्टीभवतीति भावः। नारायणशब्दस्य विशिष्टगुणाभिधायकत्वप्रदर्शनस्यापि प्रयोजनसद्भावान्न वैयर्थ्यमित्याह **एतदपीत्यादि** मूलम्। उक्तं प्रदर्शन-मपीत्यर्थः। उपलक्षणं चैतत्। नारायणशब्दस्य ब्रह्मशब्दसमानार्थतया शास्त्रार्थवाचकत्वान्नारायण एव शास्त्रार्थ इति दर्शयितुं चेत्यपि ज्ञेयम्।

स०व्र०— पदार्थनिर्धारणापेक्षया व्याख्यानस्यान्तरङ्गतामभिप्रेत्याह **अथवा नायं नारायणशब्द इति**। अर्थगतं प्रवृत्तिनिमित्तमनपेक्ष्य वक्तुरभिप्रायमात्रेणार्थप्रत्यायकः शब्दः साङ्केतिक इत्युच्यते। तादृश एव वक्त्राभिप्राय-मन्तरेणार्थप्रत्यायको रूढः। नैवंविधो नारायणशब्दोऽपि तु रूढोऽप्यर्थगतप्रवृत्तिनिमित्तापेक्षित्वाद्यौगिकोऽपि भवति॥

कुण्डल०— साङ्केतिक इति। वृत्त्यभावेति अञ्जनकृतसङ्केतमात्रेण प्रवृत्त इत्यर्थः। **रूढिमात्रेति**। समुदायशक्तिमात्र इत्यर्थः।

चषकः— विशेष्यवाचकपदोपस्थाप्यावधारकलक्षणप्रत्यायकतातः तत्पदविवरणरूपता ज्यायसीत्यभि-प्रेत्य भङ्ग्यन्तरमनुसरति **अथवेति**। **साङ्केतिकः** नदीवृद्धचादिशब्द इवार्थनिरूपितशक्तिलक्षणान्यतररूपवृत्ति-मन्तरेणापि प्रणेतृपरिभाषयार्थप्रतीतिजनकः॥ **रूढिमात्रप्रवृत्तः** प्रकृतिप्रत्ययसमुदायवृत्तिव्यासज्यवृत्तिधर्मा-वच्छिन्नाधारताकाभिधावृत्तिनिबन्धनः॥ **विशिष्टेति**। असाधारणेत्यर्थः।

काशी०— ननु नारायणशब्दादेव लक्षणादिलाभसंभवे पृथक् तदभिधानं व्यर्थमित्याशङ्क्य तथाऽपि तदर्थमविदुषां तदर्थज्ञानार्थतया विशेषणानि सार्थकानीत्याशयेनाह **अथवेति** । कस्यचिदज्ञस्य सङ्केतेनापि नारायणशब्दप्रयोगसंभवादयमिति आचार्यप्रयुक्त इत्यर्थः । अस्माच्छब्दादयमर्थो ज्ञातव्य इति स्वतन्त्रवक्तुरिच्छा सङ्केतः रूढिरखण्डशक्तिः । **विशिष्टगुणानिति** । असाधारणधर्मानित्यर्थः । एतेन नारायणपदे णत्वनिर्वाहक-त्वेनापिशब्दसूचिता रूढिर्न पङ्कजादिपद इव योगार्थस्यातिप्रसक्तत्वादुपेयते किन्तु श्रुत्यादिप्रमाणबलादिति सूचितम् । ननु निखिलेत्यादेर्नारायणशब्दसमानार्थत्वे सह्प्रयोगानुपपत्तिः । न च नारायणशब्दस्य योगार्थ-विशिष्टरूढ्यर्थबोधकत्वात्केवलयोगार्थबोधकविशेषणपदानां न तत्समानार्थत्वमिति वाच्यम् । शुक्लपटः शुक्लः पङ्कजं पङ्कजन्यमित्यादाविव विशेषणस्य विशेष्यत्वेन निराकाङ्क्षत्वादन्वयानुपपत्तेरिति चेन्न । नारायणशब्दस्य वक्ष्यमाणव्युत्पत्त्या गुणाश्रयत्वादिविशिष्टमात्रवाचितया तत्तात्पर्यलभ्यनिखिलत्वाद्यधिकांशघटितार्थकानां निखिले-त्यादीनां निराकाङ्क्षत्वाभावात् । विशेषणतापर्यास्यधिकरणस्य विशेष्यत्व एव निराकाङ्क्षत्वोपगमात् । अत एव जन्यं कर्तृजन्यमित्यादयो व्यवहाराः । वस्तुतो रूढ्या आपो नारा इति स्मृतिसिद्धयोगरूढ्या वा नारायणशब्दस्य विशेष्यसमर्पकत्वान्न कश्चिद्दोषः । नन्वत्र नारायणशब्दार्थकथनमनर्थकम् । लक्षणादेः साक्षादभिधानेऽपि लाभात् । न चाविशेषः । निखिलेत्यादिभिर्नारायणशब्दार्थं प्रतीत्य ततो लक्षणाद्यनुसन्धाने प्रतिपत्तिगौरवादित्यत आह **एतदपीति** । उक्तगौरवयुक्तमपि नारायणशब्दार्थकथनं निखिलपूर्णगुणैकदेहवत्त्वादिनिमित्तैस्तत्पदप्रतिपाद्योऽसा-वित्येवं स्तुत्यर्थमित्यर्थः । एतत्कल्पे लक्षणादेरविवक्षितत्वे त्वपिपदास्वारस्यं नारायणशब्दस्येतोऽप्यधिकार्थ-त्वेनैतावन्मात्रकथने बीजाभावप्रसङ्गश्चेति बोध्यम् । परिमळे तु ब्रह्मतन्त्रारम्भे नारायणनमनमसङ्गतमित्याशङ्क्य तच्छब्दयोरेकार्थत्वसिद्धये निखिलेत्यादिकमुक्तमित्याशयेनाह **अथवेति** । स्तुत्यर्थमित्युपलक्षणम् । ब्रह्मशब्द-समानार्थत्वसिद्धचर्थं चेति ग्राह्यम्। निखिलेत्यादिविशेषणेनैव तल्लाभादितरनिरुक्तिवैयर्थ्यनिरासाय स्तुत्यर्थत्वोक्तिरिति व्याख्यातम्। अत्र यद्यपि स एव ब्रह्मशब्दार्थो नारायणपदोदित इति ब्रह्मनारायणशब्दयोरेकार्थत्वं साक्षाद्वक्ष्यते ।

गूढ०— ननु तथापि महायोगविद्वद्रूढिभ्यां नारायणशब्दस्य विष्णुपरत्वेन तेनैवोक्तस्य सर्वस्याप्यर्थस्य वक्तुं शक्यत्वादेतेषां विशेषणानां वैयर्थ्यमित्यतो नारायणशब्दार्थकथनरूपत्वान्नैतेषां विशेषणानां वैयर्थ्यमित्याह **अथवेति** । एकस्य पित्रादेरेव यत्र पुत्रादिरूपवस्तुनि यच्छब्दप्रयोगे स्वातन्त्र्यं तच्छब्दप्रयोगः सङ्केतः यत्र वस्तुनि यच्छब्दप्रयोगे कस्यापि स्वातन्त्र्याभावः सार्वजनीनप्रसिद्धिरिति यावत्सैव रूढिरित्यनयोर्भेद इति द्रष्टव्यम् । ननु नारायणशब्दो विशिष्टगुणपर इत्यर्थकथनेन प्रयोजनाभावात्तदर्थैकतद्विशेषणानां वैयर्थ्यमित्यत आह **एतदपीति** । नारायणशब्दस्य विशिष्टगुणपरत्वकथनमित्यर्थः ।

प्रदीपः— नारायणशब्दव्याख्यानपरतयापि **व्याचष्टे अथवेति** । अर्थगतं प्रवृत्तिनिमित्तं अनपेक्ष्य वक्त्राभिप्रायमात्रेणार्थप्रत्यायकः शब्दः सांकेतिक इत्युच्यते । तादृश एव वक्त्राभिप्रायमन्तरेणार्थप्रयुक्तो रूढः नैवं-विधो नारायणशब्दोऽपि तु रुढोऽप्यर्थगतप्रवृत्तिनिमित्तापेक्षत्वाद्यौगिकोऽपि भवति । ईयतेऽस्मिन्नित्यधिकरणव्युत्प-त्त्यायनशब्दस्य नपुंसकत्वनियमाभावात् पुलिङ्गता न विरुध्यते ।

११ सु०— तथा हि। अराः दोषाः, तद्विरुद्धत्वाद् गुणाः नाराः, तदयनत्वात् नारायणः। अराणामयनं न भवतीति वा। उपकारित्वादिना नराणामिमे नारा वेदादयः, प्रतिपाद्यतया तदयनत्वाद्वा। नराणामिदं नारमुद्भवादिदातृतया तदयनत्वाद्वा। नरसमूहो नारं, वन्द्यतया तदयनत्वाद्वा। नराणामधिपतिः नारो मुख्यवायुः, परमप्रेमास्पदतया तस्यायनत्वाद्वेति यथाक्रममवगन्तव्यम्।

परि०— अराणामयनं न भवतीत्यत्र अरविरुद्धा नारा इति पूर्वत्र चानरायण इति स्यात्; इत्यादिचोद्यं तु 'दोषारच्छिद्रशब्दाना'मित्यादिव्याख्यावसरे अधिकरणान्ते निरगिष्यते॥ तस्यायनत्वाद्वेतीति। परमप्रेमास्पदतया वाग्वयनत्वोक्त्यैव वाग्ववतारत्वादाचार्यस्य मम प्रियतममित्येतन्नारायणमित्यनेन प्राप्तमेवेति भावः।

आनन्दः— तत्र प्रथमविशेषणोक्तं नारायणपदार्थमाह **अरा दोषा** इति। निर्दोषमित्यनेनोक्तमर्थमाह **अराणामिति**। सुवाक्यैरित्यनेनोक्तमर्थमाह **उपकारित्वादिनेति**। तस्येदमित्यण्। तस्यैत्यनेनोक्तमर्थमाह **नराणामिति**। अत्रापि तदर्थेऽण्। अशेषेत्युक्तार्थमाह **नरेति**। तस्य **समूह** इति। समूहेऽर्थेऽण्। प्रियेत्युक्तार्थमाह **नराणामिति**। अत्रापीदमर्थ एवाण्।

वा०र०— उक्तविशेषणानां नारायणपदार्थकथनपरत्वमुपपादयितुं प्रतिजानीते **तथा हीति**। यथाक्रममिति वक्ष्यमाणत्वात्क्रमेण षण्णां विशेषणानां नारायणपदार्थकथनपरत्वम् **अरा दोषा इत्यादि**। दोषारच्छिद्रशब्दानां पर्यायत्वमिति वक्ष्यमाणत्वादिति भावः। आद्ये नञो विरुद्धार्थत्वं द्वितीये अभावार्थत्वमिति विवेकः। तृतीयचतुर्थषष्ठेषु तस्येदमितीदमर्थे अण्। पञ्चमे तस्य समूह इति समूहार्थे अण्। उपकारित्वं च मोक्षसाधनज्ञानजनकत्वमादिना विचार्यत्वादिपरिग्रहः इति गुरवः।

स०त्र०— 'अरो रथाङ्गे चक्राङ्गे शीघ्रगामिनि किल्बिष' इत्यभिधानं मनसि निधायाऽऽह **अरा दोषा इति**।

कुण्डल०— **नारा वेदादय इति**। नराणामिमे संबन्धिन इत्यर्थः। तस्येदमिति सूत्रात् अण्प्रत्यये सति आदिवृद्धिप्रवृत्तौ नारशब्दो निष्पन्नः। एवमेवोत्तरत्रापि नारशब्दो द्रष्टव्यः।

काशी०— तथाऽपि नारायणप्रणामानन्तरमुत्पन्नोक्तशङ्काया अव्यवधानेन परिहारायात्र तत्सूचनमित्याशयः। **गुणा इति**। निखिलपूर्णगुणा इत्यर्थः। गुणविशेषानुक्त्या दोषविरुद्धत्वोक्त्या च निखिलपूर्णगुणानामेव लाभात्। तदयनत्वात् तेषां मुख्याश्रयत्वात्। मुख्यत्वं च स्वाभाविकत्वेन। एवं च निखिलेत्यादेर्निखिलपूर्णगुणानामेकदेहं मुख्याश्रयमित्यर्थोऽवगन्तव्यः। **अराणामयनं न भवतीति**। यद्यपि दोषाभाववदर्थकनिर्दोषपदानुसारेण

अराणामभावो नारं तदयनत्वादिति व्याख्येयम्। तथाऽपि दोषध्वंसादिप्रतीतिनिरासाय दोषवदन्यत्वं व्याख्यातम्। निर्दोषपदं तु दोषात्यन्ताभाववत्त्वरूपफलितार्थपरमिति भावः। वाशब्दोत्तरं सर्वत्र नारायण इत्यस्यानुषङ्गो बोध्यः। नरशब्दात्संबन्ध्यर्थेऽण्प्रत्ययः। संबन्धश्चोपकारकत्वश्रोतव्यत्वादिरिति भावेनाह उपकारित्वादिनेति। प्रतिपाद्यतयेति। मुख्यप्रतिपाद्यतयेत्यर्थः। नराणामित्यस्वतन्त्रमात्रोपलक्षणम्। उद्भवाद्यष्टकवत्त्वात्साक्षान्नरग्रहणम्। यद्वा स्वतो रतिरूपत्वाभावात्प्रकृतिजीवजडा नरास्तेषामित्यर्थः। नरसमूह इति। समूहार्थेऽण्प्रत्ययः। अशेषविशेषत इत्येतच्च समूहवन्त्वस्योपपादकमिति भावः। नराणामयमधिपतिरिति। ननु तस्येदमिति षष्ठ्यन्तादणप्रत्ययो विहितः। षष्ठी च नाप्रधानवाचिनः शब्दात् द्विष्ठो यद्यपि संबन्धः षष्ठ्युत्पत्तिः प्रधानत इति वचनात्। स्वस्वामिभावरूपस्य प्रधानाप्रधानसाधारणत्वेऽपि प्रधानवाचिन एव तदर्थकषष्ठी भवतीति तदर्थः। न चैवं श्रियः पतिरित्यादिप्रयोगानुपपत्तिः। तत्र पतित्वान्वयिनिरूपितत्वस्यैव षष्ठ्यर्थत्वेन स्वस्वामिभावार्थत्वाभावात्। तथाच कथं नारशब्दान्नराधिपतेर्बोधः। नरशब्दस्याप्रधानवाचित्वेन ततः षष्ठ्यनुपपत्तेः। अन्यथा प्रमेयदीपिकायां स्वभावोऽध्यात्ममुच्यत इत्यत्र स्वशब्दस्यात्मीयवाचित्वेऽपि जीवनियामकेश्वरस्योक्तवचनेनात्मीयपदार्थत्वानुपपत्त्या स्वपदस्य तत्परत्वप्रतिषेधविरोधादिति चेत्। सत्यम्। नात्र तस्येदमिति सूत्रानुशिष्टः स्वस्वामिभावार्थकषष्ठ्यन्तादणप्रत्ययः किन्तु तस्येश्वर इति षष्ठ्यन्तादीश्वररूपार्थे विहितः। तथाच पार्थिव इत्यादाविवेश्वरत्वान्वयिनिरूपितत्वस्यैव षष्ठ्यर्थत्वान्नोक्तदोषः। न चैवं नराणामयमधिपतिरित्यत्रायमित्यस्य वैयर्थ्यम्। ईश्वर इत्येव च वक्तुमुचितमिति वाच्यम्। अयमित्यस्यावान्तरेश्वरत्वज्ञापनार्थत्वात्। तच्च न राजादेरिवागन्तुकम्। किन्तु अत एव चानन्याधिपतिरिति सूत्रसूचितं स्वाभाविकमेवेति विभावयितुमधिपतिपदोपादानात्। यद्वा। मम प्रियतममित्यनेनास्यैकार्थत्वघटनायोक्तमयमिति आचार्य इत्यर्थः। छप्रत्ययश्च नेश्वरार्थे विहित इति नेश्वरस्यात्मीयपदार्थत्वमिति प्रमेयदीपिकाभिप्रायः। न चात्मोपकारकत्वेनात्मसंबन्धित्वादात्मीयपदार्थत्वमीश्वरस्य दुर्वारमिति वाच्यम्। षष्ठ्या यस्मिन्न प्राधान्यं ज्ञाप्यते तद्वाचिनः षष्ठी नेत्यङ्गीकारात्। उपकारकत्वबोधकषष्ठ्याऽप्युपकार्यस्याप्राधान्यज्ञापनात्। न चैवमुपकारित्वादिना नराणामिमे नारा इत्यस्यानुपपत्तिरिति वाच्यम्। वेदानामुपकारकरणत्वात्। करणस्य च प्राधान्यानियमेन तत्र तदज्ञापनेनोपकार्येष्वप्राधान्यस्याप्यज्ञापनादित्यवधेयम्। परमेत्यस्य सदेत्यादिरिति निर्वचनं निखिलेत्यादिविशेषणक्रमेणावगन्तव्यमित्यर्थः। (अत्र तस्येति षष्ठ्यन्तार्थमुख्यवायुनिरूपितत्वस्य प्रेमास्पदतयेति तृतीयान्तार्थप्रीतिविषयत्वाभेदस्य तदवच्छिन्नत्वस्य वाऽऽश्रयत्वरूपायनत्वेऽन्वयः। एवं च नारायण इत्यत्र नारपदार्थस्यायनपदार्थतावच्छेदकेऽन्वयः। एतत्सूचनायैव तस्येति व्यस्तप्रयोग इत्याहुः।)

गूढ०— तत्र प्रथमविशेषणोक्तं नारायणपदार्थमाह अरा दोषा इति। निर्दोषमित्यनेनोक्तमर्थमाह अराणामिति। सुवाक्यैरित्यनेनोक्तमर्थमाह उपकारित्वादिनेति। तस्येदमित्यण्। तस्येत्यनेनोक्तमर्थमाह नराणामिति। अत्रापि तदर्थे अण्। अशेषेत्युक्तमर्थमाह नरेति। तस्य समूह इति। समूहेऽर्थे अण्। प्रियेत्युक्तार्थमाह नराणामिति। अत्रापीदमर्थे अण्।

१३ सु०— तथा हि। अराः दोषाः, तद्विरुद्धत्वाद् गुणाः नाराः, तदयनत्वात् नारायणः। अराणामयनं न भवतीति वा। उपकारित्वादिना नराणामिमे नारा वेदादयः, प्रतिपाद्यतया तदयनत्वाद्वा। नराणामिदं नारमुद्भवादिदातृतया तदयनत्वाद्वा। नरसमूहो नारं, वन्द्यतया तदयनत्वाद्वा। नराणामधिपतिः नारो मुख्यवायुः, परमप्रेमास्पदतया तस्यायनत्वाद्वेति यथाक्रममवगन्तव्यम्।

परि०— अराणामयनं न भवतीत्यत्र अविरुद्धा नारा इति पूर्वत्र चानरायण इति स्यात्; इत्यादिचोद्यं तु 'दोषारच्छिद्रशब्दाना'मित्यादिव्याख्यावसरे अधिकरणान्ते निरगिष्यते ॥ **तस्यायनत्वाद्वेतीति**। परमप्रेमास्पदतया वाय्वयनत्वोक्त्यैव वाय्ववतारत्वादाचार्यस्य मम प्रियतमामित्येतन्नारायणमित्यनेन प्राप्तमेवेति भावः।

आनन्दः— तत्र प्रथमविशेषणोक्तं नारायणपदार्थमाह **अरा दोषा इति**। निर्दोषमित्यनेनोक्तमर्थमाह **अराणामिति**। सुवाक्यैरित्यनेनोक्तमर्थमाह **उपकारित्वादिनेति**। तस्येदमित्यण्। तस्येत्यनेनोक्तमर्थमाह **नराणामिति**। अत्रापि तदर्थेऽण्। अशेषेत्युक्तार्थमाह **नरेति**। तस्य समूह इति। समूहेऽर्थेऽण्। प्रियेत्युक्तार्थमाह **नराणामिति**। अत्रापीदमर्थ एवाण्।

वा०र०— उक्तविशेषणानां नारायणपदार्थकथनपरत्वमुपपादयितुं प्रतिजानीते **तथा हीति**। यथाक्रममिति वक्ष्यमाणत्वात्क्रमेण षण्णां विशेषणानां नारायणपदार्थकथनपरत्वम् **अरा दोषा इत्यादि**। दोषारच्छिद्रशब्दानां पर्यायत्वमिति वक्ष्यमाणत्वादिति भावः। आद्ये नञो विरुद्धार्थत्वं द्वितीये अभावार्थत्वमिति विवेकः। तृतीयचतुर्थषष्ठेषु तस्येदमितीदमर्थे अण्। पञ्चमे तस्य समूह इति समूहार्थे अण्। उपकारित्वं च मोक्षसाधनज्ञानजनकत्वमादिना विचार्यत्वादिपरिग्रहः इति गुरवः।

स०न्न०— 'अरो रथाङ्गे चक्राङ्गे शीघ्रगामिनि किल्बिषे' इत्यभिधानं मनसि निधायाऽऽह **अरा दोषा इति**।

कुण्डल०— **नारा वेदादय इति**। नराणामिमे संबन्धिन इत्यर्थः। तस्येदमिति सूत्रात् अण्प्रत्यये सति आदिवृद्धिप्रवृत्तौ नारशब्दो निष्पन्नः। एवमेवोत्तरत्रापि नारशब्दो द्रष्टव्यः।

काशी०— तथाऽपि नारायणप्रणामानन्तरमुत्पन्नोक्तशङ्कया अव्यवधानेन परिहारायात्र तत्सूचनमित्याशयः। **गुणा इति**। निखिलपूर्णगुणा इत्यर्थः। गुणविशेषानुक्त्या दोषविरुद्धत्वोक्त्या च निखिलपूर्णगुणानामेव लाभात्। **तदयनत्वात्** तेषां मुख्याश्रयत्वात्। मुख्यत्वं च स्वाभाविकत्वेन। एवं च निखिलेत्यादेर्निखिलपूर्णगुणानामेकदेहं मुख्याश्रयमित्यर्थोऽवगन्तव्यः। **अराणामयनं न भवतीति**। यद्यपि दोषाभाववदर्थकनिर्दोषपदानुसारेण

अराणामभावो नारं तदयनत्वादिति व्याख्येयम्। तथाऽपि दोषध्वंसादिप्रतीतिनिरासाय दोषवदन्यत्वं व्याख्यातम्। निर्दोषपदं तु दोषात्यन्ताभाववत्त्वरूपफलितार्थपरमिति भावः। वाशब्दोत्तरं सर्वत्र नारायण इत्यस्यानुषङ्गो बोध्यः। नरशब्दात्संबन्ध्यर्थेऽण्प्रत्ययः। संबन्धश्चोपकारकत्वश्रोतव्यत्वादिरिति भावेनाह **उपकारित्वादिनेति**। **प्रतिपाद्यतयेति**। मुख्यप्रतिपाद्यतयेत्यर्थः। नराणामित्यस्वतन्त्रमात्रोपलक्षणम्। उद्भवाद्यष्टकवत्त्वात्साक्षान्नरग्रहणम्। यद्वा स्वतो रतिरूपत्वाभावात्प्रकृतिजीवजडा नरास्तेषामित्यर्थः। **नरसमूह इति**। समूहार्थेऽण्प्रत्ययः। अशेषविशेषत इत्येतच्च समूहवन्द्यत्वस्योपपादकमिति भावः। **नराणामयमधिपतिरिति**। ननु तस्येदमिति षष्ठ्यन्तादण्प्रत्ययो विहितः। षष्ठी च नाप्रधानवाचिनः शब्दात् द्वितीयो यद्यपि संबन्धः षष्ठ्युत्पत्तिः प्रधानत इति वचनात्। स्वस्वामिभावरूपस्य प्रधानाप्रधानसाधारणत्वेऽपि प्रधानवाचिन एव तदर्थकषष्ठी भवतीति तदर्थः। न चैवं श्रियः पतिरित्यादिप्रयोगानुपपत्तिः। तत्र पतित्वान्वयिनिरूपितत्वस्यैव षष्ठ्यर्थत्वेन स्वस्वामिभावार्थत्वाभावात्। तथाच कथं नारशब्दान्नराधिपतेर्बोधः। नरशब्दस्याप्रधानवाचित्वेन ततः षष्ठ्यनुपपत्तेः। अन्यथा प्रमेयदीपिकायां स्वभावोऽध्यात्ममुच्यत इत्यत्र स्वशब्दस्यात्मीयवाचित्वेऽपि जीवनियामकेश्वरस्योक्तवचनेनात्मीयपदार्थत्वानुपपत्त्या स्वपदस्य तत्परत्वप्रतिषेधविरोधादिति चेत्। सत्यम्। नात्र तस्येदमिति सूत्रानुशिष्टः स्वस्वामिभावार्थकषष्ठ्यन्तादण्प्रत्ययः किन्तु तस्येश्वर इति षष्ठ्यन्तादीश्वररूपार्थे विहितः। तथाच पार्थिव इत्यादाविवेश्वरत्वान्वयिनिरूपितत्वस्यैव षष्ठ्यर्थत्वान्नोक्तदोषः। न चैवं नराणामयमधिपतिरित्यत्रायमित्यस्य वैयर्थ्यम्। ईश्वर इत्येव च वक्तुमुचितमिति वाच्यम्। अयमित्यस्यावान्तरेश्वरत्वज्ञापनार्थत्वात्। तच्च न राजादेरिवागन्तुकम्। किन्तु अत एव चानन्याधिपतिरिति सूत्रसूचितं स्वाभाविकमेवेति विभावयितुमधिपतिपदोपादानात्। यद्वा। मम प्रियतममित्यनेनास्यैकार्थत्वघटनायोक्तमयमिति आचार्य इत्यर्थः। छप्रत्ययश्च नेश्वरार्थे विहित इति नेश्वरस्यात्मीयपदार्थत्वमिति प्रमेयदीपिकाभिप्रायः। न चात्मोपकारकत्वेनात्मसंबन्धित्वादात्मीयपदार्थत्वमीश्वरस्य दुर्वारमिति वाच्यम्। षष्ठ्या यस्मिन्न प्राधान्यं ज्ञाप्यते तद्वाचिनः षष्ठी नेत्यङ्गीकारात्। उपकारकत्वबोधकषष्ठ्याऽप्युपकार्यस्याप्राधान्यज्ञापनात्। न चैवमुपकारित्वादिना नराणामिमे नारा इत्यस्यानुपपत्तिरिति वाच्यम्। वेदानामुपकारकरणत्वात्। करणस्य च प्राधान्यानियमेन तत्र तदज्ञापनेनोपकार्येष्वप्राधान्यस्याप्यज्ञापनादित्यवधेयम्। परमेत्यस्य सदेत्यादिरिति निर्वचनं निखिलेत्यादिविशेषणक्रमेणावगन्तव्यमित्यर्थः। (अत्र तस्येति षष्ठ्यन्तार्थमुख्यवायुनिरूपितत्वस्य प्रेमास्पदतयेति तृतीयान्तार्थप्रीतिविषयत्वाभेदस्य तदवच्छिन्नत्वस्य वाऽऽश्रयत्वरूपायनत्वेऽन्वयः। एवं च नारायण इत्यत्र नारपदार्थस्यायनपदार्थतावच्छेदकेऽन्वयः। एतत्सूचनायैव तस्येति व्यस्तप्रयोग इत्याहुः।)

गूढ०— तत्र प्रथमविशेषणोक्तं नारायणपदार्थमाह **अरा दोषा इति**। निर्दोषमित्यनेनोक्तमर्थमाह **अराणामिति**। सुवाक्यैरित्यनेनोक्तमर्थमाह **उपकारित्वादिनेति**। तस्येदमित्यण्। तस्येत्यनेनोक्तमर्थमाह **नराणामिति**। अत्रापि तदर्थे अण्। अशेषेत्युक्तमर्थमाह **नरेति**। **तस्य समूह इति**। समूहेऽर्थे अण्। प्रियेत्युक्तार्थमाह **नराणामिति**। अत्रापीदमर्थे अण्।

॥ सकलशास्त्रार्थसङ्क्षेपकरणा विशेषणानां व्याख्यानम् ॥

१४ सु०— अथवा श्रोतृबुद्धयनुकूलनाय सकलशास्त्रार्थं सङ्क्षेपतः अनेनाचष्टे । विदितसङ्क्षेपा हि प्रपञ्चं जिज्ञासवो भवन्ति ।

परि०— ननु बुद्धिचातुर्येण नानाप्रकारेण नारायणपदस्य निर्वचनसंभवेऽप्येवंरूपेणैव तत्रापि एतावद्भिरेव निर्वचनैर्नारायणस्तुतौ न प्रबलहेतुं पश्यामः, श्रोतृबुद्धयानुकूल्यादिप्रयोजकस्यैवादौ अवश्य-वक्तव्यत्वात्; इत्यतो वा 'व्याख्यां करोमी'तिवक्ष्यमाणवर्तमाननिर्देशघटनाय वा योजनान्तरमाह **अथवेति ॥ प्रपञ्चं जिज्ञासव इति ।** 'सनाशंसभिक्ष उरि'त्युप्रत्ययान्तजिज्ञासुपदप्रयोगे 'न लोका-व्ययनिष्ठाखलर्थतृनामि'ति षष्ठीनिषेधाद् द्वितीयोक्ता । प्रपञ्चविषयकजिज्ञासावन्तो भवन्तीत्यर्थः ॥

यादु०— शास्त्रोत्पादकमङ्गलोपयुक्तार्थप्रतिपादनापेक्षया शास्त्रार्थकथनमनीवान्तरङ्गमित्याशयेनाह अथवा श्रोतृबुद्धीति।

वं०प०— श्रोतृबुद्धयनुकूलनाय वक्ष्यमाणग्रन्थार्थविषयीकरणाय । **प्रपञ्चो** विस्तारः ॥

आनन्दः— श्रोतृबुद्धिव्याकुलतापरिहारायाध्यायचतुष्टयप्रतिपाद्यार्थपरत्वेनापि विशेषणानि योजयति **अथवेति** । ननु सकलशास्त्रार्थस्यादावेव कथनेन प्रतिपाद्यानवशेषादग्रे ग्रन्थकरणायोग इत्यत उक्तं **संक्षेपत इति** । अग्रे प्रपञ्चस्य क्रियमाणत्वान्न प्रतिपाद्यानवशेष इति भावः । नहि प्रपञ्चेनैव कथनमस्तु किं संक्षेपेण कथनेन प्रयोजनमित्यत आह **विदितेति** ।

वा०चं०— एवं शास्त्रार्थव्याख्यानहेतूनिरूपतया श्लोको व्याख्यातः । इदानीं तु शास्त्रार्थमेवानेनाचष्ट इत्याह **अथवेति** । श्रोतृबुद्धयनुकूल्नायेत्येतद्विशदयति **विदितेति** ।

वा०र०— शास्त्रार्थव्याख्यानहेतूक्तीति । परमाख्यविद्येति पदव्यावर्त्यशङ्काकथनावसरे अथातो ब्रह्मजिज्ञासेत्यादिकं ग्रन्थं व्याख्यातुमयं देवतादिप्रणाम इत्युत्तरमूलेऽभिधानात् शास्त्रार्थव्याख्यानहेतुभूतमङ्गलोक्ति-परतयेत्यर्थः । वक्ष्यति च ननेर्यच्छास्त्रार्थव्याख्यानार्थत्वमित्यनुपदमेव मङ्गलोक्तित्वं च मङ्गलोपनिबन्धत्वोक्तावपि घटते । कायिकादिमङ्गलस्योपनिबन्धनार्हत्वेऽपि वाचनिके तस्मिन्नाचरणार्हत्वस्यापि सत्त्वेन नागायणमित्यादेः वाचनिकमङ्गलाचारत्वेऽपि शात्यर्थं प्रणीतकुल्याभिः पान्त्वपिपासुभिः पानीयं पीयत इत्यादेर्दर्शनेन मङ्गलोप-निबन्धत्वस्याविरोधात् । उक्तं च मीनाति मिनोति दीङां त्यपि चेति षष्ठाद्यसूत्रीयमहाभाष्ये अन्यार्थमपीत्यादि । अनेनानुषङ्गिकशिष्यशिक्षायाः सिद्धमित्यभिप्रायेण शिष्यान् ग्राहयितुं इत्यस्याप्युपपत्तिः । उपनिबन्धत्वरूप-रूपान्तराश्रयणात् तेन वा तस्योपपत्तिरिति सूचितम् । अत एवोत्तरग्रन्थावतारमूले तदाचरणपुरःसरं इत्युक्तोऽपि

शिष्यशिक्षायै चैतत् ग्रन्थे निवेशनमित्युक्तम्। तेन जानीमो न मूलकृतः उपनिबन्धत्व एव भर इति। किन्तूक्तरीत्यादिना वाचनिकांशेति आचाररूपत्वेऽपि इति। अत एव मङ्गलाचरणस्यावश्यकत्वादिकं तत्त्वप्रकाशिकादावुक्तम्। अत्रापि अन्तिमश्लोकावतारावसरे आचरतीत्येव व्यवहरिष्यति। वक्ष्यति च टीकाकृत् मङ्गलस्यानुष्ठाननंतरेवानुष्ठानं इत्यादि। उपपादितं चैतत् प्राक्। यत्तु अन्यथाख्यातौ शेषपूरणादिनोपनिबध्नाति इत्यस्य योजनं तदुपनिबन्धत्वमात्ररूपभ्रान्तिमूलमिति प्रागेवोक्तम्। श्लोकपदं विशेषणसमुदायपरं इति प्रागेवोक्तम्। **शास्त्रार्थमेवेति** मूलम्। तत्कथनस्यावश्यकतया तत्परतया योजनाया एव स्वारस्यादित्याशयः। प्रथमश्लोके सङ्क्षेपेण शास्त्रार्थकथनेऽपि प्रपञ्चार्थं उत्तरग्रन्थस्यावश्यकत्वात् न वैयर्थ्यमित्याशयेन मूले **सङ्क्षेपत** इत्युक्तम्। **श्रोतृबुध्यनुकूलनायेत्येतत् इति**। तर्हि प्रपञ्चस्यादावस्तु किं सङ्क्षेपेणेत्यतः श्रोतृबुद्ध्यनुकूलनायेत्यनेन सूचितं सङ्क्षेपस्य प्रपञ्चार्थत्वं सहेतुकं उपपादयति इत्यर्थः।

स०न्न०— शास्त्रपरिसमाप्तिकारकमङ्गलोपयुक्तार्थप्रतिपादनापेक्षया शास्त्रार्थकथनमतीवान्तरङ्गमित्याशयेनाह **अथवा श्रोतृबुद्धीति** ॥

वि०— सङ्क्षेपतः शास्त्रार्थकथनहेतुमाह **विदितसङ्क्षेपा हीति**। हिर्हेतौ।

चषक:— शास्त्रार्थभूतनारायणाभिधायकपदविवरणरूपता अतः शास्त्रार्थाभिधायकता श्रेयसीत्याशयेन कल्पान्तरमनुधावति **अथवेति**। सङ्क्षेपप्रपञ्चशब्दौ कर्मसाधनघञन्तौ सङ्क्षिप्तप्रपञ्चनीयार्थतात्पर्यकौ। भावसाधनघञन्तनामाश्रित्यापि 'सनाशंसे'ति विहित-उप्रत्ययान्तसमभिव्याहारे 'न लोके'ति षष्ठीप्रतिषेधात् 'सुपो धात्वि'ति लुप्तद्वितीयोपस्थापिता या प्रपञ्चनक्रियाविशेषितकर्मता तन्निरूपकजिज्ञासाश्रया इति व्याचख्युः।

का०शी०— शिष्यावधानायादौ शास्त्रार्थसूचनस्यावश्यकत्वे तत एव लक्षणादेरपि लाभसंभवात्तदेव युक्तमित्यालोच्य कल्पान्तरमाह **अथवेति**। विशिष्यसमन्वयाद्यप्रतीतेः सङ्क्षेपत इत्युक्तम्। विस्तरेण सङ्क्षेपस्य गतार्थत्वशङ्कावारणायोक्तं **श्रोतृबुद्धीति**। श्रोतृणामन्तःकरणस्य वैशद्येन शास्त्रार्थ एव जिज्ञासावत्त्वसंपादनायेत्यर्थः। एतदेवोपपादयति **विदितेति**। ज्ञात एव जिज्ञास्यत्वादौ तदुपपादकजिज्ञासाद्युदयादिति भावः।

गू०— श्रोतृबुद्धिव्याकुलतापरिहारायाध्यायचतुष्टयप्रतिपाद्यार्थपरत्वेनापि विशेषणानि योजयति **अथवेति**। ननु सकलशास्त्रार्थस्यादावेव कथनेन प्रतिपाद्यानवशेषादग्रे ग्रन्थकरणायोग इत्यत उक्तं **सङ्क्षेपत इति**। अग्रे प्रपञ्चस्य क्रियमाणत्वान्न प्रतिपाद्यानवशेष इति भावः। तर्हि प्रपञ्चेनैव कथनमस्तु किं सङ्क्षेपेण कथनेन प्रयोजनमित्यत आह **विदितेति**।

प्रदीप:— श्लोकस्य चतुर्थं व्याख्यानमाह **अथवेति**।

प्रथमाध्यायार्थसङ्क्षेपकतया व्याख्यानम्—

१५ सु०— तत्र 'सदा वन्द्यमि'ति प्रथमसूत्रार्थोक्तिः । मनोवृत्तेस्तत्प्रवणता हि वन्दनम् । जिज्ञासाऽपि तद्विशेष एव । तस्य जीवादिव्यावृत्तये यद् ब्रह्मेत्युक्तं तस्यार्थो निखिलेति । तदुपपादनाय द्वितीयसूत्रे लक्षणमभिहितम् । तदाह अस्येति । तृतीयसूत्रेण तत्र शास्त्रं प्रमाणमभिधाय तस्याध्यायशेषेण तद्विषयतोपपादिता, तत्कथनम् आप्यतममिति ।

परि०— तत्र शास्त्रमिति । ब्रह्मशब्दार्थरूपगुणपूर्णत्वे तदुपपादकजगज्जन्मादिहेतुत्वलक्षणे चेत्यर्थः । तेन, भाष्ये आद्यद्वितीयसूत्रार्थयोः मध्ये तृतीयसूत्रार्थोक्तिः पूर्वोत्तरयोरन्वयेन द्वयोरपि शास्त्र-प्रमाणकत्वसूचनायेत्युक्तं भवति ॥ सन्न्यायरत्नावलीनयचन्द्रिकयोस्तु निखिलेत्यादिविशेषणचतुष्टयं क्रमादध्यायचतुष्टयार्थोक्तिपरमित्युक्तम् ॥

यादु०— ननु करशिरःसंयोगादेव वन्दनत्वात्कथं वन्द्यमित्यनेन प्रथमसूत्रार्थजिज्ञासोक्तिरित्यत आह **मनोवृत्तेरिति । तत्प्रवणतेति ।** मत्तस्त्वमुत्कृष्ट इति स्वावधिकमुत्कर्षविषयकतेत्यर्थः । ततश्च करशिरःसंयोगा-दावुक्तभगवद्विषयकमनोवृत्तिविशेष एव वन्दनम् । तच्च सदा क्रियमाणमुपासनारूपमेव पर्यवस्यति । अत एव सदेत्यस्यात्रोत्तरत्र चान्वय उक्त इति भावः ॥ नन्वेवमपि वन्दनं न मननाख्यजिज्ञासेत्यत आह **जिज्ञासाऽपीति । तद्विशेष एव** मनोवृत्तेस्तत्प्रवणताविशेष एव । भगवदुत्कर्षविषयकमननरूपमनोवृत्तिविशेष एवात्र विवक्षित-जिज्ञासेति यावत् । 'सोपासना च द्विविधे'त्यादिवचनादिति भावः । तथाच सामान्यवाचकेन वन्दनेन तद्विशेषरूपा जिज्ञासा लक्ष्यत इति भावः ।

वं०प०— तस्य जीवादीति । मनोवृत्तिप्रवणतालक्षणजिज्ञासारूपवन्दनस्य जीवादिविषयकत्वव्यावृत्तय इत्यर्थः ।

आनन्दः— नन्वेतेषु विशेषणेषु केनापि विशेषणेन जिज्ञासादिरूपप्रथमसूत्रार्थस्यानुक्तत्वात् कथमेषां तदर्थकथनपरत्वमित्यत आह **तत्रेति । ननु जिज्ञासाया वन्द्यमित्यनेनोक्तिः कथमित्यत आह मनोवृत्तेरिति ।** न च वन्दनस्य मनोवृत्तेस्तत्प्रवणतारूपत्वकथनमयुक्तम् । वन्दनस्य कायिकादिरूपत्वेन तत्प्रवणतारूपत्वाभावात् । किञ्च श्रवणमननादेरपि तत्प्रवणतारूपत्वात्तस्यापि वन्दनरूपत्वं स्यात् । न हि तस्य वन्दनरूपत्वव्यवहारः । तथा च कथमेतदिति वाच्यम् । यत्र वन्दनं तत्र मनोवृत्तेस्तत्प्रवणताया अपि सत्त्वेन तथोक्तत्वात् जिज्ञासाया-स्तत्प्रवणताविशेषरूपत्वेन वन्दने च तत्प्रवणताविशेषसत्त्वेन तत्प्रवणतारूपसामान्यैक्यमादाय वन्दनशब्देन जिज्ञासाग्रहणमपि युक्तमित्यवधेयम् ।

कं०रा०— तत्प्रवणतेति । भक्त्यतिशयेन भगवद्विषयकतेत्यर्थः । **तद्विशेष इति** । मनोवृत्तेस्तत्प्रवणताविशेष इत्यर्थः । तथा च वन्द्यमिति मनोवृत्तेर्भगवत्प्रावण्यरूपवन्दनोक्त्या मनोवृत्तेस्तत्प्रवणता विशेषरूपा प्रथमसूत्रार्थभूतजिज्ञासाऽप्युक्ता भवतीति भावः । **ब्रह्मेत्युक्तमिति** । सूत्र इति शेषः । **तस्येति** । शास्त्रस्येत्यर्थः ।

श्रीनिधि०— जिज्ञासापि तद्विशेष इति । यद्यपि जिज्ञासाया युक्त्यनुसन्धानरूपत्वात् । प्रवणतायाश्च भगवदुत्कर्षस्थितिपूर्वकप्रेमरूपत्वात् न तद्विशेषत्वम् । तथापि जिज्ञासाफलमादाय तद्विशेषत्वोक्तिरिति बोध्यम् । अभ्यासादिना आनन्दमयादेर्विष्णुत्वादिकेऽवगते तस्मिन् संपूर्णानन्दत्वादिना सर्वोत्कर्षस्मृतिः ततः प्रेमेति जिज्ञासाफलं भवति । प्रवणताविशेषः विचारादिप्रयोज्यत्वेन तद्विशेषत्वं च वर्तमानसामीप्यात् वर्तमानव्यपदेश इति ।

वा०चं०— मनोवृत्तेरिति । मनोवृत्तिप्रावण्यपूर्वक(करादि)कायिकादिव्यापार एव लोकेऽपि वन्दनव्यवहारात् प्राप्ताप्राप्तविवेकेन तस्यैव वन्दनत्वमिति भावः ।

वा०र०— मनोवृत्तिप्रावण्येत्यादि । मनोवृत्तिप्रावण्यपूर्वकत्वमननुसन्धाय करशिरःसंयोगादिस्तत्र वन्दनव्यवहाराभावात् तत्पूर्वककायिकादिव्यापार एव च तद्व्यवहारात् विशिष्टस्यैव वन्दनत्वे वाच्ये प्राप्ताप्राप्तविवेकेन जिज्ञासासाधारणमनोवृत्तिप्रावण्यस्यैव वन्दनरूपत्वादिना ध्यानं गृह्यते । **सोपासना च द्विविधेति** वक्ष्यमाणरीत्या श्रवणध्यानरूपोपासनायाः कर्तव्यत्वस्य प्रतिपादयिष्यमाणत्वादिति भावः ।

स०व्र०— ननु करशिरःसंयोगादेरेव वन्दनत्वात्कथं वन्द्यमित्यनेन प्रथमसूत्रार्थजिज्ञासोक्तिरित्यत आह मनोवृत्तेरिति । कायिकादौ भगवद्विषयकमनोवृत्तिपूर्वकत्वाभावे न नमस्कारत्वम्, अत आवश्यकत्वात् भगवद्विषयकमनोवृत्तिरेव वन्दनमिति भावः ॥ **तद्विशेष एवेति** । तथाच सामान्यशब्दस्य विशेषे पर्यवसानेनोक्तार्थप्राप्तिरिति भावः ॥

कुण्डल०— तत्प्रवणतेति । उत्कृष्टतया वन्दनीयवस्तुविषयीकारिकेत्यर्थः । **जिज्ञासापीति** । श्रवणमननिदिध्यासनरूपा वा मननरूपा वा जिज्ञासा वन्दनशब्दितसर्वोत्तमत्वप्रकारकभगवद्विषयकचित्तवृत्तिविशेष एवेत्यर्थः । यद्वा जिज्ञासाऽपि तद्विशेष एव मनोवृत्तेस्तत्प्रवणताविशेष एवेत्यर्थः । करशिरःसंयोगादिकं तु त्वत्तोऽहमपकृष्टो मत्तस्त्वमुत्कृष्ट इत्याद्यनुसन्धानादिरूपवन्दनद्योतकमेव । न तु मुख्यवन्दनमिति भावः । **तस्येति** । वन्द्यस्य नारायणस्येत्यर्थः ।

विट्ठ०— मनोवृत्तेरिति । परमात्मा मम स्वामी सर्वोत्तमो गुणपूर्णः अहं तस्य दासः इति मनोवृत्तेस्तत्प्रवणता हि वन्दनम् । जिज्ञासाविचारः । विचारो नाम एवंविधलिङ्गादत्र विष्णुरेवोच्यते स तु सर्वविलक्षणः सर्वस्य स्वामीत्येवमादियुक्त्यनुसन्धानात्मकमनोवृत्तिविशेष एव । अतः सदा वन्द्यमिति जिज्ञासाशब्दार्थ इत्यर्थः । तस्यायं सङ्ग्रह इति । प्रियतममित्यनेन भक्तिः अशेषान्विशेषान् विहायेत्यनेन वैराग्यम् आप्यतममित्यनेन श्रवणादिना ज्ञातव्यत्वं ज्ञातव्यत्वेन च साक्षात्कारार्थमेव वैराग्यभक्तिश्रवणाद्युपासनं चेति ज्ञायत इति ।

चक्रकः— कर्मसाधनकृत्यप्रत्ययान्तवन्दतिनिर्देशेन प्रथमसूत्रार्थाभिहितिं सङ्कटयति **मनोवृत्तेरिति** । **तत्प्रवणतेति** । स्वावधिकभागवतोत्कर्षविषयकतेत्यर्थः । तथाच करशिरःसंयोगादौ तादृशोत्कर्षविषयकमनोवृत्ति-पूर्वकत्वप्रतिसन्धानाभावदशायां त्युङन्तवन्दतिनिर्देशाभावेन 'नागृहीतविशेषणा धीर्विशिष्टमवगाहत' इति न्यायेन विशेषणीभूतावश्यकतादृशमनोवृत्तिविशेष एव वन्दतिनिर्देश्यतोपेयत इति भावः ॥ **तद्विशेष एवेति** । तथाच वन्द्त्यभिधेयचेतोवृत्तिविशेषस्य यदुपादानं तदुपादेयत्वसंबन्धाद्वन्दतिना जिज्ञासालक्षणया प्रत्याय्यत इति भावः ॥ **तस्य संभाव्यसंभावकतापन्नलक्षणद्वयवैशिष्ट्यस्य । अध्यायशेषेणेति** । समन्वयनयमारभ्याध्यायसङ्कत्यूरीकृतेरिति भावः । **तद्विषयता** शास्त्रनिरूपितविषयता ।

काशी०— **तत्रेति** । शास्त्रार्थमध्ये निखिलेत्यादिविशेषणमध्य इति वाऽर्थः । ननु वन्दनस्य जिज्ञासा-त्वाभावात्कथं वन्द्यमित्यनेन प्रथमसूत्रार्थोक्तिरित्यत आह **मनोवृत्तेरिति** । चिदचित्साधारणमनोव्यक्तज्ञानस्ये-त्यर्थः । तेन मुक्तबन्धत्वोपपत्तिः । तत्प्रवणता तत्र स्वावधिकोत्कर्षविषयीकारित्वम् । वन्दनं वन्दनव्यवहारविषयः । मत्तोऽयमुत्कृष्ट इति मनोवृत्तौ तत्पूर्वकवाक्कायव्यापारे च वन्दनव्यवहारादिनि भावः । ततः किमत आह **जिज्ञासा-ऽपीति** । प्रकृतजिज्ञासाऽपि मननरूपतदुत्कर्षविषयीकारिमनोवृत्तिविशेष एवेत्यर्थः । तथाच सामान्यवाचकेन वन्दतिना तद्विशेषरूपजिज्ञासा लक्ष्यत इति भावः । सामान्यशब्दप्रयोगश्च सामान्यन्याय्यपि कर्तव्यताज्ञापनार्थः । अत्र वन्द्यमित्यनेनैव जिज्ञास्यत्वरूपप्रथमसूत्रार्थलाभात्सदापदान्वयो निरर्थक इति न शङ्क्यम् । 'आवृत्ति-रसकृदुपदेशादि'त्यादिसूत्रानुसारेण सन्ततजिज्ञास्यत्वस्यैव प्रथमसूत्रनिष्कृष्टार्थत्वात् । यद्वा । सदाशब्दस्य नित्यशब्दवन्नियमार्थत्वादथातःशब्दोक्तविशिष्टाधिकारिकत्वादिरूपजिज्ञासाकर्तव्यत्वनियमप्रयोजकविशेषणलाभाय तदुक्तिः । एवं च जिज्ञासारूपवन्दनस्यैव तादृशविशेषणवत्त्वाद्धातोरलाक्षणिकत्वेऽपि न क्षतिरिति ध्येयम् । **तस्येति** । जिज्ञास्यत्वस्येत्यर्थः । जीवादीत्यादिना प्रकृतिपरिग्रहः । **निखिलेतीति** । बृहत्यर्थगुणवृद्धेः सङ्ख्यापरिमाणाभ्यां विवक्षितत्वादिति भावः । न चैकदेहशब्दवैयर्थ्यम् । निखिलपूर्णगुणत्वमात्रस्य ब्रह्मशब्दार्थत्वादिति वाच्यम् । उक्तरीत्या तत्पुरुषाश्रयणात् । वस्तुतो निखिलान्तर्गतसौन्दर्यादिगुणोपपादकस्याप्राकृतगुणदेहवत्त्वस्य प्रकाशव-त्वेत्यादिसूत्रोक्तस्याप्यत्र विवक्षितत्वान्न दोषः । **तदुपपादनायेति** । जिज्ञास्यस्य परब्रह्मत्वोपपादनायेत्यर्थः । **तत्रेति** । ब्रह्मशब्दोक्तगुणपूर्णत्वे जन्मादिहेतुत्वे चेत्यर्थः । **तस्य शास्त्रस्य । तद्विषयता** उक्तलक्षणब्रह्मविषयता । **अध्याय-शेषेणेति** । चतुर्थसूत्रेणोपक्रमादिरूपसाधकोक्त्या पञ्चमसूत्रेणावाच्यत्वरूपबाधकनिरासेन च सामान्यत उत्तराधिकरणैश्च समन्वयविवरणपरैर्विशेषतश्चोपपादितेत्यर्थः । यद्यप्यानन्दमयाधिकरणमारभ्यैवाध्यायत्वादध्याय-शेषेणेत्यसङ्गतम् । अध्यायरूपशेषेणेत्यर्थः पुनरिह न युज्यते । समन्वयेक्षत्यधिकरणयोरसङ्ग्रहेण सकलशास्त्रार्थमिति प्रतिज्ञाविरोधात् । तथाऽपि पञ्चाधिकरण्यामध्यायपादपीठत्वेनाध्यायादिव्यवहारमध्यायसहितशेषेणेत्यर्थं वाऽभिप्रेत्य तथोक्तम् । **आप्यतममिति** । अप्यखिलैः सुवाक्यैरशेषविशेषत इत्यन्तग्रहणम् । अशेषासाधारणतात्पर्यलिङ्ग-वत्त्वात्सकलसच्छास्त्रमुख्यप्रतिपाद्यमिति तदर्थः । **तमिति** तत्तात्पर्यार्थमित्यर्थः । तेन प्रथमाध्यायार्थे समन्वये

तत्साध्यगुणपूर्णत्वादौ च शङ्किता ये युक्त्यादिविरोधरूपा दोषास्तन्निरासस्य निर्दोषपदेनाविवक्षितत्वेऽपि न क्षतिः। यद्वा। समन्वयादौ या युक्त्यादिविरोधशङ्का तत्प्रसञ्जितपारतन्त्र्यादिदोषनिरासो योऽभिहितस्तमित्यर्थः।

गूढ०— नन्वेतेषु विशेषणेषु केनापि विशेषणेन जिज्ञासादिरूपप्रथमसूत्रार्थस्यानुक्तत्वात् कथमेषां तदर्थकथनपरत्वमित्यत आह **तत्रेति**। ननु जिज्ञासायाः वन्द्यमित्यनेनोक्तिः कथमित्यत आह **मनोवृत्तेरिति**। न च वन्दनस्य मनोवृतेरस्तत्प्रवणतारूपत्वकथनमयुक्तम्। वन्दनस्य कायिकादिरूपत्वेन तत्प्रवणतारूपत्वाभावात्। किञ्च श्रवणमननादेरपि तत्प्रवणतारूपत्वात्तस्यापि वन्दनरूपत्वं स्यात्। न हि तस्य वन्दनरूपत्वव्यवहारः। तथाच कथमेतदिति वाच्यम्। यत्र वन्दनं मनोवृत्तेरस्तत्प्रवणताया अपि सत्त्वेन तथोक्तत्वात्। जिज्ञासायास्तत्प्रवणताविशेषरूपत्वेन वन्दने च तत्प्रवणताविशेषसत्त्वेन तत्प्रवणतारूपसामान्यैक्यमादाय वन्दनशब्देन जिज्ञासाग्रहणमपि युक्तमित्यवधेयम्।

प्रदीप:— ननु वन्दनस्य मननाख्यजिज्ञासात्वाभावात् कथं प्रथमसूत्रार्थता इत्यत उक्तम् **मनोवृत्तेरिति**।

द्वितीयाध्यायार्थसङ्क्षेपकतया व्याख्यानम्—

१६ सु०— प्रथमाध्यायार्थे शङ्कितदोषनिरासो द्वितीयेऽभिहितस्तमाह निर्दोषमिति।

परि०— निर्दोषमितीति। एतदपि शास्त्रप्रमाणसिद्धमिति सूचनाय तृतीयसूत्रार्थोक्तेः पूर्वं निवेशितमिति भावः। प्रियतमस्यैवाप्यतमत्वात् प्रियतममित्यस्यैवाप्यतममित्यर्थमुपेत्य वा आप्यतमम् इत्यत्राप्यनुवर्तत इति भावेन वा प्रियतममाप्यतममित्युक्तम्। अनुवृत्तिपक्षे प्रियतमत्वाज्ज्ञातव्यमिति हेतुगर्भं बोध्यम्। मनसाऽऽप्यत्वस्य ज्ञातव्यत्वानतिरेकात्।

कं०रा०— प्रथमाध्यायार्थ इति। प्रथमाध्यायप्रतिपाद्ये जगत्कारणत्वादिगुणके ब्रह्मणि युक्त्यादिभिः समन्वयविरोधमुखेन शङ्कितानां दोषाणां निरासो द्वितीयाध्याये विहितः। तमर्थमाह निर्दोषमित्यनेनेत्यर्थः।

कुण्डल०— प्रथमाध्याय इति। प्रथमाध्यायेन प्रतिपादिते नारायणाख्यपरब्रह्मणः जगज्जन्मादिकारणत्वप्रमुखानन्तकल्याणगुणपरिपूर्णत्वरूपेऽर्थे विषये युक्तिसमयादिभिः श्रुतिसमन्वयविघटनमुखेन शङ्कितदोषनिरास इत्यर्थः।

तृतीयाध्यायार्थसङ्ग्रहकत्वेन व्याख्यानम्—

१७ सू०— एवं ब्रह्मस्वरूपे सिद्धे, अधिकारिणस्तत्प्रसादसाधनोपायभूततत्साक्षात्कारजननाय वैराग्यभक्तिभ्याम् अखिलवेदार्थश्रवणादि तृतीये निरूपितम् । तस्यायं सङ्ग्रहः अशेषविशेषतोऽपि प्रियतमम् आप्यतममिति । त्यब्लोपनिमित्ता पञ्चमी । अशेषान् विषयविशेषान् विहाय ज्ञातव्यतममिति । 'इयदामननादि'त्याद्यर्थसूचनं ममेति ।

परि०— ननु प्रियतममित्यनेन भक्तेर्लाभेऽप्यशेषेत्यनेन कथं वैराग्यलाभ इत्यत आह **त्यब्लोपेति** । पञ्चमीविधाने 'त्यब्लोपे कर्मण्युपसङ्ख्यानमि'ति वार्तिके त्यबन्ताप्रयोगे तदर्थे गम्यमाने त्यबन्तं प्रति कर्मकारके पञ्चमी वाच्येत्युक्तत्वादिति भावः ॥ तर्हीश्वरज्ञानस्य सर्वसदधिकारित्वान्ममेति व्यर्थमित्यत आह **इयदिति** । उपासनापादे 'इयदामनना'दित्यधिकरणे उपासनाधिकारिणामियदेतावत् मुख्यप्राणावधित्वमेव । 'प्राणो वाव सर्वेभ्यो भूयान्' इत्यामननादिति प्राणस्य सर्वाधिकार्युत्तमत्वोक्तेर्ग्रन्थकृतश्च प्राणावतारत्वान्ममेति युक्तमित्यर्थः ॥ आदिपदेन 'त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठा'दित्यादेः प्राणोत्तमत्वपरस्य परिग्रहः ।

वादु०— अखिलवेदार्थश्रवणादीति । 'सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषादि'त्यादिनोपासनापादे सर्ववेदार्थश्रवणमननिदिध्यासनानि निरूपितानीत्यर्थः ॥ नन्वशेषविशेषतोऽपि प्रियतममिति भक्तिरुक्ताऽस्तु । अशेषात्स्वात्मार्मीयसमस्तवस्तुनो विशेषेण प्रियतममिति वैराग्योक्तिस्तु कथमागतेत्यपेक्षयामाह **त्यब्लोपेत्यादिना** । 'त्यब्लोपे कर्मण्यधिकरणे च पञ्चमी वक्तव्ये'ति वार्तिकादिति भावः ॥ **ममेतीति** । 'इयदामननादि'त्यत्र प्राणस्याधिकार्युत्तमत्वकथनात्, भाष्यकारस्य च तदवतारत्वादिति भावः ।

वं०प०— ननु कथमनेन वैराग्यस्य साक्षात्कारसाधनत्वं सङ्गृहीतमित्यतोऽशेषविशेषत आप्यतममित्येतद्व्याचष्टे अशेषानिति । आप्यतममित्यस्यार्थो **ज्ञातव्यतममिति** । **आप्तिः** अवगतिः । गत्यर्थानां ज्ञानार्थत्वात् । साक्षात्कर्तव्यतममित्यर्थः । **प्रियतममिति** । प्रीतिविषयत्वकथनेन भक्तिरुक्तेति द्रष्टव्यम् ।

आनन्दः— विषयविशेषान्विहाय इत्यनेन वैराग्योक्तिः । ज्ञातव्यं इत्यनेन श्रवणोक्तिः ।

कं०प०— त्यब्लोपेति । त्यब्लोपे कर्मण्यधिकरणे च पञ्चमी वक्तव्येति त्यब्लोपनिमित्तायाः कर्मणि पञ्चम्या अनुशासनेनाशेषविशेषत इत्यस्याशेषान्विषयविशेषान्विहाय इत्यर्थाश्रयणाद्विषयवैराग्यलाभेन प्रियतममिति प्रीत्यपरपर्यायस्नेहविषयत्वकथनेन भक्तिलाभादाप्यतमं ज्ञातव्यतममित्यर्थाश्रयणेन भगवत्साक्षात्कारजनकश्रवणमननादिरूपज्ञानलाभाच्च अशेषविशेषतोऽपि प्रियतममाप्यतममिति तृतीयाध्यायार्थसङ्ग्रह इति भावः । **इयदिति** ।

इयदामननादित्यत्र मुख्यप्राणस्याधिकार्युत्तमत्वं प्रतिपादितम् । तन्मम प्रियतममिति विशेषनिर्देशेनाधिकार्युत्तमस्य मम प्रियतममित्यर्थलाभात्सूच्यत इति भावः ।

वा०चं०— 'पञ्चमीविधाने ल्यब्लोपे कर्मण्यधिकरणे चोपसङ्ख्यानमि'त्यतो ल्यबन्तलोपेऽत्र कर्मणि पञ्चमीत्याह ल्यब्लोपेति ॥ (ल्यबन्तस्य गम्यमानार्थत्वादप्रयोगे इत्यर्थः । 'ल्यब्लोपे कर्मण्यधिकरणे चे'ति वार्तिकस्यायमर्थः 'ल्यबन्ताप्रयोगे तदर्थे गम्यमाने ल्यबन्तं प्रति कर्मकारकेऽधिकरणकारके च पञ्चमी वाच्ये'ति ॥ प्रासादात्प्रेक्षते, आसनात्प्रेक्षते । प्रासादमारुह्य, आसने उपविश्य, प्रेक्षत इत्यर्थः ॥ श्वशुराज्जिहेति । श्वशुरं वीक्ष्य इत्यर्थः ॥ गम्यमानापि क्रिया कारकविभक्तीनां निमित्तम् । कस्मात्त्वम् । नद्याः ।)

वा०र०— पञ्चमीविधान इति । ल्यब्लोपकर्मणीत्युपसंख्यानस्य पञ्चमीविषयत्वोपपादनाय पञ्चमी-विधाने इत्युक्तम् । पञ्चमीविधानप्रकरणेत्यर्थः । **ल्यबन्तलोपेऽत्रेति** । ल्यबन्तगम्यमानार्थतया प्रयोगाभाव एव ल्यबन्तलोपो विवक्षितः । तस्मिन् सति **ल्यबन्तस्य कर्मणि अधिकरणे** च पञ्चमीति वार्तिकार्थात् प्रासादात् प्रेक्षते इत्यत्र प्रासादं आरुह्य प्रेक्षत इति **ल्यबन्तकर्मणि, आसनात् प्रेक्षते** इत्यत्र चासने उपविश्य प्रेक्षत इति तदधिकरणत्वं विहायेति ल्यबन्तस्य **गम्यमानार्थतया प्रयोगाभावात् तल्लोपे ल्यबन्तकर्मणि** विशेषे पञ्चमीत्यर्थः । **इत्याहेति**। अशेषात् स्वात्मात्मीयसमस्तवस्तुनो **विशेषेण प्रियमित्येवमनेन** भक्तिसङ्ग्रहवत् अशेषविशेषतः इत्यंशेनैव व्यावृत्तेनाशेषान् विशेषान् विहायेत्युक्तप्रकारेण **वैराग्यमपि सङ्गृह्यते** एवेति न तत् सङ्ग्रहानुपपत्तिः इत्याहेत्यर्थः । श्रवणादिलाभाय प्रागाप्यतममित्यंशोऽपि योजितः । तत्र प्राप्तिर्नाम ग्रामादिप्राप्तिरेव इति प्रतीतिनिरासायाह **ज्ञातव्यमिति** मूलम् । **ममेति** मूलम् । भाष्यकारस्य इयदित्युक्तसर्वाधिकार्युत्तमप्राणावतारत्वात् इति भावः ।

स०व्र०— अखिलवेदार्थश्रवणादीति । 'सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषादि'त्यादौ वेदार्थश्रवणादेरेव निरूपितत्वादेवमुक्तम् ॥ अशेषविशेषतोऽपि प्रियतममिति भक्तिरुक्ता । अशेषात् स्वात्मीयसमस्तवस्तुनो विशेषेण प्रियतममिति ॥ वैराग्योक्तिः कथमागतेत्याकाङ्क्षायामाह **ल्यब्लोपेत्यादिना** । 'ल्यब्लोपे कर्मण्यधिकरणे च पञ्चमी वक्तव्ये'ति वार्तिकादिति भावः ॥ **ममेति** । **इयदामननादित्यत्र प्राणस्य अधिकार्युत्तमत्वकथनात्, भाष्यकारस्य च** तदंशावतारत्वात् इति भावः ।

कुण्डल०— ल्यब्लोपेति । **ल्यब्लोपे कर्मण्यधिकरणे च पञ्चमी वाच्येति वचनादित्यर्थः** । अशेष-विशेषतोऽपि इत्यादेर्वैराग्यभक्तिश्रवणादिरूपतृतीयाध्यायार्थसंग्राहकत्वप्रकारं दर्शयति **अशेषानिति** । अशेष-विशेषत इत्यनेन ल्यब्लोपपञ्चमीमहिम्ना अशेषविषयविशेषवैराग्यस्य प्रियतममित्यनेन भक्तिशब्दितस्नेहपर्याय-प्रीतिविषयत्वावेदकेन भक्तेर्ज्ञातव्यतममित्यर्थप्रतिपादकेनाप्यतममित्यनेन भगवत्साक्षात्कारतत्साधनश्रवणमनन-निदिध्यासनरूपज्ञानस्य च लाभेन कृत्स्नतृतीयाध्यायार्थः **संगृहीत** इति भावः । ननूक्तविधया निखिलेत्यादि-पदानामध्यायचतुष्टयात्मकब्रह्ममीमांसार्थसंग्राहकतया **साफल्येऽपि ममेत्यस्य** न साफल्यमित्यत आह **इयदिति** ।

ध्यदामननादित्यत्र मुख्यवायोरधिकार्युत्तमत्वमुक्तम् । सदा मम प्रियतममित्यनेन वाय्ववतारस्य स्वस्य तत्सूचनार्थत्वान्ममेतिपदं सफलमिति भावः ।

चषक:— वैराग्यावगमकत्वमपि सङ्गमयति **त्यब्लोपेत्यादि** । श्वशुराज्जिहेति, प्रासादात्प्रेक्षत, इत्याद्यनुरोधेन त्यब्लोपे कर्मण्यधिकरणे चोपसङ्ख्यातत्वात्पञ्चम्या इति भावः ॥ **ममेतीति** । तादूप्येण भाष्यकृतोऽवर्तीर्णत्वादिति भावः ॥ सप्तकल्प्यां पूर्वपूर्वप्रावल्यक्रम उत्तरोत्तरप्रावल्यक्रमो वा निबन्धान्तरदिशाऽवसेयः ।

काशी०— **सिद्धे** अवधारिते । **अधिकारिणः** मुमुक्षुत्वादिमतः । **तत्प्रसादेनेति** । परब्रह्मपरमप्रसादसाधनपरमभक्तिहेतुभूतेत्यर्थः । अशेषविशेषत इत्यस्योक्तार्थत्वे वैराग्यालाभादाह **त्यब्लोपेति** । त्यब्लोपे कर्मण्यधिकरणे चोपसङ्ख्यानमिति वार्तिके त्यबन्ताप्रयोगे तदर्थे गम्यमाने कर्मण्यपि पञ्चमीविधानादिति भावः । कथमेतावता वैराग्यलाभ इत्यत आह **अशेषानिति** । **विषयविशेषान्** श्रवणादिविरोधिविषयान् । **विहाय** रागाविषयीकृत्य । तत्र वैराग्यमापाद्येति यावत् । ज्ञातव्यतमं श्रवणादिना सम्यक् साक्षात्कर्तव्यमित्यर्थः । नन्वशेषविशेषत इत्यस्याप्यतममित्यनेनान्वये प्रियतममित्यतःपूर्वं तथोजनाऽऽसङ्गतिरिति चेदत्राहुः । अशेषाद्विशेषेण प्रियतममित्यर्थस्याप्यत्र विवक्षितत्वान्न दोषः । न च तमपप्रत्ययेनैव तदर्थसिद्धिः । तस्य प्रीतिगनातिशयार्थत्वात् । अस्य पुनः प्रियगतोत्तमत्वपरत्वादिति । प्रियतममिति हेतुगर्भम् । तथा चान्यत्र वैराग्यादत्र भक्त्यतिशयाच्च ज्ञातव्यतममित्यर्थः । एवं च वैराग्यभक्तिभ्यामित्यपि साधु सङ्गच्छत इत्यप्याहुः । वैराग्यस्य भक्त्यतिशये तस्य च ज्ञाने हेतुत्वसूचनार्थमशेषविशेषत इत्यस्य प्रियतमत्वविशिष्टाप्यतमविशेषणत्वमिह विवक्षितम् । विहाय ज्ञातव्यतममित्युक्तिस्तु समानकर्तृकक्रियाप्रदर्शनार्थेति न कश्चिद्दोष इत्येके । नन्वेवमीश्वरस्य सर्वाधिकारिज्ञेयत्वान्ममेति व्यर्थमत आह **ध्यदिति** । ध्यदामननात् सर्वा भेदादन्यत्रेमे इत्यादिसूत्रेषु यत्प्राणस्य सर्वाधिकार्युत्तमत्वसर्वगुणोपासकत्वादिकमन्येषां च यथायोग्यमुपासकत्वादिकमुक्तं तत्सूचकमित्यर्थः । ममेत्यस्य मत्प्रधानकाधिकारिवर्गस्येत्यर्थकतया प्राणावतारस्य स्वस्य सर्वाधिकार्युत्तमत्वादिज्ञापनादिति भावः । अनेन प्रासङ्गिकदेवताधिकरणार्थोऽपि सङ्गृहीत इति ज्ञेयम् ।

गूढ०— विषयविशेषान् विहाय इत्यनेन वैराग्याद्युक्तिः ।

चतुर्थ्याद्यावार्थसङ्गेपकतया व्याख्यानम्—

१८ सु०— प्रसन्नं च तद्यात्रां पुमर्थं प्रयच्छति तत्स्वरूपनिरूपणं चतुर्थोऽभिहितम् । उदमिधानम् आप्यतममिति । आप्तिमात्रस्य नित्यसिद्धत्वात् तमपा तां विशिनष्टीति ।

परि०— प्रियतममित्यस्य प्रागाप्यतममिति प्रतिपदं दत्तम् । तदेवानुवदति **आप्यतममितीति** ॥ **नित्यसिद्धत्वादिति** । 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित' इत्यादेरिति भावः ॥ **तमपेति** । अतिशयार्थकतमपप्रत्ययेन श्वेतद्वीपादिस्थरूपविशेषप्राप्तिरेवेहातिशब्दार्थ इति भावेन तां प्राप्तिं विशेषणयुक्तां करोतीत्यर्थः । इतिशब्दः आवपद्यव्याख्यासमाप्तौ ।

वं०प०— नित्यसिद्धत्वादिति। सुप्रावित्यर्थः। ताम् आप्तिम्। तमवर्थभूतोऽतिशयो लिङ्गशरीरभङ्गरूपो द्रष्टव्यः। तथा चापरोक्षज्ञानानन्तरमर्चिरादिमार्गेण कार्याकार्यब्रह्मसमीपं प्राप्तैः, कार्यात्यये तदध्यक्षेण सह लिङ्गशरीरभङ्गवद्भिः प्राप्यमित्यर्थः। तथाच नामेः सुप्तिसाधारण्यमिति भावः॥ इतिशब्दः प्रथमश्लोकव्याख्यानसमाप्तौ॥

आनन्दः— अस्मिन्पक्षे तमवर्थमाह आप्तीति।

कं०रा०— तमपेति। सर्वगतब्रह्मप्राप्तिमात्रस्य नित्यसिद्धत्वेऽप्याप्यतममिति तमप्रत्ययमहिम्ना लब्धस्य सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति श्रुत्युक्तस्य प्राप्तिविशेषस्य नित्यसिद्धत्वाभावेन पुमर्थत्वसंभवादाप्यतममित्येतच्चतुर्थाध्यायार्थपुमर्थनिरूपणपरमिति भावः।

वा०चं०— अत्र प्रथमे नतिस्तुतिरूपोभयविधस्यापि मङ्गलस्यानुष्ठानम्। द्वितीयादिचतुर्षु नतेरेवानुष्ठानम्। विशेषणानां च कण्ठोक्तनत्युपपादकत्वम्॥ तत्रापि प्रथमे विशेषणानां नतिप्रयोजकधर्मकथनपरत्वम्। द्वितीये नतिप्रयोजकस्वरूपनिर्धारणार्थकलक्षणपरत्वम्। तृतीये स्वरूपनिर्धारकलक्षणे साधककथनपरत्वम्। चतुर्थे तन्निर्धारके लक्षणे प्रमाणे वा बाधकपरिहारपरत्वम्। षष्ठे तूभयपरत्वेऽप्यस्य पद्यस्य विशेषणानां नारायणपदव्याख्यानद्वारैतत्पद्याभिप्रेतस्तुत्यर्थत्वम्। सप्तमे त्वेतत्पद्यतात्पर्यविषयीभूतनतिस्तुतिपरत्वाभावेऽप्येतत्पद्योक्तनतिविशेष्यनारायणविशेषणानां नतेर्यच्छास्त्रार्थव्याख्यानार्थत्वं तच्छास्त्रार्थसङ्क्षेपकथनपरत्वमिति पूर्वपूर्वप्राबल्यक्रमः पक्षाणां द्रष्टव्यः। (प्रथमे द्वितीये तृतीये चतुर्थे इति। द्वितीये तृतीये चतुर्थे पञ्चमे इति क्रमेणार्थो ज्ञेयः। पूर्वं 'द्वितीयादिषु चतुर्ष्वि'ति द्वितीयस्य प्राथम्योक्तेः।)

यद्वा। "नतिविशेष्यनारायणविशेषणानां कण्ठोक्तनत्युपपादकतया संभवत्येकवाक्यत्वे, न कण्ठतोऽनुक्तस्तुतिपरतया भिन्नवाक्यत्वं युक्तम् इति प्रथमापेक्षया द्वितीयादीनां प्राबल्यम्। तत्रापि नतिविशेष्यनारायणधर्मनम्यत्वप्रयोजकपरत्वापेक्षया तत्स्वरूपनिर्धारकलक्षणपरत्वं ज्याय इति सर्वविशेषणानां लक्षणपरत्वपक्षस्य प्राबल्यम्। स्वरूपमात्रप्रदर्शकलक्षणमात्रपरत्वापेक्षया निखिलेत्यादिविशेषणचतुष्टयस्य लक्षणपरत्वम्, तल्लक्षणविशिष्टे आप्यतमपदस्योद्भवादिदमिति विशेषणपदद्वयस्यागमानुमानरूपप्रमाणपरत्वम्, एवं वस्तुसिद्ध्युपयुक्तलक्षणप्रमाणोभयपरतया लक्षणपरत्वापेक्षयाऽस्य पक्षस्य प्राबल्यमिति। अशेषेत्यादिविशेषणद्वयस्य लक्षणपरत्वमपि, आप्यतमं अस्योद्भवादिदमिति विशेषणद्वयस्य लक्षणविशिष्टे प्रमाणपरत्वम्, आद्यविशेषणद्वयस्य तत्र प्राप्तबाधकपरिहारपरत्वम्, इत्यभिप्रेत्य प्रवृत्तस्य चतुर्थस्य पूर्वापेक्षयोपयुक्तबलार्थप्रतिपादकत्वात्ततोऽपि प्राबल्यम्। (पञ्चमस्येत्यर्थः पूर्ववत्।) एवमपि स्तुतेरलाभान्नम्यत्वोपपादकस्वरूपनिर्धारकलक्षणप्रमाणतद्बाधकपरिहारकतत्तदर्थप्रतिपादकनारायणपदव्याख्यानेन स्तुतेरपि लाभात् तत्प्रतिपादकषष्ठस्य पूर्वतोऽपि प्राबल्यम्। नमामीत्यायुक्तयैव तदुपपादकानां सर्वेषामप्याक्षेपेण लाभसंभवेन प्रपद्यजिज्ञासोपयुक्तसङ्क्षिप्तसकलशास्त्रार्थकथनप्रयुक्तन्यूनतापरिहाराय, विशेषणानां तत्कथनपरत्वं सर्वतोऽपि ज्याय" इत्यभिप्रेत्य प्रवृत्तस्यान्तिमस्य सर्वतोऽपि प्राबल्यमिति पक्षाणामुत्तरोत्तरप्राबल्यक्रमो द्रष्टव्यः।

वा०र०— प्रकृतोपयोगितया आप्यत्वमेवेति विवक्षित्वा तमपः कृत्यमाह **आप्तिमात्रस्येति** मूलम् । **इतिशब्दस्येति व्याचष्ट इति** पूर्वेण संबन्धः । एकस्य वाक्यस्यानेकयोजनास्थले पूर्वपूर्वस्वारस्यांत्थापनेनोत्तरत्र योजना प्रवृत्तेष्टीकाकारैः तत्र तत्र वर्णनात् अत्रापि उत्तरोत्तरस्य स्वारस्यं पूर्वपूर्वस्य त्वस्वारस्यं मूलेऽभिप्रेतमिति प्रतीतिनिरासाय पूर्वपूर्वस्वारस्यं दर्शयन् पक्षाणां प्राबल्यक्रममाह **अत्र प्रथम इत्यादिना । मङ्गलस्यानुष्ठानमिति** । सिध्यतीति शेषः । प्रयोजनं च स्तुतिपदानामित्युक्तत्वात् नतेरेवानुष्ठानं इत्यनन्तरमपि स एव शेषः । **तत्रापि प्रथम इति** । द्वितीयादिचतुर्ष्वपि प्रथमे द्वितीये इति यावत् । एवं द्वितीयादिशब्दा अपि तृतीयादिपराः । एवं मिलित्वा पञ्चपक्षाणां पूर्वपूर्वप्राबल्यमभिधाय षष्ठस्य तदाह **षष्ठे त्विति । उभयपरत्वेऽपि** । नन्वित्युभयपरत्वेऽपि । एवं उपपादितप्रकारेण पूर्वपूर्वप्राबल्यक्रमे विद्यमाने तत्तदवतारावसरे पूर्वपूर्वापेक्षया उत्तरोत्तरस्वारस्यप्रदर्शनं अयुक्तं भवतीत्यतः पूर्वोक्तमेवाभिप्रेतमिदं त्वभ्युच्चयेनोक्तमिति सूचयन् पूर्वपूर्वप्राबल्यक्रमनिगकरणपूर्वकं उत्तरोत्तर-प्राबल्यक्रममुपपादयति **यद्वेति** । औत्प्रेक्षिकपक्षान्तरदूषणायानुवादपूर्वकपक्षान्तरकथनव्याजेन तत्रारुचिसूचनं कृतम् । अत एव प्राचीनावतारकालीनाचारस्य एतत्स्वारस्यकथनमध्यस्थं पक्षान्तरं अन्वरसूचनेन विशदतया-पाकृतं भवति । अधिकवक्तव्यसद्भावात् अवतारावसरे अल्पमात्रं उक्त्वा पृथगेव शिष्याणां बुद्धिशुद्धयं सङ्कल्प्य देवताप्रणामकरणार्थकप्रथमपद्येन सिद्धौ तद्व्याख्यानस्यैवानन्तरभावितया न्यायप्राप्तत्वादिति भावः । तत्प्रतिपाद्य सहेतुकमिति । एतत्पद्येन हि गुरुप्रणामाचरणं प्रतिज्ञोपनिबन्धश्च क्रियते । प्रतिजानीत इत्यस्य प्रतिज्ञामुपनिबध्नाति इत्यर्थात् गीताभाष्यटीकायां प्रतिज्ञानुपनिबध्नाति प्रतिज्ञा तु किमर्थं निवेशनीया इत्याद्युक्तेः तत्र गुरुप्रणामाचरणं देवताप्रणामस्येवेत्यादिहेतुकथनम् । यस्य देवे परा भक्तिः इत्यादिप्रमाणात् । शास्त्रप्रभवत्वादिविशेषणात् इति तु गुरुत्वोपपादकानीति गुरुप्रणामाचरणशेषतया सार्थकानि । प्रतिज्ञोपनिबन्धस्य शिष्यसमाधानार्थतायाः सिद्धत्वेऽपि तदुपनिबन्धात् परमाख्यविशेषणेन व्याख्यासमर्थनकरणात् व्याख्यां समर्थयमान इत्येतत् प्रतिज्ञोपनिबन्धे हेतुकथनम् । अवशिष्टं तु तदुपपादकतया तच्छेषभूतमिति भावः । व्याख्यानसमर्थनं तु स्यादेतत् इत्याद्यग्रिममूले व्यक्तम् । अत एव तदवतारावसरे व्याख्यां समर्थयमानः इत्युक्तमित्यादि वक्ष्यति । टीकाकृदिति ज्ञेयम् ।

कुण्डल०— आप्यतममित्यस्य भगवद्रूपविशेषप्राप्तिलक्षणमोक्षप्रतिपादकचतुर्थाध्यायार्थसंग्राहकप्रकारं दर्शयति **आप्तिमात्रस्येति** । "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः । न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥" इत्यादिश्रुतिस्मृतिसिद्धब्रह्मप्राप्तेर्नित्यसिद्धत्वेऽपि ब्रह्मविदाप्नोति परं सोऽश्नुते सर्वान्कामान् सह ब्रह्मणा विपश्चिता । "अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ यद्गत्वा न निवर्तन्ते तद्धाम परमं मम" इत्यादि श्रुतिस्मृतिसिद्धभगवद्रूपविशेषप्राप्तिलक्षणमुक्तेः आप्यतममित्यत्रत्येनाति-शयार्थतमपप्रत्ययेन लाभात् आप्यतममिति चतुर्थाध्यायसंग्राहकमित्यर्थः ।

काशी०— प्रसन्नं तत् ब्रह्म तदभिधानं पुरुषार्थस्वरूपाभिधानम् । **नित्यसिद्धत्वादिति** । तथा चाप्यमित्येवोक्तिरयुक्तेति भावः । तमपा तमवर्थेन स्वरूपाभिव्यञ्जकत्वाद्यतिशयेन तामार्ति विशिनष्टि । आप्यतममित्याहेति यावत् । अत्र यद्यपि सदा वन्द्यमित्यादिक्रमेण विशेषणाभिधानमुचितम् । तथाऽपि

परममाङ्गलिकत्वादादौ निवेशितस्य नारायणशब्दस्य 'नारायणं महाज्ञेयमि'त्यादौ विषयसमर्पकत्वसिद्धये ब्रह्मशब्दसमानार्थत्वं सूचयितुं तदनन्तरमेव निखिलेत्यादेरभिधानम् । तदधीनत्वान्निर्दोषत्वस्य तदानन्तर्यम् । निर्दोषत्वगुणपूर्णत्वादिनैव वेदादिवेद्यं न तु दोषित्वादिनेति ज्ञापनाय तदनन्तरमाप्यतममित्युक्तिः । जन्मादिहेतुत्वस्य तदधीनसिद्धिकत्वात्तदानन्तर्यम् । अशेषविशेषत इत्यस्य उभयत्रापि पूर्वोक्तरीत्या संबन्धसूचनाय तदनन्तरोक्तिः । जिज्ञासाया वैराग्यानन्तर्यज्ञापनाय तदनन्तरं बन्धमित्युक्तम् । जिज्ञासादिना च भक्त्यतिशयद्वारैव ज्ञानादिसंपत्तिरिति सूचयितुमेतदनन्तरं प्रियतमत्वोक्तिः । तदनन्तरं ममेत्यभिधानमाप्यतममित्यनेनाप्यस्य संबन्धज्ञापनार्थमित्यवधेयम् । इतिशब्दः प्रथमश्लोकव्याख्यापरिसमाप्त्यर्थः ।

गूढ०— अस्मिन्पक्षे तमबर्थमाह आप्तीति ।

॥ अनुव्याख्यानस्थे द्वितीयपद्ये गुरुप्रणामाचरणपुरःसरा शास्त्रव्याख्यानप्रतिज्ञा तत्समर्थनं च ॥

॥ गुरुप्रणामाचरणम् ॥

अवतरणिका, अन्वयः, शब्दार्थश्च—

१९ सु०— नारायणप्रणामस्येव गुरुप्रणामस्यापि अभिमतसिद्धयङ्गतया कार्यारम्भे अवश्यमनुष्ठेयत्वात् तदाचरणपुरःसरं ब्रह्ममीमांसाशास्त्रव्याख्यानं समर्थयमानः प्रतिजानीते तमेवेति ।

अनु०— तमेव शास्त्रप्रभवं प्रणम्य
जगद्गुरूणां गुरुमञ्जसैव ।
विशेषतो मे परमाख्यविद्या-
व्याख्यां करोम्यन्वपि चाहमेव ॥ २ ॥

तं पूर्वप्रणतं नारायणमेव, **अन्वपि** पुनरपि, **प्रणम्य** भक्त्याद्युपेततालक्षणेन प्रकर्षेण नत्वा, **अहं, परमाख्यविद्याया** ब्रह्ममीमांसाशास्त्ररूपायाः **व्याख्यां करोमि** इति संबन्धः । वर्तमानसामीप्याद् वर्तमानव्यपदेशः । सङ्क्षेपतो व्याख्यानस्य प्रक्रान्तत्वाद्वा ।

परि०— गुरुनतिवैयर्थ्यमाशङ्क्याह **नारायणेति** ॥ **अभिमतेति** । 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्था' इत्युक्तेरिति भावः ।

परमाख्यविवेत्यस्य व्यर्थतां निराह ब्रह्ममीमांसेत्यादि ।

नन्वोतत्ववाचीत्यादिनैव सूत्रव्याख्यानस्य करिष्यमाणत्वात्ततः पूर्वग्रन्थस्य शास्त्रस्य व्याख्येयतोपयुक्तप्रमेयप्रतिपादनपरत्वात्करिष्यामीत्येव प्रयोक्तव्यं न तु करोमीति, लडन्तस्य 'वर्तमाने लडि'ति सूत्रेण प्रारब्धापरिसमाप्तक्रियोपलक्षिते काले विवक्षिते लट् भवतीत्युक्त्या भविष्यदर्थावाचित्वादित्यत आह वर्तमानेति । 'वर्तमानसामीप्ये वर्तमानवद्वे'ति सूत्रादिति भावः ॥ वर्तमानव्यपदेशो हेत्वन्तरमाह सङ्क्षेपत इति । 'श्रोतृबुद्धयनुकूल्याये'त्यादिना पूर्वोक्तप्रकारेणेत्यर्थः ॥

बं०प०— प्रक्रान्तत्वादिति । प्रथमश्लोकेनेत्यर्थः । सङ्क्षेपतः सकलशास्त्रार्थनिरूपणतया प्रथमश्लोकस्य व्याख्यातत्वादिति भावः ।

आनन्दः— नन्वाद्यपद्येन नारायणवन्दनस्य कृतत्वात्पुनरनेनापि पद्येन वन्दने पौनरुक्त्यम् । यदि च बहुशो वन्दनस्य फलविशेषसिद्धयर्थत्वात्पुनर्वन्दनमिति । तर्हि प्रथमपद्य एव बहुशो नमामि इति प्रयोक्तव्य इत्यत तत्प्रतिपाद्यमाह नारायणेति । अत्र पद्ये पूर्वार्द्धेन गुरुप्रणामः । व्याख्यां करोमीत्यनेन मीमांसाशास्त्रव्याख्यानप्रतिज्ञा । व्याख्यामन्वपीत्यनेन तत्समर्थनमिति विवेकः । ननु गुरुप्रणामो न कर्तव्यः प्रयोजनाभावेन वैयर्थ्यादित्यत उक्तं नारायणप्रणामस्येव गुरुप्रणामस्याप्यभिमतसिद्धयर्थत्वेन कार्यारम्भेऽवश्यमनुष्ठेयत्वादिति । ननु नारायणप्रणामगुरुप्रणामयोरभिमतसिद्धौ प्रत्येकं वा कारणत्वं समुच्चयेन वा । अथ विकल्पेन । नाद्यः । तथा सति नारायणप्रणाममात्रेण गुरुप्रणाममात्रेण वाभिमतसिद्धयापत्तेः । न द्वितीयः । तथात्वे नारायणप्रणाममात्रेणाभिमतसिद्धिर्न स्यात् । न तृतीयः । गुरुप्रणामस्यावश्यकत्वाभावेन ग्रन्थारम्भे नियमतस्तदनुष्ठानं न स्यात् । तथाच कथमेतदिति । मैवम् । दण्डचक्रादिवत्प्रत्येकमेव तयोः कारणत्वाङ्गीकारात् । यथा दण्डचक्रयोर्दण्डत्वेन दण्डस्य चक्रत्वेन चक्रस्य घटं प्रति प्रत्येकं कारणत्वेऽपि न दण्डमात्रेण चक्रमात्रेण घटोत्पत्तिस्तथा प्रकृतेऽपि नारायणप्रणामत्वेन नारायणप्रणामस्य गुरुप्रणामत्वेन गुरुप्रणामस्य कारणत्वेऽपि नान्यतरमात्रेणाभिमतसिद्धिरिति उभयोरप्यावश्यकत्वमिति न कश्चिद्दोषः । प्रणम्येत्यस्यान्वयि चेत्यनेन संबन्धं दर्शयितुं विशेषार्थकथनाय व्यवहितपदानामन्वयमाह नमिति । ननु करोमीति वर्तमानार्थकलट्प्रयोगो न युक्तः । व्याख्यानस्य करिष्यमाणत्वेन वर्तमानत्वाभावादित्यत आह वर्तमानेति । वर्तमानसामीप्ये वर्तमानवद्वेति सूत्रादिति भावः । संक्षेपत इति । आद्यश्लोकेन सर्वशास्त्रार्थस्य संक्षेपतः कथनेनेत्यर्थः ।

कं०प०— ननु परमाख्यविद्याव्याख्यां करोमीति लट्प्रयोगो न युक्तः । व्याख्यायाः करिष्यमाणत्वेनावर्तमानत्वादित्यत आह वर्तमानेति । वर्तमानसामीप्ये वर्तमानवद्वेति वर्तमानसामीप्ये वर्तमानार्थकलडनुशासनात्करोमीति लड्व्यपदेशः संभवतीत्यर्थः । सङ्क्षेपत इति । आद्यपद्ये अध्यायचतुष्टयार्थस्य सङ्क्षेपतः कथनेन परमाख्यविद्याव्याख्यानस्योपक्रान्तत्वाद्वा करोमीति वर्तमानव्यपदेश इत्यर्थः । यद्यपि सङ्क्षेपतो व्याख्यानस्यायश्लोके परिसमाप्तत्वादारब्धापरिसमाप्तक्रियोपलक्षिते क्रियाकाले वाच्ये धातोर्लट्प्रत्ययो भवतीति विहितस्य लट्प्रत्ययस्यानुपपत्तिस्तथाऽपि सङ्क्षेपविस्तराभ्यां व्याख्यानस्य परमाख्यविद्याव्याख्यानत्वेनैकक्रियात्वात्तस्याश्च आरब्धापरिसमाप्तत्वाल्लट्प्रत्ययोपपत्तिरिति बोध्यम् ।

श्रीनिधि०— वर्तमानसामीप्ये वर्तमानवद्वेति वर्तमानसामीप्येऽपि लड्विधानादिति भावः। **सङ्क्षेपत इति**। आद्यपद्यचरमव्याख्यानापेक्षयेदम्।

वा०चं०— द्वितीयपद्यस्य सूत्रव्याख्यानत्वभ्रान्तिं वारयन्नेव तत्प्रतिपाद्यं सहेतुकमाह **नारायणेति**। सूत्रव्याख्यानकरणस्य परमाख्यविद्याव्याख्यां करोमीति प्रतिज्ञानेनासङ्गतिशङ्कां निराकुर्वन्नन्वपीत्यस्योभयत्र संबन्धमभिप्रेत्य व्यवहितत्वात्संबन्धं च दर्शयति **तमित्यादिना**॥ **वर्तमानेति**। 'वर्तमानसामीप्ये वर्तमानवद्वे'तिसूत्रे चातुर्वर्ण्यादिसिद्ध्यर्थं स्वार्थिकष्यञ्ज्ञापकः ष्यञन्तः सामीप्यशब्दः। ('वर्तमानसामीप्ये वर्तमानवद्वा' समीपमेव सामीप्यम्। स्वार्थे ष्यञ्। 'वर्तमाने लडि'त्यारभ्य 'उणादयो बहुलमि'ति यावत् येनोपाधिना प्रत्यया उक्तास्ते तथैव वर्तमानसमीपे भूते भविष्यति च वा स्युः। कदा आगतोऽसि। अयमागच्छामि। अयमागमम्। कदा गमिष्यसि। एष गच्छामि। गमिष्यामि वा। **येनोपाधिनेति**। तथा हि। पूङ्यजोः शानन्विहितः। स ताभ्यामेव न तु धात्वन्तरात्। तच्छीलादिविशिष्टे कर्तर्यलंपूर्वात्कृञ इष्णुजुक्तः सोऽपि तस्मिन्नुपाधौ सत्येवेत्यादि। कदाऽऽगतोऽसीति भूतकालेन प्रश्नवाक्यमुदाहरणे भूतकालादभिव्यक्तये। एवं कदा गमिष्यसीत्यत्राप्यूह्यम्। उदाहरणयोरयमेष इति पदाभ्यामागमनाविनाभूतं प्रस्वेदपरिकरबन्धादियुक्तं तत्प्रतिनिर्दिश्यते। इदानीमागमनमिति ध्वनयितुं तेन, कदेति प्रश्नं प्रत्यार्थिकमुत्तरं सङ्गच्छते। सामीप्यं च द्योतितं भवति। आक्षेपेणोपपत्तिमाश्रित्य प्रत्याख्यातमिदमाकरे।) तथा च वर्तमानसमीपे भूते भविष्यति चार्थे वर्तमानाद्धातोर्वर्तमाने लडित्यारभ्य यावदुणादयो बहुलमिति विभाषया वर्तमानवत्प्रत्यया भवन्तीति सूत्रार्थनिष्पत्त्या वर्तमानसमीपे भविष्यति करोमीति लडित्यर्थः। एतच्च प्रतिपत्तिविशेषानाश्रयणेनाद्यपद्यपूर्वव्याख्यानषट्कपक्षे। अन्यथा गच्छामीत्यादेर्वर्तमानार्थत्वेऽपि कालान्तरस्य प्रश्नवाक्यबललभ्यत्वेन वाक्यकालस्य पदसंस्कारेऽनुपयोगेन न तत्र वर्तमानवत्प्रत्यया इति विशेषप्रतिपत्तारं प्रत्येतत्समाधानस्यासंभवात्। न च प्रकृते तादृशप्रश्नवाक्यस्याभावान्न तद्बलेन कालान्तरलाभ इति वाच्यम्, अत्रापि प्रश्नवाक्याहरणस्य वक्तर्यावश्यकत्वादिति द्रष्टव्यम्। अन्तिमव्याख्यानानुरोधेनाह **सङ्क्षेपत इति**॥ **प्रक्रान्तत्वादिति**। प्रारब्धत्वादित्यर्थः।

वा०र०— **प्रतिज्ञानेनासङ्गतीति**। सूत्रव्याख्यानकरणस्य हि ब्रह्ममीमांसाव्याख्यां करोमीत्येव प्रतिज्ञा करणीया। परमाख्यविद्येत्यादि प्रतिज्ञातुं व्याख्येयान्तरतीतिजनकतया अभिप्रेताः असङ्गता इत्यसङ्गतिशङ्कामित्यर्थः। उभयत्र संबन्ध इत्यनेन सकृत् श्रुतत्वेऽपि योग्यतया स्थलद्वयसंबन्धः क्रियते इत्युक्तं भवति। प्रकर्षस्यावश्यकतायाः प्रागुपपादनात् **प्रकर्षेण नत्वा** इत्येव मूले उक्तम्। भावेऽप्यत्यन्तसामीप्यशब्दे वर्तमानगतस्य भूतभविष्यद्भ्यां सामीप्यस्याभिधानाङ्गीकारे वर्तमाने प्रत्ययविधानेनैवान्यसमीपेऽपि तस्मिन् तत्सिद्ध्या वर्तमाननिरूपितभूतभविष्यद्व्रतसामीप्याभिधानाङ्गीकारे च भूतभविष्यत्कालयोः अभिधानाभावापत्त्या प्रत्ययविधानानर्थक्यप्रसङ्गेन सामीप्यवत् काललक्षणाङ्गीकारे च लाघवात् समीप इत्येव वाच्ये प्रयोजनभावेन ष्यञः प्रयोगो व्यर्थ इत्याशङ्कायाः स्वार्थिकत्वं ष्यञोऽङ्गीकृत्य प्रयोजनोक्त्या परिहारपूर्वकं सूत्रार्थं वदन्नेव वाक्यार्थमाह **चातुर्वर्ण्यादीति**। आदिपदेन चातुराश्रम्यमित्यादेः सङ्ग्रहः। **समीपमेव सामीप्यमिति स्वार्थिकष्यञन्तप्रयोगश्चत्वारो वर्णाः एव**

परमाख्यविद्येत्यस्य व्यर्थतां निराह ब्रह्ममीमांसेत्यादि।

नन्वोतत्ववाचीत्यादिनैव सूत्रव्याख्यानस्य करिष्यमाणत्वात्ततः पूर्वग्रन्थस्य शास्त्रस्य व्याख्येयतोपयुक्तप्रमेयप्रतिपादनपरत्वात्करिष्यामीत्येव प्रयोक्तव्यं न तु करोमीति, लडन्तस्य 'वर्तमाने लडि'ति सूत्रेण प्रारब्धापरिसमाप्तक्रियोपलक्षिते काले विवक्षिते लट् भवतीत्युक्त्या भविष्यदर्थावाचित्वादित्यत आह वर्तमानेति। 'वर्तमानसामीप्ये वर्तमानवद्वे'ति सूत्रादिति भावः॥ वर्तमानव्यपदेशे हेत्वन्तरमाह सङ्क्षेपत इति। 'श्रोतृबुद्धचनुकूल्याये'त्यादिना पूर्वोक्तप्रकारेणेत्यर्थः॥

बं०प०— प्रक्रान्तत्वादिति। प्रथमश्लोकेनेत्यर्थः। सङ्क्षेपतः सकलशास्त्रार्थनिरूपणतया प्रथमश्लोकस्य व्याख्यातत्वादिति भावः।

आनन्दः— नन्वाद्यपद्येन नारायणवन्दनस्य कृतत्वात्पुनरनेनापि पद्येन वन्दने पौनरुक्त्यम्। यदि च बहुशो वन्दनस्य फलविशेषसिद्धचङ्गत्वात्पुनर्वन्दनमिति। तर्हि प्रथमपद्य एव बहुशो नमामि इति प्रयोक्तव्य इत्यत तत्प्रतिपाद्यमाह नारायणेति। अत्र पद्ये पूर्वार्द्धेन गुरुप्रणामः। व्याख्यां करोमीत्यनेन मीमांसाशास्त्रव्याख्यानप्रतिज्ञा। व्याख्यामन्वपीत्यनेन तत्समर्थनमिति विवेकः। ननु गुरुप्रणामो न कर्तव्यः प्रयोजनाभावेन वैयर्थ्यादित्यत उक्तं नारायणप्रणामस्येव गुरुप्रणामस्याप्यभिमतसिद्धचङ्गतया कार्यारम्भेऽवश्यमनुष्ठेयत्वादिति। ननु नारायणप्रणामगुरुप्रणामयोरभिमतसिद्धौ प्रत्येकं वा कारणत्वं समुदयेन वा। अथ विकल्पेन। नाद्यः। तथा सति नारायणप्रणाममात्रेण गुरुप्रणाममात्रेण वाभिमतसिद्धचापत्तेः। न द्वितीयः। तथात्वे नारायणप्रणाममात्रेणाभिमतसिद्धिर्न स्यात्। न तृतीयः। गुरुप्रणामस्यावश्यकत्वाभावेन ग्रन्थारम्भे नियमतस्तदनुष्ठानं न स्यात्। तथाच कथमेतदिति। मैवम्। दण्डचक्रादिवत्प्रत्येकमेव तयोः कारणत्वाङ्गीकारात्। यथा दण्डचक्रयोर्दण्डत्वेन दण्डस्य चक्रत्वेन चक्रस्य घटं प्रति प्रत्येकं कारणत्वेऽपि न दण्डमात्रेण चक्रमात्रेण घटोत्पत्तिस्तथा प्रकृतेऽपि नारायणप्रणामत्वेन नारायणप्रणामस्य गुरुप्रणामत्वेन गुरुप्रणामस्य कारणत्वेऽपि नान्यतरमात्रेणाभिमतसिद्धिरिति उभयोरप्यावश्यकत्वमिति न कश्चिद्दोषः। प्रणम्येत्यस्यान्वपि चेत्यनेन संबन्धं दर्शयितुं विशेषार्थकथनाय व्यवहितपदानामन्वयमाह तमिति। ननु करोमीति वर्तमानार्थकलट्प्रयोगो न युक्तः। व्याख्यानस्य करिष्यमाणत्वेन वर्तमानत्वाभावादित्यत आह वर्तमानेति। वर्तमानसामीप्ये वर्तमानवद्वेति सूत्रादिति भावः। संक्षेपत इति। आद्यश्लोकेन सर्वशास्त्रार्थस्य संक्षेपतः कथनेनेत्यर्थः।

कं०रा०— ननु परमाख्यविद्याव्याख्यां करोमीति लट्प्रयोगो न युक्तः। व्याख्यायाः करिष्यमाणत्वेनावर्तमानत्वादित्यत आह वर्तमानेति। वर्तमानसामीप्ये वर्तमानवद्वेति वर्तमानसामीप्ये वर्तमानार्थकलडनुशासनात्करोमीति लड्व्यपदेशः संभवतीत्यर्थः। सङ्क्षेपत इति। आद्यपद्ये अध्यायचतुष्टयार्थस्य सङ्क्षेपतः कथनेन परमाख्यविद्याव्याख्यानस्योपक्रान्तत्वाद्वा करोमीति वर्तमानव्यपदेश इत्यर्थः। यद्यपि सङ्क्षेपतो व्याख्यानस्याद्यश्लोके परिसमाप्तत्वादारब्धापरिसमाप्तक्रियोपलक्षिते क्रियाकाले वाच्ये धातोर्लट्प्रत्ययो भवतीति विहितस्य लट्प्रत्ययस्यानुपपत्तिस्तथाऽपि सङ्क्षेपविस्तराभ्यां व्याख्यानस्य परमाख्यविद्याव्याख्यानत्वेनैकक्रियात्वात्तस्याश्च आरब्धापरिसमाप्तत्वाल्लट्प्रत्ययोपपत्तिरिति बोध्यम्।

श्रीनिधि०— वर्तमानसामीप्ये वर्तमानवद्वेति वर्तमानसामीप्येऽपि लड्विधानादिति भावः। **सङ्क्षेपत इति।** आद्यपद्यचरमव्याख्यानापेक्षयेदम्।

वा०चं०— द्वितीयपद्यस्य सूत्रव्याख्यानत्वभ्रान्तिं वारयन्नेव तत्प्रतिपाद्यं सहेतुकमाह **नारायणेति**। सूत्रव्याख्यानकरणस्य परमाख्यविद्याव्याख्यां करोमीति प्रतिज्ञानेनासङ्गतिशङ्कां निराकुर्वन्नन्वपीत्यस्योभयत्र संबन्धमभिप्रेत्य व्यवहितत्वात्संबन्धं च दर्शयति **तमित्यादिना॥ वर्तमानेति।** 'वर्तमानसामीप्ये वर्तमानवद्वे'तिसूत्रे चातुर्वर्ण्यादिसिद्ध्यर्थं स्वार्थिकष्यञ्ज्ञापकः ष्यञन्तः सामीप्यशब्दः। ('वर्तमानसामीप्ये वर्तमानवद्वा' समीपमेव सामीप्यम्। स्वार्थे ष्यञ्। 'वर्तमाने लडि'त्यारभ्य 'उणादयो बहुलमि'ति यावत् येनोपाधिना प्रत्यया उक्तास्ते तथैव वर्तमानसमीपे भूते भविष्यति च वा स्युः। कदा आगतोऽसि। अयमागच्छामि। अयमागमम्। कदा गमिष्यसि। एष गच्छामि। गमिष्यामि वा। **येनोपाधिनेति।** तथा हि। पूङ्यजोः शानन्विहितः। स ताभ्यामेव न तु धात्वन्तरात्। तच्छीलादिविशिष्टे कर्तर्यलंपूर्वात्कृत्र इष्णुजुक्तः सोऽपि तस्मिन्नुपाधौ सत्येवेत्यादि। कदाऽऽगतोऽसीति भूतकालेन प्रश्नवाक्यमुदाहरणे भूतकालादभिव्यक्तये। एवं कदा गमिष्यसीत्यत्राप्यूह्यम्। उदाहरणयोरयमेष इति पदाभ्यामागमनाविनाभूतं प्रस्वेदपरिकरबन्धादियुक्तं तत्प्रतिनिर्दिश्यते। इदानीमागमनमिति ध्वनयितुं तेन, कदेति प्रश्नं प्रत्यार्थिकमुत्तरं सङ्गच्छते। सामीप्यं च द्योतितं भवति। **आक्षेपेणोपपत्तिमाश्रित्य** प्रत्याख्यातमिदमाकरे।) तथा च वर्तमानसमीपे भूते भविष्यति चार्थे वर्तमानाद्धातोर्वर्तमाने लडित्यारभ्य यावदुणादयो बहुलमिति विभाषया वर्तमानवत्प्रत्यया भवन्तीति सूत्रार्थनिष्पत्त्या **वर्तमानसमीपे भविष्यति करोमीति लडित्यर्थः**। एतच्च प्रतिपत्तिविशेषानाश्रयणेनाद्यपद्यपूर्वव्याख्यानषट्कपक्षे। **अन्यथा गच्छामीत्यादेर्वर्तमानार्थत्वेऽपि** कालान्तरस्य प्रश्नवाक्यबललभ्यत्वेन वाक्यकालस्य पदसंस्कारेऽनुपयोगेन न तत्र वर्तमानवत्प्रत्यया इति विशेषप्रतिपत्तारं प्रत्येतन्नमाधानस्यासंभवात्। न च प्रकृते तादृशप्रश्नवाक्यस्याभावान्न तद्बलेन कालान्तरलाभ इति वाच्यम्, अत्रापि प्रश्नवाक्याहरणस्य वक्तुर्वाञ्छयकत्वादिति द्रष्टव्यम्। अन्तिमव्याख्यानानुरोधेनाह **सङ्क्षेपत इति॥ प्रक्रान्तत्वादिति।** प्रारब्धत्वादित्यर्थः।

वा०र०— **प्रतिज्ञानेनासङ्गतीति।** सूत्रव्याख्यानकरणस्य हि ब्रह्ममीमांसाव्याख्यां करोमीत्येव प्रतिज्ञा करणीया। परमाख्यविद्येत्यादि प्रतिज्ञातुं व्याख्येयान्तरप्रतीतिजनकतया अभिप्रेताः असङ्गता इत्यसङ्गतिशङ्कामित्यर्थः। उभयत्र संबन्ध इत्यनेन सकृत् श्रुतत्वेऽपि योग्यतया स्थलद्वयसंबन्धः क्रियते इत्युक्तं भवति। प्रकर्षस्यावश्यकतायाः प्रागुपपादनात् **प्रकर्षेण नत्वा** इत्येव मूले उक्तम्। भावेऽप्यत्यन्तसामीप्यशब्दे वर्तमानगतस्य भूतभविष्यद्भ्यां सामीप्यस्याभिधानाङ्गीकारे वर्तमाने प्रत्ययविधानेनैवान्यसमीपेऽपि तस्मिन् तत्सिद्ध्या वर्तमाननिरूपितभूतभविष्यद्गतसामीप्याभिधानाङ्गीकारे च भूतभविष्यत्कालयोः अभिधानाभावापत्त्या प्रत्ययविधानानर्थक्यप्रसङ्गेन सामीप्यवत् काललक्षणाङ्गीकारे च लाघवात् समीप इत्येव वाच्ये प्रयोजनाभावेन ष्यञः प्रयोगो व्यर्थ इत्याशङ्कायाः स्वार्थिकत्वं ष्यञोऽङ्गीकृत्य प्रयोजनोक्त्या परिहारपूर्वकं सूत्रार्थं वदन्नेव वाक्यार्थमाह **चातुर्वर्ण्यादीति।** आदिपदेन चातुराश्रम्यमित्यादेः सङ्ग्रहः। समीपमेव सामीप्यमिति स्वार्थिकष्यञन्तप्रयोगश्चत्वारो वर्णाः एव

परमाख्यविद्येत्यस्य व्यर्थतां निराह ब्रह्ममीमांसेत्यादि।

नन्वोतत्ववाचीत्यादिनैव सूत्रव्याख्यानस्य करिष्यमाणत्वात्ततः पूर्वग्रन्थस्य शास्त्रस्य व्याख्येयतोपयुक्तप्रमेयप्रतिपादनपरत्वात्करिष्यामीत्येव प्रयोक्तव्यं न तु करोमीति, लडन्तस्य 'वर्तमाने लडि'ति सूत्रेण प्रारब्धापरिसमाप्तक्रियोपलक्षिते काले विवक्षिते लट् भवतीत्युक्त्या भविष्यदर्थावाचित्वादित्यत आह वर्तमानेति। 'वर्तमानसामीप्ये वर्तमानवद्वे'ति सूत्रादिति भावः॥ वर्तमानव्यपदेशे हेत्वन्तरमाह सङ्क्षेपत इति। 'श्रोतृबुद्धचनुकूल्याये'त्यादिना पूर्वोक्तप्रकारेणेत्यर्थः॥

वं०प०— प्रक्रान्तत्वादिति। प्रथमश्लोकेनेत्यर्थः। सङ्क्षेपतः सकलशास्त्रार्थनिरूपणतया प्रथमश्लोकस्य व्याख्यातत्वादिति भावः।

आनन्दः— नन्वाद्यपद्येन नारायणवन्दनस्य कृतत्वात्पुनरनेनापि पद्येन वन्दने पौनरुक्त्यम्। यदि च बहुशो वन्दनस्य फलविशेषसिद्धयर्थत्वात्पुनर्वन्दनमिति। तर्हि प्रथमपद्य एव बहुशो नमामि इति प्रयोक्तव्य इत्यतः तत्प्रतिपाद्यमाह नारायणेति। अत्र पद्ये पूर्वार्द्धेन गुरुप्रणामः। व्याख्यां करोमीत्यनेन मीमांसाशास्त्रव्याख्यानप्रतिज्ञा। व्याख्यामन्वपीत्यनेन तत्समर्थनमिति विवेकः। ननु गुरुप्रणामो न कर्तव्यः प्रयोजनाभावेन वैयर्थ्यादित्यत उक्तं नारायणप्रणामस्येव गुरुप्रणामस्याप्यभिमतसिद्धयर्थतया कार्यारम्भेऽवश्यमनुष्ठेयत्वादिति। ननु नारायणप्रणामगुरुप्रणामयोरभिमतसिद्धौ प्रत्येकं वा कारणत्वं समुच्चयेन वा। अथ विकल्पेन। नाद्यः। तथा सति नारायणप्रणाममात्रेण गुरुप्रणाममात्रेण वाभिमतसिद्धयापत्तेः। न द्वितीयः। तथात्वे नारायणप्रणाममात्रेणाभिमतसिद्धिर्न स्यात्। न तृतीयः। गुरुप्रणामस्यावश्यकत्वाभावेन ग्रन्थारम्भे नियमतस्तदनुष्ठानं न स्यात्। तथाच कथमेतदिति। मैवम्। दण्डचक्रादिवत्प्रत्येकमेव तयोः कारणत्वाङ्गीकारात्। यथा दण्डचक्रयोर्दण्डत्वेन दण्डस्य चक्रत्वेन चक्रस्य घटं प्रति प्रत्येकं कारणत्वेऽपि न दण्डमात्रेण चक्रमात्रेण घटोत्पत्तिस्तथा प्रकृतेऽपि नारायणप्रणामत्वेन नारायणप्रणामस्य गुरुप्रणामत्वेन गुरुप्रणामस्य कारणत्वेऽपि नान्यतरमात्रेणाभिमतसिद्धिरिति उभयोरप्यावश्यकत्वमिति न कश्चिद्दोषः। प्रणम्येत्यस्यान्वयि चेत्यनेन संबन्धं दर्शयितुं विशेषार्थकथनाय व्यवहितपदानामन्वयमाह तमिति। ननु करोमीति वर्तमानार्थकलट्प्रयोगो न युक्तः। व्याख्यानस्य करिष्यमाणत्वेन वर्तमानत्वाभावादित्यत आह वर्तमानेति। वर्तमानसामीप्ये वर्तमानवद्वेति सूत्रादिति भावः। संक्षेपत इति। आद्यश्लोकेन सर्वशास्त्रार्थस्य संक्षेपतः कथनेनेत्यर्थः।

कं०प०— ननु परमाख्यविद्याव्याख्यां करोमीति लट्प्रयोगो न युक्तः। व्याख्यायाः करिष्यमाणत्वेनावर्तमानत्वादित्यत आह वर्तमानेति। वर्तमानसामीप्ये वर्तमानवद्वेति वर्तमानसामीप्ये वर्तमानार्थकलङनुशासनात्करोमीति लड्व्यपदेशः संभवतीत्यर्थः। सङ्क्षेपत इति। आद्यपद्ये अध्यायचतुष्टयार्थस्य सङ्क्षेपतः कथनेन परमाख्यविद्याव्याख्यानस्योपक्रान्तत्वाद्वा करोमीति वर्तमानव्यपदेश इत्यर्थः। यद्यपि सङ्क्षेपतो व्याख्यानस्याद्यश्लोके परिसमाप्तत्वादारब्धापरिसमाप्तक्रियोपलक्षिते क्रियाकाले वाच्ये धातोर्लट्प्रत्ययो भवतीति विहितस्य लट्प्रत्ययस्यानुपपत्तिस्तथाऽपि सङ्क्षेपविस्तराभ्यां व्याख्यानस्य परमाख्यविद्याव्याख्यानत्वेनैकक्रियात्वात्तस्याश्च आरब्धापरिसमाप्तत्वाल्लट्प्रत्ययोपपत्तिरिति बोध्यम्।

श्रीनिधि०— वर्तमानसामीप्ये वर्तमानवद्वेति वर्तमानसामीप्येऽपि लड्विधानादिति भावः। सङ्क्षेपत इति। आद्यपद्यचरमव्याख्यानापेक्षयेदम्।

वा०चं०— द्वितीयपद्यस्य सूत्रव्याख्यानत्वभ्रान्तिं वारयन्नेव तत्प्रतिपाद्यं सहेतुकमाह नारायणेति। सूत्रव्याख्यानकरणस्य परमाख्यविद्याव्याख्यां करोमीति प्रतिज्ञानेनासङ्गतिशङ्कां निराकुर्वन्नन्वपीत्यस्योभयत्र संबन्धमभिप्रेत्य व्यवहितत्वात्संबन्धं च दर्शयति तमित्यादिना॥ वर्तमानेति। 'वर्तमानसामीप्ये वर्तमानवद्वे'तिसूत्रे चातुर्वर्ण्यादिसिद्ध्यर्थं स्वार्थिकष्यञ्ज्ञापकः ष्यञन्तः सामीप्यशब्दः। ('वर्तमानसामीप्ये वर्तमानवद्वा' समीपमेव सामीप्यम्। स्वार्थे ष्यञ्। 'वर्तमाने लडि'त्यारभ्य 'उणादयो बहुलमि'ति यावत् येनोपाधिना प्रत्यया उक्तास्ते तथैव वर्तमानसमीपे भूते भविष्यति च वा स्युः। कदा आगतोऽसि। अयमागच्छामि। अयमागमम्। कदा गमिष्यसि। एष गच्छामि। गमिष्यामि वा। येनोपाधिनेति। तथा हि। पूङ्यजोः शानन्विहितः। स ताभ्यामेव न तु धात्वन्तरात्। तच्छीलादिविशिष्टे कर्तर्यलंपूर्वात्कृञ इष्णुजुक्तः सोऽपि तस्मिन्नुपाधौ सत्येवेत्यादि। कदाऽऽगतोऽसीति भूतकालेन प्रश्नवाक्यमुदाहरणं भूतकालादभिव्यक्तये। एवं कदा गमिष्यसीत्यत्राप्यूह्यम्। उदाहरणयोरयमेष इति पदाभ्यामागमनाविनाभूतं प्रस्वेदपरिकरबन्धादियुक्तं तत्प्रतिनिर्दिश्यते। इदानीमागमनमिति ध्वनयितुं तेन, कदेति प्रश्नं प्रत्यार्थिकमुत्तरं सङ्गच्छते। सामीप्यं च द्योतितं भवति। आक्षेपेणोपपत्तिमाश्रित्य प्रत्याख्यातमिदमाकरे।) तथा च वर्तमानसमीपे भूते भविष्यति चार्थे वर्तमानाद्धातोर्वर्तमाने लडित्यारभ्य यावदुणादयो बहुलमिति विभाषया वर्तमानवत्प्रत्यया भवन्तीति सूत्रार्थनिष्पत्त्या वर्तमानसमीपे भविष्यति करोमीति लडित्यर्थः। एतच्च प्रतिपत्तिविशेषानाश्रयणेनाद्यपद्यपूर्वव्याख्यानषट्कपक्षे। अन्यथा गच्छामीत्यादेर्वर्तमानार्थत्वेऽपि कालान्तरस्य प्रश्नवाक्यबललभ्यत्वेन वाक्यकालस्य पदसंस्कारेऽनुपयोगेन न तत्र वर्तमानवत्प्रत्यया इति विशेषप्रतिपत्तारं प्रत्येतन्नमाधानस्यासंभवात्। न च प्रकृते तादृशप्रश्नवाक्यस्याभावान्न तद्बलेन कालान्तरलाभ इति वाच्यम्, अत्रापि प्रश्नवाक्याहरणस्य वक्तर्यावश्यकत्वादिति द्रष्टव्यम्। अन्तिमव्याख्यानानुरोधेनाह सङ्क्षेपत इति॥ प्रक्रान्तत्वादिति। प्रारब्धत्वादित्यर्थः।

वा०र०— प्रतिज्ञानेनासङ्गतीति। सूत्रव्याख्यानकरणस्य हि ब्रह्ममीमांसाव्याख्यां करोमीत्येव प्रतिज्ञा करणीया। परमाख्यविद्येत्यादि प्रतिज्ञातुं व्याख्येयान्तरप्रतीतिजनकतया अभिप्रेताः असङ्गता इत्यसङ्गतिशङ्कामित्यर्थः। उभयत्र संबन्ध इत्यनेन सकृत् श्रुतत्वेऽपि योग्यतया स्थलद्वयसंबन्धः क्रियते इत्युक्तं भवति। प्रकर्षस्यावश्यकतायाः प्रागुपपादनात् प्रकर्षेण नत्वा इत्येव मूले उक्तम्। भावेऽप्यत्यन्तसामीप्यशब्दे वर्तमानगतस्य भूतभविष्यद्भ्यां सामीप्यस्याभिधानाङ्गीकारे वर्तमाने प्रत्ययविधानेनैवान्यसमीपेऽपि तस्मिन् तत्सिद्ध्या वर्तमाननिरूपितभूतभविष्यद्वृत्तसामीप्याभिधानाङ्गीकारे च भूतभविष्यत्कालयोः अभिधानाभावापत्त्या प्रत्ययविधानानर्थक्यप्रसङ्गेन सामीप्यवत् काललक्षणाङ्गीकारे च लाघवात् समीप इत्येव वाच्ये प्रयोजनाभावेन ष्यञः प्रयोगो व्यर्थ इत्याशङ्कायाः स्वार्थिकत्वं ष्यञोऽङ्गीकृत्य प्रयोजनोक्तया परिहारपूर्वकं सूत्रार्थं वदन्नेव वाक्यार्थमाह चातुर्वर्ण्यादीति। आदिपदेन चातुराश्रम्यमित्यादेः सङ्ग्रहः। समीपमेव सामीप्यमिति स्वार्थिकष्यञन्तप्रयोगश्चत्वारो वर्णाः एव

चातुर्वर्ण्येत्यादिरूपेण चातुर्वर्ण्यादिशब्देषु स्वार्थिकष्यञ्ज्ञापनार्थ इत्यर्थः । तथा चेति । सामीप्यपदस्य समीपार्थकत्वादित्यर्थः । भूते भविष्यति चेति । भूतभविष्यतावेव कालौ वर्तमानसमीपावित्यर्थः । धातोरिति । वर्तमानवत् प्रत्ययाः भवन्तीत्युत्तरेण संबन्धः । के ते प्रत्ययाः इत्यत उक्तं वर्तमान इत्यादि । उणादयो बहुलं इत्येतत्पर्यन्तं विहिता इति शेषः । वत्करणप्रयोजनादिकं तु स्मारयन् भावं त्यज्यनीत्यंतत् गीताभाष्यटीका-व्याख्यानाद्ये प्रपञ्चे भाष्यपदमञ्जर्यनुसारेणास्माभिः प्रतिपादितं ज्ञेयम् । प्रकृते विवक्षितं वर्तमानसमीपमाह भविष्यतीति । एतच्चेति । एतच्च पूर्वव्याख्यानषट्कपक्षे । तदपि प्रतिपत्तिविशेषानाश्रयणेन इति योजना । कामी प्रतिपत्तिविशेषः । कुतश्च तदनाश्रयणं एतत् षट्कपक्षे इत्येतत् प्रतिपत्तिविशेषप्रदर्शनपूर्वकं तदनाश्रयणं निमित्तमाह अन्यथेति । प्रतिपत्तिविशेषाश्रयणाङ्गीकारे आगच्छामीत्यादिरिति । अयमर्थः । भूते वर्तमानवत्प्रत्ययस्य भविष्यति वर्तमानवत्प्रत्ययस्य च एषः आगच्छामि इत्येवोदाहरणं कृत्वा कदा आगतोऽसीति भूते प्रश्नवाक्ये कदा आगमिष्यसीति भविष्यत्प्रश्नवाक्यं च मूलीकृत्य तदुत्तरतया उक्तोदाहरणयोजनस्य कार्यतया केवलस्य आगच्छामीति प्रयोगस्य भूतादिविषये प्रवृत्त्यभावेन यत्र कदा गन्तोऽसीत्यादिरूपेण प्रश्नवाक्यं प्रवृत्तं तदनन्तरं च एष आगच्छामीति तदुत्तरभूतमुदाहरणं प्रवृत्तम् । तत्रातीतानागतकालघटितप्रश्नवाक्यानुसारेण तदुत्तरागच्छामि इत्युदाहरणं भूतस्य भविष्यतो वा कालस्य प्रतिपत्त्यर्थं वर्तमानवत् प्रत्ययविधानमिति किलाङ्गीकार्यम् । न चैतत् युक्तम् । प्रश्नवाक्यस्य मूलतायाः आवश्यकत्वे आगच्छामीत्येव वचनेऽपि कालान्तरावगते प्रश्नवाक्यलभ्यत्वस्यावश्याङ्गीकार्यत्वेन तद्वाक्यावगतकालस्यागच्छामि इति लट्प्राप्तिरूपपदसंस्कारे उपयोगाभावेन उक्तोभयविधप्रश्नवाक्यादेव तदुत्तरभूतं आगच्छामीत्यत्र वर्तमानार्थत्वेऽपि भूतभविष्यद्रूपवर्तमानसमीपकालावगतेः सत्त्वात् अन्ययासिद्धकालापगमे तदवगमाय न वर्तमानवत्प्रत्ययविधानं कर्तव्यम् । ततः तदर्थकाष्टसूत्र्यात्मकमेतत् प्रकरणं नारभ्यमिति सूत्रप्रत्याख्यानरूपेण विशेषप्रतिपत्तारं प्रति वर्तमानवत्प्रत्ययबलेन वर्तमानसमीपभविष्यत्कालावगतिरिति समाधानस्यासंभवादिति । उक्तं वर्तमानेतिसूत्रीयकाशिकायाम् । ये मन्यन्ते गच्छामीतिपदं वर्तमान एव वर्तते । कालान्तरमतिस्तु वाक्यात् भवति । न च वाक्यगम्यकालः । पदसंस्कारः इत्यादि । न च प्रकृते तादृशेति । एषः आगच्छामि इत्यादिप्रयोगस्थले कदेति प्रश्नवाक्यनियमोक्त्यनुसारेण प्रागुक्तरीत्या तत्र कालान्तरावगमेऽपि प्रकृते तथाविधवाक्यप्रयोगाभावेन भविष्यत्कालस्यात्र प्रत्ययवाच्यत्वेनाङ्गीकृतस्य वाक्यलक्ष्यत्वाभावात्तत एवानन्यलभ्यं तत्कालं वाच्यं निमित्तीकृत्य लट्प्राप्तिरूपपदसंस्कारसंभवेन तत्कालस्य तत्रोपयोगितया तत्र वर्तमानवत्-प्रत्ययाङ्गीकारो युक्त इत्याशयः । अत्रापीति । प्रत्यक्षप्रश्नवाक्याभावेऽपि तत्कार्याहितस्यापि तस्य सत्त्वाभावे कालान्तराभिधायकप्रयोगस्यैवाकरविरुद्धतया प्रवृत्त्ययोगप्रसक्त्या स्थलान्तर इवात्रापि प्रश्नवाक्यसद्भावमिच्छता प्रागुक्तदोषतादवस्थ्यमिति भावः । ननु प्रश्नानुसारेण कालावगतिरुत्तरवाक्ये कदा स्यात् । यत्र तदवगमकं किञ्चित् स्यात् न च तत् प्रतीयत इति चेत् न । कदागतोऽसीति प्रश्नोत्तरे एषः आगच्छामि इत्यत्र एष इतिपदेनागमनाविनाभूतं यत् रूपं धूलीपरीतता प्रस्वेदादियुक्तं तत् प्रतिनिर्दिश्यते । तेन चेदानीमेवागतमिति वर्तमानसमीपभूतकालो द्योत्यते । कदा गमिष्यसि इति एतत् उत्तरवाक्ये एषः आगच्छामि इत्यत्र त्वेष इति पदेनागमनाविनाभूतं परिकरबन्धमुक्तरूपस्य निर्देशात् इदानीमेवागमिष्यामीति वर्तमानसमीपभविष्यत्कालो द्योत्यते इति तावत् सिद्धम् । तत् इहापि तं पूर्वप्रणतं

नारायणं नत्वाऽहं परमाख्यविद्याव्याख्यां करोमीत्युक्ते व्याख्यानाविनाभूतदेवतादिप्रणामरूपपरिकरबन्धरूपनिर्देशेन इदानींमेव करिष्यामीति वर्तमानसमीपभविष्यत्कालद्योतनसंभवात् इति ज्ञेयम्। उपलक्षणं चैतत्। गङ्गासमीपे तीरे गङ्गात्वारोपवत् वर्तमानसमीपभूते भविष्यति वर्तमानत्वारोपेणैव वर्तमानवत् प्रत्ययसंभवात् नेदं सूत्रं प्रारब्धव्यं इत्याकरे अस्य प्रत्याख्यानात् वर्तमानत्वारोपेण वर्तमानवत् प्रत्ययोपपत्तौ न सामीप्ये तत् प्रत्ययविधानं आवश्यकं इति विशेषप्रतिपत्तारं प्रति एतत्समाधानस्य संभवादि द्रष्टव्यम्।

कुण्डल०— समर्थयमान इति। परमाख्यविद्याशब्दार्थकथनेनेति भावः। ननु व्याख्यानस्य क्रियमाणत्वेन लट्प्रयोगप्रयोजकस्य वर्तमानशब्दितारब्धापरिसमाप्तक्रियोपलक्षितकालस्याभावात् कथं व्याख्यां करोमीति लट्प्रयोग इत्यत आह **वर्तमानेति**। वर्तमानसामीप्ये वर्तमानवद्वेतिसूत्राल्लट्प्रयोगो युक्त इति भावः। ब्रह्ममीमांसार्थप्रतिपादकेनाद्यश्लोकेन सङ्क्षेपतो व्याख्यानस्योपक्रान्तत्वाद्वा लट्प्रयोगो भवतीत्याह **सङ्क्षेपत इति**।

विद्व०— ननु व्याख्यानं इतःपरं कर्तुं मङ्गलाचरणादिकं कृतं नेदानीं व्याख्यानमुपक्रान्तं तत्कथं वर्तमानार्थकलटः प्रयोगः इत्यत आह **वर्तमानेति**। वर्तमानमङ्गलकरणसमीपकालवृत्तित्वेन वर्तमानत्वोपचार इत्यर्थः। आद्यपद्यान्तिमव्याख्यानानुसारेण मुख्य एव प्रयोग इत्याह **सङ्क्षेपत इति**।

चषक:— अथाद्यसूत्रावयवव्याख्यारूपोतत्ववाचीत्यादिप्राक्तनग्रन्थस्य सूत्रव्याख्येयतासमर्थनौपयिक-प्रमेयप्रतिपादनतात्पर्यकतया भविष्यदर्थकप्रत्ययप्रयोगस्यैवौचिती न प्रारब्धापरिसमाप्तक्रियोपलक्षितकालविवक्षा-निबन्धनवर्तमानार्थलट्प्रयोगस्येत्यत आह **वर्तमानेति**। **बीजान्तरमभिधत्ते सङ्क्षेपत इति**। 'श्रोतृबुद्धी'त्याद्युक्तदिशेति भावः।

काशी०— द्वितीयश्लोकवैयर्थ्यवारणार्थमवतारयति **नारायणेति**। अत्र सकलकार्यारम्भे श्रीहरिगुरु-नमस्कारावश्यकतासिध्यर्थं देवताप्रणामस्येति नोक्तम्। अत एव कार्यारम्भ इत्येवोक्तम्। न तु ग्रन्थारम्भ इति। अवश्यमित्येकेनान्यस्यागतार्थतामाह। **प्रतिजानीत इत्यस्य शिष्यावधानार्थमित्यादिः**। नारायणस्य प्रक्रान्ततालाभाय पूर्वप्रणतमिति प्रणम्येत्यस्य पूर्वश्लोकोक्तप्रणामानुवादत्वप्रतीतिपरिहारायाह **अन्वपीति**। नन्वोतत्ववाचीत्यादिना व्याख्यायाः करिष्यमाणत्वात्कथं करोमीति वर्तमानप्रयोग इत्यत आह **वर्तमानेति**। वर्तमानसामीप्यमपेक्ष्य वर्तमानार्थकलट्प्रयोग इत्यर्थः। 'वर्तमानसामीप्ये वर्तमानवद्वे'ति सूत्रेण वर्तमानसामीप्येऽपि लड्विधानादिति भावः। इदं च व्याख्यापदस्य प्रतिपदव्याख्यापरत्वाभिप्रायेण। **सङ्क्षेपसाधारणव्याख्यामात्रपरत्वे** तु लटो वर्तमानार्थत्वमपि घटयति। **सङ्क्षेपत इति**। न च सङ्क्षेपतो व्याख्यानस्यातीतत्वात्कथं वर्तमानत्वमिति वाच्यम्। यतो वर्तमाने लडिति सूत्रे लट्प्रयोगक्षण एव न वर्तमानपदार्थः किन्त्वारब्धापरिसमाप्तप्रकृतक्रियोपलक्षितो लट्प्रयोगाधिकरणकालः। तथाच व्याख्यानक्रियाया आद्यक्षणादासमाप्ति सर्वस्यापि कालस्य तथात्वसंभवान्न दोषः। यद्यपि सूक्ष्मकालप्रवाहातिरिक्त-

स्थूलकालानभ्युपगमे लट्प्रयोगाधिकरणत्वं तदन्तर्गतसूक्ष्मकालस्यैवेति न तद्वृत्तित्वं व्याख्यानकृतेरस्ति । तथापि क्षणदिनमासवर्षत्वादुपाधीनां प्रवाहधर्माणामावश्यकत्वेन लट्प्रयोगाधिकरणतावच्छेदकतादृशोपाधिविशेषाव-च्छिन्नकाले तत्कृतिसत्त्वान्न दोषः । वस्तुतस्तु लट्प्रयोगाधिकरणकाल एव लभ्यर्थः । तस्य च स्ववृत्तित्वानधिकरण-प्रागभावप्रतियोगित्वस्ववृत्तित्वानधिकरणध्वंसप्रतियोगिप्रकृतक्रियासमानकर्तृकत्वोभयसंबन्धेन क्रियायामन्वयः । लट्प्रयोगाधिकरणकाल एव स्वपदार्थः । तद्वृत्तित्वानधिकरणप्रागभावप्रतियोगित्वं तद्वृत्तित्वानधिकरणध्वंस-प्रतियोग्यन्त्यकृतिसमानकर्तृकत्वं चायकृतेरस्तीत्युक्तोभयसंबन्धेन तादृशकालविशिष्टन्वाश्रय तादृशकृतिरूप-क्रियायामक्षतत्वान्नोक्तानुपपत्तिः । कार्यारम्भात्पूर्वं कार्यनिष्पत्तेरुत्तरं च करोतीत्यादिलट्प्रयोगवारणाय संबन्ध-द्वयनिवेशः । अधिकमन्यत्रानुसन्धेयम् ।

गूढ०— नन्वाद्यपद्येन नारायणवन्दनस्य कृतत्वात्पुनरनेनापि पद्येन वन्दने पौनरुक्त्यम् । यदि च बहुशो वन्दनस्य फलविशेषसिद्धचङ्गत्वात्पुनर्वन्दनमिति । तर्हि प्रथममेव बहुशो नमामीति वक्तव्यमित्यतस्तन्निवृत्तिपूर्वमाह नारायणेति । अत्र पद्ये पूर्वार्धे गुरुप्रणामः । व्याख्यां करोमीत्यनेन मीमांसाशास्त्रव्याख्यानप्रतिज्ञा । व्याख्यां अन्वपीत्यनेन तत्समर्थनमिति विवेकः । ननु गुरुप्रणामो न कर्तव्यः प्रयोजनाभावेन वैयर्थ्यादित्यत उक्तम् । नारायणप्रणामस्येव गुरुप्रणामस्याप्यभिमतसिद्धचङ्गतया कार्यारंभे अवश्यमनुष्ठेयत्वादिति । ननु नारायणप्रणाम-गुरुप्रणामयोरभिमतसिद्धौ प्रत्येकं वा कारणत्वं समुच्चयेन वा । अथ विकल्पेन । नाद्यः । तथा सति नारायणप्रणाम-मात्रेण गुरुप्रणाममात्रेण वाभिमतसिद्ध्यापत्तेः । न द्वितीयः । तथात्वे नारायणप्रणाममात्रेणाभिमतसिद्धिर्न स्यात् । न तृतीयः । गुरुप्रणामस्यावश्यकत्वाभावेन ग्रन्थारंभे नियमतस्तदनुष्ठानं न स्यात् । तथाच कथमेतदिति । मैवम् । दण्डचक्रादिवत्प्रत्येकमेव तयोः कारणत्वाङ्गीकारात् । यथा दण्डचक्रयोः दण्डत्वेन दण्डस्य चक्रत्वेन चक्रस्य घटं प्रति प्रत्येकं कारणत्वेऽपि दण्डमात्रेण चक्रमात्रेण न घटोत्पत्तिस्तथा प्रकृतेऽपि नारायणप्रणामत्वेन नारायणप्रणामस्य गुरुप्रणामत्वेन गुरुप्रणामस्य कारणत्वेऽपि नान्यतरमात्रेणाभिमतसिद्धिरिति उभयोरप्याव-श्यकत्वमिति न कश्चिद्दोषः । प्रणम्येत्यस्यान्वपि चेत्यनेन संबन्धं दर्शयितुं विशेषार्थकथनाय व्यवहितपदाना-मन्वयमाह तमिति । ननु करोमीति वर्तमानार्थकलट्प्रयोगो न युक्तः । व्याख्यानस्य करिष्यमाणत्वेन वर्तमान-त्वाभावादित्यत आह वर्तमानेति । वर्तमानसामीप्ये वर्तमानवद्वेति सूत्रादिति भावः । संक्षेपत इति । आद्यश्लोकेन सर्वशास्त्रार्थस्य संक्षेपतः कथनेनेत्यर्थः ।

पुनःप्रणामस्य उपपादनं, नारायणस्य गुरुत्वोपपादनं च—

२० सु०— ननु प्रणतस्य पुनः प्रणामः किमर्थः । न हि प्रणामावृत्तिर्विघ्नविघातादि-हेतुरित्यत्र नियामकमस्ति । भावे वा पूर्वश्लोक एव बहुशः सन्नमामीति वक्तव्यम् । मैवम् । गुरुत्वेनात्र प्रणामाचरणात् ।

कथं नारायणस्य गुरुत्वमित्यत आह शास्त्रप्रभवमिति । शास्त्रशब्देन प्रकृतत्वात् ब्रह्ममीमांसाशास्त्रं वेदादिकं चोच्यते । प्रभवति उत्पद्यते प्रथममुपलभ्यते वा यस्मात्सः प्रभवः । यथासंभवं शास्त्रस्य प्रभवः शास्त्रप्रभवः, तम् । यो हि यच्छास्त्रे प्रवर्तते तस्य तत्प्रभवो गुरुरिति प्रसिद्धमेव ।

प्रकृतशास्त्रसंप्रदायप्रवर्तकत्वाच्च नारायणस्य गुरुत्वमित्याह जगद्गुरूणामिति । जगतः एतच्छास्त्रप्रवक्तृणां ब्रह्मादीनाम्, अञ्जसा मुख्यतया न तु वयोऽधिकत्वादिमात्रेण । गुरुम् अस्य शास्त्रस्य प्रवक्तारमिति यावत् ॥

परि०— प्रकृतत्वादिति । सुवाक्यैरित्यनेनेति भावः । पौरुषेयानुरोधेनाह उत्पद्यत इति । अनादिवेदाभिप्रायेणाह प्रथममिति । 'ऋदोरबि'तिसूत्रे ऋवर्णान्तादुवर्णान्ताच्चाप्रत्ययो भवति कर्तृभिन्न-कारक इत्युक्तेरिति भावः ॥ 'भुवः प्रभव' इति पञ्चमीविधानाद्यस्मादित्युक्तम् । 'कथं गुरुत्वमि'त्यस्य कथमनेन निरास इत्यत आह **यो हीति ।**

जगतः साधुवर्गस्य । मानस्तेनेभ्य इत्यादेः । गुरूणामित्यस्यार्थ एतच्छास्त्रप्रवक्तृणामिति । उक्तं हि दशमतात्पर्ये 'गुरुर्ब्रह्माऽस्य जगतो दैवं विष्णु'रित्यादि । वक्ष्यति चात्राप्युपासनापादे 'गुरुर्ब्रह्माऽखिलानां चे'त्यादि ॥ 'कर्तृकर्मणोः कृती'ति कर्मणि षष्ठी ॥ गुरुमित्यस्यार्थः अस्येति । प्रागुक्तपौरुषेयापौरुषेयग्रन्थस्येत्यर्थः ॥

यादु०— जगत इति । सज्जनसमुदायस्येत्यर्थः ।

वं०प०— ननु न देवताप्रणामो व्यसनियता क्रियते, किन्तु विघ्नविघातादिप्रयोजनोद्देशितया । न प्रणामावृत्तिरेव विघ्नविघातहेतुरतः प्रणतस्यापि पुनः प्रणामोऽयुक्त एवेत्यत आह न हीति ॥

आनन्दः— विघ्नविघातादीत्यत्रादिशब्देन समाप्तिप्रचयगमनपरिग्रहः । ननु बहूनां विघ्नानां एकप्रणामेन निवृत्त्यसंभवाद्विघ्नसमसंख्यप्रणामावृत्तेर्विघ्नविघातादिहेतुत्वे नियामकमित्यत आह भावे बेति । शास्त्रशब्दस्य सामान्याकारेण प्रयुक्तत्वात्किमत्र शास्त्रशब्देन गृहीतमित्यत आह शास्त्रशब्देनेति । प्रकृतत्वादिति सुवाक्यैरित्यत्रेत्यर्थः । यद्वा व्याचिख्यासितत्वेन ब्रह्ममीमांसाशास्त्रस्य तन्निर्णयत्वेन वेदादेश्च बुद्धिसन्निहितत्व-रूपप्रकृतत्वादित्यर्थः । ननु प्रभवमित्यत्र प्रभवनं प्रभव इति भावसाधनत्वं वाश्रीयते । प्रभवतीति प्रभव इति कर्तृसाधनत्वं वा । नाद्यः । तथा सति शास्त्रस्य प्रभवो यस्मादिति व्यधिकरणो बहुव्रीहिः स्यात् । तथा च न वृत्तिपदार्थप्राधान्यं द्वितीयेऽपि शास्त्रं प्रभवो यस्मादिति बहुव्रीहिः स्यादिति वृत्तिपदार्थप्राधान्याप्राप्तिरेव किञ्च

प्रभवशब्देनोत्पत्तिरुपलब्धिर्वा । नाद्यः । वेदादेरपौरुषेयत्वेन तदुत्पादकत्वासंभवात् । न द्वितीयः । ब्रह्ममीमांसायाः प्रथममभावेन तदुपलब्धिर्न संभवतीत्यतस्तद्वचाचष्टे प्रभवतीति । उत्पत्तेर्वेदे उपलब्धे ब्रह्ममीमांसायामसंभवादाह यथासंभवमिति । एतावतापि कथं-गुरुत्वमित्यत आह यो हीति । गुरुत्वस्य पूर्वमुपपादितत्वात्पुनस्तन्नुपपादने पौनरुक्त्यमित्यतो हेत्वन्तरेण तदुपपादनान्न पौनरुक्त्यमित्याह प्रकृतेति । अंजसेत्यस्य तात्पर्यकथनं न त्विति ।

कं०प्र०— गुरुत्वेनेति । गुरुत्वेन निमित्तेन प्रणामाचरणादित्यर्थः । प्रकृतत्वादिति । व्याख्येयतया ब्रह्ममीमांसाशास्त्रं प्रकृतं तन्निर्णेतव्यार्थतया वेदादिकं च प्रकृतमिति भावः । ननु शास्त्रशब्देन ब्रह्ममीमांसाया वेदादेश्चोक्तौ तत्प्रभवत्वं नारायणस्य न युक्तं वेदस्यापौरुषेयत्वादित्यत आह प्रभवतीति ।

श्रीनिधि०— प्रथम्युपलभ्यते यस्मादिति । अत्र 'भुवः प्रभवः' इत्यनेन भूकर्तुः प्रभवस्य आपादानसंज्ञायां 'अपादाने च' पञ्चम्यां यस्मादिति विग्रहप्रदर्शनम् ।

बा०चं०— अत्र शास्त्रप्रभवमित्यादिविशेषणानां प्रणामप्रयोजकत्वं प्रतीयमानं साक्षान्न संभवतीति गुरुत्वमुखेनैव तदित्यभिप्रेत्य गुरुत्वविवक्षाया आवश्यकत्वं दर्शयितुं शङ्कामुत्थापयति नन्विति ॥ ननु श्रेयांसि बहुविघ्नानीत्यतो विघ्नानां बहुत्वाद्विघ्नसमसङ्ख्यमङ्गलस्यैवामिमतसिद्धयङ्गत्वात्तदावृत्तिर्युक्तेत्यत आह भावे वेति ॥ प्रकृतत्वादिति । 'अखिलैः सुवाक्यैरि'त्यनेनेत्यर्थः ॥ उभयत्रोभयान्वयभ्रान्तिं निवारयति यथासंभवमिति ॥ अत्र 'प्रवर्तते' इत्युक्ता प्रवृत्तिर्वक्ष्यमाणरीत्या पुरुषार्थसाधनेच्छाप्रयत्नलक्षणा द्रष्टव्या अतो न कश्चित्क्षुद्रोपद्रवः ।

बा०र०— मूले प्रणामः किमर्थ इति । विघ्नविघातादेः प्रणाममात्रेण सिद्धत्वात् पुनः प्रणामोऽनर्थक इत्यर्थः । श्रेयांसि बहुविघ्नानि इत्यत इति । ननु श्रेयांसीति वाक्यं न विघ्नभूयस्त्वनियामकम् । प्रमत्तानुष्ठितकर्मणि श्रेयोरूपे व्यभिचारेण विघ्नसंभावनामात्रपरत्वात् । अत एव शशधरटीकायां श्रेयांसि इति वाक्यं विघ्नसद्भावप्रमाणत्वेनाशङ्क्य प्रमत्तानुष्ठितकर्मणि व्यभिचारेणास्य संभवमात्रत्वादित्युक्तम् । अत एव श्रेयांसि बहुविघ्नानि इति विघ्नानां संभावितत्वादित्येव तत्त्वनिर्णयटीकायामुक्तमिति चेत्सत्यम् । तथापि तस्य निश्चायकत्वमाश्रित्य एतच्चलनमित्याशयेन वा संभावितत्वेऽपि पाक्षिकत्वस्यापीति तत्त्वनिर्णयटीकोक्तेः मङ्गलवादीयोत्तरमूलोदाहृतपाक्षिकोऽपि दोषः परिहरितव्य इति न्यायेन संभावितविघ्ननिरासायापि प्रणामावृत्तिः आवश्यक्येवेत्याशयेनोक्तप्रमाणमिधानं इत्यदोषः । विघ्नसमसंख्यमङ्गलस्यैवेति । अयमर्थः । यत्र विघ्नाः दश तत्र दशमङ्गलैरेव तन्निवृत्तिः यत्र च विघ्नाः दश मङ्गलानि तु पञ्च तत्र पञ्चभिः पञ्चानां नाशेऽपि नान्यविघ्नपञ्चकनाशः । तेन न समाप्तिर्भवतीति तदर्थं तावन्मङ्गलान्तराणि अपेक्षितानि । यत्र पुनः एक एव बलवत्तरो विघ्नः अनेकमङ्गलनिवर्त्यः यत्र च एकेनैव प्रबलेन मङ्गलेनानेकेषां विघ्नानां नाशः तत्र समसंख्यत्वं नाम मङ्गलस्य तावत् विघ्ननिवृत्त्यै पर्याप्तमेवेति न कश्चित् क्षुद्रोपद्रवः । न चैवं मङ्गलभूयस्त्वेऽपि विघ्नाल्पतास्थले कथं समसंख्यतानिर्वाह इति वाच्यम् । उत्तरसंख्यायां पूर्वसंख्यायाः अन्तर्भूततया मङ्गलानामपि तत्संख्याकत्वोपपत्तेः अधिकमङ्गलानां वैयर्थ्यं च सर्वं समाधेयम् । अत एव

नास्तिकाद्यनुष्ठितकर्मणि जन्मान्तरीयमङ्गलकल्पनया व्यतिरेकव्यभिचारपरिहरणाभियुक्तानां इति दिक् । शास्त्रपदेन सकलशास्त्रप्रसङ्गवारणायाह **शास्त्रशब्देनेति** मूलम् । **अखिलैरिति** । उपलक्षणं चैतत् । व्याचिख्यासिततया ब्रह्ममीमांसाशास्त्रस्य तन्निर्णेतव्यतया च वेदादेर्बुद्धिसन्निहितत्वेन मुख्यप्रकृतत्वादित्यपि द्रष्टव्यम् । ततश्च प्रकरणवशेन सैन्धवादिशब्देष्विव विशेषपरत्वाश्रयणं युक्तमिति मूलाशयः । प्रभवशब्दे हि ऋदोरप् इत्यनेन ऋवर्णान्तो वर्णान्तेभ्योऽप्प्रत्ययविधायकेनोवर्णान्तभूधातोः अप्प्रत्यय इति वाच्यम् । स च प्रभवतीति प्रभव इति न कर्तरि अकर्तरि इत्यनुवृत्त्या कर्तरि तदप्राप्तेः । नापि प्रभवनं प्रभव इति भावो बादरायणस्य शास्त्रप्रभवनत्वाभावात् । तस्मात् शास्त्रस्य प्रभवनं यस्मादिति बहुव्रीहिराश्रयणीयः तदा व्यधिकरणबहुव्रीहिरुपपादनसापेक्षोऽङ्गीकार्यः । जघन्यश्चेति मनसि कृत्वा निर्दोषपक्षमाह **प्रभवति उत्पद्यत इत्यादि** । अत्रास्मात् इति अपादाननिर्देशात् अपादानेऽप्प्रत्ययः । **यस्मादिति** मूले तात्पर्योक्तावपि अस्मादित्येवाभिप्रेतत्वात् । शास्त्रेत्याद्युक्त्या तत्पुरुषश्च इत्युक्तं भवति । **उभयत्रोभयेति** । ब्रह्मसूत्रेषु उत्पन्नत्वोपलब्धत्वयोः वेदेऽपि च तयोरन्वय इति भ्रान्तिमित्यर्थः । वेदे उपलब्धत्वस्येवोत्पन्नत्वस्यापि सूत्रेषु उत्पन्नत्वस्येवोपलभ्यत्वस्याप्यन्वय इति भ्रान्तिमिति यावत् । तां वारयितुं यथासंभवमित्युक्तमित्यर्थः । शास्त्रकर्तुः गुरुत्वप्रसिद्धिमुपपादयितुं प्रवृत्ते यो हि यत्र शास्त्रे प्रवर्तते इति मूले प्रवृत्तिपदार्थाप्रतीतेः आह **अत्र प्रवर्तते इत्युक्तेति । वक्ष्यमाणरीत्येति** । त्रिविधा हि पुंसां चित्तवृत्तिः इत्यादिमूले साधनगोचराविच्छाप्रयत्नौ प्रवृत्तिः इत्युच्यते इत्यादि प्रतिपादनादिति भावः । **न कश्चित् क्षुद्रेति** । प्रवृत्तेः प्रयोजनादिनिश्चयसाध्यत्वात् तन्निश्चये सति तत्र प्रवृत्तिः प्रवृत्तौ च तन्निश्चय इत्यन्योन्याश्रयत्वम् । प्रयोजनादिनिश्चायकान्तराङ्गीकारे तु अनवस्थेत्यादिः क्षुद्रोपद्रवो नेत्यर्थः । एतेनैव यो हीत्युक्तरीत्या गुरुत्वे परशास्त्रकर्तृणामपि गुरुत्वं स्यादित्यपि निरस्तम् । पुरुषार्थसाधनत्वबुद्धेरित्यस्यापि तत्र प्रवेशानङ्गीकारात् ।

स०न्न०— यथासंभवमिति । वेदस्योपलंभकत्वेन, मीमांसादेरुत्पादकत्वेन प्रभव इत्यर्थः ।

कुण्डल०— ननु तमेव शास्त्रप्रभवं प्रणम्येत्यनेन नारायणस्यैव शास्त्रप्रभवत्वेन प्रणामः प्रतिपाद्यते । तन्न संभवति । शास्त्राणां पाणिनिजैमिनिगौतमादिप्रणीतत्वप्रसिद्धेरित्यत आह **शास्त्रशब्देनेति । प्रकृतत्वादिति । व्याख्येयतया ब्रह्ममीमांसाशास्त्रस्य तन्निर्णेतव्यार्थतया वेदादेश्च प्रकृतत्वादित्यर्थः । शास्त्रशब्देन पौरुषेयापौरुषेययो**रुभयोरपि ग्रहणे तत्र प्रभवत्वं भगवतो यथासंभवं दर्शयति **प्रभवतीति** । ननु शास्त्रप्रवर्तकत्वमात्रेण कथं तस्य गुरुत्वमित्यत आह **यो हीति** ।

विद्व०— विशदव्याख्यानमपेक्ष्य विचारोक्तिः । **प्रकृतत्वादिति** । व्याख्येयतया निर्णेयतया प्रकृतत्वात् । अखिलैस्सुवाक्यैरिति पूर्वोक्तया प्रकृतत्वादिति वा । **यथासंभवमिति** । ब्रह्ममीमांसाशास्त्रस्य पञ्चरात्रेतिहासपुराणरूपस्य चोत्पादकः । वेदानां प्रथमोपलब्धेत्यर्थः । **वयोधिकत्वादीत्यत्र** बन्धुज्येष्ठत्वादिग्रहणम् ।

चषकः— गुरुत्वेनेति । निरूपकतया प्रणामान्वयि हेतुत्वं तृतीयाऽर्थः । **यस्मात्स प्रभव इति** । 'ऋदोरबि'त्यनुशिष्टाप्प्रत्ययस्य कर्तृभिन्नकारकसामान्यार्थकत्वस्याकरे व्यक्ततया 'भुवः प्रभव' इति सूत्रविहित-

पञ्चम्युपस्थाप्यापादानार्थतायां निर्बाधत्वादिति भावः । जगतः योग्यचेतनसङ्घातस्य । प्रकृत्यर्थजगदन्वित-लुप्तषष्ठीप्रत्यायितसंबन्धितापन्नानां लुप्ततत्त्वपदप्रकृतिकषष्ठ्यर्थकर्मतानिरूपकोपदेशनक्रियाकर्तृणामिति अर्थः ।

काशी०— शास्त्रेत्यादिविशेषणानि सार्थकयितुमाक्षिपति नन्विति । नन्वावृत्तिरसकृदुपदेशादिति न्यायेन श्रवणाद्यावृत्तिवत्प्रणामावृत्तेरेव फलहेतुत्वात्पुनः प्रणाम इत्यत आह न हीति । दृष्टफले फलपर्यन्तं साधनावृत्त्यपेक्षायामप्यदृष्टफले न तथेति भावः । ननु प्रचुरविघ्नशङ्क्या प्रचुरमङ्गलविनाश्यबलवद्विघ्नशङ्क्या वा प्रणामावृत्तिरावश्यकीत्यत आह भाष्ये वेति । प्रणामावृत्तिप्रयोजकविघ्नप्राचुर्यादिशङ्कासद्भावे वेत्यर्थः । बहुशः कर्तव्यमिति संबन्धः । यद्वा । सन्नमामीत्यतःपूर्वं बहुश इति प्रयोक्तव्यमित्यर्थः । लाघवेनैव प्रणामावृत्तिज्ञापनसंभवेन लाघवादिति भावः । यद्यपि मङ्गलमात्रस्य विघ्नविघातादिहेतुतया निखिलेत्यादिविशेषणैरपि स्मरणाद्यात्मक-मङ्गलप्राचुर्यलाभः संभवति । तथाऽपि नेषां पूर्वोक्तप्रयोजनान्तरोपक्षीणत्वान्न मङ्गलप्राचुर्यावश्यकत्वसूचकने-त्याशयः । गुरुत्वेनेति । तत्त्वज्ञानप्रदत्वेनेत्यर्थः । अथ गुरुप्रणाम एव किमर्थः । हरिप्रणामेनैव फलसिद्धेः । न चैकस्य विघ्ननिवर्तकत्वमन्यस्य प्रबोधादिप्रयोजकत्वमित्युभयावश्यकतेति वाच्यम् । विशिष्टैव देवतेत्यादिना एकस्योभयशक्त्युक्तेः । न च तृणारणिमणिन्यायेनोभयोर्वैकल्पिकमेकफलहेतुत्वमिति वाच्यम् । उभयस्य अनावश्यकतापत्तेरिति चेन्न । अकरणप्रयुक्तप्रत्यवायपरिहारार्थत्वेन फलातिशयार्थत्वेन च तदावश्यकत्वात् । वस्तुतस्तत्तद्गुणप्रकारेण प्रणामप्रसन्नस्य भगवत एव तत्तत्फलप्रदत्वम् । तं यथा यथोपासते तदेव भवतीत्यादिश्रुतेः । तथा च ज्ञानोपदेष्टृत्वादिना गुर्वादिप्रणामप्रसन्नस्यान्तर्यामिण एव ज्ञानादिप्रबोधहेतुत्वान्न कश्चिद्दोषः । देवतायाः अनुग्राहकत्वेन गुरोरुपदेष्टृत्वेनोभयविधप्रणामस्याप्यावश्यकत्वात् । प्रकृतत्वादिति । गुरुवाक्यैरित्यनेन प्रकृतत्वादित्यर्थः । यद्यपि प्रक्रमानुसारेण वेदादिकमादौ ग्राह्यम् । तथाऽपि सकृदुक्तशास्त्रपदाद्वेदादिप्रतीतौ न पौर्वापर्यमिति ज्ञापनाय ब्रह्ममीमांसाशास्त्रमादौ गृहीतम् । यद्वा । प्रकृतत्वादित्यस्य व्याचिख्यासितत्वेन तन्मूलत्वेन च बुद्धिसन्निहितत्वादित्यर्थः । बुद्धिसन्निधानक्रमेण च सूत्रश्रुतिपुराणादिग्रहणमिति ध्येयम् । यद्यप्युत्पन्नत्वस्य वेदन्यावृत्ततयेऽपि प्रथमोपलब्धत्वं वेदसूत्रादिसाधारणम् । तथाऽपि सूत्रादिकं प्रति कर्तृत्वमपि गुरुत्वप्रयोजकमिति ज्ञापयितुमुत्पन्नत इत्युक्तम् । अत एव वेदादीत्यादिपदग्राह्यस्मृत्यादिसङ्ग्रहाय यथासंभवम् इत्युक्तम् । अन्यथा यथाक्रममित्यवक्ष्यत् । शास्त्रस्य प्रथमोपलम्भः श्रवणरूपः । शास्त्रप्रभवत्वस्य गुरुत्वप्रयोजकत्वमुपपादयति यो हीति । यत्र शास्त्रे यच्छास्त्राध्ययनादौ शास्त्राभासप्रभवस्य गुरुत्ववारणाय शास्त्रपदम् । शिष्यते यथावस्थितं प्रतिपाद्यतेऽनेनेति वक्ष्यमाणव्युत्पत्त्या वेदवेदानुकूलग्रन्थानामेव शास्त्रत्वान्न दोषः । प्रवर्तन इत्यनेन पुरुषार्थसाधनप्रयत्नस्य विवक्षितत्वान्नातिप्रसङ्ग इत्यप्याहुः । प्रसिद्धमेवेत्यनेन शास्त्रप्रभवत्वेन गुरुमित्यनुक्तावपि न न्यूनतेति सूचितम् । संप्रदायेति । उपदेशपरंपरा प्रथमप्रयोजकत्वादित्यर्थः । यद्यप्यन्यं प्रति संप्रदायप्रवर्तकत्वं न स्वगुरुत्वप्रयोजकम् । तथाऽपि यो यस्य संप्रदायप्रवर्तकः स तस्य गुरुरिति व्याप्तिसूचनाय तदुक्तिः । जगतो रुद्रादेः । मुख्यव्यावृत्त्या साक्षादुपदेष्टृत्वेन । गुरुं तत्त्वज्ञानप्रदम् । फलितमाह अस्येति ।

गूढ०— विघ्नविघातादीत्यत्रादिशब्देन समाप्तिप्रचयगमनपरिग्रहः । ननु बहूनां विघ्नानां एकप्रणामेन निवृत्त्यसंभवाद्विघ्नसमसंख्यमङ्गलत्वमेव प्रणामावृत्तेर्विघ्नविघातादिहेतुत्वे नियामकमित्यत आह **भावे वेति** । शास्त्रशब्दस्य सामान्याकारेण प्रयुक्तत्वात् किमत्र शास्त्रशब्देन गृहीतमित्यत आह **शास्त्रशब्देनेति** । **प्रकृतत्वादिति** । सुवाक्यैरित्यत्रेत्यर्थः । यद्वा व्याचिख्यासितत्वेन ब्रह्ममीमांसाशास्त्रस्य तन्निर्णेयत्वेन वेदादेश्च बुद्धिसन्निहितत्वरूपप्रकृतत्वादित्यर्थः । ननु प्रभवमित्यत्र प्रभवनं प्रभव इति भावसाधनत्वं वा आश्रीयते । प्रभवतीति प्रभव इति कर्तृसाधनत्वं वा । नाद्यः । तथा सति शास्त्रस्य प्रभवो यस्मादिति व्यधिकरणो बहुव्रीहिः स्यात् । तथाच न वृत्तिपदार्थप्राधान्यम् । द्वितीयेऽपि शास्त्रं प्रभवो यस्मादिति बहुव्रीहिः स्यादिति वृत्तिपदार्थप्राधान्याप्राप्तिरेव । किञ्च प्रभवशब्देनोत्पत्तिरुपलब्धिर्वा । नाद्यः । वेदादेरपौरुषेयत्वेन तदुत्पादकत्वासंभवात् । न द्वितीयः । ब्रह्ममीमांसायाः प्रथममभावेन तदुपलब्धेरसंभवादित्यतस्तद्वचाचष्टे **प्रभवतीति** । उत्पत्तेर्वेदे उपलब्धेः ब्रह्ममीमांसायामसंभवादाह **यथासंभवमिति** । एतावतापि कथं गुरुत्वमित्यत आह **यो हीति** । गुरुत्वस्य पूर्वमुपपादितत्वात्पुनस्तत्प्रतिपादने पौनरुक्त्यमित्यतो हेत्वन्तरेण तदुपपादनात्र **पौनरुक्त्यमित्याह प्रकृतेति** । अज्ञसेत्यस्य तात्पर्यकथनं **न त्विति** ।

प्रदीपः— यथासंभवमिति । वेदस्योपलम्भकत्वेन मीमांसादेः उत्पादकत्वेन प्रभव इत्यर्थः ।

साक्षादुपदेष्टृत्वेन गुरुत्ववर्शनम्—

२१ सु०— प्रकारान्तरेण गुरुत्वं नारायणस्य समर्थयते विशेषत इति । गुरुमिति वर्तते । विशेषत इति साक्षादुपदेष्टृत्वेन, न तु जगत इव परम्परया ॥

परि०— साक्षादुपदेष्टृत्वेनेति । तथा चोक्तं मध्वविजये 'इतिहाससुन्दरपुराणसूत्रसत्प्रियपञ्चरात्रनिजभावसंयुतम् । अशृणोदनन्तहृदनन्ततोऽचिरादि'त्यादि ॥ परम्परया ब्रह्मादिद्वारा ।

आनन्दः— विशेषत इत्यस्य व्याख्यानं साक्षादित्यादि ।

वा०चं०— संप्रदायप्रवर्तकत्वं यथैतद्विशेषणलभ्यं तथाऽऽह जगत इत्यादिना ॥

वा०र०— मूले जगतः इत्यादि षष्ठी त्रयं व्यधिकरणम् । जगच्छब्दस्य सजनसमुदायरूपविशेषत इति अस्य साक्षात् उपदेष्टृत्वेनेति व्याख्यानम् । न त्विति तद्वचावर्त्यकथनम् ।

स०व्र०— जगत इति । सजनसमुदायस्येत्यर्थः ।

काशी०— विशेषत इत्येतन्न ब्रह्माद्यपेक्षयेत्याह न त्विति ।

गूढ०— विशेषत इत्यस्य व्याख्यानं साक्षादिति ।

पृथक्प्रणामानुपपत्तिपरिहारः—

२२ सु०— अत्र यदि शास्त्रप्रभवम् इत्याद्येवोच्येत तदा पृथक्प्रणामेन देवताया गुरोश्च पार्थक्यशङ्का स्यात्। तदर्थं तमेव इत्युक्तम्।

न चैवं पृथक्प्रणामानुपपत्तिः। निमित्तद्वयसमावेशे नैमित्तिकविलोपनियमाभावात्।

परि०— गुरुत्वेनात्र पुनर्नतिरिति पूर्वं समाधाने उक्तेऽपि लोके क्वचिदेकत्र पितृत्वस्योक्त-रूपगुरुत्वस्य च सत्त्वेऽपि तदुभयनिमित्तकनत्यादिक्रियाऽऽवृत्तेरदर्शनाच्छङ्कते **न चेति**। अन्यथा पितृत्वस्वामित्वादिनिमित्तापि नतिः कार्येति शङ्काभिप्रायः। परिहारस्य तु, सत्यमेवम्, तथापि क्वचित्सत्रादौ ऋत्विक्त्वयजमानत्वोभयनिमित्तकक्रियानुष्ठानस्यापि दृष्टेः, तथा ज्योतिराकाशादिशब्देष्व-प्यन्यत्रप्रसिद्धत्वाद्यनेकनिमित्तकविचारक्रियायाश्च दृष्टेर्दर्शेष्टीनामाग्नेयादीनां तिसृणामेककाले समावेशेन तन्निमित्तकानां प्रयाजानां सकृदनुष्ठानेऽपि दर्श एव सांवत्सरिकप्राप्तौ दार्शिकस्य सांवत्सरिकस्य च श्राद्धस्य करणवदिहाभ्यर्हितत्वाद्देवतात्वगुरुत्वरूपनिमित्तद्वयसमावेशेऽपि नैमित्तिकस्य नमनस्य तत्प्री-त्यतिशयार्थं पुनरनुष्ठानोपपत्तेरिति भावः।

गु०दी०— निमित्तद्वयसमावेशे नैमित्तिकविलोपनियमाभावादित्यत्र उदयति सूर्ये उदितत्वं तेजो-रूपत्वं चेति निमित्तद्वयं चास्ति। तत्र सन्ध्यावन्दनादिनैमित्तिककार्याय वन्दकः पुरुषः उदितत्वमात्रं पुरस्करुते। घटार्थप्रकाशनाख्यनैमित्तिककार्याय क्वचित्तेजोरूपत्वमप्यनुसरति। तन्निमित्तककार्यस्य सर्वथा विलोपो न। एवं लोकशिक्षायै गुरुनमस्काराख्यनैमित्तिककार्याय क्वचिद्गुरुत्वस्यानुसरणं युक्तमेवेति भावः।

वादु०— न चैवं पृथक्प्रणामेति। ननु कथमियमाशङ्का 'गुरुत्वेनात्र प्रणामाचरणादि'ति समाहितत्वा-दिति चेत्र। गुरुत्वदेवतात्वरूपनिमित्तद्वयसमावेशे अपि न तन्निमित्तकप्रणामद्वयं युक्तम्। प्रतिहर्तुद्गात्रोर्युगपदपच्छेदे तन्निमित्तयोः सर्ववेतसदानादाक्षिण्ययोः विकल्पस्यैवोक्तत्वेन एकस्मिन्प्रयोगे तदुभयानुष्ठानाभावात्। तथैकस्मिन्नेव दिवसे सङ्गमणव्यतीपातरूपनिमित्तद्वयसमावेशे तन्निमित्तकश्राद्धद्वयाभाववदिति शङ्कितुरभिप्रायः॥ **नैमित्तिक-विलोपेति**। अमावास्यायाः सांवत्सरिकश्राद्धदिनत्वे तदुभयनिमित्तकश्राद्धद्वयस्यापि विहितत्वेन निमित्तद्वयसमावेशे नैमित्तिकद्वयविलोपनियमाभावादित्यर्थः। तथाच ब्रह्मत्वप्रकृतेऽपि निमित्तद्वयप्रयुक्तप्रणामद्वयोपपत्तिरिति भावः।

आनन्दः— ननु शास्त्रप्रभवमित्यनेनैव प्रणामकर्मणो लाभात्तमेवेति व्यर्थमित्यतः तन्निवर्त्याशङ्कामाह **अत्रेति**। एवं पूर्वप्रणतदेवतायामिदानींप्रणतगुरुण्यैक्ये **निमित्तद्वयसमावेश इति**। गुरुत्वदेवत्वरूपनिमित्तद्वय-समावेशान्नैमित्तिकवन्दनविलोपो नेत्यर्थः। न च निमित्तसमावेशेन नैमित्तिकनियमादित्यनेनैव पूर्णत्वे नैमित्तिक-

विलोपनियमाभावादिति न वक्रोक्तिर्युक्तेति वाच्यम् । नैमित्तिकविलोपनियमवन्नैमित्तिकनियमस्याप्यसिद्धत्वेन तत एव वक्रोक्तेरदोषत्वात् । न चात्र नैमित्तिकविलोपाभावादित्येतावतैव सामञ्जस्ये नियमपदमनर्थकमिति वाच्यम् । निमित्तसमावेशेन नैमित्तिकविलोपाभावादित्युक्ते निमित्ते सति नैमित्तिकस्यावश्यकत्वं भवेत् । तथाच पितृत्वपातृत्वादिरूपाणामनेकेषां निमित्तानां भावेन तेन रूपेण वन्दनार्थं पद्यान्तराणां करणं स्यादतो नियमपदम् । एवं च निमित्ते सति नैमित्तिकस्य कदाचिद्विलोपोऽपि भवतीति न तस्यावश्यकत्वमिति न कश्चिद्दोष इति भावः ।

कं०रा०— निमित्तसमावेश इति । उद्गातृप्रतिहर्तॄः क्रमेणापच्छेदस्थले प्रतिहर्त्रपच्छेदनिमित्तसर्ववेदसदानकर्तव्यताज्ञानेन पूर्वस्योद्गात्रपच्छेदनिमित्तादाक्षिण्यकर्तव्यताज्ञानस्य बाधेन नैमित्तिकस्यादाक्षिण्यस्य तत्र लोपेऽप्यन्यत्र तस्य लोपाभावेन निमित्तसमावेशे नैमित्तिकविलोपनियमाभाव इत्यर्थः । एवं चेह देवतात्वगुरुत्वनिमित्तकयोः प्रणामयोर्बाधकाभावेन कर्तव्यत्वात्पृथक्प्रणामोपपत्तिरिति भावः ।

श्रीनिधि०— निमित्तसमावेशे नैमित्तिकपरिलोपनियमाभावादिति । एकस्मिन् काले अर्धोदयोपरागादिनिमित्तसमावेशे तत्तन्निमित्तकं स्नानं पृथग् न क्रियते किन्तु एकमेव स्नानम् । अमासङ्क्रमणादिनिमित्तसमावेशे तत्तन्निमित्तकश्राद्धादिकं पृथगेव क्रियत इति लोपनियमाभावादिति भावः ।

वा०चं०— निमित्तसमावेश इति । 'तत्र विप्रतिषेधाद्विकल्पः स्यादि'ति षष्ठाधिकरणे प्रतिहर्त्रुद्गात्रोर्युगपदपच्छेदे प्रतिहर्त्रपच्छेदनिमित्तकसर्ववेतसदानस्योद्गात्रपच्छेदनिमित्तकस्यादक्षिणतद्यज्ञसमाप्त्यनन्तरानुष्ठीयमानपुनर्यागे पूर्वदियदानस्य चैकस्मिन्नेव प्रयोगे विरुद्धतयाऽसंभवादुद्गात्रपच्छेदनिमित्तकपुनर्यागे सर्ववेतसदानेनोभयसंभवेऽपि प्रयोगान्तरे क्रियमाणे प्रायश्चित्तनिमित्तवत्प्रयोगसाद्गुण्यासंभवेनाशक्यतया विकल्पोक्तावपि 'प्रत्यक्षोपदेशाच्चमसिनामव्यक्तः शेष' इति तृतीयाधिकरणे समाख्याया वषट्कारस्य होमाभिषवयोश्चेत्येषां भक्षनिमित्तानां समवायेऽवयवशश्च सर्वैर्भक्षैः प्रतिपत्तिसंभवेन बाधायोगात्समुच्चय एवेत्याश्रितत्वात् जीवनादिनिमित्तैक्येऽपि तदावृत्तिमात्रेण नैमित्तिकदर्शपूर्णमासाद्यावृत्तेः 'तेषामौत्पत्तिकत्वादागमेन प्रवर्तेते'ति षष्ठाधिकरणे प्रतिपादितत्वेन निमित्तभेदे नैमित्तिकसमुच्चयस्य कैमुत्यसिद्धत्वाच्च प्रकृतेऽप्युभयसंभवेन समुच्चयो युक्त इत्याशयः ।

वा०र०— तमेवेत्येतत् व्यावर्त्यशङ्काप्रदर्शनपूर्वकं तत्सार्थक्यकथनायात्र यदीत्यादीति ज्ञेयम् । **तदर्थं तमेवेत्युक्तमिति** मूले अर्थशब्दः आवृत्तः क्रमेण निवृत्तिप्रयोजनवचनैः मशकार्थो धूमः । तदर्थत्वेन सर्वज्ञकल्पतेति यथेति तथा च तच्छङ्कानिवृत्त्यमित्यर्थः । एवमन्यत्रापि । **न चैवं पृथक्प्रणामानुपपत्तिरिति** मूलम् । यद्यपि गुरुत्वेनात्र प्रणामाचरणादिति परिहारस्य प्रागभिधानात् पुनः एतच्छङ्का नोदेति । तथापि समाधानान्तरं वक्तुं पुनश्शङ्केयं इति बहवः । गुरवस्तु गुरुत्वेनेति प्रागुक्तपरिहारानन्तरं अपि इयं शङ्का । तदुन्मूलनेनैव । तथाहि । **प्रतिहर्त्रुद्गात्रोरिति** ॥ टीकोक्तरीत्या निमित्तद्वयसमावेशे नैमित्तिकद्वयानुष्ठानभावासिद्धया प्रकृतेऽपि देवतात्वगुरुत्वरूपनिमित्तद्वयप्राप्तावपि

नैमित्तिकप्रणामद्व्ययोग इति शङ्काशयः स्पष्टः । निमित्तेति समाधानवाक्ये नैमित्तिकविलोपनियमाभावादिति नियमनिराकरणस्यैवोक्त्या नैमित्तिकविलोपस्यैव शङ्काविषयत्वस्य प्रत्येतुमशक्यत्वादिति वदन्ति । तत्र प्रतिषेध्यादित्यादिषष्ठाधिकरणे इत्यस्य षष्ठाध्यायगताधिकरणेत्यर्थः । षष्ठाध्यायपञ्चमपादीयाष्टादशाधिकरणेति यावत् । विकल्पोक्तावपीत्यन्तं निमित्तसमावेशेन नैमित्तकविलोपोऽस्तीति नियमांशव्यावृत्त्यकथनमुखेन शङ्काशयकथनम् । प्रत्यक्षोपदेशात् इत्यादि आश्रितत्वादित्यन्तेन तन्नियमाभावोपपादनं इति विवेकः । प्रतिहर्त्रुद्गात्रोर्युगपदपच्छेद इत्यनेन एकप्रयोगे क्रमेणोद्गातृप्रतिहर्त्रपच्छेदपक्षे उपक्रमाधिकरणन्यायेन पूर्वोद्भूतोपच्छेदनिमित्तकं अदाक्षिण्यमेव कर्तव्यमिति पूर्वपक्षे पौर्वापर्ये पूर्वदौर्बल्यं प्रवृत्तिवदिति सूत्रे परभावत्वमाश्रित्य परभूतप्रतिहर्त्रपच्छेदनिमित्तकसर्वस्वदानमेव प्रायश्चित्तं कार्यमिति तदधिकरण एव निर्णीतमिति । तथोद्गात्रपच्छेदस्य प्रतिहर्त्रपच्छेदात् परत्वं प्रतिहर्त्रपच्छेदनिमित्तकसर्वस्वदानबाधेनादक्षिणतरयज्ञानुष्ठानोत्तरभाविप्रयोगान्तरे तत् दद्यात् यत् पूर्वस्मिन् दाय्यन स्यात् इत्युक्ता पूर्वदक्षिणा क्रतुसङ्कल्पकाले दित्सितद्वादशशतात्मकेति पूर्वपक्षे पूर्वसङ्कल्पितद्वादशशतस्य प्रतिहर्त्रपच्छेदनिमित्तकसर्वस्वदानेन बाधितत्वेन तस्यैव दित्सिततया प्राप्तत्वात् तस्यापि चादाक्षिण्येन तत्प्रयोगे बाधेऽपि प्रयोगान्तरे तदबाधेनानुष्ठानसंभवात् सर्वस्वमेव दक्षिणेति । यदि उद्भूता जघन्यः स्यात् पुनः यज्ञे सर्ववेदसं दद्यात् इत्यत्र निर्णीतमिति च तदधिकरणीयविचारद्वयस्य पूर्वभावित्वं सूचयति एकस्मिन्नेव प्रयोग इति । यदि तत्प्रयोगसर्वस्वदानं तर्हि अदक्षिणं तत् यज्ञसमाप्त्ययोगः । यदि चादाक्षिण्यं तर्हि तत् दानायोगः । इति उभयोः विरुद्धत्वमित्यर्थः । ननु पुनर्योगे सर्ववेदसदानं पूर्वयागे तु अदाक्षिण्यमित्येवं समुच्चय एव किं नाश्रीयते इत्यत आह उद्गात्रपच्छेदनिमित्तकेति । प्रायश्चित्तनिमित्तवदिति । यत्र प्रयोगे निमित्तं तत्रैव नैमित्तिकं प्रायश्चित्तानुष्ठानं तत्साङ्गुण्यस्यापादकम् । प्रयोगान्तरे तदनुष्ठानं तु निमित्तवत् पूर्वप्रयोगसाङ्गुण्यप्रापकम् । तथाच तत्सिद्धये एकस्मिन्नेव प्रयोगे उभयस्यापत्तिः तस्य समुच्चयविरोधेनानुष्ठातुमशक्यतया तद्विकल्प एवेत्युक्तो वार्षीत्यर्थः । उपलक्षणमेतत् । पुरोडाशद्रव्यकसर्ववृष्ट्याख्येष्टौ इन्द्राय रथन्तराय ऐन्द्राय बार्हतः इत्यादि यागरूपनिमित्तषट्कं विद्यमानेऽपि नैमित्तकरूपस्विष्टकृदावृत्तेरभावस्य तृतीयाध्यायपञ्चमपादीयः द्रव्यैकत्वकर्मभेदात् प्रतिकर्म क्रियेरन् इति चतुर्थाधिकरणे उक्तापीत्यपि द्रष्टव्यम् । इति तृतीयाधिकरणेति । तृतीयाध्यायपञ्चमपादीय एकादशाधिकरणेत्यर्थः । समारुन्धाया इति । होतृहोतृचमस इति । समाख्या द्विः ऐंद्रवायवस्य भक्षयति द्विरेतस्य वषट्कारो भवतीति द्विः सोमपाननिमित्तवत् वषट्कारोक्तिः । अधिकं लेख्यमस्ति । निमित्तभेदो हि नैमित्तिकभेदे उत्सर्गतः प्रयोजकः । प्रतिहर्त्रपच्छेदादिस्थले च विरोधादिनिमित्तेन नैमित्तिकद्वयानुष्ठानासंभवेन नैमित्तिकद्वयसमावेशाभावेऽपि नैमित्तिकयो विरोधस्थले निमित्तभेदेन तत्समावेशस्य सुलभत्वात् । अत एव यत्र नैमित्तिकभेदापादकनिमित्तभेदाभावः । तत्र निमित्तावृत्तिमाश्रित्य कथञ्चित् निमित्तभेदसंपादनेन नैमित्तिकसमावेशोपपादनं अन्यथा न स्यात् । तथा च कथञ्चित् निमित्तभेदमाश्रित्य नैमित्तिकसमावेशस्य दर्शनात् प्रकृते च वास्तवनिमित्तभेदसत्त्वात् तत्प्रयुक्तनैमित्तिकद्व्यानुष्ठानमनिवार्यम् । विरोधश्च प्रकृते नास्तीति भावेन प्रकारान्तरमाह जीवनादिति । षष्ठाधिकरणेत्यस्य षष्ठद्वितीयाष्टमाधिकरणेत्यर्थः । एतदधिकरणं प्रागुक्ताधिकरणद्व्यं चावकाशानुसारेण भाष्यादिपर्यालोचनानुसरणीयमस्ति ।

स०व्र०— न चैवं पृथक्प्रणामानुपपत्तिरिति । ननु कथमियमाशङ्का, गुरुत्वेनात्र प्रणामाचरणादिति समाहितत्वादिति चेत् न । गुरुत्वदेवतात्वरूपनिमित्तद्वयसमावेशेऽपि न तन्निमित्तकप्रणामद्वयं युक्तम्, प्रतिहर्तृद्वात्रोर्युगपदपच्छेदे तन्निमित्तयोः सर्ववेतसदानादाक्षिण्ययागयोर्विकल्पस्यैवोक्तेः । तथैकस्मिन्नेव दिने संक्रमणव्यतीपातसमावेशेऽपि तन्निमित्तकश्राद्धद्वयाभावादिति शङ्कितुरभिप्रायात् ॥ **नैमित्तिकविलोपनियमाभावात्** । प्रकृतेऽपि निमित्तद्वयप्रकृतप्रणामद्वयोपपत्तिरिति भावः ।

कुण्डल०— ननु प्रणामनिमित्तयोर्गुरुत्वदेवतात्वयोरेकस्मिन्नारायणे समावेशेन तन्निमित्तकप्रणामावृत्तिः कर्तव्या । ज्योतिष्टोमे बर्हिष्यवमानस्तुत्यर्थं यज्ञशालातोऽन्योन्यं संबध्य निर्गच्छतामध्वर्युप्रभृतीनां ऋत्विजां मध्येऽपच्छेदे सति प्रायश्चित्तविशेषाः आम्नाता यदि प्रतिहर्तापच्छिद्येत सर्ववेतसं दद्यात् । यद्युद्गातापच्छिद्येतादक्षिणं यज्ञमिष्ट्वा तेन पुनर्यजेत । तत्र तद्दद्याद्यत्पूर्वस्मिन् दास्यं स्यादिति श्रुतयोः प्रतिहर्तृद्गात्रपच्छेदनिमित्तकयोः सर्ववेतसदानादाक्षिण्यपूर्वकपुनर्यजनलक्षणयोः प्रायश्चित्तयोर्युगपदनुष्ठानं नास्त्येव । प्रतिहर्तृद्गात्रोर्युगपदच्छेदे तन्निमित्तकप्रायश्चित्तयोः विकल्पेनानुष्ठानात् । द्वयोः क्रमेणापच्छेदेऽप्युत्तरापच्छेदनिमित्तकप्रायश्चित्तस्यैवानुष्ठानेन द्वयोरननुष्ठानादित्याशङ्क्य परिहरति **न चेति** । **नैमित्तिकेति** । निमित्तसमावेशे नैमित्तिकविलोपो न सार्वत्रिकः । एकस्मिन्नेव दर्शादिप्रकृतीष्टचनुष्ठानयोग्ये पर्वविशेषलक्षणे प्रातःकाले दर्शपूर्णमासाग्रायणादिप्रकृतिविकृतीष्टिनिमित्तयोः पर्वशेषत्वशरपर्वत्वयोः समावेशे तन्निमित्तकयोः प्रकृतिविकृतीष्टचोरुभयोरपि तस्मिन्नेव दिवसे अनुष्ठानस्यावर्तनात् प्राग्यदि पर्वसन्धिः कृत्वा तस्मिन्प्रकृतिविकृत्याः तत्रैव यागः परतो यदि स्यात् तस्मिन्विकृत्याः प्रकृतेः परद्युः इत्यादिवचनैः सिद्धत्वात् । तथा एकस्मिन्नेव मौञ्जीनिबन्धनदिवसे चौलोपनयनयोः समावेशे तन्निमित्तकयोश्चौलोपनयनहोमयोरुभयोरप्यनुष्ठानाच्च प्रकृतेऽपि 'यस्य देवे परा भक्तिरि'त्यादिश्रुत्या देवताभजनवत् गुरुभजनस्याप्यावश्यकत्वावेदनेन गुरुत्वेनापि निमित्तेन वन्दनस्यावश्यकत्वात् । निमित्तसमावेशे नैमित्तिकविलोपनियमो नास्तीत्यर्थः ।

वि०— **निमित्तसमावेश इति** । **क्वचिद्दर्शादौ** सङ्क्रमणव्यतीपातादियोगेनानेकनिमित्तसमावेशे तन्निमित्तकानेकश्राद्धानां करणे सर्वप्रयुक्तैकश्राद्धकरणेऽपि बाधकाभावेन नैमित्तिकविलोप एवेति नियमाभावादित्यर्थः । यद्वा दर्शव्यतीपातादिनिमित्तसमावेशे तत्तन्निमित्तकग्रहणादिविलोपेऽपि दर्शादौ उपरागादियोगे दर्शोपरागप्रयुक्तश्राद्धद्वयस्यावश्यकतया पृथक्कर्तव्यत्वेन विलोपनियमाभावादित्यर्थः । तथाच तद्वत्प्रकृतेऽपि गुरुत्वदेवतात्वाख्यनिमित्तद्वयप्रयुक्तप्रणामद्वयलोपनियमाभावेन लोपमकृत्वा प्रणामकरणोपपत्तिरिति भावः ।

च०क०:— परस्परविरहसमानाधिकरणतया प्रतीतपितृत्वस्वामित्वरूपनिमित्तयोरेकत्र समावेशेऽपि तन्निमित्तकनतिभेदाभावेन प्रतिहर्तुरुद्गातुश्च युगपदपच्छेदे तन्निमित्तकसर्ववेतसदानादाक्षिण्ययोरेकप्रयोगानुष्ठानासंभवेन तद्विकल्पस्यैवोक्त्या प्रकृतेऽपि देवतात्वगुरुत्वरूपनिमित्तभेदेऽपि तन्निमित्ता नतिरेकैवास्तामित्याशयेनाशङ्क्ते **न चैवमिति** ॥ समाधत्ते **निमित्तद्वयसमावेश इति** । ज्योतिराकाशादिशब्देषु अन्यत्रोभयत्रान्यत्रैव प्रसिद्धत्वरूपसमाविष्टनिमित्तभेदाधीनस्य प्रथमतृतीयतुरीयचरणनिवेशनस्य क्वचित्सत्रादौ ऋत्विग्यजमानोभयनिमित्तक-

क्रियानुष्ठितेश्च दर्शनिन, प्रकृतेऽपि देवतात्वगुरुत्वरूपनिबन्धनभेदनियन्त्रिततत्कार्यभूतप्रणामभेदः सङ्गच्छत इत्याशयः ।

काशी०— पार्थक्येति । तमेवेति पदद्वयत्यागे गुरुदेवतयोरत्यन्तभेदस्य एवकारत्यागे च भेदाभेदस्य शङ्का स्यात्तन्निवर्तकं तमेवेति वचनमित्यर्थः । **पृथक्प्रणामानुपपत्तिरिति** । यद्यपि गुरुत्वेनात्र प्रणामाचरणादित्युक्तम् । तथाऽपि तत्र विशिष्टत्वादिना देवताप्रणामस्य कृतत्वान्निमित्तान्तराभावान्न पुनः प्रणामो युक्त इत्याशङ्कैव निराकृता । इह तु विशिष्टाधिकृतेष्टत्वैः सह गुरुत्वस्याप्येकत्र समावेशे विशिष्टत्वादिनिमित्तकप्रणामत्रयमकृत्वा गुरुत्वनिमित्तकप्रणामस्यैव पृथक्करणे कारणाभावः । उक्तरीत्या गुरुत्वानुसन्धानस्यावश्यकत्वेऽपि पूर्वश्लोक एव गुरुमिति विशेषणदानं युक्तमित्याशङ्का निराक्रियत इत्यदोषः । न च तदनन्तरमेवेयमाशङ्का कुतो न निराकृतेति शङ्क्यम् । गुरुदेवतापार्थक्यशङ्कावारकत्वेन तमेवेत्यस्य शास्त्रप्रभवमित्यादिना सामानाधिकरण्यावश्यकत्वप्रदर्शनात्प्राक् शास्त्रप्रभवं प्रणम्य तमनु तदभिप्रायानुसारेणैव व्याख्यां करोमीत्यपि योजनसंभवेन पृथक्प्रणामानुपपत्तिशङ्कानवकाशात् । न चैवमादौ तं प्रणम्येत्यन्वयप्रदर्शनविरोध इति वाच्यम् । तस्य वक्ष्यमाणप्रयोजनादिकं सिद्धवत्कृत्य प्रवृत्तस्य तदननुसन्धानदशायामप्रवृत्तेः । **निमित्तसमावेश इति** । अयं भावः । किं गुरुदेवतैक्ये पृथक्प्रणामस्य निषिद्धत्वादनुपपत्तिराशङ्क्ते । किंवा विरोधात् । उतैकस्यैवोभयप्रणामत्वेन तत एवोभयफलसिद्धेर्वैयर्थ्यात् । नाद्यः । निषेधकप्रमाणाभावात् । न द्वितीयः । अविरोधात् । नान्त्यः । विशेषानुग्रहार्थत्वात् । ज्योतिष्टोमे प्रतिहर्तृद्गात्रोर्युगपदपच्छेदे तन्निमित्तयोः सर्वस्वदानादाक्षिण्ययोरेकप्रयोगे विरोधेन विकल्पाश्रयणात्तत्र नैमित्तिकविलोप एवास्त्यतो नियमग्रहणम् । क्वचिद्विरोधिना नैमित्तिकविलोपेऽपि सत्रयागादौ ऋत्विक्त्वयजमानत्वाद्युभयनिमित्तककर्मानुष्ठानदर्शनेन तद्विलोपनियमासिद्धेरिति भावः ।

गूढ०— ननु शास्त्रप्रभवमित्यनेनैव प्रणामकर्मणो लाभात्तमेवेति व्यर्थमित्यतस्तन्निवर्त्याशङ्कामाह **अत्रेति** । एवं पूर्वप्रणतदेवतायां इदानीं प्रणतगुरुणैक्ये **निमित्तद्वयसमावेश इति** । गुरुत्वदेवत्वरूपनिमित्तद्वयसमावेशान्नैमित्तिकवन्दनविलोपो न इत्यर्थः । न च निमित्तसमावेशेन नैमित्तिकनियमादित्येतावतैव पूर्णत्वे नैमित्तिकविलोपनियमाभावादिति न वक्रोक्तिर्युक्तेति वाच्यम् । नैमित्तिकविलोपनियमवत् नैमित्तिकनियमस्याप्यसिद्धत्वेन तत एव वक्रोक्तेरदोषत्वात् । न चात्र नैमित्तिकविलोपाभावादित्येतावतैव सामञ्जस्ये नियमपदमनर्थकमिति वाच्यम् । निमित्तसमावेशेन नैमित्तिकविलोपाभावादित्युक्ते निमित्ते सति नैमित्तिकस्यावश्यकत्वं भवेत् । तथाच पितृत्वपातृत्वादिरूपाणामनेकेषां निमित्तानां भावेन तेन रूपेण वन्दनार्थं पथान्तराणां करणं स्यादतो नियमपदम् । एवं च निमित्ते सति नैमित्तिकस्य कदाचिद्विलोपोऽपि भवतीति न तस्यावश्यकत्वमिति न कश्चिद्दोष इति भावः ।

प्रदीपः— निमित्तद्वयसमावेश इति । असति तन्त्रोपकारे सति च प्रयोजन एकस्यैव प्रयोजनस्य निवृत्तौ नैमित्तिकावृत्तिर्दृश्यते किमुत निमित्तभेद इत्याशयः ।

प्रणामस्य ग्रन्थे निवेशने प्रयोजनविशेष.—

२३ सु०— शिष्यशिक्षायै चैतद्ग्रन्थे निवेशनम् । शिष्याणां चास्ति गुरुदेवताभेदः । तदपेक्षयैव जगद्गुरूणाम् इत्युक्तम् । अन्यथा विशेषतो मे इत्युक्तमयुक्तं स्यात् ।

परि०— तर्हि मनसैव कार्यं किं ग्रन्थे निबन्धनेनेत्यत आह **शिष्येति** । ग्रन्थे तन्निवेशनं च शिष्यशिक्षार्थम् । अस्माभिरपि देवतानतिर्गुरुनतिश्च कार्येत्येवं शिष्याणां बुद्धयुत्पादनद्वारा तदनुष्ठानाय । 'यद्यदाचरति श्रेष्ठ' इत्यादेः । नन्वस्तु तेषामपि देवतानतिरेव, तस्या एव गुरुत्वादित्यत आह **शिष्याणां चेति** । शिष्याणां गुरुदेवताभेदात्तैः पृथङ्नतिः कार्येति शिष्यशिक्षार्थमेतन्निवेशनमिति कथं ज्ञातव्यमित्यत आह **तदपेक्षयैवेति** । शिष्याणां गुरुदेवताभेदापेक्षयैवेत्यर्थः ॥ जगद्गुरूणां गुरुमित्युक्तावपि जगत्प्रति साक्षाद्गुरुत्वं किं न स्यादित्यत आह **अन्यथेति** । साक्षादपि गुरुत्वे विशेषतः साक्षान्मे गुरुमित्येतदयुक्तं स्यात् । साक्षात्त्वबोधकस्य **विशेषत** इति पदस्य व्यावर्त्याभावात् । मे गुरुमित्येतावतैव सिद्धत्वात् । तेन ज्ञायते जगच्छब्दितशिष्याणां ब्रह्मादयो गुरवः, देवता तु नारायणः इति शिष्याणां गुरुदेवताभेदज्ञापनमस्य फलम् । तेन च तैः पृथङ्नतिः कार्येति शिक्षार्थमेव निवेशनमिति ।

यादु०— नन्वेवं पृथक्प्रणामस्य नावश्यंकर्तव्यतेत्यतस्तत्र निमित्तान्तरमाह **शिष्यशिक्षायै वेति** । अत्र निवेशनानुमितं प्रणामाचरणमपि ग्राह्यम् । तस्याप्युक्तरीत्या शिष्यशिक्षार्थत्वात् । अतो नासङ्गतिरित्यवधेयम् । **तदपेक्षयैव** शिष्याणां गुरुदेवताभेदापेक्षयैव । **अन्यथा** स्वस्येव शिष्याणामपि गुरुदेवतयोरभेदे ।

यद्वा ननु शिष्याणामिव स्वात्मनोऽपि जगद्गुरूणामिति गुरुर्देवताभिन्न एवोक्तः । स्वस्यापि जगदन्तःपातित्वात् । अतो विरोध इत्यत आह **तदपेक्षयैवेति** । **शिष्यापेक्षयैवेत्यर्थः** ॥ स्वात्मापेक्षयाऽपि किं न स्यादित्यत आह **अन्यथेति** । **अन्यथा** जगच्छब्देन स्वात्मनोऽपि ग्रहणे ।

आनन्दः— **शिष्यशिक्षायै चैतद्ग्रन्थे निवेशनमिति** । न च शिष्यशिक्षायै चेत्यत्र चशब्दो वास्तु वाशब्दो वा, उभयथापि ग्रन्थे निवेशनस्य पूर्वप्रयोजनान्तरस्यानुक्तत्वेन तद्वैयर्थ्यम् । शिष्याणां चेत्यनेन विरोधश्चेति वाच्यम् । कृत्यल्युटो बहुलमिति बहुलग्रहणादत्र निवेश्यते यत् तन्निवेशनमिति कर्मणि ल्युट् । तथाच ग्रन्थे निवेशनं पृथग्गुरुप्रणामादिकं शिष्यशिक्षायै कृतं न च कीदृशी शिष्यशिक्षेति वाच्यम् । स्वस्य गुरुदेवतैक्येन देवतावन्दनेन गुरुवन्दनस्यान्यथासिद्धत्वेऽपि नान्येषाम् । तेषां गुरुदेवताभेदेनान्यथासिद्धेरसंभवादित्याह **शिष्याणामिति** । शिष्यशिक्षायै चैतद्गुरुप्रणामादिकमित्यनुक्त्वा निवेशनमित्युक्तिर्न केवलं वन्दनं शिष्यशिक्षोपयोगि किन्तु निवेशितमेवेति इति दर्शयितुम् । **तदपेक्षयैवेति** । गुरुदेवताभेदापेक्षयैवेत्यर्थः । अन्यथा ब्रह्मादीनामित्यवक्ष्यत् । **अन्यथेति** । अन्येषामपि गुरुदेवतैक्य इत्यर्थः । विशेषत इत्यनेन साक्षात्स्वगुरुत्वोक्तया अन्येषां परम्परया गुरुरिति सिद्धचतीति भावः ।

कं०रा०— ननु तथाऽपि पृथग्गुरुनमस्कारस्य ग्रन्थे निवेशनं किमर्थमित्यत आह **शिष्यशिक्षाया इति**। **शिष्याणामिति**। शिष्याणां ब्रह्मादयो गुरवः, देवता तु नारायण इति गुरुदेवताभेदोऽस्तीत्यर्थः। **अन्यथेति**। शिष्याणां गुरुदेवताभेदाभावे तान्प्रत्यपि नारायणस्यैव गुरुत्वे विशेषतो मे गुरुमिति विशेषोक्तिरयुक्ता स्यादित्यर्थः।

वा०चं०— एवं गुरुदेवतैक्येऽपि पृथक्प्रणाममुपपाद्य इदानीं शिष्याणां गुरुदेवताभेदाद् ग्रन्थे निवेशनस्य च तच्छिक्षैकप्रयोजनकत्वात् युक्तं पृथग्गुरुप्रणामस्य निवेशनमित्याह **शिष्येति** ॥ अत्र शिष्याणां गुरुदेवताभेद-विवक्षायां भाष्यकारीयं ज्ञापकमाह **तदिति** ॥ जगद्गुरूणामित्युक्तं संप्रदायप्रवर्तकत्वं शिष्यानपेक्ष्यैव न स्वात्मान-मित्यत्रापि तदीयं नियामकमाह **अन्यथेति**।

वा०र०— **एतदपेक्षयैवेति**। वाक्यव्याख्यानस्यावतारमुखेनैव सिद्धिं मन्वान उत्तरवाक्यमवतारयति **जगद्गुरूणामित्युक्तमिति**। अनेन पूर्वभाष्याशय उत्तरभाष्येण व्यज्यत इति पूर्वोत्तरभाष्ययोः उपपाद्योपपादक-भावोऽभिप्रेत इति ध्वनितम्। **आहेति**। अत्र 'विशेषतो मे' इत्युक्तं स्यादिति मूलपाठः। तथा च जगद्गुरूणां गुरुं इत्युक्तं संप्रदायप्रवर्तकत्वस्य स्वापेक्षयाभिधानमित्यन्ताकारे स्वं प्रति साक्षादुपदेष्टृत्वेनैव गुरुत्वं न तु जगत इव परंपरया इत्यर्थकं विशेषतो मे गुरुमिति विशेषणमयुक्तं स्यात् इत्याहेत्यर्थः। **इति पुनः अयुक्तं स्यादिति** पाठे तु इति यत् पुनरुक्तं पश्चात्त्वमात्रेण पुनस्त्वं तदयुक्तमिति योज्यम्। पुनःशब्दो वाक्यालङ्कारे वा। **पुनरुक्तं स्यादिति** क्वाचित्कपाठे तु जगद्गुरुत्वरूपेण स्वस्यापि प्रागेव निर्देशात् पुनरुक्तं स्यादित्यर्थः। किन्तु एतत्पाठे मे गुरुमित्येव वाच्यतया विशेषण इत्यस्यापि तत्पाठेऽनुवादो व्यर्थ इति टीकाकृदनभिप्रेत एवायं पाठ इति ज्ञेयम्। **इत्युक्तमिति**। एतत्पर्यवतारं उक्तमित्यर्थः।

स०व्र०— ननु यत्रोभयोरेकनिष्पाद्यस्यापरेण निष्पत्तिस्तत्र विलोपनियमस्यैव, यत्र चापरेण अपरनिष्पाद्य-स्यानिष्पत्तिस्तत्राविलोपनियमस्यैव सत्त्वेन, प्रकृते देवताप्रणामनिष्पाद्यस्य गुरुप्रणामनिष्पाद्यस्य वाऽन्यतरेणानिष्पत्तौ सर्वत्र पृथक्प्रणामस्यावश्यकत्वापत्त्या तन्निष्पत्तौ त्वेकत्रापि कर्तव्यत्वापत्त्या, दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमित्यतः युक्त्यन्तरेण गुरुप्रणामस्य पार्थक्येन कर्तव्यत्वं साधयितुमाह **शिष्यशिक्षायै चेति**। तथा च शिष्यापेक्षयैव मङ्गलस्य ग्रन्थे निवेशनात्, शिष्याणां च गुरुदेवतयोर्भेदेन, तदपेक्षया नारायणप्रणामकरणपूर्वकं गुरुप्रणामकरणनिवेशन-मुपपन्नमिति भावः।

नन्वेतत्पृथक्गुरुप्रणामनिवेशनं शिष्यापेक्षयेत्यत्र किं भाष्यकारीयं ज्ञापकमित्यत आह तदपेक्षयैवेति। जगद्गुरूणां गुरुमिति उक्तम् ॥ परम्परोपदेशकत्वस्यापि स्वापेक्षयैव संभवान्न शिष्यापेक्षाज्ञापकत्वमिति तत्राह **अन्यथेति**। यदि जगद्गुरूणामप्युक्तपरम्परोपदेशकत्वं स्वापेक्षयैव स्यात्तदा विशेषतो मे गुरुमित्युक्तमयुक्तं स्यात्। तद्विशेषणेन स्वं प्रति साक्षादुपदेष्टृत्वेनैव गुरुत्वं न तु परम्परयेति परम्परया गुरुत्वस्य निवारणात्। अन्यथा विशेषणद्वयस्य परस्परविरोधापातादिति भावः ॥

अन्ये तु पृथक्प्रणामनिमित्तान्तरमाह **शिष्यशिक्षायै चेति** ॥ **तदपेक्षयैव** शिष्याणां गुरुदेवताभेद-प्रदर्शनापेक्षयैव अन्यथा स्वस्यैव शिष्याणामपि गुरुदेवतयोरभेद(प्रसङ्ग) इत्याहुः ।

यद्वा ननु शिष्याणामिव स्वात्मनोऽपि जगद्गुरूणामिति गुर्देवताभिन्न एवोक्तः, स्वस्यापि जगदन्तः-पातित्वादतो विरोध इत्यत आह **तदपेक्षयैवेति** । शिष्यापेक्षयैवेत्यर्थः ॥ स्वात्मापेक्षयापि किं न स्यादित्यत आह **अन्यथेति** । अन्यथा जगच्छब्देन स्वात्मनोऽपि ग्रहणे 'विशेषतो मे गुरुमि'त्यनेन साक्षाद्गुरुत्वोक्तेः, न स्वात्मापेक्षया तदिति भाव इत्याहुः ॥

कुण्डल०— नन्वस्तु भाष्यकारस्य गुरुदेवतयोरभेदेऽपि गुरुत्वनिमित्तकं पुनर्नमनं तस्य ग्रन्थे निवेशनं किमर्थमित्यत आह **शिष्येति** । गुरुदेवतयोरभेदस्तु ममैव न तु शिष्याणाम् । तेषां ब्रह्मादयो गुरवः । देवता तु भगवान्नारायण एव अतस्तेषां देवताप्रणामेन न गुरुप्रणामश्चरितार्थः । किन्तु गुरुप्रणामः पृथगनुष्ठेय इति शिक्षणायेत्यर्थः । कुतोऽयमभिप्रायो भाष्यकारस्येत्यतस्तद्वचनादेव तद्भावोऽवगम्य इत्याह **तदपेक्षयैवेति** । जगद्गुरूणां गुरुमित्यनेन जगतो ब्रह्मादयो गुरवस्तेषां श्रीनारायणो गुरुरित्युक्तं भवति । **अन्यथेति** । जगत्प्रत्यपि नारायणस्य साक्षाद्गुरुत्वे इत्यर्थः ।

विद्व०— ननु नियमाभावादेव प्रणामलोपकरणमेव किं न स्यादित्यतस्तत्करणे निमित्तान्तरमाह **शिष्यशिक्षायै चेति** । भवतु शिष्यशिक्षार्थमेव ग्रन्थे निवेशनं शिष्याणां च गुरुदेवतयोर्भेदाभावे ग्रन्थे पृथङ्नमस्कारनिवेशनं अनावश्यकमित्यत आह **शिष्याणां चेति** । आचार्यशिष्याणां गुरुदेवताभेदोऽस्तीति कुतोऽवगम्यत इत्यत आह **तदपेक्षयैवेति** । शिष्याणां गुरुदेवताभेदसद्भावापेक्षयैवेत्यर्थः । जगतां देवर्ष्यादीनां ये गुरवस्तेषां ब्रह्मवायुरुद्रादीनां गुरुमित्युक्तया जगच्छब्दवाच्यानां देवर्ष्यादीनां गुरुदेवताभेदोऽस्तीति ज्ञायत इति भावः । शिष्याणां गुरुदेवताभेदानङ्गीकारे बाधकं मूले दर्शयति **अन्यथेति** । अन्यथा शिष्याणामपि गुरुर्व्यास एवेति प्राप्त्या असाधारण्येन मे गुरुमित्युक्तमयुक्तं भवेत् । तेन ज्ञायते शिष्याणां गुरुदेवताभेदोऽस्तीति भावः । शिष्यवत्स्वस्यापि गुरुदेवताभेदोऽस्तु इत्यतो वा आह **अन्यथेति** । अत्र विशेषाकारेण स्वगुरुत्वोक्तिरयुक्ता स्यादिति भावः ।

चषकः— गुरुदेवतानत्युभयधर्मिकस्वविधेयत्वप्रकारकासन्निहितविनेयाधिकरणकानुसंहित्युत्पादनफल-रूपबीजान्तरं दर्शयति **शिष्येत्यादि** । **तदपेक्षया विनेयापेक्षया** ॥ **अन्यथा** । स्वात्मनोऽपि इतरतुल्यकक्ष्यापन्नतया गृहीतौ ।

काशी०— पृथक् प्रणामे फलान्तरमभिप्रेत्याह **शिष्येति** । शिष्याणां गुरुप्रणामस्य पृथक्कर्तव्यता-प्रतिपत्त्यर्थमेतत्पुनः प्रणम्येत्येवंरूपं निवेशनमित्यर्थः । अकृतस्य निवेशनायोगात्करणमप्यावश्यकमिति भावः । शिष्याणामपि गुरुदेवतैक्ये पुनरुक्तानुपपत्तेराह **शिष्याणामिति** । गुर्विति गुरोर्देवताभेद इत्यर्थो न तु गुरुदेवतयोर्भेद

इति गुरुशब्दवद्देवताशब्दस्य शिष्यशब्देन नित्यसापेक्षत्वाभावेन भेदपदेन समासानुपपत्तेः । अत्र मूलस्वरसमाह तदपेक्षयेति । शिष्याणां गुरुदेवताभेदाभिप्रायेणैवेत्यर्थः । अन्यथा जगद्गुरुमित्येवावक्ष्यदिति भावः । ननु गुरूणां श्रेष्ठानामुपदेष्टारमित्यर्थसंभवाच्चैतद्विशेषमुक्तार्थे निरवकाशज्ञापकमत आह अन्यथेति । उक्तरीत्या भेदस्य विवक्षितत्वं । अयुक्तं स्यादिति । इतरगुरुत्वात्स्वगुरुत्वस्य विशेषाभावादिति भावः । न च साक्षात्त्वेनाविशेषेऽप्यधिकोपदेष्टृत्वेन विशेषः संभवतीति वाच्यम् । गुरुत्वमात्रस्य नम्यताप्रयोजकत्वेनात्र तदुक्तिवैयर्थ्यात् । अत्र शास्त्रप्रभवमित्यादिना शास्त्रनिर्माणादिना ज्ञानदातृत्वमेव गुरुत्वमिति विवक्षितम् । तेन पुस्तकदानादिना यथाकथञ्चिज्ज्ञानप्रयोजकेन अतिप्रसङ्गः । यादुपते तु ननु शिष्याणामिव स्वस्यापि जगद्गुरूणामित्यनेन गुरुदेवताभेद उक्तः । स्वस्यापि जगदन्तःपातित्वात् । तथा च विशेषतो मे इत्यनेन विरोध इत्यत आह तदपेक्षयेति । शिष्यापेक्षयैवेत्यर्थः । अन्यथा जगच्छब्देन स्वस्यापि ग्रहणे इति व्याख्यातम् । परिमळे तु गुरुदेवताभेदापेक्षयेत्ययुक्तम् । जगद्गुरूणां गुरुमित्युक्तावपि जगत्प्रति साक्षाद्गुरुत्वानिवारणादित्यत आह अन्यथेति । साक्षादपि जगद्गुरुत्व इत्यर्थ इति व्याख्यातम् ।

गूढ०— शिष्यशिक्षायै चैतद्ग्रन्थे निवेशनमिति । न च शिष्यशिक्षायै चेत्यत्र चशब्दो वानु वा शब्दो वा, उभयथापि ग्रन्थे निवेशनस्य पूर्वं प्रयोजनस्यानुक्तत्वात्तद्वैयर्थ्यं शिष्याणां चेत्यनेन विरोधश्चेति वाच्यम् । कृत्यल्युटोबहुलमिति बहुलग्रहणादत्र निवेश्यते यत् तन्निवेशनमिति कर्मणि ल्युट् । तथाच ग्रन्थं निवेशनं पृथक्-गुरुप्रणामादिकं शिष्यशिक्षायै कृतम् । न च कीदृशी शिष्यशिक्षेति वाच्यम् । स्वस्य गुरुदेवतैक्येन देवतावन्दनेन गुरुवन्दनस्यान्यथासिद्धत्वेऽपि नान्येषाम् । तेषां गुरुदेवताभेदेन अन्यथासिद्धेरसंभवादित्याह शिष्याणामिति । शिष्यशिक्षायै चैतद्गुरुप्रणामादिकमित्यनुक्त्वा निवेशनमित्युक्तिर्न केवलं वन्दनं शिष्यशिक्षोपयोगि किन्तु निवेशित-मेवेति दर्शयितुम् । तदपेक्षयैवेति । गुरुदेवताभेदापेक्षयैवेत्यर्थः । अन्यथा ब्रह्मादीनामित्यवक्ष्यत् । अन्यथेति । अन्येषामपि गुरुदेवतैक्य इत्यर्थः । विशेषत इत्यनेन साक्षात् स्वगुरुत्वोन्नयान्येषां परंपरया गुरुरिति सिध्यतीति भावः ।

॥ शास्त्रव्याख्यानप्रतिज्ञा ॥

अनुव्याख्यानवैयर्थ्यशङ्कानिवारकतया परमाख्यविधेयपदस्य अवतरणम्—

२४ सु०— "स्यादेतत् । 'अथातो ब्रह्मजिज्ञासे'त्यादिकं ग्रन्थं व्याख्यातुमयं देवतादि-प्रणामः । न चायं व्याख्यातव्यः । अर्थविवक्षापूर्वकस्यैव पौरुषेयवाक्यस्य व्याख्यातव्यत्वात् । न हि मातृकामात्रव्याख्याने प्रेक्षावान् प्रवर्तते । न चास्यार्थविवक्षापूर्वकत्वे मानमस्ति । प्रणवनमात्रस्य व्यभिचारित्वात् । प्रेक्षावत्प्रणयनस्य चानिश्चयात् । निश्चये वा विषहर-मन्त्रस्येव जपादिना अभ्युदयसिद्धये निर्माणोपपत्तेः । गृहीतसङ्केतेरर्थप्रतिभासो हि विषहर-मन्त्रेऽपि समानः ।

परि०— परमाख्यविद्येत्येतदवतारयितुमाह **स्यादेतदिति** ॥ विद्याशब्दस्य व्यावर्त्यमाह **अर्थविवक्षेति** ॥ **मातृकेति** । कखगघङेत्यादिवर्णमात्रेत्यर्थः ॥ व्याप्तिमुपपाद्योपनयमाह **न चास्येति** । अथातो ब्रह्मजिज्ञासेत्यादिग्रन्थस्येत्यर्थः ॥ तथा च प्रयोगः । अथात इत्यादिग्रन्थो न व्याख्येयः । अर्थविवक्षापूर्वकत्वाभावात् । मातृकाक्षरमात्रसन्दर्भवत् । यो व्याख्येयः सोऽर्थविवक्षापूर्वक इति व्यतिरेकव्याप्तौ काव्यादिदृष्टान्तः ॥ न च हेतुरसिद्धः । विमतो ग्रन्थः अर्थविवक्षाशून्यः अर्थविवक्षावत्त्व-साधकमानहीनत्वादिति । ननु मानाभावोऽसिद्धः । **प्रणीतत्वस्य वा प्रेक्षावत्प्रणीतत्वस्य वा व्युत्पन्न-प्रतीयमानार्थकत्वस्य वा मानत्वादित्यतः क्रमेण निराह प्रणयनेत्यादिना** । हेतोरप्रयोजकत्वमाह **निश्चये वेति** । विषहरमन्त्रे वर्णमालामात्रपाठेन कार्यकरत्वस्य लोके प्रसिद्धेरिति भावः ।

गु०दी०— **अर्थविवक्षापूर्वकस्य** इत्यत्र बहुतरगहनार्थविवक्षापूर्वकस्येत्यर्थः । **प्रणयनमात्रस्य व्यभि-चारित्वात्** इत्यस्य शुकबालवाक्ये व्यभिचारित्वादित्यर्थः । **गृहीतसङ्केतेरर्थप्रतिभास** इत्यत्र यत्किञ्चिदर्थप्रतिभास इत्यर्थः ।

यादु०— ननु मीमांसायां वेद इवार्थविवक्षापूर्वकत्वाभावेऽपि व्याख्येयत्वमस्त्वित्यत आह **पौरुषेय-वाक्यस्येति** ॥ अभ्युपेत्याह **निश्चये वेति** ॥ **विषहरमन्त्रस्येवेति** । तस्य हुं फडित्यादिवज्जपेनैवाभिमतसिद्धये निर्माणमित्यर्थः । तथा चान्यथासिद्धिरिति भावः ॥ ननु तथाऽपि प्रतिभासमानार्थत्वमर्थविवक्षापूर्वकत्वे हेतु-र्भविष्यतीत्यत आह **गृहीतसङ्केतेरिति** । तथाच व्यभिचार इति भावः ॥

वं०प०— **मातृकामात्रेति** । अर्थविवक्षापूर्वकत्वरहितककाराद्यक्षरमात्रव्याख्यान इत्यर्थः ॥ ननु इदं ब्रह्ममीमांसाशास्त्रमर्थविवक्षापूर्वकं प्रणीतत्वादित्यनुमानमेव मानमिति चेत्तत्राह **प्रणयनमात्रस्येति** । हुं फडित्यादि-विषहरमन्त्र इत्यर्थः । शुकबालादिवाक्ये व्यभिचारादित्यर्थः ॥ **प्रेक्षावदिति** । तादृशमन्त्रप्रणयनकर्ता न प्रेक्षावानिति भावः । **अनिश्चयादिति** । ग्रन्थकर्तुर्व्यासस्य प्रेक्षावत्त्वानिश्चयादित्यर्थः ।

आनन्दः— ननु परमाख्यविद्येति किमर्थमुक्तं सूत्रव्याख्यामित्येव कुतो नोक्तं इत्यतः तन्निवर्त्यां शङ्कां दर्शयति **स्यादेतदिति** । न प्रतिज्ञामात्रेणार्थसिद्धिरित्यतो व्याख्येयत्वप्रयोजकाभावादित्याह **अथेति** । तदेव हि पौरुषेयं वाक्यं व्याख्येयं यदर्थविवक्षापूर्वकमित्यर्थः । न च नार्थविवक्षापूर्वकत्वमात्रं व्याख्येयत्वप्रयोजकं किन्तु इष्टसाधनताबोधकत्वमपि । इष्टसाधनताबोधकत्वाभावे वक्तुमिच्छारूपविवक्षायोगादिति वाच्यम् । विवक्षापदेनैव तस्या अपि लब्धत्वात् । वक्तुमिच्छा हि इष्टसाधन एव भवतीति भावः । न चार्थविवक्षापूर्वकत्वस्य व्याख्येयत्व-प्रयोजकत्वे प्रयोजकाभावेन प्रयोज्याभावेऽनुमानं कर्तव्यम् । नायं ग्रन्थो व्याख्येयः अर्थविवक्षापूर्वकत्वाभावादिति । एवञ्च व्यतिरेकव्यभिचारः, वेदे व्याख्येयत्वे सत्यपि अर्थविवक्षापूर्वकत्वाभावादिति वाच्यम् । पौरुषेयत्वे सति व्याख्येयत्वाभावस्य साध्यत्वाद्वेदे चापौरुषेयत्वेन पौरुषेयत्वे सति व्याख्येयत्वाभावेन न व्यतिरेकव्यभिचारः ।

न च वाक्यमात्रस्य व्याख्येयत्वेऽस्त्येतत्प्रयोजकं तथाच पौरुषेयत्वे सतीति विशेषणस्य न कृत्यमिति वाच्यम्। तथा सति वेदस्य व्याख्येयत्वं न स्यात्। विवक्षापूर्वकत्वं हि अर्थविषयकवक्त्रिच्छया प्रणीतत्वं न चापौरुषेये वेदे तदस्ति तथाच पौरुषेयवाक्यत्वावच्छेदेन व्याख्येयत्वे एतत्प्रयोजकमिति न कश्चिद्दोषः। ननु शब्दत्वमेवास्तु व्याख्येयत्वप्रयोजकमित्यत आह प्रणयनेति। ननु अनुमानाभावः कथं प्रणीतत्वस्य प्रेक्षावत्प्रणीतत्वस्य वा मानस्य सद्भावादित्यत आह प्रेक्षावदिति। प्रेक्षावत्त्वं हि अभ्रान्तत्वं तच्च सूत्रकर्तुः किञ्चिदंशे वा सर्वांशे वा। नाद्यः। उन्मत्तस्यापि किञ्चिदंशेऽभ्रान्तत्वेन तत्कृतस्यापि व्याख्येयत्वप्रसङ्गात्। न द्वितीयः। पुरुषमात्रस्य किञ्चिदंशे भ्रान्तत्वेन निश्चायकाभावेन सूत्रकर्तुः सर्वांशे अभ्रान्तत्वनिश्चयाभावादिति भावः। ननु सूत्रकर्तुर्नारायणावतारत्वेनाभ्रान्तत्वनिश्चय इत्यतोऽभ्रान्तत्वं नार्थविवक्षापूर्वकत्वं आक्षिपत्यन्यथासिद्धत्वादित्यत आह निश्चये वेति। ननु जपार्थत्वे व्युत्पन्नस्य तस्मादर्थबोधो न स्यादित्यत आह गृहीतसङ्केतेरिति।

कं०रा०— न हीति। अर्थविवक्षापूर्वकत्वरहितानामकारादिमातृकावर्णानां व्याख्याने प्रेक्षावान् कश्चिन्न हि प्रवर्तत इत्यर्थः। नन्वथातो ब्रह्मजिज्ञासेत्यादिसूत्रेभ्यो गृहीतसङ्केतिकस्यार्थप्रतिभासोदयेन विषहरमन्त्रवैषम्यात् तेषामर्थविवक्षापूर्वकत्वं निश्चीयत इत्यत आह गृहीतसङ्केतेरिति।

वा०चं०— 'व्याख्यां समर्थयमानः' इत्युक्तं परमाख्यविधेत्यंशस्य व्याख्यासमर्थनरूपत्वं घटयितुं तन्निवर्त्याशङ्कामुत्थापयति स्यादेतदिति॥ नायं ग्रन्थो व्याख्यातव्योऽर्थावबोधोद्देश्यकत्वशून्यत्वान्मातृकादिवदिति विवक्षितानुमाने वेदवदस्याप्यर्थावबोधोद्देश्यकत्वादसिद्धिरित्याशङ्कायां वेदस्य फलवदर्थावबोधपर्यन्तस्वाध्यायाध्ययनविधिना अर्थावबोधोद्देश्यकत्वसिद्धावपि पौरुषेयेऽर्थावबोधोद्देश्यकत्वतदभावयोर्मन्त्रादिग्रन्थमातृकामात्रयोः दृष्टत्वेन नात्र वेदवदर्थावबोधोद्देश्यकत्वसिद्धिरित्यभिप्रायेणोत्तरवाक्योक्तस्य पौरुषेयवाक्येत्यंशस्य समर्थनाय प्रसक्तिमाह अथात इति॥ अयमिति। प्रकृतः पौरुषेय इत्यर्थः। अर्थविवक्षापूर्वकत्वं चार्थावबोधोद्देशकत्वं वेदादिसाधारणमभिमतं, न तु तद्व्यावृत्तं वक्तृविवक्षापूर्वकत्वम्। परिहरग्रन्थानानुगुण्यापत्तेः। अत्र व्यतिरेकदृष्टान्तो मन्त्रादिग्रन्थोऽभिमतः॥ विपक्षे बाधकमुखेनान्वयदृष्टान्तमाह न हीति॥ हेत्वसिद्धिं परिहरति न चेति॥ व्यभिचरितत्वादिति। वर्णसमाम्नायरूपे मातृकामात्र इति शेषः॥ अनिश्चयादिति। तथा च सन्दिग्धासिद्धिरिति भावः॥ ननु 'भगवान्पुरुषोत्तमः। अवतीर्णो महायोगी सत्यवत्यां पराशरात्' इत्यायागमादेव प्रणेतुः प्रेक्षावत्त्वनिश्चय इत्यतो विशिष्टहेतोरपि प्रेक्षावत्प्रणीतेऽर्थावबोधोद्देशशून्ये विषहरमन्त्रे व्यभिचारः। तद्वदेव च प्रकृतसाध्याभावेऽपि जपादिनाऽभ्युदयसिद्धये प्रेक्षावत्प्रणयनोपपत्तेरन्यथासिद्धिश्चेत्याशायेनाह निश्चये वेति॥ ननु हेत्वन्तरासंभवेऽपि प्रकृतग्रन्थादर्थावभासादेव तस्यार्थावबोधोद्देश्यकत्वसिद्धिरित्यतोऽगृहीतसङ्केतेरर्थावभासाभावाद्गृहीतसङ्केतेरर्थावभासस्य समवेतार्थाप्रतिपादकत्वेनार्थावबोधोद्देश्यकत्वशून्ययोभयसंप्रतिपन्ने विषहरमन्त्रेऽपि सत्त्वेन पूर्वोक्तदोषव्यावृत्तिरित्याशायेनाह गृहीतसङ्केतेरिति।

वा०र०— अर्थविवक्षापूर्वकस्यैवेत्युत्तरवाक्येऽभिप्रेतं प्रयोगं दर्शयन् तत्र प्रामाणसिद्धिशङ्कावारणाय पौरुषेयवाक्यस्येत्युक्तमिति मनसि निधाय तदुपपादनं च कुर्वन् पौरुषेयत्वकथनपरतया उत्तरग्रन्थं योजयति

नायं ग्रन्थः इत्यादिना । फलवदर्थावबोध इति अथातो धर्मजिज्ञासेति जैमिनिप्रथमाधिकरणे स्वाध्यायोऽध्येतव्यः इत्यध्ययनविधिवाक्यमुपादाय अदृष्टार्थत्वपूर्वपक्षमुत्थाप्य अध्यापनस्य फलवदर्थावबोधपर्यन्तताया: समर्थनादिति भावः । एतदधिकरणशारीरं उपासनापादीयसर्वशाखाधिकरणटीकायां व्यक्तीभविष्यति । व्याख्यास्यते च तत् प्रपञ्चे तदस्माभिः । **पौरुषेयेऽर्थेति** । अत्र पौरुषेयेऽर्थावबोधोद्देश्यकत्वतदभावयोः दृष्टत्वेनेति संबन्धः । तथाच पौरुषेये द्वैविध्यदर्शनात् न प्रकृते तन्निश्चयः संभवतीति **सन्दिग्धासिद्धिरित्यर्थः** । **ननु कुत्र पौरुषेये द्वैविध्यं दृष्टं इत्यत उक्तं मन्वादिग्रन्थमातृकामात्रयोरिति** । अत्र च पौरुषेय इत्यनूद्यमन्यदित्यादिना द्विवचनान्तेन व्याख्यानात् नान्वयानुपपत्तिः । तथा च मन्वादिग्रन्थमातृकामात्रयोः तत् रूपे पौरुषेयेति योज्यम् । मन्वादिग्रन्थरूपे पौरुषेये मातृकामात्ररूपे च पौरुषेय इति प्रत्येकं वा बुद्ध्या विवेकेन संबन्धः । अवच्छेदकत्वं वा सामान्यर्थः । एतदुभयावच्छेदेनेति । यथाक्रमं चार्थावबोधोद्देश्यकत्वतदभावयोः प्रदर्शनमिति स्पष्टमेवेति ज्ञेयम् । उक्तस्य पौरुषेयवाक्यस्येत्यंशस्येति । अनेनास्मात् पदात् इममर्थं जानन्तु इति वक्तृविवक्षापूर्वकत्वरूपमर्थविवक्षापूर्वकत्वमाश्रित्य वेदे सत्यपि व्याख्येयत्वे अर्थविवक्षापूर्वकत्वाभावेन व्यभिचारात् तस्य व्याख्येयत्वरूपव्यापकत्वायोगेन व्यापकाभावेन व्याप्याभावानुमानायोग इति आशङ्कापरिहारोपयोगिपौरुषेयत्वावच्छिन्नव्याख्येयव्यापकत्वस्य सत्त्वात् युक्तं अर्थविवक्षापूर्वकत्वाभावेन पौरुषेयत्वविशिष्टव्याख्येयत्वाभावानुमानमिति **प्रतिपादनाय पौरुषेयस्य युक्तमिति** केषाञ्चित् व्युत्पादनं अगदिति सूचितम् । तथात्वे परिहारग्रन्थानानुगुण्यापत्तेः **इति वक्ष्यमाणदूषणप्रसङ्ग इति** ज्ञेयम् । **व्याख्यातुमयमिति** । व्याख्यानस्य निर्विघ्नपरिसमाप्त्यार्थं प्रथमपद्यद्वितीयपद्ययोः **अनुष्ठितः प्रणाम इत्यर्थः** । न चायमित्यत्रत्यायमित्येतत् उत्तरवाक्यगतपौरुषेयेत्येतदनुसारेण व्याख्याति **प्रकृतः पौरुषेय इति** । **परिहारेति** । तत्र विद्याशब्देनार्थविवक्षेति परिहारेत्यर्थः । परिहारग्रन्थेऽर्थज्ञानसाधनत्वमात्रेणार्थविवक्षायाः सिद्धिप्रतिपादनेन तद्विवक्षायाः अर्थावबोधोद्देशकत्वरूपत्वे तत्प्रतिपादनसंभवेऽपि तस्यां वक्त्रन्तभविन तदनानुगुण्यमित्याशयः । वक्ष्यति चार्थज्ञानसाधनतांशनिवर्त्यमिति । मन्वादिग्रन्थस्य व्यतिरेकदृष्टान्तत्वमभिप्रेतं इत्यन्वयव्यतिरेकी हेतुरयं इत्याशयेनाह **अत्र चेति** । प्रागुक्तविवक्षितानुमानेत्यर्थः । **प्रेक्षावत्त्वं अन्यथा न स्यात् बाधककथनपरतया योज्यमित्याशयेन उक्तं विपक्षे बाधकेति** । **मातृकामात्रेति** मूले । ननु पञ्चाशद्वर्णानां नित्यतयाऽप्रणीतत्वेन पौरुषेयत्वरूपवेदवैषम्यं कथं मातृकामात्रपदोक्तपञ्चाशद्वर्णानाम् । अत एव वक्ष्यमाणप्रत्यायनमात्रस्य तत्र व्यभिचाराभिधानं चायुक्तमिति चेत् न । **न्यायरीत्योक्तवैषम्याद्याश्रयणेन दोषाभावात्** । **मातृकामात्रपदेन केनचित् पुंसा स्वबुद्धिघटितक्रमेण कचटतपाः जबगडदबाः इत्यादिरूपेणोदाहृतानां वर्णानां ग्रहणमभिप्रेतमिति तु परमार्थः** । अत एव वक्ष्यति **वर्णसमाम्नाय इति** । पुरुषबुद्धिक्रमविशिष्टकचटतपाः इत्यादिवर्णसमुदाय इति तदर्थः । पञ्चाशद्वर्णानां तु ईश्वरबुद्धिघटितक्रमविशिष्टत्वेऽपि तद्बुद्धेर्नित्यतया वेदसमानत्वमिति विशेषो ज्ञेयः । **विमतो अर्थावबोधोद्देशकः प्रणीतत्वादित्यनुमानमस्तु इत्यत आह मूले प्रणयनमात्रस्येति** । **अस्तु तर्हि प्रेक्षावत्प्रणीतत्वं हेतुरित्यत आह मूले प्रेक्षावदिति** । अभिमतं दूषणं स्पष्टयति **तथा चेति** । मूलस्थजपादिनेत्याद्यधिकोक्तितात्पर्यमाह **तद्वदेव चेति** । **अन्यथासिद्धिश्चेति** । अत्रान्यथा प्रकारान्तरेण सिद्धिघटने चान्यथासिद्धिरित्यभिमतं न तु हेतुदोषान्तरनिरासस्थलीययुक्तिपादे मूलगतान्यथासिद्धेर्दोषत्वस्य प्रकारान्तरेण वक्ष्यमाणत्वात् इत्युक्तान्यथासिद्धिः । तस्याः भक्तिपादगतवैयर्थ्यमेकासिद्धौ चेति

वक्ष्यमाणानुभाष्यसंबन्धिमूलोक्तरीत्या व्यर्थविशेषणत्वादिरूपतया प्रकृते तदसंभवात्। अधिकं ज्ञानबाध्यत्वानुमान-सिद्धमित्येतत् अनुभाष्यमूलटीकाव्याख्यानावसरे अन्यत्रापि समवायनिराकरणादिस्थले तत्र तत्र वक्ष्यामः। **हेत्वन्तरेति**। प्रणयनमात्रादिरूपेति पूरणीयम्। यदि गृहीतसङ्गतेः अर्थाविभासो विषहरमन्त्रेऽपि तर्हि तद्व्यापकार्था-ववोधोद्देश्यकत्वमपि तत्रास्त्विति न व्यभिचार इत्यत उक्तं **समवेतार्थेत्यादि**। यत्किञ्चिदर्थप्रतिपादनलाभेऽपि तत्रत्यमन्त्रप्रयोगानुसार्युपयुक्तार्थेत्यर्थः। वक्ष्यति च **उपयुक्तार्थेति**। **दोषद्वयेति**। व्यभिचारान्यथासिद्धि-रूपेति योज्यम्।

स०व्र०— स्यादेतदिति। प्रमाणभूतस्यैव व्याख्येयत्वात्, ब्रह्मसूत्राणां पौरुषेयत्वेन वेदानपेक्षप्रामाण्या-भावादित्याशयः।

पौरुषेयाणामपि प्रमाणत्वं व्याख्येयत्वं च दृष्टमित्यतो 'विमतम् अव्याख्येयं अर्थविवक्षापूर्वकत्वरहितत्वं सति पौरुषेयवाक्यत्वादि'त्यनुमानेन तत्साधयन् 'यदव्याख्येयं न भवति तत् विवक्षापूर्वकत्वरहितत्वविशिष्टपौरुषेय-वाक्यत्वरहितम्' इति व्यतिरेकं मनसि निधाय **तद्राहित्यस्य** च **पौरुषेयवाक्यत्वरूपविशेष्यराहित्येन** वा अर्थविवक्षापूर्वकत्वराहित्यरूपविशेषणराहित्येन वा **पर्यवसानमभिप्रेत्याथे** वेद एव दृष्टान्त इति स्फुटत्वात्तदनुक्त्वा द्वितीये मन्वादिवाक्यं दृष्टान्त इति भावेनाह **अर्थविवक्षेति**। अत्र 'व्याख्येयस्यार्थविवक्षापूर्वकत्वे सति पौरुषेय-वाक्यत्वदर्शनादि'ति वक्तव्ये अव्याख्येयत्वरूपसाध्यव्यतिरेकस्य व्याख्येयत्वस्य व्यतिरेकिणि व्याप्यस्य उक्तहेतुव्यतिरेकरूपव्यापकायोगव्यवच्छेदसिद्धचा व्यभिचारशङ्कानिरासार्थमियमुक्तिरिति ज्ञातव्यम्॥ आवश्यकं व्यतिरेकं प्रथममभिधाय यदर्थविवक्षापूर्वकत्वरहितत्वे सति पौरुषेयं वर्णसमूहरूपं तदव्याख्येयं यथा वर्णसमवाय केनचित् इत्यन्वयमाह **न हीति**। हेतोरसिद्धिमाशङ्क्याह **न चास्येति**। विमतम् अर्थविवक्षापूर्वकं प्रणीतत्वा-त्संमतवदिति चेन्न उन्मत्तवाक्ये व्यभिचारादित्याह **प्रणयनेति**॥ प्रेक्षावद्विशेषणोपादाने व्यासस्य प्रेक्षावत्त्वे मानाभावात् सन्दिग्धासिद्धो हेतुरित्याह **प्रेक्षावदिति**॥ अर्थविवक्षारहितेऽपि विषहरमन्त्रे प्रेक्षावत्प्रणीतत्वसद्भावा-दनैकान्तिको अन्यथासिद्धोऽप्रयोजकश्चेत्याह **निश्चये वेति**॥ विषहरमन्त्रे कथमर्थविवक्षापूर्वकत्वं नास्तीति चेत् न; समवेतार्थाप्रकाशनात्, दुंफडादिवज्जपमात्रेणादृष्टसिद्धचर्थं प्रणयनात्॥ ननु सूत्राण्यर्थविवक्षापूर्वकाणि प्रतिभा-समानार्थकत्वादिति चेन्नेत्याह **गृहीतेति**। बालस्यार्थाप्रतिभासात्, गृहीतसङ्गतेश्च प्रतिभासमानार्थोऽनुपयोगा-दविवक्षित इत्यर्थः।

कुण्डल०— ब्रह्ममीमांसाव्याख्याने प्रवृत्तेन भाष्यकारेण **ब्रह्ममीमांसाव्याख्यां करोमीति** वक्तव्ये परमाख्यविधेति किमर्थमुक्तमित्यतस्तद्व्यावर्त्यशङ्कापूर्वकं तत्प्रयोगं प्रदर्शयति **स्यादित्यादिना**। **न चायं व्याख्यातव्य इति**। अत्र **पौरुषेयवाक्यत्वस्यैव व्याख्येयत्वप्रयोजकत्वे** बालोन्मत्तवाक्यादेरपि व्याख्याप्रसङ्गः। ततः **अर्थेति**। तावन्मात्रस्य प्रयोजकत्वे उपनिषदादेर्व्याख्येयता न स्यात् अतः **पौरुषेयेति**। अयमत्रानुमानप्रयोगः ब्रह्मसूत्रसन्दर्भो न व्याख्यातव्यः अर्थविवक्षापूर्वकत्वाभावे सति पौरुषेयवाक्यत्वात् विषहरमन्त्रादिवत्। अत्र सत्यन्तं

काव्यादौ व्यभिचारवारणाय विशेष्यं तदुपनिषद्वागादौ व्यभिचारवारणाय। न चायं हेतुरप्रयोजक इत्याह न हीति। मातृकेति । अकारादिवर्णेत्यर्थः । न चेदं विशेषणमसिद्धमित्याह न चास्येति । ननु प्रणीतत्वेन हेतुना विशेषणभावोऽनुमीयते इत्यतः हेतुत्वेनाभिमतं किं प्रणीतत्वमात्रं वा प्रेक्षावत्प्रणीतत्वं वा व्युत्पन्नं प्रत्यर्थावबोधकत्वं वेति विकल्प्याद्यमवद्यति प्रणयनमात्रस्येति। बालोन्मत्तादिप्रणीतवाक्ये व्यभिचारित्वादित्यर्थः। द्वितीयं निरस्यति प्रेक्षावदिति । तथाच हेतोः सन्दिग्धासिद्धिरिति भावः । ननु ब्रह्मसूत्रप्रणेतुर्व्यासस्य प्रेक्षावत्त्वेन तत्प्रणीतशास्त्रे प्रेक्षावत्प्रणीतत्वाध्यवसायः सेत्स्यतीत्यत आह निश्चये वेति । तथा चार्थविवक्षापूर्वकत्वं विनाऽपि जपपारायणाद्यर्थत्वेन विषहरमन्त्रादेरिव प्रणयनोपपत्त्या प्रेक्षावत्प्रणीतत्वहेतोरन्यथैवोपपत्तेरप्रयोजकत्वमिति भावः। तृतीयं पराकरोति गृहीतसङ्गतेरिति । तथाच हेतोः व्यभिचारः। अप्रयोजकता चेति भावः।

विद्व०— पौरुषेयवाक्यस्येति। वेदानां वक्तुरभावेन अर्थविवक्षापूर्वकत्वाभावेऽपि व्याख्येयतादर्शनात् पौरुषेयस्येत्युक्तम्। ननु कथं मानाभावः अर्थविवक्षापूर्वकत्वे अनुमानसद्भावादित्यतस्तत्र किं प्रणीतत्वं हेतुः प्रेक्षावत्प्रणीतत्वं वा गृहीतसङ्गतेः प्रतिभासितार्थत्वं वेति विकल्पान्मनसि निधाय क्रमेण दूषयति प्रणयनमात्रस्येत्यादिना। व्यभिचारित्वादिति। उन्मत्तवाक्य इत्यर्थः। निश्चयेऽपि वेति। प्रेक्षावत्प्रणीतत्वनिश्चयेऽपि हेतोर्विषहरमन्त्रे व्यभिचारात्। अर्थविवक्षाभावे प्रेक्षावता प्रणयनमेव न स्यादिति चेन्न। अर्थविवक्षाभावेऽपि जपहोमादिना प्रयोजनविशेषसिद्धये निर्माणस्य विषहरमन्त्रे दृष्टत्वेन तद्वदस्याप्युपपत्तेरिति भावः। विषहरमन्त्रेऽपि समान इति। अर्थावबोधोद्देशशून्येनोभयसंप्रतिपन्ने विषहरमन्त्रे गृहीतसङ्गतेरर्थप्रतिभासरूपहेतोः सत्त्वेऽपि अर्थविवक्षापूर्वकत्वरूपसाध्याभावे न व्यभिचार इति भावः।

चषकः— परमाख्यविद्येत्यंशनिवर्तनीयाशङ्कामाविर्भावयति स्यादेतदिति। प्रकृतग्रन्थपक्षकव्याख्यातव्यत्वाभावसाध्यकार्यावबोधोद्देश्यकतावैधुर्यलिङ्गकमातृकानिदर्शनकफलीभूतानुमाने असिद्धिशङ्कानिरसनौपयिकतत्पक्षकतादृशहेतुसाध्यकतत्प्रतियोगिग्राहकमानराहित्यरूपसाधनानुमाने प्रणीतत्वप्रेक्षावत्प्रणीतत्वगृहीतशक्तिकप्रतिभासमानार्थकत्वानामनैकान्त्यादिव्युत्पादनेनासिद्धिशङ्कामपाकुर्वाणोऽर्थावबोधोद्देश्यकतामात्रेण तद्धर्मिण्युत्तरवादिना व्याख्येयतासाधनेऽनैकान्त्यापत्त्या याथार्थ्यस्य हेतुतावच्छेदककोटिनिवेशावश्यंभावेन तद्घटितहेतोर्ग्राहकाभावनियन्त्रितासिद्धिमभ्युपगमवादाश्रयणेऽपि हेतोरप्रयोजकतां विभावयति अथात इत्यादि।

काशी०— ब्रह्मसूत्रे परमाख्यविद्याशब्दप्रयोजनं विवक्षुराक्षिपति स्यादेतदिति। एतदित्युक्तं दूषणं विवृणोति अथेति । परमाख्यविद्येत्यनुक्तौ तत्स्थाने प्रक्षेप्यसूत्रपदविवक्षितार्थोक्तिरित्यादिकं ग्रन्थमिति । यद्यपीत्यादिको ग्रन्थो न व्याख्यातव्य इत्येव वक्तुं शक्यम्। सूत्रव्याख्यायाः साक्षात्प्रतिज्ञातत्वेन तदुपर्याक्षेपसङ्गतेः। तथाऽपि सूत्रव्याख्यानस्याकर्तव्यत्वे तदर्थप्रणायस्याप्यकर्तव्यत्वमित्येतत्सूचनाय ग्रन्थं व्याख्यातुमित्याद्युक्तिः। न व्याख्यातव्यः न प्रेक्षापूर्वकव्याख्यानविषयः। अर्थविवक्षापूर्वकत्वाभावे सति पौरुषेयत्वादिति शेषः। श्रुतिस्मृत्योर्व्यभिचारवारणाय विशेषसत्यन्तयोर्निवेशः। अत्र व्यतिरेकस्यान्वयसाधकत्वाद्व्यतिरेकव्याप्तिमादावाह

अर्थेति । पौरुषेयग्रहणादपौरुषेयस्यार्थविवक्षापूर्वकत्वरहितस्यापि व्याख्यातव्यत्वं लभ्यते । तथाच व्याख्यातव्यत्ववति स्मृत्यादौ विशेषणाभावेन वेदे च विशेष्याभावेन विशिष्टाभावसत्त्वाद्व्यतिरेकसिद्धिरिति भावः । अन्वयव्याप्तिमाह न हीति । अर्थविवक्षाया अप्रयोजकत्वे मातृकामात्रव्याख्यानापत्तिरिति भावः । वाक्यार्थचन्द्रिकाया त्वव्याख्येयत्वेऽर्थविवक्षापूर्वकत्वाभाव एव हेतुः । अर्थविवक्षापूर्वकत्वं चार्थावबोधोद्देश्यकत्वं वेदसाधारणमभिमतं न तु तद्व्यावृत्तं वक्तृविवक्षापूर्वकत्वरूपं परिहारग्रन्थानानुगुण्यात् । अर्थेत्यादिना च स्मृतिमातृमात्रकारूपौ व्यतिरेकान्वयदृष्टान्तौ दर्शितावित्युक्तम् । हेतौ विशेष्यभागस्य ग्रन्थपदेनैव सिद्धत्वाद्विशेषणासिद्धिमेव परिहरति न चेति । ननु प्रणीतत्वमेव मानमत आह प्रणयनमात्रस्येति । मातृकामात्र इति वर्तते । अस्तु तर्हि प्रेक्षावत्प्रणीतत्वमेव हेतुरत आह प्रेक्षावदिति । तथा च सन्दिग्धासिद्धिरिति भावः । अभ्युपेत्याप्याह निश्चये वेति । ब्रह्मसूत्रस्यार्थविवक्षापूर्वकत्वाभावेऽपीति शेषः । नन्विष्टसाधनताप्रमितिरूपप्रेक्षावतोऽर्थविवक्षाभावे प्रणयनानुपपत्तिरित्याशङ्क्याह जपादिनेति । तथा च हेतोरप्रयोजकत्वं विषहरमन्त्रे व्यभिचारश्चेति भावः । नन्वर्थप्रतीतिजनकत्वे सति प्रेक्षावत्प्रणीतत्वमेव हेतुः निरर्थकटुंफडादिशब्दघटितमन्त्रस्योन्मत्तवाक्यस्य च व्यावृत्तये सत्यन्तविशेष्ययोर्निवेशः । प्रेक्षावतः सार्थशब्दप्रयोगस्यार्थविवक्षापूर्वकत्वनियमान्नोक्तदोष इत्याशङ्क्याह गृहीतेति । निरर्थकशब्दस्यापि वक्त्रादिरूपार्थस्मारकत्वाद्गृहीतसङ्गतेः पुंस इति वृत्त्यार्थोपस्थापकत्वमेवात्र विवक्षितमिति भावः । अपिना प्रेक्षावत्प्रणीतत्वपरिग्रहः । तथा च नोक्तदोषनिरास इति भावः ।

गूढ०— ननु परमाव्यविधेति किमर्थमुक्तं सूत्रव्याख्यामित्येव कुतो नोक्तमित्यतस्तन्निवर्त्यामाशङ्कां दर्शयति स्यादेतदिति । न प्रतिज्ञामात्रेणार्थसिद्धिरित्यतो व्याख्येयत्वप्रयोजकाभावादित्याह अथेति । तदेव हि पौरुषेयवाक्यं व्याख्येयं यदर्थविवक्षापूर्वकमित्यर्थः । न च नार्थविवक्षापूर्वकत्वमात्रं व्याख्येयत्वप्रयोजकं, किं त्विष्टसाधनताबोधकत्वमपि । इष्टसाधनताबोधकत्वाभावे वक्तुमिच्छारूपविवक्षायोगादिति वाच्यम् । विवक्षापदेनैव तस्या लब्धत्वात् । वक्तुमिच्छा हि इष्टसाधन एव भवतीति भावः । न चार्थविवक्षापूर्वकत्वस्य व्याख्येयत्वप्रयोजकत्वे प्रयोजकाभावेन प्रयोज्याभावेऽनुमानं कर्तव्यम् । नायं ग्रन्थो व्याख्येयः अर्थविवक्षापूर्वकत्वाभावादिति । एवं च व्यतिरेकव्यभिचारः, वेदे व्याख्येयत्वे सत्यपि अर्थविवक्षापूर्वकत्वाभावादिति वाच्यम् । पौरुषेयत्वे सति व्याख्येयत्वाभावस्य साध्यत्वाद्वेदे अपौरुषेयत्वेन पौरुषेयत्वे सति व्याख्येयत्वाभावेन न व्यतिरेकव्यभिचारः । न च वाक्यमात्रस्य व्याख्येयत्वे अस्त्येतत्प्रयोजकम् । तथाच पौरुषेयत्वे सतीति विशेषणस्य न कृत्यमिति वाच्यम् । तथा सति वेदस्य व्याख्येयत्वं न स्यात् । विवक्षापूर्वकत्वं हि अर्थविषयकवक्त्रिच्छया प्रणीतत्वम् । न चापौरुषेये वेदे तदस्ति । तथाच पौरुषेयवाक्यत्वावच्छेदेन व्याख्येयत्वे एतत्प्रयोजकमिति न कश्चिद्दोषः । ननु शब्दत्वमेवास्तु व्याख्येयत्वप्रयोजकमित्यत आह प्रणयनेति । नन्वनुमानाभावः कथं प्रणीतत्वस्य प्रेक्षावत्प्रणीतत्वस्य वा मानस्य सद्भावादित्यत आह प्रेक्षावदिति । प्रेक्षावत्वं हि अभ्रान्तत्वं तच्च सूत्रकर्तुः किञ्चिदंशे सर्वांशे वा । नाद्यः । उन्मत्तस्यापि किञ्चिदंशेऽभ्रान्तत्वेन तत्कृतस्यापि व्याख्येयत्वप्रसङ्गात् । न द्वितीयः । पुरुषमात्रस्य किञ्चिदंशे भ्रान्तत्वेन निश्चायकाभावेन सूत्रकर्तुः सर्वांशेऽभ्रान्तत्वनिश्चयाभावादिति भावः । ननु सूत्रकर्तुर्नारायणावतारत्वेनाभ्रान्तत्व-

निश्चयः इत्यतोऽभ्रान्तत्वं नार्थविवक्षापूर्वकत्वमाक्षिपत्यन्यथासिद्धत्वादित्यत आह **निश्चये वेति**। ननु जपार्थत्वे व्युत्पन्नस्य तस्मादर्थबोधो न स्यादित्यत आह **गृहीतसङ्गतेरिति**।

प्रदीपः— **स्यादेतदिति**। प्रमाणभूतस्यैव व्याख्येयत्वात् ब्रह्मसूत्राणां पौरुषेयत्वेन वेदवदनपेक्ष्य प्रामाण्याभावादित्याशयः। ननु तत्पौरुषेयेति यद्वचाख्येयं तत्पौरुषेयवर्णसमूहत्वे सत्यर्थविवक्षापूर्वकत्वरहितं न भवति। यथा मन्वादिवाक्यमिति व्यतिरेकं तावदाह **अर्थविवक्षेति**। यत्पौरुषेयवर्णसमूहत्वे सत्यर्थविवक्षापूर्वकत्वरहितं तदव्याख्येयं यथा वर्णसमाम्नायः केनचित्कृत इत्यन्वयमाह **न हीति**। हेतोरसिद्धिमाशङ्क्याह **न चास्येति**। विमतम् अर्थविवक्षापूर्वकं प्रणीतत्वात्संमतवदिति चेन्न। उन्मत्तवाक्ये व्यभिचारादित्याह **प्रणयनेति**। प्रेक्षावद्विशेषणोपादाने व्यासस्य प्रेक्षावत्त्वे मानाभावात्सन्दिग्धासिद्धो हेतुरित्याह **प्रेक्षावदिति**। अर्थविवक्षारहितेऽपि विषहरमन्त्रे प्रेक्षावत्प्रणीतत्वसद्भावादनैकान्तिकः। अन्यथा प्रसिद्धेरप्रयोजकश्चेत्याह **निश्चये वेति**। विषहरमन्त्रे कथमर्थविवक्षापूर्वकाणि प्रतिभासमानार्थत्वादिति नेत्याह **गृहीतसङ्गतेरिति**। बालस्यार्थत्वं नास्तीति चेन्न। समवेतार्थप्रकाशनात् हुंफडादिवत्। जपमात्रेणादृष्टसिद्ध्यर्थं प्रणयनात्। ननु सूत्राण्यर्थविवक्षापूर्वकाणि प्रतिभासमानार्थत्वात् इति नेत्याह **गृहीतेति**। बालस्यार्थाप्रतिभासात् गृहीतस्मृतेश्च प्रतिभासमानोऽर्थोऽनुपयोगान्न विवक्षित इत्यर्थः।

२५ सु०— न चार्थविवक्षापूर्वकत्वमात्रेण उपादेयतया व्याख्यानं युक्तम्, विप्रलम्भकादिवाक्यव्याख्यानप्रसङ्गात्। किं नाम याथार्थ्ये च सति। न चास्य याथार्थ्ये मानमस्ति।

परि०— विद्यापदस्य व्यावर्त्यान्तरं चाह **न चेति**। किं चेति चार्थः। ख्यात्यर्थमप्रमाणत्वेन निश्चितबौद्धादिग्रन्थव्याख्यानदर्शनेन व्यभिचारनिरासायोपादेयतयेत्युक्तम्। पुरुषार्थहेतुतयेत्यर्थः॥ न च अस्येत्युपनयः। अत्रापि प्रयोगौ। विमतं नोपादेयतया व्याख्येयम् अयथार्थज्ञानजनकत्वात् विप्रलम्भकादिवाक्यवत्। न चासिद्धो हेतुः, विमतं न यथार्थं याथार्थ्यनिर्णायकमानशून्यत्वात् विप्रलम्भकादिवाक्यवदिति॥

यादु०— तुष्यत्विति न्यायेनाह **न चार्थविवक्षापूर्वकत्वेति**॥

वं०प०— अर्थविवक्षापूर्वकत्वमङ्गीकृत्याप्याह **न चार्थविवक्षेति**।

आनन्दः— ननु ब्रह्मादिभिः प्रार्थनायां कृतायां अस्य प्रणीतत्वादर्थविवक्षापूर्वकत्वं निश्चीयत इत्याशंक्य निषेधति **न चेति**। **उपादेयतयेति**। एतदर्थज्ञानं मम हितसाधनं इति बुद्ध्या स्वीकारेणेत्यर्थः।

कं०रा०— अस्तु वा यथाकथञ्चिद्ब्रह्मसूत्राणां अर्थविवक्षापूर्वकत्वनिश्चयः। तथाऽपि न तावन्मात्रेण व्याख्येयत्वमित्याह **न चेति**।

श्रीनिधि०— ननु अप्रमाणस्यापि ख्यात्यादेर्व्यं व्याख्यानं दृश्यत इत्यत आह उपादेयतयेति।

वा०चं०— एवं विद्याशब्दार्थतयाऽभिमतयथार्थज्ञानसाधनतान्तर्गतार्थज्ञानसाधनतांशनिवर्त्या शङ्का-मुत्थाप्य; ब्रह्मसूत्रेभ्यः उपयुक्तार्थप्रतिभासनेन विषहरमन्त्रवैषम्यात् 'पुनस्तस्यार्थवित्तये' इत्याद्यागमाचार्यादिबोधो-देश्यकतासिद्धिरित्याशङ्क्यां, तथापि सिद्धान्त्यभिमतमुपादेयतया व्याख्यानं तत्प्रयोजकाभावान्न संभवतीत्येवंरूपां विद्याशब्दार्थान्तर्गतयथार्थांशनिवर्त्यां शङ्कामुत्थापयति न चेति।

वा०र०— शङ्कामुत्थाप्येति। विद्याशब्दार्थान्तर्गतेत्यादि वक्ष्यमाणेन संबन्धः। शङ्कास्वरूपप्रदर्शनं तथापीत्यादि उक्तशङ्कोत्थापनबीजतया पूर्वशङ्कोन्मूलनं दर्शितम्। ब्रह्मसूत्रेभ्यः इत्यादि। बौद्धादिशास्त्रस्यापि ख्यात्यादेर्व्याख्यानदर्शनात् तद्व्यावृत्त्यर्थोपादेयत्वेन व्याख्यायता मूलटीकयोर्विशेषिता। उपादेयत्वं च मोक्षसाधनज्ञानजनकमिति धीविषयत्वं विवक्षितमिति योज्यम्। अनेन न चेत्यस्य नापीत्यर्थः। त्वदुक्तरीत्या अर्थावबोधे एकत्वप्रामाणेऽपि वा न तावन्मात्रेणोपादेयतया व्याख्येयतासिद्धिरित्युक्तं भवति। तत्प्रयोजकेति। अर्थावबोधोद्देश्यकत्वं तु विप्रलम्भादीति मूलोक्तरीत्या न प्रयोजकमिति भावः। मूले प्रामाण्ये सतीति वक्तव्यं प्रामाण्यस्वरूपविवरणार्थं याथार्थ्ये सतीत्युक्तम्।

कुण्डल०— अर्थविवक्षापूर्वकत्वमात्रं पौरुषेयवाक्यव्याख्येयत्वप्रयोजकमित्यङ्गीकृत्य तद्ब्रह्मसूत्रेषु नास्तीति प्रतिपादितमिदानीम् अर्थविवक्षापूर्वकत्वं प्रयोजकमेव न भवति अतिप्रसङ्गादित्याह न चेति।

विद्व०— अस्तु वा अर्थविवक्षापूर्वकत्वं तथापि न व्याख्येयतेत्याह न चेति।

काशी०— जिज्ञासितान्वयप्रतीतिजनकापेक्षावत्प्रणीतवाक्यत्वादिना कथञ्चिदर्थविवक्षापूर्वकत्वसिद्धावपि नोद्देश्यसिद्धिरित्याह न चेति। किं चेति चार्थः। अप्रमाणत्वेन निश्चितस्यापि ख्यात्यादेर्व्यं व्याख्यानदर्शनादुपादेय-तयेति अदृष्टार्थहितुधियेत्यर्थः। तादृशधीपूर्वकत्वमनुव्याख्यानस्य तदर्थत इत्यादिवचनादेव सिद्धम्। विप्रलम्भक-वाक्यं बौद्धादि। आदिना विपर्ययवाक्यं जैनादि गृह्यते। याथार्थ्ये इति। यादृच्छिकयाथार्थ्यव्यावृत्तये सतीति अर्थविवक्षापूर्वकत्वेनेत्यनुषङ्गेणान्वयः। तथा च ब्रह्मसूत्रं नोपादेयतया व्याख्येयं प्रमाणत्वाभावात् बौद्धादिवदि-त्युक्तं भवति। यद्यपि ब्रह्मसूत्रस्यार्थविवक्षापूर्वकत्वोपगमे तत एव व्याख्येयत्वसंभवादुपादेयत्वरूपविशेषणाभावेनैव विशिष्टाभावपर्यवसानस्य वाच्यतया लाघवादुपादेयत्वाभाव एव साधयितुमुचितः। तथाऽपि कर्मादौ शङ्खवीणादि-ध्वनिविशेषे च व्यभिचारवारणाय विशिष्टसाध्यानुसरणम्। नन्वत्र हेत्वसिद्धिः। ब्रह्मसूत्रस्य बोधकत्वेनैव प्रामाण्यसिद्धेरित्यत आह न चेति। याथार्थ्ये मानं प्रामाण्यविषयकप्रमितिः। नास्ति न भवितुमर्हति। अनादिमूलकत्वेनाप्रामाण्यशङ्कादिति शेषः।

गूढ०— ननु ब्रह्मादिभिः प्रार्थनायां कृतायां अस्य प्रणीतत्वादर्थविवक्षापूर्वकत्वं निश्चीयत इत्याशंक्य निषेधति न चेति । उपादेयतयेति । एतदर्थज्ञानं मम हितसाधनमिति बुध्या स्वीकारेणेत्यर्थः ।

प्रदीपः— ननु ब्रह्मसूत्रेषु प्रतिभासमानस्यार्थस्योपयुक्तत्वात् विवक्षितार्थत्वमेवेति चेत् किमेतावता व्याख्येयत्वं किं वा याथार्थ्येऽपि न तावदेतावतेत्याह **न चेति** । **याथार्थ्यं** सिद्धमित्याह **न चेति** ।

२६ सु०— तद्भावेऽपि तथाविधवाक्यान्तरपरित्यागेन अस्यैव व्याख्याने कारणं वक्तव्यम्" इत्याशङ्कानिरासाय परमार्थ्यविद्या इत्युक्तम् ।

परि०— परमार्थ्यपदव्यावर्त्यमाह **तद्भावेऽपीति** । याथार्थ्यभावेऽपीत्यर्थः ।

आनन्दः— ननु सूत्रकर्तुराप्तत्वेनाप्तिमूलत्वाद्याथार्थ्यमित्यत आह **तद्भावेऽपीति** । नन्वेवमपि नोक्तशङ्कापरिहारः । याथार्थ्ये सत्यर्थविवक्षापूर्वकत्वरूपव्याख्येयत्वप्रयोजकस्य परमार्थ्यविद्येत्यनेनानुक्तत्वात् । एतस्यैव व्याख्येयत्वेऽन्यापेक्षयोत्तमत्वस्यानुक्तत्वात् च ।

वा०चं०— बोधकस्य सतो बाधकाभावे प्रामाण्यस्य स्वतःसिद्धत्वात् किं तत्र प्रमाणान्तरगवेषणयेत्यतः परशब्दव्यावर्त्याशङ्कामुत्थापयति **तद्भावेऽपीति** ।

वा०र०— **बोधकस्य सत इति** । बोधकत्वे सति यत्र बाधकत्वाभावः तत्र प्रामाण्यस्य ज्ञानसाधनत्व-ग्राहकान्वयव्यतिरेकग्राह्यत्वादित्यर्थः । **तथाविधवाक्यान्तरेति** मूलम् । याथार्थ्ये सत्यर्थविवक्षापूर्वकवाक्यान्तरे-त्यर्थः ।

स०न्न०— ननु ब्रह्मसूत्रेषु प्रतिभासमानार्थस्योपयुक्तत्वाद्विवक्षितार्थान्येवेति चेत् किमेतावता व्याख्येयं किं वा याथार्थ्येऽपि । न तावदेतावतेत्याह **तद्भावेऽपीति** । सर्वोत्कर्षे सत्यस्यैव व्याख्यानम् । न चास्य अन्यस्मात्कोऽप्युत्कर्षो दृश्यत इति ।

काशी०— **तद्भावेऽपीति** । याथार्थ्यसद्भावेऽपीत्यर्थः । तथाविधवाक्यान्तरं प्रमाणभूतकर्ममीमांसादि ।

गूढ०— ननु सूत्रकर्तुराप्तत्वेनाप्तिमूलत्वाद्याथार्थ्यमित्यत आह **तद्भावेऽपीति** । नन्वेवमपि नोक्त-शङ्कापरिहारः । याथार्थ्ये सत्यर्थविवक्षापूर्वकत्वरूपव्याख्येयत्वप्रयोजकस्य परमार्थ्यविद्येत्यनेनानुक्तत्वात् । एतस्यैव व्याख्येयत्वे अन्यापेक्षया उत्तमत्वस्यानुक्तत्वाच्च ।

प्रदीपः— तथाभूतार्थविदकत्वेन याथार्थ्येऽपि न व्याख्येयत्वमित्याह **तद्भावेऽपीति** । सर्वोत्कर्षे खल्वस्यैव व्याख्यानं चास्यास्मात्कोऽप्युत्कर्षो न दृश्यत इति ।

अन्यान् ग्रन्थान् परित्यज्य ब्रह्मसूत्राणामेव व्याख्यानस्योपपादनम्—

२७ सु०— अयमभिसन्धिः । अस्ति तावदस्मिन् ग्रन्थे 'द्वे विद्ये वेदितव्ये परा चैवापरा च' इत्यादौ परविद्याख्या । तत्र विद्याशब्देनार्थविवक्षा याथार्थ्यं चास्यावगम्यते । यथार्थज्ञानतत्साधनयोः विद्याशब्दस्य योगरूढिभ्यां प्रवृत्तत्वात् । 'संज्ञायां समजनिषद' इत्यत्र संज्ञायामित्यनुवृत्तेः । परशब्देन च यथार्थाद्वाक्यान्तरादुत्कर्षः ॥ तदेवमागमेनैवास्य सर्वोत्तमप्रामाण्यप्रतीतेः गहनार्थत्वाच्चोपपन्नमन्यपरित्यागेनास्यैव व्याख्यानमिति ।

परि०— कथमनेनोक्तशङ्कात्रयनिरास इत्यत आह अयमभिसन्धिरिति ॥ आद्यं शङ्काद्वयं तावत् निराह अस्तीत्यादिना ॥ अस्मिन् ग्रन्थे 'अथातो ब्रह्मजिज्ञासे'त्यादिब्रह्ममीमांसात्मकग्रन्थे । विषयसप्तमीयम् ॥ इत्यादौ आथर्वणाद्युपनिषदि । ब्रह्मसूत्रसन्दर्भवाचितया परविद्यापदप्रयोगः श्रूयत इत्यर्थः ॥ परविद्याशब्दस्य ब्रह्मसूत्रवाचित्वमग्रे व्यक्तम् ॥ अस्येति । व्याख्येयग्रन्थस्येत्यर्थः ॥ कथमित्यत आह यथार्थेति । यद्यपि 'यथार्थज्ञानसाधने विद्याशब्दस्ये'त्येवात्र प्रकृतसङ्गतत्वात् वक्तव्यमथापि ज्ञानसाधनमात्रोक्तौ ज्ञानस्य विद्याशब्दार्थत्वं नेति स्यात् । तथाच 'विद्यैव तु निर्धारणात्', 'विद्याकर्मणोरिति तु प्रकृतत्वादि'ति सूत्रे 'विद्ययाऽमृतमश्नुत' इत्यादिश्रुतौ च विद्यापदप्रयोगो ज्ञाने गौण इति शङ्का स्यात्; सा मा भूदित्येतदर्थं ज्ञानपदमप्युपात्तम् ॥ 'ज्ञान इवे'ति दृष्टान्तत्वेन वा ज्ञानेत्युक्तिः ॥ योगरूढिभ्यामिति । ननु 'व्रजयजोर्भावे क्यपि'ति सूत्रेण भावे क्यप् विहितः । अत्र च पूर्वस्माद्भावे इत्यनुवर्तमाने पुनः भावग्रहणं भाव एव व्रजयजोर्यथा क्यपस्यान्न तु 'अकर्तरि च कारके संज्ञायाम्' इत्यस्यापि अनुवर्तमानत्वात्कर्तृव्यतिरिक्तकारकेऽपि स्यादित्येतदर्थम् । तथाच व्रज्या इज्येतिवत् 'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिण' इत्युत्तरसूत्रेऽपि तस्यैव क्यपोऽनुवर्तमानत्वाद्भाव एव क्यपीति विद्याशब्दो ज्ञान एव मुख्य इति प्राप्नोतीति चेन्नैवम् । 'व्रजयजोर्भावे क्यपित्य'त्रोक्तं भावग्रहणं 'संज्ञायां समजे'ति सूत्रे नानुवर्तते, क्यबेवानुवर्तत इति वृत्त्यादावुक्तत्वेन ततः पूर्वं दूरे सामान्यतोऽधिकृतस्य 'भावे' इत्यस्य 'अकर्तरि चे'ति सूत्रस्य च 'कृत्यल्युटो बहुल'मित्येतत्पर्यन्तमनुवर्तनेन 'समजनिषदे'ति सूत्रेऽपि संबन्धेन भावे कर्तृभिन्ने कारके च संज्ञायां विषये क्यप्प्रत्ययो भवतीत्युक्तत्वेन वेदनमित्यर्थे च विदेः क्यपि सति 'लशक्वतद्धिते' इति ककारस्य 'हलन्त्यमिति' पकारस्य च इत्संज्ञायां लोपे 'पुगन्तलघूपधस्य चे'ति गुणस्य 'क्क्ङिति चे'ति निषेधे, स्त्रीप्रत्यये, टापि सति विद्येतिरूपनिष्पत्तेर्विद्याशब्दे 'अकर्तरी'त्युक्तेः योगस्य, 'संज्ञायामि'त्युक्तेः रूढेश्चोक्तत्वादिति भावः । अत एवैतावन्तमभिप्रायं द्योतयितुं समजनिषदेत्यत्र संज्ञायामित्यनुवृत्तेः इत्युक्तम् । अकर्तरि च कारके संज्ञायामित्यस्यानुवृत्तेरित्यर्थः । तेन तत्सहनिविष्ट-

भावपदानुवृत्तिरपि सूचिता । अन्यथा संज्ञायां समजेति सूत्र एव संज्ञायामित्यस्य सत्त्वादनुवृत्तेः इत्युक्तिरयुक्ता स्यात् । संज्ञायामित्यनुवृत्तेरित्युक्तौ त्वन्यथानुपपत्त्या एकदेशद्वारा अकर्तरि च इति सूत्रस्मरणेन तस्यैवानुवृत्तिं ज्ञारयन्तीत्यभिप्रायः ।

ननु च 'अकर्तरी'त्यतः संज्ञापदेऽनुवर्तमानेऽपीह संज्ञाग्रहणं किमर्थमिति चेत् उच्यते । अकर्तरि चेत्यत्रोपात्तं संज्ञापदमव्यावर्तकम् । चशब्दस्य संज्ञायां चेत्यत्रान्वयेन संज्ञायामसंज्ञायां चेति व्याख्यानात् । एवं तर्हि तत्रत्यसंज्ञापदानुवृत्तिः किमर्थमुक्तमिति चेन्न । तत्सूत्रस्यैवात्रानुवृत्त्यर्थत्वात् इत्युक्तत्वात् । तर्हि यथार्थज्ञानसाधने विद्याशब्दस्य रुढिर्न ज्ञापिता स्यादिति चेन्न । 'समजनिषदे'ति सूत्रस्थसंज्ञापदस्यैव रूढिज्ञापकत्वात् । अत एव 'समजनिषदे'त्यत्र प्रतिपदं संज्ञायामित्यनुवृत्तेः अनुषङ्गादित्यप्यर्थ इत्यास्तां तावत् ।

संज्ञायां समजनिषदेत्युक्तेरित्येव क्वचित्पाठः । तदा तु न क्लेशः । अर्थविशेषालाभः । समर्थितं च ज्ञानतत्साधनयोर्मुख्यत्वं विद्याशब्दस्य अदृश्यत्वनयचन्द्रिकायाम् ।

'तद्भावेऽपी'त्यादिना कृतं चोद्यं निराह **परशब्देनेति** ॥ **उत्कर्षः** आधिक्यम् ॥ **आगमेनेति** । 'द्वे विद्ये वेदितव्ये' इति प्रागुक्तवाक्येनेत्यर्थः ॥ **अस्य ब्रह्मतन्त्रादिशास्त्रस्य** ॥

गु०दी०— "विद ज्ञान" इति धातुव्याख्यानरीत्या मिथ्याज्ञानतत्त्वज्ञानसाधारणज्ञानमात्रे विद्याशब्द-प्रवृत्तौ सत्यां सार्वत्रिकयोगमात्रलभ्यप्रयोगव्युदासाय संज्ञायामिति रूढ्यपरपर्यायसंज्ञापदेन तदेकदेशं गृह्णता पाणिनिनैव "मुख्यामुख्ययोर्मुख्ये संप्रत्यय" इति न्यायेन मुख्ये तत्त्वज्ञाने तत्साधने च विद्यापदस्य रूढिरनुशिष्टेति भावेनोक्तं **यथार्थज्ञानेति** । नदीतीरे पक्वफलानि सन्तीति यत्किञ्चिद्यथार्थज्ञानतत्साधनवाक्ये विद्याशब्दस्याप्रयोगेन वेदादौ विद्याशब्दप्रयोगेन च यथार्थज्ञानतत्साधनप्रबन्धविशेषयोरित्यर्थः । तदेव सूत्रमेकदेशग्रहणेन स्मारयति **समजनिषदेति** । "संज्ञायां समज-निषद-निपत-मन-विद-भुज्-शीङ्-भृञिण" इति सूत्रे संज्ञायामिति आदावुदितरूढ्यर्थपदस्य समज-निषद-निपत-मन-विदादिसकलधातुष्वप्यनुवर्तनात् क्यप् प्रत्यये च कृते समज्या निषद्येतिपदवत् विद्येतिपदं यथार्थज्ञाने तत्साधने च योगरूढिभ्यां प्रवृत्तमित्यर्थः । तैस्तैर्वादिभिः स्वस्वकृत-दुर्विद्यास्वपि विद्यापदप्रयोगोऽभिमानमात्रादेव क्रियते न त्वनुशासनबलादिति भावः ।

यादु०— **विद्याशब्दस्य योगरूढिभ्यामिति** । वेद्यतेऽर्थोऽनयेति योगेन 'सा विद्या तन्मतिर्यया' इत्यादि-प्रयोगदर्शनसिद्धया रूढ्या च प्रवृत्तत्वादित्यर्थः । न च रूढ्यैवोभयलाभे योगाश्रयणं व्यर्थमिति वाच्यम् । अर्थविवक्षा-विधुरे यथार्थज्ञानसाधनेऽपि रूढेः सत्त्वेन तन्मात्रेणोभयलाभासंभवात् । वेदनकरणत्वरूपयौगिकार्थप्रापकक्यप्-प्रत्ययस्य संज्ञायामेव विहितत्वेन रूढ्यभावे तदनुपपत्ते रूढेरप्यावश्यकता । अत्र यथार्थज्ञाने वेदनं विद्येति योगस्य; 'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते', 'विद्यैव तु निर्धारणा'दित्यादिप्रयोगमभिप्रेत्य रूढेश्च प्रदर्शनं दृष्टान्ततयेति

ज्ञातव्यम् ॥ ननु 'एरजि'ति सूत्रव्याख्यानावसरे काशिकायां भावे 'अकर्तरि च कारक' इति च प्रकृतमनुवर्तते यावत्कृत्यल्युटो बहुलमित्युक्तत्वात् । भवतु भावे करणे वा विदेः क्यपि विद्याशब्दादुक्तयोगेन ज्ञानतत्साधनलाभः । तत्र रूढिज्ञापकं तु न किञ्चिदस्ति । उक्तप्रयोगाश्च योगेनाप्युपपन्नाः । संज्ञायामित्यस्य तु भिन्नक्रमेण चकारेण असंज्ञायामपीत्यर्थलाभादनियतत्वाभिप्रायेणानुवृत्तेरुक्तत्वादित्यत आह **संज्ञायामिति** । सत्यमकर्तरि च कारके संज्ञायामित्यतः संज्ञायामित्यस्यानियमेनानुवृत्तिरुक्तेति । तथाऽप्यत्र सूत्रे पुनः संज्ञाग्रहणात्संज्ञायामित्यस्याप्यनुवृत्तिरभिप्रेतेति ज्ञायते 'सिद्धे सत्यारम्भो नियमार्थ' इति न्यायादतो रूढिरप्युपपन्नेति भावः । अत एव क्वचित्संज्ञायामित्यस्यानुवृत्तेरित्यपि पाठः ॥ 'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिण' इति सूत्रस्यायमर्थः । समजादिभ्यो धातुभ्यः स्त्रियां क्यप्प्रत्ययो भवति संज्ञायां विषय इति । उदाहरणं तु समजन्ति अस्यामिति समज्येत्यादि द्रष्टव्यम् ॥

वं०प०— अस्मिन्ग्रन्थे 'अथातो ब्रह्मजिज्ञासे'ति ब्रह्ममीमांसात्मके ग्रन्थे । अस्य व्याख्येयग्रन्थस्य ॥ **विद्याशब्देनार्थविवक्षा याथार्थ्यं चेति** । शब्दानां यथावस्थितार्थप्रतिपादकत्वरूपयाथार्थ्यं वक्तृविवक्षाधीनम् । वक्त्रा हि यथावत्स्थितमेवार्थं प्रतिपादयिष्यामीतीच्छया शास्त्रं निर्मितं चेतदा तस्य निरुक्तं याथार्थ्यं संपद्यते । नान्यथेत्येवमर्थविवक्षायाथार्थ्ययोः साध्यसाधनभावसद्भावाद्याथार्थोक्त्या विवक्षा अपि लब्धा । कार्योक्त्या कारणस्यापि लाभात् । अत एव हुं फडित्यादिमन्त्रेऽर्थविवक्षाया अभावादेव न तस्य यथावस्थितार्थप्रतिपादकत्वरूपं याथार्थ्यम् । याथार्थ्येऽर्थविवक्षायाः कारणत्वद्योतनायैव विवक्षा याथार्थ्यं चेति विवक्षाया आदित उपपादनं कृतम् । एवं च वेद्यते यथावस्थितमेव तत्त्वं ज्ञायतेऽनयेति निर्वचनेनास्य शास्त्रस्य यथावस्थितार्थप्रतिपादकत्वरूपं याथार्थ्यमवगम्यत इत्यर्थः ॥ 'मुख्यामुख्ययोर्मुख्ये संप्रत्यय' इति न्यायेन यथावस्थितमेव वेद्यत इत्यर्थो लभ्यते । अत एव शिष्यते यथावस्थितमेव प्रतिपाद्यते तत्त्वमनेनेति शास्त्रमिति शास्त्रशब्देनैकार्थतां विद्याशब्दस्य 'चक्रे शास्त्रमनुत्तमि'ति वक्ष्यतीति द्रष्टव्यम् ॥ **यथार्थज्ञानतत्साधनयोरिति** । विद ज्ञान इति धातोर्विद क्यप्प्रत्ययं ककारलोपे कित्त्वाद्गुणाभावे वेदनं विद्येति भावे व्युत्पन्नो विद्याशब्दो यथार्थज्ञाने यौगिकः । समजनिषदेति सूत्रे विदधातोः संज्ञायां गम्यमानायां क्यप्प्रत्ययविधानात् तदन्तो विद्याशब्दो यथार्थज्ञाने रूढः । विदधातोः करणे क्यप्प्रत्यये सति वेद्यतेऽर्थोऽनयेति विद्येति करणे निष्पन्नो विद्याशब्दो यथार्थज्ञानसाधने यौगिकः । 'सा विद्या तन्मतिर्यये'ति प्रयोगाद्यथार्थज्ञानसाधने विद्याशब्दो रूढ इति द्रष्टव्यम् । **आगमेन 'द्वे विद्ये वेदितव्ये' इति** प्रागुक्तेनेत्यर्थः । **अनुव्याख्यां करिष्यन्तीति** । अनुव्याख्यानं करिष्यन्ति, पुनरपि व्याख्यानं करिष्यन्तीत्यर्थः ।

आनन्दः— किञ्चास्य ग्रन्थस्य परमाख्यविद्येति संज्ञा न युक्ता । श्रुत्यादावनुक्तत्वादित्यत आह **अथमभिसंधिरिति** । ग्रंथ इति विषयसप्तमी । एवं चैतद्ग्रन्थविषयिणी परविद्याख्या द्वे विद्ये वेदितव्ये इति श्रुतावुक्तेत्यन्वयः । अस्तु ततः किमत्राह **तत्रेति** । **याथार्थ्ये सत्यर्थविवक्षापूर्वकत्वान्यापेक्षयोत्तमत्वयोरित्यर्थः** । अत्र हेतुमाह **यथार्थेति** । एवं च यथार्थज्ञानसाधनत्वेन ब्रह्मसूत्राणां याथार्थ्यमर्थविवक्षापूर्वकत्वं चेति भावः । ननु यथार्थज्ञानसाधनत्वेन याथार्थ्यसिद्धावपि न तेनार्थविवक्षापूर्वकत्वसिद्धिः । व्याप्त्यभावात् । यथार्थज्ञान-

साधनत्वस्य कदाचिदुन्मत्तवाक्ये सत्त्वेऽपि अर्थविवक्षापूर्वकत्वाभावेन व्यभिचारित्वादिति चेन्मैवम् । नियमेन यथार्थज्ञानसाधनत्वस्य विवक्षितत्वात् । उन्मत्तवाक्यस्य कदाचिद्यथार्थज्ञानसाधनत्वेऽपि नियमेन तदभावात् । न चैवमपि विषहरमन्त्रे नियमेन यथार्थज्ञानसाधनत्वसत्त्वेऽपि अर्थविवक्षापूर्वकत्वाभावाद्व्यभिचार इति वाच्यम् । यथार्थज्ञानसाधनत्वेन गुरूपदिष्टत्वस्यैव यथार्थज्ञानसाधनत्वस्य विवक्षितत्वात् । विषहरमन्त्रस्य तु विषहरण-साधनतयोपदिष्टत्वेन यथार्थज्ञानसाधनतयोपदिष्टत्वाभावान्न व्यभिचारः । यद्यपि वेदे यथार्थज्ञानसाधनतया गुरूपदिष्टत्वसत्त्वेऽपि अर्थविवक्षापूर्वकत्वाभावाद्व्यभिचारः । तथापि तद्व्यावृत्त्यर्थं पौरुषेयत्वे सतीत्यपि द्रष्टव्यम् । ननु व्रजयजोरित्यतो भावग्रहणस्यानुवृत्त्या भाव एव विद्याशब्दनिष्पत्तिसंभवेन कथं करणे विद्याशब्दनिष्पादनमित्यत आह **संज्ञायामिति** । तथाच संज्ञायामित्युक्तत्वेन भावग्रहणस्यास्वरितत्वेन करणे भावे चोभयत्रापि क्यपाविद्याशब्द-निष्पादनमिति भावः । उपसंहरति **तदेवमिति** । उपलक्षणमेतत् । अर्थविवक्षापूर्वकत्वप्रतीतेरित्यपि द्रष्टव्यम् । तथापि स्पष्टार्थत्वान्नेदं व्याकर्तव्यमित्यत उक्तं **गहनार्थत्वाच्चेति** ।

कं०रा०— संज्ञायामिति । संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिण इत्येतत्सूत्रवृत्तिव्याख्याना-वसरे पदमञ्जर्यां संज्ञायामित्यनुवर्तमाने पुनः संज्ञाग्रहणं भावार्थम्, पूर्वसंज्ञाग्रहणं कारके संबद्धमित्युक्तत्वात् । अकर्तरि च कारके संज्ञायामित्यस्मात् कारकसंबद्धस्य संज्ञायामित्यस्यानुवृत्तेरित्यर्थः । तथा चैतत्सूत्रे भावार्थसंज्ञाग्रहणेन अकर्तरि च कारके संज्ञायामित्यस्मात्कारकसंबद्धस्य संज्ञायामित्यस्यानुवृत्त्या च क्यच्व्रययान्तस्य विद्याशब्दस्य यथार्थज्ञाने तत्साधने च रूढिसिद्धिरिति भावः । न च वाच्यं वृत्तौ संज्ञायामित्यस्मिन्सूत्रे 'भाव इति न स्मर्यत' इत्युक्तत्वात्कथं भावार्थं पुनः संज्ञाग्रहणमिति । व्रजयजोर्भवि क्यबिति पूर्वसूत्रे यद्भावग्रहणं तस्येह स्वरितत्वं न प्रवर्तत इत्यर्थप्रतिपादकत्वाद्वृत्तिवाक्यस्य । अत एव वृत्तौ पूर्व एवाधिकार इति स्त्रियां क्तिन्नित्यादौ भावेऽकर्तरि च कारक इति योऽधिकारः स एवात्राधिकार इत्युक्तम् । संज्ञायामित्युक्तेरिति पाठे त्वत्र सूत्रे भावार्थं संज्ञायामित्युक्तेः अकर्तरि च कारके संज्ञायामित्यस्मात्कारकसंबद्धसंज्ञाग्रहणस्यानुवृत्तेश्च विद्याशब्दस्य यथार्थज्ञानतत्साधनयो रूढिसिद्धिरित्या-शयो द्रष्टव्यः ।

श्रीनिधि०— विद्याशब्देनार्थविवक्षा चेति । याथार्थ्ये सिद्धे अर्थविवक्षा च सिद्ध्यतीति भावः । ननु यादृच्छिकसंवादिशुकादिवाक्ये याथार्थ्ये सत्यपि अर्थविवक्षा नास्तीति चेन्न । यथार्थज्ञानकरणपौरुषेयवाक्यस्यार्थ-विवक्षापूर्वकत्वनियमादिति । **यथार्थज्ञानतत्साधनयोरिति** । अत्र यथार्थज्ञानेति स्वरूपकथनम् । यथा यथार्थज्ञाने तथा तत्साधनेऽपीति दृष्टान्तार्थं वा । विद ज्ञाने इत्यस्मात् 'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः' इति सूत्रेण समादिपूर्वकाजादिभ्यः भावे संज्ञायाम् क्यप् 'अकर्तरि च कारके संज्ञायां क्यप्' इति प्रासादयोजनानुसारेण क्यपि कृते ककारलोपे कित्त्वेन गुणनिषेधे टापि च विद्येति रूपं यथार्थज्ञानतत्साधन-वाचकं सिद्ध्यति । वेदनकरणं विद्या वेदनं विद्येति योगः प्रसिद्धः, रूढिः कथमित्यत आह **समजनिषदेति** । इत्युक्ते रूढिरस्तीत्यर्थः । सूत्रस्यादितः प्रतीकग्रहणे संज्ञाशब्दस्य द्विर्ग्रहणप्रसक्त्या गौरवं स्यादित्यत एवं प्रतीकग्रहणमिति बोध्यम् । ननु संज्ञायां समजेत्यत्र भाव इति न स्मर्यत इति काशिकोक्तेः । अकर्तरि च कारक इत्यस्यानुवृत्तौ यथार्थज्ञाने

कथं रूढिरिति चेत् सत्यम् । व्रजयजोर्भवि क्यप् इत्यतः भाव इत्यस्यानुवृत्तावपि 'सृस्थिरे' भावे चेति महाधिकारादनुवृत्तिस्संभवतीति प्रसादोक्तरीत्या रूढिसंभवात् । संज्ञायामित्यनुवृतेरिति क्वचित् पाठः । तत्राकर्तरि च कारके संज्ञायामिति समग्रसूत्रस्यानुवृत्तेरित्यर्थः । संज्ञायामित्यनुवृत्तौ पुनः संज्ञाग्रहणप्रयोजनस्य काशिकाया-मनुक्तत्वेऽपि भावे संज्ञायां यथा स्यादित्येवमर्थं पुनः संज्ञाग्रहणमिति प्रासादकारादिभिरुक्तं ज्ञेयम् । अस्मिन् पाठे योगरूढी उपपादिते । प्रियस्थिरेति सूत्र इमनिचः सूत्रोपात्तसर्वशब्दसंबन्धो नास्ति । एवं संज्ञायामित्यस्य समर्जनि सूत्रोपात्तसर्वधातुसंबन्धाभावो न भवति । किन्तु सर्वत्र संबन्धो विवक्षितः तथा चानुवृत्तेरस्सर्वत्र संबन्धादित्यर्थ इति केचित् ।

वा०चं०— नन्वनेनार्थविवक्षापूर्वकत्वादौ न किमपि मानमुक्तमिति कथमनेनोक्तशङ्कापरिहार इत्यत आख्यापदसूचितं मानमुदाहृत्य तदुपपादयितुमाह **अयमिति** ॥ ननु ज्ञानार्थकविदेर्भवि क्यपि निष्पन्नविद्याशब्दस्य ज्ञानगमकत्वेऽपि नार्थविवक्षायाथार्थ्यगमकत्वमित्यतो विद्याशब्दस्य भावकरणसाधनतया योगेन ज्ञानस्येव तत्साध-नत्वस्य रूढ्या याथार्थ्यस्य च लाभादुभयगमकत्वं युक्तमित्यभिप्रेत्याह **यथार्थेति** ॥ ननु 'संज्ञायां समजनिषद' इति सूत्रे 'व्रजयजोर्भवि क्यप्' इत्यतो भावग्रहणानुवृत्तौ तद्भावग्रहणस्य 'भावेऽनुपसर्गस्ये'त्यादाविव 'अकर्तरि च कारक' इत्येतन्निवृत्त्यर्थतया तत्साधनलाभ एव । न चात्र सूत्रे 'भाव' इति न स्मर्यत इति वृत्तिकृतोक्तत्वान्न तद्भावाधिकार इति वाच्यम्; अत्र तदधिकाराभावज्ञापकाभावात्, 'स्त्रियां भावाधिकारोऽस्ति । तेन भार्या प्रसिद्ध्यति' इत्युक्तविरोधाच्च भावाधिकारस्यावश्यकत्वात् । तदधिकाराभावेन ज्ञानसाधनलाभेऽपि रूढिज्ञापकाभावेन याथार्थ्यलाभ एवेत्यतः 'संज्ञायां समज' इति सूत्रे 'संज्ञायामि'त्युक्तत्वाद्यस्मिन्नर्थे उत्पद्यमानेन क्यपा संज्ञा गम्यते तस्मिन्नर्थे क्यप् भवतीति सूत्रार्थनिष्पत्त्या संज्ञाग्रहणबलेनैव भावाधिकारभावस्य ज्ञापितत्वात् । भृत्यश्च भाव एवोत्पद्यमानेन क्यपा संज्ञा गम्यत इति भृत्याशब्दवाच्यत्वेन व्यापाररूपभावाधिकारस्य स्त्रियां भावाधिकारोऽस्तीत्यनेन उक्तावपि तेन स्वरितत्वनिबन्धनशास्त्रीयाधिकारानुकत्या तद्विरोधाभावात्संज्ञाग्रहणेनैव रूढेरपि ज्ञापितत्वेन ज्ञानार्थकविदेश्च यथार्थज्ञानरूपभावे तत्साधने च विहितेन क्यपा संज्ञा गम्यत इति युक्तं तदुभयगमकत्वं विद्याशब्दस्येत्याह **समजनिषदेत्यत्र संज्ञायामित्युक्तेरिति** । (व्रजयजोर्भवि क्यप् । व्रज्या । इज्या । 'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः'। समजादिभ्यः स्त्रियां भावादौ क्यप् स्यात्स चोदात्तः संज्ञायाम् । 'अजेः क्यपि वीभावो नेति वाच्यम्' । समजन्त्यस्यामिति समज्या सभा । निषीदन्त्यस्यामिति निषद्या आपणः । निपतन्त्यस्यामिति निपत्या पिच्छला भूमिः । मन्यतेऽनयेति मन्या गलपार्श्वशिरा । तया हि क्रुद्धो ज्ञायत इति भावः । विदन्त्यनया विद्या । सुत्या । अभिषवः । शय्या । भृत्या । भरणम् । जीविका । 'कुमारभृत्या गर्भिण्याः परिचर्याऽभिधीयत' इति हारावली । 'कुमारभृत्याकुशलैरधिष्ठित' इति रघुः । ईयतेऽनया इत्या शिबिका । 'भावेऽनुपसर्गस्य' । अनुपसर्गस्य व्हयतेः संप्रसारणमप् च स्याद्भावे । हवः । 'अकर्तरि च कारके संज्ञायाम्' । कर्तृभिन्नकारके घञ् स्यात् । 'चवि च भावकरणयोः' । रञ्जेर्नलोपः स्यात् । रागः । अनयोः किम् । रज्यत्यस्मिन् रङ्गः । प्रास्यत इति प्रासः । संज्ञायामिति प्रायिकम् । को भवता लाभो लब्धः । इत उत्तरं भावे 'अकर्तरि च कारक' इति

पदद्वयमप्यनुवर्तते 'कृत्यल्युटो बहुलम्' इति यावत्। एजिति सूत्रव्याख्यानावसरे काशिकायां भावेऽकर्तरि च कारक इति प्रकृतमनुवर्तते यावत्कृत्यल्युटो बहुलमित्युक्तम्) । संज्ञायां समजनिषदित्युक्तेरिति पाठेऽप्ययमेवार्थः । समजनिषदेत्यत्र संज्ञायामित्यस्यानुवृत्तेरिति पाठे तु व्रजयजोर्भावि क्यपित्यतोऽस्वरितत्वेन भावग्रहणानुवृत्त्या निवर्तकाभावादकर्तरि च कारके संज्ञायामित्यस्यानुवृत्तेर्विद्याशब्दस्य योगरूढिभ्यां यथार्थज्ञानसाधनबोधकत्वं युक्तमिति दर्शयितुं संज्ञायामित्यस्यानुवृत्तेरित्येकदेशोत्कीर्तनम्। अत्र च संज्ञाग्रहणेऽनुवर्तमाने पुनः संज्ञाग्रहणमकर्तरि च कारके संज्ञायामित्यत्र चशब्दस्य संज्ञायामित्यनेन संबन्धे संज्ञायामसंज्ञायां चेत्यर्थलाभात्तत्सूत्रीयसंज्ञाशब्दस्य प्रायिकार्थतया व्याख्यातत्वात्तदनुवृत्तावप्यत्र नियमालाभात्तल्लाभायेति द्रष्टव्यम्। अत्र परत्वस्य प्रकारान्तरेण विवक्षणे तद्भावेऽपीति शङ्कानिवर्तकत्वं न स्यादिति सन्निधानाद्विद्याशब्दार्थयाथार्थ्येनैव परत्वमित्यभिप्रेत्याह परेति । गहनार्थत्वस्य साक्षाद्भाष्येऽनुक्ततया तन्निवर्त्यां शङ्कामनुक्त्वा व्याख्येयत्वमुपपादयितुं तत्प्रयोजकानि कथयतो भाष्यकारस्य व्याख्येयत्वप्रयोजकत्वाद्गहनार्थत्वमप्युपलक्षणतयाऽभिप्रेतमित्यभिप्रायेण भावकथनदशायां तदाह गहनार्थत्वाच्चेति ॥

वा०२०— **पूर्वकत्वादाविति** । आदिपदेन प्रामाण्यपरिग्रहः । उपलक्षणं चेदम् । इतरपरित्यागेनास्यैव व्याख्याने हेतुविशेषाप्रतीतेश्चेत्यपि ज्ञेयम्। **मूले ग्रन्थ इति** विषयसप्तमी। तथा च एतद्ग्रन्थविषयिणी परविद्याख्या द्वे विद्ये वेदितव्येति श्रुतावुक्तेत्यन्वयः । **एतद्विषयेति** वक्ष्यमाणत्वात् । तावतापि किं इत्यत आह **तत्रेति** मूलम् । **अर्थविवक्षायाथार्थ्येति** । एतत् उभयगमकत्वमित्यर्थः । **भावकरणेति** । भाववाचकतया करणवाचकतया चेत्यर्थः। **ज्ञानस्येवेति**। अनेन विद्याशब्दस्य यथार्थज्ञाने यथायोगरूढिभ्यां प्रवृत्तत्वं तथा तत्साधनेऽपीति दृष्टान्ततया यथार्थज्ञानग्रहणात् नाधिकोक्तिरिति सूचितम् । **तत्साधनत्वस्येति** । लाभादिति वक्ष्यमाणं अत्रापि संबध्यते **रूढ्येति** । अनेन योगरूढेः यथार्थज्ञानतत्साधनगमकता प्रकारभेदेनेति दर्शितम् । यथार्थज्ञानसाधने विद्याशब्दस्य रूढत्वात् तच्छब्देन यथार्थज्ञानसाधनलाभ इत्याशयः । न चात्र तत्साधनत्वं याथार्थ्ययोरेव वाच्यताप्राप्त्या तद्विशिष्टधर्मिणि लक्षणेत्यापन्नमिति वाच्यम्। रूढ्या पद्मत्वस्य योगेन पङ्कजनिकर्तृत्वस्य बोधः इत्यादिरूपग्रन्थकृत् व्यवहाराणां दर्शनिन तत्रेवात्रापि उपपत्तेः। ओतत्ववाचीत्यादिकं तूपपादयिष्यतेऽस्माभिः तत्प्रकारोऽप्यनुसन्धेयः। **उभयेति**। नार्थेति शङ्कितोभयेत्यर्थः। यद्वा ज्ञानमित्येकं अर्थविवक्षायाथार्थ्यमित्यपरं चेति उभयेत्यर्थः। विद्याशब्दस्य यथार्थज्ञानतत्साधनयो रूढत्वे संज्ञायामिति गृहीयसंज्ञायामित्युक्तिरुत्तरमूले प्रमाणीक्रियते। सा यथा तत्र प्रमाणं स्यात् तथा योजयितुं तद्भावतर्यामाशङ्कामाह ननु संज्ञायामित्यादिना । **इति सूत्रेति**। प्रतीकग्रहणमेतत्। 'निपतमनविद-षुञ्शीङ्भृञिणः' इति सूत्रशेषः; **इत्यतः इति अव्यवहितपूर्वसूत्रात्**। **भावग्रहणेति**। भावो गृह्यते अनेनेति भावग्रहणं भाववाचकभावेति पदं तस्यानुवृत्ताविति्यर्थः । अव्यवहितोत्तरसूत्रेऽनुवृत्तिः सुलभा भृत्येत्याद्युदाहरणं च भाव एव व्याख्यातुं शक्यम् । भृत्रोऽसंज्ञायां इति सूत्रीयभाष्ये भाव इति तत्र वर्तते कर्मसाधनप्रतिपादनादिति भावः । एतत् उत्तरत्र स्पष्टीभविष्यति । **तद्भावग्रहणस्येत्यादि** । अयमभिप्रायः । भावे अकर्तरि च कारके इत्येतयोः परिमाणाख्यायां सर्वेभ्यः इत्यारभ्य कृत्यल्युटो बहुलं इत्येतत्पर्यन्तमनुवृत्तौ सत्यां पुनः भावे ग्रहणस्याकर्तरि च कारके

इत्येतन्निवृत्यर्थमित्याकरे व्रजयजोरित्यत्रत्यभावे ग्रहणस्यापि पुनः ग्रहणतयाऽकर्तरि इत्येतन्निवृत्यर्थकत्वमिति तदेतदाह **तद्भावग्रहणस्येति** । तथाविधस्थलीयभावग्रहणस्येत्यर्थः । तदेव दृष्टान्तेनोक्तम् । **भावेऽनुपसर्ग-स्येत्यादाविवेति** । अत्र इत्यादाविवेत्येव पाठः । इत्यादेरिवेति पाठेऽपि इत्यादौ विद्यमानस्येवेत्येवार्थ इत्याहुः । भावग्रहणं अकर्तरि च कारके इत्यस्य निरासार्थं इत्येतत्सूत्रीयकाशिकोक्तेरिति भावः । **तत्साधनेति** । तत्साधनत्वरूपेणैव तत्साधनपदेन ज्ञानसाधनस्य प्राक् प्रकृतत्वात् ज्ञानसाधनं तत्साधनपदार्थः । **अत्र सूत्र इति** । **संज्ञायां इति सूत्रेत्यर्थः** । **न स्वर्यत इतीति** । स्वरितेनाधिकार इति सूत्रे स्वरितेनेति तृतीया इत्थंभूतलक्षणे । स्वरितो नाम वर्णधर्मः तेन चिह्नेनाधिकारो वेदितव्यः । प्रतिज्ञा स्वरिताः पाणिनीयाः भवन्ति इति स्वरिताख्यस्वरविशेष-लक्षणगुणयुक्तं शब्दरूपमधिकृतत्वात् उत्तरत्रोपतिष्ठते । यथा प्रत्ययः परश्च धातोरित्यादिकमिति प्रतिपादनात् व्रजयजोरित्यत्र भाव इत्यस्य च स्वरितत्वं नास्तीति वृत्तित्वात् स्वरितत्वनिबन्धनः तत्सूत्रीयभावः इत्यग्रया-धिकारोऽनुवृत्तिस्तत्सूत्रे नास्तीत्यनुवृत्तिनिबन्धार्थः । उक्तं च मञ्जर्याम् । पूर्वसूत्रे यत् भावग्रहणं तस्य इहास्वग्नि-त्वात् नानुवृत्तिरित्यर्थः इति । **ज्ञापकाभावादिति** । मञ्जर्यां उक्तरीत्या व्याख्यानकरणेऽधिकाराभावे ज्ञापकं तु नोक्तमिति ज्ञेयम् । न केवलं अधिकाराभावे ज्ञापकाभावः किन्तु अधिकारसद्भावे तदुक्तिरूपं प्रमाणमस्ति तदनङ्गीकारे च तद्विरोधश्चेत्याह **स्त्रियां भावेत्यादि** । **उक्तेति** । भृत्रोऽसंज्ञायां इत्येतत्सूत्रीयश्लोकवार्तिक-भाष्यादावुक्तेत्यर्थः । उक्तं च भाष्ये । अपर आह **संज्ञायां पुंसीत्यादि** । ननश्च स्त्रियामिति श्लोकस्य पूर्वार्धः संज्ञायां पुंसि दृष्टत्वात् न ते भार्या प्रसिध्यति इति । अयमत्र श्लोकार्थः । भृत्रः क्यप् विध्यङ्गीकारे भार्येति शब्दः न तव सूत्रकारस्य न सिद्ध्यति । तच्छब्देऽपि भृत्रः क्यप्प्रत्यये भरणीयकर्मकाङ्कवाचिक्रियाशब्दभूतभृत्यशब्द एव भृत्येत्येव रूपमापद्यते । ह्रस्वस्य पिति कृति तुक् प्रत्ययात् ष्ण्यत् अप्राप्यां जातवृध्यभावाच्च । न च भार्याशब्दस्य यूपाह्वनीयादिशब्दवत् संस्कारशब्दत्वात् अप्रियमाणायाऽपि भार्येति प्रयोगविषयतया क्रियापुरस्काराभावेन च संज्ञाशब्दत्वात् संज्ञायां चासंज्ञायामित्यनेन क्यप्निषेधात् न भृत्रोऽसंज्ञायामिति सूत्रेण भार्याशब्दे क्यप्प्रसङ्गेति वाच्यम् । न ब्रूमो वयं एतत्सूत्रेण क्यपा भवितव्यमिति किन्तु यः संज्ञायां समजेति सूत्रेण संज्ञायामेव क्यप् विधीयते तेन क्यपो भवितव्यमिति भार्याशब्दानुपपत्तिरित्येवेत्याशयेनोक्तं **संज्ञायामिति** । संज्ञायां अङ्गीक्रियमाणायां संज्ञायामित्यनेन क्यपि सतीति तत्पदमूचितोऽर्थः । अथ ब्रूयात् । भृत्रोऽसंज्ञायां इत्यत्रत्यासंज्ञायां प्रतिषेधेन संज्ञायां समजेति सूत्रविहितक्यपोऽपि निषेधः प्रतिषेधसामर्थ्यात् इति । तत्राह **पुंसि दृष्टत्वादिति** । संज्ञायामित्येतत् अत्रापि संबध्यते । तथा च संज्ञायां क्यप् नेति निषेधस्य पुंसि भार्यो नाम क्षत्रिय इति संज्ञायां दृष्टत्वात् । चरितार्थत्वा-दित्यर्थः । ततश्चासंज्ञायां इति प्रतिषेधस्य पुंसि चरितार्थत्वे स्त्रियां संज्ञायां नेति प्रतिषेधाभावासिध्या भार्याशब्दे संज्ञायां क्यप् स्यादेवेति तच्छब्दो न सिद्ध्यतीति पूर्वपक्षपरं पूर्वदलम् । उत्तरमाह **स्त्रियां भावाधिकारोऽस्तीति** । स्त्रियां क्तिन् इत्यतः स्त्रियां इत्यस्यानुवर्तनाभिप्रायेण स्त्रियामित्युक्तम् । तथाच स्त्रियां स्त्रीप्रकरणे संज्ञायां समजेत्यादिना विधीयमाने क्यपि भावस्याधिकारोऽभिधेयत्वेनाङ्गीकारलक्षणो व्यापारोऽस्ति । शब्दशक्तिस्वाभाव्यात् भाव एव वाच्ये तेन क्यप् भवति । न कर्मणि । तेन भार्या प्रसिध्यति वदति । भार्याशब्दस्य संज्ञात्वेऽपि तस्य कर्मवाचकतया भावाभिधानाभावेन क्यपोऽप्रसङ्गात् ऋहलोर्ण्यत् इति सूत्रेण ण्यति सति अचो ञ्णिति इति वृद्धौ वधूवाचको

भार्याशब्दः सिद्ध्यति इत्यर्थ इति । अत एव भाष्ये भृत्रः संज्ञाप्रतिषेधे स्त्रियामप्रतिषेधोऽन्येन विहितत्वात् इत्यादिकमुक्तम् । भृत्रोऽसंज्ञायामिति संज्ञायां नेति प्रतिषेधः स्त्रियामपि संज्ञायां न क्यबिति स्त्रीसंज्ञाविषयकोऽपि न भवति । स्त्रीसंज्ञायां संज्ञायां समजनिषदेत्यनेन लक्षणेन क्यपो विहितत्वात् । अस्त्रीसंज्ञाभूतः क्षत्रियः इत्यादौ निषेधेनैव चारितार्थ्यात् स्त्रियामपि तन्निषेधप्रवृत्तिरिति भार्याशब्दे क्यपः प्राप्तिवारणाय पृथगेव निषेधो वाच्यः । न स्त्रियां भृत्रः इति इत्याशङ्कापरिहाराय । नैषदोषः । भाव इति तत्र वर्तते इत्युक्तम् । तथा चोक्तश्लोकेन संज्ञायामिति सूत्रे भावाधिकारस्योक्तत्वात् तदभावाभिधाने तद्विरोध इत्यर्थः । इदं विरोधोद्भावनं आपातप्रतिपन्नार्थाश्रयणेन । अत एव वास्तवार्थाश्रयणेन विरोधं परिहरिष्यति इति ज्ञेयम् । वक्ष्यमाणरीत्या संज्ञाग्रहणस्य भावाधिकाराभावज्ञापकत्वाभावात् स्त्रियां भावेत्यस्यार्थान्तरपरत्वात् न तदावश्यकत्वम् इत्यतोऽधिकाराभावं अन्तीकृत्याह तदधिकाराभावेनेति । तदधिकाराभावेऽपि वा तेन ज्ञानसाधनलाभेऽपि इति योजनाऽभिप्रेतिति ज्ञातव्यम् । समजनिषदेति अत्रेति मूलार्थमाह संज्ञायां समजनिषदेति सूत्रेति । संज्ञायां इत्युक्तेरिति मूलस्याभिप्रेतानि साध्यानि दर्शयन् उक्तानुपपत्तिपरिहारं दर्शयति तस्मिन्नर्थ इत्यादिना । अत एव भाव इति । तत्र इति वर्तते । कर्मसाधनश्चायं प्रत्येकं समाधिमभिधाय तत्रारुचिं अथवेत्यनेन सूचयित्वा य एते संज्ञायां विधीयन्ते तेषु नैवं विज्ञायन्ते संज्ञायां अभिधेयायामिति । किं तर्हि प्रत्ययान्तेन चेत्संज्ञा गम्यत इति भाष्ये उक्तम् । तथा च ण्यत्प्रत्ययान्तेनैव भृत्रा भार्ये संज्ञायाः गम्यमानत्वेऽपि क्यप्प्रत्ययान्तेनावगम्यमानत्वाभावेन संज्ञाग्रहणमहिम्नैव भावाधिकाराभावस्य ज्ञापनसिद्धेः अधिकाराभाव-ज्ञापकसद्भावात् पूर्वपक्ष्युक्तः तदभावोऽसिद्ध इति भावः । एवं ज्ञापकाभावसिद्धिमभिधाय तदुक्तस्त्रियां भावेत्यादि-वाक्यस्य अर्थान्तरपरत्वात् न तद्विवक्षिताधिकारपरत्वमित्याशयेन तस्यार्थान्तरं वदन्नेव तद्विरोधोऽपि नास्तीत्याह भृत्रश्चेति। भावाधिकारोऽभावव्यापारो वाच्यत्वेन विवक्षितः । न तु शास्त्रीयस्वरितत्वनिबन्धनोऽधिकारः इति संज्ञायां समजेति सूत्रीयकाशिकाव्याख्यानरूपभृत्रश्च भाव एवोपपद्यमानेनेत्यादिमञ्जर्यनुसारेण इदम् । भृत्याशब्दवाच्य-त्वेनेत्यत्र भावस्येति शेषः । समज्यादिशब्देषु समजति तस्यामिति समज्या निषीदन्ति तस्यामिति निषद्येत्यादि वृत्त्युक्तरीत्याऽधिकरणकरणयोः उत्पद्यमानेन क्यपा संज्ञा ज्ञायत इति तदुभयार्थे क्यप् भवति । भृत्रश्च भाव एव उत्पद्यमानेन क्यपा वेतनरूपभरणवाचि भृत्येति संज्ञा गम्यत इति तद्धातोर्भाव एव क्यप् । भार्याशब्दे तु कर्मणि ण्यन्तोत्पद्यमानेन संज्ञा गम्यत इति भावे क्यबन्तभृत्रावगम्यत्वाभावात् न भावे क्यपप्रसङ्गः । अत एव न कर्मसाधनश्चायमिति भाष्यम् । अयं भार्याशब्दः कर्मवाचक इत्यर्थः । इत्येवंभावस्याधिकारो नाम भृत्याशब्दवाच्यत्वेनाङ्गीकाररूपो व्यापार एव स्त्रियां भावाधिकारोऽस्तीत्यनेनोक्तः । तावता च शब्दशक्ति-स्वभावात् भृत्रो भाव एव स्त्रियां क्यप् एव भवति न कर्मणि इति कर्मणि ण्यति भार्येति सिद्ध्यतीति दोषपरिहार-लाभात् । परन्तु स्वरितत्वनिबन्धनः शास्त्रियोऽधिकारोऽनुवृत्तिरूपो नोक्तः ततो भृत्रोऽसंज्ञायामित्येतत् सूत्रीयोक्त-श्लोकविरोधाभाव इति समुदायार्थः । अनेन संज्ञायामित्युक्तेः इति मूलस्य संज्ञाग्रहणेनाधिकाराभावज्ञापनात् संज्ञाग्रहणेनैव उक्तरीत्या विरोधपरिहारश्चेति प्रयोजनद्वयपरतया योजना सूचिता । रूढिज्ञापकाभावेन इत्याद्याशङ्का-निरासपरत्वेनापि योजयति संज्ञाग्रहणेनैवेति । उक्तरीत्या अधिकाराभावसाधनमुखेन ज्ञानसाधनलाभोपपादक-संज्ञाग्रहणेनेत्यर्थः । अनेनैव ज्ञानसाधनलाभोपपत्त्येति पूरणीयमिति सूचयति । अनेन संज्ञायामित्युक्तेः मन्येत्यादाविव

करणे क्यप्। तथोक्तत्वादेव रूढिरपीति योजितं भवति। भावे तत्साधने चेति। संज्ञायामिति सूत्रेऽकर्तरि च कारके इति उभयानुवृत्तेः सत्त्वादिति स्पष्टम्। यद्यपि भाष्यकृता। अथवा बहुलकृत्याः। संज्ञायां इति तत्स्मृतम्। अथवा कृत्यल्युटो बहुलमित्येवमत्रापि ण्यदेव भविष्यति। यथा पत्यं यथा अधन्यं यथा भित्तिः तथैव सेति प्रकारान्तरेणापि मार्येति व्युत्पादितम्। तथा मञ्जरीकृतापि संज्ञायामिति सूत्रे भृञ् इति भृञः एकानुबन्धकस्य ग्रहणात् एकानुबन्धग्रहणे न द्व्यनुबन्धकस्यग्रहणमिति परिभाषया भृञ् भरणे इत्यस्यैव क्यप्विधौ ग्रहणेन डुभृञ् धारणे इत्युक्तस्याग्रहणात् तद्धातोर्वा भू इति दीर्घात् भवतेरत्राग्रहणात् तद्धातोर्वा ण्यति मार्येति रूपं इति व्युत्पादितम्। तथा चाधिकारसद्भावपक्षस्य भाष्यकृता अथवेत्यनेनास्वरसवत्तया सूचनात् उक्तप्रकारद्वयेनापि भावाधिकाराभावसिद्धिरित्यपि शक्यते वक्तुम्। तथापि सौत्रज्ञापकाभावशङ्कापरिहाराय। तत्रत्यमेव ज्ञापकं अभिधेयं अन्तरङ्गत्वात् इत्याशयेन मूले संज्ञायामित्युक्तेरित्येवोक्तमिति टीकाकृतापि स एव प्रकार उपपादितः इत्यलं इति सूरयो विदांकुर्वन्तु ॥ संज्ञायां समजेत्येतत् मूलटीकार्थबोधनम्। श्रीस्वामिचरणप्रीत्यै भूयात् मन्दोपकारकम्॥

चशब्दस्य संज्ञायां इत्यनेनेति। चकारो भिन्नक्रमः इत्यादि मञ्जरीस्थप्रतिपादनानुसारेणेदम्। ननु तर्हि संज्ञायामित्यपि मास्तु मा च भूत् चकारः। अकर्तरि कारके इत्येवास्तु इत्यत आह सूत्रीयसंज्ञेति। बाहुल्येन संज्ञायां भवति क्वचिदेवासंज्ञायां इति सूचयितुं संज्ञाग्रहणं कृतमिति प्रायिकार्थतया पदमञ्जर्यां व्याख्यातत्वादित्यर्थः। सौत्रानुवृत्तिसंज्ञायां इत्यनयोरैक्यस्य भावे संज्ञायामिति संबन्धः। अपरस्य संज्ञायामकर्तरि च कारके इति संबन्ध इत्यपि योजयन्तीति गुरवः। एतत्प्रकरणे भावो धात्वर्थ एव। व्रजयजोरिति सूत्रे इज्येत्युदाहरणात्। यथार्थज्ञानलाभेऽपि साधनालाभ इत्यादिटीकासंमतश्च। संज्ञायां समजेत्येतत् वाक्ये गुरुलेखस्तु इत्थम्। ननु भाव इत्यनुवर्तमाने पुनर्भवि ग्रहणस्य भावेऽनुपसर्गस्य इत्यादाविवाकर्तरि च कारके इत्येतन्निवृत्त्यर्थत्वेन व्रजयजोर्भवि क्यबिति सूत्रेऽकर्तरि च कारके इत्यस्याननुवृत्तिसिद्धेः व्रजयजोर्भवि क्यबित्यतो भाव इत्यस्य संज्ञायां समजेति सूत्रेऽनुवृत्तौ अकर्तरि च कारके इत्यस्याननुवृत्तिप्राप्त्या भाव एव संज्ञायां विदेः क्यबिति सूत्रार्थपर्यवसानेन वेदनं विद्येति भावव्युत्पत्त्या ज्ञानगमकत्वस्य रूढ्या च नत् यार्थार्थस्य लाभेन योगरूढिभ्यां विद्याशब्दस्य यथार्थज्ञानमात्रगमकत्वेऽपि संज्ञायामिति सूत्रस्य करणादिकारके क्यपप्रत्ययविधायकत्वेन योगरूढिभ्यां (विद्याशब्दस्य) यथार्थज्ञानसाधनपरत्वासंभवात् कथं योगरूढिभ्यां ज्ञानतत्साधनयोः विद्याशब्दस्य वृत्तिरित्यत आह समजनिषदेत्यत्र संज्ञायामित्यनुवृत्तेरिति। अयं भावः। व्रजयजोर्भवि क्यप् इत्येतत्सूत्रीयभावे ग्रहणस्याकर्तरि च कारके संज्ञायां इत्येतन्निवर्तकत्वेन तदनुवृत्तौ अकर्तरीत्यस्यापि निवृत्तिप्राप्तावपि अनन्तं भावो न स्वर्यते इति वृत्तिकृतोक्तत्वेन व्रजयजोर्भवि इत्यतो भाव इत्यस्यानुवृत्त्यभावेन भाव इव करणेऽपि क्यप्विधायकत्वोपपत्तेः युक्तमेव ज्ञानतत्साधनपरत्वम्। न च स्वर्यते इति वृत्तिकारीयनिषेधो निर्निबन्धन इति वाच्यम्। समजन्ति अस्यामिति समज्येति समज्यादिशब्दनिष्पत्त्यर्थत्वेन तस्यार्थवत्त्वात् अन्यथा भावग्रहणेन कर्तृव्यतिरिक्तकरणाधिकरणादिरूपार्थे क्यपप्रत्ययनिषेधेन समज्यादिशब्देषु अधिकरणे क्यबभावप्रसङ्गात्। तथा चाव्यवहितभावग्रहनिवृत्तावपि भावेऽकर्तरि च कारके संज्ञायामित्यस्यानुवृत्तेः सत्त्वात् एकस्य संज्ञाग्रहणस्य कर्तृभिन्नकारकान्वितत्वात् अन्यस्य चानुवृत्तभावान्वितत्वात् संज्ञायां अकर्तरि कारके संज्ञायां भावे च समजादिभ्यः क्यपप्रत्ययो भवतीत्येव सूत्रार्थो निष्पद्यते। एवं च विद्याशब्दस्य योगरूढिभ्यां

यथार्थज्ञानतत्साधनयोः वृत्तिरुपपद्यते । योगाभावे भावादिग्रहणानर्थक्यप्रसङ्गात् रूढ्यभावे च संज्ञाग्रहणानर्थक्यप्रसक्तेः तदुभयमावश्यकमिति । तदेतत् पक्षान्तरं वा वाक्यार्थचन्द्रिकोक्तप्रकारान्तर्भूतं वेति शोध्यमस्ति ।

स०ब्र०— एतावता कथमुक्तशङ्कानिरास इत्यत आह **अयमिति** । ब्रह्मसूत्राणां पौरुषेयत्वेऽपि अर्थविवक्षापूर्वकत्वं, यथार्थत्वं, ग्रन्थान्तरादुत्कृष्टत्वं च 'द्वे विद्ये वेदितव्ये' इति श्रुत्याऽवगम्यत इति प्रदर्शनाय 'परमाख्यविद्ये'त्युक्तमित्यर्थः । 'व्रजयजोर्भवि क्यवि'त्यतो भाव इव करणेऽपि विधेः 'ज्ञानतत्साधनयोरि'त्युक्तम् । ज्ञानतत्साधनयोर्विद्याशब्दस्य योगरूढौ समर्थयते **समजनिषदेत्यत्रेति** । 'अकर्तरि च कारके संज्ञायाम्' इति समग्रस्यानुवृत्तेरित्यर्थः ॥ 'इत्युक्तेरि'ति पाठे तु 'संज्ञानुवृत्तावपि पुनः संज्ञायामित्युक्तेरि'त्यर्थः । अयं भावः । एकसंज्ञाग्रहणे सति भावे क्यपि संज्ञाप्रतीतेस्तत्रैव क्यन्विधानमात्रेण सूत्रं पर्यवस्येत् । अतः पुनः संज्ञाग्रहणेन प्रायिकी संज्ञा, तद्विषयं सूत्रमिति ज्ञायते । तथाच भाव इव करणेऽपि संज्ञाऽवगमात् क्यपप्रत्ययसिद्धिरिति ॥ **आगमेनेति** । परविद्याख्ययेत्यर्थः ।

कुण्डल०— न चार्थाबाधादेव याथार्थ्यमध्यवसीयत इत्यत आह **अयमभिसन्धिरिति** । **इत्यादाविति** । व्युत्पादितेनेति शेषः । अत्र विद्याशब्देनेत्यादेरयमाशयः । विद ज्ञान इत्यस्माद्धातोर्यथार्थज्ञानरूपे भावे तत्साधनलक्षणे करणे च विवक्षिते संज्ञायां विषये संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञ्भिणः इति सूत्रेण क्यपप्रत्यये सति पुगन्तलघूपधस्य चेत्यनेन प्राप्तोपधागुणस्य क्ङिति चेत्यनेन निषेधे च सति निष्पन्नस्य विद्याशब्दस्य यथार्थज्ञानतत्साधनयोरुक्तरीत्या योगेन 'विद्यात्मनि भिदा बोधः', 'कर्मणा बध्यते जन्तुः विद्यया च विमुच्यते ।', 'विद्यैव तु निर्धारणात्', 'प्रशान्तचित्ताय शमान्विताय प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ।', 'अथ परा यया तदक्षरमधिगम्यते ।', 'तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया ।', 'तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये ।', 'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दशे'त्यादौ प्रयोगबाहुल्यरूपया वा समुदायशक्तिलक्षणया वा रूढ्या च प्रवृत्तत्वात्प्रकृते चार्थमुपलभ्य रचितत्वरूपपौरुषेयत्वावच्छिन्नब्रह्ममीमांसाशास्त्रविषयकेण विद्याशब्देन बोधितं ब्रह्ममीमांसाशास्त्रस्य यथार्थज्ञानसाधनत्वं तस्यार्थविवक्षापूर्वकत्वमर्थस्वरूपमनतिक्रम्य विद्यमानत्वरूपं यथावस्थितार्थविदकत्वलक्षणं याथार्थ्यं चावगमयतीत्यतो विद्याशब्देन परम्परया शास्त्रस्यार्थविवक्षायाथार्थ्ययोरवगम इति । ननु संज्ञायां समजनिषदेति सूत्रेण भावार्थे क्यपो विधानात् कथं विद्याशब्देन यथार्थज्ञानसाधनलाभ इत्यत आह **संज्ञायां समजेति** । संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञ्भिण इत्येतत्सूत्रव्याख्यानावसरे पदमञ्जर्यां संज्ञायामिति वर्तमाने पुनः संज्ञाग्रहणं कारकेण संबन्धमित्युक्तत्वादकर्तरि च कारके संज्ञायां इत्यतः कारकसंबन्धस्य संज्ञायामित्यस्यानुवृत्तेर्विद्याशब्दस्य यथार्थज्ञानतत्साधनयोगरूढिभ्यां प्रवृत्तिर्युक्तेत्यर्थः । न च वाच्यं वृत्तौ संज्ञायामित्यस्मिन्सूत्रे भाव इति न स्मर्यत इत्युक्तत्वात्कथं भावार्थं पुनः संज्ञाग्रहणमिति व्रजयजोर्भवि क्यबिति पूर्वसूत्रे यद्भावग्रहणं तस्येह स्वरितत्वं न प्रवर्तत इत्यर्थप्रतिपादकत्ववृत्तिवाक्यस्यात एव वृत्तौ पूर्व एवाधिकार इति । स्त्रियां क्तिन्नित्यादौ य भावेऽकर्तरि च कारक इति स एवात्राधिकार इत्युक्तम् । संज्ञायामित्युक्तेरिति पाठे तु अत्र

सूत्रे भावार्थः । संज्ञायामित्युक्तेः अकर्तरि च कारके संज्ञायामित्यस्मात्कारकसंबन्धसंज्ञाग्रहणस्यानुवृत्तेश्चेत्यभिप्रायः आगमेनैवेति । यया तदक्षरमधिगम्यते सा परेत्यागमसिद्धपरविद्याशब्देनैवेत्यर्थः ।

विद्व०— अस्मिन्ग्रन्थे इति । ब्रह्ममीमांसाख्येतद्ग्रन्थविषये । अथ परा यया तदक्षरमधिगम्यत इति श्रुतौ परविद्याख्येत्यर्थः । ननु विद ज्ञाने इत्यस्मान्निष्पन्नस्य विद्याशब्दस्य मिथ्याज्ञानसाधनेऽपि प्रवृत्तेः कथं तेन यथार्थज्ञानसाधनत्वरूपयाथार्थ्यावगम इत्यत आह यथार्थज्ञानतत्साधनयोरिति । विद ज्ञाने इत्यस्माद्धानोः समजनिषदेति सूत्रेण क्यप्प्रत्यये व्रजयजोर्भाव इति सूत्रात् भाव इत्यस्याकर्तरि च कारके संज्ञायामित्यस्मात् अकर्तरि च कारके इत्यस्य कृत्यल्युटो बहुलमित्येतत्पर्यन्तमनुवृत्तेः काशिकायामुक्तत्वेन भावार्थे करणार्थे च कृते वेदनं विद्या वेद्यतेऽर्थो अनया इति विद्येति भावव्युत्पत्त्या करणव्युत्पत्त्या च विदधातुमुख्यार्थे यथार्थज्ञाने तत्साधने च योगेन रूढ्या च निष्पन्नस्य विद्याशब्दस्य याथार्थ्यावगमकत्वं याथार्थ्यस्य च अर्थविवक्षां विना पौरुषेयवाक्ये अनुपपत्तेरर्थविवक्षावगमकत्वं च युज्यत इति भावः । यथार्थज्ञानसाधनत्वस्यैवात्र प्रस्तुतत्वेऽपि दृष्टान्ततया यथार्थज्ञानोपादानम् । यथा विद्यात्मनि भिदा बोध इति स्मृतिबलाद्यथार्थज्ञाने योगरूढिस्तथा यथार्थज्ञानसाधनेऽपीति । ननु भवत्कृतीत्या यथार्थज्ञानसाधनयोर्विद्याशब्दस्य योगः रूढिस्तु कुतोऽवगम्यते । न च वाच्यं अकर्तरि च कारके इत्यधिकारसूत्रगतं संज्ञायामिति पदं रूढिज्ञापकमिति तस्य भिन्नक्रमेण च शब्देनासंज्ञायामपीत्यर्थलाभात् संज्ञायामित्यस्यानित्यत्वेनानित्यस्य चानुवृत्त्ययोगात् । तथाच योगरूढिभ्यामित्युक्तमयुक्तमित्यत आह संज्ञायां समजनिषदेत्युक्तेरिति । सत्यं संज्ञायामित्यस्य नानुवृत्तिर्युक्तेति तथापि संज्ञायां समजनिषदेति सूत्रे पुनः संज्ञाग्रहणसामर्थ्यात् सिद्धे सत्यारम्भो नियमार्थ इति न्यायेनात्रानुवृत्तिरभिप्रैतेवेति वक्तव्यम् । तथाच रूढिरप्युपपन्नेत्यर्थः । समजनिषदेत्यत्र संज्ञायामित्यनुवृत्तेरिति क्वचित्पाठः । तत्र तु अकर्तरि च कारके संज्ञायामित्यनुवृत्तेः समजनिषदेति क्यपि कृते रूढिर्लभ्यते इति भावः । रूढ्यांश एव विचारात् संज्ञायामिति सूत्रान्नभागग्रहणमिति ज्ञातव्यम् । ननु संज्ञायां समजनिषदेति सूत्र एव संज्ञायामिति पदस्य विद्यमानत्वात् संज्ञायामित्यनुवृत्तिः किमर्थं उक्तेति चेत् । सत्यम् । अत्र संज्ञायामित्यस्य भाव इत्यनेनैवान्वयकथनात् अनुवृत्तमानस्यैवाकर्तरि च कारक इत्यनेनान्वयात् प्रकृते करणे क्यब्विधानस्यैव युक्तत्वादिति । तथाच "संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञ्भ्रिण" इति सूत्रस्यायमर्थः— समज शुद्धौ, निपूर्वात् षद्लृ विशरणगत्यवसादनेषु निपूर्वात् पद्लृगतौ मन ज्ञाने विद ज्ञाने षुञ् अभिषवे शीङ् स्वप्ने भृञ् भरणे इण् गतौ एतेभ्यो धातुभ्यः स्त्रियां भावे संज्ञायां अकर्तरि कर्तृभिन्ने कारके च संज्ञायां रूढिविषये क्यप्प्रत्ययो भवतीति । उदाहरणं तु समज्या निषद्या निपत्या मन्या विद्या इत्यादि ।

चक्रः— तदंशस्य दर्शितनिखिलशङ्कानिरासकतां व्युत्पादयति अयमिति । ज्ञानार्थस्य विदेर्भावकरणसाधनक्यपि निष्पन्नविद्याशब्दस्यावयववृत्त्या ज्ञानतत्साधनयोरिवार्थविवक्षायाः 'सा विद्या तन्मतिर्यये'त्यादिप्रयोगप्रत्यायितसमुदायवृत्त्या याथार्थ्यस्य च गमकता सङ्कल्पत इत्यभिप्रेत्याह यथार्थेति । अतः समुदायवृत्त्यैवार्थविवक्षाऽपि सेत्स्यतीति तत्प्रत्यायनफलकयोगपदोपादानमप्रयोजनमितिशङ्का तु अर्थावबोधोद्देश्यकता-

विनिर्मुक्तयथार्थज्ञानसाधारणयथावस्थितज्ञेयविषयीकारित्वस्य समुदायवृत्त्या प्रत्याय्यमानस्य प्रकृतानुपयोगेन यथावस्थितज्ञेयविषयीकारिसाधनत्वेनैव **याथार्थ्यं** न ज्ञान इव साक्षादिति ध्वनयितुं तदुपादानावश्यंभावान्निरसनीया। साधनमात्रे समुदायावयववृत्तिव्युत्पादनस्य चिकीर्षितत्वेऽपि 'विद्यया च विमुच्यते' 'विद्यैव तु निर्धारणा'-दित्यादिप्रयोगप्रत्यायितसमुदायवृत्तेर्वेदनं विद्येत्यवयववृत्तेश्च यथार्थज्ञानेऽपि प्रदर्शनं निदर्शनविधयेत्यवसेयम्। नन्वष्टलक्षण्याम् तृतीयलक्षणे तृतीयचरणे 'व्रजयजोः भावे क्यपि'ति सूत्रे भाव इत्यनुवर्तमाने पुनर्भावग्रहणमनयोर्भाव एव क्यप् भवति न तु 'अकर्तरि च कारके' इत्यस्याप्यनुवृत्त्या कर्तृव्यतिरिक्तकारकान्तर इति ध्वनयितुमिति स्थिततया 'संज्ञायां समजे'त्युत्तरसूत्रेऽपि तस्यैव क्यपोऽनुवर्तनेन व्रज्येत्यादिवत् भावमात्रसाधनक्यप्प्रत्ययान्तविद्याशब्दो ज्ञप्तिप्रत्यायक एव न तत्साधनप्रमापक इति चेन्मैवम्-'संज्ञायां समजे'त्यत्र पूर्वस्मात् क्यबित्यंशस्यैवानुवृत्तिर्न तु भाव इत्यस्यापीति वामनो वृत्तावप्यभ्यधादिति तत्प्राक्तनयोर्भविऽकर्तरि चेत्यनयोः 'कृत्यल्युटो बहुलम'नुवर्तनेन 'संज्ञायां समजे'त्यत्रापि द्वयोरनुवृत्त्या भावे तादृशकारकान्तरे च संभवतीति भावकरणयोर्बोधोपपादनेऽपि भिन्नविन्यासेन चकारेण संज्ञायामित्यस्यासंज्ञायामपीत्यर्थकतोरीकृत्या निरवकाशारूढिज्ञापकं दुर्मिलमित्याशङ्कायामाह **संज्ञाया-मिति**। 'सिद्धे सत्यारम्भो नियमार्थ' इति न्यायेन पुनः संज्ञाग्रहणेन संज्ञायामित्यनुवृत्तेर्ज्ञापनात् इति भावः।

काशी०— ननु परमाख्यविद्येत्यनेनैव कथमुक्तशङ्कानिरास इत्यत आह **अयमभिसन्धिरिति**। **अस्मिन्ग्रन्थे** ब्रह्ममीमांसाशास्त्रे। **परविद्याख्येति**। एतच्छास्त्रपरः परविद्याशब्दो द्वे विद्ये इत्याद्यार्थवर्णोपनिषदि श्रूयत इत्यर्थः। **परमेति**। परमत्वमाख्याविशेषणं यस्या इति स्वव्याख्येयशास्त्रस्यार्थवर्णप्रसिद्धपरविद्या-त्वोक्त्यैतल्लभ्यत इति भावः। परमाख्येत्यस्य परविद्याख्येत्यर्थकत्वात्तल्लाभ इत्यप्याहुः। **तत्रेति**। परविद्या-शब्दघटकविद्याशब्देनैतच्छास्त्रेऽवगते तत्कारकत्वेनार्थविवक्षाऽवगम्यते। वेदे तदर्थज्ञापकत्वेनार्थविवक्षात्वेऽपि न तत्पूर्वकत्वावगम इति भावेनार्थविवक्षापूर्वकत्वमिति नोक्तम्। याथार्थ्यं च साक्षादेव बुध्यत इत्यर्थः। इदमेवोपपादयति **यथार्थेति**। अत्र ज्ञानतत्साधनसाधारणयाथार्थ्यविच्छित्ते ज्ञानमात्रगतयाथार्थ्यविच्छित्ते वा रूढि-र्ज्ञानतत्साधनयोस्तु योगो विवक्षितः। आद्ये यथार्थेति ज्ञानतत्साधनयोरन्त्ये च ज्ञान एव विशेषणम्। विद्याशब्देन तु योगार्थज्ञानतत्साधनयोस्तदेकदेशज्ञाने वा रूढ्यर्थान्वयाद्यथार्थज्ञाने तत्साधनयोर्बोधः। एतेनैकस्मिन्नर्थे वृत्ति-द्वयवैयर्थ्यमिति शङ्कानवकाशः। रूढिमात्रस्यार्थविवक्षारहितयथार्थज्ञाने योगमात्रस्य याथार्थ्यरहितविप्रलम्भक-वाक्येऽपि सत्त्वेनान्यतरवृत्त्याऽर्धविवक्षायाथार्थ्योभयलाभेन वृत्तिद्वयोक्तेरपि सार्थक्यम्। यद्यपि यथार्थज्ञाने वेदनं विद्येति योगोऽप्यस्ति। तथाऽपि वेद्यतेऽनयेति विवक्षितयोगस्यानतिप्रसक्तत्वं बोध्यम्। अत एव यथार्थज्ञाने योगरूढिप्रदर्शनस्येह न वैयर्थ्यम्। उक्तव्यावृत्तिसूचनाय दृष्टान्तत्वेन तत्प्रदर्शनसार्थक्यात्। तत्र योगरूढ्योर्ज्ञापकमाह **संज्ञायां समजनिषदेत्युक्तेरिति**। "संज्ञायां समजनिषदनिपतमनविदधुत्रशीङ्भृञ्भिण" इति सूत्रेण समजादिधातुभ्यो भावेऽकर्तरि कारके च संज्ञायामेव क्यब्विधानादित्यर्थः। तत्र संज्ञायामित्यनेन रूढेर्भाव इत्यादिनाऽनुवर्तमानेन योगस्य च ज्ञापनादिति भावः। समजनिषदेत्यत्र संज्ञायामित्युक्तेरित्यादिपाठस्तु योगमङ्गीकृत्य रूढिज्ञापकाकाङ्क्षया अवतरणीयः। संज्ञायामित्यनुवृत्तेरिति पाठे संज्ञायामित्यस्य समजनिषदेति सूत्रे प्रतिपदमनुषङ्गादित्यर्थः। परिमळे तु

संज्ञायामित्येकदेशोत्कीर्तनादकर्तरि च कारके संज्ञायामिति सूत्रस्यैवानुवृत्तेरित्यर्थो विवक्षितः। तेन योगरूढ्योर्लाभः। न च तत्सूत्रानुवृत्ताविह संज्ञाग्रहणवैयर्थ्यमिति वाच्यम्। तत्सूत्रे संज्ञायामित्यस्य संज्ञायां चेत्यन्वयेन प्रायिकत्वस्य व्याख्यातत्वादिह तन्नियमार्थत्वेन संज्ञाग्रहणसार्थक्यादिति। यद्यप्येवमिन्द्रियादौ यथार्थज्ञानसाधने विद्याशब्द-प्रयोगप्रसङ्गः। तथाऽपि करणसाधनक्यप्समभिव्याहृतस्य विदेः शाब्दज्ञानमात्रार्थत्वनियमान्नातिप्रसङ्ग इत्यवधेयम्। एवमस्य व्याख्येयत्वोपयुक्तं प्रामाण्यानुपपाद्यस्यैव व्याख्याने कारणमुपपादयति परशब्देनेति। वाक्यान्तरादपर-विद्यापदोक्तादुत्कर्षः प्रमाणत्वाद्यतिशयप्रयुक्तमुत्तमत्वमवगम्यत इति संबन्धः। फलितमाह तदेवमिति। उक्तप्रकारेण परविद्याशब्दरूपेणागमेनेत्यर्थः। तथाऽपि स्पष्टार्थत्वे व्याख्यानवैयर्थ्यमित्याशङ्क्याहमेवेत्यवधारणसूचितगह्वनार्थ-त्वस्यापि तदुपयोगित्वमाह गह्वनार्थत्वाच्चेति। दुरूह्तात्पर्यत्वादित्यर्थः।

गूढ०— किञ्चास्य ग्रन्थस्य परमाख्यविद्येति संज्ञा न युक्ता। श्रुत्यादावनुक्तत्वादित्यत आह अयमभि-सन्धिरिति। ग्रन्थ इति विषयसप्तमी। एवं चैतद्ग्रन्थविषयिणी परविद्याख्या द्वे विद्ये इति श्रुतावुक्तेत्यन्वयः। अस्तु ततः किमत्राह तत्रेति। याथार्थ्ये सत्यर्थविवक्षापूर्वकत्वान्यापेक्षयोत्तमत्वयोरित्यर्थः। अत्र हेतुमाह यथार्थेति। एवं च यथार्थज्ञानसाधनत्वेन ब्रह्मसूत्राणां याथार्थ्यमर्थविवक्षापूर्वकत्वं चेति भावः। ननु यथार्थज्ञानसाधनत्वेन याथार्थ्यसिद्धावपि न तेन अर्थविवक्षापूर्वकत्वसिद्धिः व्याप्त्यभावात्। यथार्थज्ञानसाधनत्वस्य कदाचिदुन्मत्तवाक्ये सत्त्वेऽपि अर्थविवक्षापूर्वकत्वाभावेन व्यभिचारित्वादिति चेन्मैवम्। नियमेन यथार्थज्ञानसाधनत्वस्य विवक्षितत्वात्। यथार्थज्ञानसाधनत्वस्य कदाचिदुन्मत्तवाक्ये सत्त्वेऽपि नियमेन तदभावात्। न चैवमपि विषहरमन्त्रे नियमेन यथार्थज्ञानसाधनत्वसत्त्वेऽप्यर्थविवक्षापूर्वकत्वाभावात् व्यभिचार इति वाच्यम्। यथार्थज्ञानसाधनतया गुरूप-दिष्टत्वस्यैव यथार्थज्ञानसाधनत्वस्य विवक्षितत्वात्। विषहरमन्त्रस्य तु विषहरणसाधनतयोपदिष्टत्वेन यथार्थज्ञान-साधनतयोपदिष्टत्वाभावात् न व्यभिचारः। यद्यपि वेदे यथार्थज्ञानसाधनतया गुरूपदिष्टत्वसत्त्वेऽप्यर्थविवक्षा-पूर्वकत्वाभावाद्व्यभिचारः। तथापि तद्व्यावृत्त्यर्थं पौरुषेयत्वे सतीत्यपि द्रष्टव्यम्। कथमस्य योगरूढी इत्यत आह संज्ञायामिति। तथाच संज्ञायामित्युक्तत्वाद्वृद्धिः वेत्त्यनयेति वा वेदनमिति वा करणे भावे वा विद्याशब्दस्य निष्पन्नत्वाद्यौगिकत्वं ज्ञातव्यम्। उपसंहरति तदेवमिति। उपलक्षणमेतत्। अर्थविवक्षापूर्वकत्वप्रतीतेरित्यपि द्रष्टव्यम्। तथापि स्पष्टार्थत्वान्नेदं व्याकर्तव्यमित्यत उक्तं गह्वनार्थत्वाच्चेति।

प्रदीपः— ननु परमाख्यविद्येत्यनेन कथमुक्ता शङ्का निरस्तेत्याशङ्क्याह अयमिति। ब्रह्मसूत्राणां पौरुषेयत्वेऽपि अर्थविवक्षापूर्वकत्वं यथार्थत्वं ग्रन्थान्तरादुत्कृष्टत्वं च द्वे विद्ये वेदितव्ये इति श्रुत्यावगम्यत इति प्रदर्शनाय परमाख्यविद्येत्युक्तमित्यर्थः। व्रजयजोर्भवि क्यवित्यतो भावग्रहणानुवृत्त्यभावात् भाव एव क्यब्विधेः ज्ञानतत्साधनयोरित्युक्तम्। व्यासोपज्ञतेति। व्यासेन प्रथमज्ञाततेत्यर्थः।

अन्यैः व्याख्यातेऽपि पुनरस्य व्याख्यानस्य आवश्यकता—

२८ सु०— तथाऽप्यन्यैरेव व्याख्यातत्वान्न पुनरिदं व्याख्यातव्यमित्यतो व्याख्यामित्युक्तम्। विशिष्टा आख्या व्याख्या। अनेन परकृतानामपव्याख्यानतामभिप्रैति। तथाच तत्र तत्र प्रदर्शयिष्यते ॥

आनन्दः— व्याख्यामित्यत्र विशब्दाभिप्रायमाह **तथापीति। अनेनेति**। स्वव्याख्याया विशिष्टत्वकथनेनेत्यर्थः। अन्वपीत्यस्य कृत्यमाह **तथा चेति**।

वा०र०— मूले व्याख्यामित्यत्र विशब्दप्रयोजनं वक्तुमाह **तथापीति। अनेनेति**। स्वव्याख्यायाः विशिष्टत्वार्थेनेत्यर्थः। तत्र तत्रेति। तत्सूत्रव्याख्यानावसरे 'बन्धमिथ्यात्वं नैव मुक्तिरपेक्षते' इत्यादिनेति शेषः।

स०व्र०— प्रदर्शयिष्यति 'बन्धमिथ्यात्वमि'त्यादौ ॥

काशी०— व्याख्यामित्यत्र विशब्दप्रयोजनमाह **तथाऽपीति**। व्याख्यातत्वादित्यादौ विशब्देन स्पष्टार्थत्वादिकं विवक्षितम्। न चान्यकृतव्याख्यानामनेकत्वादेकत्रानाश्वास इति वाच्यम्। एकतरपरिग्रहेणैव तदुपपत्तेरिति शङ्काशयः। **विशिष्टा यथार्था। अनेनेति**। व्याख्यानस्य यथार्थवचनेनेत्यर्थः। विरुद्धानामेकयाथार्थ्यस्यापरायाथार्थ्यं विनाऽनुपपत्तेरिति भावः। तत्कथमत आह **तथा चेति**। तत्र तत्र तत्तत्सूत्रव्याख्यावसरे।

गूढ०— व्याख्यामित्यत्र विशब्दाभिप्रायमाह **तथापीति। अनेनेति**। स्वव्याख्याया विशिष्टत्वकथनेनेत्यर्थः। अन्वपीत्यस्य कृत्यमाह **तथा चेति**।

सूत्रभाष्यं कृतेऽपि अनुव्याख्यानार्थं प्रयोजनसद्भावः—

२९ सु०— तथाऽपि स्वप्रणीतभाष्येणैव कृतव्युत्पादनमिदं शास्त्रमिति किमनेन व्युत्पादनेन इत्यतः अन्वपि च इत्याह। चशब्देन अनुव्याख्याने प्रयोजनसद्भावं समुच्चिनोति। तच्च वक्ष्यते ॥

परि०— अनुव्याख्यान इति। पुनरपि विवरणकरण इत्यर्थः॥ **वक्ष्यत इति**। 'स्वयंकृताऽपि तद्व्याख्या क्रियते स्पष्टतार्थत' इत्यत्रेति भावः॥

यादु०— तच्च वक्ष्यत इति। स्वयंकृताऽपि तद्व्याख्येत्यत्रेति शेषः॥

आनन्दः— तत्किं प्रयोजनमित्यत आह **तच्चेति**। स्वयंकृतापीत्यत्रेति शेषः।

वा०चं०— तच्च वक्ष्यत इति। स्वयंकृताऽपीत्यत्रेत्यर्थः।

वा०र०— अन्वपीत्यस्य भिन्नक्रमतामाश्रित्य पुनरपि प्रणम्येति प्राक् योजितम्। यथाश्रुतसंबन्धाश्रयणेनापि योजयितुं तत्प्रयोजनमाह तथापीति। किं तत् प्रयोजनमित्यत आह तच्चेति। वक्ष्यते इत्युक्तस्थलाप्रतीतेः टीकाकृदाह स्वयमिति।

स०व्र०— तच्च वक्ष्यते। 'स्वयंकृतापी'त्यनेन।

कुण्डल०— वक्ष्यत इति। "स्वयंकृताऽपि तद्व्याख्या क्रियते स्पष्टतार्थतः।" इत्यत्रेति शेषः।

विट्ठ०— वक्ष्यते इति। स्वयंकृताऽपीत्यत्रेति शेषः।

काशी०— किमनेनेति। व्याख्यां करोमीति प्रतिज्ञानेन किं साध्यम्। भाष्यमनुभाष्यं वा। नाद्यः। सिद्धत्वात्। नान्त्यः। निष्प्रयोजनत्वादिति भावः। एतेन व्याख्याशब्दस्य प्रकृतत्वादनयेति वक्तुमुचितम्। व्याख्याप्रयोजनमात्रजिज्ञासायामन्वपीति प्रतीकोपादानं चानुचितमित्यपास्तम्। अन्वपीत्यनेनाद्यस्यानङ्गीकारेण परिहारेऽप्यन्त्यस्य केन परिहार इत्यत आह चशब्देनेति। किं तत्प्रयोजनमत आह तच्चेति। वक्ष्यत इत्यस्य स्पष्टतार्थत इत्यनेनेत्यादिः। शास्त्रप्रभवत्वादिविवरणोत्तरं तद्विवरणस्य क्रमप्राप्तत्वादिति भावः।

गूढ०— तत्किं प्रयोजनमित्यत आह तच्चेति। स्वयंकृतापीत्यत्रेति शेषः।

अनुव्याख्यानकरणे अन्येषां असामर्थ्यसूचना—

३० सु०— प्रयोजनसद्भावे भाष्यदिशा शिष्या एवानुव्याकरिष्यन्तीत्यतः अहमेव इत्यभिहितम्। एवशब्देन अन्येषामसामर्थ्यं सूचयति।

आनन्दः— एवशब्दस्याभिप्रायमाह प्रयोजनेति।

वा०र०— एवकारप्रयोजनमाह प्रयोजनसद्भाव इति। एवकारेणोक्तशङ्कापरिहाराप्रतीतेः तत्तात्पर्यमाह एवशब्देनेति।

काशी०— अहमेवेत्यवधारणप्रयोजनमाह प्रयोजनेति। एवकारमात्रस्यावोधकत्वादहमेवेत्युपात्तम्। कथमनेनोक्तशङ्कापरिहार इत्यत आह एवेति। एवशब्देन ह्यनुव्याख्यामन्ये न कुर्वन्तीत्युच्यते। सत्यपि प्रयोजने तदकरणस्यासामर्थ्यमात्रमूलकत्वादिति भावः।

गूढ०— एवशब्दस्याभिप्रायमाह प्रयोजनेति।

॥ गुरुनमने प्रतिज्ञायां च उक्तानां विषयाणां समर्थनम् ॥

नारायणस्य एतच्छास्त्रप्रभवत्वोपपादनम्—

३१ सु०— "यदुक्तं नारायणोऽस्य शास्त्रस्य प्रभव इति । तदयुक्तम् । व्यासोपज्ञता-प्रसिद्धिविरोधात् । न च नारायण एव व्यासः । जननविरोधात् । कृतकृत्यस्य प्रयोजनाभावेन शास्त्रप्रणयनासंभवाच्च ॥ यच्चास्य श्रौत्या परविद्याख्यया सर्वोत्तमप्रामाण्यसिद्धिरिति । तदप्ययुक्तम् । परशब्दस्यानेकार्थत्वेन विद्याशब्दस्य च अर्थविवक्षाविरहिण्यपि मन्त्रे प्रयोगदर्शनेन परविद्याख्यायाः सर्वोत्तमप्रामाण्यानिश्चायकत्वात् । किञ्चेयं परविद्याख्यैत-द्विषया इत्यत्रापि न नियामकमस्ती"त्यत आह प्रादुर्भूत इति ।

अनु०— प्रादुर्भूतो हरिर्व्यासो विरिञ्चिभवपूर्वकैः ।
अर्थितः परविद्याख्यं चक्रे शास्त्रमनुत्तमम् ॥ ३ ॥

परि०— उत्तरश्लोकमवैयर्थ्याय अवतारयति **यदुक्तमिति** । **हरिर्व्यास** इत्यस्य व्यावर्त्यं नारायण इत्यादि ॥ **व्यासोपज्ञतेति** । व्यासेनोपज्ञायते प्रथमं ज्ञायत इत्यर्थः । आतश्चोपसर्गे इति प्राप्त-अङ्प्रत्ययान्तोपज्ञाशब्दस्योपज्ञोपक्रमं तदाद्याचिख्यासायामि'ति सूत्रेण नपुंसकलिङ्गत्वोक्तेः । व्यास-प्रणीतेति यावत् । प्रादुर्भूतपदव्यावर्त्यं **न चेत्यादि** । **अर्थित** इत्येतद्व्यावर्त्यं कृतकृत्यस्येपि । अनुत्तमपदव्यावर्त्यं **यच्चेत्यादि** ॥ **श्रौत्येति** । श्रौत्येति पाठः साधुः । श्रौतयेति पाठे तु श्रुतिरस्थेत्यर्थे श्रुत्युक्तेत्यर्थे वा तद्धिता इति प्राप्तणप्रत्यये टापि श्रौतेति रूपम् । शास्त्रपदव्यावर्त्यं **विद्याशब्दस्य चेति** ॥ **किं चेति** । मुक्तिहेतुज्ञानपरत्वेनोपपत्तेरिति भावः । नन्वेवं **चक्रे** इत्ययुक्तम् । कृञः त्रित्वेन 'स्वरितञितः कर्त्रभिप्राये क्रियाफल' इति क्रियाजन्यफलस्य कर्तृगामित्व एवात्मनेपदत्वोक्तेः ।

गु०दी०— व्यासोपज्ञता उपपन्ना अर्थाः ज्ञाप्यन्ते अनेनेत्युपज्ञः आदौ वक्ता कर्तेत्यर्थः । व्यास एवोपज्ञो यस्य सः व्यासोपज्ञः । तस्य भावः **व्यासोपज्ञता** । **उपपन्नानर्थानादौ जानातीति** वा उपज्ञः । आदौ ज्ञाता कर्तेति चार्थः । व्यासकृतग्रन्थत्वप्रसिद्धिविरोधादिति फलितोऽर्थः । **परशब्दस्यानेकार्थत्वेन** अन्यार्थत्वस्यापि विद्यमान-त्वेनेत्यर्थः । **मन्त्रे प्रयोगदर्शनेन** अज्ञप्रयोगदर्शनेनेत्यर्थः ।

यादु०— व्यासोपज्ञतेति । उपज्ञायत इति उपज्ञा । 'आतश्चोपसर्गे' इति कर्मणि अङ् । व्यासस्योपज्ञा व्यासोपज्ञम् । 'उपज्ञोपक्रमं तदाद्याचिख्यासायामि'ति नपुंसकताविधानात् । तस्य भावो व्यासोपज्ञता ।

व्यासेनादावुपज्ञाततेत्यर्थः । तत्कृततेति यावत् । आत्मकृपास्पदैरित्यनेन स्वप्रयोजनाभावे अपि परप्रयोजनाय प्रणयनमुपपन्नमिति दर्शितं भवति ॥

वं०प०— **कृतकृत्यस्येति** । प्राप्तप्राप्तव्यस्येत्यर्थः ॥ **एतद्विषयेति** । एतच्छास्त्रविषयिणी । परविद्याशब्देनेदं ब्रह्ममीमांसाशास्त्रमेवोच्यत इत्यत्र न नियामकमस्तीत्यर्थः ।

आनन्दः— ननु परविद्याव्याख्यां करोमीति प्रतिज्ञातत्वादग्रे सूत्रव्याख्यानमेव कर्तव्यं तदपहाय व्यासस्य प्रादुर्भावादिकथनमयुक्तं सूत्रव्याख्यानाननुरूपत्वात्तद्व्याख्यानानुपयुक्तत्वाच्चेत्यतस्तन्निवर्त्यां शङ्कां दर्शयति **यदुक्तमिति** । **उक्तं** तमेव शास्त्रप्रभवमित्यनेनेति शेषः । **व्यासोपज्ञताप्रसिद्धिविरोधादिति** । व्यासस्य उपज्ञा इति व्यासोपज्ञं तस्य भावो व्यासोपज्ञतेति विग्रहः । उपज्ञोपक्रमं तदाद्याचिख्यासायामित्यनेन क्लीबत्वात् ह्रस्वत्वम् । तथा चास्य ग्रन्थस्य या व्यासेनादौ कृततायाःप्रसिद्धिस्तद्विरोधः स्यादित्यर्थः । किञ्च व्यासस्य नारायणावतारत्वात् शास्त्रप्रणयनमयुक्तं स्यात्प्रयोजनाभावादित्याह **कृतकृत्यस्येति** । **अवाप्तसकलकामस्येत्यर्थः** । प्रयोजनाभावेऽयं हेतुः । यदि हि परशब्द उत्तमत्ववाची स्यात् विद्याशब्दश्चार्थविवक्षापूर्वकप्रणीतग्रन्थवाची स्यात् तदा सर्वोत्तमप्रामाण्यसिद्धिः स्यात् । न चैवमित्याह **परशब्दस्येति** । ननु **परशब्दस्योत्तमत्वे विद्याशब्दस्य च यथार्थज्ञानसाधन एव मुख्यत्वात्परविद्याख्ययोपपन्नः सर्वोत्तमप्रामाण्यनिश्चयः इत्यत आह किञ्चेति** ।

कं०रा०— **श्रौतयेति** । यद्यपि श्रुतिशब्दात्संबन्धार्थेऽण्प्रत्यये टिड्ढाणञित्यादिना ङीपा भवितव्यम् । तथाऽपि श्रुतिसंबन्धि द्वे विद्ये वेदितव्ये इत्यादिवाक्यं श्रौतम् । तत् श्रौतं वाक्यमस्यास्तीत्यर्थे अर्शआदिभ्योऽजित्यच्प्रत्यये तदन्ताच्छ्रौतशब्दात् अजाद्यतष्टाविति टापि कृते श्रौतयेति रूपं साध्विति ज्ञेयम् । श्रौतपरविद्याख्ययेति पाठे न काऽप्यनुपपत्तिः । घञन्तस्य श्रौतशब्दस्य स्त्रियाः पुंवदित्यादिना पुंवद्भावसंभवात् ।

श्रीनिधि०— **व्यासोपज्ञतेति** । व्यासस्योपज्ञा व्यासोपज्ञम्, तस्य भावः व्यासोपज्ञता व्यासकृतेत्यर्थः । **परशब्दस्यानेकार्थत्वेनेति** । विलक्षणत्वाद्यनेकार्थत्वेनेत्यर्थः ।

बा०चं०— हरिर्व्यास इति सामानाधिकरण्येन, प्रादुर्भूत इत्यनेन, विरिञ्चादिभिरर्थित इत्यनेन, परविद्याख्यमित्यनूद्यानुत्तमं शास्त्रमिति व्याख्यानेन, बहुव्रीहिणा च व्यावर्त्याः शङ्काः क्रमेण दर्शयति **यदुक्तमित्यादिना** । **व्यासोपज्ञतेति** । 'उपज्ञोपक्रमं तदाद्याचिख्यासायामि'ति सूत्रे उपज्ञायत इत्युपज्ञा । कर्मणि 'आतश्चोपसर्ग' इत्यङ् । उपक्रम्यत इत्युपक्रमः । कर्मणि घञ् । उपज्ञोपक्रमयोरादेराख्यानेच्छायामुपज्ञोपक्रमशब्दान्तरान्तत्पुरुषो नपुंसकलिङ्गो भवत्येकत्वेत्युक्तत्वात्; व्यासोपज्ञेति कर्तृषष्ठ्या समासे, तदाद्याचिख्यासायां, नपुंसके सति, व्यासोपज्ञमिति सिद्ध्यति । तथा च 'व्यासेन प्रथमं प्रणीतता'प्रसिद्धिविरोधादित्यर्थः । (उपज्ञोपक्रमं तदाद्याचिख्यासायाम् । उपज्ञान्त उपक्रमान्तश्च तत्पुरुषो नपुंसकं स्यात्तयोरुपज्ञायमानोपक्रम्यमाणयोरादिः प्राथम्यं चेदाख्यातुमिष्यते । पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रन्थः । नन्दोपक्रमं द्रोणः) ।

वा०र०— प्रादुर्भूत इत्यनुव्याख्यानगतत्तद्वचनानुसारेणैव तत् व्यावृत्य शङ्कोत्थापनमिति नासङ्गतिः शङ्कनीयेति भावेन व्यावर्तकानि क्रमेण दर्शयति **हरिर्व्यास इतीत्यादिना। व्यासोपज्ञतेति।** शङ्कासामानाधिकरण्य-कथनव्यावृत्त्या जननेति शङ्का प्रादुर्भुत इत्येतद्व्यावृत्त्या कृतकृत्यस्येति शङ्का विरिञ्चादिभिरर्थितः इत्येतद्व्यावृत्या परशब्दस्यानेकार्थत्वेनेत्यादिशङ्का परविद्याख्यमिति अनूद्यानुत्तमं शास्त्रमिति व्याख्यानव्यावृत्या किञ्चेयं परविद्या इति शङ्का। बहुव्रीह्यनुत्तमपदबलात् तच्चानुत्तमं शास्त्रं इदमेवेति वक्ष्यमाणरीत्या तच्छङ्काव्यावृत्तेः तेनैव सत्त्वात् तत् व्यावर्त्यैवेति विवेकः। एवं तत्र तत्र शङ्कानां व्यावर्तकानि योग्यतया ज्ञेयानि। यत्रास्पष्टता तत्र वक्ष्यते। काशिका-द्यनुसारेण व्याचष्टे **उपज्ञायत इत्यादि। उपज्ञायते परिच्छिद्यते इत्युपज्ञेत्यर्थः। घञिति।** अकर्तरि च कारके इत्यनेनेति शेषः। घञो ञित्वेऽपि नोदात्तोपदेशस्य मान्तस्यानाचामेरिति सूत्रेण वृद्धिनिषेधात्। उपधा वृद्ध्यभाव इति भावः। कर्मणि व्युत्पत्तिलब्धमर्थं दर्शयन् सौत्रोपज्ञोपक्रमशब्दसाधुतां च सूचयति **उपज्ञेति।** उपज्ञा च उपक्रमश्च इति समाहारद्वन्द्वे सर्वो द्वन्द्व इति एकवद्भावे नपुंसकतायां उक्तसौत्ररूपमिति भावः। अत्र कर्मणि घञित्यनन्तरं समाहारद्वन्द्व एकवच्चेति वक्तुं विवक्षितम्। तत् क्रमाभावो लेखकदोषात्। **उपज्ञायमानोपक्रम्यमाणयोर्य आदिर्नाम प्राथम्यं** तस्याख्यातुं इच्छायामित्यर्थः। **उपज्ञोपक्रममित्यस्यानुवृत्ततत्पुरुषेत्येतत्** परिणामरूपं तत्पुरुषरूपमिति पदेन सामानाधिकरण्यमिति मनसि कृत्वा उक्तं शब्दः **यस्तत्पुरुष इति नपुंसकलिङ्गो** भवतीत्युक्तत्वादिति भावः। न तु एकवद्भावस्य प्रकृते उपयोगः। अत एव **नपुंसके सत्येव वक्ष्यति इति** न कश्चित् क्षुद्रोपद्रवः। नपुंसकलिङ्गो भवतीत्युक्तत्वात् इत्येव पाठस्तु स्वरस एव। **सौत्रपदविचारस्याधिकस्यानभिधानोपपत्तेः।** तेन प्रथमतः प्रणीतमिति काशिकानुसारेणाह **व्यासेन प्रथमेति। पाणिन्युपज्ञं** व्याकरणं इत्युदाहरणे हि पूर्वाणि व्याकरणानि अद्यतनादि कालपरिभाषायुक्तानि तद्रहितं तु व्याकरणं **पाणिनिप्रभृति प्रवृत्तं इत्यस्ति** तदादित्वस्याख्यान इति मञर्युक्तेरिदं ब्रह्ममीमांसाशास्त्रं विशिष्टानुपूर्वीकं व्यासप्रभृतिप्रवृत्तमित्येवमादिशब्दोक्तप्राथम्यस्याख्याने व्यासेन प्रथमं प्रणीतेति लभ्यत इति भावः। अवतीर्णः इत्यादिप्रमाणात् प्रादुर्भावमात्रं व्यासस्य न तु जननमपि इत्यत आह **कृतकृत्य-स्येति** मूलम्। अवाप्तसकलकामस्येत्यर्थः। **प्रयोजनाभावः** शास्त्रप्रणयनप्रयोजनाभावः। **परशब्दस्येति** मूलम्। परोरिपरमात्मनोरित्याद्यभिधानादिति भावः।

स०व्र०— व्यासोपज्ञतेति। व्यासेन प्रथमं ज्ञाततेत्यर्थः। सर्वोत्तमप्रामाण्यप्रतिपादकस्य प्रमाणस्य ऋगादिविषयत्वात् नैतदित्याह **किञ्चेति।**

कुण्डल०— व्यासोपज्ञतेति। व्यासेन प्रथमतो ज्ञाततारूपकर्तृत्वप्रसिद्धिविरोधादित्यर्थः। ब्रह्मसूत्राणां व्यासकर्तृकत्वप्रसिद्धिविरोध इति यावत्। उपोपसृष्टात् ज्ञाऽवबोधने इत्यस्मात् आतश्चोपसर्ग इत्यनेन कर्मण्यङि कृते ततश्च टापि चोपज्ञाशब्दः सिद्धः। **व्यासस्योपज्ञा व्यासोपज्ञा।** उपज्ञोपक्रमं तदाद्याचिख्यासायामित्यनेन नपुंसकत्वं तस्य भावस्तत्ता। **श्रौतयेति।** श्रुतिरेव श्रौता स्वार्थिकोऽण्प्रत्ययः द्वे विद्ये वेदितव्ये इत्यादिरूपा सा गमकत्वेनास्य अस्तीत्यर्थे अर्श आदिभ्यः अजित्यत्यनेन मत्वर्थीयः अच्प्रत्ययः। ततो यस्येति सूत्रेणेकारलोपे टापि च श्रौतेति सिद्ध्यति। यद्वा श्रुतिसंबन्धि द्वे विद्ये वेदितव्ये इत्यादिवाक्यं श्रौतं श्रुतिशब्दात्तस्येदमित्यर्थेऽण्प्रत्ययः

श्रीतमस्यास्तीत्यर्थेऽण्प्रत्ययस्ततष्टाप् ततश्च तृतीयैकवचने श्रौतयेतिरूपं साध्वेव । अत एव श्रुतिशब्दात् संबन्धार्थेऽण्प्रत्यये स्त्रीत्वविवक्षायां ङीषि च सति श्रौत्येति साध्वपीति निरस्तम् । उक्तरीत्यैव तदुपपत्तेः । श्रौतपरविद्याख्ययेति पाठे न कश्चिदनुपपत्तिः । जीवन्तस्य श्रौतीशब्दस्य स्त्रिया· पुवदित्यादिना पुवद्भावात् । अनेकार्थत्वेनेति । एतौरिवमात्मनोरिति भावः ।

विदु०— व्यासोपज्ञता व्यासकृतता । 'अज्ञोपक्रमं तदाद्याधिक्ष्याप्रायायि'ति पाणिन्युक्तेः ।

जयकः— व्यासोपज्ञतेति । 'अज्ञोपक्रमं तदाद्याधिक्ष्याप्रायायि'ति सूत्रे अज्ञोपक्रमशब्दान्ननन्तुल्यस्य ङीवन्तैकवद्भावयोः विहितत्वात्, अज्ञायत इत्युपज्ञा, 'आतश्चोपसर्ग' इति कर्मण्यङ्, तस्य कर्मणि षष्ठ्यन्तव्यासपदेन समासे, व्यासोपज्ञमिति निष्पन्नत्वे । व्यासकर्तृकत्वमज्ञानविषयतापरसिद्धिविरोधादित्यर्थः । व्यासकर्तृकप्रणयन· क्रियाकर्मतापरसिद्धिविरोधादिति फलितार्थः ॥

काशी०— तृतीयश्लोकमवतारयति बहुक्तमिति । एकृत्रगुक्त्वोपपादकतया शास्त्रपदमेवेच्छाविषयत्वा वश्यकत्वादिति भावः । अयुक्तं युक्तिविरुद्धम् । अस्त्वेतच्छास्त्रं न नारायणप्रणीतं तदन्यप्रणीतत्वादित्यनुमान विरुद्धमिति यावत् । अत्र हेत्वसिद्धिं परिहरति व्यासोपज्ञतेति । उपज्ञायत इत्युपज्ञा व्यासस्योपज्ञा व्यासोपज्ञ व्यासेनादौ ज्ञातम् । 'अज्ञोपक्रमं तदाद्याधिक्ष्याप्रायायि'ति सूत्रेणोपज्ञायोपक्रम्ययोरादेरस्यानेच्छायामुपज्ञोपक्रम शब्दान्ततयुक्तस्य नपुंसकत्वविधानात् । व्यासप्रणीतताप्रसिद्धिविरोधादिति फलितार्थः । शास्त्रप्रणेतुर्व्यासस्य नारायणाभिन्नत्वात् । हेत्वसिद्धिरित्याशङ्क्य निराचष्टे न चेति । व्यासो नारायणो न भवति जननवत्त्वाद्देवदत्तव दित्यनुमानादिति भावः । अत्र विपक्षे बाधकमाह जननेति । अत्रैव दोषान्तरं शास्त्रप्रणयनानुपपत्तीति । तदुपपादनाय कृतकृत्यस्य प्रयोजनाभावेनेति । पूर्णकामस्य प्रयोजनोद्देशाभावनियमेनेत्यर्थः । तथा च व्यासो यदि नारायण स्यात्तदा कृतकृत्यः स्यात् । कृतकृत्यत्वे च प्रयोजनोद्देशशून्यः स्यात् । तथात्वे शास्त्रप्रणेता न स्यात् । अतो नारायणान्य एवेति भावः । यद्वा । नारायणस्य शास्त्रप्रणेतृत्वे युक्त्यन्तरविरोधोक्तिरियम् । नारायणो नैतच्छास्त्र प्रणेता प्रयोजनोद्देशशून्यत्वात् तथ कृतकृत्यत्वहेत्वसिद्धमिति । अनेकार्थत्वेनेति । पूर्वत्रावर्षकत्वेनेत्यर्थः । प्रयोगग्रहणेनेति । तथा च मन्त्रसामान्ये केवलकंडोक्तावश्यकत्वे परविद्या-शब्दस्य निरुक्तार्थ एव तात्पर्यस्य ग्राहकाभावेनानिर्णयादिति भावः । इयं श्रौती । एतद्विद्या एतच्छास्त्रफल । न नियामकमिति । परविद्यात्वस्य नियामकत्वे च तस्य परविद्यास्थयैव साधनीयत्वादन्योन्याश्रय इति भावः ।

मूल०— ननु परविद्याप्राप्त्यां कर्तव्यायां किमिति इतिहासतन्त्रादौ सूत्रव्याख्यानमेव कर्तव्यं तदपहाय व्यासस्य प्रादुर्भावकथनमयुक्तं सूत्रव्याख्यानाननुरूपत्वात्तदाख्यानानुपयुक्तत्वाच्चेत्यतस्तत्रिवर्त्यां शङ्कां दर्शयति बहुक्तमिति । उक्तं तमेव शास्त्रप्रवक्तमित्यनेनेति शेषः । व्यासोपज्ञताप्रसिद्धिविरोधादिति । व्यासस्योपज्ञा इति व्यासोपज्ञं तस्य भावो व्यासोपज्ञतेति विग्रहः । अज्ञोपक्रमं तदाद्याधिक्ष्याप्रायायित्यनेन ङीवन्त्वाद् ह्रस्वत्वम् । तथाचास्य ग्रन्थस्य या व्यासेनादौ कृतताप्रसिद्धिस्तद्विरोधः स्यादित्यर्थः । किञ्च व्यासस्य नारायणावतारत्वात् शास्त्रप्रणयनमेवायुक्तं प्रयोजनाभावादित्यत आह कृतकृत्यस्येति । अवाप्तसकलकामस्येत्यर्थः । प्रयोजनाभावेऽप्य

हेतुः । यदि हि परशब्द उत्तमत्ववाच्येव स्यात् विद्याशब्दश्चार्थविवक्षापूर्वकप्रणीतग्रन्थवाच्येव स्यात् तदा सर्वोत्तमप्रामाण्यसिद्धिः स्यात् । न चैवमित्याह **परशब्दस्येति** । ननु परशब्दस्योत्तमत्वे विद्याशब्दस्य च यथार्थज्ञानसाधन एव मुख्यत्वात् परविद्याख्ययोपपन्नः सर्वोत्तमप्रामाण्यनिश्चय इत्यत आह **किञ्चेति** ।

प्रदीपः— आक्षेप्तुश्रुतेः सर्वोत्तमप्रामाण्याप्रतिपादकत्वादृगादिविषयत्वेन ब्रह्मसूत्रविषयत्वाभावाच्च नेत्यादित्याह **यद्वास्यंति** ।

३२ सु०— अत्र 'कृतकृत्योऽपि हरिरात्मकृपास्पदैर्विरिञ्चिभवपूर्वकैरमरैरर्थितो व्यासः प्रादुर्भूतो न तु जातो ग्रन्थमिमं चक्रे' इत्यनेन नारायणस्य शास्त्रप्रभवत्वे अनुपपत्तिः परिहृता । दृश्यन्ते हि केवलं कृपापारवश्येन परोपकाराय प्रवर्तमानाः सुतरां तैरर्थिताः । अत एव परप्रयोजनमप्यात्मगामीव मन्यमानस्य भगवतः शास्त्रप्रणयनमिति ज्ञापयितुमात्मनेपद-प्रयोगः । अत्र च 'नारायणाद्विनिष्पन्नम्' इत्याद्यागमः प्रमाणम् ।

परि०— अत्र कर्तुः कृतकृत्यतया फलानपेक्षित्वादित्यत आह **अत एवेति** । परार्थप्रवृत्ति-मत्त्वादेवेत्यर्थः ॥ **अत्रेति** । श्लोकोक्तार्थे । भाष्योक्तागमो मानमित्यर्थः ।

वादि०— **अत एव कृपापारवश्येन प्रवर्तमानत्वादेव ॥ आत्मनेपदप्रयोग इति** । 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इति वचनादित्यर्थः ।

आनन्द— प्रादुर्भूतो हरिर्व्यास इत्यत्र व्यासो हरित्वेन प्रादुर्भूत इति व्यासस्योद्देश्यत्वं हरेश्च विधेयत्वेनावतारत्वं प्रतीयते । उक्तशङ्कात्रये च का शङ्का केनांशेन परिहृतेति न ज्ञायते अतः शङ्कात्रयं क्रमेण परिहरन्नेव एतदर्थकथनपूर्वकमन्वयमाह **अत्रेति** । हरिशब्दस्य तात्पर्यकथनं कृतकृत्य इति । तथापि स्वप्रयोजना-भावान्न प्रवृत्तिरित्यत आह **दृश्यन्ते हीति** । नन्वेतद्ग्रन्थकरणस्य तत्त्वज्ञानं तज्जन्यो मोक्षो वा प्रयोजनं तदुभयाभा-वकत्वकाम्यं व्यासं न संभवतीति स्वरितञित इति सूत्रविहितात्मगामिफलत्वाच्यात्मनेपदप्रयोगो न युज्यत इत्यत आह **अत एवेति** । कृपापारवश्येन परोपकाराय प्रवर्तमानत्वादेवेत्यर्थः । नन्वत्र किं प्रमाणमित्यत आह **अत्र चेति** ।

कं०रा०— ननु यदि परोपकाराय भगवतो व्यासस्य शास्त्रप्रणयनं तर्हि शास्त्रकरणरूपक्रियाजन्यफलस्य कर्तृगामित्वाभावेन चक्र इत्यत्र स्वरितञितः कर्त्रभिप्राये क्रियाफल इति सूत्रविहितमात्मनेपदं न स्यादित्यत आह **अत एवेति** ।

श्रीनिधि०— **आत्मनेपदप्रयोग इति** । स्वरितञितः कर्त्रभिप्राये क्रियाफल इति क्रियाफल-स्यात्मगामित्वे आत्मनेपदस्य विहितत्वादिति भावः ।

वा०चं०— अत्र 'कृतकृत्योऽपि हरिरि'त्यनुवादेन पूर्वपक्ष्यभिप्रेतकृतकृत्यत्वहेतोरप्रयोजकत्वस्य, 'प्रादुर्भूत' इति प्रादुर्भावाभिधानेन जननहेतोरसिद्धेश्च सूचनात्; विरिञ्चभवपूर्वकैरिति सूचितकृपायाः, अर्थित इत्युक्तप्रार्थनस्य च प्रादुर्भावशास्त्रप्रणयनप्रयोजकत्वस्याभिप्रेततया, युक्तः शङ्कापरिहार इत्यभिप्रेत्य तथा अन्वयं दर्शयन्नेवांशविशेषप्रयोजनं दर्शयति अत्रेति । स्वप्रयोजनशून्यानामपि कृपाप्रार्थनाभ्यां प्रवृत्तिं निदर्शयति दृश्यन्ते हीति । ननु परप्रयोजनोद्देशेन भगवतः प्रवृत्तौ 'स्वरितत्रितः कर्त्रभिप्राये क्रियाफल' इति (स्वरितेतो त्रितश्च धातोरात्मनेपदं स्यात् । कर्तारमभिप्रैति गच्छति कर्त्रभिप्रायं तस्मिन्) कर्तृगामिक्रियाफलनिमित्तकात्मनेपद-प्रयोगोऽनुपपन्न इत्यतः; कृपापारवश्यादिना कर्तुः परप्रयोजनस्यापि स्वात्मगामित्वानुसन्धानज्ञापकत्वात्तस्य नानुपपत्तिरित्याशयेनाह अत एवेति । अंशान्तरप्रयोजनं दर्शयति परेति ।

वा०र०— अंशविशेष इति । परविचाख्यं अनुत्तमं इत्येतत् व्यतिरिक्तप्रादुर्भूतः इत्याद्यंशेत्यर्थः । स्वप्रयोजनशून्यानामपीति । अनेन तथापि स्वप्रयोजनाभावे कथं प्रार्थनादिना परप्रयोजनोद्देशेन प्रवृत्तिरित्यतः इति शङ्का सूचिता । कृपापारवश्येनेति मूलम् । कृपैव पारं कृपापारं तत् वशं कृपापारवशम् । तद्भावः कृपापारवश्यमिति बहवः । पारवश्येति वृध्यर्थं परवशादेव ष्यञ् । कृपायाः पारवश्यं इति विग्रहे कृपेति सामर्थ्यात् परेणान्वेतीति तत्त्वम् ।

स०व्र०— अत एवेति । 'स्वरितत्रितः कर्त्रभिप्राये क्रियाफल' इति वचनादित्यर्थः ।

कुण्डल०— ननु प्रादुर्भूत इति श्लोकेन कथमुक्तशङ्कानिरास इत्यतस्तदीयपदस्वारस्यपर्यालोचनयैव सा निरस्तेत्यभिप्रायेण पदस्वारस्यं दर्शयति अत्रेत्यादिना । आत्मनेपदेति । स्वरितत्रितः कर्त्रभिप्राये क्रियाफल इति सूत्रशिष्टस्य कर्तृनिष्ठक्रियाफलसूचकस्य चक्र इत्यात्मनेपदस्य प्रयोग इत्यर्थः ।

विद्व०— अर्थितस्सन् प्रादुर्भूत इत्युक्तिसामर्थ्यालब्धोऽर्थः कृतकृत्योऽपीति । विरिञ्चादिग्रहणेन प्राप्तोऽर्थः आत्मकृपास्पदैरिति । कृतकृत्यस्य प्रणयनं समर्थयितुमाह दृश्यन्ते हीति । ननु यदि भगवतः स्वप्रयोजनानुद्देशेन प्रवृत्तिः तर्हि "स्वरितत्रितः कर्त्रभिप्राये क्रियाफले" इति कर्तृगामिक्रियाफलनिमित्तकात्मनेपदप्रयोगानुपपत्तिरित्यत आह अत एवेति । तथाच परप्रयोजनस्य स्वप्रयोजनरूपत्वेनात्मगामिक्रियाफलनिमित्तकात्मनेपदक्रियाप्रयोगोप-पत्तिरिति भावः ।

चषकः— आत्मनेपदेति । 'स्वरितत्रित' इति सूत्रादिति भावः । परप्रयोजनधर्मिकस्वात्मगामित्वोप-रक्तानुसन्धानसमवधानादिति हृदयम् ।

काशी०— स्वार्थं प्रादुर्भूत इत्यन्यथाप्रतीतिनिरासाय विवक्षितयोजनां प्रदर्शयन् व्याचष्टे अत्रेति । अस्मिन् श्लोके इत्यनेनान्वयः । कृतकृत्योऽपीत्युक्तहेतोरन्यथासिद्धिसिद्धचर्थमनुवादः । विशिष्यविरिञ्चादिग्रहणलब्धमात्म-

कृपास्पदैरिति विशेषणं तदीयप्रार्थनाया अमोघत्वसूचनार्थम्। तत्सूचितवक्ष्यमाणवचनानुसारेण सज्जनानुक्रोशयुक्तेरित्यपि ग्राह्यम्। यद्यपि प्रादुर्भूतः शास्त्रं चक्र इत्येव योजना। तथाऽपि प्रादुर्भूतपदेन न तु जात इति लभ्यते इति तद्वचवच्छेद्यप्रदर्शनम्। एवं शास्त्रमित्यत्रैतच्छास्त्ररूपधर्म्यंशस्यैवेदानीमुपयोगः। शास्त्रत्वादिविशेषणांशस्य तूत्तरत्रेति ज्ञापनाय ग्रन्थमिममित्युक्तं न तु तदध्याहार इति ज्ञातव्यम्। **परिहृतेति**। व्यासस्य नारायणानन्यत्वाज्जननस्य चासिद्धेः। कृतकृत्यस्य च परप्रयोजनोद्देशेनान्यथासिद्धेः। तस्य च कृपापारवश्येनैव सिद्धेरिति भावः। एतदेवोपपादयति **दृश्यन्ते हीति**। केवलमिति परप्रार्थनव्यवच्छेदः। तैस्तथा प्रवृत्तमानैरात्मकृपास्पदैश्च ब्रह्मादिभिरर्थितः स्वतो दयालुर्हरिः सुतरामेव प्रवर्तितुमर्हतीत्यर्थः। अत्यन्तकृपापारवश्यादिति भावः। परे तु अर्थिता इति पाठमुपेत्य कृपाप्रार्थनाभ्यामेव प्रवृत्तिं निदर्शयतीत्यवतारयन्ति। हरेरत्यन्तकृपापारवश्यमत्र कुतो लभ्यत इत्यत आह **अत एवेति**। अत्यन्तकृपापारवश्यादेवेत्यर्थः। मन्यमानस्येत्यन्वयः। **आत्मगामी चेति**। परमेष्ठमिति यावत्। 'स्वरितञितः कर्त्रभिप्राये क्रियाफल' इति सूत्रेण कर्तृगामिनि क्रियाफले विहितमात्मनेपदं गौणं प्रयुञ्जानेन कर्तुरत्यन्तकृपापारवश्यं ज्ञाप्यत इति भावः। उक्तार्थे प्रमाणस्य भाष्य एवोक्तत्वान्न न्यूनतेत्याशयेनाह **अत्र चेति**। यद्यपि यथाश्रुतश्लोकार्थे तैर्विज्ञापितकार्यस्त्वित्यादेवोपयोगः। तथाऽपि विरिञ्चादीनां विशेषतः प्रार्थनस्य समुत्पन्नज्ञानसज्जनानुक्रोशमूलतया तदाक्षिप्तज्ञानोत्सादादिप्रतिपादकत्वान्नारायणादित्यादेरुदाहरणम्।

गूढ०— प्रादुर्भूतो हरिर्व्यास इत्यत्र व्यासो हरित्वेन प्रादुर्भूत इति व्यासस्योद्देश्यत्वं हरेश्च विधेयत्वं प्रतीयते। उक्तशङ्कात्रये का शङ्का केनांशेन परिहृतेति न ज्ञायते। अतः शङ्कात्रयं क्रमेण परिहरन्नेव पदार्थकथनपूर्वकमन्वयमाह **अत्रेति**। हरिशब्दस्य तात्पर्यकथनं **कृतकृत्य इति**। तथापि स्वप्रयोजनाभावान्न प्रवृत्तिरित्यत आह **दृश्यन्ते हीति**। नन्वेतद्ग्रन्थस्य तत्त्वज्ञानं तज्जन्यो मोक्षो वा प्रयोजनं, तच्चावाप्तसकलकामे व्यासे न संभवतीति स्वरितञित इति सूत्रविहितात्मगामिफलवाच्यात्मनेपदप्रयोगो न युक्त इत्यत आह **अत एवेति**। कृपापारवश्येन परोपकाराय प्रवर्तमानत्वादेवेत्यर्थः। नन्वत्र किं प्रमाणमित्यत आह **अत्र चेति**।

प्रदीपः— **अत एवेति**। स्वरितञितः कर्त्रभिप्राये क्रियाफल इति वचनादित्यर्थः।

॥ अस्य शास्त्रस्य व्याख्यातव्यतासमर्थनम् ॥

॥ अस्य शास्त्रस्य सर्वोत्तमप्रामाण्यसमर्थनम् ॥

अस्य शास्त्रस्य परविद्याख्यया सर्वोत्तमप्रामाण्यसाधनम्—

३३ सु०— परविद्याख्यया अस्य सर्वोत्तमप्रामाण्यसिद्धिं व्युत्पादयितुं परविद्याख्यम् इत्यनूद्य अनुत्तमं शास्त्रम् इति व्याख्यातम्। नास्त्युत्तमं शास्त्रमस्मादिति अनुत्तमम्। शिष्यते यथास्थितं प्रतिपाद्यते तत्त्वमनेनेति शास्त्रम्।

यादु०— शास्त्रमेवेत्यत्र न मन्त्रमात्रमित्येव(न ज्ञानमित्येव)कारार्थो बोध्यः॥

आनन्दः— ननु परविद्याख्यया सर्वोत्तमप्रामाण्यस्यानुपपादनात् न सिद्धिरित्युक्ते परविद्याख्यमित्युक्तम् । तदप्ययुक्तम् । एवमपि सर्वोत्तमप्रामाण्यस्यानुपपादनात् अनुत्तमं शास्त्रमित्यनेन पौनरुक्त्यं चेत्यत आह **परविद्याख्ययेति** । कथमनेन व्याख्यानं कृतमत्राह **नास्तीति** ।

बा०चं०— अनुत्तममित्यस्य न परशब्दव्याख्यानत्वं विरुद्धार्थत्वात् । नापि भावसाधनशास्त्रशब्दस्य करणसाधनविद्याशब्दव्याख्यानत्वं युक्तमित्यत आह **नास्तीत्यादिना** । यद्वा परविद्याशब्दव्याख्यानार्थं प्रवृत्ते 'अनुत्तमं शास्त्रमि'त्यत्र वक्ष्यमाणमनुपपत्तिपरिहारकत्वं यदभिप्रेतं तदुपयुक्ततया व्याख्यानमिदमिति द्रष्टव्यम् ।

बा०र०— **नास्तीत्यादिनेति** । यद्यपि उत्तममित्येव भाष्ये प्रयोक्तव्यम् । क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमा इत्यमरे उत्तमेऽनुत्तमं च स्यादिति शब्दभेदप्रकाशे च उत्तमशब्दस्यानुत्तमशब्दसमानार्थतयोक्तेः नञ्घटितपदप्रयोगे अर्थाधिक्याभावात् । उत्तमशब्देन उत्तमत्वप्रतीतेः झडिति जायमानत्वेऽपि अनुत्तमशब्देनार्थान्तरावकाशवता प्रकरणबलेनार्थविशेषे पर्यवसानेन झटिति तत्प्रतीतेरनुत्पादाच्च । तथापि उत्तमादपि उत्तमं सर्वोत्तमपदाभिधेयं परशब्देनात्र विवक्षितम् । प्रामाण्यस्य तथाविधताप्रतिपादनायैवात्र यत्नकरणात् । त्रिविधं महत् वक्ष्यमाणत्वाच्च । अन्यथा तथाविधवाक्यान्तरपरित्यागेन एतच्छास्त्रस्यैव व्याख्यानं कुतः इति शङ्कावारणं न सिद्धचेत् । उक्तरूपपरत्वे लाभश्चानुत्तमपदेन नास्ति उत्तममिति योगमाश्रित्य भवन्नपि उत्तमपदेन न भवतीति भाष्यकृता अनुत्तममित्येवोक्तमिति सिद्धत्वात् तदप्रतिपादनं न दोषायेति ज्ञेयम् । **मूले अत्र चेत्यस्य** प्रादुर्भूत इति श्लोकार्ध इत्यर्थः ।

स०त्र०— सिद्धान्ती सर्वोत्तमप्रामाण्यं च सिद्धचतीत्याह **परविद्याख्ययेति** । मध्ये ब्रह्मसूत्राणां व्यासप्रणीतत्वेन नारायणप्रणीतत्वाभावात्, व्यासस्य नारायणत्वे जन्माद्यनुपपत्तेः अवाप्तकामत्वेन प्रयोजनानुद्देशिततया शास्त्रप्रणयनं व्यर्थम्; व्यासत्वेन नारायणस्यैव प्रादुर्भावादुत्पत्त्यभावात् आप्तकामत्वेऽपि कृपालुत्वेन परप्रयोजनार्थं शास्त्रप्रणयनम्; इत्याक्षेपपरिहारौ देवतागुर्वभेदज्ञापनार्थकश्लोकस्यानेकाक्षेपपरिहारकत्वात् प्रामाण्येन च सहोक्ताविति द्रष्टव्यम् ॥ अथवा तमेव शास्त्रप्रभवमिति शास्त्रस्य परमाप्तनारायणप्रणीतत्वेन प्रामाण्यं सूचितम् । तद्यदुक्तमित्यादिना आक्षिप्यात्रेत्यादिना समाधीयत इति ।

कुण्डल०— ननु परविद्याख्यमित्यनेनैव प्रकृतशास्त्रस्य सर्वोत्तमप्रामाण्यसिद्धेरनुत्तममिति व्यर्थमित्यत आह **परविद्याख्ययेति** । तथा च व्याख्यानव्याख्येयभावान्न वैयर्थ्यमिति भावः ।

काशी०— **परविद्याख्यमिति** । न चात्र परविद्याशब्दस्यैव व्याख्येयत्वादाख्येति व्यर्थमिति शङ्क्यम् । परविद्यामनुत्तमं शास्त्रमित्येकार्थत्वेनान्वयानुपपत्तेः । **व्याख्यातमिति** । परविद्यापदमिति पूरणीयम् । अनुत्तमशास्त्रत्वात् परविद्याख्यमित्यर्थस्य विवक्षितत्वादिति भावः । नन्वनुत्तमशब्दस्योत्तमभिन्नार्थत्वे कथं परशब्दव्याख्यानत्वमत आह **नास्त्युत्तममिति** । उत्तमशब्दो वक्ष्यमाणरीत्या शास्त्रत्वेनोत्तमार्थ इति भावेनोत्तमं शास्त्रमित्युक्तम् । यथास्थितं

यथार्थमिति क्रियाविशेषणम् । तेन शास्त्राभासव्यावृत्तिः । अत्र शास्त्रशब्दस्यापि विद्याशब्दवद्योगरूढिभ्यां प्रवृत्तिरभिप्रेता । तत्त्वमिति योग्यतालब्धं कर्मोक्तं न तु शास्त्रशब्दार्थघटकमतो न तद्वैयर्थ्यम्।

गूढ०— ननु परविद्याख्यया सर्वोत्तमप्रामाण्यस्यानुपपादनात् न सिद्धिरित्युक्ते परविद्याख्यमित्युक्तम् । तदयुक्तम् । एवमपि सर्वोत्तमप्रामाण्यस्यानुपपादनात् अनुत्तमं शास्त्रमित्यनेन पौनरुक्त्यं चेत्यत आह **परविद्याख्ययेति** । कथमनेन व्याख्यानं कृतमित्यत आह **नास्तीति** ।

प्रदीपः— सिद्धान्ती श्रुत्या सर्वोत्तमाप्रामाण्यं सिद्धयतीत्याह **परविद्याख्ययेति** । मध्ये ब्रह्मसूत्राणां व्यासप्रणीतत्वेन नारायणप्रणीतत्वाभावात् व्यासस्य नारायणत्वे जन्माद्यभावापत्तेः अवाप्तकामत्वेन प्रयोजनानुद्देशितया शास्त्रप्रणयनं व्यर्थम् । व्यासत्वेन नारायणस्यैव प्रादुर्भावादुत्पत्त्यभावादाप्तकामत्वेऽपि कृपालुत्वेन परप्रयोजनार्थं शास्त्रप्रणयनमित्याक्षेपपरिहारत्वात् प्रामाण्येन सहोक्ताविति द्रष्टव्यम् । अथवा तमेव शास्त्रप्रभवमिति शास्त्रस्य परमाप्तनारायणप्रणीतत्वेन प्रामाण्यं सूचितं **यदुक्तमित्यादिना** ।

३४ सु०— इदमुक्तं भवति । 'द्वे विद्ये वेदितव्ये परा चैवापरा च' इति विद्याद्वयमुद्दिश्य 'तत्रापरे'त्यादिना साङ्गान्वेदानपरविद्यात्वेनोक्त्वा 'अथ परा यया तदक्षरमधिगम्यत' इति परविद्या प्रदर्शिता । सा तावद्वेदादिशास्त्रप्रकरणात् परमाक्षराधिगतिकरणत्वलिङ्गाच्च शास्त्रमेव भवितुमर्हति । अन्यथा सकृदुक्तविद्याशब्दस्यानेकार्थत्वकल्पनाप्रसङ्गाच्च । शास्त्रं चाप्रमाणं चेति विप्रतिषिद्धम् । तस्य च परत्वं नाम अन्यन्न संभवतीति अनुत्तमत्वमेव । तदपि सन्निधानात् प्रमाणत्वेनैव । शब्दान्तरसमभिव्याहारवशेन सामान्यशब्दस्य विशेषार्थस्य कल्पनीयत्वात् । तद्यथा परमधार्मिक इत्यभिहिते परमत्वं धर्मेणेति ज्ञायते । तच्चानुत्तमं शास्त्रमिदमेव विवक्षितम् । निर्णेतव्यार्थानाम् ऋगादिपदोपलक्षितानाम् अशेषशास्त्राणाम् अपरविद्यात्वेनोक्तत्वात् । अन्यस्य अप्रसङ्गात्परत्वासंभवाच्च । संभवति त्वस्य परत्वमनुग्राहकत्वात् ।

परि०— नन्वेतावता विद्याशब्दः शास्त्रपर इत्यत्र न नियामकमुक्तमित्यत आह **इदमुक्तं भवति इति** । 'द्वे विद्ये वेदितव्ये परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं च्छन्दो ज्योतिषमिति । अथ परे'त्यादिपाठक्रमः । अपरोक्षज्ञानं परविद्याशब्दार्थ इति वादिभिरुक्तमसदिति भावेनोक्तं **वेदादिशास्त्रेति** । युक्तिस्तु चन्द्रिकायामुक्ता । वक्ति चात्रापि लेशतः ॥ **अन्यथेति** । ज्ञानार्थत्व इत्यर्थः ॥ **सकृदुक्तेति** । द्वे विद्ये वेदितव्ये इत्यत्र सकृत् श्रुतेत्यर्थः । परोक्षज्ञानमपरविद्या । अतो नानेकार्थत्वमिति तु तत्रापरेत्यादिविरोधादयुक्तमेवेति भावः । तावता प्रामाण्यं

सर्वोत्तमप्रामाण्यं वा कुतः । परशब्दस्यानेकार्थत्वादित्युक्तेरित्यत आह **शास्त्रं चेति** । **अन्यत्र संभवतीति** । अपरत्वप्रतिद्वन्द्वितया निर्देशादिति भावः । **प्रमाणत्वेनैव तत्त्वज्ञानकरणत्वेनैव** इत्यर्थः ॥ **सामान्येति** । अनेकार्थसाधारणपरशब्दार्थस्येत्यर्थः । **किञ्चेयं परविद्येत्यनेनोक्तशङ्कां निराह तच्चेति** । **इदमेव ब्रह्मतन्त्रमेव । अन्यस्य कर्मतन्त्रादेः । अक्षराख्यपरब्रह्मप्रतिपादकत्वात्** इति भावः ॥ **परत्वेति** । मुक्तिहेतुज्ञानजनकत्वादिति भावः ॥ **अस्य ब्रह्मतन्त्रस्य** ॥

गु०दी०— **शास्त्रमेव भवितुमर्हतीत्यत्र न तु विषहरमन्त्रादिवत् मन्त्रमात्रमित्येवकारार्थः । अन्यथा सकृदुक्तविद्याशब्दस्येत्यत्र** अन्यथा वेदविषये विद्यात्वं "यया तदक्षरमधिगम्यत" इत्यत्र मन्त्रमात्रत्वमित्यङ्गीकारे। **अन्यत्र संभवति** इत्यत्र अन्यत् भिन्नत्वं न संभवति । **तथा सति** वेदविद्याया अप्यक्षरविद्याभिन्नत्वेन परविद्यात्वप्रसङ्गादित्यर्थः । **सन्निधानात् अपौरुषेयतया प्रमाणभूतवेदसन्निधानात्** । अपरविद्यात्वेनोक्तवेदविद्याऽपि अपौरुषेयत्वाद्यदा प्रमाणं तदा ततोऽप्युत्तमविद्यात्वेनोक्ताक्षरविद्यारूपब्रह्ममीमांसायाः प्रामाण्यं किं वक्तव्यमिति भावः ।

यादु०— **विप्रतिषिद्धमिति । शिष्यते यथास्थितमेव वस्तु प्रतिपाद्यत** इति शास्त्रशब्दस्य निरुक्तत्वादिति भावः ॥ **अन्यत्र संभवतीति** । परत्वस्यान्यत्वरूपत्वेऽपरत्वस्यानन्यत्वरूपतापत्त्या तत्र ये वेदा यान्यङ्गानी-त्यादिभेदव्यपदेशो बाधितः स्यादित्यर्थः । **अतोऽपरत्वमधमत्वं तत्प्रतियोगिकं च परत्वमुत्तमत्वमेव वक्तव्यमिति** भावः ॥ **सन्निधानादिति** । विद्याशब्देनैवोक्तरीत्या प्रामाण्यस्य प्रस्तुतत्वादित्यर्थः ॥ **सामान्यशब्दस्येति** । अनेकप्रकारेण संभवदुत्तमत्वार्थकपरशब्दस्येत्यर्थः । **विशेषार्थस्य प्रामाण्येनोत्तमत्वस्य** ॥ परविद्येत्याख्या यस्य तत्परविद्याख्यमिति बहुव्रीहिलब्धमर्थं दर्शयति **तच्चानुत्तमं शास्त्रमिदमेवेति** ॥ नन्वन्यस्याप्रसङ्गः कथं धर्मादि-मीमांसासङ्गावादत आह **परत्वेति** ॥

बं०प०— शब्दान्तरेति । विद्याशब्देत्यर्थः । **सामान्यशब्दस्य परशब्दस्य** ॥ **विशेषार्थस्य इति** । अनुत्तमत्वरूपार्थस्येत्यर्थः ।

आनन्द:— ननु परविद्याख्यया कथं सर्वोत्तमप्रामाण्यसिद्धिरित्युक्तेऽनुत्तमं शास्त्रमिति पर्यायशब्दप्रयोग-करणमयुक्तं सर्वोत्तमप्रामाण्यानुपपादकत्वात् । **किञ्च** विद्याशब्देन शास्त्रस्य परशब्देन चोत्तमत्वस्यावग्रहणमयुक्तम् । हेत्वभावादित्यत आह **इदमुक्तं भवतीति** । तत्र परविद्याशब्देन न शास्त्रातिरिक्तग्रहणं, किन्तु शास्त्रस्यैवेत्याह **सा चेति** । यया तदक्षरमिति तृतीययोक्ताक्षराधिगतिकरणत्वस्य शास्त्रातिरिक्तेऽसंभवादिति भावः । **अन्यथेति** । शास्त्रातिरिक्तस्यैव परविद्याशब्देन ग्रहण इत्यर्थः । द्वे विद्ये वेदितव्य इत्यत्र सकृच्छ्रुतस्य विद्याशब्दस्य तत्रापरेत्यत्र वेदादिशास्त्रपरत्वं अथ परेत्यत्र शास्त्रातिरिक्तपरत्वमित्यनेकार्थत्वकल्पनेति गौरवं स्यादित्यर्थः । नन्वस्त्वेतावता विद्याशब्देन शास्त्रं तथापि तस्य प्रामाण्यं कुत इत्यत आह **शास्त्रं चेति** । तत्त्वभूतार्थविषयकयथार्थज्ञान-

करणवाक्यसमूहस्यैव शास्त्रशब्दार्थत्वेन शास्त्रशब्देनैव प्रामाण्यस्य लब्धत्वाच्छास्त्रमप्रमाणमित्युक्ते व्याघात इत्यर्थः। परशब्दस्य भिन्नत्वार्थत्वेऽपरत्वेन साङ्कर्यं स्यादत आह **तस्येति**। शास्त्रस्य इत्यर्थः। तथाप्युत्तमत्वस्य प्रकारान्तरेणापि संभवान्न सर्वोत्तमप्रामाण्यसिद्धिरित्यत आह **तदपीति**। **सन्निधानात्** शास्त्रशब्दसन्निधानादित्यर्थः। तथापि सामान्यस्य परशब्दस्य कथं शास्त्रान्तरापेक्षयोत्तमत्वरूपविशेषार्थत्वमित्यत आह **शब्दान्तरेति**। शास्त्रशब्दरूपशब्दान्तरसमभिव्याहारेणेत्यर्थः। सामान्यशब्दस्य विशेषार्थपरत्वं शब्दान्तरसमभिव्याहारेण क्व दृष्टमित्यत आह **तद्यथेति**। नन्वस्तु परविद्याशब्देन सर्वोत्तमप्रामाण्यलाभस्तथापि परविद्याख्या सूत्राणामेव कुतः ऋगादेरेव किं न स्यादित्यत आह **तच्चेति**। अत्र हेतुमाह **निर्णेतव्यार्थानामिति**। ऋगादिपदवाच्यानामपरविद्यात्वेनोक्तत्वादित्येवोक्ते भारतादे ऋगादिपदवाच्यत्वाभावात्परविद्यात्वं स्यादिति ऋगादिपदोपलक्षितानामित्युक्तम्। ननूपलक्ष्यतावच्छेदकाभावान्नोपलक्षणं संभवतीत्यत उक्तं **निर्णेतव्यार्थानामिति**। तथाच काकेभ्यो दधि रक्ष्यतामित्यत्र दध्युपघातकत्वरूपोपलक्ष्यतावच्छेदकैक्यस्य मार्जालादिष्वपि सत्त्वेन काकशब्देन मार्जालाद्युपलक्षणवदत्रापि निर्णेतव्यार्थत्वरूपोपलक्ष्यतावच्छेदकस्य ऋगादिषु भारतादिषु च सत्त्वादुपलक्ष्यतावच्छेदकैक्यादुपलक्षणं युक्तमिति भावः। तथाप्यपौरुषेयस्य ऋगादेरपरविद्यात्वं पौरुषेयब्रह्मसूत्राणां च परविद्यात्वं कथं घटते इत्यतोऽप्युक्तं **निर्णेतव्यार्थानामिति**। तथा च वेदस्य निर्णेतव्यार्थत्वात् ब्रह्मसूत्राणां च निर्णीतार्थत्वेन व्याख्यानरूपत्वाद्व्याख्यानव्याख्येययोर्मध्ये व्याख्यानं प्रबलमिति न्यायेन ब्रह्मसूत्राणां प्रबलत्वेन परविद्यात्वं ऋगादीनां तु व्याख्येयत्वेनापरविद्यात्वमिति भावः। तर्ह्यस्तु ऋग्वातिरिक्तस्य परविद्याशब्दार्थत्वमित्यत आह **अन्यस्येति**। अप्रसङ्गात्। परविद्याशब्दार्थत्वप्रसङ्गाभावात्। किञ्चान्यस्य परत्वासंभवाच्च न परविद्याशब्दार्थत्वमित्याह **परत्वासंभवाच्चेति**। ननु ऋगादिवेदस्यापि परत्वासंभवान्न परविद्याशब्दार्थत्वमित्याशङ्क्याह **संभवतीति**। ऋगादीनामिति शेषः।

कं०रा०— वेदादीति। वेदादिशास्त्रस्यापरविद्यात्वोक्तौ शास्त्रप्रकरणबलात्परविद्याऽपि शास्त्रमेव भवितुमर्हतीत्यर्थः। **अन्यथेति**। शास्त्रव्यतिरिक्तसाहित्यनाट्कादिविद्यायाः परविद्याशब्दितत्वे 'द्वे विद्ये वेदितव्य' इत्यत्र विद्याशब्दस्यापरविद्यात्वेन गृहीतेषु वेदादिषु यथार्थज्ञानसाधनविशेषत्वं प्रवृत्तिनिमित्तं, परविद्याशब्दितसाहित्यनाट्कादिविद्यायां तु तदभावादन्यदेव प्रवृत्तिनिमित्तं वाच्यमिति प्रवृत्तिनिमित्तनानात्वेन सकृदुक्तविद्याशब्दस्य अनेकार्थत्वकल्पनाप्रसङ्गादित्यर्थः। चशब्देन वेदादिप्रकरणानुपपत्तिं परमाक्षराधिगतिकरणत्वरूपलिङ्गानुपपत्तिं च समुच्चिनोति। यद्वा। अन्यथेत्येतद् अर्थविवक्षापूर्वकत्वरहितविषहरमन्त्रस्य परविद्याशब्दितत्व इति व्याख्येयम्। अवशिष्टं तु पूर्ववत्। **निर्णेतव्यार्थानामिति**। एतच्छास्त्रनिर्णेतव्यार्थानामित्यर्थः।

श्रीनिधि०— सकृदुक्तेति। द्वे विद्येत्यत्र सकृदुक्तेत्यर्थः। **अन्यत्र संभवतीति**। विलक्षणत्वादेः ऋगादावपि परस्परं विद्यमानत्वादिति भावः। **सन्निधानात् प्रमाणत्वेनैवेति**। अत्र प्रामाण्यस्य च सन्निधिः।

वा०चं०— ननु 'परशब्दस्यानेकार्थत्वेन विद्याशब्दस्यार्थविवक्षाविरहिण्यपि मन्त्रे प्रयोगदर्शनेन न परविद्याख्यया सर्वोत्तमप्रामाण्यसिद्धिरि'ति शङ्कायाः 'परविद्याख्यमि'त्यनूद्य, 'अनुत्तमं शास्त्रमि'ति व्याख्यानमात्रेण न परिहारः। परा विद्येत्यत्र विद्याशब्देन शास्त्रोपादाने परशब्दस्यानुत्तमत्वातिरिक्तार्थत्वाभावे च हेतोरनुक्तेः तत्सद्भावेऽपि वा शास्त्रत्वेन प्रामाण्यसिद्धिप्रकारस्य परशब्दस्य स्वतन्त्रविशेषणत्वेनाप्युपपत्त्या प्रामाण्येऽनुत्तमत्वसिद्धिप्रकारस्य चानुक्त्या विवक्षितार्थासिद्धिरेव। तत्रापरेत्यादिनिर्दिष्टव्यतिरिक्तानामेव अथ परेत्यनेन ग्रहणसंभवेन तेनास्यैव ग्रहणे विशेषहेतोरनुक्त्या न 'किञ्चे'त्युक्तशङ्कापरिहारोऽपीत्यतः शास्त्रग्रहणेनैव तत्रापरेत्यादिशास्त्रप्रकरणस्य, प्रतिपत्तिकरणार्थकशास्त्रपदोपादानेनैव 'यया तदक्षरमधिगम्यत' इति वाक्यशेषोपात्तलिङ्गस्य च सूचनाद्विद्याशब्देन शास्त्रोपादाने साधकस्य प्रकरणस्ये सूचनेनैव 'अन्यथे'त्युक्तविपक्षबाधकस्य च सूचनात् तत्त्वज्ञानकरणार्थकशास्त्रशब्दोपादानेन 'तादृशस्याप्यप्रामाण्यशङ्का व्याहतिग्रस्ततया नोदेती'त्यर्थस्य सूचनेन शास्त्रत्वेन प्रामाण्यसिद्धिप्रकारस्यापि सूचितत्वात् 'अनुत्तममि'त्यर्थविशेषकथनेनैव प्रकृते परशब्दार्थान्तरासंभवस्य, सामान्ये विशेषपदसमभिव्याहारेण च परत्वस्य विद्यात्वेन संबन्धे सन्निधानरूपहेतोश्च सूचनाद्युक्तः 'शास्त्रमनुत्तममि'ति व्याख्यानमात्रेण पूर्वशङ्कापरिहारः। शास्त्रप्रकरणसूचकशास्त्रशब्देन, परशब्दस्योत्तमत्वव्याख्यानेन च शास्त्राणामृगाद्यपेक्षया संभवात्परत्वानां चानुपादानसूचनात् उत्तमत्वव्याख्यानेनैव तत्प्रयोजकस्य, तत्प्रयोजकप्रयोज्यावधिभूतानां तत्रापरेत्यादिनोपलक्षणस्य च सूचनेनास्यैव ग्रहणे परिशेषसूचनात् 'किञ्चे'त्यादिशङ्कापरिहारोऽपि युक्त इत्याशयेनाह **इदमुक्तं भवतीति**। अत्र 'द्वे विद्ये'त्यारभ्य 'उद्दिश्ये'त्यन्तम् 'अन्यथे'त्युक्तबाधकस्य, 'तत्रे'त्यादि 'उत्तवे'त्यन्तं शास्त्रप्रकरणस्य, 'यये'ति वाक्यशेषश्च लिङ्गस्य सूचनायेति मन्तव्यम्॥ **लिङ्गाच्चेति**। अक्षराधिगतिकरणत्वस्य च तत्त्वज्ञानकरणे शास्त्र एव संभवादर्थविवक्षाविरहिणि मन्त्रादावसंभवादिति भावः॥ **प्रसङ्गाच्चेति**। चशब्द उक्तसाधकसमुच्चयार्थः॥ **अन्यन्न संभवतीति**। अन्यत्वारित्वपरमात्मत्वानामपरप्रतियोगितयोक्तविद्यायामसंभव इत्यर्थः॥ एतदतिरिक्तं परविद्यात्वेन विवक्षितं भवच्छास्त्रमृगादिकं तदतिरिक्तं वा। अतिरिक्तत्वेऽपि निर्णेतव्यमितिहासादिकं निर्णायकं धर्मदेवमीमांसारूपं वा बौद्धादि वेति विकल्यान्मनसि निधाय ऋगादिशब्दानां निर्णेतव्येतिहासाद्युपलक्षणत्वमभिप्रेत्यादौ निराचष्टे **निर्णेतव्यार्थानामिति**। तदतिरिक्तत्वपक्षे द्वितीयं शास्त्रशब्दसूचितयुक्त्या निराह **अन्यस्य चेति**। 'स ब्रह्मविद्यामि'ति ब्रह्मशास्त्रस्यैव प्रकरणेन धर्मदेवमीमांसयोरप्रसङ्गादित्यर्थः। सर्वनिर्णेतव्यशास्त्रनिर्णायकस्यास्य परविद्यात्वेन अविवक्षायामेतदेकदेशामुख्यप्रतिपाद्यव्याख्यानरूपयोस्तयोः परविद्यात्वस्य सुतरामप्राप्तेरिति वाऽर्थः। बौद्धादेः वेदादिविरुद्धत्वेनायथार्थत्वाच्छास्त्रग्रहणसूचितप्रकरणेन निरास इत्यभिप्रेत्य द्वितीये तृतीयं निराकरोति **अन्यस्येति**॥ परशब्दार्थोत्तमत्वेनापि तद्व्यावृत्तिरित्याह **परत्वेति**॥ परिशेषस्यानुत्तमत्वोक्त्या सूचितं तत्प्रयोजकमाह **संभवतीति**।

वा०र०— 'द्वे विद्ये वेदितव्ये' इत्याद्युपपादनांशैः व्यावृत्त्याः शङ्काः दर्शयन् तच्छङ्कापरिहारस्यानुव्याख्यानारूढत्वात् नोद्घाष्यत्वमिति च दर्शयन् उत्तरग्रन्थमवतारयति **ननु परशब्दस्येत्यादिना मन्तव्यमित्यन्तेन**। तत्तच्छङ्कातत्तद्भागव्यावर्त्यत्वं सावहितमनस्कैरूह्यम्। **निर्दिष्टव्यतिरिक्तानामेवेति**। इतिहासादीनां बौद्धादिशास्त्रादीनां चेत्यर्थः। **ऋगाद्यपेक्षयेति**। ऋगाद्यपेक्षया न संभवति परत्वमेषामेवंविधानां शास्त्राणामित्यर्थः।

तत्प्रयोजकस्येति अनुग्राहकत्वरूपस्येत्यर्थः । **तत्प्रयोजकेति** । अनुग्राहकत्वरूपं यत् प्रयोजकं तत् प्रयोज्यं यत् उत्तमत्वरूपं परत्वं तदवधिभूतानां **निर्णेतव्यार्थे इतिहासादिसमस्तशास्त्राणामित्यर्थः** । अनेन तत्रापरेत्यत्रत्यमृगादिपदं उपलक्षणम् । निर्णेतव्यार्थत्वरूपमनुग्राहकत्वप्रयुक्तोत्तमत्वावधित्वमुपलक्ष्यतावच्छेदकमित्युक्तं भवति । भाष्यपदानां रूढभागकृत्यमाह **अत्र द्वे विद्येत्यारभ्येत्यादि** । **अन्यथा सकृदिति** मूलस्य परविद्यापदेन शास्त्रातिरिक्तस्य ग्रहणाङ्गीकारे द्वे विद्ये इति सकृच्छ्रुतेः विद्याशब्दस्य तत्र परेत्यत्र शास्त्ररूपवेदादिपरत्वं अथ परेत्यत्र तु शास्त्रातिरिक्तपरत्वमित्यनेकार्थपरत्वकल्पनाप्रसङ्गादित्यर्थः । **उक्तसाधकेति** । प्रकरणलिङ्गरूपेत्यर्थः । साधकेत्येव पाठः । वाकारो लेखकारप्रयुक्तः । **शास्त्रं चेति** मूले । विमतं शास्त्रत्वात् इति प्रयोगमभिप्रेत्य तत्र विपक्षे व्याघातरूपबाधकप्रदर्शनम् । **तस्येति** मूलपदस्य शास्त्रस्येत्यर्थः । **अपरप्रतियोगितयेति** । विद्यायां परमत्वं नावत् बाधितमिति तस्यासंभवः स्फुट एव । **वैरत्वमपि परस्पराभावरूपत्वव्यघातकत्वादिरूपं** वाच्यम् । तदपि परापरविद्ययोर्न संभवतीति तद्गृहीतार्थाभावावेदकत्वरूपं वाच्यम् । **परमात्माधिगतिकरणत्वेन** शास्त्रत्वरूपविद्यात्व-सत्त्वात् एव परमात्मावेदकत्वस्यैव सद्भावेन च तदपि न वक्तुं शक्यम् । अन्यत्वस्य चापरस्मिन्नपि विद्यमान-तयाऽपरप्रतियोगितया उक्तविद्यायाः **परत्वस्यान्यत्वमात्रस्यासंभव इति योज्यम्** । प्रकारान्तरेणोत्तमत्वं चेत् न प्रामाण्यस्योत्तमत्वप्राप्तिरित्यत आह **तदपीति** मूलम् । **सन्निधानादिति** । मूलस्य प्रामाण्यसमर्पकविद्यापद-सन्निधानादित्यर्थः । **शब्दान्तरेति** मूलस्य सामान्यविशेषरूपयोः परविद्याशब्दयोः समभिव्याहारेत्यर्थः । **विशेषार्थस्येति** मूले प्रामाण्येनोत्तमत्वरूपेत्यर्थः । **अस्यैव ग्रहणे परिशेषसूचनादिति** सामान्यतो व्याख्यातम् । विशिष्यापि व्याख्यातुमाह **एतदतिरिक्तमिति** । इदमेवेत्युक्तम् । अतिरिक्तमेव किं न स्यात् इत्यतः एतदतिरिक्तं परविद्यात्वेन विवक्षितं भवेदिति **योज्यम्** । **निर्णेतव्येतिहासादीति** । निर्णेतव्यत्वं उपलक्ष्यतावच्छेदकं शक्यलक्ष्यसाधारणो धर्म इति भावः । **आद्याविति** । पूर्वविकल्पे ऋगादिकमित्याद्यः द्वितीये विकल्पे निर्णेतव्यमितिहासादिकमित्याद्यपक्षः तौ निराचष्टे इत्यर्थः । **द्वितीयमिति** । निर्णायकम् । धर्मदेवमीमांसारूपमिति द्वितीयमित्यर्थः । **अन्यस्येत्येव** मूलपाठेऽपि प्रवृत्तानुगुणतयाऽन्यस्य चेति चकाराद्यर्थान्तर्भविन योज्यमित्याशयेन प्रतीकोपादाने चकारस्याधिकस्योपादानप्रसङ्गादित्येतत् अप्रसक्तेरिति योजयन् तदुपपादयति **स ब्रह्मविद्या-मितीति** । अप्रसङ्गपदमप्राप्तिपरतया योजयंस्तत्र पराक्षिप्तप्रमेयस्य एवाप्रयोजकत्वं परिहरन् हेतुत्वमाह **सर्वनिर्णे-तव्येति** । सूत्रेषु येषु सर्वेऽपि । 'शब्दजातस्य सर्वस्य यत् प्रमाणश्च निर्णयः' इत्युक्तेः सर्वाणि यानि निर्णेतव्यानि शास्त्राणि तन्निर्णायकस्येत्यर्थः । **एतदेकदेशेति** । निर्णेतव्यशास्त्रैकदेशप्रतिपाद्यव्याख्यानरूपयोरित्यर्थः । न केवलं एकदेशप्रतिपाद्यत्वं किन्तु अमुख्यप्रतिपाद्यत्वमपि धर्मदिस्तधाविधत्वात् इत्याशयेनामुख्यत्वकीर्तनम् । तद्व्या-ख्यानत्वं च तत्परतया वाक्यव्याख्यानत्वमेवेति ज्ञेयम् । **अन्यस्य** इत्येतदेव मूलं तृतीयनिरासेऽपि व्यापारयितुं तत्सूचितनिरासकयुक्तिमाह **बौद्धादेरिति** । **बौद्धादिग्रन्थस्य** वेदादिविरुद्धस्य यथार्थज्ञानसाधनत्वरूपशास्त्रत्वस्य अयोगात् शास्त्रपदेन तन्निरास इत्यर्थः । **परिशेष्यस्येति** । ब्रह्ममीमांसाशास्त्रस्य परिशेषेणोत्तमशास्त्रप्रतिपादनात्-तच्छास्त्रं परिशेष्यं परिशेषेण प्राप्तं तस्येत्यर्थः । **तत्प्रयोजकं अनुत्तमत्वप्रयोजकमित्यर्थः** । मूले तु शब्दो विशेषार्थः । तेनानुग्राहकत्वं अन्यत्र नेति सूचितम् ।

स०ब्र०— ब्रह्मसूत्राणां परविद्यात्वेन सर्वोत्तमप्रामाण्यं वक्तुं विद्यायास्तावत्प्रामाण्यमाह इदमुक्तमिति ॥ ननु यथास्थिततत्त्वप्रतिपादकं हि शास्त्रम्। तदेव प्रमाणम्। न चेयं विद्याशास्त्ररूपा; यतस्तस्याः प्रामाण्यं स्यादित्यत आह सा तावदिति। शास्त्रशब्दार्थस्याभावे सति न प्रकरणमात्रात् मुख्यशास्त्रतेत्याशङ्क्य 'परमे'त्याद्युक्तम् ॥ विपक्षे बाधकमाह अन्यथेति। सकृच्छ्रुतस्य विद्याशब्दस्य अपरविद्यायां शास्त्रपरत्वं, न परविद्यायामिति वैरूप्यं स्यादित्यर्थः ॥ किमतो यद्येवमित्यत आह शास्त्रं चेति। यदि शास्त्रत्वेऽप्यप्रामाण्यं तर्हि ऋगादीनामपि प्रामाण्यं न स्यादिति भावः ॥ ननु सर्वोत्तमत्वं कथं सिद्ध्येत्? परशब्दादिति चेत् न, तस्यानेकार्थत्वादित्युक्तं तत्राह तस्य चेति। अपरप्रतियोगित्वेन परत्वोक्तेः अन्यार्थत्वेऽर्थाभेदाद्भेदव्यपदेशो न स्यात् ॥ अपरशब्दस्याधर्मार्थत्वे परशब्दस्य निरतिशयार्थत्वमेव सिद्ध्यतीत्यर्थः ॥ साधारणशब्दस्य समभिव्याहारादर्थविशेषनिष्ठत्वं दृष्टान्तः तद्यथेति ॥ ननु 'द्वे विद्ये' इति श्रुतौ परविद्या श्रूयताम्। तस्याश्च विद्याशब्दादर्थविवक्षापूर्वकत्वं यथार्थत्वं चास्तु। शास्त्रत्वाच्च प्रामाण्यम्। तस्य परशब्दादुत्कृष्टत्वम्। ब्रह्मसूत्राणां किमायातमित्याशङ्क्य ऋगादिशास्त्राणां अपरविद्यात्वात् ब्रह्मावगतिकारणत्वेन तेषामेव परविद्यात्वे सर्वोत्कृष्टप्रामाण्यं लब्धमित्याह तत्रेति ॥ ननु धर्मसूत्राणामपि वेदानुग्राहकत्वात्परविद्यात्वं स्यादिति चेत्तेषां ब्रह्मज्ञानार्थधर्मप्रतिपादकत्वेन अक्षराधिगतिकारणत्वाभावादित्याह अन्यस्येति ॥ ननु धर्मसूत्राणां कर्मप्रतिपादकत्वात्कर्मणां ब्रह्मज्ञानार्थत्वात् परम्परया तदस्तीत्यत आह परत्वेति ॥ ननु कथं ब्रह्मसूत्राणां साक्षात्परत्वं वेदद्वारत्वादित्यत आह संभवति त्विति। वेदद्वारा ब्रह्मावगतिहेतुत्वेऽपि साक्षाद्ब्रह्मावगतिहेतुभूतवेदानुग्राहकत्वात् परत्वमित्यर्थः ॥

कुण्डल०— ननु श्रौतपरविद्याशब्दस्योत्तमशास्त्रपरतया व्याख्यानं न संभवति नियामकाभावात्। भावे वा कथमस्य ब्रह्मसूत्रविषयत्वमित्यत आह इदमुक्तं भवतीति। तत्रेति। तत्रापरा ये वेदा यान्यङ्गानीत्यादिनेत्यर्थः। अन्यथेति। विद्याशब्दस्य शास्त्रादन्यार्थकत्वे वेदादौ यथार्थज्ञानसाधनत्वं नाटकादौ अवगतिमात्रसाधनत्वं विषहरमन्त्रादावन्यदेवेत्यनेकार्थकल्पनाप्रसङ्गः। चशब्दाद्वेदादिप्रकरणानानुगुण्यं अक्षरावगतिकरणत्वरूपलिङ्गविरोधश्च स्यादित्यर्थः। उक्तरीत्या प्रकृते विद्याशब्दस्य शास्त्रवाचित्वनिश्चयेन विद्याशब्दशास्त्रशब्दयोः पर्यायत्वाद्विद्या अप्रमाणमितिशङ्का व्याहतैवेत्याह शास्त्रं चेति। विप्रविरुद्धमित्यर्थः। तथाच यथाकथञ्चिद्विद्याशब्दस्य विषहरमन्त्रादौ प्रयोगमात्रेण विद्याशब्दितस्य याथार्थ्यावगतिसाधनरूपशास्त्रस्य अप्रामाण्यशङ्का व्याहतेत्यर्थः। परशब्दस्यानेकार्थत्वात्तेनोत्तमत्वस्य कथं सिद्धिरिति चोद्यं परिहरति तस्य च परत्वं नामेत्यादिना। सन्निधानादिति। द्वे विद्ये वेदितव्ये इति श्रुतौ ये वेदा यान्यङ्गानि साऽपरेत्यादि प्रमाणभूतवेदादिशब्दसन्निधानादित्यर्थः। सामान्येति। उक्तरीत्या अनेकार्थत्वेन सामान्यशब्दरूपपरशब्देनापि इत्यर्थः। ननु शब्दप्रमाणेषु उत्तमं शास्त्रं ब्रह्मसूत्रमेवेति निर्धारणं न संभवति ऋगादीनां सद्भावात् इत्यत आह निर्णेतव्यार्थानामिति। ब्रह्ममीमांसा निर्णेतव्यार्थानामित्यर्थः। अन्यस्येति। नाटकादेः प्रमाणत्वेनाप्रसक्तेरित्यर्थः। नन्वथ परा यया तदक्षरमधिगम्यत इति श्रुत्युक्तस्याक्षरावगतिसाधनत्वस्य ऋगादिसाधारण्यात्कथं अस्यैव परत्वमित्यत आह संभवतीति।

विद्व०— परशब्दस्यानेकार्थत्वेनेत्यादिशङ्कायाः परविद्येत्यस्योत्तमं शास्त्रं इति व्याख्यानेन कथं परिहारो लब्ध इत्यत आह इदमुक्तं भवतीति । तत्रापरेत्यादिनेति । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरण छन्दो निरुक्तं ज्योतिषमित्यनेनेत्यर्थः । वेदादीत्यादिशब्देनाङ्गशास्त्रग्रहणम् । लिङ्गाच्चेति । यया तदक्षरमधिगम्यत इत्युक्ताक्षरशब्दोक्तभगवत्तत्त्वज्ञानकरणत्वस्य शास्त्रैकनिष्ठत्वेन मन्त्रादावसंभवादिति भावः । अन्यथेति । अथ परेत्युक्तपरविद्यापदस्य शास्त्रपरत्वमगृहीत्वा विषहरमन्त्रपरत्वाङ्गीकारे द्वे विद्ये इति सकृच्छ्रुत-विद्याशब्दस्य सामवेदविषहरमन्त्ररूपानेकार्थतापसङ्गाच्चेति भावः । अस्तु परविद्यापदोक्तं शास्त्रं तस्य प्रामाण्यं कुत इत्यत आह शास्त्रं चेति । तथाप्यनुत्तमत्वं प्रामाण्यस्य कुत इत्यत आह तस्य चेति । अन्यत् भिन्नत्वादिरूपं परत्वं न संभवति । भावप्रधानो वा निर्देशः । अन्यत्वं परशब्दार्थ इति न संभवति तथात्वेऽपरत्वस्यानन्यत्वापत्त्या ऋग्वेदो यजुर्वेदो इत्यादि पृथक् निर्देशरूपे भेदव्यपदेशो बाधितः स्यात् । अतोऽपरत्वमधमत्वं तत्प्रतियोगिकं च परत्वमुत्तमत्वमेव वक्तव्यमिति भावः । अस्तु परशब्दादनुत्तमत्वप्राप्तिः तथापि तत्परत्वं प्रमाणत्वेनैवेति कुत इत्यत उक्तरीत्या प्रामाण्यज्ञापकविद्यापदसन्निधानादित्याह तदपीति । सामान्यशब्दस्येति । अनेकप्रकारेण संभवात् उत्तमत्वार्थकशब्दस्य प्रमाणत्वेनोत्तमत्वरूपविशेषार्थस्य कल्पनीयत्वादित्यर्थः । अन्यस्येति धर्ममीमांसाया इत्यर्थः । स ब्रह्म विविदिषुरित्याद्युपक्रमस्य तद्बाधकत्वादिति भावः ।

चक्रः— शब्दान्तरसमभिव्याहारेति । विद्याशब्दसमभिव्याहारेत्यर्थः ॥ सामान्यशब्दस्य इति । उत्तमत्वरूपसामान्यधर्मावच्छिन्ननिरूपितशक्तिकस्येत्यर्थः ॥ विशेषार्थकत्वस्येति । स्वसमभिव्याहृतपदार्थतावच्छेदकावच्छिन्नव्युत्पत्त्यन्तराबाधितत्वविशेषितोत्तमत्वरूपविशेषधर्मावच्छिन्ननिरूपकताकलक्षणोपगमादित्यर्थः ॥ अन्यस्य धर्ममीमांसादेः ।

काशी०— नन्वनुत्तमं शास्त्रमिति स्वव्याख्यानेनैव कथमस्य सर्वोत्तमप्रामाण्यसिद्धिरत आह इदमुक्तं भवतीति । विद्याशब्दस्य शास्त्रपरत्वे सिद्धे तद्विशेषणभूतपरशब्दस्य प्रमाणत्वेनोत्तमत्वमर्थः स्यादतो विद्याशब्दस्य शास्त्रपरत्वं प्रकरणादिबलात्सामर्थ्यितुं प्रकरणादिकं तावदाह द्वे विद्ये इति । इत्यादिनेति । ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति वाक्येनेत्यर्थः । अपरविद्यात्वेन अपरशब्दार्थविशेषितशास्त्रत्वेन । परा विद्येति । परशब्दार्थविशेषितविद्याशब्दार्थ इत्यर्थः । वेदादीत्यादिना तदङ्गसङ्ग्रहः । नन्वथशब्दाच्छास्त्रप्रकरणं विच्छिन्नमत आह परमेति । अत्र परतत्त्ववेदकत्वाद्विद्यायाः परत्व-मित्येतत्सूचयितुमक्षरात्परतः पर इति वाक्यशेषोक्तपरमत्वोक्तिः । शास्त्रमेवेति । न तु मन्त्रमात्रमित्येवार्थः । विपक्षे बाधकमप्याह अन्यथेति । अर्थविवक्षारहितमन्त्रस्य परविद्याशब्दार्थत्व इत्यर्थः । अनेकार्थत्वेति । योगरूढ्या शास्त्रपरत्वस्य गौण्या वृत्त्या तदन्यपरत्वस्य च कल्पनाप्रसङ्गादित्यर्थः । न च रूढ्यैवोभयपरत्वम् । विद्याशब्दस्य शास्त्रतदन्यमन्त्रादिसाधारणरूढिसद्भावे प्रमाणाभावादिति भावः । परिमळे त्वन्यथेत्येतत्परविद्याशब्दस्य ज्ञानार्थत्व इति व्याख्यातम् । अपरोक्षज्ञानार्थत्व इति तदर्थः । उत्तरत्र तु वेदादिजन्यपरोक्षज्ञानस्य परविद्यात्वं निराकार्यमिति न पौनरुक्त्यम् । अथ द्वे विद्ये इत्यत्र विद्याशब्दद्वयस्यैकशेषाश्रयणाच्च सकृदुक्तविद्याशब्दस्यानेकार्थत्वप्रसङ्गः । न च

सरूपैकशेषानभ्युपगमाभिप्रायेणैतद्दोषदानमिति वाच्यम् । तत्पक्षे सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति नियमानभ्युपगमेनेष्टापत्तिसंभवात् । अन्यथा द्वे ब्रह्मणी इत्यादौ परापरब्रह्मणोर्हरीहरय इत्यादाविन्द्रोपेन्द्रादीनां च प्रतीत्यनुपपत्तेः । न च सकृदित्यादेर्गौणमुख्यवृत्तिभ्यामेकस्यानेकार्थगमकत्वं नास्तीत्यर्थः । द्वे ब्रह्मणी इत्यादौ च मुख्यवृत्त्यैवानेकार्थगमकत्वान्न दोष इति वाच्यम् । विद्याशब्दस्य मुख्यवृत्त्यैव शास्त्रतज्जन्यज्ञानोभयपरत्वसंभवेनाग्रे तन्निरासानुपपत्तेः । मैवम् । नात्रैकस्यानेकार्थत्वमसंभवीत्यभिप्रायः । किन्तु सकृदुक्तविद्याशब्दस्य संभवत्येकार्थत्वे वृत्तिद्वयेनानेकार्थत्वं गौरवादयुक्तमिति । न च तथाऽप्युक्तरूढिमात्रेण याथार्थ्यप्रकारेण शास्त्रतज्जन्यज्ञानोभयपरत्व-संभवादग्रे तन्निराकरणानुपपत्तिरिति वाच्यम् । इच्छादौ विद्याशब्दप्रयोगाभावेन पूर्वोक्तरूढिमात्रेण तस्याबोधकत्वात् पूर्वोक्तद्वितीयकल्पे शङ्कानवकाशाच्चेति ध्येयम् । नन्वस्तु शास्त्रमेव विद्याशब्दार्थः । तथाऽपि कथमप्रामाण्यशङ्का-निरास इति मन्दाशङ्कायामाह **शास्त्रं चेति** । विद्याशब्दाद्यथार्थज्ञानसाधनत्वघटितशास्त्रत्वप्रतीतावप्रामाण्यशङ्का व्याहतैवेत्यर्थः । परशब्दस्यान्यार्थत्वशङ्कानिरासार्थमनुत्तममिति व्याख्यातम् । तदुपपादयति **तस्य चेति** । परत्वं परशब्दार्थभूतं विशेषणम् । **अन्यत् अन्यत्वादि । न संभवतीति** । यदि परत्वमन्यत्वरूपं तर्ह्यपरत्वमनन्यत्वरूपमेव स्यात् । तथा च ऋगादीनामेतदनन्यत्वस्यापरशब्देनोक्तत्वात्तदन्यत्वमेतच्छास्त्रस्येति व्याहतम् । यदि परत्वं पूर्वत्वादिरूपं तदाऽप्यसंभवि । ऋगाद्यपेक्षया पूर्वत्वायोगात् । यद्यपि विष्णुवाचकत्वविशिष्टवेदादिरूपपरविद्याया-स्तदवाचकत्वविशिष्टवेदादिरूपा परविद्यापेक्षया पूर्वत्वमस्त्येव । 'मन्त्रेषु कर्माणि कवयो यान्यपश्यन् तानि त्रेतायां बहुधा सन्ततानी'ति श्रुत्या 'कृते भागवताः सर्वे वेदाश्च पुरुषास्तथा । त्रेतायां भिन्नविषया' इत्यादिस्मृत्या च तदव-गमात् । तथाऽपि न कृत्स्नपरविद्यायाः पूर्वत्वसंभवः । अनुग्राह्यैकतच्छास्त्रस्यातथात्वादित्याशयः । **अनुत्तमत्वमेवेति** । यद्यपि परशब्द उत्तममात्रवाची । तथाऽपि ऋगादिसकलविद्यानामपरत्वेनोक्तत्वादनुत्तमत्व एव पर्यवस्यतीति भावः । कथमेतावता सर्वोत्तमप्रामाण्यसिद्धिरत आह **तदपीति । सन्निधानात्** विद्याशब्दसमभिव्याहारात् । **प्रमाणत्वेनैवेति** । प्रमाणत्वातिशयप्रयुक्तमेवेत्यर्थः । विद्याशब्दसन्निधानेऽपि कथमुक्तार्थलाभ इत्यत आह **शब्दान्तरेति** । अयमर्थः । अयं परमधार्मिक इत्युक्ते धनादिना परमत्वस्य किञ्चिद्धार्मिकत्वस्य चाप्रतीतेः । सातिशयधर्मबोधकशब्दान्तरसमभि-व्याहृतोत्कृष्टार्थकशब्दास्यान्वयितावच्छेदकधर्मातिशयप्रयुक्तोत्कर्षबोधकत्वव्युत्पत्तिरङ्गीकार्या । उत्तमः पट इत्यादौ पटत्वातिशयाबोधात्सातिशयेत्यादि । तथा च परमधार्मिक इत्यादौ परमशब्दाद्धार्मिकान्तरावधिकधर्मातिशयप्रयुक्त-श्रैष्ठ्यवत्परविद्येत्यत्र परशब्दाद्विद्यान्तरावधिकप्रामाण्यातिशयप्रयुक्तश्रैष्ठ्यस्यैव बोधः । प्रामाण्यस्य सातिशयत्वं तु वक्ष्यते । न च धर्मातिशयातिरिक्तस्य धर्मिश्रैष्ठ्यस्याभावात्कथमस्य तत्प्रयुक्तत्वमिति शङ्क्यम् । धर्मधर्मस्य धर्मिधर्मत्वानुपपत्तेः । तदतिरिक्तस्यान्ततोऽतिशयविशिष्टधर्मवत्त्वादिरूपस्य धर्मिश्रैष्ठ्यस्य वक्तव्यत्वात् । किञ्चेत्युक्त-दोषं निराह **तच्चेति** । परविद्यापदोक्तमित्यर्थः । **इदं ब्रह्ममीमांसाशास्त्रम् । एवकार्यवच्छेद्यं स्फुटयन्नुक्तमुपपादयति निर्णेतव्यार्थानामिति** । एतच्छास्त्रेण विष्णुपरत्वेनानिर्णीतापन्नानामित्यर्थः । पुराणादिग्रहणार्थमुपलक्षितानामित्युक्तम् । **अन्यस्येति** । एतच्छास्त्रान्यस्यार्थकामादिशास्त्रस्य स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामित्युपक्रान्तब्रह्म-विद्यातत्प्रतिष्ठाप्यबहिर्भूतत्वेनाप्रसक्तत्वादित्यर्थः । ननु कथमन्यस्याप्रसङ्गः । कर्मतन्त्रस्य ब्रह्मविद्याप्रतिष्ठाप्यत्वेन प्रसक्तत्वादत आह **परत्वेति** । **विद्यान्तरप्रतिष्ठाप्यस्य** विद्योत्तमत्वासंभवादित्यर्थः । परिमळे त्वन्यस्य

कर्मतन्त्रादेरप्रसङ्गादक्षराख्यब्रह्मप्रतिपादकत्वादिति भावः । **परत्वेति** । मुक्तिहेतुज्ञानाजनकत्वादिति भाव इति व्याख्यातम् । ननु ब्रह्मतन्त्रस्यापि कथमुत्तमत्वमक्षराधिगत्यकरणत्वादित्यत आह **संभवतीति** । तदकरणत्वेऽपि तदितिकर्तव्यतारूपत्वात्परत्वमुपपद्यत इत्यर्थः ।

गूढ०— ननु परविद्याख्यया कथं सर्वोत्तमप्रामाण्यसिद्धिरित्युक्ते अनुत्तमं शास्त्रमिति पर्यायशब्द-प्रयोगकरणमयुक्तम् । सर्वोत्तमप्रामाण्यानुपपादकत्वात् । किञ्च विद्याशब्देन शास्त्रस्य परशब्देनोत्तमत्वस्य च ग्रहणमयुक्तम् । हेत्वभावादित्यत आह **इदमुक्तं भवतीति** । तत्र परविद्याशब्देन न शास्त्रातिरिक्तग्रहणं किन्तु शास्त्रस्यैवेत्याह **सा चेति** । यया तदक्षरमिति तृतीययोक्ताक्षराधिगतिकरणत्वस्य शास्त्रातिरिक्तेऽसंभवादिति भावः । **अन्यथेति** । शास्त्रातिरिक्तस्यैव परविद्याशब्देन ग्रहण इत्यर्थः । द्वे विद्ये वेदितव्ये इत्यत्र सकृच्छ्रुतस्य विद्याशब्दस्य तत्रापरेत्यत्र वेदादिशास्त्रपरत्वम् । अथ परेत्यत्र शास्त्रातिरिक्तपरत्वमित्यनेकार्थत्वकल्पनेऽतिगौरवं स्यादित्यर्थः । नन्वस्त्वेतावता विद्याशब्देन शास्त्रं तथापि तस्य प्रामाण्यं कुत इत्यत आह **शास्त्रं चेति** । तत्त्वभूतार्थविषयक-यथार्थज्ञानकरणवाक्यसमूहस्यैव शास्त्रशब्दार्थत्वेन शास्त्रशब्देनैव प्रामाण्यस्य लब्धत्वाच्छास्त्रमप्रमाणमित्युक्ते व्याघात इत्यर्थः । परशब्दस्य भिन्नत्वार्थत्वे अपरत्वेन साङ्कर्यं स्यात् । अत आह **तस्येति** । शास्त्रस्येत्यर्थः । तथाप्युत्तमत्वस्य प्रकारान्तरेणापि संभवान्न **सर्वोत्तमप्रामाण्यसिद्धिरित्यत** आह **तदपीति** । सन्निधानात् शास्त्रशब्द-सन्निधानादित्यर्थः । तथापि **सामान्यस्य** परशब्दस्य कथं **शास्त्रान्तरापेक्षयोत्तमत्वरूपविशेषार्थत्वमित्यत** आह **शब्दान्तरेति** । शास्त्रशब्दरूपशब्दान्तरसमभिव्याहारेणेत्यर्थः । सामान्यशब्दस्य विशेषार्थपरत्वं शब्दान्तरसमभि-व्याहारेण क्व दृष्टमित्यत आह **तद्यथेति** । नन्वस्तु परविद्याशब्देन सर्वोत्तमप्रामाण्यलाभस्तथापि परविद्याख्या सूत्राणामेव कुतः । ऋगादेरेव किं न स्यादित्यत आह **तच्चेति** । अत्र हेतुमाह **निर्णेतव्यार्थानामिति** । ऋगादिपद-वाच्यानामपरविद्यात्वेनोक्तत्वादित्येवोक्ते भारतादेः ऋगादिपदवाच्यत्वाभावात् परविद्यात्वं स्यादिति ऋगादिपदोप-लक्षितानामित्युक्तम् । ननूपलक्ष्यतावच्छेदकाभावान्नोपलक्षणं संभवतीत्यत उक्तं **निर्णेतव्यार्थानामिति** । तथाच काकेभ्यो दधि रक्ष्यतामित्यत्र दध्युपघातकत्वरूपोपलक्ष्यतावच्छेदकैक्यस्य मार्जालादिष्वपि सत्त्वेन काकशब्देन मार्जालाद्युपलक्षणवदत्रापि निर्णेतव्यार्थत्वरूपोपलक्ष्यतावच्छेदकस्य ऋगादौ भारतादौ च सत्त्वादुपलक्ष्यतावच्छेद-कैक्यादुपलक्षणं युक्तमिति भावः । तथाप्यपौरुषेयस्य ऋगादेरपरविद्यात्वं पौरुषेयब्रह्मसूत्राणां परविद्यात्वं कथं घटत इत्यतोऽप्युक्तं **निर्णेतव्यार्थानामिति** । तथाच वेदस्य **निर्णेतव्यार्थत्वाद्** ब्रह्मसूत्राणां च निर्णीतार्थत्वेन व्याख्यानरूपत्वाद् व्याख्यानव्याख्येययोर्मध्ये व्याख्यानं प्रबलमिति न्यायेन ब्रह्मसूत्राणां प्रबलत्वेन परविद्यात्वम् । ऋगादीनां तु व्याख्येयत्वेनापरविद्यात्वमिति भावः । तर्ह्यस्तु ऋगाद्यतिरिक्तस्य परविद्याशब्दार्थत्वमित्यत आह **अन्यस्येति** । **अप्रसङ्गात्** परविद्याशब्दार्थत्वप्रसङ्गाभावात् । किञ्चान्यस्य परत्वासंभवाच्च न परविद्याशब्दार्थत्व-मित्याह **परत्वासंभवाच्चेति** । ननु ऋगादिवेदस्यापि परत्वासंभवान्न परविद्याशब्दार्थत्वमित्याशङ्क्याह **संभवतीति** । ऋगादीनामिति शेषः ।

प्रदीपः— आक्षिप्यात्रेत्यादिना समाधीयत इति **ब्रह्मसूत्राणां** परविद्यात्वेन सर्वोत्तमप्रामाण्यं वक्तुं परविद्यायास्तावत्प्रामाण्यमाह **इदमुक्तमिति** । ननु यथावस्थिततत्त्वप्रतिपादकं हि शास्त्रं तदेव प्रमाणं न चेयं

विद्याशास्त्ररूपा यतस्तस्याः प्रामाण्यं स्यादित्यत आह **सा तावदिति** । शास्त्रशब्दार्थाभावेन प्रकरणमात्रान्मुख्यशास्त्रतेत्याशङ्क्य परमेत्याद्युक्तविपक्षे बाधकमाह **अन्यथेति**। सकृच्छ्रुतस्य विद्याशब्दस्यापरविद्यया शास्त्रपरत्वं न परविद्यायामिति वैरूप्यं स्यादित्यर्थः। किमतो यत्रेवमित्यत आह **शास्त्रं चेति**। यदि शास्त्रत्वेऽप्यप्रामाण्यं तर्हि ऋगादीनामपि प्रामाण्यं न स्यादिति भावः। ननु सर्वोत्तमत्वं कथं सिद्धचेत् परशब्दादिति चेन्न। तस्यानेकार्थत्वादित्युक्तत्वादित्यत आह **तस्य चेति**।

३५ सु०— एतेन 'उपनिषदः परविद्ये'ति व्याख्यानमपि परास्तम् । ऋगादिग्रहणेन तासामपि गृहीतत्वात्। ब्राह्मणपरिव्राजकन्यायश्च अगतिका गतिः।

परि०— मायावाद्युक्तं निराह **एतेनेति**। **ब्राह्मणा आगताः परिव्राजकाश्चागता इतिवत्स्यादित्यत आह ब्राह्मणेति**। **अगतिकेति भिन्नं पदम्**।

वं०प०— **अगतिका गतिरिति भिन्नं पदम्**।

आनन्दः— एतेनेत्यतिदेशार्थमाह **ऋगादीति**। **सङ्कोचे कारणाभावादिति** भावः। ननु ब्राह्मणः भोज्यन्तां परिव्राजकाश्चेत्यत्र ब्राह्मणशब्देन परिव्राजकानां ग्रहणेऽपि **परिव्राजकाश्च** इति पृथगुक्तिवदत्रापि ऋगादिग्रहणेनोपनिषदां ग्रहणेऽपि अस्तु पृथगुक्तिरित्यत आह **ब्राह्मणेति**। असति हि गत्यन्तरे एतन्न्यायाश्रयणम्। प्रकृते चोक्तरीत्यान्यत्रैव गत्यन्तरमिति भावः।

कं०रा०— ननु ऋगादिपदेन ब्राह्मणपरिव्राजकन्यायेन उपनिषद्व्यतिरिक्तानामेव ऋगादीनां ग्रहणान्नोक्तदोष इत्यत आह **ब्राह्मणेति**।

श्रीनिधि०— **परविद्या इत्यत्र विद्याशब्देनेति ज्ञेयम्** ।

वा०चं०— उक्तन्यायं स्वोक्तप्रसक्तप्रतिषेधविरोध्यपव्याख्याननिरासेऽपि अतिदिशति **एतेनेति**। 'सर्वे वेदा यत्पदमामनन्ति', 'वेदैश्च सर्वैरहमेव वेद्य' इत्यादिश्रुतिस्मृतिभिर्ऋगादीनामुपनिषदां च ब्रह्मपरत्वावगमात् उपनिषत्स्वपि ज्ञेयशुद्धब्रह्मविषयाणामुपासनादिवाक्यानां बहूनां, मन्त्रेष्वपि ज्योतिराद्यधिकरणोक्तन्यायेन ब्रह्मपरभागस्य च दर्शनाच्चाविशेषादुपनिषदामृगादिभ्यः पृथक्करणं न युक्तमित्यभिप्रेत्य आह **ऋगादीति** ॥ ननु तथाऽपि ब्राह्मणपरिव्राजकन्यायेनोपनिषदां पृथक्करणं किं न स्यादित्यतः अस्मदुक्तरीत्या सति गत्यन्तरे ब्राह्मणपरिव्राजकन्यायमनुसृत्य 'रूपं द्विविधं, नीलमनीलं चे'त्यादिवत् 'द्वे विद्ये वेदितव्ये, परा चैवापरा चे'त्यत्र पराशरशब्दयोर्विरुद्धार्थत्वप्रतीतेरपह्नवो न युक्त इति आह **ब्राह्मणेति**। गत्यन्तररहिता गमनिकेत्यर्थः।

वा०र०— स्वोक्तेति। ब्रह्ममीमांसातिरिक्तानां ऋगादिरूपाणां प्रतिषेधः स्वयं कृतः। उपनिषदः परविद्येति व्याख्यानं तद्विरोधीत्यर्थः। अदृश्यत्वं नयचन्द्रिकोक्तप्रकारेणाह **सर्वे वेदा इति।** मन्त्रादिषु शुद्धब्रह्मविषयकवाक्यानां सत्त्वात् न तेषां उपनिषत्साम्यमित्यतः किं सादृश्यभागस्यापि तेषु सत्त्वमित्यभिप्रेतमुत तथाविधानामेव वाक्यानां तत्र सत्त्वमिति विकल्पद्वयं मनसि निधाय। **नाद्यः।** तथा सति उपनिषत्स्वपि शुद्धब्रह्मविषयकभागसत्त्वात् न ऋगादिभ्यः पृथक् करणं संभवतीत्याह **उपनिषत्स्वपीति।** न द्वितीयः तस्यासिद्धेः इत्याह **मन्त्रेष्वपीति।** मन्त्रादिष्वपीत्यर्थः। **अविशेषादिति।** उपनिषदादिमन्त्रेभ्यो विशेषाभावात् अपरविद्याकोट्यन्तर्भूतानां पृथक्करणं न युक्तमित्यर्थः। **ब्राह्मणपरिव्राजकन्यायेनेति।** 'कुरुपाण्डववत् तेषां उपपत्तेः पृथक् वचः' इति भक्तिपादीयानुभाष्यमूले यथा पाण्डवानां कुरुत्वेऽपि सामान्यविशेषापेक्षया 'सन्तानबीजं कुरुपाण्डवानामि'त्यादौ कुरुभ्यः पृथक् वचनमित्येवोक्ता-वपि पाण्डवानां कुर्वन्तर्भेदत्वेन तद्विशेषतया कुरुपाण्डवानां साक्षात् ऐक्याभावात् कौरवपदेन पाण्डवातिरिक्तानां ग्रहणात् पृथगुक्तिर्युक्तेति तत्र विवक्षितम्। अत एव गीतातात्पर्यटीकायां पाण्डवानां कुर्ववान्तरभेदत्वेन कुरुपाण्डवानां साक्षात् ऐक्याभावादिति। वियोगोपन्यासश्च इति एक एवार्थः अपि तु न्यासो योगोऽवान्तरभेदः। अतः कुरुपाण्डववत् पृथगुक्तिरिति चोक्तम्। मानलक्षणटीकायामपि यथा खलु पाण्डवानां कौरवान्तर्भविऽपि कौरवेभ्यः पृथगुक्तिः कौरवविशेषत्वेन साक्षात् एकत्वाभावेन कौरवपदेन तदतिरिक्तग्रहणादित्युक्तम्। तथा च प्रकृतेऽपि परिव्राजकानां ब्राह्मणान्तर्भूतत्वेऽपि ब्राह्मणावान्तरभेदत्वेन ब्राह्मणविशेषतया ब्राह्मणानां परिव्राजकानां साक्षात् एकत्वाभावेन ब्राह्मणपदेन परिव्राजकातिरिक्तग्रहणमिति सिद्धचा तन्न्यायेनोपनिषदां ऋगाद्यन्तर्भूतानामपि ऋगाद्यवान्तरविशेषतया ऋगादिपदेनोपनिषदतिरिक्तग्रहणात् पृथक्करणं युक्तमित्यर्थः। सति गत्यन्तरे ब्राह्मणपरिव्राजकन्यायमासृज्य द्वे विद्ये इत्यादि योज्यम्। तत् प्रतीतेरपह्नवे बाधकं वक्तुमुक्तरूपं द्विविधमित्यादि। इत्यादौ यथा नीलानीलशब्दयोः विरुद्धार्थत्वप्रतीतेरपह्नवो न युक्त इति सप्तम्यर्थे वतिः इत्यादौ नीलानीलशब्दयोर्विरुद्धार्थप्रतीतिवत् जायमानायाः इति विरुद्धार्थत्वप्रतीतेरेव विशेषणमिति वा। तृतीयाध्यायीयाध्याहारस्तु अगतिका गतिः इति। गीताभाष्य-व्याख्यानानुसारेणाह **गत्यन्तरेति।**

स०व्र०— एतेनेति। ऋगादिग्रहणेनोपनिषदामपि ग्रहणात्। गतिसंभवे गोबलीवर्दन्यायानुपपत्तेः। उप-निषदां कर्मापेक्षितकर्तृप्रतिपादकत्वपक्षे ब्रह्मज्ञानसाधनत्वाभावात् परविद्यात्वाभावात्, ब्रह्मज्ञानसाधनत्वावलम्बनेन परविद्यात्वे ऋगादीनामपि तथात्वेन विभागायोगात् उपनिषदां ब्रह्मपरत्वमेव न कर्मापेक्षितकर्तृपरत्वमित्युक्ते ऋगादीनामपि ब्रह्मणि तात्पर्यं नान्यत्रेति तुल्यत्वात् उपनिषदां स्वरसतो ब्रह्मपरत्वं न तथा ऋगादीनामिति एतावान् विशेषः। तात्पर्यं तु सर्वेषां ब्रह्मण्येवेति नोपनिषन्मात्रस्य परविद्यात्वमित्यर्थः॥ एकस्मिन्वाक्ये शब्दार्थसङ्कोच-फलको गोबलीवर्दन्यायः॥ अनेकस्मिन्वाक्येऽनुष्ठानापवादफलकः सामान्यविशेषभावन्यायः। यथा न हिंस्यात् सर्वा भूतानीति सामान्यं अग्नीषोमीयं पशुमालभेतेति विशेषः।

कुण्डल०— व्याख्यानमिति। अथ परेत्यादुपनिषद्वाक्यस्थपरशब्दस्य परकृतं व्याख्यानमित्यर्थः। ननु ब्राह्मणान् परिव्राजकानानयेत्यादाविव सामान्यविशेषन्यायेन ये वेदा यान्यङ्गानीत्यत्रोपनिषद्व्यतिरिक्तवेदभागस्य ग्रहणम्। अथ परा यया तदक्षरमधिगम्यत इत्यत्रोपनिषद्भागस्य ग्रहणमित्यत आह **ब्राह्मणेति।**

काशी०— मायावाद्युक्तमपाकरोति एतेनेति। एतच्छास्त्रस्यैव परविद्यात्ववचनेनेत्यर्थः। एतदेव विशदयति ऋगादीति। ननु ब्राह्मणाः परिव्राजकाश्चागता इत्यादौ ब्राह्मणपदस्य लक्षणाया परिव्राजकान्यब्राह्मणपरत्ववत्प्रकृते ऋगादिपदस्योपनिषदन्यऋगादिपरत्वान्नोपनिषदामपरविद्यात्वप्राप्तिः अत आह ब्राह्मणेति। ब्राह्मणपरिव्राजकपदघटितवाक्यवत्सामान्यशब्दस्य विशेषलक्षणा चेत्यर्थः। अगतिका गतिः गत्यन्तररहिता गमनिका। प्रकृते चास्मदुक्तगत्यन्तरसत्त्वान्नेयं गतिर्युक्तेति भावः। अथ सिद्धान्तेऽप्यृगादिपदानामृगादिसामान्यपरत्वं न संभवति। 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्युपनिषदां पुरुषसूक्तादीनां चापरविद्यात्वाभावात्। उक्तं च पद्मिळे उपनिषदां विष्णववाचकत्वदशाया अभावादिति। न च तेषामपि परोक्तजीवैक्यपरत्वदशायामपरविद्यात्वसंभवः। तादृशदशायामतत्त्वावेदकत्वेन विद्यात्वस्यैवाभावात्। अतो लक्षणया विष्णववाचकविद्यात्वविशिष्टऋगादिपरत्वं वाच्यम्। तथा च विशेषाभावान्न परमतनिरासो युक्तः। परेणापि ब्रह्मकर्मविषयविद्ययोरेव परापरभावाङ्गीकारादिति चेत्। उच्यते। समस्तगुणपूर्णत्वादिरूपसर्वोत्कृष्टताविशिष्टविष्णुप्रतिपत्तिपरत्वेन ज्ञायमानत्वमेव हि विद्यायाः परत्वम्। तद्राहित्यमपरत्वम्। तच्च तार्किकादिरीत्याऽवाधितजीवभिन्नत्वादिमात्रविशिष्टेश्वरपरत्वेन ज्ञायमानोपनिषदादिसाधारणमिति। सिद्धान्ते ऋगादिपदानामृगादिसामान्यपरत्वेऽपि न दोषः। परमते च ब्रह्मविषयविद्यायाः कर्मविषयत्वाभावात्तदनुपपत्तिः। न चैवं यथा तदक्षरमधिगम्यत इति परशब्दव्याख्यानविरोध इति वाच्यम्। ययेत्यनेनापि तत्परत्वेन ज्ञायमानरूपत्वस्य करणेतिकर्तव्यतासाधारणसाधनस्यैव विवक्षितत्वात्। अन्यथा तत्कामाः कर्माण्याचरथ तदा साऽपि परविद्येत्याथर्वणभाष्ये परमात्मप्रीत्युद्देशमात्रेण कर्मविद्यायाः परविद्यात्वोक्तिविरोधात्। अधिकारिविशेषान्नेति साक्षादक्षराधिगतिकरणत्वं च सर्वविद्यानां वक्ष्यते।

गूढ०— एतेनेत्यतिदेशार्थमाह ऋगादीति। सङ्कोचे कारणाभावादिति भावः। ननु ब्राह्मणा भोज्यन्तां परिव्राजकाश्चेत्यत्र ब्राह्मणशब्देन परिव्राजकानां ग्रहणेऽपि परिव्राजका इति पृथगुक्तिवदत्रापि ऋगादिग्रहणेऽप्यस्तु पृथगुक्तिरित्यत आह ब्राह्मणेति। असति हि गत्यन्तरे एतन्न्यायाश्रयणम्। प्रकृते चोक्तरीत्याऽस्त्येव गत्यन्तरमिति भावः।

१६ सु०— 'तज्जन्यं ज्ञानं परविद्ये'त्यपि न युक्तम्। अधिगतिकरणत्वानुपपत्तेः। अनेकार्थताकल्पनापत्तेश्च।

परि०— रामानुजोक्तं निराह तज्जन्यमिति। ऋगादिजन्यं उपनिषज्जन्यं वा। अनेकार्थतेति। द्वे विद्ये इत्यत्र ऋगादिकं तज्जन्यज्ञानं चेत्यनेकार्थत्वं सकृच्छ्रुतविद्याशब्दस्येत्यर्थः।

यादु०— अनेकार्थताकल्पनेति। द्वे विद्ये इति सकृच्छ्रुतस्य विद्याशब्दस्य शब्दज्ञानरूपानेकार्थताकल्पनापत्तेरिति भावः।

वं०प०— तज्जन्यं ऋगादिजन्यम्, उपनिषज्जन्यं वा।

आनन्दः— परविद्याशब्देन ऋगादिजन्यं ज्ञानं परविद्येति कश्चित्, तदूषयति **तज्जन्यमिति**। यया तदक्षरमधिगम्यत इति तृतीययोक्ताधिगतिकरणत्वस्य ज्ञानेऽसंभवान्न तेन तद्ग्रहणं युक्तमित्याह **अधिगतीति**। ननु परविद्याशब्दोक्तश्रवणादिरूपज्ञानस्य साक्षात्काररूपाधिगतिकरणत्वं स्यादेवेति तत्राह **अनेकेति**।

कं०रा०— **अधिगतीति**। उपनिषजन्यज्ञानस्य अक्षरविषयाधिगतिरूपत्वेनाथ परा यया तदक्षरमधिगम्यत इत्युक्ताधिगतिकरणत्वानुपपत्तेर्नोपनिषजन्यज्ञानं परविद्याशब्दार्थ इत्यर्थः। ननु यया तदक्षरमधिगम्यत इत्यनेनाक्षरशब्दितब्रह्मप्राप्तिकरणत्वमेवोच्यते, तच्च ज्ञाने संभवतीति चेन्न। ऋगादीनां ज्ञानसाधनानां प्रकरणे यया तदक्षरमधिगम्यत इत्यस्य ज्ञानसाधनार्थत्वावश्यंभावात्। इयांस्तु विशेषः। परविद्यात्वेन गृहीतस्य शास्त्रस्य विष्णुज्ञानसाधनत्वमपरविद्यात्वेन गृहीतस्य ऋगादेस्तु विष्वन्यविषयज्ञानसाधनत्वमित्यनेकार्थतेति। 'द्वे विद्ये वेदितव्ये' इत्यत्र विद्याशब्दस्यापरविद्यात्वेन गृहीते वेदादौ यथार्थज्ञानसाधनत्वं प्रवृत्तिनिमित्तं, परविद्यात्वेन गृहीते तज्जन्यज्ञाने तु यथार्थज्ञानत्वं प्रवृत्तिनिमित्तमिति प्रवृत्तिनिमित्तभेदेन सकृत्प्रयुक्तविद्याशब्दस्यानेकार्थकत्वकल्पनापत्तेश्चेत्यर्थः।

वा०चं०— स्वपक्षसाधकत्वेनोक्तं लिङ्गमेवापव्याख्यानान्तरनिरासेऽपि व्यापारयति **अधीति**। न चाधिगम्यत इत्यस्य प्राप्यत इत्यर्थः। अधिपूर्वस्य गमेर्ज्ञानि प्रसिद्धेरिति भावः॥ अन्यथेत्युक्तबाधकमप्यपव्याख्याननिरासे व्यापारयति **अनेकेति**। सकृच्छ्रुतविद्याशब्दस्य इति शेषः।

वा०र०— **लिङ्गमेवेति**। अक्षराधिगतिकरणत्वरूपमित्यर्थः। **अन्यथेत्युक्तेति**। अन्यथा सकृत् श्रुतस्य इति प्रागुक्तबाधकमित्यर्थः। तद्बाधकस्यैव एतद्वाक्यात्लाभायाह **सकृदिति**। अपरा विद्येत्यत्र वेदनकरणस्य परविद्येत्यत्र वेदनस्य इत्यर्थद्वयाङ्गीकारकल्पनागौरवापत्तेः इति मूलार्थः।

स०व्र०— **तज्जन्यमिति**। ऋगादिजन्यज्ञानस्याधिगतित्वेन तत्कारणत्वायोगात्, सकृच्छ्रुतस्य विद्याशब्दस्य शब्दज्ञानविषयत्वेनानेकार्थत्वापत्तेर्न ज्ञानं **परविद्येति**॥

कुण्डल०— परकीयं व्याख्यानान्तरमपि निरस्यति **तज्जन्यस्येति**। **अनेकार्थतेति**। 'द्वे विद्ये वेदितव्ये' इत्यस्य विद्याशब्दस्य वेदादौ यथार्थज्ञानसाधनत्वं प्रवृत्तिनिमित्तं अथ परा ययेत्यत्र यथार्थज्ञानत्वं प्रवृत्तिनिमित्तमित्यनेकार्थकल्पनापत्तेरित्यर्थः।

विद्व०— **अधिगतिकरणत्वेति**। **यया तदक्षरमधिगम्यते इत्युक्तत्वादिति भावः**। **अनेकार्थतेति**। द्वे विद्ये इत्युक्तविद्याशब्दस्य तत्रापरेत्यत्र ऋगादिरूपकरणार्थत्वे अथ परेत्यत्र ज्ञानार्थत्वे अनेकार्थताकल्पनापत्तेरित्यर्थः।

काशी०— उक्तदोषवारणाय यत्परेषां निष्कृष्टव्याख्यानं तदपि निराचष्टे **तज्जन्यमिति**। उपनिषजन्यमित्यर्थः। ब्रह्मविषयमिति शेषः। एतेनेत्यनुषज्यते। तद्विवृणोति **अधिगतीति**। ज्ञानस्यैवाधिगतिरूपत्वादिति भावः।

न चाधिगम्यत इत्यस्य प्राप्यत इत्यर्थः। अधिपूर्वस्य गमेः प्राप्तावपि बहुलं प्रयोगादिति वाच्यम्। 'कस्मिन्नु भगवो विज्ञात' इति प्रश्ननुगुणत्वात्। 'येनाक्षरं पुरुषं वेद सत्यमि'त्यादिसन्निहितश्रुतिविरोधाच्च। यया विजानाति तां परां ब्रह्मविद्यामिति तैरपि तद्वचाख्यानात्। अनेकार्थत्वेति। सकृच्छ्रुतविद्याशब्दस्य ज्ञानतत्साधनोभयपरत्वप्रसङ्गादित्यर्थः। न च कर्मादिज्ञानमेवापरविद्येति युक्तम्। ऋग्वेदो यजुर्वेद इत्यादिविरोधादिति भावः।

गूढ०— परविद्याशब्देन ऋगादिजन्यं ज्ञानं परविद्येति कश्चित्, तद्दूषयति तज्जन्यमिति। यया तदक्षरमधिगम्यत इति तृतीययोक्ताधिगतिकरणत्वस्य ज्ञानेऽसंभवान्न तेन तद्ग्रहणं युक्तमित्याह अधिगतीति। ननु परविद्याशब्दोक्तश्रवणादिरूपज्ञानस्य साक्षात्काररूपाधिगतिकरणत्वं स्यादेवेति तत्राह अनेकेति।

३७ सु०— अतोऽनया परविद्याख्ययाऽस्य शास्त्रस्य सर्वोत्तमप्रामाण्यसाधनमुपपन्नमिति।

आनन्दः— उपसंहरति अत इति।

स०व्र०— ब्रह्मसूत्राणां श्रुत्या सर्वोत्तमप्रामाण्यमुपपादितमुपसंहरति अत इति।

कुण्डल०— चशब्देन यया तदक्षरमधिगम्यत इति वाक्यशेषोक्तमधिगतिकरणत्वानुपपत्तिरूपं हेतुं समुच्चिनोति अत इति। बाधकानामुद्धृतत्वात् साधकानामुपन्यस्तत्वात् इत्यर्थः।

काशी०— एतावता पूर्वश्लोकाभिप्रेतसर्वोत्तमप्रामाण्यसिद्धिः समर्थितेत्याह अत इति। परविद्याख्यामनुत्तमं शास्त्रं चक्र इत्यनेन ऋगाद्यपरविद्यानामपि शास्त्रत्वलाभाच्छास्त्रप्रकरणस्याधिगतिकरणत्वलिङ्गस्यानेकार्थत्वप्रसङ्गादिविपक्षबाधकस्य परत्वान्तरासंभवस्य प्रमाणत्वप्रयुक्तपरत्वस्यैतच्छास्त्रपरिशेषस्य व्याख्यानान्तरायोगस्य च सूचनेन परविद्याख्यायाः सर्वोत्तमप्रामाण्यवाचित्वस्यैतच्छास्त्रविषयत्वस्य च सिद्धेरित्यर्थः। अनया श्रौत्या। अस्य शास्त्रस्य साधनं सिद्धिः।

गूढ०— उपसंहरति अत इति।

३८ सु०— यद्यपि विद्याशास्त्रशब्दौ शिष्याचार्यव्यापारानुबन्धिनौ, तथाऽप्युभयानुगततत्त्वज्ञानकरणत्वमात्रमुपादाय द्वयोरैकार्थ्यमुक्तमित्यवगन्तव्यम्।

परि०— ननु विद्यते अनेन शिष्येण कर्त्रा वेदादिना करणेनेति विद्याशब्दः शिष्यप्रयत्नजन्यज्ञानकरणवाची। शिष्यते प्रतिपाद्यते आचार्येण कर्त्रा वेदादिना करणेनेति शास्त्रशब्दः आचार्यप्रयत्नसाध्यशासनकरणवाची। तथाच विद्याशब्दशास्त्रशब्दौ भिन्नार्थाविति न व्याख्यानव्याख्येयभावमापद्येते।

अतः कथं परविद्याख्यमित्यनूद्यानुत्तमं शास्त्रमिति व्याख्यातमित्युक्तमित्याशङ्क्य निराह **यद्यपीति** ॥ **तथापीति**॥ वेदनशासनयोः शिष्याचार्यप्रयत्नसाध्यत्वेऽपि शिष्याचार्यव्यापारांशं विहाय वेदनशासनयोः तुल्यतत्त्वज्ञानत्वधर्ममात्रमुपादाय तज्जनकत्वमात्रेणैकार्थ्यमुक्तमित्यर्थः। उभयानुगतेत्यस्य विद्याशास्त्रोभयानुगतेति वार्थः।

यादु०— **शिष्याचार्यव्यापारानुबन्धिनाविति** । यथाक्रमं शिष्याचार्यव्यापारघटितार्थाभिधायिनाविति्यर्थः । वेदनस्य विद्याशब्दबोध्यार्थान्तर्गतव्यापारस्य शिष्यकर्तृकत्वात् । प्रतिपादनस्य शास्त्रशब्दबोध्यार्थान्तर्गतव्यापारस्य आचार्यकर्तृकत्वादिति भावः ॥

आनन्दः— ननु वेद्यतेऽनयेति विद्या शिष्येण हि वेद्यते इति वेदनं शिष्यव्यापारः शिष्यते प्रतिपाद्यतेऽनेनेति शास्त्रप्रतिपादनं ह्याचार्यः व्याकरोतीति तदाचार्यव्यापारः । एवं च भिन्नभिन्नव्यापारपुरस्कारेण प्रवृत्तयोर्विद्याशास्त्रशब्दयोः कथमेकार्थ्यं स्यादित्यत आह **यद्यपीति** । तथा च विद्याशास्त्रशब्दानुगतं तत्त्वज्ञानकरणत्वमेकमेवेति भावेनैकार्थ्यमुक्तमिति भावः।

कं०रा०— **यद्यपीति** । वेत्ति तत्त्वं शिष्योऽनयेति विद्याशब्दः शिष्यव्यापारानुबन्धी । शास्ति तत्त्वमाचार्योऽनेनेति शास्त्रशब्द आचार्यव्यापारानुबन्धीति **विद्याशास्त्रशब्दयोरैकार्थ्याभावेन** परविद्याख्यं शास्त्रमिति तयोरैकार्थ्योक्तिरयुक्तेति शङ्काभिप्रायः । **उभयानुगतमिति** । विद्याशब्दवाच्ये शास्त्रशब्दवाच्ये चानुगतं शिष्यगततत्त्वज्ञानकरणत्वमात्रमुपादाय विद्याशास्त्रशब्दयोरैकार्थ्यमुक्तमित्यर्थः ।

श्रीनिधि०— ननु वेदनकरणत्वं विद्याशब्दप्रवृत्तिनिमित्तं वेदनं शिष्यसंबन्धि । शासनकरणत्वं शास्त्रशब्दप्रवृत्तिनिमित्तं शासनं हि तज्ज्ञापनम् । तच्च गुरुसंबन्धि । तथा च शिष्याचार्यसंबन्धिवेदनज्ञापनलक्षणक्रियारूपभिन्नप्रवृत्तिनिमित्तकत्वेन भिन्नार्थयोः विद्याशास्त्रशब्दयोः कथं व्याख्यानव्याख्येयभाव इत्यत आह **यद्यपि इत्यादिना**।

वा०चं०— ननु विद्याशास्त्रशब्दयोर्भिन्नविषयत्वान्न व्याख्यानव्याख्येयभावो युक्त इत्यतो गौणीं वृत्तिमाश्रित्य समाधत्ते **यद्यपीति** ।

वा०र०— **भिन्नविषयत्वादिति**। वेत्ति अनयेति। विद्याशब्दस्य वेदनकरणत्वार्थकतया विद्याशब्दबोध्यवेदनरूपव्यापारस्य च शिष्यकर्तृकत्वात् शिष्यते **तत्त्वं** प्रतिपाद्यते अनेनेति शास्त्रशब्दस्य तत्त्वप्रतिपादनकरणार्थकत्वात् तत्त्वप्रतिपादनरूपशास्त्रशब्दबोध्यव्यापारस्य च आचार्यकर्तृकत्वात् भिन्नकर्तृकव्यापारघटितार्थप्रतिपादकशब्दयोः भिन्नविषयत्वमित्यर्थः। **गौणीति**। अर्थज्ञानजनकत्वरूपगुणस्योभयत्रापि प्रतिभासादिति भावः।

स०त्न०— ननु विद्याशास्त्रशब्दयो(र्न) व्याख्यानव्याख्येयभावः। वेत्यनया शिष्यस्तत्त्वमिति विद्याशब्दस्य शिष्यकर्तृकवेदनकरणत्वार्थकत्वेन, शास्ति शास्त्रशब्दस्य च शिष्यते तत्त्वं प्रतिपाद्यतेऽनेन गुरुणेति आचार्यकर्तृक-तत्त्वप्रतिपादनकरणार्थकत्वेन तत्त्वं गुरुरनेनेति शास्त्रशब्दस्य गुरुकर्तृकशासनकरणार्थकत्वेन, तयोर्भिन्नार्थकत्वादित्यत आह **यद्यपीति**। तथाचाख्यातार्थभूतधात्वर्थानुकूलव्यापारभेदेऽपि तस्या विवक्षया धात्वर्थभूतज्ञानमात्रविवक्षया तत्करणत्वस्योभयत्रानुगततत्त्वात्तदैकार्थ्यमिति भावः॥ वस्तुतस्तु **शिष्याचार्यव्यापारानुबन्धिनौ** शिष्याचार्यकर्तृक-व्यापारघटितप्रवृत्तिनिमित्तकौ। **उभयानुगतं** शिष्याचार्यव्यापारद्वयानुगतम्। **तत्त्वज्ञानकरणत्वं** तत्त्वज्ञानकारण-भूतव्यापारघटितप्रवृत्तिकत्वं विद्याशास्त्रशब्दद्वयानुगतमिति यावत्। मात्रशब्देन व्यापारद्वये शिष्याचार्यकर्तृकत्वविवक्षां व्यावर्तयतीति व्याख्येयम्।

कुण्डल०— ननु 'परविद्याख्यं चक्रे शास्त्रमनुत्तमम्'इत्यत्र विद्याशास्त्रशब्दयोरैकार्थ्यं न संभवति। वेत्ति तत्त्वं शिष्योऽनयेति व्युत्पत्त्या विद्याशब्दस्य शिष्यकर्तृकयथार्थज्ञानसाधनत्वेन शास्तितत्त्वमाचार्योऽनेनेति व्युत्पत्त्या शास्त्रशब्दस्य च आचार्यकर्तृकतत्त्वशासनकरणवाचित्वेन तयोर्भिन्नप्रवृत्तिनिमित्तकत्वात् इत्याशङ्क्योभयानुगतं यथार्थानुगतिसाधनत्वमादायैकार्थ्यमुपपन्नमित्याह **यद्यपीत्यादिना**।

विद्व०— ननु न तस्य विद्याशब्दार्थत्वं संभवति। वेदनकरत्वं हि विद्याशब्दार्थः। वेदनं च शिष्यनिष्ठम्। एवं शासनकरणत्वं शास्त्रशब्दार्थः। शासनं च शिष्यज्ञानोत्पादनाय बोधकत्वरूपं गुरुनिष्ठम्। एवं च विद्याशास्त्रशब्दयोः शिष्यगुरुनिष्ठधर्मकरणरूपत्वेन भिन्नार्थकत्वान्नैकार्थ्यमित्याशङ्क्य तथापि वेद्यते अनया इति शास्ति अनेन इति व्युत्पत्त्या उभयत्रापि तत्त्वज्ञानकरणत्वसामान्यस्यानुगतत्वायुक्तमैकार्थ्यमिति समाधत्ते **यद्यपि विद्याशास्त्रेति**।

काशी०— ननु मूले शास्त्रशब्देन विद्याशब्दव्याख्यानमयुक्तम्। तयोरैकार्थ्यत्वाभावादिति शङ्कते **यद्यपीति**। **शिष्येति**। शिष्याचार्यव्यापारघटितार्थको विद्याशब्दो हि वेद्यते शिष्येण ज्ञायते तत्त्वमनयेति शिष्यव्यापारजन्य-तत्त्वज्ञानकरणार्थः। शास्त्रशब्दश्च शिष्यते गुरुणा प्रतिपाद्यते तत्त्वमनेनेति गुरुव्यापारजन्यतत्त्वज्ञानकरणार्थ इति न तयोरैकार्थ्यमिति भावः। यद्यपि तत्त्वज्ञानकरणमात्रं विद्याशब्दशक्यार्थः। शिष्यव्यापारजन्यत्वस्य योग्यतालभ्य-त्वात्। तथा च विद्याशब्दस्य शिष्यव्यापारानुबन्धित्वोक्तिरयुक्ता। शास्त्रशब्दस्य विद्याशब्दार्थबोधकत्वं च संभवति। तस्य तद्घटितार्थत्वात्। न चान्विताभिधानवादे विद्याशब्दस्य सामान्यतः शिष्यव्यापारान्वितज्ञानकरणवाचित्वान्न तस्य तद्बोधकत्वमिति वाच्यम्। शास्त्रशब्दस्यापि सामान्यतः शिष्यव्यापारान्वितज्ञानघटितार्थवाचित्वात्। अस्य विधेतिवदस्य शास्त्रमित्यन्वययोग्यत्वात्। न चाद्ये कर्तरि षष्ठी द्वितीये च कर्मणीति कर्तृकर्मान्वयभेदान्न शास्त्र-शब्दस्य विद्याशब्दार्थवाचित्वमिति वाच्यम्। शासनकर्मत्वस्य तज्जन्यज्ञानकर्तृत्वानतिरेकात्। कर्मत्वस्य क्रिया-फलशालित्वरूपत्वात्। तथाऽपि शाब्दिकैः फलव्यापारयोर्द्वयोरपि धात्वर्थत्वाङ्गीकारात्तद्रीत्या शास्त्रशब्दबोध्य-व्यापारविशेषजन्यज्ञानकरणस्यैव विद्याशब्दबोध्यत्वाच्छिष्यव्यापारानुबन्धित्वोक्तिः सङ्गच्छते। न चैवं विदेः फल-व्यधिकरणव्यापारवाचित्वरूपसकर्मकत्वानुपपत्तिः। शिष्यव्यापारस्य ज्ञानरूपफलसमानाधिकरणत्वादिति वाच्यम्।

कर्मतानियामकसंबन्धेन फलव्यधिकरणत्वस्य विवक्षितत्वात् । प्रकृते विषयत्वस्यैव कर्मतानियामकत्वेन शिष्यव्यापारस्य तज्ज्ञानविषयव्यावृत्तत्वेन फलव्यधिकरणत्वात् । अधिकं तु वक्ष्यामः । यद्वा । विदेर्ज्ञानार्थत्वेऽपि न क्षतिः । तस्यैव शिष्यव्यापारत्वात् । प्रतिपादनस्य च गुरुव्यापारत्वेन विद्याशास्त्रशब्दयोर्भिन्नार्थत्वात् । न च प्रतिपादनजन्यतत्त्वज्ञानकरणार्थकशास्त्रशब्दस्य विद्याशब्दार्थवाचित्वमधिकं त्वित्यादिन्यायेन दुर्वारमिति वाच्यम् । तथाऽपि शास्त्रशब्देन विद्याशब्दव्याख्याने तस्य प्रतिपादनजन्यतत्त्वज्ञानकरणपरत्वं प्रतीयते । तच्च लक्षणं विना न निर्वहति । लक्षणा च प्रकृते प्रयोजनाभावादयुक्तेति शङ्काभिप्रायात् । न चैवमाचार्यव्यापारानुबन्धस्यैव शङ्कोपयोगित्वाच्छिष्यव्यापारानुबन्धोक्तेर्वैयर्थ्यमिति वाच्यम् । विद्याशब्दस्याचार्यव्यापारघटितशास्त्रशब्दार्थवाचकत्वज्ञापनार्थत्वात् । अत्र प्रथमे विद्याशास्त्रशब्दयोर्द्वितीये शास्त्रशब्दस्यैव स्वार्थैकदेशलक्षणामभिप्रेत्य समाधत्ते **तथाऽपीति**। उभयानुगतं विद्याशास्त्रशब्दार्थघटकम् उपादाय विवक्षित्वा व्यापारांशस्य प्रकृतानुपयोगित्वादिति भावः।

गूढ०— ननु वेद्यतेऽनयेति विद्या, शिष्येण हि वेद्यत इति वेदनं शिष्यव्यापारः। शिष्यते प्रतिपाद्यतेऽनेनेति शास्त्रप्रतिपादनं त्वाचार्यः करोतीति तदाचार्यव्यापारः। एवं च भिन्नभिन्नव्यापारपुरस्कारेण प्रवृत्तयोर्विद्याशास्त्रशब्दयोः कथमैकार्थ्यमित्यत आह **यद्यपीति**। तथाच विद्याशास्त्रशब्दानुगततत्त्वज्ञानकरणत्वमेकमिति भावेनैकार्थ्यं युक्तमिति भावः ।

३९ सु०— 'ऋगाद्या अपरा विद्या यदा विष्णोर्न वाचकाः । ता एव परमा विद्या यदा विष्णोस्तु वाचकाः' इति भगवत्पादीयं व्याख्यानमपि एतमेवार्थं सूचयति । ब्रह्ममीमांसाशास्त्रव्युत्पादितन्यायानुपकृता हि वेदादयो विष्णोरवाचकाः, तदुपकृताश्च तस्य वाचका भवन्तीति ।

परि०— नन्वेवमाथर्वणभाष्यविरोधः । तत्र ऋगादेरेव परविद्यात्वोक्तेः इत्यत आह **ऋगाद्या इति** । यदा विष्णोर्न वाचका इति मन्त्रब्राह्मणाभिप्रायम् । कर्म-देवतन्त्रोक्तन्यायानामपि कर्मकाण्ड-देवकाण्डमात्रनिर्णायकत्वात् । उपनिषदां तु विष्ण्ववाचकत्वदशायाः अभावात् । उक्तं हि छान्दोग्यभाष्ये तृतीयेऽध्याये । 'आरण्यकमावर्तयेदारण्यकमावर्तयेदि'ति । अन्यथेतरपरत्वे आवृत्तिविधानं व्यर्थं स्यात् । 'आरण्यकेष्वृते विष्णुं नैवान्यत्किञ्चिदुच्यत' इति तत्रोक्तस्मृतिविरोधश्च स्यात् । यदा वाचका इति तु त्रिरूपकृत्स्नवेदाभिप्रायम् । ब्रह्मतन्त्रस्य कृत्स्नवेदेतिकर्तव्यतारूपत्वात् । यदेत्युक्तिरपि मन्त्रब्राह्मणरूपैकदेशाभिप्राया ।

यादु०— नन्वेवं भगवत्पादीयव्याख्यानविरोधः । तत्र ऋक्शब्दबोध्यऋगादीनामेव परविद्यात्वोक्तेरित्यत आह **ऋगाद्या अपरा इति** । **एतमेवार्थं** एतच्छास्त्रस्य परविद्यात्वरूपम् ।

स०च०— ननु विद्याशास्त्रशब्दयो(र्न) व्याख्यानव्याख्येयभावः। वेत्यनया शिष्यस्तत्त्वमिति विद्याशब्दस्य शिष्यकर्तृकवेदनकरणत्वार्थकत्वेन, शास्ति शास्त्रशब्दस्य च शिष्यते तत्त्वं प्रतिपाद्यतेऽनेन गुरुणेति आचार्यकर्तृक-तत्त्वप्रतिपादनकरणार्थकत्वेन तत्त्वं गुरुरनेनेति शास्त्रशब्दस्य गुरुकर्तृकशासनकरणार्थकत्वेन, तयोर्भिन्नार्थकत्वादित्यत आह **यद्यपीति**। तथाचाख्यातार्थभूतधात्वर्थानुकूलव्यापारभेदेऽपि तस्या विवक्षया धात्वर्थभूतज्ञानमात्रविवक्षया तत्करणत्वस्योभयत्रानुगतत्वात्तदैकार्थ्यमिति भावः॥ वस्तुतस्तु **शिष्याचार्यव्यापारानुबन्धिनौ** शिष्याचार्यकर्तृक-व्यापारघटितप्रवृत्तिनिमित्तकौ। **उभयानुगतं** शिष्याचार्यव्यापारद्वयानुगतम्। **तत्त्वज्ञानकरणत्वं** तत्त्वज्ञानकारण-भूतव्यापारघटितप्रवृत्तिकत्वं विद्याशास्त्रशब्दद्वयानुगतमिति यावत्। मात्रशब्देन व्यापारद्वये शिष्याचार्यकर्तृकत्वविवक्षां व्यावर्तयतीति व्याख्येयम्।

कुण्डल०— ननु 'परविद्याख्यं चक्रे शास्त्रमनुत्तमम्'इत्यत्र विद्याशास्त्रशब्दयोरैकार्थ्यं न संभवति। वेत्ति तत्त्वं शिष्योऽनयेति व्युत्पत्त्या विद्याशब्दस्य शिष्यकर्तृकयथार्थज्ञानसाधनत्वेन शास्तितत्त्वमाचार्योऽनेनेति व्युत्पत्त्या शास्त्रशब्दस्य च आचार्यकर्तृकतत्त्वशासनकरणवाचित्वेन तयोर्भिन्नप्रवृत्तिनिमित्तकत्वात् इत्याशङ्क्याऽ-भयानुगतं यथार्थानुगतिसाधनत्वमादायैकार्थ्यमुपपन्नमित्याह **यद्यपीत्यादिना**।

वि०— ननु न तस्य विद्याशब्दार्थत्वं संभवति। वेदनकरत्वं हि विद्याशब्दार्थः। वेदनं च शिष्यनिष्ठम्। एवं शासनकरणत्वं शास्त्रशब्दार्थः। शासनं च शिष्यज्ञानोत्पादनाय बोधकत्वरूपं गुरुनिष्ठम्। एवं च विद्याशास्त्रशब्दयोः शिष्यगुरुनिष्ठधर्मकरणरूपत्वेन भिन्नार्थकत्वान्नैकार्थत्वमित्याशङ्क्य तथापि वेद्यते अनया इति शास्ति अनेन इति व्युत्पत्त्या उभयत्रापि तत्त्वज्ञानकरणत्वसामान्यस्यानुगतत्वाद्युक्तमैकार्थ्यमिति समाधत्ते **यद्यपि विद्याशास्त्रेति**।

काशी०— ननु मूले शास्त्रशब्देन विद्याशब्दव्याख्यानमयुक्तम्। तयोरैकार्थ्याभावादिति शङ्कते **यद्यपीति**। शिष्येति। शिष्याचार्यव्यापारघटितार्थको विद्याशब्दो हि वेद्यते शिष्येण ज्ञायते तत्त्वमनयेति शिष्यव्यापारजन्य-तत्त्वज्ञानकरणार्थः। शास्त्रशब्दश्च शिष्यते गुरुणा प्रतिपाद्यते तत्त्वमनेनेति गुरुव्यापारजन्यतत्त्वज्ञानकरणार्थ इति न तयोरैकार्थ्यमिति भावः। यद्यपि तत्त्वज्ञानकरणमात्रं विद्याशब्दशक्यार्थः। शिष्यव्यापारजन्यत्वस्य योग्यतालभ्य-त्वात्। तथा च विद्याशब्दस्य शिष्यव्यापारानुबन्धित्वोक्तिरयुक्ता। शास्त्रशब्दस्य विद्याशब्दार्थबोधकत्वं च संभवति। तस्य तद्घटितार्थत्वात्। न चान्विताभिधानवादे विद्याशब्दस्य सामान्यतः शिष्यव्यापारान्वितज्ञानकरणवाचित्वान्न तस्य तद्बोधकत्वमिति वाच्यम्। शास्त्रशब्दस्यापि सामान्यतः शिष्यव्यापारान्वितज्ञानघटितार्थवाचित्वात्। अस्य विशेषविदस्य शास्त्रमित्यन्वययोग्यत्वात्। न चाद्ये कर्तरि षष्ठी द्वितीये च कर्मणीति कर्तृकर्मान्वयभेदान्न शास्त्र-शब्दस्य विद्याशब्दार्थवाचित्वमिति वाच्यम्। शासनकर्मत्वस्य तज्जन्यज्ञानकर्तृत्वानतिरेकात्। कर्मत्वस्य क्रिया-फलशालित्वरूपत्वात्। तथाऽपि शाब्दिकैः फलव्यापारयोर्द्वयोरपि धात्वर्थत्वाङ्गीकारात्तद्रीत्या शास्त्रशब्दबोध्य-व्यापारविशेषजन्यज्ञानकरणस्यैव विद्याशब्दबोध्यत्वाच्छिष्यव्यापारानुबन्धित्वोक्तिः सङ्गच्छते। न चैवं विदेः फल-व्यधिकरणव्यापारवाचित्वरूपसकर्मकत्वानुपपत्तिः। शिष्यव्यापारस्य ज्ञानरूपफलसमानाधिकरणत्वादिति वाच्यम्।

कर्मतानियामकसंबन्धेन फलव्यधिकरणत्वस्य विवक्षितत्वात् । प्रकृते विषयत्वस्यैव कर्मतानियामकत्वेन शिष्यव्यापारस्य तज्ज्ञानविषयव्यावृत्तत्वेन फलव्यधिकरणत्वात् । अधिकं तु वक्ष्यामः । यद्वा । विदेर्ज्ञानार्थत्वेऽपि न क्षतिः । तस्यैव शिष्यव्यापारत्वात् । प्रतिपादनस्य च गुरुव्यापारत्वेन विद्याशास्त्रशब्दयोर्भिन्नार्थत्वात् । न च प्रतिपादनजन्यतत्त्वज्ञानकरणार्थकशास्त्रशब्दस्य विद्याशब्दार्थवाचित्वमधिकं त्वित्यादिन्यायेन दुर्वारमिति वाच्यम् । तथाऽपि शास्त्रशब्देन विद्याशब्दव्याख्याने तस्य प्रतिपादनजन्यतत्त्वज्ञानकरणपरत्वं प्रतीयते । तच्च लक्षणं विना न निर्वहति । लक्षणा च प्रकृते प्रयोजनाभावादयुक्तेति शङ्काभिप्रायात् । न चैवमाचार्यव्यापारानुबन्धस्यैव शङ्कोपयोगित्वाच्छिष्यव्यापारानुबन्धोक्तेर्वैयर्थ्यमिति वाच्यम् । विद्याशब्दस्याचार्यव्यापारघटितशास्त्रशब्दार्थवाचकत्वज्ञापनार्थत्वात् । अत्र प्रथमे विद्याशास्त्रशब्दयोर्द्वितीये शास्त्रशब्दस्यैव स्वार्थैकदेशलक्षणामभिप्रेत्य समाधत्ते **तथाऽपीति**। उभयानुगतं विद्याशास्त्रशब्दार्थघटकम् उपादाय विवक्षित्वा व्यापारांशस्य प्रकृतानुपयोगित्वादिति भावः ।

गूढ०— ननु वेद्यतेऽनयेति विद्या, शिष्येण हि वेद्यत इति वेदनं शिष्यव्यापारः । शिष्यते प्रतिपाद्यतेऽनेनेति शास्त्रप्रतिपादनं ह्याचार्यः करोतीति तदाचार्यव्यापारः । एवं च भिन्नभिन्नव्यापारपुरस्कारेण प्रवृत्तयोर्विद्याशास्त्रशब्दयोः कथमैकार्थ्यमित्यत आह **यद्यपीति**। तथाच विद्याशास्त्रशब्दानुगततत्त्वज्ञानकरणत्वमेकमिति भावेनैकार्थ्यं युक्तमिति भावः ।

३९ सु०— 'ऋगाद्या अपरा विद्या यदा विष्णोर्न वाचकाः । ता एव परमा विद्या यदा विष्णोस्तु वाचकाः' इति भगवत्पादीयं व्याख्यानमपि एतमेवार्थं सूचयति । ब्रह्ममीमांसाशास्त्रव्युत्पादितन्यायानुपकृता हि वेदादयो विष्णोरवाचकाः, तदुपकृताश्च तस्य वाचका भवन्तीति ।

परि०— नन्वेवमाथर्वणभाष्यविरोधः । तत्र ऋगादेरेव परविद्यात्वोक्तेः इत्यत आह **ऋगाद्या इति** । यदा विष्णोर्न वाचका इति **मन्त्रब्राह्मणाभिप्रायम्** । कर्म-देवतन्त्रोक्तन्यायानामपि कर्मकाण्ड-देवकाण्डमात्रनिर्णायकत्वात् । उपनिषदां तु विष्ण्ववाचकत्वदशायाः अभावात् । उक्तं हि छान्दोग्यभाष्ये तृतीयेऽध्याये । 'आरण्यकमावर्तयेदारण्यकमावर्तयेदि'ति । अन्यथेतरपरत्वे आवृत्तिविधानं व्यर्थं स्यात् । 'आरण्यकेष्वृते विष्णुं नैवान्यत्किञ्चिदुच्यत' इति तत्रोक्तस्मृतिविरोधश्च स्यात् । यदा वाचका इति तु त्रिरूपकृत्स्नवेदाभिप्रायम् । ब्रह्मतन्त्रस्य कृत्स्नवेदेतिकर्तव्यतारूपत्वात् । यदेत्युक्तिरपि मन्त्रब्राह्मणरूपैकदेशाभिप्राया ।

यादु०— नन्वेवं भगवत्पादीयव्याख्यानविरोधः । तत्र ऋक्शब्दबोध्यऋगादीनामेव परविद्यात्वोक्तेरित्यत आह **ऋगाद्या अपरा इति** । **एतमेवार्थं** एतच्छास्त्रस्य परविद्यात्वरूपम् ।

आनन्दः— ननु ब्रह्मसूत्राणामेव परविद्यात्वं चेत् ऋगादेरेवावस्याभेदेन परापरविद्यात्वप्रतिपादक-भगवत्पादीयव्याख्यानविरोध इत्यत आह **ऋगाद्या इति** । सूचितमर्थमाह **ब्रह्मेति** । तथा च ब्रह्ममीमांसा-शास्त्रव्युत्पादितन्यायोपकृतवेदादेव विष्णुवाचकत्वेन परविद्यात्वस्योक्तत्वात् प्राप्ताप्राप्तविवेकेन ब्रह्ममीमांसाया एव परविद्यात्वमिति भावः ।

श्रीनिधि०— ननु भगवत्पादैः परविद्याशब्दः ऋगादिसाधारण्येन व्याख्यातः । भवद्भिः ब्रह्ममीमांसामात्र-परत्वेन व्याख्यायते । तथा च भगवत्पादीयव्याख्यानविरोधः इत्यत आह **ऋगाद्या इति** ।

वा०चं०— नन्वपव्याख्यानस्यायुक्तत्वेन प्रसक्तप्रतिषेधस्य तद्विरोधाभावेऽपि 'ऋगाद्या अपरा विद्ये'ति भगवत्पादीयव्याख्यानविरोधः स्यादेवेत्यतो विकल्पेन भगवद्वाचकेष्वपि ऋगादिषु यदातदाशब्दप्रयोगादुपकारक-विशेषसाहित्यतदभावविवक्षायाः सूचितत्वादुपकृतानां परविद्यात्वे परिशेषणीये उपकारकप्राधान्यविवक्षया प्रसक्त-प्रतिषेधेन परिशेषो नानुपपन्न इत्याह **ऋगाद्या इति** ।

वा०र०— **भगवत्पादीयेति** । आथर्वणोपनिषद्भाष्यस्येति शेषः । **विकल्पेनेति** । विष्णोर्न वाचकाः विष्णोस्तु वाचकाः इत्येतयोर्विरोधेन विकल्पस्यावश्यकत्वादिति भावः । व्रीहियवादौ प्रसङ्गान्नञ्मादाय विकल्पवत् प्रकृतेऽपि यदातदाशब्दाभ्यां उपकारकविशेषणराहित्यनञ्साहित्ययोः प्रतिपादनात् तदुभयमादाय विकल्प इत्याह **यदातदेति** । परविद्यात्वस्याभ्यर्हितत्वात् तदनुसारेण साहित्यस्य प्रथमतः उपपादनम् । **उपकारकप्राधान्येति** । प्राप्ताप्राप्तविवेकेन यागीयहिंसायामितिकर्तव्यता प्राधान्यदर्शनाद्वेति भावः । **प्रसक्तप्रतिषेधेनेति** । प्रसक्तप्रतिषेध-करणेनेति । ऋगादिकं परविद्याशब्दोक्तं नेति प्रसक्तप्रतिषेधस्य उपकारकप्राधान्यविवक्षया करणेनेति यावत् । मूले **एतमेवेति** । ब्रह्ममीमांसाशास्त्रमेव । परविद्येत्यनेनैतदेवेत्यर्थः । एतदेवाह **ब्रह्मेति** मूलम् ।

स०व्र०— नन्वेवमपि न परविद्यात्वं ब्रह्मसूत्राणाम् । **ऋगाद्या इति** । ऋगादीनां ब्रह्मविषयत्वनिर्णयो मीमांसायत्त इत्यर्थः ।

कुण्डल०— ननु ऋगादिपदोपलक्षितानामशेषशास्त्राणामपरविद्यात्वेनोक्तत्वादित्येतद्भाष्यकारोदाहृत-प्रमाणविरुद्धमित्यतस्तस्याभिप्रायमाह **ऋगाद्या इति** ।

विद्व०— नन्वाथर्वणभाष्ये ऋगादीनामेव परविद्यात्वोक्तेः तद्विरोध इत्यत आह **ऋगाद्या इति** । **एत-मेवेति** । ब्रह्ममीमांसाशास्त्रस्य परविद्यात्वरूपमेवार्थमित्यर्थः । तदुपपादयति **ब्रह्ममीमांसेति** ।

चषकः— नन्वेवमाथर्वणभाष्यं विरोत्स्यतीति आशङ्क्य तत्तात्पर्यं प्रकाश्योभयोरेकवाक्यतामुपपादयति **ऋगाद्या इति** । उपकारकप्राधान्यविवक्षयाऽयं परिशेष इति भावः ।

काशी०— ननु तथाऽपि परविद्याशब्दस्यैतच्छास्त्रपरतया व्याख्यानमयुक्तमेव । आथर्वणभाष्योदाहृत-परमसंहितावचनविरुद्धत्वात्स्ववचनविरुद्धत्वाच्चेत्यत आह **ऋगाद्या इति** । **भगवत्पादीयं** भगवत्पादोदाहृतम् ।

व्याख्यानं व्याख्यानरूपस्मृतिवचनम् । एतं एतच्छास्त्रस्य परविद्यात्वरूपम् । एवकारेण तदभावव्यवच्छेदः । ननु ऋगाद्या इति स्मृतावृगादीनां विष्णुवाचकत्वतदभावदशायोः परापरविद्यात्वमात्रोक्तेः कथमेतदर्थपरत्वमित्याशङ्क्य यदा तदेत्युक्त्यैव तत्सिद्धिरित्याह ब्रह्मेति । न्यायोपकृतत्वं न्यायानुसन्धानाधीनतात्पर्यनिश्चयविशिष्टत्वम् । अयं भावः । सत्यमृगादीनां विष्णुवाचकत्वदशायां परविद्यात्वमुच्यत इति । सा चैतच्छास्त्रजन्यसन्न्यायज्ञानाधीन-विष्णुपरत्वनिश्चयदशैव । तथा चोक्तवचनेनैतच्छास्त्रविशिष्टवेदादीनां सिद्धयत्परविद्यात्वमावश्यकत्वान्नागृहीत-विशेषणान्यायेन विशेषणीभूतैतच्छास्त्रस्य सिद्धयत्येवेति । न च वाच्यवाचकभावस्य नित्यत्वात्कथमेतच्छास्त्र-विशिष्टस्यैव वाचकत्वं कथं च न्यायव्युत्पादकशास्त्रस्य विष्णुवाचकत्वमिति वाच्यम् । यतो नात्र वाचकत्वं पदशक्तिरपि तु यया तदक्षरमधिगम्यत इति श्रुत्यनुसारेण विष्ण्वधिगतिकरणत्वमेव । तच्च फलायोगव्यवच्छिन्नत्व-रूपमुक्तविशिष्टस्यैवेति नोक्तदोषः । न चैवं विष्णुपरत्वेनानुसन्धीयमानमन्त्रादेर्जपादौ परविद्यात्वानुपपत्तिः । अधिगतिकरणत्वाभावादिति वाच्यम् । करणशक्तिमत्त्वस्यैव विवक्षितत्वात् । तच्चोक्तन्यायेन विष्णुपरत्वे-नानुसन्धीयमानत्वादिरूपम् । न चैवमृगादीनां ब्रह्मादिभिः सर्वदा विष्णुपरत्वेनानुसन्धीयमानत्वात्सर्वदा परविद्या-त्वापत्तिरिति वाच्यम् । इष्टत्वात् । न चैवमपरविद्यात्वानुपपत्तिः । या विद्या यदा येन विष्णुपरत्वेनानुसन्धीयते सा तदा तं प्रति परविद्या । या विद्या यदा येन विष्णुपरत्वेन नानुसन्धीयते सा तदा तं प्रत्यपरविद्येत्यङ्गीकारेण ब्रह्मादीन्प्रति परविद्यात्वस्यान्यान्प्रत्यपरविद्यात्वस्य चोपपत्तेः । विद्याशब्देनापि तत्त्वपरत्वेनानुसन्धीयते सा तदा तं प्रत्यपरविद्येत्यङ्गीकारेण मानत्वमेव विवक्षितम् । नातो जपादौ मन्त्रादेर्विद्यात्वानुपपत्तिः । अनुसन्धानं चोभयत्र यथार्थं ग्राह्यम् । तेनातत्परे तत्परत्वेनानुसन्धीयमाने नातिव्याप्तिः । न चैवमपि विष्णुना विष्णुपरत्वेनानुसन्धीयमानवेदादेर्विष्णुं प्रति परविद्यात्वापत्तिः । एवमनधिकारिणामपि वेदो विष्णुपर इत्यनुसन्धानसंभवात्तान्प्रति तस्य परविद्यात्वापत्तिरिति वाच्यम् । यतस्तपरत्वं तत्प्रतीतीच्छयोच्चरितत्वम् । प्रतीतिश्च स्वकीयोपादेया । वेदश्च न विष्ण्वादीनामर्थ-प्रतीतीच्छयोच्चरित इत्यदोषः । 'न चान्यार्थं तु जैमिनिरि'ति न्यायेन विष्णुज्ञानार्थकर्मादिपरत्वेनानुसन्धीयमान-कर्मकाण्डस्य परविद्यात्वात्तदनुपपत्तिरिति वाच्यम् । पदसमन्वये पदार्थविधयेव वाक्यसमन्वये वाक्यार्थविधयेव काण्डसमन्वयेऽपि काण्डतात्पर्यार्थविधया विष्णुप्रतीतीच्छयोच्चरितत्वस्य कर्मकाण्डेऽपि सत्त्वात् । विष्णोः शब्दतो-ऽप्रतिपाद्यत्वेऽपि तात्पर्यतः प्रतिपाद्यत्वात् । न च काम्यविनियुक्तविष्णुविद्याया अपि परविद्यात्वापत्तिः मोक्षा-ननुकूलपदार्थत्वेनानिष्यमाणत्वस्यापि विद्याविशेषणत्वात् । यद्वा । यथाश्रुतमेवाक्षराधिगतिकरणत्वं विवक्षितम् । न चैवं जप्यमानमन्त्रादेः परविद्यात्वानुपपत्तिः । मन्त्रो मन्त्रार्थवचनमन्यस्य स्वात्मनोऽपि वा । सर्वकर्मसु कर्तव्यौ सर्वकर्मात्मकौ यत इत्यत्रात्मनश्चेन्मननसैवेति तैत्तिरीयभाष्योक्तेर्मन्त्राधीनमन्त्रार्थविष्णुज्ञानसत्त्व एव मन्त्रस्य परविद्यात्वोपगमात् । मन्त्रस्यान्यार्थत्वेऽपि विष्णुज्ञानार्थमिदमित्यादितात्पर्यार्थस्मृतिहेतुत्वेनैव परविद्यात्वोपपत्तेः । तत्कामा इत्याथर्वणभाष्यस्यापि विष्णुप्रीतितज्ज्ञानकामास्तदर्थत्वेन मन्त्रार्थस्मृतिमन्त इत्येवार्थः । न चैवमपि मीमांसाधिगतवेदार्थस्य पुंसः कालान्तरे विनाऽपि मीमांसां वेदज्ञानार्थस्मृतिसंभवेन शास्त्रस्य तदहेतुतया परविद्या-त्वानुपपत्तिरिति वाच्यम् । तथाऽपि तत्प्रयोजकत्वमात्रेण परविद्यात्वस्योपपादयिष्यमाणत्वादिति दिक् ।

गूढ०— ननु ब्रह्मसूत्राणामेव परविद्यात्वं चेत् ऋगादेरेवावस्थाभेदेन परापरविद्यात्वप्रतिपादकभगवत्पादीय-व्याख्यानविरोध इत्यत आह ऋगाद्या इति । 'सूचितमर्थमाह ब्रह्मेति । तथाच ब्रह्ममीमांसाशास्त्रव्युत्पादित-न्यायोपकृतवेदादेरेव विष्णुवाचकत्वेन परविद्यात्वस्योक्तत्वात् प्रामाप्रामविवेकेन ब्रह्ममीमांसाया एव परविद्यात्व-मिति भावः ।

४० सु०— तथाऽपि केवलस्य न परविद्यात्वं लभ्यत इति चेत् । मा लाभि । वेदादीति-कर्तव्यतारूपस्यास्य पृथक्प्रामाण्यानभ्युपगमात् ।

यादु०— केवलस्य ऋगाद्यननुग्राहकस्य **ब्रह्ममीमांसाशास्त्रस्य ॥ पृथगिति ।** वेदाद्यननुग्राहकत्वेनेत्यर्थः ॥

आनन्दः— **केवलस्य** वेदविरहितस्य । केवलस्य तदनङ्गीकारान्नेदमनिष्टमित्याह **मा लाभीति** । तर्हि कथमस्य प्रामाण्यमिति न वाच्यम् । वेदेन करणेन ब्रह्मणि प्रमीयमाणेऽस्येतिकर्तव्यतात्वेन तत्प्रामाण्येनैवास्य प्रामाण्यमित्याह **वेदादीति** ।

कं०रा०— ननु यदि ब्रह्ममीमांसाशास्त्रव्युत्पादितन्यायोपकृतानां विष्णुप्रतिपादकत्वं तर्हि केवलस्य ब्रह्ममीमांसाशास्त्रस्याक्षरशब्दितविष्ण्वधिगतिसाधनत्वाभावेन केवलस्य परविद्यात्वं न लब्धमित्यभिप्रेत्य शङ्कते **तथाऽपीति** । इष्टापत्त्या परिहरति **मा लाभीति** । वेदेतिकर्तव्यतारूपस्यास्य शास्त्रस्य वेदानुग्राहकतामन्तरेण ब्रह्मप्रमितिजनकत्वाभावात्केवलत्वेषेण परविद्यात्वाभावेऽपि वेदानुग्राहकत्वविशिष्टत्वेषेण तज्जनकत्वात्त्वाभिमतं परविद्यात्वं युक्तमिति भावः ।

वा०चं०— नन्वेवं तर्हि 'वस्तुत उपकृतस्य ऋगादेरनुपकृतऋगाद्यपेक्षया परविद्यात्वं सिद्धचेत् । न तूपकारकप्राधान्यविवक्षामात्रेण भवदभिमतमुपकारकस्यैव परविद्यात्वमि'त्याशङ्क्य सयुक्तिकमङ्गीकारेण परिहरति **तथाऽपीति** ।

वा०र०— **उपकारकस्य एव परविद्यात्वमिति** । सिध्येदित्यनुवर्तते । **मूले पृथगिति** । केवलस्येत्यर्थः ।

स०ब्र०— एवं तर्हि ब्रह्मसूत्राणामितिकर्तव्यतात्वेन पृथक् परविद्यात्वं प्रामाण्यं च न स्यादिति शङ्कते **तथाऽपीति** । इष्टापत्त्या परिहरति **मा लाभीति** ।

वि०— ननु तर्हि ऋगादीनामेव परविद्यात्वं एतस्य तु तदनुग्राहकतयैवेति न केवलस्य परविद्यात्वमिति शङ्कते **तथापीति** । वेदनिर्णयाय प्रवृत्तस्यास्य शास्त्रस्य तन्निर्णीतोपक्रमाद्यनुकूलताव्यतिरेकेण पृथक्प्रामाण्या-संभवात् वेदार्थनिर्णयपुरस्सरं वेदानां परतत्त्ववेदकतासंपादनेन परविद्यात्वस्य प्रापकत्वात् मुख्यमेवास्य परविद्यात्वं ऋगादीनामेतदुपकृतत्वमेव परविद्यात्वमित्याशयेन परिहरति **मा लाभीति** ।

चषकः— केवलस्य व्युत्पादकतासंबन्धेन ऋगाद्युपकारकन्यायाविशेषितस्य ॥ **मा लाभीति** । कर्मण्ययं चिण् ।

काशी०— शङ्कते **तथाऽपीति** । उपकारकत्वेन विशिष्टघटकस्य परविद्यात्वेऽपीत्यर्थः । **केवलस्य** स्वतन्त्रस्य । ब्रह्ममीमांसाशास्त्रस्येति विपरिणतमनुषज्यते । वेदादिजन्यविष्णुप्रतिपत्तिपरत्वस्य तत्प्रयोजकत्वस्य चोक्तरीत्या लाभेऽपि तदजन्यविष्णुप्रतिपत्तिपरत्वं तत्प्रयोजकत्वं वा न लभ्यते । तथा चैतमेवार्थमित्युक्तम् । तच्चेति वाक्ये न केवलस्य परविद्यात्वमित्यर्थस्यैवोक्तत्वादेतच्छब्देन तस्यैव परामर्शादिति भावः । स्यादेवं यदि केवलस्य परविद्यात्वमुक्तं स्यात् । न चैवम् । तच्चेति वाक्ये इदमेवेत्येवकारेण विष्णुविषयत्वेनानिर्णीतत्वदशापन्नस्यैव वेदादेर्व्यवच्छिन्नत्वात् । अत एव तत्र **निर्णेतव्यार्थानामित्युक्तमित्याशयेन** समाधत्ते **मा लाभीति** । **इतिकर्तव्यतारूपस्य** सहकारिरूपस्य । **पृथक्** वेदादिव्यवच्छेदेन विष्णुप्रमितिसाधनत्वानुपगमादित्यर्थः । एवमनुत्तमप्रामाण्यस्य साधितत्वादुत्तरश्लोकवैयर्थ्यमित्यतस्तमवतारयति **एवमिति** । तदनुत्तमप्रामाण्यम् । सिषाधयिषुरित्यस्य 'प्रामाण्यं त्रिविधं महदि'त्यत्रेत्यादिः उपोद्घातसूचनार्थमादाविति 'आप्तवाक्यतये'त्यादि-पूर्वग्रन्थ इत्यर्थः । आहेत्यस्य तदुपयुक्तमित्यादिः । यद्यपि परविद्याख्यमित्यनेन विषयप्रयोजनातिशयप्रयुक्त-प्रामाण्यानुत्तमत्वं प्रसाधितम् । श्रौतपरविद्याशब्दस्य यया तदक्षरमधिगम्यते अमृतस्यैष सेतुरित्याद्युत्तरवाक्य-बलेन तदर्थत्वावगमात् । उत्तरत्र तु बहुप्रमाणावसितत्वप्रयुक्त(संवाद)प्रामाण्यानुत्तमत्वं प्रसाध्यमित्यनुमानतोऽपि तत्सिषाधयिषुरित्यनुपपन्नम् । न चोभयप्रयुक्तमनुत्तमत्वमेकमिति युक्तम् । उत्तरग्रन्थविरोधात् । उत्तरत्र क्षिप्रविशङ्कप्रवृत्तिहेतुत्वरूपातिशयस्य बहुप्रमाणावसितत्वप्रयुक्ततामुक्त्वा विषयप्रयोजनातिशयवशेनाप्यतिशयो द्रष्टव्य इत्यतिशयान्तरस्यैव विषयाद्यतिशयप्रयुक्तत्वोक्तेः । तथाऽपि शास्त्रान्तरप्रामाण्यावधिकोत्तमत्वस्य सामान्यत एवागमानुमानसाध्यत्वान्न दोषः ।

गूढ०— केवलस्य वेदरहितस्य । केवलस्य तदनङ्गीकारान्नेदमनिष्टमित्याह **मा लाभीति** । तर्हि कथमस्य प्रामाण्यमिति न वाच्यम् । वेदेन करणेन ब्रह्मणि प्रमीयमाणेऽस्येतिकर्तव्यतात्वेन तत्प्रामाण्येनैवास्य प्रामाण्यमित्याह **वेदादीति** ।

॥ अस्य शास्त्रस्य अनुत्तमप्रामाण्यसाधनम् ॥
॥ अनुमानतः अनुत्तमप्रामाण्यसाधनम् ॥

प्रामाण्यसाधनम्—

४१ सु०— एवं तावदागमेनास्य शास्त्रस्यानुत्तमं प्रामाण्यं प्रसाध्य अधुना अनुमानतोऽपि तत् सिषाधयिषुरादौ तावत्प्रामाण्यमात्रे अनुमानं वक्तुमाह गुरुरिति ।

अनु०— गुरुर्गुरूणां प्रभवः शास्त्राणां बादरायणः ।
यतस्तदुदितं मानमजादिभ्यस्तदर्थतः ॥

परि०— आगमेन 'द्वे विद्ये वेदितव्ये' इत्यागमेनेत्यर्थः ॥ अनुमानत इति । 'आप्तवाक्यतया तेन श्रुतिमूलतया तर्के'त्यादिग्रन्थेन आप्तवाक्यत्वादिप्रमाणत्रयावगतत्वात् ब्रह्मतन्त्रप्रामाण्यमनुत्तम-मित्यनुमानेन अनुत्तमप्रामाण्यं सिषाधयिषुरित्यर्थः ॥ वक्तुमाहेति । एतच्छास्त्रं प्रमाणं अनुकूल-वक्तृश्रोतृप्रसङ्गवत्त्वात् भारतवदित्यनुमानं अतो मानमित्यंशेन वक्तुमनुकूलवक्त्रादिमत्त्वरूपहेतुसाधकान् हेतूनाहेत्यर्थः ।

वासु०— आगमेनेति । परविद्याख्येत्यर्थः ॥

आनन्दः— ननु पूर्वश्लोके प्रामाण्यस्य समर्थितत्वादधुना सूत्रव्याख्यानमेव कर्तव्यम् । किं तदनुपयुक्त-कथनेनेत्यतस्तत्प्रयोजनं दर्शयति एवं तावदिति । युक्त्यनुगृहीतागमेन समीचीनप्रामाण्यसिद्धेरनुमानकथनम् । प्रामाण्यसिद्धे पश्चादुत्तमप्रामाण्यं साधनीयमित्याशयेन प्रामाण्यमात्र इत्युक्तम् ।

कं०रा०— प्रामाण्यमात्र इति । अनुत्तमत्वे तु प्रमाणं तदनन्तरं वक्ष्यत इति भावः । वक्तुमिति । आप्त-वाक्यत्वरूपं प्रामाण्यसाधकमनुमानं वक्तुम् । आहेति । आप्तवाक्यतासिद्ध्यर्थं वक्त्राद्यानुकूल्यं व्युत्पादयतीत्यर्थः ।

वा०चं०— ननु 'गुर्गुरूणामि'त्युत्तरश्लोके पूर्वश्लोकोक्तप्रमाणानुपपादनात् प्रमाणान्तरस्याप्यकथनात् तत्कथनपरत्वे वाऽनुत्तमत्वस्य सर्वथाऽकथनात् उत्तरश्लोकोऽसङ्गत इत्यत आह एवमिति । 'पृष्टेनागम एवादौ वक्तव्यः साध्यसिद्धय' इति न्यायमनुसन्धाय तावच्छब्देप्रयोगः ।

वा०र०— पूर्वश्लोकोक्तेति । परमास्यविद्येति द्वितीयश्लोकोक्तानुत्तमप्रामाण्यसाधकागमरूपप्रमाणेत्यर्थः । प्रादुर्भूतो हरीत्यस्मिन् श्लोक इव इति शेषः । परमास्यविद्येत्येतद्व्याख्यानमूले तदेवमागमेनास्य सर्वोत्तम-प्रामाण्यप्रतीतेः इत्युक्तत्वात् । पूर्वश्लोके परमास्यविद्येत्यनेनानुत्तमप्रामाण्यसाधकागमरूपप्रमाणाभिधानमिति सिद्धेः, प्रादुर्भूत इति अव्यवहितपूर्वश्लोके च शास्त्रप्रमेयत्वानुपपादकत्ववत् उत्तमप्रामाण्यस्य परविद्याशब्देन लाभोपपादनेन उक्तप्रमाणोपपादकतायाः अपि सत्त्वात् तस्य पूर्वसङ्गतत्वोपपत्तावपि एतच्छ्लोकं तद्दुक्त-प्रमाणोपपादकत्वाभावादित्यर्थः । अनेनैव द्वितीयश्लोकोक्तप्रमाणोपपादकतया तत्सङ्गतः प्रादुर्भूत इति श्लोक इत्येव सङ्गतिप्रकारः सूचितो भवतीति ज्ञातव्यम् । ननु द्वे विद्येत्यादि प्रमाणानुपपादकत्वेऽपि प्रमाणान्तरकथनपरत्वात् अस्यापि द्वितीयश्लोकसङ्गतिः संभवति इत्यत आह प्रमाणान्तरस्वापीति । ननु शास्त्रप्रामाण्ये अनुकूल-वक्त्रादिमत्त्वरूपप्रमाणाभिधानप्रतीतेः अकथनमसिद्धमित्यनोऽङ्गीकृत्याह तत्कथनपरत्वे वेति । अकथना-दिति । सर्वोत्तमप्रामाण्यसाधनायैव प्राक् आगमाभिधानात् अत्रापि तथाविधप्रामाण्यसाधनस्यैव सङ्गतत्वात् प्रामाण्यमात्रे प्रमाणाभिधानं असङ्गतमिति तत्परोत्तरश्लोकोऽसङ्गत इत्यर्थः । पृष्टेनागम एवेति । अनेन परमास्यविद्येत्यनेनागमरूपप्रमाणस्य प्रथमतोऽभिधाने पृष्टेनेति न्यायो मूलमिति तावच्छब्देन मूलकृता सूचितमिति दर्शयति सिषाधयिषुरिति मूले एव । प्रामाण्यं त्रिविधं इत्यादिनेति शेषः । अनेनोत्तमप्रामाण्यसाधनोपयोगितया

प्रामाण्यमात्रसाधनमेतत् इति तदनर्थकता न शङ्कनीयेत्युक्तं भवति। **अनुमानमिति**। विजातीयसंवादरूपमित्यर्थः। सजातीयसंवादद्वयरूपानुमानान्तरेणापि एतच्छास्त्रप्रामाण्यस्योपपादयिष्यमाणत्वात्। द्वितीयः तावत् शब्दः। तदनुमानमपि उत्तमप्रामाण्यसाधनोपयोगि। **तदनुत्तमतासिद्धये** इत्यनेन उत्तरत्रैव वक्ष्यत इति ज्ञातव्यम्।

कुण्डल०— ननु 'परविद्याख्यं चक्रे शास्त्रमनुत्तमम्'इत्यनेनैव ब्रह्मसूत्राणामुत्तमप्रमाणत्वस्योपपादितत्वादुत्तरश्लोको व्यर्थ इत्यत आह **एवं तावदिति**। **अनुमानतोऽपीति**। 'श्रुतिमूलतया चैव युक्तिमूलतया तथे'त्यादि वक्ष्यमाणानुमानतोऽपीत्यर्थः। **अनुमानमिति**। आप्तवाक्यत्वरूपमनुमानमित्यर्थः।

विद्व०— आदौ तावदिति। परत्वे पश्चादनुमानं वक्ष्यतीति तावत्शब्दार्थः।

चषक:— प्रामाण्यमात्रे उत्तमत्वाविशेषितप्रामाण्ये॥

गूढ०— ननु पूर्वश्लोके प्रामाण्यस्य समर्थितत्वादधुना सूत्रव्याख्यानमेव कर्तव्यं किं तदनुपयुक्तकथनेनेत्यतस्तत्प्रयोजनं दर्शयति **एवं तावदिति**। युक्त्यनुगृहीतागमेन समीचीनप्रामाण्यसिद्धेरनुमानकथनम्। प्रामाण्यसिद्धेः पश्चादनुत्तमप्रामाण्यं साधनीयमित्याशयेन **प्रामाण्यमात्र** इत्युक्तम्।

४२ सु०— यतो यत्कारणं, बादरायणो, गुरूणां जगतस्तत्त्वोपदेशकानां ब्रह्मादीनां, गुरुः उपदेष्टा। यतश्च, शास्त्राणां वेदानां भारतादीनां च, यथासंभवं प्रभवः, गुरूणां अशेषार्थप्रतिपादकानां सविस्तराणां वेदादिशास्त्राणां गुरुर्मुख्यः प्रभवो न तु संप्रदायमात्रप्रवर्तक इति वा। यतश्च अजादिभ्यः श्रोतृभ्यः, तेषामर्थो मोक्षस्तदर्थः तस्मै तदर्थतः। तदुदितं तेन बादरायणेनोपदिष्टं इदं शास्त्रमतो मानं भवितुमर्हति।

परि०— यत इति हेतौ पञ्चमीतिभावेन प्रकृतिप्रत्यययोरर्थमाह **यत्कारणमिति**। निमित्तकारणहेतुषु सर्वासामिष्टिरित्युक्तेः प्रथमोक्तिः। यस्मात्कारणादित्युक्तावपि पञ्चम्योः शब्दसाधुत्वमात्रार्थत्वेनाधिकार्थत्वाभावात्। यद्वा यत इत्यस्य नेयमर्थोक्तिः किन्तु यत्कारणं यस्य शास्त्रस्य कारणमिति बादरायणविशेषणम्। यत्कारणमित्युक्तयच्छब्दार्थस्येदं शास्त्रमित्यन्वयः। पूर्वस्मादनुवृत्तिं मत्वाऽऽह **जगत इति**। **अर्थतः** शब्दतश्च **गुरुत्वमाह अशेषार्थेति**। आद्यादिभ्य उपसङ्ख्यानमिति सर्वविभक्त्यर्थे तसिप्रत्ययोक्तेश्चतुर्थ्यर्थे तसिरिति भावेनाह **तस्मै तदर्थत इति**॥

यादु०— **यतो यत्कारणमिति**। 'निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमि'ति कात्यायनस्मरणात् प्रथमा कृता। यस्मात्कारणादित्यर्थः।

आनन्दः— निमित्तकारणहेतुप्रयोगे सर्वासामिष्टिरित्यनुरोधादाह **यत्कारणमिति**। ननु गुरूणां गुरुरित्यादीनां प्रत्येकं वा हेतुत्वं मिलितानां वा। नाद्यः। गुरूणां गुरुत्वस्य शास्त्रप्रभवत्वमात्रस्य वा बुद्धादिषु सत्त्वेन

व्यभिचारात् । न द्वितीयः । विशेषणवैयर्थ्यापातात् । किञ्च । गुरूणां गुरुत्वस्य शास्त्रप्रभवत्वस्य च पाणिन्यादि-(कपिलादि)साधारणत्वाच्च तेन तदुदितस्य प्रामाण्यसिद्धिः । किञ्च तदर्थत इत्यत्र हेतौ पञ्चमी । एवं चार्थात् द्रव्यादेर्हेतोरित्युक्तं भवति । तच्चायुक्तम् । द्रव्यादेर्वचनेऽकारणत्वादित्यतोऽन्वयप्रदर्शनपूर्वकं व्याख्याति यत इति । हेत्वर्थे पञ्चमीति बोधयितुं यत्कारणमित्युक्तम् । संप्रदायप्रवर्तकत्वेनैवास्य गुरुत्वम् । न तु शास्त्रकर्तृत्वेनेत्यतो योजनान्तरमाह गुरूणामिति । गुरुत्वं ह्येधार्थवाद्धात्वेन शब्दबाद्धात्वेन चेत्याशयेनार्थद्वयकथनम् अशेषार्थेति । सार्वविभक्तिकस्तसिरितिन्यायेन चतुर्थ्यर्थेऽपि तसिरित्याशयेनोक्तं तस्मै तदर्थत इति ।

कं०रा०— यथासंभवमिति । शास्त्रशब्दितवेदानामभिव्यञ्जकत्वेन भारतादीनां चोत्पादकत्वेन प्रभव इत्यर्थः ।

श्रीनिधि०— यतः यस्मात् कारणादिति । पञ्चम्यन्तत्वे बादरायणो ब्रह्मादीनामुपदेष्टेत्यादियोजने तत्त्वोपदेशो यन्निमित्तं तस्यैव साधनत्वं प्रतीयते । न च तदयुक्तम् । तस्य ब्रह्मादि कृपादिरूपस्य शास्त्रानधिकरणत्वात् । व्याख्यानभावाच्चेत्यतः प्रथमान्तत्वेन योजयति । यतो यत्कारणमिति । एवं च बादरायणो ब्रह्मादीनामुपदेष्टेत्यादिरूपं यत्कारणं तस्मात् कारणादित्यर्थः । ननु पञ्चम्यास्तसिल् इति पञ्चम्या एव तसिलः लोपविधानात् । प्रथमान्तत्वे कथं तसिलिति चेत् उच्यते । आद्यादिभ्य उपसङ्ख्यानमिति वार्तिकेन प्रथमाया अपि तसिल् संभवात् । सर्वनाम्नः प्रयोगे निमित्तकारणहेत्वर्थेषु सर्वासामिष्टेरिति वार्तिकेन यच्छब्दस्य सर्वनाम्नः कारणे एतः पञ्चम्यर्थे सर्वविभक्ति-विधानेन प्रथमातिक्रमे कारणाभावात् प्रथमोपपत्तिः । व्याख्यानप्रयोजनं तु प्रज्ञाद्यर्थत्वबारकमिति वा प्रातिपदिकार्थ-कथनमिति केचित् । 'अनुक्तं पञ्चमिर्वेदैर्न वस्त्वस्ति कुतश्चन । उत्तस्मान् भगवान् वेदानि'त्यादिवचनादिति । तत्राद्य भारतादेरशेषार्थप्रतिपादकत्वे प्रमाणम्, भगवतः वेदादिप्रतिपाद्यत्वे द्वितीयमिति द्रष्टव्यम् ।

वा०चं०— अत्र 'गुर्गुरूणामि'त्यादेः 'मानम्' इत्यस्य च साध्यसाधनभावाप्रतीतेः तत्समर्पकत्वं 'यत' इत्यस्य दर्शयितुं 'निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्' इत्यनुसन्धाय 'यत' इत्येतद्व्याख्याति यत्कारणमिति । ननु 'गुर्गुरूणामित्यादिहेतूनामि'त्यादिवक्ष्यमाणरीत्या गुरुगुरुत्वादीनां हेतूनां वक्त्राद्यानुकूल्यान्येव साध्यानीति तावन्निष्टङ्कितम् । अत्र वक्त्रानुकूल्यैकदेशविवक्षितार्थतत्त्वज्ञानसाधकत्वेन भवदभिमतस्य 'गुरूणां गुरुत्व'स्य न तत्साधकत्वं युक्तम्, उपदेशकानामुपदेशकत्वेन वक्ष्यमाणरीत्या तदपेक्षया अधिकज्ञानसिद्धावपि तत्त्वज्ञानसिद्धेः । न च तत्त्वोपदेशक एव गुरुशब्दस्य योगरूढिभ्यां प्रवृत्तत्वेन तत्सिद्धिरिति वाच्यम्, तावताऽपि तत्त्वोपदेशा-कान्तरापेक्षयाऽधिकतत्त्वज्ञानसिद्धावपि विवक्षितार्थतत्त्वज्ञानासिद्धेः । 'प्रभवः शास्त्राणामि'त्यस्य तु 'यत' इत्यस्य गुर्गुरूणामित्यनेनान्वितया, हेतुत्वसमर्पकाभावेन, हेतुत्वमेव न प्रतिपत्तुं शक्यम् । न च 'यत' इत्यस्य आवृत्त्या, योग्यतया चशब्दाध्याहारेण तस्यापि हेत्वन्तरत्वं प्रतिपत्तुं शक्यमिति वाच्यम्; वेदानां भारतादीनां च प्रभवत्वेन तदर्थतत्त्वज्ञानसिद्धावपि, विवक्षितार्थतत्त्वज्ञानाभावात् । न चात्रोभयत्र सर्वज्ञत्वस्य साध्यतया विवक्षितत्वेन, तन्मुखेन विवक्षितार्थतत्त्वज्ञानसिद्धिरिति वाच्यम्, उपदेशकान्तरतत्त्वोपदेशकत्वमात्रेण, वेदभारतादिप्रभवत्वमात्रेण च सार्वज्ञासिद्धेः । वेदादिप्रभवत्वेऽप्यपटुकरणत्वससंभवेन तेन पटुकरणत्वासिद्धेश्च । 'यत' इत्यस्य पूर्वार्धेऽन्वयेन उत्तरार्धे

पक्षसाध्यमात्रोक्त्या हेत्वभावेन, वक्त्रानुकूल्यैकदेशविवक्षाश्रोतृप्रसक्तानुकूल्यासिद्धेश्च । 'यतश्चे'त्यस्यावृत्त्या 'अजादिभ्यस्तदर्थतः' 'तदुदितमि'त्यनेन अन्वयेऽपि, 'ब्रह्मादिभ्यस्तज्ज्ञानार्थं बादरायणादुत्पन्नमि'त्युक्तिमात्रेण श्रोतृप्रसक्तानुकूल्याभावात् । अतो न वक्त्रानुकूल्यादिहेतुसमर्पकत्वमस्य श्लोकस्येत्यतो 'जगद्गुरूणामजादिभ्यः' इत्यंतत्सन्निधानादत्र 'गुरूणामि'त्यनेन जगत्तत्त्वोपदेशकब्रह्मादीनां सर्वज्ञकल्पत्वस्याभिप्रेततया, सर्वज्ञकल्पोपदेशकत्वस्य च सार्वज्ञसाधकत्वोपपत्तेः, वेदभारतादीनां चाशेषार्थप्रतिपादकत्वस्य विवक्षितत्वात् गुरूणामित्यादेरावृत्त्या शास्त्रादिविशेषणत्वे च साक्षादेवाशेषार्थप्रतिपादकत्वलाभात् अशेषार्थप्रतिपादकशास्त्रप्रभवत्वस्य च सार्वज्ञसाधकत्वोपपत्तेः नोभयत्रापि अनुपपत्तिः । सविस्तरत्वार्थक'गुरूणामि'त्यस्य शास्त्रविशेषणत्वे तत्प्रभवत्वेन पटुकरणत्वसिद्धिः । 'गुरूणाम्' इत्यनेन ब्रह्मादीनां तत्त्वोपदेशकत्वोक्तेः 'अजादिभ्य' इत्यनेन तेषां श्रोतृत्वस्य 'अर्थ'पदेन मोक्षस्य, तदुदितमिति बादरायणेनोपदिष्टत्वस्य च विवक्षिततया 'अजादिभ्यस्तदर्थतः' 'तदुदितमि'त्युक्तहेतुभिर्विवक्षादिसिद्धिरिति न काऽप्यनुपपत्तिरित्यभिप्रेत्याह बादरायण इत्यादिना ।

वा०२०— अत्र गुर्गुरूणामित्यादेरिति । अत्र वक्ष्यमाणमूलोक्तरीत्या मानमित्यस्य परमसाध्यनिर्देशत्वेऽपि वाक्ययोजनाकाले अवान्तरं परमं वा साध्यं प्रति हेतुत्वलाभस्तूपपाद्य एवेति यथाश्रुतमानत्वसाध्यपुरस्कारेण वा गुर्गुरुत्वादौ वा वक्ष्यमाणरीत्या साक्षादेव मानत्वसाध्यं प्रति गुर्गुरुत्वादिविशिष्टबादरायणेन ब्रह्मादिश्रोतॄन् प्रति तन्मोक्षार्थमुपदिष्टत्वरूपे पर्यवसिते हेतौ वा हेतुत्वसमर्पकोपायाभावशङ्कनमेतदिति न कश्चित् दोषः । **साध्यसाधनभावेति** । साधनत्वप्रत्ययकाभावेन तदप्रतीतेरित्यर्थः । अयमाशयः । तृतीयान्तं पञ्चम्यन्तं वा लिङ्गवचनं हेतुरिति हेतुलक्षणानुसारेण तृतीया वा पञ्चमी वा हेतुत्वप्रत्ययिका वाच्या । तयोरेव हेतुत्वे द्योत्ये विधानाच्च । तथाहि । तत्प्रयोजको हेतुश्च इत्युक्तशास्त्रीयहेतोश्चशब्देन कर्तृत्वविधानेन कर्तृत्वादेव तृतीयासिद्धेः द्रव्यादिविषयो हेतुकारकं नियतक्रियं इत्यादि हरिकारिकानुसारेण द्रव्यगुणक्रियाविषये अनाश्रितव्यापारस्य घटादिकार्योत्पादने केवलं योग्यतया हेतुव्यपदेशमासादयतो दण्डादेरेव हेतुत्वेन व्यवहारः तादृशलौकिकहेतोः दण्डेन घटः विद्यया यशः धनेन कुलम् इत्यादौ क्रियापदाश्रवणेन करणत्वाशङ्कया एवानुदयेन पुण्येन दृष्टो हरिः इत्यत्र च व्यापारावेशविवक्षायां करणत्वप्राप्तावपि हरिदर्शनि पुण्यं योग्यमिति विवक्षायां करणत्वाप्राप्तेः । तदुभयत्रापि तृतीयासिद्ध्यर्थं हेताविति सूत्रे उक्तलौकिके हेतुत्वे द्योत्ये तृतीयायाः विधानमस्ति । पञ्चमी तु यद्यपि हेतौ न विहिता तथापि हेतोः मनुष्याच्च रूप्यप्रत्ययविधायके हेतुमनुष्येभ्योऽन्यतरस्यां रूप्य इति सूत्रे तत आगतः इत्यधिकारात् प्रकृते ततः इति पञ्चम्यर्थस्य हेतोरिति विशेषणेन हेतौ पञ्चमीज्ञापनाद्वा विभाषागुणेऽस्त्रियामित्यत्र गुणपदेन शुक्लादिगुणविवक्षायां जाड्यात् बद्धः जाड्येन बद्धः इत्यादौ वृत्त्युदाहृते पञ्चम्यभावप्रसङ्गः । गुणशब्दस्य सत्त्वे निविशतेऽपैति गुणलक्षणस्य वोतो गुणवचनात् इति सूत्रीयश्लोकवार्तिके उक्तत्वेन तदनुसारेणाप्रधानपरतया साध्यप्रमित्यर्थत्वेन परतन्त्रतयाऽप्रधानभूतधूमादिपरधूमात् इत्यादिपदे तदुपपत्तावपि नास्ति इह घटोऽनुपलब्धेः इत्यादौ बुद्ध्या मुक्त इत्येव स्त्रीत्वेनास्त्रियामिति निषेधप्रवृत्त्या अनुपलब्धिपदे पञ्चम्यभावप्रसङ्गः इत्याशङ्कानिरासकविभाषेति योगविभागमाश्रित्य गुणवचनात् स्त्रियां च पञ्चमी भवतीति न्यासकारमताद्वा गुणशब्दस्याप्रधानपरत्वमात्रम्, अनुपलब्धेरित्यादौ तु अपादानपञ्चम्येवेति

जाड्यधूमादिपदेभ्योऽपि पञ्चम्युपपत्तिरिति मतान्तराद्वा 'पर्वतो वह्निमान् धूमवत्त्वादि'त्यादौ पञ्चमी भवतीति आकरे स्थितम् । तथाच हेतुत्वे द्योत्ये पञ्चम्या अप्यभ्युपगमोऽस्ति । तथा चोक्तरीत्या हेतुत्वप्रत्यायकयोस्तयोरन्यतरस्य गुरुगुरुत्वादाबभावेन हेतुत्वप्रत्ययायोगः । यतः इत्यस्य पञ्चम्यन्तत्वेऽपि गुरुगुरुः इत्यादिपदात् पञ्चम्यन्वयाभावेन ततोऽपि हेतुत्वप्रत्ययायोग इति । तत्समर्पकत्वमिति । साध्यसाधनभावसमर्पकत्वमित्यर्थः । दर्शयितुमिति । यत्सदसि उद्गृह्णोऽसि तत्पूज्योऽसि इत्यादौ यस्मात्तस्मादित्यर्थक यत्तदित्यव्ययाभ्यां यतो धूमवान् ततो वह्निमान् इत्यादौ यतोऽत इत्याभ्यां च हेतुत्वसमर्पणस्य दृष्टतया । तद्वदेव प्रकृतेऽपि यतः इत्यनेन तद्बलागतातः इत्यनेन च यतो गुरूणां गुरुत्वादि । अतो मानमित्युक्ते युक्तमेव हेतुतायाः यतः इत्यनेन समर्पणम् । यदि च यस्मात् कारणात् इत्यादिरूपेण कारणत्वादिस्पष्टनाय कारणादिशब्दप्रयोगेणैव हेतुतासमर्पणस्य दृष्टत्वात् यतो धूमवान् इत्यादावपि कारणादिपदं अप्रयुज्यमानमपि अस्तीति वा तदध्याहार इति वा आश्रित्य यस्मात् कारणात् इत्यर्थो व्याख्यायते तदा प्रकृतेऽपि यतः इत्यस्य यत् कारणमिति व्याख्याने कारणताव्यक्तिः संभवत्येवेति युक्तम् । यतः इत्यस्य हेतुतासमर्पकत्वमिति दर्शयितुमित्यर्थः । ननु सर्वनाम्नः प्रयोगे हेतौ द्योत्ये हेतुशब्दप्रयोग एव सर्वनाम्नस्तृतीया चेत्यनेन नित्यषष्ठिबाधेन तृतीयाविधानात् हेतुशब्दप्रयोगे सत्येव सर्वनाम्नः कस्य हेतोर्वसति केन हेतुना वसति इति पञ्चम्यतिरिक्तविभक्त्यन्तरसिद्धावपि मूलकारीययत्कारणमित्येतद्व्याख्याने कारणशब्दयोगे पञ्चम्यतिरिक्तविभक्तेरेव प्रापकाभावेनाभावात् प्रथमायास्तु सुतरामभावात् हेत्वर्थकपञ्चम्यन्तयत इत्यस्य कथं प्रथमान्ततया व्याख्यानमित्यत उक्तं निमित्तकारणेत्यादि । तथा च सर्वनाम्नः इत्येतत्सूत्रीयनिमित्तेत्यादिवार्तिकेन सर्वनामप्रयोगस्थले निमित्तादि-शब्दयोगे हेतौ द्योत्ये सर्वा विभक्तयो भवन्तीत्युक्तेः प्रकृतेऽपि कारणशब्दप्रयोगसत्त्वात् तच्छब्दसमानाधिकरण-सर्वनाम्नोऽपि प्रथमादिविभक्तीनां प्राप्तिसिद्धया युक्तं प्रथमान्ततया व्याख्यानमिति भाव इति बहवः । वस्तुतस्तु बहुस्थलेषु हेत्वर्थकपञ्चमीस्थले यस्मात् कारणात् इत्यादिरूपेणैव व्याख्याततया प्रकृते तथा व्याख्यानमकृत्वा प्रथमान्ततया व्याख्यानकरणं वक्ष्यमाणप्रमेयान्तरसूचनार्थमिति स्वामिचरणैः यतो यत्कारणमिति मूलाभिप्रायो यः उद्दिष्टः तदभिप्रायकथनपरं यथा स्यात्तथा निमित्तकारणेति वाक्यं प्रकारान्तरेण योज्यमिति गुरवः । तथाहि । नात्र हेत्वर्थे पञ्चमी व्याख्यातुं शक्या । तथा सति यतो जन्मा तत एव संहारादीत्यत्रैव यस्मात् कारणात् त्वया हरिः सेव्यते तस्मादेव कारणात् मयापि इत्यादौ यत्तच्छब्दार्थभूतज्ञानाद्यभेदस्य प्रतीयमानतया प्रकृतेऽपि यस्मात् गुरुगुरुत्वादि, तस्मात् मानमित्युक्ते गुरुगुरुत्वादेर्यत् कारणं तस्मात् कारणात् मानमिति लाभात् गुरुगुरुत्वादेरेव मानत्वं प्रति हेतुत्वलाभायोगप्रसङ्गः । किन्तु यतः इत्यस्य प्रायिकमपि पञ्चम्यन्ततया व्याख्यानं परित्यज्य प्रथमान्ततया तद्व्याख्यातव्यम् । यत् कारणं गुरुगुरुत्वादि तस्मात् मानमिति । विवक्षितलाभस्य तदा संभवात् यतो धूमवान् इत्यादावपि उक्तरीत्या पञ्चम्ययोगात् प्रथमान्ततयैव व्याख्येयमिति मूलाभिप्रायं सिद्धवत्कृत्य भवेदेवं यदि कारणशब्दसहितसर्वनाम्नः प्रथमाप्रापकं किञ्चित्स्यात् तदेव नास्ति इत्याशङ्कायां मूलोपरि प्राप्तायां तत्परिहाराय निमित्तकारणेत्याद्यनुसन्धायेत्यन्तवाक्यं प्रवृत्तमिति । तथा च प्रथमाप्रापकसत्त्वात् यत इत्यस्य यत्कारणमिति व्याख्यानं युक्तमेव । अन्यथा पञ्चम्याऽपि उक्तस्थले प्रापकाभावेन सापि न स्यात् । यदि च निमित्तेति वार्तिके प्रायपदोपादानेऽपि सर्वासामिष्टिरित्येव प्रक्रियायामुक्तेः पञ्चमीसंभवः तर्हि तत एव प्रथमाया अपि संभव एव ।

प्रायग्रहणस्य सर्वनामस्थले प्रथमाद्वितीयावारणार्थत्वेऽपि वर्धमानमते द्वितीयामात्रवारणार्थत्वेऽपि मतान्तरे द्वितीयाचतुर्थीसप्तमीवारणाद्यर्थत्वेऽपि च सर्वनामप्रयोगस्थले अव्यवस्थया यत्किञ्चित् विभक्तिवारणार्थत्वाभावात् । अत एव भाष्ये किंनिमित्तं किंकारणमिति प्रथमाद्वितीयासाधारण्येनोक्तावपि हेतुशब्दे को हेतुरिति प्रथमान्तं उदाहृतम् । सिद्धान्तकौमुद्यामपि को हेतुः किं प्रयोजनमित्युदाहृतम् । यद्यपि इदं वार्तिकं हेताविति सूत्रभाष्ये पठितम् । तेन च प्रातिपदिकमात्रात् सर्वनामप्रयोगे तदभावे वा निमित्तकारणहेतुशब्दसामानाधिकरण्ये उक्तरीत्या मतभेदेन प्रायपदव्यावृत्तव्यतिरिक्ता विभक्तयो भवन्तीति प्रतिपादनलाभः । तथापि सर्वनामप्रयोगे सर्वासामिष्टेः तत्प्रकृते मतान्तराश्रयणादिप्रसक्तिः । अत एव वृत्तिकृता सर्वनाम्नः इत्येतत्सूत्र एवेदं वार्तिकमुदाहृतम् । भाष्यकृतापि सर्वनामप्रयोगस्थले सर्वा अपि विभक्तय उदाहृताः तदभिप्रेत्योक्तम् अनुसन्धायेति । सर्वनामस्थले सर्वविभक्ति-साधकमेतदित्येतदिति विमृश्येत्यर्थः । अयमत्र सङ्ग्रहः । वह्निमान् धूमादिति प्रयोगसमानार्थकयतो धूमवानतो वह्निमानिति वाक्याद्यावत्प्रतिपिपादयिषितं तावदेवायं वह्निमान् धूमवान् यत इति वाक्यादपीति सर्वं सिद्धम् । ततश्च यतो धूमवानित्यनेन धूमरूपं यत्कारणं तस्मादित्यर्थप्रतिभासेन वह्निमानित्यनेनान्वयोपपत्तावपि यतोऽत इति पदद्वयोपेतवाक्योक्तार्थस्य यत इत्येतावन्मात्रादेव प्राप्त्या अत इत्यस्यानन्वयप्रसङ्गेन यत इत्यत्रत्यपञ्चम्याः प्रयोगसाधुत्वमात्रार्थत्वमाश्रित्य यत्कारणं धूमवत्त्वं यत इत्येव बोधः सर्वैरङ्गीकार्यः । प्रकृते तु यत इति पञ्चम्या अतो मानमित्येवं साध्यान्वयमाश्रित्य प्रातिपदिकार्थमात्रं च पुरस्कृत्य यत्कारणं गुरुगुरुत्वादि अतो मानमिति बोधाभ्युपगमे अन्वयानुपपत्तेरभावः । यतश्चेत्युत्तरस्थलद्वयेऽपि प्रातिपदिकार्थमात्रपरामर्शोऽभिप्रेतः । यत्र तु योऽयं धूमस्तस्मादिति प्रकृत्यर्थमात्रप्रतिपादनं तत्र तस्मादिति पञ्चम्यैव विवक्षितबोधः । एवं च पर्वतो वह्निमान् धूमादित्येतत् समानार्थकनानाविधप्रयोगेषु धूमादित्येतदर्थकतया पञ्चम्यादि योजना कार्येति सर्वसंमतेस्तदनुसारेण प्रकृतेऽपि योजनीयमिति । एवमेव यस्मादत इति पदद्वयोपेत यतो नारायणप्रसादैमृत इत्यादौ, यस्मात्क्षरमतीत इत्यादौ, केवल इत्येतद्युक्तरोहिण्युदय आसन्न इत्यादौ च कारणपदप्रयोगेण व्याख्यानस्थले अन्यत्रापि टीकाकृदाद्युक्तिषु च व्याख्येयम् । यत्त्वन्यथाख्यातौ यत्कारणमिति द्वन्द्वसमासः । निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति कात्यायनस्मरणात् प्रथमा कृता । यस्मात्कारणादित्यर्थ इति प्रतिपादितम् । तत्र द्वन्द्वसमास इत्यलौकिकं व्याख्यानमिति वाक्यार्थविनोदे गुरुचरणैरेवोक्तम् । प्रथमाकृतेत्याद्यपि न युक्तम् । उक्तरीत्या पञ्चम्यर्थानन्वयभयात् प्रथमान्ततया व्याख्यानमिति पक्षाश्रयणे प्रापकाभावशङ्कापरिहाराय प्रथमाप्रापकं वार्तिकमभिधाय पुनर्यस्मात् कारणादित्यर्थ इति व्याख्यानस्य प्रापकाभिधानामूलकत्वात् । यदि तु प्रागुक्तमूलहृदयमज्ञात्वैव यस्मादिति प्रायिकव्याख्यानदर्शनाद्ग्रन्थकृतापि पञ्चम्यां प्रयोक्तव्यायां प्रथमार्योग इत्येवाशङ्कामुत्थाप्य तत्परिहाराय मया प्रापकमभिहितमिति न विरोध इति मन्यसे तर्हि अनुव्याख्यानगतपञ्चम्यन्तस्य यस्मादित्यादि पञ्चम्या प्रायिकं व्याख्यानमकृत्वा निर्निमित्तं प्रथमान्ततया व्याकुर्वतः स्वव्याख्यानस्य पुनः पञ्चम्यन्ततया व्याख्यातृव्याख्यान-मभिप्रेयतो ग्रन्थकारस्य स्वापराधनिमित्तं व्यर्थमचातुर्यमाश्रितं स्यात् । ग्रन्थहृदयाज्ञानं च प्रकटीकृतं स्यात् । चिरन्तनकथायां तल्लेखकादयं तथा ममापि तल्लेख इत्यप्यसाध्वेवेत्यास्तां विस्तर इत्येतावदूषणग्रन्थे निक्षेप्यम् । वार्तिके निमित्तादिग्रहणस्योदाहरणार्थत्वान्निमित्तपर्यायस्य ग्रहणेन निमित्तपदार्थवच्छब्दान्तराभ्यनुज्ञानात् प्रयोजन-

शब्देऽपि सर्वनामप्रयोगे सर्वा विभक्तय इति काशिकादौ स्पष्टम्। यतो यत्कारणमिति मूलव्याख्यागताशयः॥ प्राकाशि स्वामिचरणौ स्मृत्वा प्रीत्यै सुबोधिनाम् ॥ यत्तु यस्य शास्त्रस्य कारणं बादरायणो गुरूणां गुरुरित्येकवाक्यतया योजनाच्छास्त्रनिष्ठप्रामाण्येन गुरुगुरुत्वादेर्वैयधिकरण्याभावेन साध्यसाधनभावो युक्त इत्यभिप्रायकतयैतद्वाक्यं कैश्चिद्योजितम्। तन्न। यद्यपि यथाश्रुतानामेवमिति वक्ष्यमाणमूलानुसारेणाध्याहृतविवक्षितार्थतत्त्वज्ञानादिसाध्यं प्रत्येव गुरुगुरुत्वादेर्हेतुत्वसिद्धया वैयधिकरण्यशङ्कानुदयेनोक्तव्याख्यानानर्थक्यप्रसङ्गादित्यादि गुरुभिरेव विनोदे उक्तम्। ख्यातीत्यस्यानूद्य व्याख्यातीत्यर्थः। मूले जगतस्तत्त्वोपदेशकानां ब्रह्मादीनामित्यादिना गुरूणामित्यादिपदानां विवरणादिकं क्रियते। तत्र तत्तद्व्यावर्त्याः शङ्का दर्शयन्नयं च सर्वज्ञकल्पानामित्यादि वक्ष्यमाणमूलसहितैतन्मूलार्थलाभादिकमुपपादयन्नवतारयति **नन्वत्र गुरुर्गुरूणामित्यादीति**। गुरूणां गुरुत्वादीनामिति मूलकोशानुसारी पाठः। **साध्यानीति**। साक्षात्साध्यानीत्यर्थः। **भवदभिमतस्येति**। वक्ष्यमाणरीत्येत्येतत् तत्र तत्रानुवर्तते। **उपदेशकानामिति**। गृनिगरण इति धातुव्याख्यानात् गृणन्ति उपदिशन्ति इति। गुरुपदेनादेशकप्राप्तेरित्यर्थः। **योगेति**। योग्यतया तत्त्वमुपदिशन्तीति व्युत्पत्त्या तत्त्वोपदेशके योगलाभात्तस्मिन्नेव गुरुशब्दस्य बहुलातिप्रयोगेण रूढिसद्भावाच्चेति भावः। **विवक्षितार्थतत्त्वज्ञानासिद्धेरिति**। 'एकं च तत्त्वतो ज्ञातुं विना सर्वज्ञतामि'त्यनुसारेण भगवति विवक्षितस्योक्ततत्त्वज्ञानस्य सर्वज्ञानसापेक्षत्वात्तदसिद्धया तस्याप्यसिद्धिरित्यत्राभिप्रेतम्। अन्यथा मन्वादिषूपदेश्याधिकतत्त्वज्ञानसिद्धिमात्रेण विवक्षितार्थतत्त्वज्ञानसिद्धिर्न स्यादिति ज्ञेयम्। **पटुकरणेति**। व्यवहितमपि यत इत्येतद्धेतुतासमर्पकतया योजनावसरे न्यायप्राप्त्या प्रथममन्वीयमानं तत्रैव पर्यवसन्नम्। न पुनरन्यत्रापि संबद्धुमर्हति। सकृच्छ्रुतत्वादिति भावः। एतेन गुर्गुरूणामित्यत्र यत इत्यस्यानुक्तेस्तद्धेतुत्वप्रतिपत्तिरेवाक्षेप्या न तु प्रभवः शास्त्राणामित्युक्तद्वितीयहेतौ। तत्र तस्य श्रवणादिति निरस्तम्। हेतुत्वमेवेत्यनेन हेत्वन्तरत्वं तु सुतरां न प्रतिपत्तुं शक्यम्। तत्प्रापकचशब्दाभावादिति सूत्रयति। भारतादीनां च प्रभवत्वेनेति तस्य संप्रदायप्रवर्तकसाधारणत्वेन तेन विवक्षितार्थतत्त्वज्ञानलाभात् भारतादिमुख्यप्रभवत्वविवक्षायां च तेन तदर्थतत्त्वज्ञानसिद्धावपि योजनीयम्। विवक्षितार्थतत्त्वज्ञानालाभादित्यत्रापि पूर्ववत्सर्वज्ञानसाध्योक्ततत्त्वज्ञानालाभादित्यभिप्रेत्य उक्तहेतुभ्यां विवक्षितार्थतत्त्वज्ञानोपयोगिसर्वज्ञानस्यैव साधनाभ्युपगमात्र दोष इति शङ्कते **न चोभयत्रेति**। उत्तरार्ध इत्यनन्तरं तदन्वयाभावेनेति योज्यम्। **पक्षसाध्यमात्रोक्त्येति**। अजादिभ्यस्तदर्थतस्तदुदितं मानमित्यन्तेन पक्षस्य, मानमित्यनेन च साध्यस्योक्तावपि हेतोरनुक्तिः। न च तदुदितमिति तदेव तदुदितत्वादित्येव हेतुपरतया व्याख्यायत इति वाच्यम्। तथात्वज्ञापकयत इत्यस्याभावात्। तथा च हेतुत्वाभिमते तत्समर्पकाभावेन तस्य हेतुत्वासिद्धया तदुक्त्या हेतुलाभाभावादत्र विवक्षादेर्हेतुर्नोक्त इत्येवं हेत्वभावो नाम हेतुत्वमुक्तिरेवेति ज्ञेयम्। पूर्वार्धेऽन्वयो नात्र यत इत्यस्याभावे हेतुः। पूर्वार्धे आवृत्त्या स्थलद्वयसत्त्ववदावृत्त्यैवोत्तरार्धेऽपि तस्य सत्त्वादिति मनसि कृत्वा हेत्वभावमाक्षिप्य परिहरति **यतश्चेत्यस्येति**। अत्र यत इति भाष्यपदं च शब्दसंबन्धेन प्राग्योजितमिति विशिष्टा वृत्तिरभिहिता। **अन्वयेऽपीति**। तेन च वचनरूपकार्येण विवक्षालाभेऽपि इति पूरणीयम्। तावता हेतुत्वसमर्पकविभक्तिलाभेन हेतुत्वस्य तदुदितमित्यन्ते प्राप्तावपि तद्धेतोर्विवक्षारूपैकदेशसाधकत्वमात्रमुपपद्यते। न श्रोत्राद्यानुकूल्यसाधकत्वमपि अजादित्वमात्रोक्त्या तत्त्वज्ञानयोग्यत्ववक्तृप्रेमास्पदत्वरूपश्रोत्रानुकूल्यस्य तदीयप्रयोजनोद्देश्यकत्वरूपप्रसङ्गानुकूल्यस्य च प्रत्यायका-

भावेनात्रोक्तिलाभायोगादिति भावः। विवक्षितत्वमसहमानो द्वितीययोजनानुसारेणाह **गुरूणामित्यादेरिति**। आदिना गुरुरित्यस्य परिग्रहः। शास्त्रादीत्यादिना च प्रभव इत्यस्य परिग्रहः। **गुरूणामशेषार्थेत्यादियोजनापक्षेति** यावत्। शास्त्राणां गुरुत्वं हि द्वेधा। अर्थतः शब्दतश्चेति। आर्थिकी गुरुरित्यस्य प्रभवविशेषणत्वे वेति सिद्धत्वान्नोक्तम्। संप्रदायप्रवर्तकसाम्यवारणस्योभयत्र साम्यादिति ज्ञेयम्। **यथासंभवमिति** मूले वेदस्योपलब्धत्वेन भारतादेश्चोत्पादकत्वेनेति यथासंभवमित्यर्थः। **गुरुर्मुख्यप्रभव इति सर्वमतमुख्यशब्दस्य** मूले पाठः। तत्र गुरुरित्यनूद्य मुख्य इति व्याख्याय तस्य प्रभव इत्यनेन संबन्धः प्रदर्शित इति विवेकः। वक्ष्यति च गुरुः प्रभव इत्यनेनापीति। मुख्यशब्दस्तु मुखमिवेति मुख्यः शाखादिभ्यो य इति गौणमुख्ययोरिति सूत्रीयमञ्जरीव्याख्याने व्युत्पादितः। अर्थस्तु हृदयङ्गमः शोध्यः।

स०न्न०— 'यत' इत्यस्यार्थो 'यत्कारणमि'ति। निमित्तकारणहेतुषु प्रयोगे सर्वासां प्रायदर्शनमि'त्युक्तेः 'यत्कारणमि'त्युक्तम्। यस्मात्कारणादित्यर्थः।

कुण्डल०— यतस्तदुदितमित्यत्र यत इत्येतत् प्रथमाविभक्तिकन्तस्यन्तं न तु पञ्चम्यन्तम्। कारणार्थकं सत् गुरुरित्यादिप्रथमान्तपदैः संबध्यत इत्याह **यत इति**। यद्वा यतश्चोदेति सूर्यः यद्विकारि यतश्च यदित्यादाविव सामान्यार्थकं न भवति। किन्तु प्रकृते कारणार्थकमिति आह **यत इति**। इदं च प्रकृतमर्थकथनम्। अन्यथा यतो यस्मादित्यवक्ष्यत्। अन्ये तु यतो यत्कारणमिति निमित्तकारणहेतुषु सर्वासां प्रायदर्शनं इति कात्यायनवचनात् प्रथमा कृता। यस्मात्कारणादित्यर्थ इत्याहुः। **यथासंभवमिति**। भारतादेः रचयिता वेदादेरभिव्यञ्जक इत्यर्थः। **तस्मै तदर्थत इति**। तथाच तदर्थत इत्यत्राद्यादिभ्य उपसङ्ख्यानमिति वचनात् चतुर्थ्यर्थे तसिरित्युक्तं भवति। **तेनेति**। गुर्गुरूणामित्यादिविशेषणज्ञापितविवक्षितार्थतत्त्वज्ञानकरणपाटवविवक्षाविप्रलिप्साभाववता बादरायणेनेत्यर्थः। अत इति। उक्तविशेषणविशिष्टबादरायणोपदिष्टत्वादित्यर्थः।

वि६०— यतो यत्कारणमिति। बादरायणो यस्मात्कारणात् गुरूणां गुरुः शास्त्राणां प्रभवश्चेत्यादिः। अतः कारणाच्छास्त्रं प्रमाणं इत्युक्ते गुरुगुरुत्वे शास्त्रप्रभवत्वादौ च कारणभूतं यत्तदेव शास्त्रप्रामाण्ये कारणमिति प्रतिभाति तां प्रतीतिं परिहर्तुं यत इत्यनूद्य यत्कारणमिति। निमित्तं तत्कारणहेतुषु सर्वासां प्रायोदर्शनमिति कात्यायनस्मरणात् प्रथमार्थतया व्याख्यातम्। तथाच गुरूणां गुरुः शास्त्राणां प्रभव इति च यत्कारणं अतः तेन गुरुगुरुत्वाख्येन शास्त्रप्रभवत्वाख्येन च कारणेन तदुदितं शास्त्रं मानमित्यर्थ उक्तो वेदितव्यः। केचित्तु यच्छब्दस्य प्रश्नाद्यनेकार्थत्वात्प्रातिपदिकार्थकथनं यतो यत्कारणमित्येतदित्याहुः। **यथासंभवमिति**। वेदानां प्रभवत्वं प्रथमद्रष्टृत्वेनैवेति ज्ञेयम्। आगमस्याशेषार्थप्रतिपादकत्वे बादरायणस्य तत्प्रभवत्वे च क्रमेण प्रमाणम् "अनुक्तं पञ्चभिर्वेदैर्न वरत्वस्ति कुतश्चन। उत्सन्नान्भगवान्वेदानुज्जहार हरिः स्वयम्" इति। अपटुकरणस्यापि क्वचिद्धरावेशाभ्यां आगमप्रभवत्वसंभवात् उक्तम् **असति निमित्तान्तरे इति**। वचनेन कार्येण विवक्षा तदुदितमनेनोपपादिता भवतीति संबन्धः। अकारणकार्योत्पत्त्यादीत्यादिपदेनाजादीनां वक्तृप्रेमास्पदत्वानङ्गीकारे प्रमाणबाधग्रहणम्। व्याख्याना-

कौशल्यमाशङ्क्ते नन्वित्यादिना सार्थक्योपपत्तेरित्यन्तेन । ननु गुरुगुरुत्वशास्त्रप्रभवत्वश्रोतृप्रयोजनोद्देशत्वरूप-हेतुत्रयस्य व्यासनिष्ठत्वात् वक्तृप्रेमास्पदत्वस्य ब्रह्मादिनिष्ठत्वात् पक्षीभूतशास्त्रनिष्ठत्वाभावेन व्यधिकरणत्वान्न यथास्थितव्याख्यानं युज्यत इति शङ्कः स्वयमाशङ्क्य परिहरति यद्यपीति । तदुदितमिति । क्तप्रत्ययोक्तसामर्थ्यात् प्रथमाविभक्तिविपरिणामेन गुरूणां गुरुणा शास्त्रप्रभवेन बादरायणेनाजादीन् प्रति तन्मोक्षार्थं तच्छास्त्रमुदितम् अतो मानमित्येकाधिकरणता युज्यत इत्यर्थः । तदित्यस्य तेन बादरायणेनेत्येव विभक्तिविपरिणामः उदितमिति क्तप्रत्ययसामर्थ्यादित्यप्याहुः ।

चषकः— यत्कारणमिति । 'निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमि'ति वार्तिककारोक्त्या तत्प्रकृतिक-सकलविभक्तीनामेकार्थकतोरीकृत्या इह प्रथमा पञ्चम्यर्थप्रत्यायिकेति भावः । बादरायणपक्षकसार्वज्ञसाधकब्रह्मा-द्युपदेष्टृत्ववेदादिशास्त्रप्रभवत्वलिङ्गकानुमानद्वये, तथा तत्पक्षकविवक्षाकरणपाटवसाध्यकापारवेदादिप्रभवत्वहेतु-कानुमाने च, निदर्शनविरहेण विशेषव्याप्तेर्दुर्ग्रहतया सामान्यमुखव्याप्तिमभिधित्समानोऽप्रयोजकताशङ्कां च अकारणकार्योत्पत्तिप्रसङ्गेनापाचिकीर्षुः, कतिपयपदावृत्त्युपगमेन न्यूनतामपनिनीषुर्योजनां दर्शयति बादरायण इत्यादिरुन्नेय इत्यन्तेन ।

काशी०— गुरुर्गुरूणामित्यादौ हेतुहेतुमद्भावानुसारेण पदानि योजयन् व्याचष्टे यत इति । यतःशब्दस्य तदर्थत इतिवच्चतुर्थ्यन्तत्वभ्रमभङ्गाय हेतुपञ्चम्यन्तत्वं स्फुटयति यत्कारणमिति । यस्मादित्येवोक्तेऽपादानपञ्चमीभ्रमः स्यादतो न तथोक्तम् । तथा च यत इत्यस्य यत्कारणमित्यर्थः । यतो बादरायणो गुरूणां गुरुरिति योजना । यद्वा । यत इति प्रतीकमुपादाय यत्कारणमित्यादिना श्लोको व्याख्यायते । अत्र च निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति कात्यायनस्मृतेः प्रथमाप्रयोगः । यस्मात्कारणादित्युक्तेऽपि पञ्चम्याः शब्दसाधुत्वमात्रार्थत्वादिति परिमळः । अथ कारणस्य विभक्त्यर्थज्ञाप्यत्वद्वारैव गुरुगुरुत्वेऽन्वयस्य वाच्यतया तस्या निरर्थकत्वेऽन्वयानुपपत्तिः । न च ज्ञाप्यत्वसंबन्धेन तस्य तत्रान्वय इति युक्तम् । नामार्थयोर्भेदेनान्वयानुपगमात् । न चाभेदेनैवान्वयः । यत्कारणाभिन्नं गुरुगुरुत्वम् । तस्माद्गुरुगुरुत्वान्मानमित्यर्थोपपत्तेरिति वाच्यम् । तथाऽप्येकदेशान्वयापत्तेः । यत्कारणं धूमवानित्यादौ कारणसापेक्षत्वादसामर्थ्येन धूमपदोत्तरं तद्धिताद्यनुपपत्तेश्च । मैवम् । उक्तस्मृतिबलेनैतादृशस्थलेषु नामार्थयोरपि भेदान्वयादिकमुपेत्य कारणस्य ज्ञाप्यत्वसंबन्धेन गुरुगुरुत्वान्वयस्य निर्वाह्यत्वात् । न चैवं यज्ज्ञाप्यं गुरुगुरुत्वादि तज्ज्ञाप्यं मानत्वमित्येव लभ्यते न तु गुरुगुरुत्वादिज्ञाप्यं मानत्वमिति विवक्षितार्थ इति वाच्यम् । गुरुगुरुत्वादिज्ञापकस्य गुरुगुरुत्वादिज्ञापनद्वारैव मानत्वज्ञापकताबोधोपगमेन तत एव मानत्वे गुरुगुरुत्वज्ञाप्यत्वलाभात् । उक्तवार्तिकस्य निमित्तपर्यायप्रयोगे सर्वविभक्तीनां हेत्वर्थकत्वपरतया शाब्दिकैर्व्याख्यातत्वेन यत्कारणमित्यत्र यदिति प्रथमाया एव हेत्वर्थता । कारणपदं तु तदर्थतात्पर्यग्राहकमेव । तस्य च गुरुगुरुत्वेऽन्वयः । पूर्ववत्तत्राभेद एव विभक्त्यर्थ इत्यप्याहुः । अन्ये तु । यत इत्यस्य यत्कारणमिति न व्याख्या किन्तु यस्य शास्त्रस्य कारणमिति बादरायणविशेषणं यस्येत्यस्येदं शास्त्रमिति संबन्ध इत्याहुः । गुरुगुरुत्वमात्रस्य विवक्षितार्थतत्त्वज्ञानासाधकत्वाद्गुरूणामित्यस्य जगद्गुरूणा-मित्युक्तार्थकतामाह जगत इति । यत इत्यस्यात्र सकृदेवानुवृत्तये कल्पान्तरमाह गुरूणामिति । एतद्विशेषणेन

सार्वज्ञ्यसिद्ध्यर्थमशेषेति पटुकरणत्वसिद्ध्यर्थं सविस्तराणामिति च व्याख्यातम् । यद्यपि शास्त्राणां प्रभव इत्यनेनैव बह्वागमप्रभवत्वं लभ्यते । तथाऽपि न तावन्मात्रमपटुकरणत्वसाधकं किं त्वसति बाधक इत्यतो बाधकासत्त्वसिध्यर्थं सविस्तराणामित्युक्तम् । ग्रन्थतोऽतिविशदानामित्यर्थः । सति बाधकेऽतिविशदबह्वागमप्रभवत्वमनुपपन्नमिति भावः । उपदेष्टृत्वादिरूपगुरुत्वस्य स्वातन्त्र्येण बादरायणविशेषणत्वे प्रकृतानुपयोगादाह गुरुर्मुख्य इति । स्वयमेवोपलब्ध-शास्त्रार्थ इत्यर्थः । एतच्चोज्जहार हरिः स्वयमिति वक्ष्यमाणवचने स्वयंपदसूचितमिति ज्ञेयम् । एतद्व्यावर्त्यमाह न त्विति । वेदादिभ्योऽर्थमुपलभ्य तद्व्याख्यातारः संप्रदायमात्रप्रवर्तकाः । तेऽपि तत्प्रभवा इत्युच्यन्ते । ऋग्वेद एवाग्नेरजायतेत्यादौ तद्व्यावृत्त्यर्थं गुरुपदमिति भावः । एतेन गुरुपदस्य प्रभवपदमुख्यार्थविवक्षामात्रसूचकत्वा-न्निरर्थकमित्यपास्तम् । उक्तार्थबोधकत्वात् । शास्त्रनिर्माणक्रियां प्रत्यजादीनां श्रवणरूपफलभागित्वेनाभिप्रेत-त्वात्संप्रदानत्वमित्यजादिभ्य इति चतुर्थीज्ञापनाय श्रोतृभ्य इत्युक्तम् । सार्वविभक्तिकतसिमभिप्रेत्य व्याचष्टे तस्मा इति । पूर्वश्लोकाच्छास्त्रमिति विशेष्यपदमेतच्छास्त्रपरं प्रथमान्तमनुषञ्जनीयमिति भावेनाह इदमिति ।

गूढ०— निमित्तकारणहेतुप्रयोगे सर्वासामिष्टिरित्यनुरोधादाह यत्कारणमिति । ननु गुरूणां गुरुरित्यादीनां प्रत्येकं वा हेतुत्वं मिलितानां वा । नाद्यः । गुरूणां गुरुत्वस्य शास्त्रप्रभवत्वमात्रस्य वा बुद्धादिषु सत्त्वेन व्यभिचारात् । न द्वितीयः । विशेषणवैयर्थ्यापातात् । किञ्च गुरूणां गुरुत्वस्य शास्त्रप्रभवत्वस्य च पाणिन्या(कपिला)दिसाधारणत्वान्न तेन तदुदितस्य प्रामाण्यसिद्धिः । किञ्च तदर्थत इत्यत्र हेतौ पञ्चमी । एवं च अर्थाद्व्यादेर्हेतोरित्युक्तं भवति । तच्चायुक्तं द्रव्यादेर्वचनाकारणत्वादित्यतोऽन्वयप्रदर्शनपूर्वकं व्याख्याति यत इति । हेत्वर्थे पञ्चमीति द्योतयितुं यत्कारण-मित्युक्तम् । संप्रदायप्रवर्तकत्वेनैवास्य गुरुत्वं न तु शास्त्रकर्तृत्वेनेत्यतो योजनान्तरमाह गुरूणामिति । गुरुत्वं द्वेधा अर्थबाहुल्येन वा शब्दबाहुल्येन वेत्याशयेनार्थद्वयकथनम् अज्ञेषार्थेति । सार्वविभक्तिकस्तसिरितिन्यायेन चतुर्थ्यर्थेऽपि तसिरित्याशयेनोक्तं तस्मै तदर्थत इति ।

॥ अनुत्तमप्रामाण्यसाधनम् ॥

साक्षात्परंपरया च साध्यनिर्देशः—

४३ सु०— अत्र गुरुर्गुरूणामित्यादिहेतूनां वक्तृश्रोतृप्रसङ्गानामानुकूल्यान्येव साक्षा-त्साध्यानि, मानमिति तु परमसाध्यनिर्देश इति ज्ञातव्यम् । तथा हि । विवक्षितार्थतत्त्वज्ञानं, करणपाटवं, विवक्षा चेति त्रयं वक्तुरानुकूल्यं नाम । तत्त्वज्ञानयोग्यता वक्तृप्रीतिविषयता चेति द्वयं श्रोतुः । श्रोतृप्रयोजनोद्देशः प्रसङ्गस्य ।

परि०— इति ज्ञातव्यमिति । अयं भावः । यत इति श्रवणात्प्राप्तं अत इत्येतदावर्त्यम् । अत एतच्छास्त्रमनुकूलवक्तृकं शास्त्रप्रभवत्वादिविशिष्टेनोक्तत्वात् भारतादिवत् । विमतमनुकूलश्रोतृकं जगदुपदेष्टृभ्यो अजादिभ्य उपदिष्टत्वात् । विमतमनुकूलप्रसङ्गोपेतं श्रोतृप्रयोजनोद्देशशब्दत्वात् भारत-

वदेवेत्यतःशब्दोक्तहेतुत्रयपरामर्शेन साध्यत्रयम् । तथैतच्छास्त्रं मानं भवितुमर्हति अनुकूल्यवक्त्रादिमत्त्वात् भारतवदिति । अनुकूल्यवक्तृत्वादिरतःशब्दार्थ इति । अनुकूल्यवक्त्रादिमत्त्वमपि प्रामाण्ये साक्षान्न हेतुः । किन्तु आप्तवाक्यत्वसाधनद्वारेत्याह व्यक्तमिति परमसाध्यनिर्देश इत्येवोक्तम् । आद्यसाध्यत्रयं हेतुत्रयं नाप्रयोजकमिति उपपादयति तथा हीत्यादिना ॥ श्रोतुरिति । आनुकूल्यमित्यनुषङ्गः । एवमग्रे अपि ।

गु०दी०— विवक्षितार्थतत्त्वज्ञानं करणपाटवं चेत्यत्र अविप्रलिप्साऽपि ग्राह्या ।

बं०प०— प्रयोजनोद्देशो वक्तुः ।

आनन्दः— ननु गुरूणां गुरुरित्यादेः प्रामाण्ये वा हेतुत्वं वक्त्राद्यानुकूल्ये वा । नाद्यः । तथा सति चतुर्विधमिति वक्तव्यम् । एवं च त्रिविधमित्यनेन विरोधः । द्वितीये मानमिति साध्यनिर्देशायोग इत्यत आह अत्रेति । ननु वक्तृश्रोतृप्रसक्तीनामानुकूल्यानि किंरूपाणि तत्र हेतवश्च के इत्यत आह तथा हीति ।

वा०चं०— अत्रैतच्छ्लोकोक्तं मानमिति एतदेनच्छ्लोकोक्तहेत्विति न साक्षात्साध्यम्, अपि तूत्तरश्लोकोक्तवक्त्राद्यानुकूल्यादीन्येव साक्षात्साध्यानि; परमसाध्यनिर्देशत्वाच्च मानमित्यस्य न वैयर्थ्यम्, उपपत्तिं तूत्तरत्र वक्ष्यामः; इत्यभिप्रेत्य वक्त्राद्यानुकूल्यादेरेतैर्हेतुहेतुमद्भावं घटयितुं वक्त्राद्यानुकूल्यादिस्वरूपविवेचनाय प्रसक्तिं आह अत्रेत्यादिना ।

वा०र०— श्लोकोक्तेनेति । एतच्छ्लोकोक्ते नियोज्यम् । परमसाध्यनिर्देशत्वाच्चेति । वैयर्थ्यं चेति संबन्धः । उत्तरत्रेति । नन्वत्र गुर्ल्गुरूणामित्यादिहेत्वनामित्यादिनेति शेषः । अभिप्रेत्येति । एतच्छ्लोकोक्त्यादिनैव मूलानुवादरूपेण्यत्र वाक्ये उपयुक्ताधिकप्रतिपादनादभिप्रेत्येति युक्तम् । प्रसक्तिमाहेति । गुरूणां गुरुरिति वक्तुरित्याद्युपपादनस्य साक्षात्साध्यत्वोक्तिमूलकत्वेन तदुपपादनोपयोगितया प्रसक्तिमाहेत्यर्थः । श्रोतुः प्रसङ्गस्येति मूले आनुकूल्यं नामेति वर्तते ।

कुण्डल०— ननु गुरुगुरुदितत्वादीनां शास्त्रप्रामाण्यं प्रति साक्षादनुमापे वक्त्राद्यानुकूल्यस्य प्रामाण्यसाधकत्वव्युत्पादकत्वक्ष्यमाणग्रन्थविरोध इत्यत आह अत्रेति । साक्षात्साध्यानीति । बादरायणः विवक्षितार्थतत्त्वज्ञानादिमान् गुरूणां गुरुत्वादिहेतोरित्यादिप्रयोगोऽत्र द्रष्टव्यः ।

काशी०— अत्र गुर्ल्गुरूणामित्यादिहेतुभिः साक्षात्प्रामाण्यसाधनस्याभिप्रेतत्वे दोषस्य वक्ष्यमाणत्वादाह अत्रेति । आनुकूल्यानि विवक्षितार्थतत्त्वज्ञानादीनि साध्यानि विवक्षितानीति शेषः । तथा च तदुदितमित्यनन्तरमतोऽत्र वक्तृश्रोतृप्रसक्तीनामनुकूलतेति वक्ष्यमाणानुकर्षः कार्य इति भावः । तर्हि मानमित्यस्यानन्वय इत्यत आह परमेति । पर्यवसितेत्यर्थः । एवं च मानमित्यस्य साध्यनिर्देशत्वज्ञापनार्थमेवातो मानं भवितुमर्हतीत्युक्तं न तु तथा योजना ।

किं तु अतोऽत्र वक्तृश्रोतृप्रसक्तीनामनुकूलता यत एवमतः सिद्धयाऽऽप्तवाक्यतया मानमिति वक्ष्यमाणदिशैवेत्यवधेयम्। अत्र विवक्षितहेतुसाध्यविवेकाय वक्त्राद्यानुकूल्यं निर्वक्ति तथा हीत्यादिना। परिमळकृतस्तु एतच्छास्त्रमनुकूलवक्तृकं शास्त्रप्रभवोदितत्वात्तथाऽनुकूलश्रोतृकं जगद्गुरुभ्यो ब्रह्मादिभ्य उपदिष्टत्वात्तथाऽनुकूलप्रसङ्गकं श्रोतृमोक्षांदेशवत्त्वात् भारतादिवदित्यनुमानत्रये साक्षादित्यनेन विवक्षितेऽप्रयोजकत्वाभावमुपपादयति तथा हीत्यादिनेत्याहुः। विवक्षितार्थतत्त्वज्ञानं प्रतिपाद्यार्थप्रमितिः। करणपाटवं स्फुटोच्चारणशक्तिः। विवक्षा बुबोधयिषा। इमांश्च न प्रत्येकं वक्त्रानुकूल्यानि किन्तु समुदितान्येवेत्याह इति त्रयमिति। आनुकूल्यं वाक्यप्रामाण्यप्रयोजकम्। तत्त्वज्ञानयोग्यता विवक्षितार्थप्रमितियोग्यता। वक्तुरिति कर्तृषष्ठी। श्रोतुरित्यादावानुकूल्यमित्यनुषज्यते। श्रोतृप्रयोजनोद्देशः श्रोतृप्रयोजनोद्देश्यकत्वम्। प्रसङ्गस्य प्रणयनप्रवृत्तेः। यद्यपि श्रोतृप्रयोजनोद्देश्यकप्रवृत्तेर्वक्तृधर्मत्वाद्वक्त्रानुकूल्य एवास्यान्तर्भावः संभवति। न च प्रवृत्तेर्वक्तृधर्मत्वेऽपि प्रवृत्तिधर्मस्य श्रोतृप्रयोजनोद्देश्यकत्वस्यातथात्वात्पार्थक्यमिति वाच्यम्। तथात्वे ज्ञानधर्मस्य विवक्षितार्थविषयकत्वादेरपि पार्थक्यापत्तेः। तथाऽपि वक्तुः श्रोतृप्रयोजनेच्छाभावेऽपि यत्र परप्रार्थनादिनैव प्रणयनप्रवृत्तिस्तत्र परेच्छायाः श्रोतृप्रयोजनोद्देश्यकत्वस्य प्रसङ्गानुकूल्यरूपत्वेन तस्य पार्थक्यमेव युक्तमिति भावः।

गूढ०— ननु गुरूणां गुरुरित्यादेः प्रामाण्ये वा हेतुत्वं वक्त्राद्यानुकूल्ये वा। नाद्यः। तथा सति चतुर्विधमिति वक्तव्यम्। एवं च त्रिविधमित्यनेन विरोधः। द्वितीये मानमिति साध्यनिर्देशापात इत्यत आह अत्रेति। ननु वक्तृश्रोतृप्रसक्तीनामानुकूल्यानि किंरूपाणि तत्र हेतवश्च के इत्यत आह तथा हीति।

४४ सु०— तत्र 'गुरूणां गुरुरि'ति वक्तुर्बादरायणस्य विवक्षितार्थतत्त्वज्ञानसाधने हेतुः। यो हि यस्य तत्त्वोपदेष्टा स ततोऽधिकतत्त्वज्ञानवानुपलब्धः। अयं च सर्वज्ञकल्पानां ब्रह्मादीनां तत्त्वोपदेष्टा 'ब्रह्मरुद्रादिदेवेष्वि'त्याद्यागमादवगतः। अतः सर्वज्ञो भवितुमर्हतीति॥

'गुरूणां शास्त्राणां गुरुः प्रभवः' इत्यनेनापि तत्त्वज्ञानं करणपाटवं च साध्यते॥ यो हि यावदर्थप्रतिपादकस्यागमस्य प्रभवः स तावन्तमर्थं तत्त्वतो जानन्नवगतः। अयं चाशेषार्थप्रतिपादकस्यागमस्य प्रभवः; 'अनुक्तं पञ्चभिर्वेदैः', 'उत्सन्नान्भगवान्वेदानि'त्यादिवचनादवगतः। ततो भवितव्यमनेन सर्वज्ञेन॥ यश्च बहोरागमस्य प्रभवः सोऽसति निमित्तान्तरे पटुकरणो दृष्टः। अयं चापारस्य वेदादेः प्रभवः कथमपटुकरणो भवेदिति।

'तवुदितमि'ति वचनेन कार्येण वक्तुर्विवक्षा कारणभूतोपपादिता।

परि०— उपपादयति इत्यागमादिति। 'ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु। ज्ञानं संस्थाप्य भगवान्' इति भाष्योक्तागमादित्यर्थः। 'अनुक्तं पञ्चभिर्वेदैर्न वस्त्वस्ति कुतश्चन' इत्येकं वाक्यम्। 'उत्सन्नान् भगवान्वेदानुज्जहार हरिः स्वयमि'ति अपरम्॥

आनन्द०— नन्वेवं हि व्यासः सर्वज्ञो ब्रह्मादीनां गुरुत्वादिति ह्यनुमानं फलितम्। तदयुक्तम्। सर्वज्ञत्वस्य ब्रह्मादिगुरुत्वस्य चान्यत्र दृष्टान्तेऽभावेन व्याप्तेर्ग्रहीतुमशक्यत्वात्। अस्य ब्रह्मादीनां तत्त्वोपदेष्टृत्वे प्रमाणाभावाद्वेत्यत आह यो हीति। ननु गुरूणां गुरुरित्यनेन सार्वज्ञ्यप्रतिपादनं चेत् गुरूणां शास्त्राणां गुरुः प्रभव इत्यनेन श्रोत्रानुकूल्यप्रतिपादनं वक्तव्यम्। तचायुक्तम्। तत्त्वज्ञानयोग्यत्वादेरप्रतिपादनात्। न चानेन सार्वज्ञ्यमेव प्रतिपाद्यत इति वाच्यम्। तन्मात्रप्रतिपादकत्वे वैयर्थ्यापत्तेः यदि च हेत्वन्तरत्वान्न वैयर्थ्यं तर्हि हेतूनामनेकेषां सत्त्वेनानेकहेतवो वक्तव्या इत्यत आह गुरूणामिति। नन्वेतावता व्यासः सर्वज्ञः करणपाटववांश्च अशेषार्थप्रतिपादकशास्त्रप्रभवत्वादित्यनुमानं फलितम्। तत्र तावद्व्याप्तिरेव ग्रहीतुं न शक्यते। दृष्टान्ताभावात्। किञ्च हेतुरप्यसिद्धः। प्रमाणाभावात्। साध्यद्वये एकस्य शास्त्रप्रभवत्वस्य हेतुत्वप्रकारश्च कथमित्यत आह यो हीति। ननु तथापि विवक्षा केनोक्तेत्यत आह तदुदितमिति। वचनेन कार्येण वचनलक्षणेन कार्येणेत्यर्थः। कारणभूता वचनं कारणभूता।

कं०प्र०— ब्रह्मरुद्रादिदेवेष्विति। 'ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु। ज्ञानं संस्थाप्य भगवान् क्रीडते पुरुषोत्तम' इत्यागमादित्यर्थः। अनुक्तमिति। 'अनुक्तं पञ्चभिर्वेदैर्न वरन्वन्ति कुत्रचने'ति वचनं वेदाद्यागमस्याशेषार्थप्रतिपादकत्वे प्रमाणम्। 'उत्सन्नान् भगवान्वेदान् उज्जहार हरिः स्वयमि'त्यादिवचनं तु वेदव्यासस्य सच्छास्त्रप्रभवत्वे प्रमाणमिति द्रष्टव्यम्।

वा०चं०— 'गुर्गुरुणामि'त्यादुक्तहेतुत्रयस्य क्रमेणानुकूल्यत्रये हेतुत्वमिति भ्रान्तिं वारयितुं यथायोग्यं हेतुसाध्ये विवेचयति तत्रेति। सार्वज्ञ्यमुखेन विवक्षितार्थतत्त्वज्ञानसिद्धेरत्राभिप्रेतत्वात् 'बादरायणः सर्वज्ञः सर्वज्ञकल्पोपदेष्टृत्वादि'ति विवक्षितानुमाने हेतुसाध्ययोर्यथास्थितयोर्व्याप्तिर्लोके दृष्टान्ताभावेन दुर्ग्रहत्वात् उपदेश्याधिकतत्त्वज्ञानरूपसामान्यमुखेन व्याप्तिरनुसन्धेयेत्यभिप्रायेणाह यो हीति। हेतोः पक्षधर्मतामुपपादयति अयं चेति। 'गुरूणामि'त्यस्य पूर्वोक्तमर्थद्वयमभिप्रेत्याह गुरूणामिति। 'बादरायणः सर्वज्ञोऽशेषार्थप्रतिपादकागमप्रभवत्वादि'ति विवक्षितानुमानेऽपि सामान्यव्याप्तिमेवाह यो हीति॥ वेदाद्यागमस्याशेषार्थप्रतिपादकत्वे, तस्य च तत्प्रभवत्वे, क्रमेण प्रमाणं वदन् अस्यापि पक्षधर्मताम् आह अयं चेति। आदिपदेन 'व्यासो भूत्वा च तेन च। वेदादपि परं चक्रे पञ्चमं वेदमुत्तमम्' इत्यादेः सङ्ग्रहः। 'बादरायणः पटुकरणोऽपारवेदाद्यप्रभवत्वादि'ति विवक्षितानुमाने, विशेषे व्यभिचारशङ्काऽनवकाशात्पक्षधर्मताकथनावसरे विशेषणमनुपादाय, बह्वागमप्रभवस्यापि दोषवशादपटुकरणत्वदर्शनात् सामान्यव्याप्तौ तदवकाशात्तद्व्यावर्तकविशेषणप्रक्षेपेण सामान्यव्याप्तिमाह यश्चेति॥ 'बादरायणो विवक्षावान् वचनवत्त्वादि'ति विवक्षितानुमाने व्याप्तिं सूचयितुं, कार्यकारणयोर्व्याप्यव्यापकभावस्य सुप्रसिद्धत्वादनयोः कार्यकारणभावं सूचयति तदिति॥

वा०र०— हेतुत्रयस्येति। गुर्गुरुणोदितत्वशास्त्रप्रभवोदितत्वाजादिभ्यस्तदर्थन उदितत्वरूपहेतुत्रयस्य इत्यर्थः। भ्रान्तिमिति। अयोग्यांशे विवक्षया भ्रान्तित्वोक्तिः। सार्वज्ञ्यमुखेनेति। सर्वज्ञस्यैव विष्णोर्निरतिशयं विवक्षितार्थतत्त्वज्ञानग्रन्थकृत्संमतं सिद्ध्यतीति तदर्थमध्ये सार्वज्ञ्यं साधनीयम्। एकं त्वतत्त्वत इति वचनादिति भावः। वक्ष्यति च मूलकारः निरवधिकं हि तत्राप्त्यादिकमिति। यथास्थितयोर्व्याप्तिरिति। विशिष्य व्याप्तेरित्यर्थः।

लोकेति । लोके यो दृष्टान्तस्तदभावेनेत्यर्थः । **उपपादयतीति** । उपदेष्टा भवतीत्यनुक्त्वा आगमादवगत इति उक्तेरुपपादयतीत्युक्तम् । **अर्धद्वयमभिप्रेत्येति** । अशेषार्थप्रतिपादकत्वसविस्तरत्वरूपेत्यर्थः । सविस्तरत्वार्थकेति वक्ष्यमाणरीत्या करणपाटवस्योपपादनीयत्वादिति सिद्धम् । **सामान्येति** । लोकदृष्टान्ताभावेनेति वर्तते । एवम् उत्तरत्रापि । **तस्य चेति** । बादरायणस्येत्यर्थः । अनुक्तं पञ्चभिर्वेदैरित्यादिमूलोक्तप्रमाणस्य वेदप्रभवत्वादौ प्रमाणया भारतादेरशेषार्थप्रतिपादकत्वविष्णोस्तत्प्रभवत्वप्रतिपादकतया न विवक्षितार्थसिद्धिरित्यत आदिपदसङ्गृहीत-मुक्तार्थप्रतिपादकं प्रमाणं दर्शयति **आदिपदेनेति** । गीताप्रामाण्यसमर्थनपरगीताभाष्यटीकोक्तरीत्या तदुपपादन-रूपास्मदुक्तप्रकारेणात्र तद्वाक्यार्थो ज्ञेयः । **विशेष इति** । विशेषव्याप्तावित्यर्थः । अनेनापारस्य वेदादेः प्रभव इत्येतावन्मात्रं न न्यूनमिति दर्शितं भवति । **सुप्रसिद्धत्वादिति** । धूमाग्न्यादिष्विति शेषः । सूचयतीत्यस्य दर्शयतीत्यर्थः ।

कुण्डल०— **ब्रह्मरुद्रादिदेवेष्विति** । 'ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु । ज्ञानं संस्थाप्य भगवान् क्रीडते पुरुषोत्तम' इत्याद्यागमादवगत इत्यर्थः । **अनुक्तमिति** । अनुक्तं पञ्चभिर्वेदैर्न वस्त्वस्ति कुतश्चनेति वचनम् । वेदानामशेषार्थविदकत्वे मानम् । 'उत्सन्नान् भगवान् वेदानुज्जहार हरिः स्वयम्' इत्यादिकं तु भगवतो बादरायणस्य वेदादिशास्त्रप्रभवत्वे मानमित्यवधेयम् । **निमित्तान्तरत इति** । शापरोगादिनिमित्तान्तर इत्यर्थः ।

काशी०— **तत्रेति** । निरुक्तवक्त्राद्यानुकूल्यमध्य इत्यर्थः । अस्य विवक्षितेत्यादिसाध्यैः संबन्धः । अत्र यत्किञ्चिदर्थतत्त्वज्ञानस्य शास्त्रप्रामाण्यसाधनानुपयुक्तत्वाद्विवक्षितयावदर्थतत्त्वज्ञानमेव साध्यम् । तत्र च गुरुगुरुत्वमात्रस्य तदसाधकत्वाद्ब्रह्मादिगुरुत्वमेव हेतुत्वेन विवक्षणीयम् । ब्रह्मादीनां गुरुत्वोक्तेः प्रयोजनं तु वक्ष्यते । तथा च दृष्टान्ताभावेन व्याप्यसिद्धिः । साध्ये यत्पदार्थाप्रवेशेन सामान्यव्याप्तेरप्ययोगात् । अतो ब्रह्माद्यधिकतत्त्व-ज्ञानमेव साध्यत्वेन विवक्षणीयम् । एवं च बादरायणो ब्रह्माद्यधिकतत्त्वज्ञानवान् ब्रह्मादिगुरुत्वादित्यनुमाने सामान्यव्याप्तिः सुलभैवेति भावेनाह **यो हीति** । पितृत्वादिना गुरुत्ववति व्यभिचारशङ्कावारणाय तत्त्वोपदेष्टे-त्युक्तम् । हेतोः पक्षधर्मतामुपपादयति **अयं चेति** । **सर्वज्ञत्वेनोपसंहारसिद्धये सर्वज्ञकल्पानामित्युक्तम्** । यद्यपि विवक्षितार्थतत्त्वज्ञानमात्रं वक्त्रानुकूल्यघटकं न तु सार्वज्ञ्यम् । तथाऽपि सार्वज्ञ्यसिद्धावज्ञानाद्यप्रसक्त्या सुतरां तत्सिद्धिरिति भावेन सार्वज्ञ्येनोपसंहारः कृतः । **अथ तदधिकतत्त्वज्ञानवत्त्वं यदि तदज्ञातज्ञातृत्वं तदा** तज्ज्ञाताखिलज्ञातृत्वासिद्ध्या विवक्षितसार्वज्ञ्यासिद्धिः । यदि च तज्ज्ञाताखिलज्ञातृत्वे सति तदज्ञातज्ञातृत्वं तदा व्यभिचारः । गुरोः शिष्यज्ञाताखिलज्ञातृत्वानियमात् । न च गुरोः शिष्यज्ञातघटाद्यज्ञातृत्वेऽपि तज्ज्ञाताखिल-शास्त्रार्थज्ञातृत्वस्य विवक्षितत्वान्न दोष इति वाच्यम् । गुर्वन्तराधिगतशास्त्रान्तरस्य व्यभिचारात् । मैवम् । यो यस्य यच्छास्त्रोपदेष्टा स ततोऽधिकतच्छास्त्रार्थज्ञानवानिति व्याप्तेर्विवक्षितत्वात् । न च यो यच्छास्त्रोपदेष्टा स तदर्थ-ज्ञानवानितिव्याप्तेः संभवादधिकवैयर्थ्यमिति वाच्यम् । शास्त्रार्थज्ञानमात्रसाधने सार्वज्ञ्यासिद्धेः । शास्त्रविवक्षित-यावदर्थज्ञानसाधने च यथाश्रुतशास्त्रोपदेष्टरि व्यभिचारात् । न च यो यस्येत्युक्तेऽप्युपदेष्टुरुपदेश्याधिक-शास्त्रार्थज्ञानवत्त्वानियमाद्व्यभिचारो दुर्वार उपदेश्यस्य मननादिना ज्ञानाधिक्यसंभवादिति वाच्यम् । स्वोप-

दिष्टार्थज्ञानाधिकज्ञानस्यैव विवक्षितत्वात् । न चैवं यस्य तत इत्यस्य वैयर्थ्यम् । यो यस्य तत्त्वोपदेष्टा स स्वोपदिष्टयावदर्थज्ञानवत्त्वे सति तदज्ञातार्थज्ञानवानिति व्याप्तेर्विवक्षितत्वात् । तत्र यस्य तत इत्यस्य त्यागेऽज्ञातार्थ-ज्ञानवानित्यस्य व्याघातात् । यद्वा । यो यस्य यच्छास्त्रोपदेष्टा स तच्छास्त्रार्थग्रहणोपयुक्तयावदर्थज्ञानवत्त्वे सति तदज्ञाततच्छास्त्रार्थज्ञानवानित्यर्थो विवक्षितः । तेन गुरोः शिष्यज्ञाततद्घटाद्यज्ञातृत्वेऽपि न क्षतिः । तज्ज्ञानस्य शास्त्रार्थग्रहणानुपयुक्तत्वात् । न वा मननादिना शिष्यस्य ज्ञानाधिक्ये व्यभिचारः । वेदादिसर्वशास्त्रोपदेष्टुर्बादरायणस्य तदर्थग्रहणोपयुक्तयावदर्थज्ञानादिसिद्धौ च सार्वज्ञ्यमेव सेत्स्यतीति दिक् । सर्वज्ञो भवितुमर्हतीत्यनेन मुख्तः सार्वज्ञ्यासिद्धावपि फलतस्तत्सिद्धिरिति सूचितम् । द्वितीययोजनायां तु मुख्त एव सार्वज्ञ्यसिद्धिरिति भावेनाह गुरूणामिति । उक्तगुरुशब्दार्थद्वयस्य प्रत्येकं साध्यद्वयसाधनोपयुक्ततामिप्रायेण प्रत्येकं साध्यद्वयमुक्तम् । अत्र विवक्षितार्थतत्त्वज्ञानस्य वक्त्रानुकूल्यघटकत्वेनोद्देश्यत्वादेव ग्रहणम् । वस्तुतः सार्वज्ञ्यमुखेनैव साध्यतेत्यभिप्रायं स्फुटयति यो हीति । अनेन बादरायणः सर्वज्ञः सर्वार्थप्रतिपादकागमप्रभवत्वात् । यो यावदर्थप्रतिपादकागम-प्रभवः स तावदर्थज्ञो यथा संप्रतिपन्नाप्तपुरुष इत्युक्तं भवति । अत्र यद्यपि प्रतिपादकत्वं न वाचकत्वरूपम् । गौरस्तीत्यादिवाक्यप्रयोक्तुर्वागादिरूपगोशब्दवाच्यार्थज्ञानानियमेन व्यभिचारात् । नापि बोधकत्वरूपम् । उक्त-वाक्यात्तात्पर्यग्रमादिना वागादिबोधस्यापि संभवेन तदोषात् । किन्तु बोधपरत्वरूपम् । तथा च यो यावदर्थ-बोधतात्पर्यवानसौ तावदर्थज्ञ इत्येव लाघवान्साध्यक् । न च नावदर्थतत्त्वज्ञानसिद्धये नावदर्थकागमप्रभवत्व-पर्यन्तप्रवेश इति वाच्यम् । यो यावदर्थतत्त्वबोधतात्पर्यवानसौ तावदर्थतत्त्वबोधवानित्यनेनैव सामञ्जस्यात् । न च यथा सन्निवेशादवैयर्थ्यं तावताऽपि तादृशागमोपदेष्टृत्वेनैव सामञ्जस्ये प्रथमोपदेष्टृत्वरूपप्रभवत्वपर्यन्त-प्रवेशवैयर्थ्यस्य दुर्वारत्वात् । तथाऽप्यन्यकर्तृकागमोपदेष्टुरतद्विवक्षितयावदर्थज्ञत्वानियमेन व्यभिचारवारणाय प्रभवत्वनिवेशनमावश्यकम् । अत एवागमांशनिवेशोऽपि सार्थकः । तत्प्रभवत्वस्य तत्सापेक्षत्वात् । अन्यथा सर्वार्थबोधतात्पर्यस्यासिद्धया तेन सार्वज्ञ्यसाधनयोगात् । सर्वार्थप्रतिपादकागमप्रभवत्वेन सर्वार्थबोधतात्पर्यं प्रसाध्य तेन तत्साधने त्वतिगौरवात् । वेदादेरदोषार्थप्रतिपादकत्वे व्यासस्य तत्प्रभवत्वे च प्रमाणमाह अनुक्तमिति । 'अनुक्तं पञ्चमिर्वेदैर्न वस्त्वस्ति कुतश्चने'त्याद्यम् । 'उत्सन्नान् भगवान्वेदानुज्जहार हरिः स्वयमि'ति द्वितीयम् । आदिना 'इतिहासपुराणः पञ्चमो वेदानां वेदः', 'वेदादपि परं चक्रे पञ्चमं वेदमुत्तममि'त्यादेः परिग्रहः । उक्तस्मृतीनां परोक्तानुवादत्वान्न क्षुद्रोपद्रवः । यद्यपि शास्त्रस्य सामान्यतोऽदोषार्थप्रतिपादकत्वे तत्प्रभवस्य न सार्वज्ञ्यसिद्धिः । असर्वज्ञस्यापि प्रमेयत्वादिना सर्वार्थप्रतिपादनसंभवात् । प्रातिस्विकतया सर्वार्थप्रतिपादनं तु शास्त्रेऽपि नास्ति । गङ्गावालुकापरिगणनस्य शास्त्रेणाकरणात् । तथाऽपि येन येन रूपेण यावदर्थज्ञानं मोक्षोपयोगि तत्तद्रूपाव-च्छिन्नतावदर्थप्रतिपादकत्वमेवाशेषार्थप्रतिपादकपदेन विवक्षितम् । तत्तद्रूपावच्छिन्नतावदर्थज्ञानमेव प्रकृते सार्वज्ञ्यं तावतैव वक्त्रानुकूल्यसिद्धेः । वस्तुतस्तु तत्तद्वस्तुगतभगवद्रूपविशेषाणां विशिष्य ब्रह्मादिज्ञेयतया शास्त्रे तत्तद्वस्तु-प्रतिपादनमावश्यकम् । तच्च तदादिपदेनैव केनचिदुपलक्षणेन सामान्यरूपेणापि संभवति । तत एवाधिकारिणां विशिष्य तत्तद्वस्तुज्ञानसंभवात् । तादृशज्ञानजनकशास्त्रप्रभवत्वेनैव नित्यचरितसार्वज्ञ्यसिद्धिः । निगमयति अत इति । अथ कथमसर्वज्ञानां सार्वज्ञ्यानुमितिः सर्वज्ञानं विना सर्वविशेषितज्ञानासंभवात् । न चासर्वज्ञानामपि सर्वत्वेन

सर्वज्ञानसम्भवान्न दोष इति वाच्यम् । तथा सत्यनुमानेनापि सर्वत्वेन सर्वज्ञानस्यैव सिद्धयापत्तेः । न च सर्वधर्मावच्छिन्नज्ञानवत्त्वस्य साध्यत्वान्नोक्तदोष इति वाच्यम् । सर्वं धर्मोपेतमिति ज्ञानस्य धर्मत्वेन सर्वज्ञानस्यैव सिद्धयापत्तेः । न च सर्वधर्मावच्छिन्नज्ञानवत्त्वस्य साध्यत्वान्नोक्तदोष इति वाच्यम् । सर्वं धर्मोपेतमिति ज्ञानस्य धर्मत्वेन सर्वधर्मावच्छिन्नविषयकत्वासिद्धयाऽप्यनुमाननिर्वाहात् । न च धर्मानवच्छिन्नसर्वधर्मविषयकज्ञानवत्त्वं साध्यम् । धर्मोपेतमिति ज्ञानस्य च धर्मत्वरूपधर्मेण सर्वधर्मावगाहित्वाद्वचुदास इति वाच्यम् । जात्यादिवद्रूपरसादिधर्माणां स्वरूपतो भाने मानाभावेन रूपवानित्यादिज्ञानस्य रूपत्वाद्यवच्छिन्नरूपादिविषयताकत्वनियमेन धर्मानवच्छिन्नसकलधर्मविषयकज्ञानाप्रसिद्धेः । मैवम् । धर्मानवच्छिन्नसकलाखण्डधर्मविषयकज्ञानवत्त्वरूपसार्वज्ञ्यस्य साध्यत्वे दोषाभावात् । तत्तद्व्यक्तित्वरूपाखण्डधर्मप्रकारेण सकलवस्तुविषयकज्ञानसिद्धयोद्देशसिद्धेः । असर्वज्ञस्य तत्तद्व्यक्तित्वेन सर्ववस्तुज्ञानाभावेऽपि धर्मानवच्छिन्नसकलाखण्डधर्मविषयताकं ज्ञानमिति ज्ञानसंभवेन सार्वज्ञ्यानुमितिसंभवात् । अखण्डत्वं च स्वरूपतो भासमानत्वम् । अनवच्छिन्नविषयतावत्त्वमिति यावत् । वस्तुतो विषयितासंबन्धावच्छिन्नप्रतियोगिताकाभावानधिकरणज्ञानवत्त्वं सार्वज्ञ्यं ईश्वरज्ञाने सर्वस्य विषयितासंबन्धेन सत्त्वान्न तदभावः संभवति । अस्मदादिज्ञाने च प्रमेयत्वादिना सर्वविषयिण्यपि प्रातिस्विकतत्तद्व्यक्तित्वादिविशिष्टस्य विषयितासंबन्धावच्छिन्नाभावसत्त्वान्नातिव्याप्तिः । न चेश्वरज्ञानस्य सन्मात्रविषयतया तत्र शशविषाणादेर्विषयितासंबन्धावच्छिन्नाभावसत्त्वादसंभव इति वाच्यम् । ईश्वरस्य शशविषाणमस्तीत्यादिज्ञानाभावेऽपि तन्नास्तीत्यादिज्ञानसत्त्वेन तत्र विषयितासंबन्धावच्छिन्नशशविषाणाद्यभावासंभवात् । ईदृशं च सार्वज्ञ्यं नासर्वज्ञदुर्ज्ञेयम् । अस्मिन्पक्षे चेश्वरस्य सखण्डाखण्डनिखिलधर्मावच्छिन्नविषयकज्ञानसिद्धिर्बोध्या । एवं हेतावशेषार्थप्रतिपादकपदेन न सामान्यतः सर्वार्थप्रतिपादकत्वं विवक्षितम् । सर्वं प्रमेयमित्यादिवाक्यप्रभवे व्यभिचारात् । नापि विशिष्यसर्वार्थप्रतिपादकत्वं प्रतिपादकत्वसंबन्धावच्छिन्नाभावानधिकरणत्वपर्यवसितम् । वेदादेरपि विशिष्य विष्णुगतगुणविशेषाप्रतिपादकत्वेनासिद्धेः । किन्तु जीवज्ञेयतावच्छेदकयावद्धर्मावच्छिन्नप्रतिपादकत्वम् । जीवज्ञेयतावच्छेदकधर्मावच्छिन्नप्रतिपादकतासंबन्धावच्छिन्नप्रतियोगिताकाभावानधिकरणत्वपर्यवसितं बोध्यम् । (ज्ञाने च प्रमेयत्वादिना सर्वविषयिण्यपि प्रातिस्विकतत्तद्व्यक्तिविशिष्टस्य विषयितासंबन्धावच्छिन्नाभावसत्त्वान्नातिव्याप्तिः ।) यद्यप्येकैकशास्त्रस्य नोक्तयावदर्थप्रतिपादकत्वम् । तथाऽपि तत्समुदायस्य विवक्षितं निरुक्तयत्किञ्चिदभावधर्मितानवच्छेदकसमुदायत्वावच्छिन्नप्रभवत्वं हेतुरिति निष्कर्षः । वेदादिसमुदाये च किञ्चिदर्थप्रतिपादकत्वाभावस्याप्रतीत्या तत्समुदायत्वस्य तद्धर्मितानवच्छेदकत्वान्नासिद्धिः । एवं ब्रह्मादीनां योग्यसर्वज्ञत्वादिकं निर्वक्तव्यम् । बादरायणस्य वक्त्रागमप्रभवत्वेन पटुकरणत्वसिद्धावपि ब्रह्मसूत्रनिर्माणदशायां तदभावशङ्क्या सूत्राप्रामाण्यशङ्कापत्तेरपटुकरणत्वाभाव एव साधनीयः । तत्र च जरामयादिना पटुकरणत्वापायवति व्यभिचारवारणार्थमसति बाधक इत्युक्तम् । न च यो यदा वक्त्रागमप्रभवः स तदा पटुकरण इत्युक्तावपि न दोष इति वाच्यम् । आगमशब्देन शब्दराशिमात्रविवक्षायामपटुकरणस्यापि तत्प्रभवत्वसंभवेन व्याप्यसिद्धेः । प्रमाणशब्दराशिविवक्षायां ब्रह्मसूत्रप्रामाण्यनिर्णयात्पूर्वं तन्निर्माणकालीनप्रमाणशब्दप्रभवत्वरूपहेत्वसिद्धेः । अतः कदाचिद्विद्यमानस्य निर्णीतप्रामाण्यकवक्त्रागमान्तरप्रभवत्वस्यैव हेतुत्वं वाच्यमित्युक्तविशेषणमावश्यकम् । एवं च पटुकरण इत्यस्य पटुकरण एव न त्वपटुकरण इत्यर्थः । अत एव

दिष्टार्थज्ञानाधिकज्ञानस्यैव विवक्षितत्वात् । न चैवं यस्य तत इत्यस्य वैयर्थ्यम् । यो यस्य तत्त्वोपदेष्टा स स्वोपदिष्टयावदर्थज्ञानवत्त्वे सति तदज्ञातार्थज्ञानवानिति व्याप्तेर्विवक्षितत्वात् । तत्र यस्य तत इत्यस्य त्यागेऽज्ञातार्थज्ञानवानित्यस्य व्याघातात् । यद्वा । यो यस्य यच्छास्त्रोपदेष्टा स तच्छास्त्रार्थग्रहणोपयुक्तयावदर्थज्ञानवत्त्वे सति तदज्ञाततच्छास्त्रार्थज्ञानवानित्यर्थो विवक्षितः । तेन गुरोः शिष्यज्ञातघटाद्यज्ञातृत्वेऽपि न क्षतिः । तज्ज्ञानस्य शास्त्रार्थग्रहणानुपयुक्तत्वात् । न वा मननादिना शिष्यस्य ज्ञानाधिक्ये व्यभिचारः । वेदादिसर्वशास्त्रोपदेष्टुर्बादरायणस्य तदर्थग्रहणोपयुक्तयावदर्थज्ञानादिसिद्धौ च सार्वज्ञ्यमेव सेत्स्यतीति दिक् । सर्वज्ञो भवितुमर्हतीत्यनेन मुखतः सार्वज्ञ्यासिद्धावपि फलतस्तत्सिद्धिरिति सूचितम् । द्वितीययोजनायां तु मुखत एव सार्वज्ञ्यसिद्धिरिति भावेनाह गुरूणामिति । उक्तगुरुशब्दार्थद्वयस्य प्रत्येकं साध्यद्वयसाधनोपयुक्ततामिप्रायेण प्रत्येकं साध्यद्वयमुक्तम् । अत्र विवक्षितार्थतत्त्वज्ञानस्य वक्त्रानुकूल्यघटकत्वेनोद्देश्यत्वादेव ग्रहणम् । वस्तुतः सार्वज्ञ्यमुखेनैव साध्यतेत्यभिप्रायं स्फुटयति यो हीति । अनेन बादरायणः सर्वज्ञः सर्वार्थप्रतिपादकागमप्रभवत्वात् । यो यावदर्थप्रतिपादकागमप्रभवः स तावदर्थज्ञो यथा संप्रतिपन्नाप्तपुरुष इत्युक्तं भवति । अत्र यद्यपि प्रतिपादकत्वं न वाचकत्वरूपम् । गौरस्तीत्यादिवाक्यप्रयोक्तुर्वागादिरूपगोशब्दवाच्यार्थज्ञानानियमेन व्यभिचारात् । नापि बोधकत्वरूपम् । उक्तवाक्यात्तात्पर्यभ्रमादिना वागादिबोधस्यापि संभवेन तद्दोषात् । किन्तु बोधपरत्वरूपम् । तथा च यो यावदर्थबोधतात्पर्यवानसौ तावदर्थज्ञ इत्येव लाघवात्सम्यक् । न च तावदर्थतत्त्वज्ञानसिद्धये तावदर्थकागमप्रभवत्वपर्यन्तप्रवेश इति वाच्यम् । यो यावदर्थतत्त्वबोधतात्पर्यवानसौ तावदर्थतत्त्वबोधवानित्यनेनैव सामञ्जस्यात् । न च यथा सन्निवेशादवैयर्थ्यं तावताऽपि तादृशागमोपदेष्टृत्वेनैव सामञ्जस्ये प्रथमोपदेष्टृत्वरूपप्रभवत्वपर्यन्तप्रवेशवैयर्थ्यस्य दुर्वारत्वात् । तथाऽप्यन्यकर्तृकागमोपदेष्टुस्तद्विवक्षितयावदर्थज्ञत्वानियमेन व्यभिचारवारणाय प्रभवत्वनिवेशनमावश्यकम् । अत एवागमांशनिवेशोऽपि सार्थकः । तत्प्रभवत्वस्य तत्सापेक्षत्वात् । अन्यथा सर्वार्थबोधतात्पर्यस्यासिद्धया तेन सार्वज्ञ्यसाधनयोगात् । सर्वार्थप्रतिपादकागमप्रभवत्वेन सर्वार्थबोधतात्पर्यं प्रसाध्य तेन तत्साधने त्वतिगौरवात् । वेदादेरशेषार्थप्रतिपादकत्वे व्यासस्य तत्प्रभवत्वे च प्रमाणमाह अनुक्तमिति । 'अनुक्तं पञ्चभिर्वेदैर्न वस्त्वस्ति कुतश्चने'त्याद्यम् । 'उत्सन्नान् भगवान्वेदानुज्जहार हरिः स्वयमि'ति द्वितीयम् । आदिना 'इतिहासपुराणः पञ्चमो वेदानां वेदः', 'वेदादपि परं चक्रे पञ्चमं वेदमुत्तममि'त्यादेः परिग्रहः । उक्तस्मृतीनां परोक्तानुवादत्वान्न क्षुद्रोपद्रवः । यद्यपि शास्त्रस्य सामान्यतोऽशेषार्थप्रतिपादकत्वे तत्प्रभवस्य न सार्वज्ञ्यसिद्धिः । असर्वज्ञस्यापि प्रमेयत्वादिना सर्वार्थप्रतिपादनसंभवात् । प्रातिस्विकतया सर्वार्थप्रतिपादनं तु शास्त्रेऽपि नास्ति । गङ्गावालुकपरिगणनस्य शास्त्रेणाकरणात् । तथाऽपि येन येन रूपेण यावदर्थज्ञानं मोक्षोपयोगि तत्तद्रूपावच्छिन्नतावदर्थप्रतिपादकत्वमेवाशेषार्थप्रतिपादकपदेन विवक्षितम् । तत्तद्रूपावच्छिन्नतावदर्थज्ञानमेव प्रकृते सार्वज्ञ्यं तावतैव वक्त्रानुकूल्यसिद्धेः । वस्तुतस्तु तत्तद्वस्तुगतभगवद्रूपविशेषाणां विशिष्य ब्रह्मादिज्ञेयतया शास्त्रे तत्तद्वस्तुप्रतिपादनमावश्यकम् । तच्च तदादिपदेनैव केनचिदुपलक्षणेन सामान्यरूपेणापि संभवति । तत एवाधिकारिणां विशिष्य तत्तद्वस्तुज्ञानसंभवात् । तादृशज्ञानजनकशास्त्रप्रभवत्वेनैव निरुपचरितसार्वज्ञ्यसिद्धिः । निगमयति अत इति । अथ कथमसर्वज्ञानां सार्वज्ञ्यानुमितिः सर्वज्ञानं विना सर्वविशेषितज्ञानासंभवात् । न चासर्वज्ञानामपि सर्वत्वेन

सर्वज्ञानसत्त्वान्न दोष इति वाच्यम् । तथा सत्यनुमानेनापि सर्वत्वेन सर्वज्ञानस्यैव सिद्धचापत्तेः । न च सर्वधर्मावच्छिन्नज्ञानवत्त्वस्य साध्यत्वान्नोक्तदोष इति वाच्यम् । सर्वं धर्मोपेतमिति ज्ञानस्य धर्मत्वेन सर्वज्ञानस्यैव सिद्धचापत्तेः । न च सर्वधर्मावच्छिन्नज्ञानवत्त्वस्य साध्यत्वान्नोक्तदोष इति वाच्यम् । सर्वं धर्मोपेतमिति ज्ञानस्य धर्मत्वेन सर्वधर्मावच्छिन्नविषयकस्यासिद्धचाऽप्यनुमाननिर्वाहात् । न च धर्मानवच्छिन्नसर्वधर्मविषयकज्ञानवत्त्वं साध्यम् । धर्मोपेतमिति ज्ञानस्य च धर्मत्वरूपधर्मेण सर्वधर्मावगाहित्वाद्वचुदास इति वाच्यम् । जात्यादिवद्रूपरसादिधर्माणां स्वरूपतो भाने मानाभावेन रूपवानित्यादिज्ञानस्य रूपत्वाद्यवच्छिन्नरूपादिविषयताकत्वनियमेन धर्मानवच्छिन्नसकलधर्माविषयकज्ञानाप्रसिद्धेः । मैवम् । धर्मानवच्छिन्नसकलाखण्डधर्माविषयकज्ञानवत्त्वरूपसार्वज्ञ्यस्य साध्यत्वे दोषाभावात् । तत्तद्व्यक्तित्वरूपाखण्डधर्मप्रकारेण सकलवस्तुविषयकज्ञानसिद्धयोद्देशसिद्धेः । असर्वज्ञस्य तत्तद्व्यक्तित्वेन सर्ववस्तुज्ञानाभावेऽपि धर्मानवच्छिन्नसकलाखण्डधर्मविषयताकं ज्ञानमिति ज्ञानसंभवेन सार्वज्ञ्यानुमितिसंभवात् । अखण्डत्वं च स्वरूपतो भासमानत्वम् । अनवच्छिन्नविषयतावत्त्वमिति यावत् । वस्तुतो विषयितासंबन्धावच्छिन्नप्रतियोगिताकाभावानधिकरणज्ञानवत्त्वं सार्वज्ञ्यं ईश्वरज्ञाने सर्वस्य विषयितासंबन्धेन सत्त्वान्न तदभावः संभवति । अस्मदादिज्ञाने च प्रमेयत्वादिना सर्वविषयिण्यपि प्रातिस्विकतत्तद्व्यक्तित्वादिविशिष्टस्य विषयितासंबन्धावच्छिन्नाभावसत्त्वान्नातिव्याप्तिः । न चेश्वरज्ञानस्य सन्मात्रविषयतया तत्र शशविषाणादेर्विषयितासंबन्धावच्छिन्नाभावसत्त्वादसंभव इति वाच्यम् । ईश्वरस्य शशविषाणमस्तीत्यादिज्ञानाभावेऽपि तन्नास्तीत्यादिज्ञानसत्त्वेन तत्र विषयितासंबन्धावच्छिन्नशशविषाणाद्यभावासंभवात् । ईदृशं च सार्वज्ञ्यं नासर्वज्ञदुर्ज्ञेयम् । अस्मिन्पक्षे चेश्वरस्य सखण्डाखण्डनिखिलधर्मावच्छिन्नविषयकज्ञानसिद्धिर्बोध्या । एवं हेतावशेषार्थप्रतिपादकपदेन न सामान्यतः सर्वार्थप्रतिपादकत्वं विवक्षितम् । सर्वं प्रमेयमित्यादिवाक्यप्रभवे व्यभिचारात् । नापि विशिष्यसर्वार्थप्रतिपादकत्वं प्रतिपादकत्वसंबन्धावच्छिन्नाभावानधिकरणत्वपर्यवसितम् । वेदादेरपि विशिष्य विष्णुगतगुणविशेषाप्रतिपादकत्वेनासिद्धेः । किन्तु जीवज्ञेयतावच्छेदकयावद्धर्मावच्छिन्नप्रतिपादकत्वम् । जीवज्ञेयतावच्छेदकधर्मावच्छिन्नप्रतिपादकतासंबन्धावच्छिन्नप्रतियोगिताकाभावानधिकरणत्वपर्यवसितं बोध्यम् । (ज्ञाने च प्रमेयत्वादिना सर्वविषयिण्यपि प्रातिस्विकतत्तद्व्यक्तिविशिष्टस्य विषयितासंबन्धावच्छिन्नाभावसत्त्वान्नातिव्याप्तिः ।) यद्यप्येकैकशास्त्रस्य नोक्तयावदर्थप्रतिपादकत्वम् । तथाऽपि तत्समुदायस्य विवक्षितं निरुक्तयत्किञ्चिदभावधर्मितानवच्छेदकसमुदायत्वावच्छिन्नप्रभवत्वं हेतुरिति निष्कर्षः । वेदादिसमुदाये च किञ्चिदर्थप्रतिपादकत्वाभावस्याप्रतीत्या तत्समुदायत्वस्य तद्धर्मितानवच्छेदकत्वान्नासिद्धिः । एवं ब्रह्मादीनां योग्यसर्वज्ञत्वादिकं निर्वक्तव्यम् । बादरायणस्य ब्रह्मागमप्रभवत्वेन पटुकरणत्वसिद्धावपि ब्रह्मसूत्रनिर्माणदशायां तदभावशङ्कया सूत्राप्रामाण्यशङ्कापत्तेरपटुकरणत्वाभाव एव साधनीयः । तत्र च जरामयादिना पटुकरणत्वापायवति व्यभिचारवारणार्थमसति बाधक इत्युक्तम् । न च यो यदा ब्रह्मागमप्रभवः स तदा पटुकरण इत्युक्तावपि न दोष इति वाच्यम् । आगमशब्देन शब्दराशिमात्रविवक्षायामपटुकरणस्यापि तत्प्रभवत्वसंभवेन व्याप्यसिद्धेः । प्रमाणशब्दराशिविवक्षायां ब्रह्मसूत्रप्रामाण्यनिर्णयात्पूर्वं तन्निर्माणकालीनप्रमाणशब्दप्रभवत्वरूपहेत्वसिद्धेः । अतः कदाचिद्विद्यमानस्य निर्णीतप्रामाण्यकब्रह्मागमान्तरप्रभवत्वस्यैव हेतुत्वं वाच्यमित्युक्तविशेषणमावश्यकम् । एवं च पटुकरण इत्यस्य पटुकरण एव न त्वपटुकरण इत्यर्थः । अत एव

कथमपटुकरण इत्युपसंहारः । अपास्येत्यनेन बाधकाभावो दर्शितः । तेन न पटुकरणत्वापायशङ्केत्याशयः । तदुदितमिति वचनेनोदितशब्दोक्तवचनेन । यद्वा । तदुदितमित्यनेनोपपादितेत्यन्वयः । तथा च बादरायणः प्रकृतशास्त्रार्थविवक्षावान् प्रकृतशास्त्रवक्तृत्वात् । यो यद्वक्ता स तदर्थविवक्षावान् यथा संप्रतिपन्न इत्युक्तं भवति । न चोन्मत्तवाक्येन व्यभिचारः । तदर्थत इति प्रयोजनोद्देशोक्त्याऽनुन्मत्तवचनस्यैव हेतुतायाः सूचितत्वात् ।

गूढ०— नन्वेवं व्यासः सर्वज्ञः ब्रह्मादीनां गुरुत्वादित्यनुमानं फलितम् । तदयुक्तम् । सर्वज्ञत्वस्य ब्रह्मादिगुरुत्वस्य चान्यत्र दृष्टान्तेऽभावेन व्याप्तेर्ग्रहीतुमशक्यत्वात् । अस्य ब्रह्मादीनां तत्त्वोपदेष्टृत्वे प्रमाणाभावाच्चेत्यत आह **यो हीति** । ननु गुरूणां गुरुरित्यनेन सार्वज्ञप्रतिपादनं चेत् गुरूणां शास्त्राणां गुरुः प्रभवः इत्यनेन श्रोत्रानुकूल्यप्रतिपादनं वक्तव्यम् । तच्चायुक्तम् । तत्त्वज्ञानयोग्यत्वादेरप्रतिपादनात् । न चानेनापि सार्वज्ञमेव प्रतिपाद्यत इति वाच्यम् । तन्मात्रप्रतिपादकत्वे वैयर्थ्यापत्तेः । यदि च हेत्वन्तरत्वान्न वैयर्थ्यम् । तर्हि हेतूनामनेकेषां सत्त्वेनानेकहेतवो वक्तव्या इत्यत आह **गुरूणामिति** । नन्वेतावता व्यासः सर्वज्ञः करणपाटववांश्च अशेषार्थप्रतिपादकशास्त्रप्रभवत्वादित्यनुमानं फलितम् । तत्र तावद्व्यासिरेव ग्रहीतुं न शक्यते । दृष्टान्ताभावात् । किञ्च हेतुरप्यसिद्धः । प्रमाणाभावात् । साध्यद्वये एकस्य शास्त्रप्रभवत्वस्य हेतुत्वप्रकारश्च कथमित्यत आह **यो हीति** । ननु तथापि विवक्षा केनोक्तेत्यत आह **तदुदितमिति । वचनेन कार्येण** वचनलक्षणेन कार्येणेत्यर्थः । **कारणभूता** वचने कारणभूता ।

४५ सु०— 'गुरूणामि'ति श्रोतॄणां तत्त्वज्ञानयोग्यतोपपादने हेतुः । न हि स्वयं तत्त्वज्ञानायोग्यः परेषां तत्त्वोपदेष्टा दृष्टः ।

'अजादिभ्य' इति वक्तृप्रेमास्पदत्वोपपादनम् । ब्रह्मादयो हि परमेश्वरप्रेमविषयाः सुप्रसिद्धाः ।

यादु०— 'अनुक्तं पञ्चभिः वेदैरि'त्येतद्वेदानामशेषार्थप्रतिपादकत्वांशे मानमिति बोध्यम् ॥ अजादित्वाद्वक्तृप्रेमास्पदा(नि) इत्यत्राकारणकार्योत्पत्तिरूपप्रसङ्गो न संभवतीत्यत उक्तम् **अजादिभ्य इतीति** । तेन तत्र आगमिकप्रसिद्धिबाधप्रसङ्ग एव विपक्षे बाधक उन्नेय इत्युक्तं भवति । अत एव सुप्रसिद्धा इति पूर्वमुक्तं ज्ञातव्यम् ॥

आनन्दः— ननु तत्त्वज्ञानयोग्यत्वरूपं श्रोत्रानुकूल्यं केन पदेन प्रतिपादितमित्यत आह **गुरूणामितीति** । अनेन तत्त्वज्ञानयोग्यता कथमुपपादितेत्यत आह **न हीति** ।

वा०चं०— 'ब्रह्मादयः श्रोतारस्तत्त्वज्ञानयोग्या गुरुत्वादि'ति विवक्षितानुमाने व्यतिरेकव्यभिचारादर्शनप्रदर्शनमुखेन व्यतिरेकव्याप्तिं सूचयति **न हीति** ॥ 'विमताः श्रोतारो वक्तृप्रेमास्पदान्यजादित्वादि'ति विवक्षितानुमाने हेतोः साध्येन व्याप्तिमागमप्रसिद्धया दर्शयति **ब्रह्मादय इति** ॥

वा०र०— व्यभिचारादर्शनिति। उपदेष्टा न दृष्ट इत्यनेन व्यभिचारदर्शनाभावस्य प्रदर्शनादिति भावः। अनेनान्वयव्याप्तेरपि विद्यमानत्वेऽपि तदुपपादनायैव व्यतिरेकव्यभिचाराभावप्रदर्शनमुखेन व्यतिरेकव्याप्त्युपपादनं कृतमिति सूचितम्।

कुण्डल०— ब्रह्मादयो हीति। तथापि तेभ्यः प्रवरा देवा एव हरेः प्रियाः इत्याद्येकादशस्कन्धतात्पर्योदाहृतवचनैर्ब्रह्मादयः परमेश्वरप्रीतिविषयाः सुप्रसिद्धा इत्यर्थः।

काशी०— गुरूणामिति। तथा च ब्रह्मादयस्तत्त्वज्ञानयोग्यास्तत्त्वोपदेष्टृत्वात्संमतवदित्युक्तं भवति। यद्यपि तत्त्वज्ञानस्यैव तत्त्वज्ञानयोग्यतासाधकत्वं संभवति। न च परचित्तवृत्तेरप्रत्यक्षत्वादसाधकत्वमिति वाच्यम्। कालान्तरीणपरोपदेशस्यापि तथात्वात्। आगमेन सिद्धिस्तु ज्ञानेऽपि तुल्या। तथाऽपि तत्त्वविशेषज्ञानस्यागमादसिद्धया न तेन तद्योग्यतानुमातुं शक्या। आगमसिद्धेनोपदेष्टृत्वेन तूपदिष्टयावद्विशेषज्ञानयोग्यतानुमातुं शक्यते। यथा आचार्यस्य प्रमाणान्तरसिद्धेन भाष्यकर्तृत्वेन तदुक्तयावदर्थज्ञानयोग्यतानुमीयते तत्कर्तृत्वेन तदर्थज्ञानमनुमाय तेन तद्योग्यतानुमाने च गौरवमित्याशयः। अत्र व्याप्तिमुपपादयति **न हीति**। तत्त्वोपदेशे तत्त्वज्ञानद्वारा तत्त्वज्ञानयोग्यतायाः प्रयोजकत्वादिति भावः। **अजादिभ्य इति**। श्रोतृणामित्यनुषज्यते। तथा च विमताः श्रोतारो विष्णुप्रीतिविषया ब्रह्मादित्वादिति प्रयोगो बोध्यः। न तु ब्रह्मादय इति पक्षनिर्देशः। सुप्रसिद्धत्वेनानुमानायोगात्। अत्र व्याप्तेरागामिकत्वादन्वयदृष्टान्तालाभो न दोषायेत्याशयेन व्याप्तिमुपपादयति **ब्रह्मादय इति**।

गूढ०— ननु तत्त्वज्ञानयोग्यत्वरूपश्रोत्रानुकूल्यप्रतिपादनं केन पदेनेत्यत आह **गुरूणामितीति**। अनेन तत्त्वज्ञानयोग्यता कथमुपपादितेत्यत आह **न हीति**।

४६ सु०— 'तदर्थत' इति प्रसङ्गानुकूल्योपपादनम्।

वा०चं०— 'प्रसङ्गः प्रयोजनोद्देशको मोक्षोद्देशकत्वादि'ति विशेषेण सामान्यानुमाने विवक्षिते, मोक्षस्य प्रयोजनविशेषतया सर्वसिद्धत्वाद् व्याप्तिसिद्धिं, शास्त्रस्य सूत्रे मोक्षसाधनत्वोक्त्या पक्षधर्मतासिद्धिं चाभिप्रेत्य, ते अनुपपाद्य, प्रसङ्गानुकूल्योपपादकांशमेव दर्शयति **तदिति**।

वा०र०— पूर्वहेतुष्विवैतद्धेतौ व्याप्तिपक्षधर्मतयोरप्रदर्शने निमित्तमाह **मोक्षस्य प्रयोजनविशेषतयेत्यादि**। **सूत्र इति**। अथात इत्याद्यसूत्रे अतःशब्देनेति शेषः। अत्र मूले तत्त्वज्ञानसाधने हेतुः तत्त्वज्ञानं करणपाटवं च साध्यत

इति स्थलद्वये उक्त्वा कारणभूतोपपादनेति उपपादने हेतुरिति उपपादनमिति द्वेधा योनिर्यद्यप्यस्ति तथापि सर्वत्रानुमानप्रयोगस्यामिमतत्वमेवेत्याशयेन टीकाकृता सर्वत्र प्रयोगप्रदर्शनं कृतम् । मूले विचित्रयोनिस्तु उपपादनस्य बहुत्वात्यत्वादिविवक्षयेति स्पष्टमित्यदोष इति ध्येयम् ।

काशी०— तदर्थत्व इतीति । विमतः प्रसङ्गः श्रोतृप्रयोजनोद्देशवान् श्रोतृमोक्षोद्देशवत्त्वात्तन्मननवदिति प्रयोगेऽपि साध्यकोटौ प्रयोजनत्वेन हेतुकोटौ मोक्षत्वेन प्रयोजनप्रवेशान्न साध्याविशिष्टता । अत एव तदर्थत्व इति साक्षात्प्रसङ्गानुकूल्यस्योक्तत्वादुपपादनमित्ययुक्तमित्यपास्तम् । अर्थशब्दस्य मोक्षार्थतया व्याख्यानत्वेन प्रयोजनसामान्यघटितप्रसङ्गानुकूल्योपपादकत्वात् । अत्र सर्वत्रेति उक्तेषु सर्वानुमानेष्वित्यर्थ ।

४७ सु०— अत्र सर्वत्राकारणकार्योत्पत्त्यादिप्रसङ्गो विपक्षे बाधकस्तर्क उन्नेयः ।

परि०— अत्र सर्वत्रेति । गुरूणां गुरुत्वात्तत्त्वज्ञानवत्त्वमित्यत्र गुरुशास्त्रप्रभवत्वात् सार्वज्ञ्यकारणपाटवं चेत्यत्र वक्तृत्वाद्विवक्षावानित्यत्र गुरुत्वादजादयस्तत्त्वज्ञानयोग्या इत्यत्र अजादित्वात्प्रेमास्पदत्वमित्यत्र चेत्यर्थः । व्याघातप्रमाणबाधादिरादिपदार्थः तेनाजादित्वात्प्रेमास्पदत्वमित्यत्रापि विपक्षे बाधकमुक्तं ध्येयम् ।

बं०प०— ननु 'अस्तु बादरायणस्य गुरूणां गुरुत्वम् । विवक्षितार्थतत्त्वज्ञानं मास्त्वि'त्याद्यप्रयोजकताशङ्कया बाधकमाह अत्र सर्वत्रेति ॥

आनन्दः— ननु शास्त्रप्रभवत्वरूपहेतुरस्तु सार्वज्ञ्यरूपसाध्यं मास्त्वित्यप्रयोजकत्वमित्यत आह अत्रेति । आदिपदेन सार्वज्ञ्यादिप्रतिपादकागमाप्रामाण्यप्रसङ्गो बोध्यः ।

श्रीनिधि०— अत्र सर्वत्रेति । वक्तृत्वानुकूल्यादिरूपविवक्षितार्थतत्त्वज्ञानादौ साध्ये गुरूणां गुरुत्वादयो हेतवोऽभिहिताः । गुरूणां गुरुत्वादिहेतवो भवन्तु विवक्षितार्थतत्त्वज्ञानादयो मा भूवन्निति अप्रयोजकत्वशङ्कायाम् विवक्षितार्थतत्त्वज्ञानादेः गुरूणाम् गुरुत्वादिकं प्रति कारणत्वेन तदनङ्गीकारे अकारणकार्योत्पत्तिप्रसङ्गो बाधक इत्यर्थः । ब्रह्मादीनां वक्तृप्रेमास्पदत्वस्यागमप्रसिद्धयोक्तत्वेन तदनङ्गीकारे आगमविरोध आदिशब्दार्थः । ननु गुरोरिति श्लोके गुरूणां गुरुत्वम् शास्त्रप्रभवत्वं अजादित्यस्तदर्थतस्तदुदितत्वं चेति त्रयो हेतव उक्ताः । तत्र तदुदितत्वस्य साध्यसामानाधिकरण्यमस्त्येव । आद्यद्वयस्य वैयधिकरण्यं तथापि एतेषां इति बहुवचनान्तशब्देन त्रयाणां कथं व्यधिकरणतोच्यत इति चेन्न । अन्तिमस्याद्वयस्य च परस्परं व्यधिकरणतायां उच्यमानत्वात् एषां यथाश्रुतानां हेतुनाङ्गीकारे व्यधिकरणतेति योजनोपपत्तेश्च ।

बा०चं०— अत्र तत्त्वोपदेशस्योपदेश्यापेक्षया अधिकतत्त्वज्ञानसाध्यत्वात् आगमप्रणयनस्य वक्तुः तदर्थज्ञानसाध्यत्वात् बह्वागमप्रणयनस्यागति निश्चितान्तरे पटकरणत्वसाध्यत्वाद्बहुवचनस्य च विवक्षासाध्यत्वात्

तत्त्वज्ञानायोग्यस्य तदनुत्पत्त्या तत्त्वोपदेशस्य ज्ञानद्वारा तत्त्वज्ञानयोग्यतासाध्यत्वादेषु हेतुष्वकारणकार्योत्पत्ति-प्रसङ्ग । अन्त्ययोर्द्वयोश्चादिपदसंगृहीतागमप्रसिद्धिविरोधः सामान्यविशेषभावविरोधश्च विपक्षे बाधका उन्नेया इत्याह अत्रेति ।

वा०र०— अत्र तत्त्वोपदेशस्येत्यादिना । **कार्योत्पत्तिप्रसङ्ग इति** । वक्ष्यमाणचशब्दबलादेते त्रयः विपक्षे बाधका इति सबन्धोपपत्तिः । अकारणकार्योत्पत्त्यादिप्रसङ्गेनाव्यवस्थयेति दर्शयन् कार्यकारणाभावस्फोरणेन अकारणकार्योत्पत्ति पदयत्नादिपदसङ्गत्वं चाह । **बाधका इति** । बहुवचनप्रविष्टैकवचनानां बुद्ध्या विवेकेन प्रत्येकं सबन्ध इति वा । एवं सद्धेतावित्यत्रापि । विशेषभावविरोधश्चेत्यत्र विरोध इत्येतौ चेति वा योज्यम् । **सामान्येति** । श्रोतृप्रयोजनेत्यादि सामान्यम् । मोक्षप्रयोजनेत्यादिर्विशेष इति ज्ञेयम् ।

स०च०— अत्र सर्वत्रेति । प्रथमानुमाने हेत्वर्थस्य तत्त्वोपदेष्टृत्वस्य विवक्षितार्थतत्त्वज्ञानकार्यत्वे तदभावेऽभावात्तत्त्वज्ञानाभावेऽपि तत्त्वोपदेशकत्वाङ्गीकारे अकारणकार्योत्पत्तिरेव । द्वितीयतृतीयचतुर्थेष्वपि अकारणकार्योत्पत्तिः द्रष्टव्या । पञ्चमे तु आदिशब्दोक्त आगमबाधो विपक्षे बाधकत्वेन ज्ञेय इति भावः ।

कुण्डल०— अत्र सर्वत्रेति । ब्रह्ममीमांसाशास्त्रमनुकूलवक्तृकं जगद्गुरुत्वसर्वशास्त्रप्रभवत्वविशिष्ट-बादरायणप्रणीतत्वात् । तथाऽनुकूलश्रोतृकं जगद्गुरून् चतुर्मुखादीन्प्रत्युपदिष्टत्वात् । अनुकूलप्रसङ्गोपेतं च भगवता ब्रह्मादिमोक्षाय तान्प्रत्युपदिष्टत्वात् भारतादिवत् । इत्यनुमानानां विपक्षे हेतुसत्तामङ्गीकृत्य साध्यसद्भावानङ्गीकारे अकारणकार्योत्पत्त्यादिलक्षणः प्रसङ्गो बाधक उन्नेय इत्यर्थः ।

काशी०— अकारणेति । तत्त्वज्ञानादिरूपकारणं विनाऽपि तत्त्वोपदेशादिरूपकार्योत्पत्तिप्रसङ्गः । आदिपदादजादित्वहेतुकानुमानेऽप्रसिद्धिबाधप्रसङ्गश्चरमानुमाने मोक्षत्वप्रयोजनत्वयोर्विशेषसामान्यभावानुपपत्ति-प्रसङ्गश्च । हेतुरस्तु साध्यं मास्त्विति शङ्कायां बाधकतर्क इत्यर्थः ।

गूढ०— ननु शास्त्रप्रभवत्वादिरूपहेतुरस्तु सार्वज्ञादिसाध्यं मास्त्विति अप्रयोजकत्वमित्यत आह अत्रेति । आदिपदेन सार्वज्ञादिप्रतिपादकागमाप्रामाण्यप्रसङ्गो बोध्यः ।

साध्यान्तराध्याहारसमर्थनम्—

४८ सु०— नन्वत्र 'गुरुर्गुरूणामि'त्यादीनां शास्त्रप्रामाण्येन यथाश्रुत एव साध्यसाधन-भावो व्याख्यायताम् । किं मध्ये साध्यान्तराध्याहारकल्पनया । यद्यपि यथाश्रुतानामेषां व्यधिकरणता । तथाऽपि 'तवुवितमि'ति वचनाद्विभक्तिविपरिणामेन एकाधिकरणता भविष्यति ।

यद्यपि चैते प्रत्येकं बौद्धागमादौ मानतां व्यभिचरन्ति । तथाऽपि मिलितानां हेतुताऽस्तु।

परि०— सन्न्यायरत्नावल्यादावयोजितं पारम्पर्यं किमिति योज्यत इत्याक्षिपति **नन्वित्यादिना सत्यमित्यन्तेन ॥ विपरिणामेनेति** । यः गुरूणां गुरुः शास्त्राणां प्रभवश्च तेनैतादृग्गुणकेनोदितत्वात् इत्येवं रूपविपरिणामेनेत्यर्थः ॥ **एते इति** । गुरूणां गुरुणोदितत्वम् । अशेषशास्त्रप्रभवेनोक्तत्वम् । अजादीन् श्रोतॄन् प्रत्युपदिष्टत्वं प्रयोजनोद्देशेनोक्तत्वमित्येते हेतव इत्यर्थः । नारायणावतारेण बुद्धेन कृतत्वाद्बौद्धागमस्य बुद्धस्य च ब्रह्मादिगुरुत्वात्तत्राद्यस्य सर्वशास्त्रप्रभवप्रणीतत्वस्य च वेदविरुद्धशौवादि-पुराणभागे तृतीयस्य नर्मादौ चतुर्थस्य कापिलादावपि गतत्वादेकैकस्य व्यभिचारेऽपि अजादिप्रयोजनो-द्देशेन उक्तत्वाभावात् तन्मिलितस्य हेतुत्वं भविष्यतीति भावः । अजादिमोक्षोद्देशेनोक्तत्वमात्रस्यैव हेतुत्वमव्यभिचाराद्युक्तमित्येतदग्रे व्यक्तम् । ननु विशिष्टस्यापि हेतोर्बौद्धागमादौ व्यभिचार एव । भारत-तात्पर्यनिर्णये द्वात्रिंशाध्यायोक्तदिशा बौद्धागमाभिप्रेतार्थस्य देवेभ्य उपदिष्टत्वादिति चेत् । न । तन्मोक्षा-र्थोद्देशेन उक्तत्वाभावात् अभिप्रेतार्थे प्रामाण्यसद्भावाच्चाशेषशास्त्रकर्त्रा व्यासेनाकृतत्वाच्चेति भावः ।

गु०दी०— यद्यपि **यथाश्रुतानामेषां व्यधिकरणता** इत्यत्र गुरूणां गुरुः शास्त्राणां प्रभव इत्युक्त-विशेषणद्वयस्य व्यासनिष्ठत्वादजादिभ्यस्तदर्थतस्तदुदितमित्यस्य ब्रह्ममीमांसानिष्ठत्वाच्च व्यधिकरणतेत्यर्थः । ननु नेयं व्यधिकरणता दोषाय यतो बादरायणः शास्त्राणां प्रभवः यतश्चाजादिभ्यस्तदर्थतस्तेन बादरायणेनोदितमिदं शास्त्रमतो मानमिति प्रागुक्तगुणवन्तं व्यासं तेनेत्यनूद्यैकवाक्यतायाः संपादितत्वादिति चेत्, सत्यम् । तथाऽपि पूर्वोक्तं व्यासनिष्ठं विशेषणद्वयं हेतौ न साक्षात्प्रविशति तेनेत्यनुवादकपदेनैव हेतोश्चरितार्थत्वात् । तत्तु विशेषणद्वयं अनुवादोपयोगिवादमात्रसमर्पकं हेतौ परंपरयैवोपयोगि न साक्षादुपयोग्यतो व्यधिकरणं तदिति शङ्कितुरभिप्रायः । **तथाऽपि तदुदितमिति वचनात्** इत्यत्र प्राचीनयोजनायां तेनोदितमिति वचनेन वक्तरि तृतीयायाः सूचितत्वात् । यतः गुरूणां गुरुणा शास्त्राणां प्रभवेन बादरायणेन अजादिभ्यस्तदर्थतस्तन्मीमांसाशास्त्रमुदितमतो मानमिति विभक्ति-विपरिणामेन सकलश्लोकस्याप्येकवाक्यतया योजनासंभवान्न कश्चित् क्षुद्रोपद्रव इति भावः।

यादु०— साध्यान्तराध्याहारेति । वक्त्राद्यानुकूल्यरूपसाध्यान्तरेत्यर्थः ॥ **यथाश्रुतानामेषामिति** । 'यतो यत्कारणं बादरायणो गुरूणां गुरुः यतः शास्त्राणां प्रभवो, यतश्च गुरूणां शास्त्राणां गुरुः प्रभवः अतो मानमि'ति पूर्वोक्तयोजनायां पूर्वार्धोक्तानां 'गुरूणां गुरुत्वादी'नां पक्षीभूतशास्त्रनिष्ठतया प्रामाण्यरूपसाध्यव्यधिकरणतेत्यर्थः ॥ **तदुदितमिति वचनादिति** । अत्र 'तदि'ति भिन्नपदं शास्त्रपरम् ॥ नन्वेवम् 'उदित'पदस्य तृतीयान्तकर्तृपदसापेक्षस्य 'गुर्गुरूणाम्' इत्यादिप्रथमान्तैः कथमन्वय इत्यत उक्तं **विभक्तिविपरिणामेनेति** । तथाच 'गुरूणां गुरुणा शास्त्राणां प्रभवेन बादरायणेन यतः तच्छास्त्रमुदितमतो मानम्' इत्येकाधिकरणतोपपद्यत इत्यर्थः । न च तदुदितमित्यस्य

समासत्वे 'यो बादरायणः पूर्वोक्तविशेषणविशिष्टस्तेनेदमुदितम्' इत्यर्थलाभादुक्तविभक्तिविपरिणामो नापेक्षित इति वाच्यम् । तथात्वे विशेषवाचकस्य 'इदं शास्त्रम्' इत्यस्याध्याहाराप्रसङ्गादित्यभिप्रायात् ॥ केचित्तु 'तत्'शब्देन पूर्वोक्तविशेषेण विशिष्टो बादरायणः परामृष्यते । उदितशब्दस्य भावप्रधानस्य पञ्चम्यन्ततया विपरिणामः । तेन सामानाधिकरण्यमित्याहुः ॥ **एते प्रत्येकमिति** । गुरुगुरूदितत्वशास्त्रप्रभवोदितत्वयोः बौद्धागमे, शैवपुराणादौ च; बादरायणोदितत्वस्यापि शैवपुराणादौ, अजादीन्प्रत्युपदिष्टत्वस्य नर्मादौ मोक्षार्थमुपदिष्टत्वस्य गौतमप्रणीतन्यायशास्त्रे च, व्यभिचार इति भावः ॥ **गूढाभिसन्धिराह मिलितानामिति** ।

आनन्दः— ननु गुर्ल्गुरूणामित्यादयो हेतवः किं साक्षात्प्रामाण्ये वा वक्त्राद्यानुकूल्ये वा । नाद्यः । तथा सति साध्यान्तराध्याहारायोगात् । न द्वितीयः । व्यभिचारेण प्रत्येकं हेतुत्वस्य वैयर्थ्येन मिलितानां हेतुत्वस्य चासंभवादिति शङ्कते **नन्वत्रेति** । ननु गुरुत्वस्य शास्त्रप्रभवत्वस्य व्यासनिष्ठत्वेन प्रामाण्यस्य च सूत्रनिष्ठत्वेन हेतुसाध्ययोर्वैयधिकरण्यात्र प्रामाण्ये एषां हेतुत्वमित्यत आह **यद्यपीति** । **विपरिणामेनेति** । **उदितत्वादिति** । विपरिणामेनेत्यर्थः । नन्वेतेषां प्रामाण्ये न हेतुत्वम् । गुरुगुरुत्वस्य शास्त्रप्रभवत्वस्य च बौद्धागमकर्तरि बुद्धेऽपि सत्त्वेन व्यभिचारात् । अजादिभ्यस्तत्प्रयोजनोद्देशेनोदितत्वस्य पुरुषविशेषेणोदिते भवतामेतत्प्रयोजनसाधनमिति वाक्ये व्यभिचारात् । तथाच कथमेषां प्रामाण्यहेतुत्वमित्यत आह **यद्यपीति** । गुरूणां गुरुणा शास्त्रप्रभवेन ब्रह्मादि-प्रयोजनोद्देशेन प्रणीतत्वादिति मिलितानां हेतुत्वमस्तीत्यत आह **तथापीति** ।

श्रीनिधि०— तदुदितमिति वचनादेकाधिकरणता भविष्यतीति संबन्धः । कथमित्यत उक्तम् **विपरिणामेनेति** । अयमाशयः । तृतीयान्तत्वेन विपरिणामे गुरूणां गुरुणा शास्त्राणां प्रभवेनेति तु भवति तयोस्तदुदितमित्यत्र बुद्ध्या विविक्तेन तेनेत्यनेन संबन्ध इति । **यद्यपि चैत इति** । अजादिभ्य इत्यस्य श्रोतॄन् प्रति तत्प्रयोजनोद्देशेन तदुदितमिति सामान्याकारविवक्षायामेवमुक्तम् । विशेषाकारविवक्षायां व्यभिचाराभावात् इति केचित् । वस्तुतस्तु गुरूणां गुरुणा उदितत्वस्य भारतादिप्रभवप्रणीतत्वस्य अजादिभ्यः बादरायणेन उदितत्वस्य तत्प्रयोजनोद्देशेन उदित-त्वस्य च बौद्धाद्यागमादौ व्यभिचार इति द्रष्टव्यम् । ननु बौद्धाद्यागमादौ अजादिप्रयोजनोद्देशेन उदितत्वं नास्तीति चेन्न । तत्समयाचार्यैः अजादिप्रयोजनोद्देशेनापि तत्तत्समयस्य उदितत्वात् । वस्तुतस्तेन तत्प्रयोजनाभावेऽपि भ्रान्त्या वा तदर्थमुदितत्वेन हेतोरसिद्धयभावात् । यावतां विशेषणानां मेलनेन व्यभिचारः तेषां मिलितानां हेतुता । विशेषणान्तरस्य तु दृष्टान्तोपदर्शनादिना सार्थक्यमिति गूढाभिसन्धिरुत्तरमाह **तथापीति** ।

वा०चं०— अत्र 'गुर्ल्गुरूणामि'त्यादिहेतूनामित्युक्तमुपपादयितुं शङ्कते **नन्वत्रेति** । गुरुगुरुत्वाशेषशास्त्र-प्रभवत्ववचनानां श्रुतं 'मानमि'त्येव साध्यमस्तु, किं सार्वज्ञमुखेन सिद्धचद्विवक्षितार्थतत्त्वज्ञानकरणपाटवविवक्षा-रूपवक्त्राकूल्यस्यात्राश्रुतस्य साध्यत्वकल्पनया । एवं गुरुत्वाजादित्वयोर्मोक्षोद्देश्यकत्वस्य च श्रुत'मानत्व'-साध्यकत्वसंभवे नाश्रुतश्रोतृप्रसङ्गानुकूल्यसाध्यकत्वमुपपन्नम् । श्रुताश्रुतपरित्यागकल्पनारूपदोषापत्तेः इत्यर्थः । नन्वत्र वक्तृश्रोतृप्रसङ्गानुकूल्यानां साध्यत्वे बादरायणश्रोतृप्रसङ्गानां पक्षत्वाद्गुरुगुरुत्वाशेषशास्त्रप्रभवत्ववचन-

गुरुत्वाजादिमोक्षोद्देश्यकत्वानां पक्षे सत्त्वेन साध्यवैयधिकरण्याभावात् प्रामाण्यसाधने च शास्त्रस्य पक्षत्वेनैतेषां च हेतूनां च तत्रासत्त्वेन साध्यवैयधिकरण्यापत्त्या बाधकवशात् श्रुतपरित्यागेन अश्रुतकल्पनायामपि न दोषः। यद्यपि व्याप्तिसत्त्वे वैयधिकरण्यं न दोषस्तथाऽपि समानाधिकरणयोरेव यत्र व्याप्तिग्रहस्तत्र वैयधिकरण्यस्य व्याप्त्यभाव-संपादकत्वाद्दोषत्वमेवेत्यतः, स्यादेतदेवं यद्यत्र 'गुरुर्गुरूणा'मित्याद्येव श्रूयेत, तदुदितमिति च श्रवणात्।

तस्य च 'तेन बादरायणेनोदितमि'ति तृतीयातत्पुरुषत्वात्तेन तृतीयान्तबादरायणपदविशेषणतया हेतुशरीरप्रविष्टानां 'गुरूणां गुरुरि'त्यादीनामपि विपरिणामसूचनात् 'तदुदितमि'त्यत्र 'तदि'त्यस्य भिन्नपदत्वे वा पूर्वार्धोक्तप्रथमान्तानां तृतीयान्ततया विपरिणामे 'उदितमि'त्यनेन संबन्धे 'तादृशबादरायणोदितं तच्छास्त्रं मानमि'ति संबन्धे सति 'गुरूणां गुरुणा बादरायणेनोदितत्व'स्य, 'शास्त्रप्रभवेन बादरायणेनोदितत्व'स्य, 'गुरुभ्योऽजादिभ्य उदितत्व'स्य, 'तदर्थत उदितत्व'स्य च लाभात्, तस्य च शास्त्रनिष्ठत्वसंभवान्न व्यधिकरणता। यद्यप्यत्रापि श्रुताश्रुतपरित्यागकल्पने समाने, तथापि तत्र वाक्यार्थविषये ते, अत्र तु विभक्त्यर्थमात्रविषये ते, इति विशेष इति वा, अत्र 'तदुदितमि'ति विभक्तिविपरिणामज्ञापकस्येव, तत्र ज्ञापकस्याभाव इति वा विशेषः, इति नानुपपत्तिरित्यभि-प्रेत्याह यद्यपीति।

नन्वत्र 'गुरूणां गुरुणा बादरायणेनोदित'त्वरूपे, 'शास्त्रप्रभवेन बादरायणेनोदित'त्वरूपे च हेतौ 'बादरायण'ग्रहणस्य, 'गुरुभ्योऽजादिभ्य उदित'त्वरूपहेतौ 'अजादि'ग्रहणस्य च विवक्षितत्वे, बादरायणस्य गुरुगुरुत्वाव्यभिचारात्, अजादीनां च गुरुत्वाव्यभिचारात् विशेषणवैयर्थ्यापातेन; 'गुरूणां गुरुरि'त्यादीनां हेतुत्वोपपत्तये, बादरायणाजादिग्रहणस्य प्रकृताभिप्रायेण प्रयोगेण हेतुशरीराप्रवेशस्य वक्तव्यत्वात्; 'गुरूणा गुरुणोदि'तत्वस्य, 'शास्त्रप्रभवेनोदित'त्वस्य, गुरुभ्यः श्रोतृभ्य उदित'त्वस्यैव च हेतुत्वे वक्तव्ये; प्रथमहेतुद्वयस्य बौद्धागमे, तृतीयस्य जैनागमे, 'तदर्थत उदित'त्वस्य तदुभयत्रापि, पूर्वहेतुत्रयस्य च नर्मादिवाक्ये मानताव्यभि-चारात्; 'गुरूणां गुरु'त्वादीनां च वक्त्रानुकूल्यादिरूपाध्याहृतसाध्याव्यभिचारात्, अध्याहृतसाध्यान्वय पक्ष एव युक्तः; इत्यतः प्रत्येकमेषां मानताव्यभिचारेऽपि 'गुरूणां गुरुणोदित'त्वे सति, 'शास्त्रप्रभवेनोदित'त्वे सति, 'गुरुभ्यः श्रोतृभ्यः उदित'त्वे सति, 'तदर्थत उदित'त्वादिति विशिष्टहेतोः क्वचिद्विशेषणाभावेन, क्वचित् विशेष्याभावेनोक्तस्थलेष्व-भावान्नात्रापि व्यभिचारप्रसक्तिरित्याह यद्यपि चेति।

वा०र०— इत्युक्तमुपपादयितुमिति। इत्यनेनोक्तं वक्त्राद्यानुकूल्यादीनां साक्षात्साध्यत्वं मानत्वस्य तु परमसाध्यत्वं विवक्षितमित्येतदुपपादयितुमित्यर्थः। शङ्कत इति। बाधकाभावाद्गुरुगुरुत्वादिहेतूनां मानत्वं साक्षात्साध्यमित्येतत्परतयैव गुरुर्गुरूणामिति मूलं योजयितुं शक्यमिति शङ्कते इत्यर्थः। मध्ये साध्यान्तरेत्यत्र तत्तदंशस्य तत्तत्साध्यमिति प्रदर्शनेन विशदयति सार्वज्ञ्यमुखेनेत्यादि। साधकत्वसंभवे इति सप्तमी। नाश्रुतेति। नेत्यस्योपपन्नमिति वक्ष्यमाणेनान्वयः। श्रुतमानत्वसाध्यकत्वसंभवेऽश्रुतश्रोतृप्रसङ्गानुकूल्यसाध्यकत्वं नोपपन्नम्। उक्तसाध्यकत्वकल्पनं नोपपन्नमित्यर्थः। पक्षे सत्त्वेनेति। बादरायणादिरूपे पक्षे सत्त्वेनेत्यर्थः। प्रामाण्यसाधने चेति। प्रामाण्यस्य साध्यत्वे चेत्यर्थः। एतेषां च हेतूनां तत्रेति। यद्यप्यत्र गुरुर्गुरूणामित्यादिहेतूनामिति

प्रागुक्तैर्गुर्गुरूणामित्यादीनामित्येव चात्रोक्तैर्नोक्तरूपेण शास्त्रपक्षत्वे हेतुपर्यवसानं स्पष्टमायातीति न तेषां व्यधिकरणत्वाशङ्कनं कथमित्याभाति । तथापि पूर्वयोजनायामिवैतद्योजनायामपि गुर्गुरुत्वादिरूपेणैव हेतुपर्यवसानं वाच्यम् । प्रकारान्तरविरहादित्याशयेन तदाशङ्कोपपत्तिः । अत एवं व्यधिकरणत्वशङ्कारहितहेत्वन्तरलाभं वर्णयिष्यतीति ज्ञेयम् । न दोष इति । 'आश्रयव्याश्रयसिद्धौ साध्यासिद्धिश्च दूषणम् । केषाञ्चिन्न हि ते दोषा' इति भक्तिपादीयानुव्याख्याने आश्रयसाध्यव्यधिकरणासिद्धयो दूषणमिति प्रमाणलक्षणे च तददोषतायाः प्रतिपादनादिति भावः । समुचितदेशसिद्धेरनुमानाङ्गतया स्वीकारेण धूमादाविव साध्याधिकरणस्यैव समुचिततया हेतोस्तत्राभावे व्याप्तिग्रह एव तत्रानुपपन्न इति व्याप्यभाव एव व्यधिकरणत्वे प्राप्तो भवतीत्याशयेनाह तथापीति । श्रूयेतेत्यतःपरं न चैवमिति शेषः । तेन विपर्ययपर्यवसानोपपत्तिः । तदुदितमित्यस्य चेति चशब्दबलान्न चैवमित्यस्य लाभ इत्यप्याहुः । तृतीयान्तपुरुषेण विग्रहप्रदर्शनं तेन बादरायणेनोदितमितीति । तेन तृतीयान्तेत्यत्र तेनेत्यस्य तृतीयान्तपुरुषसमभिव्याहृततदुदितमितिपदेनेत्यर्थः । बादरायणपदविशेषणतयेति । अत्र बादरायणस्य वाचकं पदं बादरायणपदमिति व्युत्पत्त्या विग्रहे तृतीयान्तं तेनेतिपदं गृह्यते । गुरूणां गुरुरित्यादीनामिति । हेतुशरीरप्रविष्टगुरूणां गुरुरित्यादौ विद्यमानगुरुः प्रभवो बादरायण इत्येतत्प्रथमान्तानामपीत्यर्थः । वक्ष्यति च पूर्वार्धोक्तप्रथमान्तानामिति । सूचनादित्यस्य तादृशबादरायणेनोदितं तच्छास्त्रं मानमिति संबन्धे सतीति वक्ष्यमाणेनान्वयः । अत्र पक्षे पक्षसमर्पकशास्त्रपदमध्याहार्यं भवतीत्यतः प्रकारान्तरमाह तदित्यस्य भिन्नपदत्वे वेति । प्रथमान्तानामिति हेतुशरीरप्रविष्टगुरुरित्यादि प्रथमान्तानामित्यर्थः । उदितमित्यनेन संबन्ध इति । केनेति प्रतिसंबन्ध्याकाङ्क्षावाग्णायेति शेषः । तच्छास्त्रमानमित्यत्र तदित्येतदनूद्य शास्त्रमिति व्याकृतम् । ब्रह्ममीमांसाशास्त्रस्य प्रकृतत्वात्तदिति परामर्शोपपत्तिरिति भावः । उदितत्वस्य च लाभादिति । यतश्चेत्यनेनोक्तरूपोदितत्वस्य हेतुत्वसमर्पणमिति तु सिद्धमेवेति नोक्तम् । कल्पने समान इति । श्रुतप्रथमात्यागादश्रुततृतीयास्वीकाराच्चेत्यर्थः । वाक्यार्थविषये इति । मध्ये साध्यान्तराध्याहारे स्वतन्त्रवाक्यार्थान्तरस्वीकार आयाति । अत्र तु यथाश्रुतमानत्वरूपसाध्यसंबन्धमङ्गीकृत्य विभक्तिविपरिणामप्रामाण्यस्वीकारान्न वाक्यार्थान्तरकल्पनापत्तिरित्यर्थः । नानुपपत्तिरिति । श्रुतत्यागादिरूपानुपपत्तिर्नास्तीत्यर्थः । एते प्रत्येकं बौद्धागमादाविति मूले तदुदितमिति वचनाद्विभक्तिविपरिणामेनेत्येतन्मूलाशयरूपगुरूणां गुरुणा बादरायणेनोदितत्वस्येत्यादि पूर्वग्रन्थानुसारेण बादरायणपदघटितं पूर्वहेतुद्वयं अजादिपदघटितस्तृतीयो हेतुरजादिपदविलक्षणादेव तदर्थत इत्यत्र तच्छब्दस्याजादिपरत्वप्राप्त्या अजादिप्रयोजनायोपादितत्वरूपश्चतुर्थो हेतुरित्येवं चत्वारो हेतव एते इत्यनेन परामृश्यत इति प्रतीयते । न च तेषां विवक्षा युक्ता । बौद्धागमादिषु बादरायणादिपदविशिष्टानामेषामभावेन वक्ष्यमाणरीत्या व्यभिचारस्य वक्तुमशक्यत्वात् । अतो व्यभिचरतीत्येतदुपपत्तये हेतुषु सद्धेतुकमुपपादयन्नेव सङ्कुचितहेतूनां बौद्धागमादिषु व्यभिचाराशङ्कनपरत्वेनैतद्ग्रन्थं योजयंस्तत्तात्पर्यं चाह नन्वत्र गुरूणामित्यादिना । ग्रहणस्येति । विवक्षितत्व इति संबन्धः । बादरायणाजादिग्रहणस्येति । यद्यपि बादरायणेनोदितत्वाजादिभ्य उदितत्वमात्रविवक्षायामपि हेतुत्वोपपत्तिः । विशेषणवैयर्थ्यं तु पक्षान्तरेऽपि समानम् । तथापि विवक्षितार्थतत्त्वज्ञानादिरूपवक्त्रायानुकूल्यसिद्धिस्तद्धेतुभ्यां न भवतीति बादरायणादिपदमेवाविवक्षित्वा हेतुत्वोपपत्तिराश्रयणीया । यद्यपि चाजादिग्रहणस्य वक्तृप्रेमास्पदत्वरूपश्रोत्रानुकूल्यैकदेशसूचनार्थत्वात्तदभावे

श्रोतृपदेन तत्सूचनायोग एवेति । तदप्यवेशवचनायोगस्तथाप्यत्र श्रोतृपदमेव तार्च्छील्यकृतनन्तं श्रवणशीलत्व-प्रतिपादनमुखेन वक्तृप्रेमास्पदत्वाभिधायकमिति भावेनास्य प्रवृत्तेर्न दोष इति ज्ञेयम् । श्रोतृभ्य उदितत्वस्यैव चेति । उपलक्षणं चैतत् । श्रोतृप्रयोजनायोदितत्वस्यैवेत्यपि ज्ञेयम् । तदर्थत इत्यत्र तच्छब्दस्याजादिपरत्वाभावाच्छ्रोतृ-मात्रपरत्वलाभेनोक्तचतुर्हेतुप्राप्तेः । अत एव तदर्थत उदितत्वस्य च व्यभिचारं वक्ष्यति । आर्षकसिद्धमभिप्रेत्य तद्धेतोरत्र मुखत आदानं न कृतमिति ज्ञेयम् । वक्तव्य इत्यनेनैतद्धेतुनाभिप्रेत्यैव व्यभिचारोक्तिर्मूल इति सूचितं भवति । वक्तुरनुकूल्याभावाज्जैनाद्यनाप्तवाक्यमित्याकूतमूलानुसारेणाह बौद्धागम इत्यादि । गुरूणां गुरुणेत्यादि हेतुद्वयस्य तत्त्वोपदेशकोपदेष्टृत्वशास्त्रप्रणेतृप्रणीतत्वरूपेण पर्यवसन्नस्य च तदुभयत्रापि सत्त्वात्तत्र च प्रमाणत्वाभावेन मानता-व्यभिचारादित्यर्थः । तस्यां मानत्वे हेतुत्वमनाश्रित्य वक्त्राद्यानुकूल्ये हेतुत्वमाश्रयणीयमिति शङ्काशयप्रदर्शनं गुरूणां गुरुत्वादीनां चेति । गुरुगुरुत्वाशेषशास्त्रप्रभवत्वेत्यादि पूर्वोक्तहेतूनामित्यर्थः । वक्ष्यति । वक्त्रानुकूल्यादिशब्दोक्त-विवक्षितार्थतत्त्वज्ञानादिरूपाध्याहृतसाध्येन व्यभिचारित्वस्याभावादित्यर्थः । यो हि यस्यांपदेष्टेत्यादि पूर्वमूलानु-सारेण सामान्यव्याप्तिसंभवादिति भावः । तत्त्वोपदेशकोपदेष्टृत्वादिरूपेणैव गुरुगुरुत्वादेः प्रागुक्तीत्या विवक्षयैवेद व्यभिचाराभावप्रतिपादनमपि । हेत्वर्थनिष्कर्षस्तु अनुपदमेव भविष्यति । क्वचिद्विशेषणेति । जैनागमे वक्त्रानु-कूल्यरहिते प्रथमविशेषणद्वयाभावेन श्रोत्रानुकूल्यरहिते बौद्धागमे च तृतीयविशेषणाभावेनेत्यर्थः । विशेष्यंति । प्रसङ्गानुकूल्यरहिते च नर्मादौ तदर्थत उदितत्वरूपविशेष्याभावेनेत्यर्थः । तदर्थत उदितत्वस्य विशेष्यत्वं प्रथमस्य च विशेषणत्वे मध्यस्थयोः शास्त्रप्रभवेनोदितत्वादिरूपयोः पूर्वापेक्षया विशेष्यतायां वोत्तरापेक्षया च विशेषणतायां वा सत्त्वान्मध्यस्थग्रहणमप्यविरुद्धमिति ज्ञेयम् । नन्वत्र जैनागमे प्रथमविशेषणद्वयस्य भारतादीत्युत्तरग्रन्थानुसारेण विशेषपर्यवसन्नतया यत्किञ्चिदुपदेशकोपदेष्टृदितत्वयत्किञ्चिच्छास्त्रप्रभवोदितत्वयोः विद्यमानत्वेऽपि भारतादी-त्युक्तस्य विशिष्टीकृतविशेषणद्वयस्याभावेन व्यभिचारवारणसंभवेऽपि वक्ष्यमाणरीत्या विप्रलिप्सावत्त्वेनाप्रिशून्यं बौद्धागमे भगवता बुद्धेनोदिते प्रथमविशेषणद्वयवत्त्ववत् विशेषपर्यवसन्नतयानङ्गीकृतगुरुभ्यः श्रोतृभ्यः उदितत्व-रूपतृतीयविशेषणस्यापि सत्त्वाच्चतुर्थस्य च तत्र सत्तया भवतैव प्रागभिधानाद्विशिष्टहेतोरपि बौद्धागमे सत्त्वान्न व्यभिचारवारणं संभवति । यदि च गुरुभ्यः श्रोतृभ्य इत्यनेन विशेषो व्याख्यायते तर्हि ब्रह्मादीन्प्रति अनुप-दिष्टतया विनाप्तागमे व्यभिचाराप्रसङ्गेन तद्वारणायोक्तपर्यवसन्नविशेषणद्वयानर्थक्यं स्यात् । तत्कथमेनदिति चेत् । न । गुरुभ्यः श्रोतृभ्य इत्यत्र ब्रह्मादीन्प्रति विशेषव्यास्यानाभावेऽपि गुरुपदस्य तत्त्वोपदेष्टृमात्रपरत्वेऽपि च तद्गम्यतत्त्वज्ञानयोग्यत्वस्य जैनागमीयश्रोतृषु सत्त्वात् तृतीयहेतोस्तत्र व्यभिचारः प्रसज्यत एव । बौद्धागमे तु नैवम् । तत्रत्यश्रोतृस्तदयोग्यत्वात् । ननु वास्तवतत्त्वज्ञानयोग्यत्वं नोभयत्रापि तदागमजन्यतत्त्वज्ञानयोग्यत्वं चोभयत्रापीति कथमयं विशेष इति चेत्सत्यम् । अस्त्यत्र विशेषः । बौद्धागमो हि भगवता वास्तवतत्त्वज्ञानायोग्यानां मोहनाय प्रणीत इत्यविवादम् । तत्र च भगवदुपदेशे तेषामयोग्यानामधिकाराभावेऽपि मोहनस्य प्रयोजनत्वोक्त्या तत्त्वज्ञानायोग्या एव ते व्यवह्रियन्ते तदागमजतत्त्वज्ञानयोग्यता तु विद्यमानापि न सधिका नापि बाधिका । न चैवं जैनागमे वक्तुं शक्यम् । तत्र तत्त्वज्ञानयोग्यतापदेन वास्तवतत्त्वज्ञानयोग्यताया एव झटिति प्रतिपादनात् तस्याश्च तत्र विद्यमानतया हेतुसत्त्वसंभवात् । यत्र त्वन्यप्रकारेण ज्ञातवतां प्रकारान्तरेणोपदेशः क्रियते

प्रतारणादिस्थले तत्रैव वास्तवस्वज्ञानोपदेशाभावः । परस्य तत्त्वज्ञानायोग्यत्वप्रयुक्त इत्यस्य सर्वसंमत्या बौद्धागमस्थले श्रोतॄणां तत्त्वज्ञानायोग्यतैव । जैनागमस्थले च तत्त्वज्ञानयोग्यतैवेति प्रकारद्वयस्य कल्पनोपपत्तेः । वक्ष्यति चैतत् । अत एव तदर्थत उदितत्वादित्यत्रापि श्रोतृप्रयोजनायेत्येव विवक्षणेऽपि मोक्षरूपेण विशेषणेऽपि च मोहनायैव मोक्षार्थिभ्यो बौद्धागमस्य भगवता बुद्धेन प्रणयनाज्जैनागमस्यापि तदीयश्रोतृमोक्षार्थमेव तेन प्रणयनात् तदर्थत उदितत्वस्य तदुभयत्र सत्त्वात्प्रसङ्गानुकूल्यं तदुभयत्रास्त्येव । अत एव च विवक्षितार्थतत्त्वज्ञान-करणपाटवविवक्षारूपात्येकदेशा इवाविप्रलिप्सापि वक्त्रानुकूल्यत्वेन प्राचीनमूलादौ नोक्ता । वक्ष्यते चाप्तत्वसंपूर्त्यै उत्तरमूल इति । तदेवं प्रथमहेतुद्वयस्य भारतादीत्युत्तरमूलानुसारेण जैनाद्यागमव्यावृत्तत्वात्तृतीयहेतोरपि तत्त्व-ज्ञानायोग्याधिकारिकोपदेशरूपबौद्धागमव्यावृत्तत्वाद्विशिष्टहेतोर्न कुत्रापि व्यभिचार इति सूरयो विदांकुर्वन्तु । वक्त्राद्यानुकूल्याभावादेः सर्वत्र सत्त्वेऽपि तत्र तत्र पुरस्फूर्त्यसारेण वक्त्रानुकूल्याभावाज्जैनाद्यनाप्तवाक्यमित्यादि-ग्रन्थप्रवृत्तिः । यद्यैतदधिकरणपूर्वपक्षदशायां विषयादिशून्यत्वेनानारम्भणीयत्वे दृष्टान्तप्रतिपादनावसरे विषया-भावादयः समनस्केन्द्रियसन्निकृष्टस्फीतालोकमध्यवर्तिघटादिजिज्ञासादिषु प्रयोजनाद्यभाववत्स्वपि विशिष्याभि-धीयन्त इत्यप्याहुः ।

स०व्र०— " 'गुरूणां गुरुत्वादि'त्यादिहेतूनां साक्षाद्वक्त्राद्यानुकूल्यमेव साध्यं, न प्रामाण्यमि''त्युक्त-माक्षिपति **नन्वत्रेति** । यदि सामान्यमेव साक्षात्साध्यं स्यात्तदा व्यधिकरणता स्यात्, 'इदं शास्त्रं प्रमाणं, व्यासस्य गुरूणा गुरुत्वात्, भारताद्यशेषशास्त्रप्रभवत्वादितीत्यत **आह यद्यपीति** । **एषां व्यधिकरणतेति** । एषां मध्ये द्वयोर्व्यधिकरणतेत्यर्थः । 'तदुदितमि'ति तच्छब्देन पूर्वोक्तविशेषेण विशिष्टो बादरायणः परामृश्यते । उदितशब्दस्य भावप्रधानस्य पक्षम्यन्ततया विपरिणामः । तेन सामानाधिकरण्यं भवति । अन्यथा वक्त्राद्यानुकूल्यसाधनेऽपि वैयधिकरण्यतादवस्थ्यादित्याह **तथापीति** । **यद्यपीति** । 'गुरूणां गुरुणोदित'त्वस्य, 'शास्त्रप्रभवेणोदित'त्वस्य बौद्धागमे सत्त्वेन तत्र प्रामाण्याभावेन 'श्रोतृप्रयोजनोद्देशेनोदित'त्वस्यादिशब्दोक्तजैनागमे सत्त्वेन व्यभिचारात् 'एत' इत्युपपन्नमिति भावः ॥ **मिलितानामिति** । भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वे सति श्रोतृप्रयोजनोद्देशेन प्रणीतत्वं हेतुरित्यर्थः । मन्वादिस्मृत्यादौ श्रोतृप्रयोजनोद्देशेनोपदिष्टत्वरूपांशान्तरस्य सत्त्वेन तदप्रवेशेनासाधारण्यानुपपत्त्या भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वांशस्येत्युक्तम् । न च 'गुरूणां गुरुणोदित'त्वस्य तत्राभावेनापि असाधारण्यं किं नोच्यत इति वाच्यम् । 'गुरूणां शास्त्राणां गुरुः प्रभव' इत्यनेनैव भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वलाभेन तस्य हेत्वन्तरत्वाभावादिति भावः । केचित्तु ॥ **तथापि मिलितानामिति** । भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वे सति गुरूणां गुरुणा ब्रह्मादिभ्यस्तत्प्रयोजनोद्देशेनोदितत्वादिति हेतोः इत्यर्थः ।

कुण्डल०— ननु गुर्गुरूणामिति श्लोकोक्तहेतूनामवान्तरसाध्याध्याहारं विनापि शास्त्रप्रामाण्यलक्षण-साध्येनैव साक्षादन्वयसंभवे वक्त्रगतिर्नाश्रयणीयेति शङ्कते **नन्विति** । अत्रोक्तहेतूनां शास्त्रलक्षणपक्षवृत्तित्वाभावेन साध्यवैयधिकरण्यमाशङ्क्य विभक्तिविपरिणामेन तत्सामानाधिकरण्यं संपादयति **यद्यपीत्यादिना** । तदुदितमिति

वचनादिना अनन्तरं सूचितेनेति शेषः। **विभक्तिविपरिणामेनेति**। तदिति भिन्नं पदं बादरायणस्य भगवद्रूपपरामर्शकं प्रथमान्तं तृतीयाविभक्त्यन्ततया विपरिणम्यते। एवं सति इत्थं हि योजना। यो बादरायणः यतो गुरूणां गुरुः गुरूणां शास्त्राणां गुरुः प्रभवः यतः तेन बादरायणाख्यभगवद्रूपेणाजादीन्प्रति तदीयमोक्षायेदं शास्त्रमुदितं उपदिष्टं अतो मानमिति। **सघूमो गिरिः साग्निकः** इत्यादिवत् उचितं हेतुगर्भं विशेषणम्। यद्वा तदुदितमिति समस्तं पदं उदितमिति भावप्रधानः। **उदितं** व्यक्तवचनम्। प्रणयनमिति यावत्। **पञ्चमीविभक्त्यन्तत्वेन** विपरिणामः। तथा चायमर्थः। तेन पूर्वोक्तविशेषणविशिष्टेन बादरायणेनोदितं, उदितात् प्रणयनात्। यद्वोदितमिति कर्मप्रधानः भावप्रधानोऽयं निर्देशः, प्रणीतत्वादिदं शास्त्रं मानमिति योजना। यद्यप्यत्र यतस्तदुदितं तेन बादरायणेन प्रणीतमिदं शास्त्रं अतो मानमिति विभक्तिविपरिणामं विनाऽपि साध्यसाधनयोः सामानाधिकरण्यसंपादनं संभवति। तथापि विपरिणामाभावे हेत्वर्थः स्पष्टं नावगम्यते। वक्ष्यमाणरीत्या वक्त्राद्यानुकूल्यानुमानस्यागमवाक्यत्वादित्यतो विभक्तिविपरिणामादरः इति द्रष्टव्यम्। अन्ये तु तदुदितमित्यत्र तदिति भिन्नं पदं शास्त्रपरं तथाच गुरूणां गुरुणा गुरूणां शास्त्राणां प्रभवेन बादरायणेन यतत् शास्त्रमुदितं अतो मानमिति एकाधिकरणतोपपद्यत इत्यर्थ इत्याहुः। गुरुगुरूदितत्वशास्त्रप्रभवत्वब्रह्मादीन्प्रति बादरायणोपदिष्टत्वमोक्षार्थम् उपदिष्टत्वहेतूनां व्यभिचारमाशङ्क्य निरस्यति **यद्यपि चेत्यादिना**। **बौद्धागमादाविति**। गुरुगुरूदितत्वस्य बुद्धप्रणीते आगमे शास्त्रप्रभवोदितत्वस्य व्यासप्रणीते शैवपुराणे अजादीन्प्रति उपदिष्टत्वस्य तान्प्रति प्रयुक्ते नर्मवाक्ये मोक्षार्थमुपदिष्टत्वस्य मोक्षार्थमुपदिष्टत्वेनाभिमते गौतमादिप्रणीते शास्त्रादौ माननालक्षणसाध्यरहिते उक्तहेतूनां प्रत्येकं व्यभिचार इत्यर्थः। **मिलितानामिति**। तथाच समुदितानामेषां साध्याभावाधिकरणे समावेशाभावात् न व्यभिचार इति भावः। यद्यप्यत्राजादीन्प्रति तन्मोक्षार्थं बादरायणोपदिष्टत्वहेतोर्मानता सामानाधिकरण्यनैय्यत्येन व्यभिचारोद्भावनं न संभवति। तथापि श्रोत्रानुकूल्यं प्रति ब्रह्मादीन्प्रत्युपदिष्टत्वस्य प्रसङ्गानुकूल्यलक्षणसाध्यं प्रति तदीयमोक्षार्थमुपदिष्टत्वस्य च हेतोः प्रत्येकं वक्तव्यतया तदभिप्रायेण प्रत्येकं व्यभिचार इत्युक्तमिति द्रष्टव्यम्।

विद्व०— ननु तथापि न यथाश्रुतव्याख्यानं संभवति यतो गुरूदितत्वं शास्त्रप्रभवोदितत्वं बौद्धागमे बादरायणोदितत्वं शैवपुराणादौ अजादीन्प्रत्युपदिष्टत्वं तान्प्रति ईश्वरकृतनर्मादौ मोक्षार्थमुपदिष्टत्वं गौतमादिप्रणीतन्यायशास्त्रादौ मानतां व्यभिचरन्ति अत एतेषां मानतासाधने हेतुत्वानुपपत्तेरित्याशङ्क्य परिहरति **यद्यपि चैते इति**।

चक्रः— **यथाश्रुतः** श्रूयमाणपदसमभिव्याहाराधीनान्वयधीविषयः॥ **साध्यान्तराध्याहारेति**। प्रामाण्येतरवक्त्राद्यानुकूल्यत्रयरूपसाध्योपस्थापकपदप्रतीतिकल्पनयेत्यर्थः॥ **व्यधिकरणतेति**। दर्शितश्रूयमाणपदयोजनाधीनान्वयधीविषयतापन्नगुरुगुरुत्वशास्त्रप्रभवत्वगुरुशास्त्रप्रभवत्वानां सिषाधयिषितप्रामाण्यनिरूपितानुमित्युद्देश्यतारूपपक्षताश्रयीभूतप्रकृतशास्त्रनिरूपितवृत्तितावि॒रह इत्यर्थः॥ **वचनादिति**। 'तदुदितमि'त्यत्र सर्वनाम्ना कर्मसाधननिष्ठान्तस्य समासे लुप्तान्तर्वर्तिकर्त्रर्थकतृतीया सर्वनामविशेषणपदतानिर्वाहाय गुरुप्रभवबादरायणपदप्रकृतिकप्रथमात्रिकं तृतीयात्रिकं कल्पयिष्यतीति वा, तदित्यस्य व्यस्ततामुपेत्य पक्षोपस्थापकतायां कर्तृबोधकपदनिर्वाहाय तत्त्रिकस्य तत्कल्पकत्वोपगमेन वा, गुरुसंबन्धिगुर्वभिन्नसर्वनामार्थोदितत्वशास्त्रप्रभवाभिन्नतदुदित-

त्वादीनां गुरुगुरूदितत्वशास्त्रप्रभवोदितत्वादीनां वा प्रामाण्यहेतुतोपगमेन न क्षतिरित्याशयः । 'तदुदितमि'त्यस्य समस्ताकल्पे 'सविशेषणानां वृत्तिर्न, वृत्तस्य वा विशेषणयोगो ने'ति निषेधप्रसङ्गेन 'रुद्रस्य राजमातङ्गा' इत्यादाविवासामञ्जस्यं दुर्वारम् । न च 'शरैः शातितपत्रश्चैत्रस्य दासभार्ये'त्यादाविव निर्वाह इति वाच्यम्; 'प्रतियोगिपदादन्यत् यदन्यत्कारकादपि । वृत्तिशब्दैकदेशेन न तस्यान्वय इष्यते' इति नियमेन तत्र निर्वाहेऽपि, प्रकृते समासघटकसर्वनामार्थं प्रति गुरोः प्रभवस्य वा प्रतियोगित्वकारकत्वयोरभावेन तद्वचनाप्रवृत्त्या, समस्ताकल्पादपि व्यस्ताकल्पो गरीयानिति ध्येयम् ॥ 'तच्छब्देन पूर्वोक्तविशेषणविशिष्टो बादरायणः परामृश्यते । उदितशब्दस्य (च) भावप्रधानस्य पञ्चम्यन्ततया विपरिणामः । तेन सामानाधिकरण्यमि'त्यपि निबन्धान्तरे स्थितम् । अथ गुरुगुरुत्व-विशेषितबादरायणोदितत्वस्य, शास्त्रप्रभवत्वविशेषितबादरायणोदितत्वस्य, गुरुत्वविशेषिताजाद्युद्देशेनोदितत्वस्य च हेतुत्वे विशेष्यांशवैयर्थ्यनिबन्धनमतभेदनियन्त्रितनिग्रहासिद्धिप्रसङ्गेन; हेतुतावच्छेदकघटकतया तदनिवेशेऽपि आद्यहेतुद्वितस्य बौद्धागमशैवपुराणयोः तृतीयस्य जैनागमादौ, मोक्षोद्देशेनोपदिष्टत्वस्य च गौतमीयेऽनैकान्त्यापत्त्या; मानतायाः साध्यत्वस्य दुरुपगमतया, वक्त्राद्यानुकूल्यरूपसाध्यान्तरोपस्थापकपदाध्याहार आवश्यक इत्याशयेन आशङ्कते **यद्यपि चैत इति** ॥ गूढाभिसन्धिः समाधत्ते **तथापीति**।

काशी०— मानमिति तु परमसाध्यनिर्देश इत्युक्तमुपपादयितुं पूर्वपक्षमुपक्रमते **नन्वत्रेति** । इत्यादीनामित्यादिवाक्योक्तधर्माणाम् । यद्यपि गुरूणां शास्त्राणामित्युक्तद्वितीययोजनायां हेतुद्वयमेव यथाश्रुतालभ्यते तथाऽपि पक्षद्वयानुगमेन श्रोत्रानुकूल्यादिसाधकजगद्गुरुत्वादीनां पृथग्विवक्षया वा बहुवचनम् । अत एवैषां व्यधिकरणतेत्यपि सङ्गच्छते । अन्यथाऽजादिभ्यस्तदर्थतस्तदुदितत्वरूपद्वितीयार्थोक्तहेतोर्व्यधिकरणत्वाभावात्पूर्वार्धे बहुहेत्वनुक्तेर्बहुवचनानुपपत्तेः । **मध्ये साध्यान्तरेति** । गुरुगुरुत्वादिसाध्यत्वेन प्रामाण्यसाधनत्वेन च वक्त्राद्यानुकूल्यरूपसाध्यान्तरानुसन्धानकल्पनयेत्यर्थः । **एषामिति** । गुर्गुरूणामित्यादिपूर्वार्धलब्धधर्माणामित्यर्थः । वक्ष्यमाणरीत्या तत्तात्पर्यलब्धानां व्यधिकरणत्वाभावाद्यथाश्रुतानामित्युक्तम् । **व्यधिकरणतेति** । गुरुगुरुत्वादीनामाश्रयाश्रयिभावेन वक्तृगतत्वाच्छास्त्रगतेन प्रामाण्येन व्यधिकरणतेत्यर्थः । यद्यपि व्यधिकरणयोरपि साध्यसाधनभावः संभवति । यो गुरूणां गुरुस्तदुदितं प्रमाणमिति व्याप्तिसंभवात् । तथाऽपि समानाधिकरणयोरेव व्याप्तिरिति मतेनाह **तथाऽपीति** । **विपरिणामेनेति** । स्वाश्रयत्वस्थाने स्वाश्रयवक्तृकत्वरूपपरम्परासंबन्धविपरिणामेनेत्यर्थः । कुतोऽसौ लभ्यत इत्यतस्तदुदितमिति वचनादित्युक्तम् । यतोऽयं देशो नदीपूरवानत ऊर्ध्वदेशो वृष्टिमानित्यादौ नदीपूरस्य स्वाश्रयदेशनिरूपितोर्ध्वत्वरूपपरम्परयेव यतो बादरायणो गुरूणां गुरुतस्तदुदितं मानमित्यत्र गुरुगुरुत्वादेः स्वाश्रयवक्तृत्वरूपपरम्परया हेतुत्वस्य विवक्षितत्वान्न व्यधिकरणतेति भावः । यद्वा । विपरिणामेनेत्यस्य विशेषतयोपात्तस्य गुरुगुरुत्वादिविशिष्टस्योदितत्वांशे विशेषणत्वरूपविपरिणामेनेत्यर्थः । कुत एतल्लभ्यते । तदुदितमिति वचनात् । तथा चोक्तस्थले नदीपूरवन्निरूपितोर्ध्वदेशत्वस्येव प्रकृते गुरुगुरूदितत्वादेव हेतुतया विवक्षितत्वान्न व्यधिकरणतेति भावः । परिमळकृतामप्येतदेवाभिप्रेतम् । यद्यपि यो गुरूणां गुरुस्तेनैतादृग्गुणकेनोदितत्वादित्येवंरूपविपरिणामेनेत्यर्थस्तैरुक्तः । तथाऽप्युदितत्वस्य हेतुत्वज्ञापनार्थमुदितत्वादित्युक्तिर्न तूदित-शब्दस्य भावार्थं पञ्चम्यन्तत्वेन विपरिणामश्च विवक्षितः । तस्य व्यधिकरणत्ववारणानौपयिकत्वादिति ध्येयम् ।

विभक्तिविपरिणामेनेति पाठे पूर्वश्लोकस्थद्वितीयान्तशास्त्रशब्दस्य प्रथमान्तत्वेनानुषङ्गरूपविपरिणामेनेत्यर्थः । तत्र ज्ञापकं तदुदितमिति वचनादिति । अन्यथा तदुदितमित्यस्यानन्वयादिति भावः । तथा च तदुदितं शास्त्रमित्यस्यासत्त्वे गुरुगुरुत्वादिविशेषोदितत्वरूपविवक्षितहेत्वलाभेन यथाश्रुतगुरुत्वादीनामेव हेतुत्वं वाच्यमिति व्यधिकरणता स्यात् । तत्सत्त्वे तु विवक्षितोक्तहेतुलाभान्न दोष इत्याशयः । एतेषु कल्पेषु विपरिणामः कृप्त एव न तु कल्प्य इति ज्ञेयम् । यद्वा । गुरुरित्यादिप्रथमान्तस्य षष्ठ्यन्ततया विपरिणामेन गुरुगुरुत्वादिविशिष्टसंबन्धरूपहेतोः शास्त्रमित्यनेनान्वयात्प्रामाण्य-रूपसाध्येनैकाधिकरणतेत्यर्थः । ननु बादरायणेन शास्त्रस्य कः संबन्धो येनोक्तविपरिणामेनोपपत्तिरित्यतस्तदुदितमिति वचनादित्युक्तम् । तदुदितत्वरूपतत्संबन्धस्योक्तत्वादित्यर्थः । यद्वा । यादुपताद्यनुसारेण तदुदितमित्यत्र तदिति भिन्नं पदं शास्त्रपरम् । उदितमिति तृतीयान्तकर्तृसापेक्षपदप्रयोगाद्विभक्तिविपरिणामः । तथा च गुरूणां गुरुणा शास्त्राणां प्रभवेन च बादरायणेन यतस्तच्छास्त्रमुदितमतो मानमित्येकाधिकरणतेत्यर्थः । न च तदुदितमित्यस्य समासत्वेऽपि यो बादरायण उक्तविशेषणविशिष्टस्तेनोदितमित्यर्थलाभाद्विभक्तिपरिणामो व्यर्थ इति वाच्यम् । तथात्वे विशेष्यवाचकस्यैदं शास्त्रमित्यस्याध्याहारप्रसङ्गादिति । तत्र यद्यपि श्रुतपरित्यागाश्रुतकल्पनरूपविभक्तिविपरिणामादश्रुतकल्पन-रूपाध्याहार एव लाघवाद्युक्तः । न चैवं विभक्तिप्रातिपदिकयोर्द्वयोः कल्पनीयतया न लाघवमिति वाच्यम् । पदत्रयं विभक्तिविपरिणामापेक्षया विभक्त्यन्तैकप्रातिपदिकाध्याहारस्य लघुत्वात् । एवं सिद्धान्तेऽपि विशेष्याध्याहारसत्त्वे पूर्वपक्षे तत्प्रयुक्तगौरवाभावेन तद्व्याद्विपरिणामो न युक्तः । एवं तदित्यस्य भिन्नपदत्वे उदितमिति वचनादित्येव वक्तुमुचितम् । तावन्मात्रस्य विभक्तिविपरिणामसूचकत्वात् । तथाऽपि तदुदितमित्यस्य समासत्वे बादरायण इत्यन्तस्योत्तरार्धेऽन्वयाद्वाक्यभेदोऽपि दोषः । भिन्नपदत्वे च बादरायणेनोदितमित्येकवाक्यत्वसंभवाद्विपरिणाम एव युक्तः । तथा च न शास्त्रपदमध्याहार्यमिति ज्ञापनायैव तदुदितमिति सामानाधिकरण्येन निर्देश इति शङ्काशयः । वाक्यार्थचन्द्रिकायां तु तदुदितमिति तृतीयातत्पुरुषेण गुरुरित्यादीनां विभक्तिविपरिणामज्ञापनाद्गुरूणां गुरुणा शास्त्राणां प्रभवेन बादरायणेनोदितं शास्त्रमित्यन्वयसंभवान्न व्यधिकरणतेति पक्षान्तरमप्युक्तम् । अथ विभक्तिविपरिणामे श्रुतप्रथमाविभक्तिपरित्यागेनाश्रुतविभक्तिकल्पनया गौरवान्न पूर्वपक्षोत्थानम् । न च सिद्धान्तेऽपि गुरुरित्यादेर्मानमित्यनेन श्रुतसाध्यसाधनभाव परित्यज्य वक्त्राद्यानुकूल्येन तत्कल्पनान्न लाघवमिति वाच्यम् । गुरुरित्यादेर्मानमित्यनेन साध्यसाधनभावान्वयस्याद्याप्यसिद्धत्वेन तस्य श्रुतत्वानुपपत्तेः । न च सिद्धान्ते गुरुरित्यादेर्वक्त्राद्यानुकूल्यसाधकत्वे वक्त्राद्यानुकूल्यस्य च प्रामाण्यसाधकत्वे तात्पर्यकल्पनाद्गौरवमिति वाच्यम् । पूर्वपक्षेऽपि तदनुमानान्तरमिति वक्ष्यमाणरीत्या गुरुरित्यादेर्वक्त्राद्यानुकूल्यस्य च प्रामाण्यसाधकत्व एव तात्पर्यस्य कल्पनीयतया लाघवानवकाशादिति चेन्न । सिद्धान्तेऽप्युदितं मानमित्यनयोः श्रुतासत्तिपरित्यागस्यावश्यकत्वात् । न च पूर्वपक्षेऽप्यतो मानमित्यतः शब्दाध्याहारस्यावश्यकत्वादुदितं मानमिति श्रुतासत्तिपरित्यागः समान इति वाच्यम् । अतः शब्दाध्याहारस्य यतः शब्दरूपज्ञापकसिद्धत्वेन यत उदितमतो मानमित्येव प्रतीतेः । पूर्वपक्षे प्रतीतासत्तिपरित्यागाभावात् । एवं च यथाश्रुत एवेत्यस्य यथाप्रतीतानुपूर्वीलभ्य एवेत्यर्थोऽवसेयः । एवं सिद्धान्ते यतोऽज्ञादीनां गुरुतः सर्वज्ञो यतः शास्त्राणां प्रभवोऽतः सर्वज्ञः पटुकरणश्च यतो वक्ताऽतो विवक्षावान् यतोऽज्ञादयोऽतो वक्तृप्रिया यतो गुरवोऽतस्तत्त्वज्ञानयोग्या इत्यादिरीत्या बहुतरानुमानेषु तात्पर्यस्य कल्प्यतया

गौरवम्। पूर्वपक्षे त्वापाततो यतो गुरूणां गुरुणा शास्त्राणां प्रभवेन च बादरायणेनोदितमजादिभ्य उदितं तदर्थत उदितमतो मानमित्यनुमानचतुष्टये तथाऽपीत्यादिनिष्कृष्टकल्पे च विशिष्टैकानुमान एव तात्पर्याल्लाघवम्। सिद्धान्ते गुरुगुरूदितत्वादिना वक्त्राद्यानुकूल्योपेतत्वसाधन एव। तात्पर्यवर्णने तु निरुक्तविभक्तिविपरिणामं विना तदलाभात्पुनर्गौरवमेवेति शङ्काभिप्रायः। गुर्गुरूणामित्यादीनां प्रत्येकं मिलितानां वा प्रामाण्यसाधकत्वमिति विकल्पं मनसि निधायाद्ये दोषमाशङ्कते **यद्यपि चेति**। **एत इति**। गुरुगुरूदितत्वं शास्त्रप्रभवोदितत्वं च बुद्धप्रणीते गुरुशास्त्रप्रभवोदितत्वं बादरायणोदितत्वं ब्रह्मादीन्प्रत्युदितत्वं च शैवादिपुराणे तन्मोक्षार्थमुदितत्वं च साङ्ख्यादावागमाभासेऽप्यस्तीति प्रामाण्यं व्यभिचरन्तीत्यर्थः। यद्यपि बौद्धस्यार्थान्तरे प्रामाण्यमप्यस्ति। यथोक्तं महाभारततात्पर्यनिर्णये 'पृष्टश्च तैराह निजं हृदिस्थं बौद्धागमार्थं सृतिबन्धमोचनमि'त्यादि। तथाऽप्यप्रामाण्यभावस्यैवात्र फलतः साध्यत्वात्तत्र व्यभिचारोऽस्त्येवेति सूचयितुमागमेत्युक्तम्। बौद्धादेरर्थान्तरे आगमत्वेऽपि जगत्क्षणिकत्वादावागमाभासत्वादिति भावः। गुरुगुरुत्वादेर्हेतुशरीरप्रवेशे वैयर्थ्यदोषं विभावयितुं गूढाभिसन्धिर्द्वितीयं पक्षमुपादत्ते **तथाऽपीति**। तथा च बौद्धागमादौ बादरायणोदितत्वस्य शैवपुराणादौ तन्मोक्षार्थमुदितत्वस्य चाभावेन मिलितहेत्वभावान्न व्यभिचार इति भावः। **यद्यप्येकस्यापरेण वैशिष्ट्यमेव मिलितमिति** पूर्वपूर्वविशेषणविशिष्टान्त्यविशेषणवत्त्वरूपविशिष्टहेतुरेक एव। **तथाऽपि विनिगमनाविरहेणोत्तरोत्तरविशेषणविशिष्टाद्यविशेषणवत्त्वस्य पूर्वोत्तरविशेषणविशिष्टमध्यमविशेषणवत्त्वस्य च हेतुत्वसंभवान्मिलितानामिति** बहुवचनम्।

गूढ०— ननु गुर्गुरूणामित्यादयो हेतवः **किं साक्षात्प्रामाण्ये वा वक्त्राद्यानुकूल्ये वा**। नाद्यः। तथा सति साध्यान्तराध्याहारायोगात्। न द्वितीयः। **व्यभिचारेण प्रत्येकं हेतुत्वस्य वैयर्थ्येन मिलितानां हेतुत्वस्य चासंभवादिति शङ्कते नन्वत्रेति**। ननु गुरुत्वस्य शास्त्रप्रभवत्वस्य च व्यासनिष्ठत्वेन प्रामाण्यस्य च सूत्रनिष्ठत्वेन हेतुसाध्ययोर्व्यधिकरणत्वात् न प्रामाण्ये एतेषां हेतुत्वमित्यत आह **यद्यपीति**। **विपरिणामेनेति**। **उदितत्वादिति**। विपरिणामेनेत्यर्थः। नन्वेतेषां प्रामाण्ये न हेतुत्वम्। गुरुगुरुत्वस्य शास्त्रप्रभवत्वस्य च बौद्धागमकर्तरि बुद्धेऽपि सत्त्वेन व्यभिचारात्। अजादिभ्यस्तत्प्रयोजनोद्देशेनोदितत्वस्य पुरुषविशेषेणोदिते भवतामेतत्प्रयोजनसाधनमिति वाक्ये व्यभिचारात्। तथाच कथमेषां प्रामाण्ये हेतुत्वमित्यत आह **यद्यपीति**। गुरूणां गुरुणा शास्त्रप्रभवेन ब्रह्मादिप्रयोजनोद्देशेन प्रणीतत्वादिति मिलितानां हेतुत्वमस्त्वित्याह **तथापीति**।

प्रदीपः— वक्त्राद्यानुकूल्यमेव साध्यं न प्रामाण्यमित्युक्तमाक्षिपति **नन्वत्रेति**। यदि प्रामाण्यमेव साक्षात्साध्यं स्यात्तदा व्यधिकरणता स्यादिदं शास्त्रं व्यासस्य गुरूणां गुरुत्वात् भारताद्यशेषसच्छास्त्रप्रभवत्वादित्याह **यद्यपीति**। **तदुदितमिति**। **तच्छब्देन** पूर्वोक्तविशेषणविशिष्टो बादरायणः परामृश्यते। उदितशब्दस्य भावप्रधानस्य पञ्चम्यन्ततया विपरिणामः तेनासामानाधिकरण्यं भवति अन्यथा वक्त्राद्यानुकूल्यसाधनेऽपि वैयधिकरण्यतादवस्थ्यादित्याह **तथापीति**। **यद्यपीति**। गुरूणामुपदेष्टृप्रणीतत्वाद्भारतादिसच्छास्त्रप्रभवत्वे सति गुरुभ्यो ब्रह्मादिभ्यः तत्प्रयोजनोद्देशेनोदितत्वादिति हेतुरित्यर्थः। भारतादीति वेदे प्रणीतत्वमेव नास्ति मन्वादिवाक्ये प्रणीतत्वेऽपि व्यासप्रणीतत्वं नास्तीति भारतादीनां च प्रामाण्यमेवासिद्धम्। भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वं

हि तावद्वेदादितः सपक्षाद्व्यावृत्तो विपक्षाच्च बौद्धागमादेः ब्रह्मावगत्यर्थमुपदिष्टत्वरहिताद्व्यावर्तमानो विशिष्टो हेतुरसाधारणानैकान्तिकः स्यात्। वेदे विशेषणाभावः बौद्धागमादौ विशेष्याभावः मन्वादिवाक्ये विशिष्टाभाव इत्यर्थः।

४९ सु०— भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वांशस्य सपक्षाप्रवेशितत्वेन असाधारण्यं स्यादिति चेन्न। तेष्वेव हेतुवृत्तिसंभवात्। तत्प्रामाण्यस्य महाजनपरिग्रहादिना निश्चितत्वात्।

परि०— शास्त्रप्रभवत्वं विशेषणं मत्वा भारतादिसपक्षे हेतुर्नेति भावेन शङ्कते **भारतादीति**। उपलक्षणत्वाशयेनाह **तेष्वेवेति**। भारतादिष्वेवेत्यर्थः। ननु तत्राप्यनेनैव हेतुना मानत्वं साध्यमिति पक्षतौल्यान्न सपक्षत्वमित्यत आह **तदिति**। 'इतिहासपुराणः पञ्चमो वेदानां वेद' इति श्रुतिपरिगृहीतत्वादिरादिशब्दार्थः।

गु०दी०— सपक्षाप्रवेशित्वेन प्रमाणतया सपक्षभूतेषु नदीतीरे पञ्च फलानि सन्तीत्याद्यासवाक्येष्ववृत्तित्वेनेत्यर्थः। **तेष्वेव** हेतुशरीरघटकतयोक्तभारतादिष्वेवेत्यर्थः। ननु भारतादावपि इतःपूर्वं प्रामाण्यानिश्चयेन साध्यानिश्चयात्कथं सपक्षतेति शङ्कां वारयति **महाजनेति**। नन्वेवं सति महाजनपरिगृहीतत्वादिना भारतस्य प्रामाण्ये तेनैव ब्रह्ममीमांसाया अपि प्रामाण्यसिद्धेः व्यर्थमनुमानमिति चेत्, न। वेदादेरिव भारतस्य सकलवैदिकपरिगृहीतत्ववत् कणादसूत्रानुसारिणां साङ्ख्यकारिकानुसारिणां च ब्रह्मसूत्रे विवाददर्शनेन महाजनपरिगृहीतत्वाभावात्।

यादु०— मिलितानामित्यस्य वक्ष्यमाणमाशयमविद्वान्भ्रान्तः शङ्कते **भारताद्यशेषेति**॥ इदं च 'सपक्षैकदेशे भारतादौ न हेतोर्वृत्तिः इत्युपपादनाय। भारतादिप्रणयनविशिष्टेन तेषामप्रणीतत्वादिति द्रष्टव्यम्। तथा च वेदे प्रत्यक्षादौ च प्रणीतत्वाभावेन, प्रमाणभूतेऽस्मदीयवाक्ये बादरायणप्रणीतत्वाद्यभावेन, बादरायणीये च प्रमाणभूते गामानयेत्यादिलौकिकवाक्ये अजादिमोक्षार्थमुदितत्वाभावेन, भारतादौ चोक्तरीत्या हेत्वभावेन, न कुत्रापि सपक्षे हेतुसत्त्वमिति भावः। गूढाभिसन्धिरेवोत्तरमाह **तेष्वेवेति**। भारतादिष्वेवेत्यर्थः। अस्मदभिमतवक्ष्यमाणमिलितहेतोस्तत्र सत्त्वादिति भावः॥ ननु भारतादेरपि सूत्रकारकृतत्वेन सूत्रसमानयोगक्षेमतया कथं सपक्षत्वमिति तटस्थशङ्कायामाह **तत्प्रामाण्यस्येति**। ब्रह्मसूत्रप्रामाण्यानङ्गीकर्तृभिरपि कापिलगौतमीयादिभिर्भारतादिप्रामाण्यस्याङ्गीकृतत्वादिति भावः।

आनन्दः— नन्वत्र प्रामाण्यस्य साध्यत्वात्प्रमाणीभूतानां वेदादीनां सपक्षत्वेन भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वरूपहेतोरपौरुषेये वेदे तत्राभावेन सति सपक्षे तत्राप्रवेशो हेतुरसाधारण इति अस्य हेतोरसाधारण्यमित्यसाधकत्वमिति शङ्कते **भारतादीति**। ब्रह्मादीनां प्रत्यक्षेण परमात्मदर्शनेन ब्रह्मादिप्रयोजनार्थत्वरूपांशस्य प्रत्यक्षसत्त्वेन प्रणीतत्वांशस्येत्युक्तम्। अत्र किं यावत्सपक्षे सत्त्वं वा विवक्षितं यत्किञ्चित्सपक्षे सत्त्वं वा। नाद्यः। तथा सति धूमानुमानेऽपि असाधारण्यापत्तेः। यत्किञ्चित्सपक्षे सत्त्वं प्रकृतेऽप्यस्त्येवेति नासाधारण्यमित्याह **तेष्वेवेति**।

भारतादिष्वेवेत्यर्थः । भारताद्यशेषसच्छास्त्रप्रभवो यो व्यासः तत्प्रणीतत्वस्य तत्र सत्त्वादिति भावः । ननु निश्चितसाध्यवत्त्व एव हि सपक्षत्वं भारतादेश्च प्रामाण्यनिश्चयाभावेन सपक्षत्वस्यैवाभावेन कथं तत्र भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वरूपहेतुवृत्त्याऽसाधारण्यपरिहार इत्यत आह **तत्प्रामाण्यस्येति** । आदिशब्देन वेदसमानार्थत्वेन वेदमूलत्वरूपहेतुपरिग्रहः ।

कं०रा०— सपक्षाप्रवेशित्वेनेति । भारताद्यशेषसच्छास्त्रप्रणयनविशिष्टेन भारतादेरप्रणीततया भारताद्यशेषसच्छास्त्रप्रणेतृत्वरूपहेत्वंशस्य सपक्षे भारतादावसत्त्वादसाधारण्यमित्यर्थः । **तेष्विति** । भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वं नाम भारतादिप्रणयनोपलक्षितप्रणीतत्वं विवक्षितम् । तस्य च भारतादिषु सपक्षेषु सत्त्वान्नासाधारण्यमिति भावः । **ननु भारतादेः प्रामाण्यानिश्चयात्कथं सपक्षत्वमित्यत आह तत्प्रामाण्यस्येति** ।

श्रीनिधि०— अभिसन्धिमजानानः **शङ्कते भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वांशस्येति**। भारतादिप्रणयने तत्प्रणयनस्याहेतुत्वेन विशिष्टाभावात् **भारतादेर्हेतोर्व्यावृत्तिः**, मन्वादौ तु उभयाभावेन विशिष्टाभावादिति ध्येयम् । आशयं व्यञ्जयन् उत्तरमाह **तेष्वेवेति** । भारतादिष्वेवेत्यर्थः । ननु भारतादिप्रामाण्यस्यापि अनेन हेतुना साध्यत्वेन एषां सपक्षत्वमित्यत आह **तत्प्रामाण्यस्येति**।

वा०चं०— ननु विशिष्टहेतावपि पूर्वोक्तसत्यन्तद्वये 'गुरूणामि'ति ब्रह्मादीनां, शास्त्रपदेन च वेदाद्यशेषसच्छास्त्रस्य, विवक्षायाः अन्यतरेणैव जिनवाक्ये व्यभिचारपरिहारेण सत्यन्तद्वयस्य वैयर्थ्यापत्त्या; विशेषाविवक्षायां च सत्यन्तद्वयग्रहणेऽपि तत्र व्यभिचारापातात्; 'गुरूणां शास्त्राणां गुरुः प्रभव' इति योजनानुसारेण भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वस्यैव हेतुविशेषणत्वं वक्तव्यम् । एवं च वेदप्रामाण्यसिद्धौ तन्मूलकतया भारतस्येवैतच्छास्त्रस्यापि प्रामाण्यसिद्धया, तत्साधनायोनेन वेदप्रामाण्यानिश्चयेन भारतप्रामाण्यानिश्चयस्यैव वक्तव्यत्वेन वेदभारतादेः सपक्षत्वासंभवात् प्रत्यक्षानुमानयोर्मन्वादिवाक्यस्यैव च सपक्षत्वेन वक्तव्यत्वात्; प्रत्यक्षानुमानयोरुच्चारणरूपप्रणयनासंभवात् मन्वादिवाक्ये च 'गुरुभ्यः श्रोतृभ्यस्तदर्थत उदित'त्वसत्त्वेऽपि भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वांशस्याभावात् असाधारण्यापत्त्या न यथाश्रुतसाध्यसाधनभावो युक्त इत्याशङ्कते **भारतादीति** । माऽस्तु प्रत्यक्षानुमानमन्वादिवाक्यानां सपक्षत्वं वेदभारतादिष्वेव हेतुवृत्तेर्नासाधारण्यमित्याह **तेष्वेवेति** । ननु तस्य प्रामाण्यं न निश्चितमित्युक्तम् इत्यतो भारतस्य महाजनपरिग्रहेण वेदस्य चापौरुषेयतया प्रामाण्यनिश्चयेन वेदभारताद्यशेषशास्त्रस्य सपक्षत्वसंभवेऽपि, प्रकृतशास्त्रे वेदमूलकत्वस्याद्याप्यनिश्चयेन तत्प्रामाण्यसाधनासंभवादित्यभिप्रेत्याह **तदिति**।

वा०र०— वक्त्रानुकूल्यरहितजैनागमे व्यभिचारवारकतयोपात्तविशेषणद्वयस्य मिलित्वा भरतादीत्युक्तार्थत्वमेवाश्रियते । अधिकं तु प्रयोजनान्तरार्थमिति तद्वैयर्थ्यमिति भावेन प्रवृत्तेऽसाधारण्यशङ्कादि परे मूले कुतो विशेषणद्वयस्य सङ्कोच इत्याशङ्कां परिहरन् भारतादीत्युक्तार्थप्राप्तिं च दर्शयन् मौलांशस्येति पदार्थं च विवृण्वन्नसाधारण्यस्योपपादनसापेक्षत्वात् तदुपपादनं च कुर्वन्नाह **ननु विशिष्टहेतावपीति** । ब्रह्मादीनां विवक्षायामिति संबन्धः । **विशेषविवक्षायामिति** । ब्रह्मादीनामित्याद्युक्तविशेषेत्यर्थः । **योजनानुसारेणेति** ।

विशेषणद्वयमभीष्टत्वेति शेषः । तेनान्यतरवैयर्थ्यमिवेति शङ्कानवकाशः । प्रथमयोजनाया अत्रास्वीकारात् । एवं चेति । अस्यैव हेतुविशेषणत्वे चेत्यर्थः । असाधारण्यापत्त्येति वक्ष्यमाणे नास्यान्वयः । तत्स्थलाभिधानपूर्वकं तदुपपादनं प्रत्यक्षानुमानयोरित्यादि । ननु वेदभारतादेरेव सपक्षत्वसंभवात्तत्र च यथासंभवं भारतादीत्युक्तहेतुसत्त्वात् नासाधारण्यमित्यतो वेदप्रामाण्यनिश्चयमभ्युपगम्य वेदमूलकतया च भारतप्रामाण्यसिद्धिमभिप्रेत्य तदुभयस्य सपक्षत्वमित्यङ्गीकारे वेदमूलकतयैव भारतादेरिवैतच्छास्त्रस्यापि प्रामाण्यसिद्ध्यापत्त्या तत्साधनायोगप्रसङ्गेन वेदप्रामाण्यनिश्चयाभावस्यैवाङ्गीकार्यत्वात् तन्मूलकतया भारतादिप्रामाण्यनिश्चयाभावस्यैव च वाच्यत्वान्न तदुभयस्यापि सपक्षत्वसंभव इत्याह वेदप्रामाण्यसिद्धाविति । गुरुभ्यः श्रोतृभ्य इति । तत्त्वज्ञानयोग्येभ्यः श्रोतृभ्य उदितत्वेत्यर्थः । भारताद्यशेषेति वाक्ये बुद्ध्या विवेकमाश्रित्य भारतादिकमेव तेष्वेवेति तच्छब्देन परामृश्यत इत्याशयेन व्याख्यातं भारतादिष्वेवेति । मूले भारतादीति विवक्षानुसारेण प्रथमोपात्तभारतमभिप्रेत्य महाजनपरिग्रहस्य प्रथममुपादानेऽपि प्राधान्यविवक्षया अत्यादृत्तरत्वाद्वा वेदस्य प्रथमग्रहणं टीकायामिति न दोषः । तर्हि वेदमूलकत्वेनैतच्छास्त्रप्रामाण्यस्यापि सिद्धिप्रसङ्ग इति प्रागुक्तदोषः स्यादित्यत आह प्रकृतशास्त्र इति ।

स०न्न०— भारतादीति । वेदे प्रणीतत्वमेव नास्ति, मन्वादिवाक्येषु प्रणीतत्वसत्त्वेऽपि व्यासप्रणीतत्वं नास्ति, भारतादीनां च प्रामाण्यमप्रसिद्धम् । भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वरहितत्वेदादितः सपक्षाद्व्यावृत्तो, विपक्षाच्च बौद्धागमादेर्हेयार्थमुपदिष्टत्वरहितात्व्यावर्तमानो विशिष्टो हेतुरसाधारणानैकान्तिकः स्यात् । वेदे विशेषणाभावः, बौद्धागमादौ विशेष्याभावः, मन्वादिवाक्ये विशिष्टाभावः इत्यर्थ इत्याहुः । असाधारण्यशङ्काकर्तुराशयं प्रकटयितुं गूढाभिसन्धिरेव समाधत्ते तेष्विति । भारतादीनां निर्णेयत्वेन महाजनपरिग्रहात्प्रामाण्यं वेदवत् निश्चितं, नैवं निर्णायकस्य मीमांसाशास्त्रस्य, येन सिद्धत्वेन पक्षत्वं न स्यात् । मीमांसाशास्त्रमात्रप्रामाण्ये विप्रतिपद्यमानं प्रत्येतदुच्यत इत्यदोषः ।

कुण्ड०— नन्वेवमपि हेतोरसाधारण्यं स्यादेव मिलितहेतुशरीरप्रविष्टस्य भारतादिप्रणयनविशिष्टरूपशास्त्रप्रभवप्रणीतत्वस्य सपक्षे भारतादावभावेन विशिष्टहेतोरपि तत्रावृत्त्या पक्षमात्रवृत्तित्वादित्याशङ्क्य निरस्यति भारताद्यशेषेति । भारताद्यशेषशास्त्रप्रभवप्रणीतत्वं नाम भारतादिप्रणयनविशिष्टेन बादरायणेन प्रणीतत्वमिति नार्थः । येन हेतोः सपक्षाप्रवेशः स्यात्किं नाम भारतादिप्रणयनोपलक्षितेन प्रणीतत्वम् । तस्य च सपक्षे भारतादौ वृत्तिः संभवतीत्याह तेष्वेवेति । भारताद्यशेषसच्छास्त्रेष्वित्यर्थः । तथाच नासाधारण्यमिति भावः । अन्ये तु अजादीन्प्रति मोक्षार्थं बादरायणेनोपदिष्टत्वरूपहेतोरनेष्वेव वृत्तिसंभवादित्यर्थ इत्याहुः । ननु भारतादेर्वसरसूत्रवद्बादरायणप्रणीतत्वाविशेषात्कथं प्रामाण्याध्यवसायः येन सपक्षता स्यात् इत्यत आह तत्प्रामाण्यस्येति ।

वि०— तथापि मनुस्मृत्यादिसपक्षे साध्ये सत्यपि हेत्वंशाभावादसाधारणानैकान्तिकतेत्याशङ्क्य हेतुशरीरघटकभारतादीनामपि सपक्षत्वेन तेषु हेतोरसत्त्वान्न दोष इति परिहरति भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वांशस्येति । यद्यपीतरांशस्यापि न मन्वादिस्मृतिषु प्रवेशः तथापि परिहारे तेष्वेव भारतादिष्वेवेति

परामर्शसौकर्यायैवमुदितम् । अथवा मन्वादीनामपि वैवक्षिकगुरुगुरुत्वमस्तीति तत्प्रणीतस्मृत्यादौ इतरांशसद्भावाभिप्रायेणांशान्तरमात्रग्रहणम् । ननु भारतादेरपि बादरायणकृतत्वेन सूत्रसमानयोगक्षेमतया सन्दिग्धसाध्यत्वात् न सपक्षता इत्यतो महाजनपरिग्रहश्रुतिसंवादादिना च प्रामाण्यस्य सूत्रप्रामाण्यमनङ्गीकुर्वाणैः गौतमादिभिः अङ्गीकारात् सपक्षत्वं संभवतीत्याह **तत्प्रामाण्यस्येति** ।

चषकः— स्फुटीकरिष्यमाणाभिसन्धिमननुसन्दधानः शङ्कते **भारतेति** । प्रमाणभूतप्रत्यक्षानुमानयोः प्रणयनकर्मत्वाभावेन, तादृशचैत्रादिवाक्ये बादरायणकर्तृकतत्कर्मत्वाभावेन, बादरायणोच्चरित एव घटमानयेत्यादिवाक्ये अजादिमोक्षोद्देश्यकतत्कर्मत्वस्य विरहेण भारतादिप्रणेतृतावच्छेदककोटौ तत्प्रणयनस्य कार्याव्यवहितपूर्वक्षणावच्छेदेन कारणतावच्छेदकावच्छिन्नसमवधानायोगनियन्त्रिततदनुत्पत्तिप्रसङ्गेन दुरुपगमतया भारतादौ च हेत्वभावेन सपक्षसामान्यवृत्तितविरहेण असाधारण्यमिति भावः ।

काशी०— अत्र शास्त्रप्रभवोदितत्वमपि हेतुघटकमिति मन्वानः शङ्कते **भारतादीति** । अयमर्थः । मन्वादिस्मृतिषु बादरायणोदितत्वाद्यभावाद्भारतादिगतसंप्रतिपन्नवाक्येषु च शास्त्रान्तर्गतेषु शास्त्रप्रणयनोत्तरत्वाभावेन शास्त्रप्रणयनविशिष्टप्रणीतत्वरूपशास्त्रप्रभवोदितत्वाभावाद् विशिष्टहेतोः सपक्षावृत्तित्वेनासाधारण्यम् । न च शास्त्रान्तर्गतवाक्यानामपि तदन्तर्गतवाक्यान्तररूपशास्त्रप्रणयनविशिष्टप्रणीतत्वसंभवान्न दोष इति वाच्यम् । गुरूणां शास्त्राणामिति योजनायामशेषार्थप्रतिपादकत्वरूपगुरुत्वस्य भारताद्यशेषसच्छास्त्रसमुदाय एव संभवेन तदन्तर्गतवाक्ये तद्विशिष्टप्रणीतत्वायोगात् । एतेनोदितपदेनोपदिष्टत्वमात्रविवक्षायां वेदरूपसपक्षवृत्तित्वमेव विशिष्टहेतोः संभवतीत्यपास्तम् । वेदस्याप्युक्तसमुदायान्तर्गतत्वेन तद्विशिष्टोपदिष्टत्वस्यापि तत्रायोगादिति । आकाङ्क्षाक्रमेणाशयं प्रकाशयितुं गूढाभिसन्धिरेवोत्तरमाह **तेष्वेवेति** । भारताद्यशेषसच्छास्त्रेष्वेवेत्यर्थः । न वाक्यविशेषमात्र इत्येवार्थः । ननु भारतादीनामपि सूत्रवत्सन्दिग्धप्रामाण्यकत्वात्सपक्षत्वं कथमत आह **तत्प्रामाण्यस्येति** । महाजनपरिग्रहः प्रेक्षावत्त्वेन प्रसिद्धनारदाद्यङ्गीकृतत्वम् ।

गूढ०— नन्वत्र प्रामाण्यस्य साध्यत्वात् प्रमाणीभूतानां वेदादीनां सपक्षत्वेन भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वरूपहेतोरपौरुषेये वेदे तत्राभावेन सति सपक्षे तत्राप्रवेशो हेतुरसाधारण इत्यस्य हेतोरसाधारण्यान्न प्रामाण्यसाधकत्वमिति शङ्कते **भारतादीति** । ब्रह्मादीनां प्रत्यक्षेण परमात्मदर्शनेन ब्रह्मादिप्रयोजनार्थत्वरूपांशस्य प्रत्यक्षेण सत्त्वात् प्रणीतत्वांशस्येत्युक्तम् । अत्र हि किं यावत्सपक्षे सत्त्वं वा विवक्षितम्, यत्किञ्चित्सपक्षे सत्त्वं वा । नाद्यः । तथा सति धूमानुमानेऽपि असाधारण्यापत्तेः । यत्किञ्चित्सपक्षे सत्त्वं च प्रकृतेऽप्यस्त्येवेति नासाधारण्यमित्याह **तेष्वेवेति** । भारतादिष्वेवेत्यर्थः । भारताद्यशेषसच्छास्त्रप्रभवो यः व्यासः तत्प्रणीतत्वस्य तत्र सत्त्वादिति भावः । ननु निश्चितसाध्यवत एव हि सपक्षत्वं भारतादेश्च प्रामाण्यनिश्चयाभावेन सपक्षत्वस्यैवाभावेन कथं तत्र भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वरूपहेतुवृत्त्या असाधारण्यपरिहार इत्यत आह **तत्प्रामाण्यस्येति** । आदिशब्देन वेदसमानार्थत्वेन वेदमूलत्वरूपहेतुपरिग्रहः ।

प्रदीपः— **तेष्वेवेति** । भारतादिष्वेवेत्यर्थः । ततश्च सपक्षैकदेशवृत्तिर्हेतुरिति भावः । दृष्टान्तस्य साध्यवैकल्यमाशङ्क्याह **तदिति** । भारतादीनां निर्णेयत्वेन महाजनपरिग्रहात्प्रामाण्यं वेदवन्निश्चितं नैवं निर्णायकस्य मीमांसाशास्त्रस्य येन सिद्धत्वेन पक्षत्वं न स्यात् मीमांसाशास्त्रमात्रप्रामाण्ये विप्रतिपद्यमानं प्रत्येतदुच्यत इत्यदोषः । एवं तर्हि भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वांशस्य विवक्षायां भारतादीनां भारताद्यन्तराभावात् तत्प्रणेत्रा प्रणीतत्वा-योगादसाधारण्यं तदवस्थं अविवक्षायां वैयर्थ्यं तन्निवेशस्येत्यर्थः ।

५० सु०— एवं तर्हि भारतादिप्रणयनविशिष्टेन तेषामप्रणीतत्वात् बादरायणेन ब्रह्मादीन्प्रति तन्मोक्षार्थमुपदिष्टत्वमात्रं हेतुः स्यादिति चेद् बाढम् । तावन्मात्रस्यैव व्यभिचाराभावात् ।

परि०— प्रामाण्ये परम्परया हेतुरयमिति वादी शास्त्रप्रभवत्वस्य विशेषणत्वपक्षे विशिष्ट-हेतोरप्यसाधारण्यात् विशेष्येणैवालमिति भावेनाशङ्कते **एवं तर्हीति** । बाढमित्यङ्गीकारे हेतुमाह **तावन्मात्रस्येति** ।

यादु०— आशयमुद्घाट्यति **बाढमिति । तथा च पूर्वं मिलितानामित्यत्र** द्वितीयार्धोक्तानामेव मेलनमभिप्रेतं न पूर्वार्धोक्तानामपि । त्वया त्विममभिप्रायमजानता **पूर्वार्धोक्तानामपि मेलनं मत्वा** असाधारण्यं शङ्कितमिति भावः ॥

आनन्दः— ननु भारतादौ हेतुवृत्त्याऽसाधारण्यपरिहरणमयुक्तं तत्र हेतुवृत्तेरेवासंभवात् । तथा हि प्रभवशब्दो हि प्रभवत्यस्मादिति व्युत्पत्त्योत्पत्तिकर्तृपरः । एवं च भारताद्यशेषशास्त्रोत्पत्तिकर्तृप्रणीतत्वमित्यर्थो लभ्यते तथा चात्रोत्पत्तिरुपलक्षणं वा विशेषणं वा । नाद्यः । गुर्वीगुरुणामित्यादेरानर्थक्यापत्तेः । न द्वितीयः । भारतोत्पत्तिविशिष्टेन प्रणीतत्वस्य भारतेऽसंभवात् । विशिष्टस्य कारणत्वे विशेषणस्यापि कारणत्वेन भारतोत्पत्तिरूपविशेषणस्यापि भारतोत्पत्तिं प्रति कारणत्वापत्तेः । न हि स्वस्यैव स्वं प्रति कारणत्वं संभवत्यात्माश्रयात् । न च पूर्वभारतोत्पत्ति-विशिष्टेनोत्तरभारतोत्पत्तिः क्रियते इति तत्र हेतुवृत्तिः संभवत्येवेति वाच्यम् । तथापि तस्या एतद्भारतोत्पत्तौ कारणत्वाभावात् । भारताद्यशेषेत्युक्तत्वेन भूतवर्तमानभविष्यत्सकलभारतानां गृहीतत्वेन तदुत्पत्तिविशिष्टेन प्रणीतत्वस्य भारतेऽसंभवग्रस्तत्वाच्च । तस्मात् न तत्र हेतुवृत्त्याऽसाधारण्यपरिहारो न युक्त इति शङ्कते **एवं तर्हीति** । इष्टापत्त्या परिहरति **बाढमिति** ।

श्रीनिधि०— विदिताशयः परमुखेनैवाशयमाविष्कारयितुं शङ्कते **एवं तर्हीति** । आशयमाविष्करोति **बाढमिति** ।

वा०चं०— नन्वेवं भारताद्यतिरिक्तस्य सपक्षत्वे भारतादिप्रणयनविशिष्टेन तत्प्रणयनसंभवेऽपि, भारतादेरेव सपक्षत्वे भारतादेर्भारताद्यन्तराभावेन भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वांशस्य तत्रासंभवेन पुनरसाधारण्यापत्त्या;

भारतादेरेव सपक्षत्वं वदता तद्विशेषणाविवक्षा, विशेष्यमात्रविवक्षा चाभ्युपेता स्यात्। तथा च 'बादरायणेन ब्रह्मादीन्प्रति तन्मोक्षार्थमुपदिष्ट'त्वमात्रं हेतुः स्यादिति गूढाभिसन्धिः शङ्कते **एवमिति**। 'तावन्मात्रस्य व्यभिचारित्वे ह्यदमनिष्टापादनं स्यात् न चैवमि'त्यभिप्रेत्याभिप्रायमजानान इव गूढाभिसन्धिरेवोत्तरमाह **बाढमिति**।

वा०र०— **सपक्षत्व इति**। यदि भारताद्यतिरिक्तस्य सपक्षत्वं भवद्भिरङ्गीक्रियेत तर्हि तत्रोक्तहेतुसत्त्वं संभवतीत्यर्थः। **भारतादेरेवेति**। तस्यैव चेत्सपक्षत्वमङ्गीक्रियते तर्हि तत्रासाधारण्यापत्त्येति संबन्धः। तदुपपादनं **भारतादेरिति**। स्वप्रणयनविशिष्टेन स्वप्रणयनाङ्गीकारे च स्वस्य स्वापेक्षाङ्गीकारादात्माश्रय इति भावः। तस्माद्भारतादेरेव सपक्षत्वोपपत्तये यत्र हेतुसत्त्वसिद्ध्यर्थं **भारताद्यशेषेति**। प्रथमविशेषणद्वयनिष्कर्षरूपविशेषणस्य विवक्षा न कार्या। गुरुभ्यः श्रोतृभ्य इत्यादि विशेष्यमात्रविवक्षा च कार्येति भवद्भिरङ्गीकृतं स्यादित्याह **सपक्षत्वं वदतेति**। **तथा चेति**। यद्यपि गुरुभ्यः श्रोतृभ्य इत्येव पठितं तथापि सपक्षत्वोपपत्तये हेतुसङ्कोचे कार्ये गुरुश्रोतृपदं ब्रह्मादिपरं व्याख्येयम्। अर्थपदं च धनव्यावृत्तये मोक्षपरं व्याख्येयमित्याशयेनेदम्।

स०व्र०— पूर्वोक्तशङ्काशयमुद्घाटयन् पुनर्गूढाभिसन्धिः शङ्कते **एवं तर्हीति**। भारताद्यशेषसच्छास्त्रप्रभव-प्रणीतत्वांशस्य विवक्षायां भारतादीनां भारताद्यन्तराभावात् तत्प्रणेत्रा प्रणीतत्वायोगादसाधारण्यं तदवस्थम्। अविवक्षायां वैयर्थ्यं तन्निवेशनस्येत्यर्थः।

कुण्डल०— **एवं तर्हीति**। मिलितहेतोः सपक्षवृत्तित्वाय भारतादिप्रणयनोपलक्षितप्रणीतत्वाङ्गीकार इत्यर्थः।

विद्व०— भारताद्यन्तराभावेन भारताद्यशेषसच्छास्त्रप्रणयनविशिष्टेन प्रणीतत्वांशस्य भारतादौ सपक्षे असंभवेनासाधारण्यं स्यादित्युक्तेस्तद्दोषपरिजिहीर्षया यदि तदन्यांशस्यैव हेतुमिति वदति तदा तत्पूर्वांशस्य वैयर्थ्यं वक्ष्यामीत्याशयं गूहयित्वा शङ्कते **एवं तर्हीति**। अविदिताशय इवोत्तरमाह **बाढमिति**। तावन्मात्रस्यैव हेतुत्वमेवेत्यर्थः।

चषकः— आशयमाविष्करोति **तावन्मात्रस्यैवेति**। दलान्तराभिहितमात्रस्य हेतुत्वमुत्तरवादिना-ऽभिधित्सितमिति तदप्रतिसंहितिनियन्त्रितेयमसाधारण्यशङ्केत्याशयः।

काशी०— "ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदमि"ति छन्दोगश्रुतेरादिपदग्राह्याऽपि सैवं शङ्कते **एवमिति**। हेतोर्भारतादिरूपसपक्षवृत्तित्वाङ्गीकार इत्यर्थः। **भारतादीति**। अशेषार्थप्रतिपादकशास्त्रप्रणयनविशिष्टप्रणीतत्वस्य भारतादिसपक्षवृत्तित्वायोगादित्यर्थः। तदुपलक्षितप्रणीतत्वस्य चाव्यावर्तकत्वादिति शेषः। **बौद्धशास्त्रव्यावृत्तये बादरायणेनेति**। अयोग्यान्प्रति बादरायणोपदिष्टस्य सदस-दर्थपरपुराणादिवाक्यस्य व्यावृत्तये ब्रह्मादीन्प्रतीति **योग्यायोग्यव्यामोहकतदुपदिष्टवाक्यव्यावृत्तये** तन्मोक्षार्थमिति तद्वाक्यस्याप्ययोग्यानां लिङ्गदेहमोक्षार्थत्वात्तदिति **योग्यमात्रपरम्**। मात्रशब्देन गुरुरित्यादेर्व्यवच्छेदः। तथा च

मिलितानां हेतुतेत्ययुक्तमिति भावः । स्यादेवं यदि गुरुरित्यादीनामपि मिलितानां हेतुताऽभिप्रेता स्यात् । न चैवम् । किन्तु तदुदितमित्यादीनामेवेति स्वाभिसन्धिमाविष्कुर्वन्नुक्तमङ्गीकरोति **बाढमिति** । तदुपपादयति **तावन्मात्रस्येति** । बादरायणेन ब्रह्मादीन्प्रति तन्मोक्षार्थमुपदिष्टत्वमात्रस्येत्यर्थः ।

गूढ०— ननु भारतादौ हेतुवृत्त्या असाधारण्यपरिहरणमयुक्तम् । तत्र हेतुवृत्तेरेवासंभवात् । तथाहि । प्रभवशब्दो हि प्रभवन्त्यस्मादिति व्युत्पत्त्योत्पत्तिकर्तृपरः । एवं च भारताद्यशेषशास्त्रोत्पत्तिकर्तृप्रणीतत्वमित्यर्थो लभ्यते । तथा चात्रोत्पत्तिरुपलक्षणं वा विशेषणं वा । नाद्यः । गुर्ल्गुरूणामित्यादेरानर्थक्यापत्तेः । न द्वितीयः । भारतोत्पत्तिविशिष्टेन प्रणीतत्वस्य भारतेऽसंभवात् । विशिष्टस्य कारणत्वे विशेषणस्यापि कारणत्वेन भारतोत्पत्तिरूपविशेषणस्यापि भारतोत्पत्तिं प्रति कारणत्वापत्तेः । न हि स्वस्यैव स्वं प्रति कारणत्वं संभवत्यात्माश्रयात् । न च पूर्वभारतोत्पत्तिविशिष्टेनोत्तरभारतोत्पत्तिः क्रियत इति तत्र हेतुवृत्तिः संभवत्येवेति वाच्यम् । तथापि तस्या एतद्भारतोत्पत्तौ कारणत्वाभावात् । भारताद्यशेषेत्युक्तत्वेन भूतवर्तमानभविष्यत्सकलभारतानां गृहीतत्वेन तदुत्पत्तिविशिष्टेन प्रणीतत्वस्य भारते असंभवग्रस्तत्वाच्च । तस्मान्न तत्र हेतुवृत्त्या असाधारण्यपरिहारो युक्त इति शङ्कते **एवं तर्हीति** । इष्टापत्त्या परिहरति **बाढमिति** ।

प्रदीपः— विशेषणस्य हेतावविवक्षायामपि न वैयर्थ्यमित्याह **बाढमिति** । वक्तृश्रोतृप्रसक्तीनामित्युत्तरवाक्ये वक्त्राद्यानुकूल्यस्य प्रामाण्यहेतुत्वोक्तेर्गुरूपदेष्ट्रादिप्रणीतत्वं न प्रामाण्यसाधकम् ।

५१ सु०— तथा सति 'गुरुर्गुरूणां प्रभवः शास्त्राणामि'ति व्यर्थमापद्यत इति चेन्न । तस्य हेतुशरीराप्रवेशिनोऽपि दृष्टान्तोपदर्शनादिना सार्थक्योपपत्तेरिति ।

परि०— परम्परया हेतुवादी शङ्कते **तथा सतीति ॥ हेतुशरीरेति ॥** यतः यतश्चेत्येवं हेतुशरीरप्रवेशितया प्रयोजनाभावेऽपि गुरूणां गुरुरित्यंशेन अजादिमोक्षोद्देशेन इत्यंशस्य शास्त्राणां प्रभव इत्यंशेन बादरायणेनोक्तत्वांशस्य महाजनपरिग्रहादिना सिद्धप्रामाण्ये भारतादौ लाभेन भारतादिदृष्टान्तः । तत्र साधनं चास्तीति प्रदर्शनेन सार्थक्योपपत्तेरित्यर्थः ॥

श्रीनिधि०— दृष्टान्तोपदर्शनादिनेति । शास्त्राणां प्रभवेति दृष्टान्तोपदर्शनम् । बादरायणेन उदितं शास्त्रं भारतादि यथा प्रमाणं तथेत्यर्थः । गुरूणामुपदेष्ट्रित्यनेन विवक्षितार्थतत्त्वज्ञानं प्रामाण्यप्रयोजकमुपदर्शितम् । तेन साध्यवैकल्यशङ्कानिरास आदिपदार्थः । वक्त्राद्यानुकूल्यस्य साध्ये संबन्धव्युत्पादनमिति आप्तवाक्यतासाधनद्वारेति शेषः । अन्यथा उत्तरग्रन्थविरोधापत्तेः । त्रिविधमिति वक्ष्यमाणविरोधादित्रिविधप्रमाकरणत्वलक्षणप्रामाण्यस्य एकविधत्वेऽपि ग्राहकभेदादवान्तरभेदो वक्तव्यः । तथाच यदि वक्तृश्रोतृप्रसक्तीनामित्यनुमानान्तरमुच्येत तर्हि ज्ञापकानां चातुर्विध्यापत्त्या त्रैविध्योक्तिर्विरुद्धा स्यादिति भावः ।

वा०चं०— तर्हि तस्य हेतुशरीरप्रवेशाभावेन प्रयोजनान्तरस्याप्यभावाद्वैयर्थ्यमापद्येतेति शङ्कित्वा स्वाभिप्रायमुद्घाटयति **तथा सतीति**। हेतुशरीराप्रवेशेऽपि प्रकारान्तरेण सार्थक्यमिति सिद्धान्ती स्वाशयमुद्घाटयति **न तस्येति**॥ **दृष्टान्तेति**। भारतादीनां दृष्टान्तत्वं दर्शयितुं तत्प्रभवत्वमुच्यत इति भावः।

वा०र०— हेतुशरीरित्युत्तरानुसारेण शङ्काशयं दर्शयति **तस्य हेतुशरीरेति**। **प्रकारान्तरेणेति**। भारतादीनां दृष्टान्तत्वं प्रदर्शयितुमिति वक्ष्यमाणप्रकारेणेत्यर्थः। **इति भाव इति**। गुरुगुरुत्वादिकं त्वप्रयोजकत्वशङ्का-परिहारप्रदर्शनायोक्तमिति प्रतिपादनमादिपदेन कृतमित्युपलक्षणया ज्ञातव्यम्।

स०व्र०— आशयमुद्घाटयति **तथा सतीति**। किं हेतुविशेषणत्वाभावाद् वैयर्थ्यं, सर्वथा प्रयोजनराहित्यं वेति विकल्प्याद्यमिष्टापत्त्या समाधत्ते **तस्येति**॥ द्वितीये त्वाह **दृष्टान्तोपदर्शनादिनेति**। 'शास्त्राणां प्रभव' इत्यस्य भारतादिरूपदृष्टान्तप्रदर्शकत्वेन, 'गुरूणां गुरु'रित्यस्य भारतादावादिशब्दोक्त'बादरायणेन ब्रह्मादीन्प्रति तन्मोक्षार्थ-मुपदिष्ट'त्वरूपहेतुसत्त्वप्रतिपादकत्वेन **सार्थक्यादिति** भावः।

कुण्डल०— **दृष्टान्तेति**। गुरुगुरूदितसच्छास्त्रवदित्यादि दृष्टान्तप्रदर्शनादिपदसूचितेन वक्तृश्रोत्रो-र्विवक्षितार्थतत्त्वज्ञानवत्त्वतत्त्वज्ञानयोग्यत्वप्रदर्शने च **सार्थक्योपपत्तेरित्यर्थः**।

विठ्ठ०— शङ्कक: स्वाशयमाविष्करोति **तथा सतीति**।

चषकः— आद्यदलसार्थक्यं संपादयति **दृष्टान्तेति**।

काशी०— शङ्कते **तथा सतीति**। गुरुरित्यादेर्हेतुशरीराप्रवेश इत्यर्थः। **व्यर्थमिति**। अत्र यो बादरायण-स्तेनोदितमिति बादरायणपरामर्शार्थत्वेन तदित्यस्य भिन्नपदत्वपक्षे बादरायणेनोदितमिति विपरिणामेनान्वय-सिद्धयर्थत्वेन बादरायण इत्यस्य सार्थक्यसंभवाच्छास्त्राणामित्यन्तस्यैव वैयर्थ्यमाशङ्कितम्। न च पूर्वार्धपरित्यागेऽपि पूर्वश्लोके व्यासपदेन प्रक्रान्तस्य तच्छब्देन परामर्शस्तदुदितमित्यस्य प्रथमान्तानुषक्तशास्त्रपदेनान्वयश्च संभवत्येवेति पूर्वार्धस्यैव वैयर्थ्यं शङ्कितुं शक्यमिति वाच्यम्। प्रकारान्तरेणोपपत्तावप्युक्तप्रकारस्यादुष्टत्वेन तद्वैयर्थ्यशङ्कानुदयात्। यद्यपि यादुपते मिलितानामित्यत्र द्वितीयार्धोक्तानामेव मेलनमभिप्रेतं न पूर्वार्धोक्तानामपीत्यभिप्रायो बादमित्यस्योक्तः। स चैतद्ग्रन्थेन विरुद्धचेत। अत्र बादरायण इत्यस्य विभक्तिविपरिणामेन हेतुशरीरनिवेशप्रतीतेस्तत्पक्षे तदित्यस्य भिन्नपदत्वेन तदावश्यकत्वाच्च। न च पूर्वं तदुदितमित्यस्य भिन्नपदत्वाङ्गीकारेऽपीदानीमैकपद्यमभिमतमिति सांप्रतम्। क्लिष्टकल्पनापत्तेः। स्वमतोपष्टम्भकत्यागस्यानुचितत्वाच्च। तथाऽपि द्वितीयार्धोक्तानां विपरिणतबादरायणपदेन सह मेलनमित्यर्थस्य विवक्षितत्वान्न दोषः। एतच्च न पूर्वार्धोक्तानामिति बहुवचनेन सूचितमित्यवगन्तव्यम्। **तस्येति**। गुरुरित्यादेरित्यर्थः। **दृष्टान्तेति**। शास्त्रशब्देन भारतादिरूपधर्मिणः प्रामाण्यरूपसाध्यवत्त्वस्य प्रभवशब्देन बादरायणोदितत्वरूपहेतुमत्त्वस्य गुरूणां गुरुरित्यनेन ब्रह्मादीन् प्रति तदर्थत इत्युक्तहेतुघटकविशेषणसत्त्वस्य च लाभादिति भावः। नन्वेवं पूर्वोक्तविपरिणामस्यानावश्यकत्वात्तदुक्तिरयुक्तेति चेत्। यथाश्रुतानुसारेणैव तदुक्तिरिति

केचित् । वस्तुतस्तु तदुदितमित्यस्यासमासत्वपक्षे बादरायणपदे विभक्तिविपरिणामावश्यकत्वस्योक्तत्वात्तद्विशेषणे गुरुरित्यादावपि तदावश्यकता पक्षान्तरेष्वपि वक्त्राद्यानुकूल्योपेतत्वहेतुकवक्ष्यमाणानुमानेऽसिद्धिपरिहाराय गुरुरित्यादिना तत्साधनस्यावश्यकतया तत्र व्यधिकरणत्ववारणाय निरुक्तविपरिणामावश्यकतेति । नन्वित्यादिपूर्वपक्षे समाधत्ते सत्यमित्यादि । गुरुरित्यादीनां मानमित्यनेन साध्यसाधनभावो यथाश्रुत इति यदुक्तं तत्सत्यम् । तथाऽपि एतदुक्तसाध्यसाधनभावादिकम् । एवमुक्तक्रमेण मूलाभिप्रेतत्वेन ज्ञातुं न शक्यमित्यर्थः । तथा सति तस्यैव मूलाभिप्रेतत्वे सति । उत्तरवाक्ये वक्तृश्रोतृप्रसक्तीनामित्यादौ । वक्त्राद्यानुकूल्यस्य वक्त्राद्यानुकूल्योपेतत्वस्य ।

५२ सु०— सत्यम् । तथाऽपि नैतदेवं विज्ञातुं शक्यम् । तथा सत्युत्तरवाक्ये वक्त्राद्यानुकूल्यस्य साध्यसंबन्धव्युत्पादनमसङ्गतं स्यात् ।

परि०— एवमिति । साक्षाद्धेतुत्वेनेत्यर्थः ॥ **साध्येति** । आप्तिपदोक्ताप्तवाक्यरूपसाध्येत्यर्थः ॥

यादु०— साध्यसंबन्धेति । आप्तिद्वारा प्रामाण्यरूपसाध्यसाधकताव्युत्पादनमित्यर्थः ॥

आनन्दः— दृष्टान्तोपदर्शनादिनेत्यादिपदेनाप्रयोजकत्वादिपरिहारसङ्ग्रहः । कुतो न शक्यमित्यत आह तथा सतीति । यदाप्तिरित्याप्तिरूपे यत्साध्यं तत्संबन्धव्युत्पादनमसङ्गतमित्यर्थः ।

वा०चं०— किं ग्रन्थकृतोऽयमेवाभिप्राय इति मनुष्ये आहोस्विदेतादृशि लघूपाये सति ग्रन्थकृतैव प्रयत्नगौरवं नाश्रयणीयम् । नाथ इत्याह **तथाऽपीति । तथा सतीति । 'बादरायणेन ब्रह्मादीन्प्रति तन्मोक्षार्थमुपदिष्ट'त्वस्य हेतुतया ग्रन्थकृताऽभिप्रेतत्वे तस्यैव मानत्वरूपसाध्यसंबन्ध उत्तरवाक्ये प्रतिपाद्यः स्यात् । वक्त्राद्यानुकूल्यस्य मानत्वोपपादकाप्तवाक्यतया व्याप्तिपक्षधर्मतोपपादनद्वारा मानत्वरूपसाध्यसंबन्धकथनस्य न काऽपि सङ्गतिरित्यर्थः ॥**

वा०र०— नाश्रयणीयमित्यनन्तरमिति मनुष्य इति वर्तते । **मानत्वोपपादकेति** । अबोधकत्वविपरीतबोधकत्वलक्षणाप्रामाण्यस्यासवाक्यतया पटुकरणत्वादिविशिष्टपुरुषवाक्यत्वरूपया निवृत्तेर्वक्ष्यमाणतया मानत्वोपपादकत्वमाप्तवाक्यतायास्तिष्ठतीत्याशयः । आप्तवाक्यतया या व्याप्तिः पक्षधर्मता चेति विवेकेन योज्यम् ।

स०व्र०— 'वक्तृश्रोतृप्रसक्तीनामि'त्युत्तरवाक्ये वक्त्राद्यानुकूल्यस्य प्रामाण्यहेतुत्वोक्तेः गुरूपदेष्टृादिप्रणीतत्वं न प्रामाण्यसाधकहेतुः, श्रुतियुक्तिभ्यां सह चतुष्टापत्त्या त्रित्वविरोधादिति समाधते सत्यमिति ॥ ननूत्तरश्लोकोक्तस्यानुमानान्तरत्वेऽपि न प्रामाण्यत्रित्वहानिः, अनयोरनुमानयोः प्रामाण्यग्राहकत्वेन विजातीयत्वेन रूपेणैकत्वसंभवात् । अत्र च शास्त्रसमानार्थत्वाभावे सति प्रामाण्यग्राहकत्वं विजातीयत्वं विवक्षितम् । श्रुतिमूलत्व-

युक्तिमूलत्वयोस्तु शास्त्रसमानार्थत्वात् न विजातीयत्वम् इति शङ्कते **विजातीयसंवादत्वेनेति** ॥ **एवं तर्हीति** । श्रुतिमूलत्वयुक्तिमूलत्वयोरपि शास्त्रसमानार्थत्वे सति प्रामाण्यग्राहकत्वरूपसजातीयत्वेनैकत्वसंभवात्प्रमाणद्वित्वापत्त्या प्रमाणत्रित्वहानिरेवेत्यर्थः ॥ केचित्तु ब्रह्मसूत्राणाम् अलौकिकार्थत्वाच्छ्रुतिः सजातीया तर्कत्वाद्वेदानुकूला युक्तिरपि सजातीया।

कुण्डल०— उत्तरवाक्य इति । आप्तवाक्यतया तेनेत्युत्तरवाक्ये वक्त्राद्यानुकूल्यस्याप्तवाक्यताद्वारा प्रामाण्यलक्षणसाध्यसंबन्धव्युत्पादनमसङ्गतं स्यादित्यर्थः।

विद्व०— विदिताशयस्तस्योत्तरमाह नेति । भारतादीनामेव दृष्टान्तत्वमिति तदुपदर्शनेन गुरूणामित्यस्य शास्त्रविशेषणत्वस्यापि भावेन तेन साध्यवैकल्यादेः परिहृतत्वेन सार्थक्योपपत्तेरिति भावः । तथा चैवं यथाश्रुतव्याख्यानसंभवेन किं मध्ये साध्यान्तराध्याहारकल्पनयेति प्राप्तां शङ्कां परिहरति **सत्यमित्यादिना** । यद्यप्येवमापाततः प्रतीयते तथापि गुर्ल्गुरूणामित्यादीनां साक्षान्मानत्वरूपसाध्येन संबन्ध इत्येतदुक्तप्रकारेण ज्ञातुं न शक्यं गुर्ल्गुरूणामित्यादीनां साक्षादेव प्रामाण्यरूपसाध्यसंबन्धाङ्गीकारे वक्तृश्रोतृप्रसक्तीनामित्युत्तरवाक्ये वक्त्राद्यानुकूल्यरूपहेतोः साध्येन संबन्धस्य व्युत्पादनमसङ्गतं स्यात् इत्यर्थः ।

चषकः— तथा सति । दलान्तरोदीरितमात्रस्य मानत्वनिरूपितप्रधानसाधनत्वोपगमे ॥ **साध्यसंबन्धव्युत्पादनम्** । मानत्वनिरूपितप्रधानसाधनतापन्नावाक्यतानिरूपितव्याप्तिपक्षधर्मतोपपादनं द्वारीकृत्य मानत्वरूपसाध्यसंबन्धव्युत्पादनम् ॥

काशी०— साध्यसंबन्धेति । आप्तवाक्यतासाधनद्वारा प्रामाण्यसाधकत्वप्रदर्शनमित्यर्थः । प्रामाण्यसाधनस्योत्तरत्रोपलम्भादिह तदुपयुक्तवक्त्राद्यानुकूल्यसाधनमेवाभिप्रेतमिति ज्ञायत इति भावः । एतेन गुर्ल्गुरूणामित्यादिभिरासिसाधनमेव व्याख्यायतां किं मध्ये वक्त्राद्यानुकूल्याध्याहारेणेत्यपास्तम् । तथा सत्युत्तरवाक्ये वक्त्राद्यानुकूल्यस्यासिसंबन्धव्युत्पादनासङ्गतेः । तदनुमानान्तरमिति चेन्न । वक्ष्यमाणरीत्या प्रथमानुमानेऽप्रयोजकत्वशङ्कापत्तेः ।

गूढ०— दृष्टान्तोपदर्शनादिनेत्यादिपदेनाप्रयोजकत्वादिपरिहारसङ्ग्रहः । कुतो न शक्यमित्यत आह **तथा सतीति** । यदासिरित्यासिरूपे यत्साध्यं तत्संबन्धव्युत्पादनमसङ्गतमित्यर्थः ।

प्रदीपः— न चोभयं हेतुः श्रुतियुक्तिभ्यां सह चतुष्टापत्त्या त्रित्वविरोधादिति समाधत्ते सत्यमिति।

५३ सु०— तदनुमानान्तरं भविष्यतीति चेन्न । तथात्वे प्रामाण्यं त्रिविधं महदिति वक्ष्यमाणविरोधात् ।

परि०— तदनुमानान्तरमिति । विमतं शास्त्रं मानं भवितुमर्हति ॥ अजादिमोक्षोद्देशेन व्यासप्रोक्तत्वाद्भारतादिवदिति पूर्वश्लोकोक्तानुमानाद्विमतं मानमाप्तवाक्यत्वादिति प्रामाण्ये अनुमानान्तरं भविष्यतीति आप्तवाक्यत्वासिद्धिपरिहारार्थं वक्तृश्रोत्रित्यादिसार्थकं भविष्यतीत्यर्थः ॥ त्रिविधमितीति । आप्तिमूलत्वश्रुतिमूलत्वयुक्तिमूलत्वरूपत्रैविध्यवदजादिमोक्षोद्देशेन प्रोक्तत्वरूपैकविधस्याधिकस्य प्राप्ततया प्रामाण्यं चतुर्विधं महदिति वक्तव्यं स्यादिति भावः ॥

वादु०— तदनुमानान्तरमिति । गुर्ल्गुरूणामिति श्लोकोक्तप्रामाण्यसाधकानुमानापेक्षया वक्तृश्रोतृप्रसक्तीनामित्यनेन उच्यमानवक्त्राद्यानुकूल्यसिद्धमाप्तोक्तत्वं प्रामाण्यसाधकानुमानमपरमित्यर्थः ॥

वं०प०— तथात्व इति । 'गुरूणां गुरुत्वा'दिहेतुभिः प्रामाण्यानुमानमेकं, वक्त्राद्यानुकूल्यसिद्धाप्तवाक्यत्वेन तदनुमानमपरं, श्रुतिसंवादित्वेन तदनुमानं तृतीयं, युक्तिसंवादित्वेन तदनुमानं चतुर्थमिति प्रामाण्यसाधकहेतूनां चतुष्कप्राप्तेरित्यर्थः ॥

आनन्दः— तदिति । आप्तवाक्यत्वमित्यर्थः ।

कं०रा०— तथात्व इति । वक्त्राद्यानुकूल्यस्यानुमानान्तरत्वे बादरायणेन ब्रह्मादीन्प्रति तन्मोक्षार्थमुपदिष्टत्वेन प्रामाण्यसाधनप्रकार एकः । वक्त्राद्यानुकूल्येनापरः । श्रुतिमूलत्वयुक्तिमूलत्वाभ्यां प्रामाण्यसाधनप्रकारौ द्वाविति चातुर्विध्यापत्त्या 'प्रामाण्यं त्रिविधं महत् । दृश्यते ब्रह्मसूत्राणामि'ति वक्ष्यमाणं त्रैविध्यं विरुद्धं स्यादिति भावः ।

वा०चं०— वक्त्राद्यानुकूल्यस्यापि मानत्वहेतुत्वमित्यभिप्रायेणोत्तरवाक्यसङ्गतेर्न तस्य 'बादरायणेन इत्यादेर्मानत्वहेतुत्वाभावज्ञापकत्वमित्याशयेन शङ्कते तदिति ॥

कुण्डल०— तथात्व इति । ब्रह्मसूत्रं प्रमाणं ब्रह्मादीन्प्रति तन्मोक्षार्थं बादरायणेनोपदिष्टत्वादित्यनुमापेक्षया वक्त्राद्यनुकूल्योपेतत्वस्य प्रामाण्यलक्षणसाध्यं प्रत्यनुमानान्तरत्वे श्रुतिमूलत्वयुक्तिमूलत्वाभ्यां सहितानां प्रामाण्यसाधकानुमानानां चतुष्केन साध्ये प्रामाण्येऽपि प्रकारचतुष्टयापत्त्या प्रामाण्यं त्रिविधमिति वक्ष्यमाणविरोधः स्यादित्यर्थः ।

वि०— गुर्ल्गुरूणामिति स्वोक्तानुमानापेक्षयोत्तरश्लोकानुमानमन्यदेवेति नासङ्गतिरित्याशङ्क्य निराकरोति तदिति । यथार्थज्ञानसाधनत्वरूपप्रामाण्यस्यैकविधत्वेऽपि तज्ज्ञापकत्रैविध्यमपेक्ष्य प्रामाण्यं त्रिविधमिति वक्ष्यते । तथा चोत्तरश्लोकस्यैतद्विवरणरूपत्वमनङ्गीकृत्यानुमानान्तरपरत्वाङ्गीकारे तच्छ्लोकद्वयोक्तमनुमानद्वयं वक्ष्यमाणश्रुतिसंवादो युक्तिसंवादश्चेति चतुर्विधत्वापत्त्या त्रिविधत्वं विरुद्धं स्यादिति भावः ।

चषकः— **अनुमानान्तरमिति** । दर्शितानुमानादतिरिच्यमानं वक्त्राद्यानुकूल्यत्रयानुमापितात्तोक्ततारूपं मानतानिरूपितप्रधानसाधनतापन्नमनुमानमित्यर्थः॥

काशी०— **शङ्कते तदिति** । **वक्त्राद्यानुकूल्यसिद्धाप्तवाक्यत्वेन** प्रामाण्यानुमानमित्यर्थः । अनुमानान्तरं अजादिभ्यस्तदर्थतस्तदुदितत्वहेतुकप्रामाण्यानुमानादन्यदनुमानम् । अभिप्रेतमिति शेषः । तथा च नोत्तरवाक्यासङ्गतिरिति भावः । परिहरति **नेति** । **तथात्वे** तत्र प्रामाण्यसाधकानुमानान्तरस्याभिप्रेतत्वे । **वक्ष्यमाणेति** । त्रिविधं दृश्यत इति प्रामाण्यदर्शनस्य त्रिविधत्वं वक्ष्यते । **ताश्च विधाः** साधकप्रमाणरूपा आप्तवाक्यतयेत्यादिना निर्दिष्टाः । तदुदितमित्यस्यापि प्रामाण्यसाधकत्वेनाभिप्रेतत्वे च साधकप्रमाणानां चतुष्टयापत्त्या त्रित्वोक्तिविरोधादित्यर्थः ।

५४ सु०— विजातीयसंवादित्वेनानयोरैक्यविवक्षया त्रित्वोक्तिः अस्त्विति चेत् । एवं तर्हि वक्ष्यमाणश्रुतियुक्तिसंवादोऽपि सजातीयसंवादत्वेनैक एव स्यात् । अर्धज(च)रतीयानुपपत्तेः । तथा च पुनस्त्रित्वानुपपत्तिरेव ।

परि०— **विजातीयेति** । शास्त्रप्रतिपाद्यार्थविषयकं सजातीयं विजातीयं तु साक्षात्तदर्थाविषयकं तत्प्रामाण्यनिश्चायकम् । यथा सत्यरजते इदं रजतमिति ज्ञानस्य तादृशज्ञानान्तरं सजातीयम् । विजातीयं तु कटकाद्यर्थक्रियाकारित्वम् । प्रकृते च वक्ष्यमाणदिशा श्रुतियुक्त्योर्ब्रह्मतन्त्रार्थसमानविषयकत्वमेव साक्षादिति सजातीयत्वम् । अजादिमोक्षोद्देशेनोक्तत्वस्याप्तवाक्यत्वस्य च न साक्षात्तदर्थविषयकत्वं किन्तु तत्प्रामाण्यविषयकतयेति विजातीयत्वम् । अतो विजातीयसंवादित्वेन सजातीयसंवादतयेत्युक्तम् । तथा च द्वैविध्यमेव प्रामाण्यस्य प्राप्तं न त्रैविध्यमिति भावः॥ **अर्धचरतीयेति** । सगर्भमत्स्यस्यार्धं भक्षणायार्धं गर्भप्रसवायेति यथा न युक्तं तथेत्यर्धचरतीयन्याय इत्येके । अलाब्वादिफलादेरर्धं भक्षणायार्धं बीजाभिवृद्धिद्वारा अङ्कुरादिप्रसवाय यथा न युक्तं तथेत्यर्थ इत्यन्ये॥

यादु०— **विजातीयसंवादत्वेनेति** । शास्त्रप्रामाण्यव्यवस्थापनद्वारा शास्त्रविषयव्यवस्थापकमानान्तरसंवादत्वेनेत्यर्थः । स्वप्रामाण्यव्यवस्थापनद्वारा स्वविषयव्यवस्थापकमानान्तरसंवादस्यैव विजातीयसंवादतया विवक्षितत्वात् **सजातीयसंवादतयेति** । साक्षाच्छास्त्रविषयविषयकमानान्तरसंवादतयेत्यर्थः । साक्षात्स्वविषयविषयकमानान्तरसंवादस्यैव सजातीयसंवादत्वेन विवक्षितत्वादित्याशयः । केचित्तु गुरूपदेष्ट्राद्युपदिष्टत्वस्यानुकूलवक्त्रादिमत्त्वसिद्धाप्तवाक्यत्वस्य च लौकिकवाक्यसाधारण्येन प्रामाण्यमात्रसाधकत्वात्संवादस्य विजातीयत्वम् । श्रुतियुक्त्योस्त्वलौकिकार्थत्वात्सर्वोत्तमप्रामाण्यसाधकत्वात्तत्संवादस्य सजातीयत्वमित्याहुः॥ **अर्धजरतीयानुपपत्तेरिति** । अत्रार्धजरतीशब्देन सर्वात्मना जरतीं त्यक्तुमशक्नुवतः प्रक्रिया लक्ष्यते । छप्रत्ययेन चोपमानोपमेयरूपः

संबन्ध उच्यते । तथा च तत्प्रक्रियातुल्यप्रक्रियानुपपत्तेरित्यर्थः पर्यवस्यति । इत्थं हि तत्प्रक्रिया । अर्धं जरत्याः कामयतेऽर्धं न कामयते, मुखं जरत्याः कामयते नाङ्गान्तरमिति । एवं जरत्या एकदेशे कामना एकदेशे नेत्येतद्यथा जुगुप्सितमेवं प्रकृते साम्ये संभवे च सत्येकत्रैक्यविवक्षाऽन्यत्र तु नेत्येतत् जुगुप्सितमिति भावः ॥ अर्धचरतीयानुपपत्तेरिति पाठे तु चरतिश्चरणं भक्षणमिति यावत् । तेन तत्कर्तुः प्रक्रिया लक्ष्यते छप्रत्ययेन च पूर्ववदुपमानोपमेयरूपः संबन्ध उच्यते । तेनार्धभक्षणकर्तुः प्रक्रियातुल्यप्रक्रियाऽनुपपत्तेरित्यर्थः पर्यवस्यति । इत्थं हि तत्प्रक्रिया । सगर्भां मत्स्यवधूं गृहीत्वा कश्चिदस्याः प्रसवे मत्स्यान्तरं भविष्यति । एवं च तदपि भक्षणार्थं भविष्यति । इदानीं चेमामपक्त्वाऽनश्नन्नहं न स्थातुमुत्सह इति विचार्य वदति 'अस्या अर्धं पाकायार्धं प्रसवाये'ति । तद्यथा जुगुप्सितमेवमेतदपीति भाव इत्याहुः ॥ अन्ये तु 'लम्बमानौ सुतौ दृष्ट्वा व्याधः परमबुद्धिमान् । सर्वनाशे समुत्पन्नेऽर्धं चरति पण्डित' इति न्यायस्य प्रकृतेऽनुपपत्तेरित्यर्थ इत्याहुः ॥

वं०प०— विजातीयसंवादित्वेनेति । ब्रह्ममीमांसाशास्त्रप्रामाण्यव्यवस्थापनद्वाराऽर्थसत्तानिश्चायकत्वात् तत्संवादस्य विजातीयत्वम् । प्रामाण्यस्यार्थसत्ताघटितत्वादित्यर्थः ॥ **अनयोरिति** । प्रामाण्यसाधकयोर्गुरुगुरुत्वाप्तवाक्यत्वयोरित्यर्थः ॥ **त्रित्वोक्तिरिति** । श्रुतिसंवादो द्वितीयो युक्तिसंवादस्तृतीय इति त्रित्वोक्तिरित्यर्थः ॥ **सजातीयेति** । श्रुतियुक्त्योः साक्षाद्ब्रह्ममीमांसाशास्त्रप्रतिपाद्यार्थस्यैव प्रतिपादकत्वेन साक्षात्स्वविषयविषयकमानान्तरसंवादरूपत्वात्तदुभयसंवादस्य सजातीयत्वमित्यर्थः ॥ **अर्धजरतीयेति** । गुरुगुरुपदिष्टत्वाप्तवाक्यत्वयोर्विजातीयसंवादत्वेनैक्ये श्रुतियुक्तिसंवादद्वयस्य सजातीयसंवादत्वेनैक्यमनङ्गीकृत्य पार्थक्योक्तेरयुक्तत्वादित्यर्थः ॥ **पुनस्त्रित्वोक्तिरिति** । संवादद्वयस्यैव प्राप्तेरित्यर्थः ॥

आनन्दः— विजातीयसंवादित्वेनेति । न च श्रुतिसूत्रयोः साजात्यात् युक्तेराप्तवाक्यत्वस्योक्तानुमानस्य च शाब्दत्वाभावेन विजातीयत्वात्कथं त्रित्वोक्तेरुपपत्तिरिति वाच्यम् । अत्र हि समानार्थकं सजातीयम् । प्रामाण्यग्राहकं विजातीयमिति विवक्षितत्वात् श्रुतिसूत्रयुक्तीनां समानार्थत्वेन सजातीयत्वात्, आप्तवाक्यत्वरूपानुमानस्य ब्रह्मादीन्प्रति मोक्षार्थमुपदिष्टत्वरूपानुमानस्य च प्रामाण्यग्राहकत्वेन विजातीयत्वाद्विजातीयसंवादत्वेन एकत्वविवक्षया त्रित्वोक्तिरित्यर्थः । **सजातीयसंवादितयेति** । नन्वत्र श्रुतियुक्त्योर्ब्रह्मसूत्रसाजात्यं किं यथाकथञ्चिद्विवक्षितं उत प्रमाणविभाजकतावच्छेदकधर्मेणाथवा समानार्थत्वेन । नाद्यः । यथाकथञ्चित्साजात्यस्य अतिप्रसङ्गकत्वात् । न द्वितीयः । प्रमाणतावच्छेदकधर्मस्य शाब्दत्वस्य युक्तावभावेन श्रुतियुक्त्योः ब्रह्मसूत्रसाजात्याभावेन सजातीयसंवादित्वेन ऐक्यविवक्षोक्तययोगात् । न तृतीयः । ब्रह्मसूत्रसमानार्थत्वस्य श्रुतियुक्त्योरिवाप्तवाक्यत्वानुमानेऽपि सत्त्वात् । आप्तेर्विवक्षितार्थतत्त्वज्ञानादिरूपत्वेन ब्रह्मसूत्रस्य प्रतिपाद्यार्थविषयत्वेन समानार्थत्वाद्विजात्यस्यायोगात् । आप्तवाक्यत्वादित्यत्र हेतौ वाक्यग्रहणानर्थक्यं चाप्तिमूलत्वमात्रस्यैव हेतुत्वे व्यभिचाराभावात् । न च विवक्षितार्थतत्त्वज्ञानरूपाप्तिमूलत्वस्य तज्जनितसंस्कारेऽपि सत्त्वेनानैकान्त्यपरिहारार्थं तदिति वाच्यम् । करणपाटवादिचतुष्टयस्यादिशब्दार्थतया विवक्षितत्वेन चतुष्टयजन्यत्वस्य च संस्कारेऽभावेन अनैकान्त्याभावात् । तस्मादयुक्तमेतदिति । अत्र वक्तव्यम् । समानार्थत्वेन सजातीयमिति तृतीयपक्षाङ्गीकारं

दोषाभावात्। न चाप्तवाक्यस्यानुमानस्याप्येवं समानार्थत्वमिति साजात्यं स्यादिति वाच्यम्। निर्दोषः प्रमितस्यैव वक्ता इत्याप्तशब्दार्थस्य विवक्षितत्वात् एवं चास्य ब्रह्मसूत्रसमानार्थत्वाभावायुक्तं विजातीयत्वम्। न च वाक्यपदानर्थक्यम्। विवक्षितार्थतत्त्वज्ञानादिरूपाप्तिध्वंसेऽप्याप्तिमूलत्वसत्त्वेऽपि प्रामाण्याभावेन व्यभिचारपरिहारार्थत्वात्।

कं०रा०— विजातीयेति। ब्रह्मसूत्रात्मकं शास्त्रं प्रमाणं बादरायणेन ब्रह्मादीन्प्रति तन्मोक्षार्थमुपदिष्टत्वात् वक्त्राद्यानुकूल्योपेतत्वादित्यनयोः ब्रह्मसूत्रप्रामाण्यसाधकयोः अर्थसत्ताघटितप्रामाण्यविषयीकरणमुखेन तद्घटक-ब्रह्मसूत्रार्थविषयकतया सूत्राणां चातथात्वेन सूत्रापेक्षया विजातीयत्वादनयोर्विजातीयसंवादित्वेनैक्यमिति भावः। **श्रुतियुक्तिसंवादोऽपीति।** प्रामाण्यविषयीकरणमुखमन्तरेण ब्रह्मसूत्रार्थविषययोः श्रुतियुक्त्योर्ब्रह्मसूत्रसजातीयत्वेन तत्संवादोऽपि सजातीयसंवादतयैकः स्यादित्यर्थः। **त्रित्वानुपपत्तिरिति।** उक्तप्रकारेण प्रामाण्यसाधनप्रकारयोः द्वित्वेन प्रामाण्यं त्रिविधमिति वक्ष्यमाणत्रित्वानुपपत्तिरेवेत्यर्थः।

श्रीनिधि०— विजातीयसंवादत्वेनेति। निश्चितप्रामाण्यकं समानविषयकं मानान्तरं सजातीयसंवादः। तदतिरिक्तः अर्थक्रियासामर्थ्यादिर्विजातीयसंवादः। केचित्तु साक्षादर्थसत्त्वग्राहकं मानान्तरं सजातीयसंवादः। प्रामाण्यनिश्चयद्वारा अर्थसत्त्वनिश्चायकमानान्तरं विजातीयसंवाद इत्याहुः। **अर्धचरतीयेति।** अर्धस्य चरतिः अर्धचरतिः। चरतेस्संबन्धि चरतीयं तत्सादृश्यं नियामकगृह्यत्वं तस्य भावः चरतीयता अर्धचरतिसदृशत्वं नोपपन्नमित्यर्थः। मा भूत् सा अस्येति। न चैवम्, अर्धचरतीयता भारतादिप्रामाण्यस्य महाजनपरिग्रहादिहानिश्च स्यादिति भावः।

वा०चं०— विजातीयेति। वक्त्राद्यानुकूल्यरूपसंवादस्य, 'बादरायणेन तन्मोक्षार्थमुपदिष्टत्वस्य' च 'ब्रह्मसूत्रसमानार्थकत्वाभावे सति तत्प्रामाण्यग्राहक'त्वेन सजातीयसंवादत्वमिति द्रष्टव्यम्॥ **अर्धेति।** 'केनचित्पाशुपतेन सर्वजरत्या योषितोऽनुपभोग्यत्वात्सर्वतरुण्याश्च वृद्धे मय्यरुचिप्रसङ्गादर्धजरत्यानयने दूतः प्रेषितः' इति लोकप्रवादोऽर्धजरतीशब्देनोच्यते। छप्रत्ययेन चोपमानोपमेयभावरूपः संबन्ध उच्यते। तथा च तत्प्रवाद-तुल्यप्रवादानुपपत्तेरित्यर्थः॥ अस्तु श्रुतियुक्तिसंवादस्य सजातीयसंवादितयैकत्वमित्यत आह **तथा चेति।**

वा०र०— वक्त्राद्यानुकूल्यरूपेति। अनेन सजातीयत्वे विजातीयत्वे संवादविशेषणे इति सूचितम्। अत एव श्रुतियुक्तिसंवादस्य तु इत्युत्तरवाक्येऽपि श्रुतियुक्तिरूपसंवादस्येति व्याख्येयमिति ज्ञेयम्। अत्र संवादेन खलु प्रमाणानां प्रामाण्यमनुमातव्यम्। संवादश्च सजातीयेन वा विजातीयेन वा भवतीति तत्त्वनिर्णयटीकादि-विरोधतत्परिहारप्रकारश्च तट्टीकाव्याख्यानग्रपञ्चेऽस्माभिः कृतोऽवधेयः। अत्रापि स विचारो लेख्योऽस्ति। 'विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमि'ति स्मृतिपादीयविरोधाधिकरणस्थ 'तेनासौ यदि वा नैव क्वचिदस्ति प्रमाणता। सर्वत्रे'त्यादि सिद्धान्तवार्तिकव्याख्यानरूपाणकोक्तरीत्या न्यायशरीरं दर्शयति केनचित्पाशुपतेनेति। एतद्विचारस्तु आनन्दमयाधिकरणीये अन्नं ब्रह्मेत्याद्युपास्तमित्येतदनुभाष्यसंबन्धि अकस्मादर्धजरतीयेत्येतन्मूलव्याख्यानरूप-टीकाव्याख्यावसरे भविष्यति। **श्रुतियुक्तिसंवादोऽपीति** मूले श्रुतियुक्तिसरूपः संवादः। श्रुतियुक्त्याख्यौ

संवादावपीति यावत् । एकत्वविवक्षणीयौ स्यातामित्यर्थः । तत्संवादयोरप्येकत्वं विवक्षणीयं स्यादिति यावत् । एकवचनं तु समुदायविवक्षयेति ज्ञेयम् । एवमेव टीकाव्यवहारोऽपि योज्यः । एक एव स्यादित्युक्ते प्राप्तेष्टापत्ति-शङ्कावारकतयोत्तरमूलं योजयति अस्त्विति ।

स०व्र०— अनुकूलवक्त्रादिमत्वस्य युक्त्यात्मकत्वरहितेऽपि लौकिकवाक्ये संभवाद्विजातीयत्वं, श्रुतियुक्त्योस्तु सर्वोत्तमप्रामाण्यसाधकत्वात् तत्संवादस्य सजातीयत्वमित्याहुः । **अर्धजरतीयेति** । अत्र जरतीशब्देन सर्वात्मना जरतीं त्यक्तुमशक्नुवतः प्रक्रिया लक्ष्यते । छप्रत्ययेन चोपमानोपमेयरूपः संबन्ध उच्यते । तथाच एतत्प्रक्रियातुल्यप्रक्रियाऽनुपपत्तेरित्यर्थः पर्यवस्यति । इत्थं तत्प्रक्रिया । अर्धं जरत्याः कामयते अर्धं न कामयते । मुखं जरत्याः कामयते नाङ्गान्तरमिति । एवं च 'जरत्याः एकदेशे कामना नैकदेशान्तरे' इत्येतद्यथा जुगुप्सितं तथा एतदपीत्यर्थः ॥ अर्धचरतीयेति पाठे चरतिश्चरणं, भक्षणमिति यावत् । तेन तत्कर्तुः प्रक्रिया लक्ष्यते । छप्रत्ययेन च पूर्ववत्संबन्ध उच्यते । तेनार्धभक्षणकर्तृप्रक्रियातुल्यप्रक्रियाऽनुपपत्तेरित्यर्थः पर्यवस्यति । इत्थं हि तत्प्रक्रिया । सगर्भां मत्स्यवधूं गृहीत्वा कश्चित् 'अस्याः प्रसवे मत्स्यान्तरं भविष्यति । तदपि भक्षणार्थं भविष्यति । इदानीं चेमामपत्त्वाऽनन्नहं न स्यातुमुत्सहे' इति विचार्य वदति 'अस्या अर्धं पाकायार्धं प्रसवाये'ति । एवं च तद्यथा जुगुप्सितमेवमेतदिति भाव इत्याहुः । अन्ये तु **'लंबमानौ सुतौ दृष्ट्वा व्याधः परमबुद्धिमान् । सर्वनाशे समुत्पन्ने ह्यर्धं चरति पण्डित'** इत्यस्य न्यायस्य प्रकृतेऽनुपपत्तेरित्यर्थ इत्याहुः ।

कुण्डल०— **विजातीयसंवादित्वेनेति** । ब्रह्मसूत्रपक्षकप्रामाण्यसाधकयोः बादरायणप्रणीतत्ववक्त्रा-द्यानुकूल्योपेतत्वयोरनुमानयोः अर्थसत्ताघटितप्रामाण्यावगाह्यमुखेन तद्घटकब्रह्मसूत्रार्थविषयीकरणादतथाभूत-ब्रह्मसूत्रापेक्षया विजातीयसंवादित्वेनैक्यविवक्षयेत्यर्थः । **सजातीयसंवादतयेति** । श्रुतियुक्त्योर्ब्रह्मसूत्रप्रामाण्य-विषयीकरणं विना साक्षाद्ब्रह्मसूत्रार्थविषयीकरणेन तथाविधब्रह्मसूत्रसमानार्थकतया सूत्रसजातीयत्वेन तत्संवादोऽपि सजातीयसंवादतयैकः स्यादित्यर्थः । अन्ये तु विजातीयसंवादित्वेनेत्यस्य शास्त्रप्रामाण्यव्यवस्थापनद्वारा शास्त्रविषयव्यवस्थापकमानान्तरसंवादित्वेनेत्यर्थ इत्याहुः । केचित् गुरूपदिष्टत्वस्यानुकूलवक्त्रादिमत्व-सिद्धावाक्यत्वस्य च लौकिकसाधारण्येन प्रामाण्यमात्रसाधकत्वात्तत्संवादस्य विजातीयत्वं श्रुतियुक्त्योस्तु अलौकिकार्थत्वात्सर्वोत्तमप्रामाण्यसाधकत्वाच्च तत्संवादस्य सजातीयसंवादत्वमित्याहुः । **अर्धजरतीयानुपपत्ते-रिति** । अर्धं जरत्याः अर्धजरती । अर्धं नपुंसकमिति समासः । अनेन जरती व्यापारो लक्ष्यते । छप्रत्ययेन चोपमानोपमेयभावः संबन्धो बोध्यते । ततश्चायमर्थः । यथा कश्चित् कामुकः जरतीं त्यक्तुमनिच्छन्नर्धं जरत्याः कामयते नार्धं मुखं जरत्याः कामयते नाङ्गान्तरमिति यथा हासास्पदं तथा प्रकृतेऽपि विजातीयसंवादित्व-सजातीयसंवादित्वाभ्यां द्वित्वसंपादनसंभवेऽप्येकत्र विजातीयसंवादित्वेनैक्यसंपादनमन्यत्र सजातीयसंवादित्वे-नैक्यसंपादनाभावः हासास्पदमित्यर्थः । अर्धचरतीयानुपपत्तेरिति पाठे तु चरतिर्भक्षणं तेन तत्प्रक्रिया लक्ष्यते । प्रत्ययार्थस्तु पूर्वोक्त एव । अर्धचरतिप्रक्रियासमानप्रक्रियानुपपत्तेरित्यर्थः । इत्थं हि तत्प्रक्रिया । कश्चित्सगर्भां

मत्स्यवधूं गृहीत्वा तस्या अर्धं चरति भक्षयति अर्धं प्रसूत्यर्थं स्थापयति तद्वत्प्रकृतं जुगुप्सितं इति । इदमिति वक्त्राद्यानुकूल्यसाधनलक्षणं प्रयत्नगौरवमित्यर्थः ।

विद्व०— अवच्छेदकाविशेषेणैतच्छ्लोकद्वयोक्तानुमानयोरैक्यविवक्षया त्रिविधत्वमाशङ्क्य तथात्वे संवादद्वयस्यापि एकत्वविवक्षया द्वैविध्यस्यैव युक्तत्वेन त्रित्वानुपपत्तिरित्याह **विजातीयेति** । साक्षात्स्वविषय-प्रमेयविषयकमानान्तरसंवादः सजातीयसंवादः । स्वप्रामाण्यव्यवस्थापनद्वारा स्वविषयव्यवस्थापकमानान्तर-संवादो विजातीयः । एके तु गृहीतं प्रामाण्यसमानविषयमानान्तरं सजातीयसंवादः तदन्यद्विजातीय इत्याहुः । **अर्धचरतीयेति** । अर्धचरत् शब्देन अजादिकं अर्धं प्रसवार्थं निक्षिप्य अर्धं भक्षयतः प्रक्रिया लक्ष्यते । चर गतिभक्षणयोरिति धातोः छप्रत्ययेन तत्प्रक्रियातुल्यप्रक्रियोच्यते । छस्येत्यादेशे अर्धचरतीयशब्दो निष्पन्नः । अर्धजरतीयेति पाठे तु अर्धजरतीशब्देन जरतीं सर्वात्मना त्यक्तुमशक्नुवतः मुखं जरत्याः कामयते नान्यानीति प्रक्रिया लक्ष्यते । छप्रत्ययार्थः पूर्ववत् । तद्वयं यथा जुगुप्सितं तथा प्रकृते विजातीयसंवादद्वयस्य पृथगेकत्वविवक्षया द्विवि धत्वे वक्तुं शक्ये कुत्रचिदेकत्वविवक्षा कुत्रचिन्नेति **जुगुप्सितमेव** । अतो गुर्ल्गुरूणामिति श्लोके वक्त्रेति पादत्रये चोक्तमनुमानमेकमेव उत्तरत्र वक्ष्यमाणं सजातीयसंवादरूपमनुमानद्वयं चेति त्रिविधं प्रामाण्यमुपपद्यत इति भावः ।

चषकः— **विजातीयसंवादत्वेनेति** । शास्त्रधर्मिकस्वप्रतिपाद्यघटितप्रामाण्यविधेयकानुमितिजनक-हेत्वन्तरकत्वेनेत्यर्थः ॥ स्वधर्मिकस्वप्रतिपाद्यघटितप्रामाण्यावगाह्यप्रमितिजनकमानान्तरकत्वस्यैव विजातीय-संवादपदाभिधेयत्वात् **सजातीयसंवादतयेति** । शास्त्रजनितान्वयधीनिरूपितमुख्यविशेष्यतावच्छेदकावच्छिन्न-तादृशविशेष्यताकप्रमितिजनकमानान्तरकत्वस्यैव सजातीयसंवादपदाभिधेयत्वादित्याशयः ॥ **अर्धजरतीया-नुपपत्तेरिति** । 'जरत्याः मुखं कामुकः कामयते नावयवान्तरमि'ति प्रक्रिया छप्रत्ययप्रकृत्यंशेन लक्षणयोपस्थाप्यते, 'समासाच्च तद्विषयादि'त्युपमार्थे विहिततत्प्रकृतिकप्रत्ययेन च प्रकृत्यर्थवृत्तिसादृश्यनिरूपकप्रक्रियेति तादृश-प्रक्रियासदृशप्रक्रियाऽनुपपत्तेरित्यर्थः ।

काशी०— ननु त्रिविधमित्यत्र विधाशब्देनाजादिभ्यस्तदर्थतस्तदुदितत्वमाप्तवाक्यत्वं चेत्युभयं विजा-तीयसंवादत्वेनैकरूपेण विवक्षितं न तु श्रुतिमूलत्वयुक्तिमूलत्ववत्त्वात्येकम् । तथा च विधापदार्थतावच्छेदक-विजातीयसंवादत्वेन सह विधापदार्थश्रुतियुक्तिमूलत्वयोक्तित्वान्वयसंभवान्न विरोध इत्याशङ्क्ते **विजातीयेति** । अत्र साक्षात्प्रमाणसमानविषयकत्वं सजातीयसंवादः । तदन्यो विजातीयसंवादः । श्रुतियुक्तिमूलत्वयोः साक्षा-च्छ्रुतियुक्तिसमानविषयकत्वरूपतया सजातीयसंवादत्वम् । आप्तवाक्यत्वादेरतथात्वाद्विजातीयत्वम् । शास्त्रप्रामाण्य-साधनद्वारा शास्त्रार्थसिध्युपयोगित्वादेव तत्र संवादत्वव्यवहारः । यादृपते तु साक्षात्स्वविषयविषयकमानान्तरसंवादः सजातीयसंवादः । स्वप्रामाण्यव्यवस्थापनद्वारा स्वविषयव्यवस्थापकमानान्तरसंवादो विजातीयसंवाद इत्युक्तम् । वाक्यार्थचन्द्रिकायां च श्रुतियुक्तिसंवादस्य शास्त्रसमानार्थतया तत्प्रामाण्यग्राहकत्वेन सजातीयसंवादत्वम् । वक्त्रा-द्यानुकूल्यरूपसंवादस्य शास्त्रसमानार्थकत्वाभावे सति तत्प्रामाण्यग्राहकत्वेन विजातीयसंवादत्वमित्युपपादितम् ।

परिमळे च साक्षाच्छास्त्रप्रतिपाद्यार्थविषयकं सजातीयम् । विजातीयं तु साक्षात्तदर्थाविषयकं तत्प्रामाण्यनिश्चायकमित्यभिहितम् । तत्र यद्यपि श्रुतियुक्त्योः शास्त्रसमानविषयत्वेऽपि तन्मूलत्वस्यातथात्वात्सजातीयसंवादत्वानुपपत्तिः । न च सजातीयप्रमाणेन संवादः । समानविषयत्वमित्यर्थस्य विवक्षितत्वान्न दोष इति वाच्यम् । सजातीयत्वविशेषणवैयर्थ्यात् । श्रुतियुक्तिसंवादस्य शास्त्रसमानार्थतयेति ग्रन्थविरोधाच्च । एवमसमानविषयकः संवादो यदि विजातीयसंवादस्तदा श्रुतियुक्तिमूलत्वस्यापि विजातीयसंवादत्वप्रसङ्गः । यदि तु विजातीयप्रमाणेन परंपरया समानविषयत्वं तदाऽऽप्तवाक्यत्वादीनां विजातीयसंवादत्वानुपपत्तिः । तेषां विजातीयप्रमाणरूपत्वात् । वक्त्राद्यानुकूल्यरूपसंवादस्येति ग्रन्थविरोधाच्च । तथाऽपि सजातीयं प्रमाणं सजातीयसंवादः । विजातीयं प्रमाणं विजातीयसंवाद इत्येव विवक्षितम् । श्रुतियुक्तिसंवादस्येत्यादेरपि तद्रूपसंवादेत्यर्थः । न चैवं श्रुतिमूलतयेत्यादिमूले मूलताशब्दवैयर्थ्यमिति वाच्यम् । श्रुत्यादिना शास्त्रस्य समानविषयत्वरूपसंबन्धज्ञापनार्थत्वात् । न चैवं श्रुतेरागमत्वेनानुमानत्वानुपपत्तिरिति वाच्यम् । शाब्दार्थे आगमत्वेऽप्यानुमानिके शास्त्रप्रामाण्येऽनुमानत्वोपपत्तेः । एवं चास्मदुक्तार्थ एव पर्यवसानमित्यवसेयम् । दूषयति एवं तर्हीति । अजादिभ्यस्तदर्थनस्तदुदितत्वस्यासंभवाक्यस्य च विजातीयसंवादत्वेनैकविध्यविवक्षायामित्यर्थः । एक एव स्यात् एकविध एव विवक्षितः स्यात् । प्रतियोगिविधया श्रुतियुक्तिसंवादयोः सजातीयसंवादत्वेन बुद्धिस्थत्वादिति भावः । नन्वेकरूपेण बुद्धिस्थत्वेऽप्यविवक्षायां को दोष इत्यत आह अर्धजरतीयेति । अत्र कश्चिज्जरत्कामुकः सर्वयुवत्याः स्वस्मिन्नरुचेः सर्वजरत्यां च स्वस्यारुचेर्मुखमेव जरत्याः कामयते नाङ्गान्तरमिति प्रवादसिद्धाऽर्धजरतीकामनाऽर्धजरतीशब्देन लक्ष्यते । सदृशं छप्रत्ययार्थः । तथा च यथाऽर्धजरत्याऽसंभवादर्धजरतीकामनानुपपन्ना तथा विजातीयसंवादत्वेन द्वयोरैक्यविवक्षाऽपि विजातीयसंवादत्वरूपपदार्थतावच्छेदकेन सह श्रुतियुक्तिसंवादरूपपदार्थयोस्त्वित्वान्वयासंभवादनुपपन्नेत्यर्थः । पदार्थस्य पदार्थ एवान्वयव्युत्पत्तेः । क्वचित्पदार्थतावच्छेदके तदन्वयेऽपि न पदार्थेन सहेति भावः । न चैवं प्रकृते विधापदार्थतावच्छेदकविजातीयसंवादत्वश्रुतिसंवादत्वयुक्तिसंवादत्वेष्वेव त्रित्वान्वयोऽस्तु त्रिशब्दो वा त्रिविधार्थक इति वाच्यम् । सजातीयसंवादत्वेन द्वयोरेकबुद्धिविषयत्वे तत्त्यागस्य निर्बीजत्वात् । अर्थचरतीयेति पाठे चरतिर्भक्षणम् । तथा च कश्चित्सगर्भां मत्स्यवधूं लब्ध्वा तत्काले तद्भक्षणमुत्तरकाले भक्षणाय तत्प्रसवं चेच्छन्नाह 'अस्या अर्धं पाकाय अर्धं प्रसवाय अस्ति' इत्येवं प्रवादसिद्धाऽर्धप्रसवकामनासहितार्धभक्षणकामनार्धचरतिशब्देन लक्ष्यते । सा च यथाऽर्धपाके अर्धप्रसवासंभवादनुपपन्ना तथा प्रकृतेऽपीत्यर्थः । अस्तु तर्हि सजातीयसंवादत्वेन श्रुतियुक्तिसंवादयोरप्यैक्यविवक्षेत्यत आह तथा चेति । सजातीयविजातीयसंवादत्वावच्छिन्नयोर्विधापदार्थत्व इत्यर्थः । त्रित्वानुपपत्तिरिति । पदार्थानां चतुष्कात्पदार्थतावच्छेदकयोश्च द्वित्वादिति भावः ।

प्रदीपः— इह हि ब्रह्मसूत्राणामलौकिकार्थत्वात् तदीयवक्तृत्वायुक्तिरपि वेदानुकूला अनुकूलवक्त्रादिमत्वस्य युक्त्यात्मकत्वेऽपि लौकिकवाक्ये संभवाद्विजातीयत्वम् । यद्वा अनुकूलवक्त्रादिमत्वस्य लौकिकवाक्यसाधारण्येन प्रामाण्यमात्रसाधकत्वात्तत्संवादस्य विजातीयत्वं श्रुतियुक्त्योस्तु सर्वोत्तमप्रामाण्यसाधकत्वात् तत्संवादस्य सजातीयत्वं तत्रानुकूलवक्त्रादिमत्वस्य गुरूपदेष्ट्राद्युपदिष्टत्वस्य विजातीयसंवादत्वेनैक्यविवक्षया

त्वसंपत्तिश्चेत् श्रुतियुक्त्योरपि सजातीयत्वेनैक्यविवक्षायां द्वित्वमेव स्यान्न त्रित्वमिति चोद्योत्तराभ्यामाह **विजातीयेति**। **अर्धचरतीयेति**। 'लम्बमानौ सुतौ दृष्ट्वा व्याधः परमबुद्धिमान्। सर्वनाशे समुत्पन्ने अर्धं चरति पण्डितः॥' इत्यस्य न्यायस्य प्रकृतेऽनुपपत्तेरित्यर्थः।

५५ सु०— भवेदयं ग्रन्थकृतोऽभिप्रायः। तेनापीदं प्रयत्नगौरवं कस्मादाश्रितमिति चेन्न। उक्तसाधनोपपन्नत्वेऽपि 'अस्तु भारतादीनां प्रामाण्यं मा भूच्चास्ये'ति शङ्कायां वक्त्राद्यानुकूल्यसाधनस्य अवश्याश्रयणीयत्वात्। अन्यथाऽप्रयोजकत्वापत्तेरिति।

परि०— इदमिति। शास्त्रप्रभवत्वादिना वक्त्राद्यानुकूल्यं तेन च प्रामाण्यमिति प्रयत्नगौरवमित्यर्थः। विमतं शास्त्रं प्रमाणं शास्त्रप्रभवत्वादिविशिष्टेन प्रोक्तत्वाद्भारतवदित्येवोक्तावप्रयोजकत्वशङ्का स्यात्तन्निवृत्त्यर्थमेवमाश्रितमिति भावेनाह **उक्तसाधनेति**। यथा हि क्षित्यादिकं सकर्तृकं सावयवत्वादित्युक्ते हेतोरप्रयोजकत्वशङ्कानिरासाय मध्ये कार्यत्वं निवेश्यते तद्वदिति भावः॥ **वक्त्रादीति**। तत्र च नाप्रयोजकत्वमिति भावः॥

यादु०— उक्तसाधनोपपन्नत्वेऽपीति। 'बादरायणेन ब्रह्मादीन्प्रति तन्मोक्षार्थमुपदिष्ट'त्वरूपसाधनोपपन्नत्वेऽपीत्यर्थ इत्याहुः॥ **वक्त्राद्यानुकूल्यसाधनस्येति**। तथा च उक्तरीत्या नाप्रयोजकतेति भावः।

वं०प०— इदमिति। शास्त्रप्रभवत्वादिना वक्त्राद्यानुकूल्यं, तेन च प्रामाण्यमिति प्रयत्नगौरवमित्यर्थः॥

आनन्दः— *नन्वनयोः साजात्येनैकत्वं न विवक्ष्यत इत्यत आह* **इदं प्रयत्नगौरवमिति**।

कं०रा०— मा भूदिति। न च वाच्यम् 'अस्ति सिचोऽपृक्त' इति 'अस्तिसिज्भ्यां परस्य सार्वधातुकापृक्तस्य विधीयमान ईट् गातिस्थे'त्यादिना सिचो लुक्यपि प्रत्ययलक्षणेनात्र कस्मान्न भवतीति। सिचोऽल्पाज्कत्वाद्बहुविषयत्वेन अभ्यर्हितत्वाच्च पूर्वनिपाते कर्तव्ये 'अस्तिसिच' इति वचनात्तन्त्रादिना विद्यमान'सिच' इत्यस्यार्थस्य लाभान्नेडिति पूर्वधातुवृत्तावुक्तत्वेनेडभावोपपत्तेः।

वा०चं०— द्वितीयं निराकरोति भवेदेवमिति। अत्र ह्यप्रयोजकत्वशङ्कायां विपक्षे बाधकान्तरस्याभावात् 'प्रामाण्यानङ्गीकारे अस्य शास्त्रस्य वक्त्राद्यानुकूल्योपेतत्वं न स्यादि'त्येव विपक्षे बाधकं वक्तव्यम्। तत्रेष्टापादनत्वशङ्कायां 'गुरूणां गुरुत्वादि'त्यादिहेतुभिर्वक्त्राद्यानुकूल्यस्यावश्यं साधनीयत्वे, प्रथमत एव तदस्त्विति ग्रन्थकृतोऽभिप्रायत्वान्न प्रयत्नगौरवाश्रयणं तस्येत्याह **उक्तेति**।

वा०र०— द्वितीयमिति। एतादृशि लघूपाये सति ग्रन्थकृतैवं प्रयत्नगौरवं नाश्रयणीयमित्युच्यत इति द्वितीयमित्यर्थः। **निराकरोतीति**। निराकर्तुमाशङ्कत इत्यर्थः। **मूले भवेदयमिति** काचित्कपाठेऽप्यर्थस्त्वेक एव। एवं

ग्रन्थकृतोऽभिप्रायो भवेत् अयं ग्रन्थकृतोऽभिप्रायो भवेदित्युक्तयोर्विशेषाभावात् । मूलेऽप्रयोजकताशङ्कानिरासकतया वक्त्राद्यानुकूल्यसाधनस्यावश्यकत्वमुच्यते तच्च साक्षान्न भवति । एतत्साधनेनाप्रयोजकताशङ्कानिरासाभावात् । किन्तु मध्ये वक्त्राद्यानुकूल्योपेतत्वानुपपत्तिं तच्छङ्कानिरासकतया अभिप्रेत्यास्तु नाम तदनुपपत्तिरपीति शङ्कावारणाय गुर्ल्गुरुत्वादिना तत्साधनस्यावश्याश्रयणीयत्वादिति परम्परयैवेति दर्शयन् बाधकान्तरपरित्यागेन च वक्त्राद्यानुकूल्योपेतत्वानुपपत्तिरेव कुतो वाच्येति शङ्कां च निराकरोति । अत्र ह्यप्रयोजकत्वेति । अवश्यं साधनीयत्वे उक्तक्रमेणास्तु साधनीयत्वम् । प्रथमत एव साधनं तु कुत इत्याशङ्कापरिहाराय मूलाभिप्रायं दर्शयति प्रथमत एवेति । यत एवं साधनमावश्यकं ततो लाघवात्प्रथमत एव वक्त्राद्यानुकूल्योपेतत्वस्यैव साधनं कृत्वा तेन प्रामाण्यसाधनं कार्यमिति गुर्ल्गुरुत्वादीनां प्रामाण्यं परमसाध्यमित्येव स्वरसमित्यर्थः ।

स०व्र०— 'गुरूपदेष्ट्राद्युपदिष्टत्वेनानुकूलवक्त्रादिमत्त्वसाधनं, तेन प्रामाण्यसाधनमि'ति परम्पराश्रयणे प्रश्नपूर्वकं प्रयोजनमाह भवेदिति । विपक्षे बाधकोपन्यासार्थमनुकूलवक्त्रादिमत्वसाधनमवश्यं कर्तव्यमित्यर्थः ॥

कुण्डल०— उक्तसाधनेति । गुर्ल्गुरूदितत्वाद्युक्तसाधनोपपन्नत्वेऽपीत्यर्थः । मा भूदिति । न च वाच्यम् अस्तिसिचोऽपृक्त इति अस्तिसिज्भ्यां परस्यापृक्तसार्वधातुकस्य विधीयमान इडागमः गातिस्थाघुपाभूभ्य इति सिचो लुक्यपि प्रत्ययलोपे प्रत्ययलक्षणमित्यनेनात्र कस्मान्न भवतीति सिचो लोपाच्कत्वाद्धलुविषयत्वेनाभ्यर्हितत्वाच्च पूर्वनिपाते कर्तव्येऽस्ति सिच इति वचनात् तन्त्रादिना विद्यमानसिच इत्यस्य चार्थस्य लाभात् इडागमाभावोपपत्तेः । अन्यथेति । उक्तहेतुभिर्वेदसूत्रप्रामाण्यं प्रति प्रयोजकीभूतवक्त्राद्यानुकूल्यसाधनाभावे हेतूनामप्रयोजकत्वोपपत्तेरित्यर्थः ।

विद्व०— ननु उक्तज्ञापकेन अयं ग्रन्थकृतोऽभिप्रायो भवेत् तेनाप्युक्तरीत्या लघूपाये सति गौरवं कस्मादाश्रितमिति शङ्कते भवेदयमिति । उक्तसाधनोपपन्नत्वेऽपीति । बादरायणेन ब्रह्मादीन् प्रति मोक्षार्थमुपदिष्टत्वरूपसाधनोपपन्नत्वेऽपीत्यर्थः । अवश्याश्रयणीयत्वादिति । प्रामाण्यानङ्गीकारे शास्त्रस्य वक्त्राद्यानुकूल्योपेतत्वं स्यादित्येवं विपक्षे बाधकस्य वक्तव्यत्वेनावश्याश्रयणीयत्वादिति भावः ।

चक्रः— उक्तसाधनेत्यादि । प्रकृतसाध्यमन्तरेण हेतुरस्त्वित्यप्रयोजकत्वशङ्कानिरसनौपयिकप्रामाण्याभावापादक-वक्त्राद्यानुकूल्यन्यायाभावापाद्यकापत्तिहेतुभूतापाद्यव्यतिरेकनिर्णयरूप-तत्त्रिकानुमित्यात्मकफलोपधायकतत्त्रितयनिरूपितव्याप्यवच्छिन्नबादरायणोदितत्वादिहेतुवृत्तिप्रकारताशालिपरामर्शादिघटितसामग्रीसंपादनमावश्यकमेवेति भावः ॥

काशी०— उक्तरीत्या मूलव्याख्यामभ्युपेत्य मूलस्यैवासङ्गतिमाशङ्कते भवेदिति । ग्रन्थकृतः भाष्यकारस्य । इदं प्रयत्नगौरवं परम्परया प्रामाण्यसाधनगोचरप्रयत्नगौरवम् । कस्मादिति । अजादिभ्यस्तदर्थतस्तदुदितत्वेन साक्षात्प्रामाण्यसाधनसंभवादिति भावः । उक्तसाधनेति । भारतादीनामस्य शास्त्रस्य चाजादिभ्य-

स्तदर्थतस्तदुदितत्वरूपसाधनवत्त्वेऽपीत्यर्थः । **वक्त्राद्यानुकूल्यसाधनस्येति** । यदि प्रामाण्यं न स्यात्तर्हि वक्त्राद्यानुकूल्यं न स्यादिति तर्कस्य वाच्यतया तत्रेष्टापत्तिपरिहाराय वक्त्राद्यानुकूल्यसाधनस्यावश्यकत्वादित्यर्थः । एतेन वक्त्राद्यानुकूल्येन प्रामाण्यसाधने तदुदितमित्यादेर्वैयर्थ्यमित्यपास्तम् । असिद्धिपरिहारार्थत्वात् । एवं च तर्कस्य विपर्ययपर्यवसायितया वक्त्राद्यानुकूल्येन प्रामाण्यसाधनस्यावश्यकत्वे तदुदितमित्यादिना प्रामाण्यसाधन एव गौरवमिति भावः । ननु यदि प्रामाण्यं न स्यात्तर्ह्यजादिभ्यस्तदर्थतस्तदुदितत्वं न स्यादिति तर्केणैव प्रामाण्याभावशङ्कानिराससंभवान्न तदर्थं वक्त्राद्यानुकूल्यासाधनस्यावश्यकतेत्यत आह **अन्यथेति** । वक्त्राद्यानुकूल्यासाधने तदुदितत्वादेः प्रामाण्यं प्रत्यप्रयोजकत्वेन व्याप्यनिश्चयादुक्ततर्कानुपपत्त्या अप्रामाण्यशङ्कया दुर्निवारतापत्तेरित्यर्थः । ननु यदि गुर्ह्यरूणामित्यादेरुत्तरवाक्यानुरोधेन वक्त्राद्यानुकूल्यसाधनद्वारैव प्रामाण्यसाधने तात्पर्यं तर्हि वक्तृश्रोतृप्रसक्तीनां यत्रानुकूलता तत्र मानत्वमित्येव वक्तव्यम् ।

प्रदीपः— गुरूपदेष्टाद्युपदिष्टत्वेनानुकूलवक्त्रादिमत्वसाधनं तेन प्रामाण्यसाधनमिति परम्पराश्रयणे प्रश्नपूर्वं प्रयोजनमाह **भवेदिति**। विपक्षे बाधकोपन्यासार्थमनुकूलवक्त्रादिमत्वसाधनमवश्यं कर्तव्यमित्यर्थः।

५६ सु०— ननु तर्ह्यनेनेदमुदितं भवति । 'एतच्छास्त्रं प्रमाणमनुकूलवक्त्रादिमत्त्वाद् भारतादिवत् । वक्त्राद्यानुकूल्यं चोक्तहेतुसिद्धमि'ति । एतदनुपपन्नम् । आप्तवाक्यतायास्तत्रोपाधित्वात् । न च 'प्रत्यक्षादौ सत्यपि प्रामाण्ये नास्त्याप्तवाक्यत्वमिति साध्याव्यापकत्वान्नायमुपाधिरि'ति वाच्यम् । वाक्यत्वावच्छिन्नंसाध्यव्यापकत्वेनोपाधित्वोपपत्तेः ॥ तथाऽप्यपौरुषेये वेदे तदभावादनुपाधित्वमिति चेन्न । वेदापौरुषेयत्वस्यासम्मतत्वात् ॥ सम्मतत्वे वा साधनावच्छिन्ने पौरुषेयवाक्यत्वावच्छिन्ने वा साध्येऽस्योपाधित्वोपपत्तेरिति ।

मैवम् । अभिप्रायानवगमात् । न हि वयं वक्त्राद्यानुकूल्येन शास्त्रप्रामाण्यं साक्षात्साधयितुमुद्यताः । येनात्रोपाध्युद्भावनं सङ्गच्छेत । अपि तर्ह्यनुकूलवक्त्रादिमत्त्वस्य आप्तवाक्यतया व्याप्तत्वात्तेन तां प्रसाध्य तया प्रामाण्यं शास्त्रस्य साध्यत इत्याशयवानाह वक्तृश्रोतृप्रसक्तीनामिति ।

अनु०— वक्तृश्रोतृप्रसक्तीनां यदासिरनुकूलता ।
आप्तवाक्यतया तेन

परि०— वक्त्राद्यानुकूल्यमपि प्रामाण्ये साक्षान्न हेतुः किन्त्वाप्तवाक्यत्वानुमानद्वारैव । कुत एवम् । अन्यथा सोपाधिकत्वेन प्रामाण्यसाधकत्वानापत्तेरिति भावेनाशङ्क्योत्तराभ्यां मूलमवतारयति

नन्वित्यादिना ॥ उक्तहेत्विति । गुर्गुरूणामित्यादिनोक्तहेतुत्रयेण वक्त्राद्यानुकूल्यत्रयं सिद्धमित्यर्थः ॥ **वाक्यत्वावच्छिन्नेति ।** साध्यव्यापकत्वं हि द्वेधा । शुद्धसाध्यव्यापकत्वमवच्छिन्नसाध्यव्यापकत्वं चेति । तत्राद्यं यागीयहिंसा पापसाधनं हिंसात्वादित्यत्र निषिद्धत्वस्य । द्वितीयं च द्वेधा । पक्षधर्मावच्छिन्नसाध्यव्यापकत्वं साधनधर्मावच्छिन्नसाध्यव्यापकत्वं चेति । तत्राद्यं वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र उद्भूतरूपवत्त्वोपाधेः बहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकत्वम् । द्वितीयं तु ध्वंसो विनाशी जन्यत्वादित्यत्र भावत्वोपाधेर्जन्यत्वावच्छिन्नसाध्यव्यापकत्वम् । प्रकृतेऽस्योपाधेः शुद्धसाध्याव्यापकत्वेऽपि वाक्यत्वरूपेण वा पौरुषेयवाक्यत्वरूपेण वा पक्षधर्मेणानुकूलवक्त्रादिमत्त्वरूपसाधनेन वा अवच्छिन्नसाध्यव्यापकत्वोपपत्तेः । न च स एव सत्प्रतिसाधन इति प्रमाणलक्षणोक्तयोपाध्यभावेनानुमीयमानोऽपि विशिष्टस्याभाव एव सिद्धचेत् न तु अभिमतशुद्धसाध्यस्याभाव इति न प्राचीनहेतोः सत्प्रतिपक्षत्वमिति वाच्यम् । विशेषणवति विशिष्टाभावसिद्धेर्विशेष्याभावेनैव पर्यवसानादिति भावः ॥ **उद्यता इति ।** उद्युक्तवन्त इत्यर्थः ।

गु०दी०— साधनावच्छिन्न इत्यस्य अनुकूलवक्त्रादिमद्वाक्यत्वे सति यत्प्रमाणमिति साधनावच्छिन्न इत्यर्थः ।

वं०प०— उक्तहेतुसिद्धमिति । 'गुर्गुरूणामि'त्यादिनोक्तहेतुत्रयेण वक्त्राद्यानुकूल्यत्रयं सिद्धमित्यर्थः ।

आनन्दः— गुरूणां गुरुत्वादिना वक्त्राद्यानुकूल्यस्य तेन आप्तवाक्यत्वस्य साधनं तेन पुनः प्रामाण्यसाधनमितीदमित्यर्थः । ननूत्तरपदे वक्त्राद्यानुकूल्यस्याप्तवाक्यत्वेन सह व्याप्तिकथनमयुक्तम् । प्रामाण्यसाधने तत्कथनस्यासंमतत्वात् । किञ्चानुकूल्यस्य वक्तृनिष्ठत्वेन प्रामाण्यस्य च सूत्रनिष्ठत्वेन वैयधिकरण्यात्कथमनुमानम् । वक्त्राद्यानुकूल्यहेतुत्वेऽनुमानप्रकारञ्च कथमित्यतस्तन्निवर्त्याशङ्कां दर्शयति नन्विति । व्याचिख्यासितनया तद्बुद्धिसन्निहितत्वादेतदित्युक्तम् । गुर्गुरुत्वादिहेतुसिद्धमित्यर्थः । ननु वेदापौरुषेयत्वस्य श्रुतिर्वाव नित्येत्यादिसिद्धत्वात् कथमसङ्गतमित्यत आह **संमतत्वे वेति । अभिप्रायानवगमादिति ।** ननु साध्यव्यापकत्वे सति साधनाव्यापकत्वमित्युपाधिलक्षणे साध्यस्य शुद्धसाध्यपरत्वेनावच्छिन्नसाध्यव्यापकत्वमादायोपाध्युद्भावनतत्परिहारायुक्तौ । न चावच्छिन्नसाध्यव्यापकत्वपरमेव विवक्षितमिति वाच्यम् । तथा सति शुद्धसाध्यव्यापकोपाध्यव्याप्तेः । अवच्छिन्नपक्षे पक्षधर्मावच्छिन्नपरत्वविवक्षायां साधनधर्मावच्छिन्नसाध्यव्यापकेऽव्याप्तिः । साधनधर्मावच्छिन्नपरत्वविवक्षणे पक्षधर्मावच्छिन्ने तत्राव्याप्तिः तस्मादयुक्तमेतदिति चेत् । अत्र वक्तव्यम् । साध्यपदस्यावच्छिन्नानवच्छिन्नसाधारणसाध्यमात्रपरत्वाभ्युपगमेन कुत्राप्यव्याप्तेरभावात् शङ्कापरिहारयोरसङ्गतत्वाभावात् । न च पर्वतेतरत्वे अतिव्याप्तिरिति वाच्यम् । हेतुसाध्ययोर्व्याप्तिग्राहकानुकूलतर्कसद्भावेन हेतोः साध्यव्यापकत्वस्य निर्णीतत्वेन साध्यव्याप्यहेत्वव्यापकत्वेनोपाधेः पर्वतेतरत्वस्य साध्यव्यापकत्वस्य पक्ष एव वक्तुं सुकरत्वेनातिव्याप्त्यभावात् । एवं च

चिन्तामणिकारीयं पूर्वपक्षे साध्यव्यापकत्वे सति साधनाव्यापकत्वस्य वा उपाधित्वं साध्यसमव्यापकत्वे सति साधनाव्यापकत्वं वा पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वं वा साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वं वा पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वं वेति लक्षणपञ्चकमनूद्याद्ये लक्षणे साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तिं पर्वततरत्वेऽतिव्याप्तिं दत्वा पर्वततरत्वेऽतिव्याप्तिपरिहारार्थं व्यतिरेके व्यर्थविशेषणशून्यत्वरूपविशेषणेन विशेषितत्वात् । वस्तुगत्या यः साध्यव्यापकः पक्षे तत्र उपाधिरिति विवक्षितत्वात् । विपक्षाव्यावर्तकविशेषणशून्यत्वस्य विवक्षितत्वाद्वा । अनुमानमात्रोच्छेदकतया जातित्वाद्वा तदन्यत्वरूपप्रकारान्तराद्वा सत्प्रतिपक्षोन्नायकत्वादिरूपदूषकताबीजाभावाद्वा न तस्योपाधित्वमिति प्रकारषट्क-माशङ्क्याद्ये बाधोन्नीतस्याप्यनुपाधितापत्तेरित्युक्त्या द्वितीये पक्षातिरिक्तसाध्यव्यापकताग्रहादुपाधेर्दूषकत्वम् । तच्च तत्राप्यस्तीति उक्त्या तृतीये सिद्धयसिद्धिव्याघातोक्त्या चतुर्थपञ्चमयोर्दूषणसमर्थत्वोक्त्या षष्ठः बाधो नीतोऽपि पक्षेतरो नोपाधिः स्यादित्युक्त्या निरस्य द्वितीयलक्षणे विषमव्याप्तेऽव्याप्तिं प्रदाय तस्यानुपाधित्वे साध्यप्रयोजको धर्म उपाधिः यद्धर्मोऽन्यत्र प्रतिबिम्बते स उपाधिः यदभावो व्यभिचारविरोधी स उपाधिरिति प्रकारत्रयमाशङ्क्याद्ये दूषणौपयिक-प्रयोजकत्वस्य विवक्षितत्वात् । तस्य च विषमव्याप्तेऽपि सत्त्वादिनेत्युक्त्या द्वितीये विषमव्याप्ते दूषकताबीजसद्भा-वात् शास्त्रे उपाधिपदप्रयोगाच्चेत्युक्त्या तृतीये साध्यव्यापकव्याप्यत्वस्याव्यभिचारे गौरवेणातन्त्रत्वोक्त्या निरस्य तृतीयलक्षणे साधनावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तिं दत्वा शब्दोऽभिधेयः प्रमेयत्वादित्यत्र पक्षधर्मगुणत्वाव-च्छिन्नसाध्यव्यापकस्याश्रावणत्वस्याप्युपाधित्वं स्यादित्युक्त्या दूषयित्वा चतुर्थे लक्षणे पक्षधर्मावच्छिन्नसाध्य-व्यापकोपाध्यव्याप्तिं दत्वा जलं प्रमेयं रसवत्त्वादित्यत्र सावच्छिन्नसाध्यव्यापकपृथिवीत्वस्योपाधित्वं स्यादि-त्युक्त्या च निराकृत्य पञ्चमे लक्षणे पर्यवसितस्य पक्षधर्मतावललभ्यमर्थमुपादाय द्व्यणुकं नानित्यद्रव्यसमवेतं जन्यमहत्त्वानधिकरणद्रव्यत्वादित्यत्र निस्पर्शद्रव्यसमवेतत्वमुपाधिः स्यादित्यतिव्याप्तिं दत्वा किञ्च पक्षधर्मता-बललभ्यं साध्यं सिद्धमसिद्धं वेत्यादिना दूषयित्वा सिद्धान्ते यद्व्यभिचारित्वेन यस्य साध्यव्यभिचारित्वं स तत्रोपाधिरिति लक्ष्यतावच्छेदकमभिधाय पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वमिति लक्षणमुक्त्वा पर्यवसितेत्यस्य यद्धर्मावच्छेदेन साध्यं प्रसिद्धं तदवच्छिन्नं साध्यं पर्यवसितमिति तदर्थमभिधाय साध्यप्रसिद्धयव-च्छेदकधर्मस्य यावत्त्वं विवक्षितं यत्किञ्चित्त्वं वेति विकल्प्याद्ये वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूत-रूपवत्त्वमुपाधिर्न स्यादिति दूषणमभिधाय द्वितीये धूमेऽपि महानसत्वावच्छेदेन प्रसिद्धवह्निव्यापकव्यञ्जनवत्त्वादे-रुपाधित्वं स्यादिति दूषणमभिधाय तस्मादयुक्तमेतदित्याशङ्क्य तत्परिहारार्थं साधनव्यापकीभूतयत्किञ्चिद्धर्माव-च्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमिति विवक्षितस्य प्रमेयत्वेन वायोर्बहिरिन्द्रियप्रत्यक्षत्वसाधन-द्रव्यत्वावच्छिन्नबहिरिन्द्रियप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वं मित्रातनये मित्रापुष्टत्वेन श्यामत्वसाधने शाकपाकजत्वं च नोपाधिः स्यात् । न च तयोरनुपाधित्वम् । शुद्धसाध्यव्यभिचारोन्नायकत्वस्य दूषकताबीजस्य सत्त्वे तयो-रनुपाधित्वस्य वक्तुमशक्यत्वादिति दूषणं दत्वा पुनर्यद्धर्मावच्छेदेनेत्यत्र साधनवतीति शेषः । तेन यद्धर्मावच्छेदेन साधनवति साध्यं प्रसिद्धं तदवच्छिन्नं साध्यं पर्यवसितमिति विवक्षिते वायुः प्रत्यक्षो वायुत्वादित्यत्रोद्भूत-रूपादावव्याप्तिमभिधाय दूषिते पुनरपि तद्धर्मावच्छेदेन साध्यव्यापकत्वे सति तद्धर्मावच्छिन्नसाधनाव्यापकत्वं यत्र

साधनाव्यापकत्वे तद्वृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं वा स्वानधिकरणीभूतसाधनाधिकरणवृत्तिधर्मावच्छिन्न-साध्यव्यापकत्वं वेति शङ्कितलक्षणत्रयस्य घटः पृथिवीद्रव्यत्वादित्यत्र घटान्यत्वावच्छिन्नपृथिवीत्वव्यापके पक्ष एव साधनाव्यापके घटावृत्तिगुणवत्त्वे उपाधावव्याप्तेरयुक्तमित्युक्त्याऽतिदूषिते पुनरपि सिद्धान्तितस्य पर्यवसितसाध्य-व्यापकत्वे सति साध्यसमानाधिकरणत्वे सति साध्यव्यभिचारिसाधनाव्यापकत्वमित्यस्य दूषकताबीजातिरिक्तस्य बहुकुसृष्टियुक्तस्य गुरुभूतस्य कल्पनं निरस्तं भवति। उक्तरीत्या लघुभूतेन सकलसङ्ग्राहकेण दूषकताबीजरूपेणोपपत्तौ उक्तकल्पनस्यायुक्तत्वादिति दिक्। **तेन** अनुकूलवक्त्रादिमत्त्वेन। **ताम्** आप्तवाक्यताम्। **तया** आप्तवाक्यतया।

कं०रा०— साधनावच्छिन्न इति। अपौरुषेयवेदेऽनुकूलवक्त्रादिमत्त्वरूपसाधनस्यासत्त्वेन तदवच्छिन्न-साध्यस्य अभावान्न तत्र साध्याव्यापकत्वमिति भावः।

श्रीनिधि०— वाक्यत्वावच्छिन्नेति। पक्षधर्मत्वरूपवाक्यत्वावच्छिन्ने इत्यर्थः। **पौरुषेयवाक्यत्वेति**। पक्षधर्मरूपवाक्यत्वेत्यर्थः।

वा०चं०— नन्वेवं मानत्वस्य 'गुरूणां गुरुत्वादि'त्यादिहेतून्प्रति परमसाध्यत्वेऽपि, वक्त्राद्यानुकूल्यं प्रति तस्य साक्षात्साध्यत्वात् वक्त्राद्यानुकूल्यस्याप्तवाक्यत्वेन व्याप्त्याद्युपपादनपुरःसरम् आप्तवाक्यत्वस्य मानत्वसंबन्ध-व्युत्पादकमुत्तरवाक्यमसङ्गतमेव॥ न च 'अत्रापि सा परम्पराऽभिप्रेते'ति वाच्यम्। तथात्वे उत्तरश्लोकवैयर्थ्यापत्तेः इत्यतोऽत्र श्लोके आप्तवाक्यत्वबोधकशब्दाभावेन परम्परायाः स्पष्टमप्रतीतेर्यथाश्रुतस्य वक्त्राद्यानुकूल्यमानत्वयोः साक्षात्साध्यसाधनभावाभिप्रायकत्वं प्रकल्प्य, परोक्तदूषणस्य परिहाराय स्वाभिप्रायाविष्करणार्थत्वादुत्तरश्लोकस्य नासङ्गतिर्वैयर्थ्ये इत्यभिप्रेत्य उत्तरवाक्यं सङ्गमयति **नन्विति**॥ यद्वा पूर्ववाक्याभिप्रायदर्शकं वक्तृश्रोतृप्रसक्तीना-मित्युत्तरवाक्यं व्यर्थम्। अभिप्रायान्तराप्रतीत्याऽस्यैव सुज्ञानत्वात्प्रतीतौ वा तस्याप्युपपत्तौ तत्परित्यागेनाभि-प्रायान्तरप्रदर्शकोत्तरवैयर्थ्यमेवेत्यतोऽभिप्रायान्तरप्रतीतितदनुपपत्तिप्रदर्शनपूर्वं स्वाभिप्रायस्वरूपं दर्शयन्नेव, तदा-शयप्रदर्शकतयोत्तरवाक्यमवतारयति **ननु तर्हि इति**। **वाक्यत्वावच्छिन्नेत्यादि**। यथा च पक्षधर्मसाधन-धर्मावच्छिन्नयोरुपाधित्वं तथोपाधिपरीक्षायां वक्ष्यति।

वा०र०— नन्वेवमिति। अप्रयोजकताशङ्कावारणाय वक्त्राद्यानुकूल्यस्य मध्ये साधनीयत्व-प्रतिपादनानुसारेणेत्यर्थः। **साक्षात्साध्यत्वादिति**। अनेन तयोरेव यथाश्रुते साध्यसाधनभावे संभवति सति तत्परित्यागसूचकमित्युत्तरवाक्यविशेषणं लभ्यते। **व्याप्त्याद्युपपादनेति**। अप्रयोजकताशङ्कानिरासस्सङ्ग्रहाय आदि-पदम्। **अत्रापीति**। गुरुगुरुत्वादिप्रामाण्ययोर्हेतुहेतुमद्भावे परम्परावत् वक्त्राद्यानुकूल्यप्रामाण्ययोरपि हेतुहेतुमद्भावे परम्पराभिप्रेतेत्यर्थः। **उत्तरश्लोकेति**। अन्त्यपदातिरिक्तवक्त्रिति श्लोकवैयर्थ्यापत्तेरित्यर्थः। एवमुत्तरत्रापि। अयमर्थः। उत्तरश्लोके हि वक्त्राद्यानुकूल्यस्य मानत्वं परमसाध्यमाप्तवाक्यत्वं तु मध्ये साक्षात्साध्यमित्येतत् श्लोकाभिप्रायः कथ्यते। तावतोऽर्थस्यात्रैवाभिप्रेतत्वे उत्तरवाक्ये तदभिप्रायकथनं व्यर्थमापद्यत इति। सा परम्पराभिप्रेतेत्येव ब्रूमः।

न चोत्तरवाक्यवैयर्थ्यम्। तत्परम्पराभिप्रायाविष्करणार्थत्वेनैव सार्थक्योपपत्तेः। न चाभिप्रायाविष्करणमपि किमर्थमिति वाच्यम् । यथाश्रुतस्य गुरुगुरूणामित्यादेरुक्तरीत्याध्याहृतवक्त्राद्यानुकूल्यमानत्वयोः यः साक्षात्साध्यसाधनभावस्तदभिप्रायकत्वं प्रकल्प्य परोक्तं यद्दूषणं सोपाधिकत्वरूपं तत्परिहाराय स्वाभिप्रेतस्य परम्परारूपस्याविष्करणस्यावश्यकत्वादित्याह **अत्र श्लोक इति** । अप्रतीतेरित्यन्तं प्रकल्प्येत्युक्तकल्पनायां हेतुः । तेन पूर्ववाक्य एव परम्पराभिप्रायस्य ज्ञातुं शक्यत्वात्साक्षात्साधनत्वाभिप्रायकत्वकल्पना शङ्कितुरयुक्तेति न शङ्कनीयमित्युक्तं भवति । अध्याहारस्तु निर्मूलत्वेनाकर्तव्य इति शङ्कित्राशयात् । **तदेतदुक्तं स्पष्टमिति । प्रकल्प्येति च । नासङ्गतिवैयर्थ्ये इति** । अत्र परम्पराया अभिप्रेतत्वाद्वक्त्राद्यानुकूल्यस्याप्तवाक्यत्वेन तस्य च मानत्वेन संबन्धव्युत्पादनं सङ्गतमेव । उक्ताभिप्रायस्य पूर्वश्लोक **एव स्पष्टमप्रतिभासात्तदाविष्करणायोत्तरश्लोकप्रवृत्तेर्न** वैयर्थ्यमपीत्यर्थः । मन्दानुजिघृक्षया लघुमवतारं चाह **यद्वेति । तत्रोपाधित्वादिति मूलम्** । प्रामाण्यरूपसाध्यवति भारतादावाप्तवाक्यतायाः सत्त्वेन साध्यव्यापकत्वात्पक्षभूतैतच्छास्त्रे चानुकूलवक्त्रादिमत्त्वरूपहेतुमति मानाभावेनाप्तवाक्यत्वासिद्ध्या तदभावात् साधनाव्यापकत्वमिति प्रामाण्यसाध्यकानुमाने उपाधित्वादित्यर्थः । **उपाधिपरीक्षायामिति** । नविलक्षणत्वाधिकरणीयसाध्यव्यापकवैलोम्यमित्येतदनुभाष्यव्याख्यावसर इत्यर्थः । **वक्ष्यतीति** । उपाधिलक्षणगतसाध्यपदस्यावच्छिन्नानवच्छिन्नसाधारणसाध्यमात्रपरतया **पक्षधर्मसाधनधर्मावच्छिन्नसाध्यव्यापकयोरपि** उपाधिलक्षणसङ्ग्राह्यत्वोपपत्तेर्न शुद्धसाध्यव्यापकत्वाभावप्रयुक्त **उपाधित्वाभाव इति वक्ष्यतीत्यर्थः** । पक्षधर्मभूतवाक्यत्वावच्छिन्नसाध्यव्यापकत्वविवक्षणेऽपि वेदे साध्याव्यापकत्वशङ्का प्राप्तेति पौरुषेयत्वेन पक्षधर्मं विशिनष्टि **पौरुषेयवाक्येति** मूलम् । शास्त्रस्य साध्यत इत्यत्र मूले प्रकृते त्वयमित्येतद्विभक्तिव्यत्यासेनास्माभिरित्येवमनुवर्तत इति ज्ञेयम् ।

स०व्र०— ननु तर्हीत्यादि । यत्र प्रामाण्यं तत्राप्तवाक्यत्वमित्यस्य प्रत्यक्षे व्यभिचारात् ॥ ब्रह्मसूत्राणाम् आप्तवाक्यत्वे मानाभावात् । क्वचिदाप्तस्य सर्वत्राप्तत्वनियमाभावादिति भावः ॥ **साधनावच्छिन्न इति** । अनुकूलवक्त्रादिमद्वाक्यत्वविशिष्टे इत्यर्थः ॥ ननु साध्यस्य उपाधिव्यभिचारपरिहाराय कथं साधनावच्छिन्नसाध्ये उपाधिप्रसरः । कथं च साध्यविशेषणानां व्यभिचारवारकत्वमिति । मैवम् । 'शब्दो न स्पर्शवद्विशेषगुण' इत्यादौ साध्यविशेषणानां व्यभिचारवारकत्वदर्शनात् । साधनावच्छिन्ने साध्ये उपाधिप्रसरं तूपपादयिष्यति ॥ **पौरुषेयवाक्यत्वावच्छिन्न इति** । 'सर्वपुरुषाभ्यां णढञाविति'सूत्रे 'पौरुषेयो वध' इत्यादिरूपसिद्ध्यर्थं 'पुरुषाद्वधविकारसमूहतेनकृतेष्विति वक्तव्यमिति' वार्तिककृताऽन्यत्रापि ढञोऽभ्यनुज्ञातत्वात्, 'पौरुषेयमि'त्यनेनैव वाक्यालाभात्पृथक्तदुपादानमुपपन्नमिति द्रष्टव्यम् । तेन पौरुषेयपदेनैव वाक्यलाभात्पुनर्वाक्यपदमनर्थकमिति चोद्यानवकाशः । 'पौरुषेय'पदविवरणरूपत्वात् 'वाक्य'पदस्यं न वैयर्थ्यमित्याहुः ।

कुण्डल०— वाक्यत्वावच्छिन्नेति । शुद्धसाध्यव्यापकताभावेऽपि पक्षधर्मावच्छिन्नसाध्यव्यापकत्वेनेत्यर्थः । **साधनावच्छिन्नेति** । अपौरुषेये वेदे अनुकूलवक्त्रादिमत्त्वरूपसाधनस्याभावेन तदनवच्छिन्नस्य प्रमाणत्वरूपसाध्यस्यापि तत्राभावेनोपाधेस्तत्रासत्त्वेन साध्यव्यापकताहानिरिति भावः ।

विद्व०— उक्तहेतुसिद्धमिति। गुरुर्गुरूणामित्याद्युक्तहेतुसिद्ध इत्यर्थः। **तदभावादिति।** साध्यस्योपाधिसंबन्धाभावादित्यर्थः। **साधनावच्छिन्न इति।** यत्रानुकूलवक्त्रादिमत्वे सति प्रामाण्यं तत्राप्तवाक्यत्वमित्यादिरूपेण व्याप्तिसद्भावादिति भावः।

चषकः— पौरुषेयवाक्यत्वावच्छिन्न इति। 'वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादि'त्यादौ बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकोद्भूतरूपवत्त्वस्येव पक्षधर्मावच्छिन्नव्यापकस्य वोदासीनधर्मावच्छिन्नव्यापकस्य वोपाधित्वसंभवादिति हृदयम्॥

काशी०— आप्तिरित्यादेस्तु का सङ्गतिरित्यतस्तत्सङ्गमनाय तदभावे वक्त्राद्यानुकूल्येन साक्षात्प्रामाण्यसाधने मूलाभिप्रायप्रतीतिमूलामाशङ्कां दर्शयति **नन्विति। उक्तेति।** गुरुरित्यादिनेत्यादिः। **तत्र** प्रामाण्ये। **उपाधित्वात्** प्रामाण्यव्यापकत्वे सति वक्त्राद्यानुकूल्याव्यापकत्वादित्यर्थः। तथा चोपाध्यभावे न प्रतिपक्षसंभवान्न प्रामाण्यानुमानमिति भावः। उपाधिपदानुसारेणायमिति पुल्लिङ्गता। शुद्धसाध्यव्यापकत्वाभावेऽपि पक्षधर्मावच्छिन्नसाध्यव्यापकत्वेनोपाधितामाह **वाक्यत्वावच्छिन्नेति।** एकाश्रयतया वाक्यत्वविशिष्टेत्यर्थः। न चैवमवच्छिन्नसाध्यव्यापकोपाध्यभावेन शुद्धसाध्याभावानुमानायोगान्न प्रतिपक्षसंभव इति वाच्यम्। वाक्यत्वाद्यवच्छिन्नसाध्याभावानुमानेऽपि विशेषणवति विशिष्टाभावस्य विशेष्याभावपर्यवसायित्वेन प्रतिपक्षध्रौव्यात्। शङ्कते **तथाऽपीति।** वाक्यत्वावच्छिन्नप्रामाण्यवतीति शेषः। तार्किकमतेनाह **वेदेति। साधनावच्छिन्न इति।** अनुकूलवक्त्रादिमत्त्वविशिष्टे इत्यर्थः। पक्षधर्मावच्छिन्नसाध्येऽप्युपाधित्वं संभवतीत्याह **पौरुषेयेति।** यद्यप्याप्तवाक्यत्वं पक्षे सन्दिग्धं तथाऽपि तस्य सन्दिग्धोपाधित्वं दुर्वारमिति भावः। शङ्कोक्ताभिप्रायमपोह्य आप्तिरित्यादिमूललब्धाभिप्रायाविष्कारेण समादधानो मूलमवतारयति **मैवमिति। वक्त्राद्यानुकूल्येन** अनुकूलवक्त्रादिमत्त्वेन। **व्याप्तत्वादिति।** वक्ष्यमाणानुकूलतर्केण सिद्धव्याप्तिकत्वादित्यर्थः। **तया** इत्यस्य तस्याः प्रामाण्येन व्याप्तत्वादित्यादिः। एतेनाद्यानुमाने प्रामाण्यं द्वितीयानुमाने चानुकूलवक्त्रादिमत्त्वप्रमाणवाच्यत्वादिकं वोपाधिरित्यपास्तम्। उभयत्र हेतोः साध्यव्याप्तिसिद्धावुपाधेः साधनव्यापकव्यापकत्वेन साधनव्यापकत्वावश्यंभावात्।

गूढ०— गुरूणां गुरुत्वादिना वक्त्राद्यानुकूल्यस्य तेन आप्तवाक्यत्वस्य साधनं तेन पुनः प्रामाण्यसाधनमितीदमित्यर्थः। ननूत्तरपद्ये वक्त्राद्यानुकूल्यस्य आप्तवाक्यत्वेन सह व्याप्तिकथनमयुक्तम्। प्रामाण्यसाधने तत्कथनस्यासंमतत्वात्। किञ्चानुकूल्यस्य वक्तृनिष्ठत्वेन प्रामाण्यस्य च सूत्रनिष्ठत्वेन वैयधिकरण्यात्कथमनुमानम्। वक्त्राद्यानुकूल्यहेतुत्वेऽनुमानप्रकारश्च कथमित्यतस्तन्निवर्त्याशङ्कां दर्शयति **नन्विति।** व्याचिख्यासिततया तद्बुद्धिसन्निहितत्वादेतदित्युक्तम्। गुरुगुरुत्वादिहेतुसिद्धमित्यर्थः। ननु वेदापौरुषेयत्वस्य श्रुतिर्वाव नित्येत्यादिसिद्धत्वात् कथमसङ्गतमित्यत आह **संमतत्वे वेति। अभिप्रायानवगमादिति।** ननु साध्यव्यापकत्वे सति साधनाव्यापकत्वमित्युपाधिलक्षणे साध्यस्य शुद्धसाध्यपरत्वेनावच्छिन्नसाध्यव्यापकत्वमादायोपाध्युद्भावनतत्परिहारावयुक्तौ। न चावच्छिन्नसाध्यव्यापकत्वपरमेव विवक्षितमिति वाच्यम्। तथा सति शुद्धसाध्यव्यापकोपाध्यव्याप्तेः।

अवच्छिन्नपक्षे पक्षधर्मावच्छिन्नपरत्वविवक्षायां साधनधर्मावच्छिन्नसाध्यव्यापके अव्याप्तिः । साधनधर्मावच्छिन्नपरत्वविवक्षणे पक्षधर्मावच्छिन्ने तत्रातिव्याप्तिः । तस्मादयुक्तमेतदिति चेत् । अत्र वक्तव्यम् । साध्यपदस्यावच्छिन्नानवच्छिन्नसाधारणस्य साधनमात्रपरत्वाभ्युपगमेन कुत्राप्यव्याप्तेरभावात् । शङ्कापरिहारयोरसङ्गतत्वाभावात् । न च पर्वतेतरत्वे अतिव्याप्तिरिति वाच्यम् । हेतुसाध्ययोर्व्याप्तिग्राहकानुकूलतर्कसद्भावेन हेतोः साध्यव्यापकत्वस्य निर्णीतत्वेन साध्यव्याप्यहेत्वव्यापकत्वेनोपाधेः पर्वतेतरत्वस्य साध्यव्यापकत्वस्य पक्ष एव वक्तुं सुकरत्वेनातिव्याप्त्यभावात् । एवं च चिन्तामणिकारीयं पूर्वपक्षे साध्यव्यापकत्वे सति साधनाव्यापकत्वं वा उपाधित्वं साध्यसमव्यापकत्वे सति साधनाव्यापकत्वं वा पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वं वा साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वं वा पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वं वेति लक्षणपञ्चकमनूद्य आद्ये लक्षणे साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तिं पर्वतेतरत्वे अतिव्याप्तिं दत्वा पर्वतेतरत्वे अतिव्याप्तिपरिहारार्थं व्यतिरेके व्यर्थविशेषणशून्यत्वरूपविशेषणेन विशेषितत्वात् । वस्तुगत्या यः साध्यव्यापकः पक्षे तत्र उपाधिरिति विवक्षितत्वात् । विपक्षाव्यावर्तकविशेषणशून्यत्वस्य विवक्षितत्वाद्वा अनुमानमात्रोच्छेदकतया जातित्वाद्वा तदन्यत्वरूपप्रकारान्तराद्वा सत्प्रतिपक्षोन्नायकत्वादिरूपदूषकतावीजाभावाद्वा न तस्योपाधित्वमिति प्रकारषट्कमाशङ्क्य आद्ये बाधोन्नीतस्याप्यनुपाधितापत्तेरित्युक्त्या द्वितीये पक्षातिरिक्तसाध्यव्यापकताग्रहादुपाधेर्दूषकत्वम् । तच्च तत्राप्यस्तीत्युक्त्या तृतीये सिद्धसिद्धिव्याघातोक्त्या चतुर्थपञ्चमयोर्दूषणसमर्थत्वोक्त्या षष्ठः बाधोन्नीतोऽपि पक्षेतरो नोपाधिः स्यादित्युक्त्या निरस्य द्वितीयलक्षणे विषमव्याप्ते अव्याप्तिं प्रदाय तस्यानुपाधित्वे साध्यप्रयोजको धर्मः उपाधिः यद्धर्मोऽन्यत्र प्रतिबिंबते स उपाधिः यदभावो व्यभिचारविरोधी स उपाधिरिति प्रकारत्रयमाशङ्क्य आद्ये दूषणौपयिकप्रयोजकत्वस्य विवक्षितत्वात् । तस्य च विषमव्याप्तेऽपि सत्त्वादित्युक्त्या द्वितीये विषमव्याप्ते दूषकतावीजसद्भावात् शास्त्रे उपाधिपदप्रयोगाच्चेत्युक्त्या तृतीये साध्यव्यापकव्याप्यत्वस्याव्यभिचारे गौरवेणातन्त्रत्वोक्त्या निरस्य तृतीयलक्षणे साधनावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तिं दत्वा शब्दोऽभिधेयः प्रमेयत्वादित्यत्र पक्षधर्मगुणत्वावच्छिन्नसाध्यव्यापकस्याश्रावणत्वमप्युपाधिः स्यात् । इत्युक्त्या दूषयित्वा चतुर्थे लक्षणे पक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तिं दत्वा जलं प्रमेयं रसवत्त्वादित्यत्र रसावच्छिन्नसाध्यव्यापकपृथिवीत्वस्य उपाधित्वं स्यादित्युक्त्या च निराकृत्य पञ्चमलक्षणे पर्यवसितस्य पक्षधर्मतावललभ्यमर्थमुपादाय द्व्यणुकं नानित्यद्रव्यसमवेतं जन्यमहत्त्वानधिकरणद्रव्यत्वादित्यत्र निस्पर्शद्रव्यसमवेतत्वमुपाधिः स्यादित्यतिव्याप्तिं दत्वा किञ्च पक्षधर्मतावललभ्यं साध्यं सिद्धमसिद्धं वेत्यादिना दूषयित्वा सिद्धान्ते यद्व्यभिचारित्वेन यस्य साध्यव्यभिचारित्वं स तत्रोपाधिरिति लक्ष्यतावच्छेदकमभिधाय पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वमिति लक्षणमुक्त्वा पर्यवसितेत्यस्य यद्धर्मावच्छेदेन साध्यं प्रसिद्धं तदवच्छिन्नं साध्यं पर्यवसितमिति तदर्थमभिधाय साध्यप्रसिद्धयवच्छेदकधर्मस्य यावत्त्वं विवक्षितं यत्किञ्चित्त्वं वेति विकल्प्य आद्ये वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वमुपाधिः न स्यादिति दूषणमभिधाय द्वितीये धूमेऽपि महानसत्वावच्छेदेन प्रसिद्धवह्निव्यापकव्यञ्जनवत्त्वादेरुपाधित्वं स्यादिति दूषणमभिधाय तस्मादयुक्तमेतदित्याशङ्क्य तत्परिहारार्थं साधनव्यापकीभूतयत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमिति

विवक्षितस्य प्रमेयत्वेन वायोर्बहिरिन्द्रियप्रत्यक्षत्वसाधनद्रव्यत्वावच्छिन्नबहिरिन्द्रियप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वं मित्रापुष्टत्वेन मित्रातनये श्यामत्वसाधने शाकपाकजत्वं च नोपाधिः स्यात् । न च तयोरनुपाधित्वम् । शुद्धसाध्यव्यभिचारोन्नायकत्वस्य दूषकताबीजस्य सत्त्वे तयोरनुपाधित्वस्य वक्तुमशक्यत्वादिति दूषणं दत्वा पुनर्यद्धर्मावच्छेदेनेत्यत्र साधनवतीति शेषः । तेन यद्धर्मावच्छेदेन साधनवति साध्यं प्रसिद्धं तदवच्छिन्नं साध्यं पर्यवसितमिति विवक्षिते वायुः प्रत्यक्षो वायुत्वादित्यत्रोद्भूतरूपादावव्याप्तिमभिधाय दूषिते पुनरपि तद्धर्मावच्छेदेन साध्यव्यापकत्वे सति तद्धर्मावच्छिन्नसाधनाव्यापकत्वं यत्र साधनाव्यापकत्वे तद्वृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं वा स्वानधिकरणीभूतसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं वेति शङ्कितलक्षणत्रयस्य घटः पृथिवी द्रव्यत्वादित्यत्र घटान्यत्वावच्छिन्नपृथिवीत्वव्यापके पक्ष एव साधनाव्यापके घटावृत्तिगुणवत्त्वे उपाधावव्याप्तेरयुक्तमित्युक्त्याऽतिदूषिते पुनरपि सिद्धान्तितस्य पर्यवसितसाध्यव्यापकत्वे सति साध्यसमानाधिकरणत्वे सति साध्यव्यभिचारिसाधनाव्यापकत्वमित्यस्य दूषकताबीजातिरिक्तस्य बहुकुसृष्टियुक्तस्य गुरुभूतस्य कल्पनं निरस्तं भवति । उक्तरीत्या लघुभूतेन सकलसङ्ग्राहकेण दूषकताबीजरूपेणोपपत्तौ उक्तकल्पनस्यायुक्तत्वादिति दिक् । तेन अनुकूलवक्त्रादिमत्त्वेन । ताम् आप्तवाक्यताम् । तया आप्तवाक्यतया ।

प्रदीपः— ननु तर्हि इत्यादि । यत्र प्रामाण्यं तत्राप्तवाक्यत्वं यथा भारतादौ यत्रानुकूलवक्त्रादिमत्त्वं न तत्राप्तवाक्यत्वं पक्षे व्यभिचारात् ब्रह्मसूत्राणां आप्तवाक्यत्वे मानाभावात् क्वचिदाप्तस्य सर्वत्र अनुकूलवक्तृत्वे नियमाभावादिति । साधनावच्छिन्न इति । अनुकूलवक्त्रादिवद्वाक्यत्वविशिष्ट इत्यर्थः । ननु साध्यस्योपाधिव्यभिचारपरिहाराय कथं साधनाद्यवच्छिन्ने साध्ये उपाधिप्रसरः कथं च साध्यविशेषणानां व्यभिचारवारकत्वादिति । मैवम् । शब्दो न स्पर्शवद्विशेषगुण इत्यादौ साध्यविशेषणानां व्यभिचारनिवारकत्वदर्शनात् । साधनाद्यवच्छिन्ने साध्ये उपाधिप्रसरमुपपादयिष्यति मैवमित्यादि । सत्यम् । आप्तवाक्यत्वं पौरुषेयेषु वाक्येषु प्रामाण्यप्रयोजकम् ।

५७ सु०— यत् यत्र वाक्ये, वक्तृश्रोतृप्रसक्तीनामनुकूलता तत्राप्तिः । यद्वक्त्राद्यानुकूल्योपेतं तदाप्तवाक्यमिति यावत् । यत एवं व्याप्तिर्यतश्चास्य शास्त्रस्यास्त्यनुकूलवक्त्रादिमत्त्वम् तेन सिद्धया आप्तवाक्यतया मानमिदं शास्त्रमिति पूर्वेण संबन्धः ।

परि०— तत्राप्तिरित्ययुक्तम् । आप्तेः पुंगतत्वादित्यतः सामानाधिकरण्याय फलितार्थमाह **यद्वक्त्रादीति** । यदित्यस्य पञ्चम्यन्ताव्ययत्वं आवृत्तिं आप्तिरित्यस्य व्याप्तिरिति चार्थमुपेत्याप्तवाक्यतया तेनेत्यन्तस्य योजनान्तरमाह **यत एवमिति** । वक्तृश्रोतृप्रसक्तीनामनुकूलतेत्यत्रारभ्येति शेषमुपेत्य फलितार्थमाह **अस्येत्यादि** ॥

गु०दी०— **तेन सिद्धया आप्तवाक्यतया मानमिदं शास्त्रमिति पूर्वेण संबन्ध** इति वदता तदुदितमित्यत्रोक्तमानत्वं वक्ष्यमाणया आप्तवाक्यतयैव सिद्धचति । आप्तवाक्यत्वं वक्त्राद्यानुकूल्येन सिद्धचति ।

वक्त्राद्यानुकूल्यं तु बादरायणेन ब्रह्मादीन् प्रति तन्मोक्षाय यतस्तद्ब्रह्ममीमांसाशास्त्रमुदितम्, अतः सिद्धचतीति समग्रवाक्ययोजनिका सूचिता । प्रथमहेतौ यद्विवक्षितार्थतत्त्वज्ञानवता स्वप्रियान् प्रति तत्प्रयोजनाय कथितं तद्वक्त्राद्यानुकूल्यवत् यथा लौकिकवाक्यमिति सामान्यव्याप्तिरनुसन्धेया। अतो न वक्ष्यमाणप्रमाणत्रित्वभङ्गः। नापि प्राथमिकानुमानद्वयवैयर्थ्यम् परम्परयोपयोगित्वात्। अतो न कश्चित् क्षुद्रोपद्रवः।

यादु०— आप्तेः पुरुषगताया वाक्यनिष्ठत्वाभावाद्वक्ष्यमाणानुमानायोग इत्यतोऽभिप्रायमाह **यद्वक्त्रानुकूल्योपेतमिति**।

आनन्दः— नन्वत्र यदनुकूलता सा आप्तिरिति वक्त्राद्यानुकूल्यस्याप्तवाक्यत्वस्य च ऐक्यं प्रतीयते तदयुक्तम् । तथा सति तयोरभेदेन तेन तां प्रसाध्येत्युक्तव्याप्यव्यापकभावायोगात् । आप्तवाक्यतया तेनेत्यत्र तच्छब्दस्य यच्छब्दप्रकृतार्थपरामर्शकत्वेन यच्छब्देन च वाक्यस्योक्तत्वात्तेन वाक्येनेत्यर्थः स्यात् । एवं च तेन वाक्येनाप्तवाक्यतयेत्यनयोः सामानाधिकरण्येन वा अन्वयः वैयधिकरण्येन वा । नाद्यः । न हि वाक्यमाप्तवाक्यता येन सामानाधिकरण्येनान्वयः स्यात् । द्वितीये तेन वाक्येन सिद्धयाऽऽप्तवाक्यतयेति वक्तव्यम् । तदप्ययुक्तम् । आप्तवाक्यतायाः हेत्वन्तरेण साधितत्वेन वाक्येनासाधनादित्यतो व्याख्याति **यद्यत्रेति** । नन्वानुकूल्यस्याप्तेश्च वक्तृनिष्ठत्वात् कथं वाक्यनिष्ठत्वमुच्यत इत्यत आह **यदिति** । नन्वनुकूलवक्त्रादिमत्त्वेनाप्तवाक्यत्वं प्रसाध्य तेन प्रामाण्यं साध्यत इत्युक्तम् । तदयुक्तम् । वक्त्राद्यानुकूल्यमात्रेणाप्तवाक्यत्वसाधनोपपत्त्या शेषवैयर्थ्यात् । किञ्चानुकूलवक्त्रादिमत्वमित्यत्र मतुपोक्तस्य संबन्धस्य संयोगरूपत्वं समवायरूपत्वं चासंभवि, द्रव्ययोरेव संयोगस्य गुणगुणिनोरेव समवायस्वीकारेण प्रकृते तयोरसंभवेन मतुबुक्तसंबन्धस्यैव वक्तुमशक्यत्वेन हेतोरसिद्धत्वात् ।

श्रीनिधि०— वैयधिकरण्यनिरासायाह **यद्वक्त्रानुकूल्योपेतमिति**।

वा०चं०— ननु 'वक्तृश्रोतृप्रसक्तीनामि'ति श्लोके वक्त्राद्यानुकूल्यस्याप्ताऽभेदोक्तावपि व्याप्तेरनभिहितत्वात् पक्षधर्मतां विना तावन्मात्रस्य साधनत्वानुपयोगाच्च, मानमित्यस्याश्रुतत्वाच्चापि, 'तर्ही'त्यादिनोक्तमयुक्तमित्यतो यदित्यस्य यत्रेत्यर्थतां, तत्सन्निधियोगेन तत्रेत्यस्य लाभं, यदित्यस्यावृत्त्या यत इत्यर्थकत्वम् अस्येति योग्यतया संबन्धं, वक्तृश्रोतृप्रसक्तीनामित्यस्यावृत्तिं तेनेत्येतद्बलेन सिद्धचा इत्यस्य लाभं, पूर्वेण संबन्धं च अभिप्रेत्योक्तमुपपादयति **यद्यत्रेत्यादि** ।

वा०र०— **इति श्लोक इति**। पूर्वपादत्रय इत्यर्थः।

विठ्ठ०— वैयधिकरण्यशङ्कापरिहाराय **यद्वक्त्राद्यानुकूल्योपेतमिति**।

चषकः— **यद्वक्त्रेति** । आप्तेस्तदानुकूल्यत्रिकव्यधिकरणत्वेऽपि तद्वत्प्रणीतत्वस्य न तद्व्यधिकरणेति भावः।

काशी०— यत् यस्माद्वक्तृश्रोतृप्रसक्तीनामनुकूलताप्तिरिति व्याख्यायाः प्रकृतानुपयोगस्य वक्ष्यमाणत्वात्प्रकृतव्याप्तिप्रदर्शनपरतया व्याचष्टे **यद्यत्रेति** । वक्त्राद्यानुकूल्यस्याप्तेश्च पुरुषनिष्ठत्वात्कथं वाक्यनिष्ठत्वमित्याशङ्क्य वक्त्रादिद्वारा वाक्यनिष्ठत्वमत्र विवक्षितमित्याशयेन फलितमाह **यदिति** । **तेनेत्यनेन** परामृश्यं दर्शयति **यत इति** । हेत्वर्थकतृतीयालब्धमर्थमाह **तेन सिद्धयेति** । साध्यनिर्देशाभावान्न्यूनतेत्याशङ्क्य निराह **मानमिति** । तथा च यतो बादरायणो गुरूणां गुरुः शास्त्राणां प्रभवश्च यतश्चाजादिभ्यस्तदर्थतस्तदुदितमिदं शास्त्रमतोऽत्र वक्तृश्रोतृप्रसक्तीनामनुकूलता यतश्च यत्र वक्तृश्रोतृप्रसक्तीनामनुकूलता तत्राप्तिस्तेन तादृशव्याप्तिपक्षधर्मतावद्वक्त्रानुकूल्योपेतत्वसिद्धयेति यावत् ।

गूढ०— नन्वत्र यदनुकूलता सा आप्तिरिति वक्त्राद्यानुकूल्यस्य आप्तवाक्यत्वस्य च ऐक्यं प्रतीयते । तदयुक्तम् । तथा सति तयोरभेदेन तेन तां प्रसाध्येत्युक्तव्याप्यव्यापकभावायोगात् । आप्तवाक्यतया तेनेत्यत्र तच्छब्दस्य यच्छब्दप्रकृतार्थपरामर्शकत्वेन यच्छब्देन च वाक्यस्योक्तत्वात् तेन वाक्येनेत्यर्थः स्यात् । एवं च तेन वाक्येन आप्तवाक्यतयेत्यनयोः सामानाधिकरण्येन वान्वयः । वैयधिकरण्येन वा । नाद्यः । न हि वाक्यमाप्तवाक्यता येन सामानाधिकरण्येनान्वयः स्यात् । द्वितीये तेन वाक्येन सिद्धया आप्तवाक्यतयेति वक्तव्यम् । तदयुक्तम् । आप्तवाक्यतायाः हेत्वन्तरेण साधितत्वेन वाक्येनासाधनादित्यतो व्याख्याति **यद्यत्रेति** । नन्वानुकूल्यस्य आप्तेश्च वक्तृनिष्ठत्वात् कथं वाक्यनिष्ठत्वमुच्यत इत्यत आह **यदिति** । नन्वनुकूलवक्त्रादिमत्त्वेनाप्तवाक्यत्वं प्रसाध्य तेन प्रामाण्यं प्रसाध्यत इत्युक्तम् । तदयुक्तम् । वक्त्रानुकूल्यमात्रेणाप्तवाक्यत्वसाधनोपपत्त्या शेषवैयर्थ्यात् । किञ्चानुकूलवक्त्रादिमत्वमित्यत्र मतुना उक्तस्य संबन्धस्य संयोगरूपत्वं समवायरूपत्वं चासंभवि द्रव्ययोरेव संयोगस्य गुणगुणिनोरेव समवायस्य स्वीकारेण प्रकृते तयोरसंभवेन मतुबुक्तसंबन्धस्यैव वक्तुमशक्यत्वेन हेतोरसिद्धत्वात् ।

५८ सु०— एतदुक्तं भवति । विमतम् आप्तवाक्यम् अनुकूलेन वक्त्राऽनुकूलान् श्रोतॄन् प्रति तदीयहितसाधनबोधायोपदिष्टत्वात् संप्रतिपन्नवत् । विमतं प्रमाणम् आप्तवाक्यत्वात् संप्रतिपन्नवदिति । वक्तुरानुकूल्याभावाद् जैनाद्यनाप्तवाक्यम् । श्रोत्रानुकूल्यविरहाद् बौद्धादि । प्रसङ्गानुकूलतावैधुर्यात् नर्मादि ।

परि०— विमतमिति । व्रह्मतन्त्रम् । आद्यप्रयोगे हेतुविशेषणकृत्यान्याह **वक्तुरिति** । बौद्धादीत्यत्र नर्मादीत्यत्र चानाप्तवाक्यमित्यनुषङ्गः । नर्मादौ अनृतोक्तावप्यदोषात् । 'न नर्मयुक्तमनृतं हिनस्ति न स्त्रीषु राजन्न विवाहकाले । प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानी'ति भारतोक्तेरिति भावः ।

यादु०— आप्तवाक्यत्वसाधकहेतुविशेषणानां क्रमेण व्यवच्छेद्यानिदर्शयति **वक्तुरित्यादिना** ।

आनन्दः— अपि चानुकूलवक्त्रादिमत्वस्याप्तवाक्यत्वे हेतुत्वं तस्य च प्रामाण्यहेतुत्वं चेत् तत्रानुमानप्रकारः कथं इत्यत आह **एतदुक्तं भवतीति**। तथा चोपदिष्टत्वादित्युक्तत्वान्मतुबुक्तसंबन्ध उपदेश्योपदेशकभाव एवेति भावः। विशेषणवैयर्थ्यं परिहर्तुं क्रमेण व्यावर्त्यान्याह **वक्तुरिति**। नन्वर्जुनादीन्प्रति कृष्णेनोपहासादिनोक्तेऽनुकूलेन वक्त्रानुकूलान् श्रोतॄन्प्रति उपदिष्टत्वसत्त्वेऽपि आप्तवाक्यत्वाभावस्यासिद्धिव्यभिचारौ इत्याशङ्क्य तदीयेति विशेषणस्य कृत्यमाह **प्रसङ्गेति**।

कं०रा०— **वक्तुरिति**। वक्तुर्जिनादेर्विवक्षितार्थतत्त्वज्ञानाभावेन तत्प्रणीतं शास्त्रमनाप्तवाक्यमित्यर्थः। अनेनानुकूलेन वक्त्रेति हेतुगतविशेषणस्य व्यावर्त्यमुक्तं भवति। **श्रोत्रानुकूल्येति**। बौद्धागमस्थले वक्तुर्बुद्धस्य भगवदवतारत्वेन विवक्षितार्थतत्त्वज्ञानादिमत्त्वरूपवक्त्रानुकूल्यसत्त्वेऽपि श्रोतॄणामसुरप्रकृतिकत्वेन तत्त्वज्ञानायोग्यतया श्रोत्रानुकूल्यविरहाद्बौद्धादिशास्त्रमनाप्तवाक्यमित्यर्थः। **अनेनानुकूलान् श्रोतॄन्प्रतीति** विशेषणस्य व्यावर्त्यमुक्तं भवति। **प्रसङ्गेति**। श्रोतृप्रयोजनोद्देशरूपप्रसङ्गानुकूल्यविरहान्नर्मादिपरिहासादिवाक्यमनाप्तवाक्यमिति संबन्धः। अनेन तदीयहितसाधनबोधायेति विशेषणस्य व्यावर्त्यमुक्तं भवति।

श्रीनिधि०— **नर्मादीति**। परिहासादीत्यर्थः।

वा०चं०— एवं च सिद्धमनुमानप्रयोगं दर्शयितुमाह **एतदुक्तं भवतीति** ॥ प्रथमहेतौ विशेषणत्रयव्यवच्छेद्यानि दर्शयति **वक्तुरित्यादिना**।

वा०र०— **प्रयोगमिति**। प्रयोगद्वयमित्यर्थः। **प्रथमहेताविति**। अनुकूलेन वक्त्रेत्यादिहेताविवत्यर्थः। **वक्तुरानुकूल्याभावादिति** मूलम्। जैनादिवाक्ये श्रोतॄणां तत्त्वज्ञानयोग्यतया वक्तृप्रेमास्पदतया वानुकूल्यसद्भावात् श्रोत्रभिमतमोक्षोद्देश्यकतया प्रसङ्गानुकूल्यस्यापि सत्त्वेन तत्र व्यभिचारवारणायानुकूलेन वक्त्रेति प्रथमविशेषणमुपात्तम्। जैनस्य तु विवक्षितार्थतत्त्वज्ञानादिरूपवक्त्रानुकूल्याभावात्तद्वाक्येन व्यभिचारः। बौद्धागमेऽपि वक्त्रानुकूल्यप्रसङ्गानुकूल्ययोः सद्भावेनानुकूलेन वक्त्रा श्रोतृहितसाधनबोधायोपदिष्टत्वसत्त्वेऽपि वास्तवतत्त्वज्ञानयोग्यत्वस्य मोहनविषयश्रोतृष्वसंभवेन श्रोत्रानुकूल्याभावान्न तत्र व्यभिचारः। यद्यपि वास्तवतत्त्वज्ञानयोग्यतयैव जैनादेरपि व्यवच्छेदः। वास्तवविवक्षितार्थतत्त्वज्ञानस्याप्यन्यथा विवक्षा न स्यात्। तथाच यथा बौद्धागमे वास्तवतत्त्वज्ञानादिमान् वक्ता। तादृशतत्त्वज्ञानायोग्यश्च श्रोतेति श्रोत्रानुकूल्याभाव इति कल्प्यते। तथा जैनाद्यागमेऽपि। तथाच न विशेषणव्यावृत्तिः। व्यवस्था संभवतीत्याभाति। तथाप्यत्र जैनागमे वक्तृश्रोत्रोरुभयोरप्याननुकूलत्वेऽपि पुरस्फूर्तिकतया वक्त्रनानुकूल्यमनाप्तवाक्यता यत्रोच्यते। यथा वक्ष्यमाणपूर्वपक्षदशायां विषयशून्यत्वादित्यादिनोभयाभाववत्त्वेऽपि एकाभावस्य विशिष्य प्रतिपादनादिकमित्याहुः। वस्तुतस्तु जैनागमीयश्रोतुर्न वास्तवतत्त्वज्ञानायोग्यत्वम्। कल्पकाभावात्। किन्तु वक्तैव वास्तवविवक्षितार्थज्ञानादिशून्यत्वादनुकूलेभ्योऽपि श्रोतृभ्यः लोके दुष्टविप्रलम्भकवत् स्वमतिपरिकल्पितमुपदिशतीत्येतावन्मात्रेण तेषां तत्त्वज्ञानाभावः। बौद्धागमे तु वक्ता वास्तवज्ञानादिमतापि दुष्टजनमोहनायैवोपदेशकरणेन वास्तवतत्त्वज्ञानायोग्यतयैव तेषां तत्तत्त्व-

ज्ञानाभावः । इत्येवं श्रोतृवक्त्रानुकूल्ययोरभावः प्रत्येकमेव उपपादयितुमशक्यः । लोके हि व्याख्यातृशिष्ययोर्यत्र व्याख्याता परमकुशलः शिष्यश्च बहुधोपदेशेऽपि जन्यबोधानधिकरणं तत्र व्याख्यातृवैगुण्यं नाभिधीयते किन्तु शिष्यवैगुण्यमेव । एवमयं महता प्रयत्नेनोपदिशति तथापि काष्ठलोष्ठायितोऽयं शिष्यो न किमपि जानाति इति । यत्र पुनः शिष्यो बुद्धिमान् अल्पप्रमेयकथने स्वाभ्यासादिसामर्थ्येन विशदतत्प्रमेयावगमं संपादयति । गुरुश्च पूर्वोत्तरपरामर्शतद्विवक्षितार्थतत्त्वज्ञानशून्यतया विनेयोपयुक्तप्रमेयोपदेशे समर्थो न भवति तत्र स्थले यद्यस्य विनेयस्य महानुपदेष्टा स्यात्तदासौ परमपण्डितः स्यादिति गुरुवैगुण्यमेवाभिधीयते न विनेयवैगुण्यम् । न हि गुरोरन्यथाभावमात्रेण विनेयस्तत्त्वज्ञानयोग्य एव न भवतीति व्यवह्रियते । एवमेव बौद्धागमे श्रोतुस्तत्त्वज्ञानायोग्यत्वेऽपि जैनाद्यागमे श्रोतुस्तत्त्वज्ञानयोग्यतास्तीत्यङ्गीकारोपपत्तेः श्रोत्रानुकूल्येन जैनादिव्यावृत्त्युपपत्त्या युक्ता विशेषणव्यावृत्तिव्यवस्थे-त्यलम् ।

स०व्र०— आप्तवाक्यत्वसाधकहेतुविशेषणानां व्यवच्छेद्यानि दर्शयति **वक्तुरिति** । उपदिष्टत्वमात्रस्य जैनादिवाक्ये सत्यपि, 'अनुकूलेन वक्त्रोपदिष्ट'त्वाभावान्न व्यभिचार इति भावः । 'अनुकूलान् श्रोतॄन्प्रति तदीयहितसाधनबोधायोक्तत्वादि'त्येवोक्ते प्रह्लादं प्रति शण्डामर्कवचने व्यभिचारस्तन्निवृत्त्यर्थमनुकूलेन वक्त्रेति । 'दुर्योधनादीन्प्रति हितैषिपितृवाक्ये' विशिष्टस्य हेतोर्व्यभिचारवारणाय, 'अनुकूलानि'ति श्रोतृविशेषणमिति द्रष्टव्यम् ।

कुण्डल०— अनुकूलवक्त्रादिमत्वादिना आप्तवाक्यत्वादिसाधनप्रकारं प्रयुज्य दर्शयति **एतदुक्तं भवती-त्यादिना** । आप्तवाक्यत्वादिसाध्यकहेतुगतस्य विशेषणत्रयस्य क्रमाज्जैनबौद्धागमनर्मवाक्येषु आप्तवाक्यत्वरहितेषु व्यभिचारपरिहारः प्रयोजनमिति दर्शयति **वक्तुरित्यादिना** । **आनुकूल्याभावादिति** । विवक्षितार्थतत्त्वज्ञाना-भावादित्यर्थः । **श्रोत्रानुकूल्यविरहादिति** । श्रोतॄणां तत्त्वज्ञानायोग्यत्वादित्यर्थः । **प्रसङ्गानुकूल्यतावैधुर्यादिति** । नर्मशब्दितपरिहासादिवाक्येषु श्रोतृहितबोधनायोपदिष्टत्वलक्षणप्रसङ्गानुकूलतावैधुर्यादित्यर्थः ।

विट्ठ०— आद्यहेतौ विशेषणत्रयव्यवच्छेद्यानि दर्शयति **वक्तुरित्यादिना** ।

चषकः— आप्तवाक्यतासाधनदशायां हेतुतावच्छेदकघटकतद्विशेषणानां मतभेदनियन्त्रितनिग्रहासिद्धि-प्रसञ्जनव्युदसनायानैकान्त्यनिरसनफलितां दर्शयति **वक्तुरित्यादि** ।

काशी०— आप्तवाक्यतया मानमिदं शास्त्रमिति मूलयोजनेति भावः । एवं चेत्थमनुमानप्रयोग इत्याह **एतदुक्तं भवतीति** । अनुकूलेनेत्यादेर्विवक्षितार्थतत्त्वज्ञानादिमता प्रीतिविषयतत्त्वज्ञानयोग्यगततदीयहितसाधन-बोधोद्देशेनोपदिष्टत्वादिति निष्कृष्टार्थः । अत्र विशेषणानां क्रमेण व्यावृत्तिमाह **वक्तुरित्यादि** । जैनादीत्यादिना करणापाटवादिमूलकवाक्यपरिग्रहः । बौद्धादीत्यादावप्यनाप्तवाक्यमित्यनुषज्यते । तथा चाविशिष्टहेतुमति जैनादि-शास्त्रे आप्तवाक्यत्वाभावेन व्यभिचारवारणाय विशेषणोपादानमिति भावः । ननु तत्त्वज्ञानयोग्यतारूपश्रोत्रानुकूल्या-भावादेव जैनादिवारणसंभवान्न तत्र वक्त्रानुकूल्यव्यावृत्तिसंभवः । न च वाक्यार्थतत्त्वज्ञानयोग्यतैव श्रोत्रानुकूल्यं न तु ब्रह्मतत्त्वज्ञानयोग्यता । सा च जैनादिश्रोतृसाधारणीति वाच्यम् । जैनादिवाक्यार्थस्य मिथ्यात्वेन तद्विषय-

तत्त्वज्ञानस्यैवाप्रसिद्धेः । एवं बौद्धादेरपि जगदसत्त्वादिरूपविवक्षितार्थविषयकतत्त्वज्ञानाप्रसिद्धया वक्त्रानुकूल्य-विरहादेव व्यावृत्तेर्न तत्र श्रोत्रानुकूल्यस्य व्यावृत्तिसंभवः । न च जगदसत्त्वाद्यसत्त्वज्ञानस्य जगदसत्त्वादिरूपविव-क्षितार्थविषयकतत्त्वज्ञानरूपस्य बुद्धादिसाधारणत्वान्न वक्त्रानुकूल्येन बौद्धादिव्यावृत्तिरिति वाच्यम् । वक्त्राद्यानु-कूल्यमूलकत्वस्यैवासिद्धमूलकत्वरूपनिष्कृष्टसाध्यसाधकत्वेन हेतूकर्तव्यत्वात्तस्य जगदसत्त्वादिप्रतिपादकशास्त्रे जगदसत्त्वाद्यसत्त्वज्ञानमूलकत्वायोगेनानुपपत्तेः । यद्यपि बौद्धस्यार्थान्तरे वक्त्राद्यानुकूल्यमूलत्वमस्ति । तथाऽपि तत्रासिद्धमूलत्वमप्यस्त्येव । यत्र तु नासिद्धमूलत्वं न तत्र वक्त्रानुकूल्यमूलत्वमिति न व्यभिचाराप्रसक्तिः । एवं बौद्धादेर्योग्यमोहार्थत्वेन श्रोतृहितसाधनबोधोद्देशरूपप्रसङ्गानुकूल्याभावादपि व्यावृत्तिः । एवं नर्मादावनृतवाक्ये विवक्षितार्थतत्त्वज्ञानाप्रसिद्धया वक्तृश्रोत्रानुकूल्याभावादेव व्यभिचारानवकाशान्न प्रसङ्गानुकूल्यस्यापि व्यावृत्तिसंभव इति चेदत्र ब्रूमः । श्रोत्रानुकूल्ये तत्त्वज्ञानपदेन यथाविवक्षितार्थज्ञानमेव विवक्षितं न तु ज्ञानयाथार्थ्यमपि । प्रयोजनाभावात् । जैनादौ च यथाविवक्षितार्थज्ञानयोग्यतारूपश्रोत्रानुकूल्यसत्त्वेन व्यभिचाराद्वक्त्रानुकूल्यव्यावृत्ति-सङ्गतिः । न चैवं बौद्धादौ श्रोत्रानुकूल्यव्यावृत्त्यसङ्गतिः । जगदसत्त्वादिरूपविवक्षितार्थज्ञानयोग्यतारूपश्रोत्रानुकूल्यस्य तत्राक्षतत्वादिति वाच्यम् । तत्सत्त्वेऽपि वक्तुर्प्रीतिविषयत्वाभावात् । न चैवं तत्त्वज्ञानयोग्यतानिवेशनवैयर्थ्यम् । बौद्धादीत्यादिपदग्राह्यस्य वक्तुर्प्रीतिविषयाव्युत्पन्नपुरुषं प्रति प्रणीताप्रमाणवाक्यव्यावृत्त्यर्थत्वात् । योग्यतायाश्च पदवाक्यव्युत्पत्त्यादिकारणकलापरूपत्वेन तद्व्यावृत्तेः । एवं वक्त्रानुकूल्ये विवक्षितार्थतत्त्वज्ञानपदेन तद्विषयक-भ्रान्तिराहित्यमेव विवक्षितम् । अत एवास्तु वक्त्राद्यानुकूल्यं वक्तुर्विप्रलिप्सामूलत्वेनाप्रामाण्यं च भवत्वित्यादिशङ्का सङ्गच्छते । अन्यथा विप्रलिप्सामूलकवाक्यस्यानृतत्वेन विवक्षितार्थतत्त्वज्ञानाप्रसिद्धया तद्घटितवक्त्राद्यानुकूल्य-स्यैवाभावेन तदसङ्गतेः । एवं प्रसङ्गानुकूल्ये तदीयहितशब्देन पुरुषार्थत्वेन तत्तदभिमतार्थो विवक्षितः । एवं च विवक्षितार्थविषयकभ्रान्तिराहित्यस्य तत्तदभिमतपुरुषार्थसाधनबोधोद्देशस्य च बुद्धादिसाधारणत्वाद्बौद्धादौ वक्तृ-प्रसङ्गानुकूल्यसत्त्वाच्छ्रोत्रानुकूल्यव्यावृत्त्युपपत्तिः । न च सिद्धान्ते शून्यापत्त्यादेरनुपगमेन तत्साधनबोधोद्देशः कथं भगवतो बुद्धस्य संभवतीति वाच्यम् । स्वमतसिद्धस्वभावस्थितेरेव शून्यापत्तित्वादिना तत्तदभिमतत्वात् । शून्यभावनादेश्च तत्साधनत्वोपगमात् । एवं च नर्मादावुक्तरीत्या वक्तृश्रोत्रानुकूल्यसंभवात्प्रसङ्गानुकूल्यव्यावृत्तेरपि सङ्गतिः । एवमासिशरीरेऽपि विवक्षितार्थभ्रान्तिराहित्यमेव विवक्षितम् । अत एवाविप्रलिप्सानिवेशनमनर्थवत् । अन्यथा विप्रलम्भकवाक्यस्याप्यनृतत्वेन विवक्षितार्थतत्त्वज्ञानाप्रसिद्धयैव तद्वारणे तद्वैयर्थ्यापत्तेः । न चैवमुन्मत्तादा-वतिप्रसङ्गः । अर्थानां मिथः संसर्गबोधेच्छारूपविवक्षाविरहादित्यवधेयम् । अत्र च वक्तुरानुकूल्याभावादित्यादिना वक्त्राद्यानुकूल्याभावस्यासवाक्यत्वाभावप्रयोजकत्वोक्त्या विपक्षे तदनुपपत्तिरूपबाधकतर्कः सूचितः । अन्यथा वक्त्राद्यानुकूल्येन जैनादिव्यावृत्तिरित्यवक्ष्यत् ।

गूढ०— अपि चानुकूलवक्त्रादिमत्त्वस्यासवाक्यत्वे हेतुत्वं तस्य च प्रामाण्ये हेतुत्वं चेत्तत्रानुमानप्रकारः कथमित्यत आह **एतदुक्तं भवतीति** । तथाचोपदिष्टत्वादित्युक्तत्वान्मतुबुक्तसंबन्ध उपदेश्योपदेशकभाव एवेति भावः । विशेषणवैयर्थ्यं परिहर्तुं क्रमेण व्यावर्त्यान्याह **वक्तुरित्यादि** । नन्वर्जुनादीन् प्रति कृष्णेनोपहासादिनोक्ते

अनुकूलेन वक्त्रा अनुकूलान् श्रोतॄन् प्रति उपदिष्टत्वेऽप्याप्तवाक्यत्वाभावस्यासिद्धिव्यभिचारौ इत्याशङ्क्य तदीयेति विशेषणस्य कृत्यमाह प्रसङ्गेति।

प्रदीपः— अस्माभिरप्यनुकूलवक्त्रादिमत्त्वेनाप्तवाक्यत्वमेव साध्यते न प्रामाण्यं तत्रोपाधेः साध्यावैशिष्ट्यमिति आप्तवाक्यत्वसाधकहेतोर्विशेषणानां व्यवच्छेद्यानि दर्शयति वक्तुरिति।

आप्तिस्वरूपम्—

५९ सु०— ननु कोऽयम् आप्तो नाम यद्वाक्यत्वं साध्यते ॥ यथादृष्टार्थवादीति चेन्न। भ्रान्तिदृष्टार्थवादिन्यपि प्रसङ्गात् ॥ प्रमाणदृष्टेति विशेषणेऽपि प्रमाणदृष्टस्य प्रमादादिना अन्यथाकथके अपि प्रसङ्गात् ॥ प्रमाणेन यथा दृष्टं तथा वादीति चेन्न। एकदेशे तथाभूतवादित्वेऽप्यंशान्तरेऽतथाभूतवादिन्यपि प्रसङ्गात् ॥ यावत्प्रमाणदृष्टं तावतो वक्तेति चेन्न। प्रायेणातथाभूतत्वादेव लक्ष्याणां तदव्याप्तेः। न हि केनापि यावत्प्रमाणप्रमितं तावदभिधीयते ॥ यावत्प्रमाणदृष्टं तावत एव वक्तेति चेन्न। अज्ञातसन्दिग्धानुवादवाक्यप्रयोक्तुरनाप्तत्वप्रसङ्गात्। भीमाग्रजस्य अपि कदाचिच्चाटुवादित्वसंभवेन अनाप्तत्वापत्तेश्च।

परि०— विमतमाप्तवाक्यमित्यादिप्रागुक्तप्रयोगे हेतुसाध्ययोर्व्याप्तिं एवं च वक्तुरित्यादिना व्युत्पादयितुं मैवमित्यादिनैवं चेत्यन्तेनात्र विवक्षिताप्तत्वं समर्थयमान आप्तत्वमाक्षिपति ननु कोऽयमित्यादिना मैवमित्यन्तेन ॥ अज्ञातेति। अज्ञातसन्दिग्धार्थकवाक्यानुवादरूपवाक्ययोः प्रयोक्तुरित्यर्थः। तत्राज्ञानादिविषयस्यापि वक्तृत्वेन प्रमाणदृष्टस्यैव वक्तृत्वाभावादिति भावः ॥

यादु०— आप्तवाक्यतासाधकाऽनुमाने अप्रयोजकताशङ्कापरिहाराय अनुकूलतर्कं वक्तुम् आप्तस्वरूपं निर्धारयितुम् आह ननु कोऽयमाप्त इति ॥ तावत एव वक्तेति। प्रमाणदृष्टस्यैव वक्तेत्यर्थः ॥ अज्ञातसन्दिग्धेति। अनुवादकर्त्रा यत्प्रमेयं स्वेन न ज्ञातं सन्दिग्धं वा, तत्प्रतिपादकं यद्वाक्यं, तदनुवादस्तावत्क्रियते। तस्य च आप्तत्वं वादविषयं सुप्रसिद्धम्। न हि स प्रमितं वादमेव वदति। तदवच्छेदकतयाऽज्ञातस्य सन्दिग्धस्य वा विषयस्यापि वचनात्। अतो लक्षणस्य तत्राव्याप्तिरित्यर्थः ॥ केचित्तु अज्ञाते सन्दिग्धेऽनुवादे च यद्वाक्यं तत्प्रयोक्तुराप्तत्वं न स्यादित्यर्थ इत्याहुः ॥ भीमाग्रजस्यापीति। धर्मराजत्वात्प्रमितवक्तृतया प्रसिद्धस्यापीत्यर्थः। कदाचिद् द्रोणवधसमये नर्मादिसमये वा ॥ चाटुवादित्वसंभवेनेति। अप्रमितवादित्वसंभवेनेत्यर्थः ॥

वं०प०— तावतो वक्तेति। तावतः सर्वस्य वक्तेत्यर्थः ॥

आनन्दः— विवक्षितार्थतत्त्वज्ञानं करणपाटवं विवक्षाऽविप्रलिप्सा चेति चतुष्टयमाप्तिस्तद्वानाप्त इति आप्तलक्षणं वक्तुं लक्षणान्तराणि दूषयितुं शङ्कते नन्विति। यथादृष्टार्थवादीति। येन प्रकारेणार्थो दृष्टस्तेन प्रकारेण

तदर्थप्रतिपादकवाक्यप्रयोक्तेत्यर्थः । ननु प्रमाणदृष्टार्थवादीति विशेषणान्नातिप्रसङ्ग इत्यत आह **प्रमाणेति** । **तथाभूतवादित्वेऽपीति** । प्रमाणेन यथा दृष्टं तथावादित्वेऽपीत्यर्थः । **तावत एवेति** । प्रमाणदृष्टमेव वदति । न तु तददृष्टं स एवाप्त इत्यर्थः । **अज्ञातेति** । अज्ञातसन्दिग्धार्थविषयवाक्ये एकेन प्रयुक्ते तदनुवादरूप-वाक्यप्रयोक्तुरन्यस्याप्तत्वं न स्यादित्यर्थः ।

कं०रा०— अज्ञातेति । अज्ञातसन्दिग्धयोः प्रमाणदृष्टत्वाभावेन तदनुवादवाक्यप्रयोक्तरि यावत्प्रमाणदृष्टं तावत एव वक्तेत्याप्तलक्षणाभावेन तस्यानाप्तत्वप्रसङ्गादित्यर्थः ।

श्रीनिधि०— प्रमाणदृष्टस्य प्रमादादिनेति । यथादृष्टेतिस्थाने प्रमाणदृष्टेति विशेषणप्रक्षेपे इदं दूषणं तदव्यामेरिति । तस्य लक्षणत्वाभिमतस्य तेषु लक्ष्येषु लक्ष्ये वा अव्याप्तेरित्यर्थः । **अज्ञातसन्दिग्धेति** । अज्ञातसन्दिग्धविषयं यदनुवादवाक्यं तत्प्रयोक्तुरित्यर्थः । अज्ञातसन्दिग्धयोः अज्ञानसन्देहविषयत्वेन प्रमाणदृष्टत्वा-भावादिति भावः ।

वा०चं०— नन्वस्तु वक्त्राद्यानुकूल्यं, माऽस्तु चाप्तवाक्यत्वं, विपक्षे बाधकाभावादप्रयोजको हेतुरित्यतो व्याप्तिमप्यं विपक्षे बाधकम् 'एवं चे'त्यादिना वक्तुं विवक्षितार्थतत्त्वज्ञानाविप्रलिप्साकरणपाटवविवक्षाणाम् 'आप्ति'-शब्दार्थत्वं व्यवस्थापयन् द्वितीयानुमाने 'नन्वाप्ते'त्यादिना शङ्कित्स्यमाणव्यभिचारपरिहाराय 'यो यत्रे'त्यंश-स्याप्तिशब्दार्थान्तर्गततां च व्यवस्थापयन् खण्डनोक्ताप्तिलक्षणदूषणमनुवदति **ननु कोऽयमिति** । लोके प्रायशो यथादृष्टार्थवाद्यादिष्वाप्तत्वव्यवहारादेषां पक्षाणां प्रसक्तिरिति द्रष्टव्यम् ॥ यथादृष्टार्थवादित्वमाप्तत्वं विवक्षितं 'प्रमाणदृष्टार्थवादित्वं', 'प्रमाणेन यथा दृष्टं तथा वादित्वं' वा । अत्र प्रथमे दृष्टानतिक्रममात्रं वादे विवक्षितं, दर्शनप्रामाण्ये त्वौदासीन्यम्, द्वितीये विपरीतं, तृतीये तूभयं विवक्षितमिति द्रष्टव्यम् ॥ तत्राद्यमुत्थाप्य तथात्वे देहात्मनोर्भ्रान्त्यैकत्वं प्रतिपद्य देह एवात्मेति व्यवहरतोऽप्याप्तत्वं स्यादित्याह **भ्रान्तीति** ॥ द्वितीयमुत्थाप्य, तथा सति प्रमाणेन इन्द्रियाणां प्राकृतत्वं प्रतिपद्य प्रमादादिना 'भौतिकानीन्द्रियाणी'ति वादिनः सार्वज्ञस्याप्तत्वं स्यादित्याह **प्रमाणेति** ॥ तृतीयेऽपि 'यथा प्रमाणे'तिविशेषणद्वयस्यैव विवक्षा, 'यावदि'त्यपि वा विवक्षितम् । नाद्यः । 'ग्रावाणः प्लवन्त' इति वादिनोऽपि 'ग्रावाण' इत्यंशे तथाभूतवादित्वात् 'प्लवन्त' इत्यंशे चातथाभूतवादित्वात् आप्तत्वापत्तिरित्याह **एकदेश इति** ॥ द्वितीयेऽपि 'यावदि'त्यवधारणं कात्स्न्यर्थम् उतान्ययोगव्यवच्छेदार्थम् । नाद्यः । आप्तत्वेनाभिमतानां, प्रमाणदृष्टस्य कात्स्न्येनावकृत्वात् अव्याप्तिरित्याह **प्रायेणेति** । असंभवे प्रसञ्जनीयेऽव्याप्तिः कुतः प्रसज्यत इत्यतः प्रायेणेत्युक्तम् । तदेवोपपादयति **न हीति** ॥ **केनापीति** । अस्मत्परिचितेनेत्यर्थः ॥ द्वितीयमुत्थापयति **यावदिति** । भ्रान्तिदृष्टवादिनि लोके अनाप्तव्यवहारेऽप्यज्ञातवाक्यप्रयोक्तरि, सन्दिग्धवाक्यप्रयोक्तरि अनुवादवाक्यप्रयोक्तरि च लोकेऽनाप्तत्वव्यव-हारभावेन, तेषामपि लक्ष्यत्वात् तत्र च लक्षणाभावेन अव्याप्तिः स्यादित्याह **अज्ञातेति** ॥ **भीमाग्रजस्य अपीति** ॥ प्रतिपक्षसेनानिविष्टानामप्याप्तत्वेन संमतस्य युधिष्ठिरस्य कदाचिदनृतवादित्वदर्शनेन तत्रापि अव्याप्तिरित्यर्थः ।

वा०र०— अप्रयोजको हेतुरित्यत इति । विमतमाप्तवाक्यमित्येतदनुमानीयानुकूलेन वक्त्रेत्यादि-हेतुरित्यर्थः । **एवं चेत्यादिनेति** । एवं च वक्तुरानुकूल्यमात्रैकदेश एवेत्यादिनेत्यर्थः । **नन्वाप्तेत्यादिनेति** ।

न चाप्तवाक्यता स्वकर्णोक्त्येत्यादिनेत्यर्थः । यो यत्रेत्यस्येति । अनेन विशिष्टाभिलक्षणे यो यत्रेत्यंशं विहाय विवक्षितार्थतत्त्वज्ञानविप्रलिप्सेत्युक्ताननिरूपणं प्रथमानुमानीयाप्रयोजकतानिरासोपयोगीत्युक्तोऽशस्तु द्वितीयानुमानीयव्यभिचारनिरासायाप्यन्तर्गततया निरूपितः । पूर्वानुमाने तत्प्रयोजनाभावादिति सूचितं भवति । वक्ष्यति च प्रयोजनस्य प्रथमेति । यद्यपि प्रथमानुमान इव द्वितीयानुमानेऽप्यप्रयोजकताशङ्कानिरासकाबोधकमित्यायुत्तरग्रन्थानुसारेण तदनुमानेऽप्यप्रयोजकताशङ्कामुत्थाप्य तत्राबोधकेत्यादिना बोधकं च वक्तुमित्यपि पूर्वमेव वक्तुमुचिततया प्राप्नोति । तथापि प्रथमानुमाननिष्कर्षेणैवाकारणकार्योत्पत्तिरूपं द्वितीयानुमानीयाप्रयोजकताशङ्कानिरासकमुपपादितप्रायं भवतीति नाभिपदार्थस्य तावतः कथनं उत्तरानुमानीयाप्रयोजकताशङ्कानिरासेऽपि व्यापारितम् । अत एवाबोधकत्वमित्येतदवतारे द्वितीयानुमानेऽप्रयोजकत्वेत्यादि वक्ष्यति । खण्डनोक्तामीति । आप्तवाक्यं शब्द इति शब्दलक्षणदूषणाय प्रवृत्तेन खण्डनकृता कोऽयमाप्तो नामेत्यादिना आप्तिलक्षणदूषणस्य कृतत्वादिति भावः । अत्र च खण्डनग्रहणं कोऽयमाप्तो नामेत्यादिना कृतं तद्दूषणं मूलीकृत्य शब्दप्रमाणलक्षणं खण्डयता तत्त्वप्रदीपिकाकारेणापि कश्चायमाप्तो नामेत्यादिरूपेण दूषणकरणेनात्रार्थे तस्य स्वातन्त्र्याभावाभिप्रायेण तत्त्वयं वाक्यविन्यासो यथाश्रुतः खण्डनगतः । तत्त्वप्रदीपिकायामेव खण्डनानुवादरूपेणैवंविधवाक्यविन्यासस्तत्त्वात् । अज्ञातसन्दिग्धानुवादेत्युत्तरखण्डस्य खण्डनेऽभावात् । अत्रैव सत्त्वेन तद्वत्तस्यापि ग्राह्यत्वाच्च । तथा च खण्डनपदस्योपलक्षणतया खण्डनाद्युक्तेत्यर्थ इत्यवधेयम् । व्यवस्थापयन्ननुवदतीति । अनुवादरूपक्रियाफलभूतं व्यवस्थापनमनुवादहेतुरिति लक्षणहेत्वोः क्रियाया इत्यनेन हेतौ ल्रटः शत्रादेशो समानाधिकरणरूपम् । अर्जुनस्य वासफलतया हेतुग्रहणस्य फलकारणोभयार्थतायां व्याख्यानानुसारेण वासक्रियाफलभूतार्जुनस्य वासहेतुत्वेनार्जयन् वसतीति समानाधिकरणं शत्रन्तरूपं यथेति ज्ञेयम् । आप्तस्य स्वातन्त्र्येणेहानुपक्रान्तत्वात्तल्लक्षणप्रश्नो न सङ्गत इत्यत उक्तं यद्वाक्यत्वमिति मूलम् । अनेनैव प्रतिलक्षणं यो वक्ति स आप्तस्तद्वाक्यमाप्तवाक्यतया प्रमाणं स्यादिति शेषपूरणेनातिव्याप्तियोजनं विद्यासागरीयं व्यर्थमिति सूचितम् । संभावितासंभावितभेदेनैते पक्षा आशङ्क्य निराक्रियन्ते । यथा मिथ्यात्वनिर्वचनावसरेऽसत्त्वाशङ्कादिकमिति न भ्रमितव्यम् । अपि सर्वेषामपि संभावितमेव । प्रायेण लोकानामेवंरूपेष्टे वाप्तव्यवहारदर्शनादित्याह लोक इति । अत्र मूले यथादृष्टार्थवादित्वं वा निर्दोषत्वं चेति विकल्पद्वयाभिप्रायेण कोऽयमिति किंशब्द इत्यभिप्रेत्य दृष्टिगर्भप्रथमकल्पेऽपि प्राथमिकपक्षत्रयेऽवान्तरविशेषाप्रतीतेरुक्तं दर्शयति यथादृष्टार्थेत्यादिना । दृष्टानतिक्रमेति । दृष्टमनतिक्रम्य वादो विवक्षितः तद्दर्शनं प्रमाणमप्रमाणं वा विशिष्य न विवक्षितम् । प्रथमपक्ष इत्यर्थः । द्वितीये विपरीतमिति । प्रमाणभूतमेव दर्शनं विवक्षितम् । वादस्तु दृष्टानतिक्रमेणापीति दृष्टान्तान् विक्रमेण वा तदिति क्रमेण वेति विशिष्टा न विवक्षितं द्वितीये पक्ष इत्यर्थः । तृतीये त्विति । दृष्टान्तानतिक्रमो दर्शनप्रामाण्यं चेत्युभयं विवक्षितं तृतीये पक्ष इत्यर्थः । आद्यमिति । येन प्रकारेणार्थो दृष्टस्तेन प्रकारेण तदर्थप्रतिपादकवाक्यप्रयोक्तृत्वरूपयथादृष्टार्थवादित्वमाप्तत्वमित्याद्यं पक्षमित्यर्थः । अत्र च स्वयं प्रकारान्तरेण विज्ञाय तदन्यप्रकारेण वाक्यप्रयोक्तृविप्रलम्भकनिरासाय यथादृष्टम् । देहात्मनोरैक्यं भ्रान्त्येति विद्यासागर्यनुसारेणाह देहात्मनोरित्यादि । ग्रन्थमात्रोपलक्षणं चेदम् । देह एवात्मेतीत्यपि तत्तद्भ्रमविषयोपलक्षणम् । विशेषणद्वयस्येति । न तु यावदित्यस्यापीत्येवकारार्थः । 'यावत्तरो मघवन्यावदोजः' इति ऋग्भाष्यटीकायामपि

यावदवधारण इति स्मरणादित्युक्तं मनसि कृत्वाह **यावदित्यवधारणमिति** । अवधारणमियत्तापरिच्छेदस्तत्रार्थे वर्तमानं यावदित्यव्ययमित्यर्थः । यावद्दत्तं तावद्भुक्तं नावधारयामि किं मया भुक्तमित्यवधारणार्थत्वाभावः । यावन्ति पञ्च षड् वा आमन्त्राणि तावतो ब्राह्मणानामन्त्रयस्वेत्यर्थकयावदामन्त्रणं ब्राह्मणानामन्त्रस्वेत्युदाहरणे तु अवधारणस्य गम्यमानत्वाद्यावदवधारण इत्यनेन समासः । तथा च यावदित्यस्य साकल्यावधिमानावधारणरूपार्थकचतुष्टय-मध्येऽवधारणपदेनेयत्तापरिच्छेदमात्रप्रतिपादनेऽपि तत्परिच्छेद एव न्यूनाधिक्यप्रसक्तिवारणाय अमन्त्रसंख्यातो न्यूनसंख्यारहितामिति तदधिकसंख्यारहितानि च विवरणाद्यावदित्यस्यावधारणार्थत्वेऽपि विवक्षावशेन कृत्स्नमन्त्र-संख्याकानिति । अमन्त्रसंख्यानधिकसंख्यानिति च बोधानुसारेण कार्त्स्न्यान्ययोगव्यवच्छेदरूपार्थद्वयवदेवकारादि-समानार्थत्वात्प्रकृतेऽपि यावदित्यस्यावधारणार्थत्वपक्षेऽपि पक्षद्वयप्रसक्तिरिति युक्त एव कार्त्स्न्यार्थमित्यादि विकल्पः । तेन साकल्यस्य पृथगर्थत्वादन्ययोगव्यवच्छेदस्य चार्थतया प्रसक्तेरेवाभावादवधारणत्वपक्षे विकल्पायोग इति शङ्कानवकाशः । यावदित्यवधारणे वर्तमानमिति तूक्तमेव । अवधारणपदेनात्रैवकारार्थो गृह्यते । अव्ययाना-मनेकार्थत्वाद्यावदर्थत्वाद्यावदित्येतदेवकाराद्यर्थे वर्तमानकार्त्स्न्यार्थमित्यादि योज्यमित्यप्याहुः । यद्वेयत्ताव्यव-च्छेदस्योक्तरीत्या साकल्यान्ययोगव्यवच्छेदरूपद्वयवत्तामनाश्रित्य पृथग्गणितसाकल्यातिरिक्तान्ययोगव्यवच्छेदरूप एवेयत्तापरिच्छेद इत्याश्रित्य यावदमन्त्रमित्यादावपि यावत्कार्यं तावत्कृतमित्यत्रेव साकल्यबोधमनाश्रित्य यावन्त्यमत्राणि तावतो ब्राह्मणान्नत्वधिकानिति बोधस्य प्रसिद्धतां चाश्रित्य प्रवृत्तेऽत्र यावदवधारणमित्यस्य बुद्ध्या विवेकेन यावदिति कार्त्स्न्यार्थमुतावधारणरूपमन्ययोगव्यवच्छेदमिति विकल्पार्थः । यद्यप्येकदेशे तथाभूतेति दूषणपरिहारोऽन्ययोगव्यवच्छेदार्थकत्वाङ्गीकारेण प्रमितस्यैवेति विवक्षयैव स्वरसतो भवति । कार्त्स्न्यार्थत्वे तु विषयान्तरं प्रतीयते इति तदाशङ्कनायोगः । तथापि स्वारसिकपक्षमेव परिशेषयितुं यावत्पदस्यार्थान्तरासंभव-प्रतिपादनाय पक्षान्तराशङ्कनतन्निराकरण इत्याशयेन मूलप्रवृत्ते न कश्चिद्दोष इति ज्ञेयम् । **तदेवेति** । प्रायः लक्ष्याणामतथाभूतत्वमेवेत्यर्थः । प्रायःपदमनुसृत्य व्याख्याति **अस्मदिति** । अपरिचितेन तु तथा वचनेऽपि न दोषः । अव्याप्तेरेव विवक्षितत्वादिति स्पष्टम् । इष्टापत्तिपरिहाराय लक्ष्यत्वमुपपादयन्नव्याप्तिप्रतिपादनपरतयोत्तर-वाक्यमवतारयति **भ्रान्तिदृष्टेति** । विषयस्यार्थविषयकवाक्यप्रयोक्तुस्त्वनाप्ततायाः सिद्धत्वात् तत्राव्याप्तिर्नायातीति तत्परित्यागेनाज्ञानादिप्रयोक्तुरेव ग्रहणं मूल इति सूचयितुं भ्रान्तीत्यादिव्यवहारेऽपीत्यन्तम् । सन्दिग्धवाक्य-प्रयोक्तरीत्यादि वदता अज्ञातं च सन्दिग्धं च अनुवादश्चेति द्वन्द्वान्ते श्रूयमाणं वाक्यपदं प्रत्येकमभिसंबध्यत इति सूचितं भवति । अज्ञातसन्दिग्धार्थविषयकवाक्ययोरनुवादरूपवाक्यस्य च प्रमाणदृष्टार्थविषयकत्वाभावेन तत्प्रयोक्तरि लक्षणाभावादिति भावः । विशिष्टमेकमेवोदाहरणमिति केषाञ्चिद्व्याख्यानं तु अनुवादस्य वादविषयत्वेनेत्युत्तर-मूलानुसारेण प्रत्येकपक्षस्यैव स्पष्टत्वेन स्वयमज्ञातस्य सन्दिग्धस्य वा प्रतिपादकं यद्वाक्यं तद्वत् विपर्यस्तस्य प्रतिपादकं यद्वाक्यं तदप्यनूद्यत इति । विपर्यस्तस्यापि ग्रहणापातेऽपि न लाघवेनाप्रतीतानुवादवाक्येत्येव वक्तव्यतापाते न चायुक्तमित्यादिना वाक्यार्थविनोदे गुरुचरणैरेव निराकृतं ज्ञेयम् । **प्रतिपक्षसेनेति** । संमतस्येत्यन्तेनापिपदार्थमाह चाटुवादित्वेत्येतदनृतवादित्वेति विवृतम् । संभवेनेत्युक्ते सन्दिग्धाव्याप्तिरिति प्रतीतिः स्यात्तद्वारणाय दर्शनेनेति विवृतम् । भारते तथास्मरणाद्दर्शनं सिद्धमिति भावः । भारते स्मर्यत इति विद्यासागर्यामुक्तेः । यद्यपि द्रोणवधसमये

अश्वत्थामा हत इत्येव न प्रयोगः । अपि तु नरः कुञ्जरो वेत्यपि । तथा च नानृतवादिता तस्य प्राप्नोति । तथापि कोट्यन्तरस्योक्तरूपांशुवचनाबानृतवादित्वं तस्येति ज्ञेयम् । वस्तुतस्तु भगवदाज्ञया प्रवृत्तस्यानृतवचनं परमधर्मत्वानुसन्धाने नास्ति इति न दोषः ।

स०च०— ननु कोऽयमिति । अत्र 'किं यथार्थदृष्टार्थवादीति, निर्दोषो वेति किंशब्दार्थः ॥ आद्यमाशङ्क्ते यथेति ॥ 'किं यथाशब्दो वदिक्रियाविशेषणं वाऽर्थविशेषणं वेति विकल्प्य आद्यं दूषयति नैकेति । द्वितीयमुत्थाप्य दूषयति यावदिति । अत्र यावत्तावच्छब्दाभ्यामवधारणं प्रतीयते तत्किमयोगव्यवच्छेदार्थम् अन्ययोगव्यवच्छेदार्थं वा । आद्ये ज्ञातमात्रस्यानुसन्धानाभावान्किञ्चित्प्रमाणप्रतिपन्नं तथावदतो नाप्तत्वमित्यव्याप्तिरित्युक्तम् । द्वितीयमुत्थाप्याऽव्याप्त्या दूषयति यावदिति । अज्ञाते सन्दिग्धेऽनुवादे च यद्वाक्यं तत्प्रयोक्तुराप्तत्वं न स्यादित्यर्थः । द्वितीयं शङ्क्ते निर्दोष इति । किमाप्तत्वं सर्वत्रैकप्रेक्षाहारित्वदनेकान्याप्तत्वादि ।

कु०च०— भ्रान्तिरहेति । पुरोवृत्तिशुक्तिकाशकलं रूप्यत्वेन भ्रान्त्वा तत्र इदं रूप्यमिति वाक्प्रयोक्तेत्यर्थः । एकदेश इति । भ्रमस्थले धर्म्यंशे तथाभूतवादित्वेऽपि प्रकारांशे अन्यथाभूतवादित्वप्रसङ्गादित्यर्थः । यद्वा एकदेशो एकस्मिन् देशविशेषे प्रमाणेन यथा दृष्टं तथाभूतार्थवादित्वेऽपि देशान्तरे अन्यस्मिन् देशे अन्यथावादित्वलक्षणसद्भावादतिप्रसङ्ग इत्यर्थः । यावत्प्रमाणदृष्टमिति । तथाच देशान्तरे अन्यथावादिनि यावत्प्रमाणदृष्टार्थवादित्वान्नातिप्रसङ्ग इति भावः । प्रमाणेन यावदर्थज्ञानं विषयीकृतं तावदर्थवक्तृत्वलक्षणस्याप्तत्वस्य सर्वज्ञकल्पेषु संभवेऽप्याधुनिकेष्वयोगादव्याप्तिरित्याह प्रमाणेति । ननु प्रमाणप्रमितयावदर्थवक्तृत्वं न लक्षणम् । येनाव्याप्तिः स्यात् किन्तु प्रमाणेन दृष्टस्यैवार्थस्य वक्तृत्वमतो नाव्याप्तिरित्याशंक्य निरस्यति यावत्प्रमाणदृष्टं तावत एव वक्तेति । अत्र यावत्तावच्छब्दौ यच्छब्दतच्छब्दपर्यायौ । तथा चायमर्थः । यत्प्रमाणेन दृष्टं तस्यैव वक्तेति । अज्ञातसन्दिग्धेति । अज्ञातसन्दिग्धयोः वस्तुनोः प्रमाणदृष्टत्वाभावेन तदनुवादवाक्यप्रयोक्तुः पुरोवादविषये आप्तवाक्यत्वात् । केचित्तु अज्ञाते सन्दिग्धे अनुवादे च यद्वाक्यत्वं तत्प्रयोक्तुः आप्तत्वं न स्यादित्यर्थ इत्याहुः । भीमाग्रजस्यापीति । युधिष्ठिरस्यापीत्यर्थः ।

वि०— आद्यानुमानेऽप्रयोजकशङ्क्या पक्षे साध्यव्यभिचारसंभवेन सन्दिग्धव्याप्तिकत्वदोषपरिहाराय अनुकूलतर्कं वक्तुं तावदाप्तस्वरूपं निर्धारयति कोऽयमाप्तो नामेत्यादिना । अत्र विकल्पान् मनसि निधाय क्रमेणानूद्य दूषयति यथादृष्टेत्यादिना । प्रमाणदृष्टेति विशेषणेऽपि इत्यत्र पूर्वोत्तरयेत्यंशापरित्यागेनेति द्रष्टव्यम् । मुक्तचतुर्मुखादिः मुक्तचतुर्मुखाद्यन्तरं प्रति यत्प्रमाणप्रमितं तावत्सर्वं वदतीति तत्रैतल्लक्षणसंभवात् प्रायेणेत्युक्तम् । लक्ष्यवाणाम् आप्तानाम् । अन्यथाभूतत्वमुपपादयति न हि केनापीति । मुक्तचतुर्मुखाद्यतिरेकेण केनापीत्यर्थः । अन्यथा व्याप्युक्त्यनुपपत्तेरिति द्रष्टव्यम् । अज्ञातसन्दिग्धेति । जन्यादावनुवादकर्ता अज्ञातं सन्दिग्धं वा यत्प्रमेयं तत्प्रतिपादकं वादिवाक्यमनुवदति प्रतिवादी तस्य चाप्तत्वं वादविषये सुप्रसिद्धम् । तथाच अज्ञातसन्दिग्धयोः प्रमाणदृष्टत्वाभावात् तदनुवादकस्य प्रतिवादिनः प्रमाणदृष्टस्य वक्तृत्वाभावेनानाप्तत्वप्रसङ्गादित्यर्थः । भीमाग्रज-

स्यापीति । केवलं सत्यवादित्वेन शत्रुप्रविष्टद्रोणादेः संमतस्य युधिष्ठिरस्य कदाचिन्नर्मादौ चाटुत्वे वादित्वस्य न नर्मयुक्तमनृतं हिनस्तीत्यायुक्तन्यायेन संभवादिति भावः ।

चषकः— तदानुकूल्यत्रिकघटितहेतुना आप्तवाक्यतासाधने अप्रयोजकताशङ्कानिरसनौपयिकानुकूलतर्कमभिधित्समान आप्तिस्वरूपं निर्णिनीषुः आशङ्कते **ननु कोऽयमिति** । यथादृष्टार्थवादित्वं, प्रमाणदृष्टार्थवादित्वं, प्रमाणेन यथा दृष्टं तथा वादित्वं, निर्दोषत्वं वा तदिति कल्पचतुष्टयी निराचिकीर्षिता । प्रमाभ्रमोभयसाधारणदर्शनत्वावच्छिन्ननिरूपकताकविषयतापन्नावगमकशब्दाप्रयोक्तृत्वे सति तादृग्विषयतापन्नावगमकशब्दप्रयोक्तृत्वमाद्यं निर्गलितम् । प्रमाणजनितप्रतीतिविषयतापन्नगोचरावगतिहेतुभूतशब्दप्रणेतृत्वं द्वितीयम् । प्रमाणजनितप्रतीतिविषयतानापन्नावगतिहेतुभूतशब्दाप्रयुञ्जानत्वे सति तदापन्नावगतिहेतुभूततत्प्रयुञ्जानत्वं तृतीयम् । तृतीयेऽप्युत्तरदलनिविष्टतादृग्विषयतापन्ने कतिपयत्वं, साकल्यं वा, तावतो वक्तेत्यत्र सावधारणत्वं वेति कल्पत्रयी प्रत्याचिख्यासिता । तुर्यं च विषयानुपहितसामान्यधर्मावच्छिन्नाभावः, तदुपहितधर्मावच्छिन्नाभावो वेति कल्पद्वयी तादृशीति अभिप्रेत्य क्रमेण प्रतिविधत्ते **अव्याप्तेरित्यन्तेन** । **भ्रान्तिदृष्टार्थेति** । भ्रान्तिविषयीकृतेत्यर्थः । तथाच 'इदं रजतमि'त्युपदेष्टुर्यतिप्रसङ्ग इति भावः । **अन्यथाकथक इति** । प्रमाणजन्यप्रमितिविशेष्यावृत्तिधर्मोपरागेण तादृशविशेष्यप्रतीतेरपि तथाविधत्वादिति भावः । **तृतीयकल्पे प्रमाणदृष्टे कतिपयत्वं** विशेषणमभिप्रेत्याह **एकदेशेति** । साकल्यं तद्विशेषणमित्यभिसन्धाय अभिधत्ते **प्रायेणेत्यादि** ॥ 'तावत एव वक्ते'ति सावधारणत्वाश्रयणेन आशङ्कते **यावदिति** ॥ **अज्ञातेत्यादि** । अज्ञातसन्दिग्धशब्दौ मत्वर्थीयाजन्तौ आढ्यमिदं नगरमिति यथा । अज्ञाताद्यर्थकावित्यर्थः । तादृशयोर्यदनुवादरूपवाक्यं तत्प्रयोक्तुरित्यर्थः । कृतद्वन्द्वानुवादान्तेन प्रकृतैकशेषवाक्यपदस्य कर्मधार्य इत्यपि स्थितम् ॥ **भीमाग्रजस्यापीति** । प्रतीपसैनिकानामपि प्रमितमात्रवक्तृत्वोपरक्तानुमितिविषय्यत्वेत्यर्थः । **चाटुवादित्वम्** अप्रमितवक्तृत्वम् ।

काशी०— नन्वाप्तत्वस्वरूपेऽवधृत एव वक्त्राद्यानुकूल्याभावस्याप्तवाक्यत्वाभावप्रयोजकत्वावधारणादुक्तानुकूलतर्कणानुमानोपपत्तेः स्यात्तदेव दुरवधारणमित्याशङ्कते **नन्विति** । **आप्तः** आप्तपदार्थः । तद्विचारस्याप्रकृतत्वशङ्कावारणायोक्तमयमिति प्रकृत इत्यर्थः । **प्रकृतत्वमुपपादयति यद्वाक्यत्वमिति** । साध्यते प्रामाण्यसाधनार्थं वक्त्राद्यानुकूल्येन साध्यत इत्यर्थः । **संभावितालक्षणान्याशङ्क्य निराचष्टे यथेति** । येन प्रकारेण योऽर्थो दृष्टस्तेन प्रकारेण तद्वादीत्यर्थः । **भ्रान्तीति** । यथा भ्रान्तिविषयीकृतार्थवादिनि जिनादावित्यर्थः । **प्रसङ्गात्** आप्तत्वप्रसङ्गात् । तथा चाप्तवाक्यत्वानुमाने जैनादौ व्यभिचाराप्रसक्त्या वक्त्रानुकूल्यादेर्हेतुविशेषणस्य वैयर्थ्यं प्रामाण्यानुमाने च व्यभिचार इति भावः । **प्रमाणेति** । यथा शब्दस्थाने प्रमाणशब्दनिवेशोऽपीत्यर्थः । प्रमादो विस्मृतिः । आदिना विपर्ययो गृह्यते । तथा चोक्तदोष एवेति भावः । **प्रमाणेनेति** । येन प्रकारेण योऽर्थः प्रमितस्तेन प्रकारेण तद्वादीत्यर्थः । **एकदेशेति** । समभङ्गीवादिनि जिनादावपि सत्त्वादिविषये प्रमितवादित्वसत्त्वादुक्तदोषो दुर्वार इति भावः । **यावदिति** । येन येन प्रकारेण यो यः स्वप्रमितस्तेन तेन प्रकारेण तत्तद्वक्ताऽऽप्त इत्यर्थः । तेन सर्वं मेयमित्यादिरूपेण प्रमितयावद्वक्तृत्वस्य जिनादिसाधारणत्वेऽपि नोक्तदोषः । न वा सामान्यतः प्रमितत्वस्य केवलान्वयित्वेऽपि प्रमितयावद्वक्तृत्वस्य

असंभावितत्वम् । तथा च स्वप्रमितैकदेशवादिनि जिनादौ नातिप्रसङ्ग इति भावः । अतथाभूतत्वात् स्वप्रमितयावद्वक्तृत्वाभावात् । कस्यचिद्योगप्रभावात्तथाभूतत्वमपि स्यादतः प्रायेणेति । तदव्याप्तेरिति । तथा चाद्यानुमाने दृष्टान्ते साध्यस्य द्वितीयानुमाने च साधनस्य वैकल्यमिति भावः । न चोक्तयोगसिद्धपुरुषवाक्यमेव दृष्टान्तो भविष्यतीति वाच्यम् । तस्य संभावनामात्रेणोक्तत्वेनानिश्चितत्वात् । ब्रह्मणोऽपि स्वप्रमितनृणपणरेखादिवक्तृत्वे प्रमाणाभावात् । न चैवमसंभवस्यैव वक्तुं शक्यत्वादव्याप्तेरित्युक्तिरयुक्तेति वाच्यम् । असंभवस्य सन्दिग्धत्वात् । अव्याप्तेश्च निश्चितत्वात् । एतदेवोपपादयति न हीति । प्रायेणेत्यनुषज्यते । तेनाव्याप्तिमुक्त्वा केनापीत्यसंभवोपपादनमयुक्तमिति शङ्कानवकाशः । वाक्यार्थचन्द्रिकाभिप्रायोऽप्येवमेव । केनापीत्यस्यास्मत्पक्षिचेतनेनेति व्याख्यानत्वात् । यद्वा । तावतो वक्तेत्यनेन तावद्वचनशक्तिमत्त्वं तावद्वचनविशिष्टत्वं वा विवक्षितम् । आद्ये दोषमाह प्रायेणेति । ब्रह्मादीनां तावद्वचनशक्तिमत्त्वात्प्रायेणेत्युक्तम् । एवकारोऽप्यर्थः । अव्याप्तेरित्यनेन संबध्यते । तेन बुद्धादावतिव्याप्तेः परिग्रहः । अन्त्ये त्वसंभव इत्याह न हीति । एतेन न हीत्यादेरतथाभूतत्वादित्यनेनानतिभिन्नार्थत्वाद्वृतार्थतित्यपि निरस्तम् । विशिष्टशुद्धयोर्भेदपक्षे दूषणमाह प्रायेणेति । यत्र पटः शुक्ल इत्यादिप्रमित्यनन्तरमेव पटः शुक्ल इत्यादिवाक्यं प्रयुज्यते । तत्र तत्कालसंबन्धविशिष्टदेवदत्तादेः स्वप्रमितयावद्वक्तृत्वेनाप्तत्वोपपत्तेः प्रायेणेत्यभिहितम् । विशिष्टशुद्धयोर्भेदो नेति पक्षे त्वसंभव एवेत्याह न हीति । कालान्तरे देवदत्तदृष्टस्यापि स्वप्रमितत्वात्तावद्वक्तृत्वस्य चोक्तविशिष्टेऽप्यसंभवादिति भावः । यत्प्रमाणदृष्टं तस्यैव वक्तेत्युक्ते प्रमितयत्किञ्चिदन्यावक्तेति प्रतीतिः स्यात् । तथा चोक्तदोषः । आप्तोक्तस्यापि यत्किञ्चित्प्रमितान्यत्वादतो यावत्तावदित्युक्तम् । तावदन्यावक्तृत्वे सति वक्तेत्यर्थो न तु तावद्वक्तेति । तेन न पूर्वदोषः । अज्ञातेति । अत्र यत्प्रमेयं स्वेन न ज्ञातं सन्दिग्धं वा तत्प्रतिपादकवाक्यानुवादकर्तुरिति यादृपते । वाक्यार्थचन्द्रिकायां तु अज्ञातार्थकवाक्यप्रयोक्तुः सन्दिग्धार्थकवाक्यप्रयोक्तुरनुवादरूपवाक्यप्रयोक्तुश्चेत्यर्थः । तेषामनाप्तत्वव्यवहाराभावेन लक्ष्यत्वादिति व्याख्यातम् । तत्राद्येऽज्ञातसन्दिग्धानुवादकयोरिव विपर्यस्तानुवादकस्यापि वादविषये आप्तत्वात्तदनुक्तौ बीजाभावः । द्वितीये प्रमितानुवादकस्याप्यनाप्तत्वापादनविषयताप्रसङ्गः । तथाऽप्याद्ये विपर्यस्तस्याप्यज्ञानशब्देन ग्रहणादन्त्ये चाप्रमितानुवादस्यैवानुवादपदेन विवक्षितत्वान्न दोषः । भीमाग्रजस्य युधिष्ठिरस्य कदाचिद्युद्धादिकाले चाटुवादित्वमप्रमितवक्तृत्वम् । अनाप्ततापत्तेश्चेति । तथा च ततदीयप्रमाणवाक्ये वक्त्राद्यानुकूल्यवति निरुक्ताप्तवाक्यत्वाभावाद्वयभिचारः । एवं बादरायणस्यापि क्वचिच्चाटुवादित्वादुक्तानुमानयोर्बाधासिद्धी चेति भावः ।

गूढ०— विवक्षितार्थतत्त्वज्ञानं करणपाटवं विवक्षाऽविप्रलिप्सा चेति चतुष्टयमाप्तिरन्तद्धानाप्त इत्याप्तलक्षणं वक्तुं लक्षणान्तराणि दूषयितुं शङ्कते नन्विति । यथादृष्टार्थवादीति । येन प्रकारेणार्थो दृष्टस्तेन प्रकारेण तदर्थप्रतिपादकवाक्यप्रयोक्तेत्यर्थः । ननु प्रमाणदृष्टार्थवादीति विशेषणान्नातिप्रसङ्ग इत्यत आह प्रमाणेति । तथाभूतवादित्वेऽपीति । प्रमाणेन यथा दृष्टं तथावादित्वेऽपीत्यर्थः । तावत एवेति । प्रमाणदृष्टमेव वदति न तु तद्दृष्टं स एवाप्त इत्यर्थः । अज्ञातेति । अज्ञातसन्दिग्धार्थविषयवाक्ये एकेन प्रयुक्ते तदनुवादरूपवाक्यप्रयोक्तुः अन्यस्याप्तत्वं न स्यादित्यर्थः ।

प्रदीपः— ननु कोऽयमिति किं यथाशब्दो वादिक्रियाविशेषणं दृशिक्रियाविशेषणं वोभयविशेषणं वेति विकल्प्य क्रमेण दूषयति **भान्तीति**। तृतीयेऽप्येकदेशे प्रमाणेन यथादृष्टार्थवादित्वमुत सर्वत्रेति विकल्प्याद्यं दूषयति **एकेति**। द्वितीयमुत्थाप्य दूषयति **यावदिति**। अत्र यावत्तावच्छब्दाभ्यामवधारणं प्रतीयते। तत्किमयोगव्यवच्छेदार्थमन्ययोगव्यवच्छेदार्थं वा। आद्ये ज्ञातमात्रस्यानुसन्धानाभावात् यत्किञ्चित्प्रमाणप्रतिपन्नं तथा वदतोऽनाप्तत्वमिति अव्याप्तिरित्युक्तं द्वितीयमुत्थाप्याव्याप्त्यैव दूषयति **यावदिति**। अज्ञाते सन्दिग्धेऽनुवादे च यद्वाक्यं तत्प्रयोक्तुराप्तत्वं न स्यादित्यर्थः।

६० सु०— निर्दोष आप्त इति चेन्न। आप्तानामपि क्वचिद्रागादिदोषसंभवात्॥ यत्र विषये निर्दोषस्तत्राप्त इति चेन्न। यत्तच्छब्दयोर्विशेषविषयत्वेनासाधारण्यादव्याप्तेरिति।

वं०प०— असाधारण्यादिति। सर्वानुगतत्वाभावादित्यर्थः॥

आनन्दः— ननु अज्ञाते सन्दिग्धेऽनुवादे च प्रयोक्तुराप्तत्वं स्यादित्यर्थ इति। तन्न। अज्ञातसन्दिग्धवाक्यप्रयोक्तुराप्तत्वस्य कुत्राप्यदृष्टत्वेन तथाऽव्याप्तिदानपरत्वस्यायुक्तत्वात्। एवं हि यत्र वाक्यविशेषविषये यो निर्दोषः स तद्वाक्यविशेषे आप्त इत्युक्तं स्यात्। एवं चास्य लक्षणस्याप्तविशेष एवासाधारणत्वेनाप्तान्तरस्याभावेनाव्याप्तेरयुक्तमेतदित्याह **यत्तदिति**। यद्वा यत्र विषये निर्दोषस्तत्राप्त इत्युक्तं स्यात्। तथात्वे च ब्रह्मसूत्रविषये निर्दोषो य आप्तस्तद्वाक्यत्वस्य सपक्षीभूते भारतादौ अभावेन सति सपक्षे तत्र हेतोरप्रवेशेन असाधारण्यादव्याप्तिरित्याशयेनाह **यत्तदिति**।

वा०चं०— एवं दृष्टिगर्भलक्षणानि निराकृत्य लक्षणान्तरं निराकरोति **निर्दोष इति**। अत्र निर्दोषत्वं सर्वथा विवक्षितम्, 'यत्र विषय' इति विशेषितं वा। आद्ये भीमाग्रजादावव्याप्तिरित्याह **आप्तानामिति**॥ द्वितीयं शङ्कते **यत्रेति**। एतच्चोपलक्षणम्। प्रथमपक्षेऽप्येवं विवक्षायामेतदेव दूषणं स्यादित्यपि द्रष्टव्यम्। अत एवान्ते तस्य निवेशनम्। यत्तच्छब्दयोः सर्वनामत्वात्सर्वनाम्नां च घटदेवदत्तादिविषयिणी शक्तिग्रहाविषयतया शाब्दज्ञाने विषयतयाऽप्रविष्टां ज्ञातां बुद्धिमुपधानीकृत्य घटत्वदेवदत्तत्वाद्यनेकप्रकाराबच्छिन्नेषु घटदेवदत्तादिषु शक्तिग्रहणेन, यत्तदादीनां घटत्वादिप्रकारकघटाद्युपस्थितिजनकत्वात् लक्षणवाक्यस्य 'घटविषये निर्दोषो, घटे आप्त' इत्याद्यर्थप्राप्त्या, तस्य चाप्तत्वावच्छिन्नेऽभावेन अव्याप्त्यापत्त्याऽऽप्तमात्रे 'आप्त' इत्यादिव्यवहारसंपादनलक्षणस्वप्रयोजनासाधकत्वाच्च नेदं लक्षणं युक्तमित्यभिप्रेत्य दूषयति **यत्तदिति**॥ 'अव्याप्ते'रिति सार्वत्रिकव्यवहारानौपयिकत्वस्याप्युपलक्षणम्। अत एवोत्तरत्र सामान्येनानूद्य विकल्पयिष्यतीति द्रष्टव्यम्।

वा०र०— **दृष्टिगर्भलक्षणानीति**। यद्यपि यथादृष्टार्थवादीत्येकमेव लक्षणं प्रमाणेत्यादि विवक्षया पूर्वपूर्वदोषोद्धाराय विशेषितमिति न दृष्टिगर्भलक्षणानेकत्वमिति भाति। तथापि पूर्वपूर्वलक्षणप्राप्तदोषोद्धार उत्तर-

लक्षणेन भवतीत्येतावतैव तेषां लक्षणान्तरत्वप्राप्तेर्लक्षणानेकत्वं युक्तमित्याशयेन लक्षणानीति बहुवचनप्रयोगः । अत एव प्रथमपक्षेऽपीत्युत्तरग्रन्थे पूर्वलक्षणेषु प्रथमपक्ष इत्येकवचनमेव प्रयुक्तमिति ज्ञेयम् । अत्रैतल्लक्षणानां दृष्टिगर्भत्वेन क्रोडीकरणान्निर्दोषत्वलक्षणस्य मध्ये कुतो न निराकरणमिति शङ्का निराकृता । बहुत्वादेव महामल्लेशभङ्गन्यायेन प्रथमतस्तन्निराकरणमिति च सूचितम् । **निर्दोषत्वं सर्वथेति** । दोषा हि रागादयस्तद्राहित्यं सर्वथा क्वचिदपि विषये रागादिकं नास्तीति विवक्षितमित्यर्थः । **यत्र विषय इति** । यत्र विषये रागादिरहितस्तत्रासावाप्त इत्येवं यत्र विषय इत्यनेन विशेषितं वेत्यर्थः । ननु निर्दोष आप्त इति लक्षणे क्वाचित्करागादिसद्भावप्रयुक्ताप्तत्वेन समं न भीमाग्रजादावव्याप्तिवारणाय **यत्र विषय इति** । विवक्षया परिहारशङ्कावत् यथादृष्टार्थवादीत्यादिलक्षणेष्वपि प्रमाणेन यथेति तृतीये लक्षणे अंशान्तरेऽन्यथावादिन्यतिप्रसङ्गवारणाय यदंशे प्रमाणदृष्टानतिक्रमस्तत्र स आप्त इत्येव विवक्षयाऽतिव्याप्तिपरिहारसंभवात् । तच्छङ्कायाः यावत्प्रमाणदृष्टं तावत एव वक्तेति पञ्चमलक्षणेऽप्यज्ञातादिवाक्यप्रयोक्तुरप्यज्ञाताद्यंशं विहाय शब्दान्तरे प्रमाणदृष्टमात्रप्रयोक्तृत्वेन तदंशे तस्याप्तत्वसंभवेन यदंश इति विवक्षया तत्राव्याप्तिपरिहारसंभवात्तच्छङ्काया उक्तविवक्षयैव भीमाग्रजेऽन्यत्राप्तत्वेनालक्ष्यत्वादेव नाव्याप्तिरिति परिहारसंभवात् तच्छङ्कायाश्च कर्तव्यतया यत्तच्छब्दयोरित्युक्तदूषणेन तत्परिहारस्य च कर्तव्यतया तदकरणायोग इत्यतोऽत्र लक्षणे तथाशङ्कनस्य तत्परिहारस्य च पूर्वत्राप्युपलक्षणयाऽभिप्रेतत्वान्न तदकरणमित्याशयेनाह **एतच्चोपलक्षणमिति**। प्रथमपक्षेऽपीत्यस्य दृष्टिगर्भलक्षणेऽपीत्यर्थः । उक्तलक्षणानामनेकत्वेऽपि दृष्टिगर्भत्वेन क्रोडीकारादेकवचनम् । यथादृष्टार्थवादीत्यादिलक्षणेष्वपीत्यत्र तात्पर्यम् । अत्र च यथासंभवमिति शेषपूरणान्न सार्वत्रिकत्वाभावो दोषाय विवक्षायामेतदेवेत्यस्योक्तविवक्षणेन दोषशङ्कापरिहारशङ्काकरणेयं तच्छब्दार्थयोरननुगमरूपं वक्ष्यमाणमेव दूषणमित्यर्थः । न चेत् तत्पक्षे एतच्छङ्कापरिहारप्रवृत्तिः स्थलान्तरे उपलक्षणयोहेत्यत्र किं नियामकमित्यतो ज्ञापकमाह **अत एवेति** । शङ्कासमाधानादिविचारस्य चरमपक्षे प्रवर्त्यस्य प्रथमादिपक्षसाधारण्यस्थले सर्वत्रोह्यत्वाभिप्रायेणान्ते तत्प्रवृत्तिवर्णनस्य तत्रतत्रोपलम्भादिति भावः । वक्ष्यति चाख्यातिमतत्रयनिरासेऽप्यस्यान्यथाख्यातिबाधकत्वेनाभिप्रेतत्वात्सर्वशेषत्वज्ञापनाय मतत्रयनिरासान्ते तदभिमतं बाधकमाशङ्क्य निराकृतमिति ज्ञेयमिति । उक्तं च । 'उद्यतायुधदोर्दण्डा पतिते'ति वाक्यविचारावसरे तत्त्वनिर्णयटीकायाम् । उभयशेषत्वादस्यात्रोपन्यासो युक्त इति । यद्यपि यत्तच्छब्दयोर्विशेषेत्युत्तरवाक्योपपादनानन्तरं विकल्पयिष्यतीति द्रष्टव्यमित्यनन्तरमेवैतच्चोपलक्षणमित्येतत्प्रमेयं वाच्यम्। विवक्षादूषणयोरुभयोरप्युपस्थितिसत्त्वात्। तथापि शङ्काग्रन्थप्रवृत्तिवर्णनानन्तरमेव प्रथमपक्ष एव शङ्का कुतो न प्रवर्तितेति शङ्का स्यादेव । ततस्तदुपलक्षणापि वाच्यैव । तावन्मात्रवचनं परिहारग्रन्थे प्रवृत्तिवर्णनानन्तरं पुनः पूर्वपक्षे प्राप्तशङ्कापरिहारोपलक्षणापि वाच्या । ततो गौरवमिति मत्वा वक्ष्यमाणदूषणस्य बुद्धिसन्निहितत्वेन तदुपस्थितिमाश्रित्य शङ्कासमाधानयोरुभयोरपीहैवातिदेशवर्णनमिति न दोषः । **यत्तच्छब्दयोरित्यादि** । अत्र यत्तदादीनां घटत्वादिप्रकारकघटाद्युपस्थितिजनकत्वे हेतुकथनं सर्वनाम्नां घटदेवदत्तादीत्यारभ्य ग्रहणेनेत्यन्तम् । अस्तु सर्वनाम्नां तथा शक्तिग्रहः । यत्तच्छब्दयोस्तु किमित्यत उक्तं **यत्तच्छब्दयोः सर्वनामत्वादिति** । सर्वनाम्नां तत्तत्पदार्थतावच्छेदकप्रकारकतत्तत्पदार्थोपस्थितिजनकत्वाद्यत्तच्छब्दयोरपि सर्वनामत्वेन घटत्वादिप्रकारकघटाद्युपस्थितिजनकत्वमावश्यकमिति समुदाययोजना । अत्र च **नाम्नां च** इत्यनन्तरं वक्तृनिष्ठामिति पूरणीयम् ।

अनुगतजात्यभावेऽपि शक्त्या ग्रहसमर्थनस्थलीयतर्कताण्डवे वक्तृनिष्ठां देवदत्तादिविषयामित्युक्तत्वात्। वक्ष्यति च वक्तृनिष्ठा बुद्धेरिति । उपधानीकृत्येत्यनन्तरमपि वक्तृनिष्ठबुद्धिविषयेष्विति उक्तग्रन्थानुसारेण पूरणीयम् । घटदेवदत्तादिविषयिणीं बुद्धिमिति संबन्धः। तां बुद्धिमुपादानीकृत्येत्यस्य तद्बुद्धिलक्षणप्रत्यासत्त्येत्यर्थः। गोत्वादीनां प्रत्यासत्तितामते ज्ञातानां तेषामिवोक्तबुद्धेरपि ज्ञाताया एव तत्तत्प्रकारकतत्तद्व्यक्त्युपस्थितिहेतुतेति भावेन ज्ञातानामित्युक्तम्। न च तावता गोत्वादिसाम्याद्गोत्वादेर्व्यक्तिशक्तिग्रहे व्यक्तिविशेषणतया विषयत्वेन शाब्दज्ञानेऽपि विषयत्वेन तस्यानुप्रवेशात् । देवदत्तादिविषयकवक्तृनिष्ठबुद्धेस्तु व्यक्तिषु शक्तिग्रहे व्यक्तिविशेषणत्वेन विषयता नास्तीत्यतः शाब्दज्ञाने विषयतया गोत्वादिवदप्रविष्टत्वात् । उक्तं च तर्कताण्डवे । 'त्वन्मते गोत्वं शक्तिग्रहे विशेषकत्वाच्छाब्दज्ञाने विषयत्वे प्रविश्यति । मन्मते तु सादृश्यं प्रत्यासत्तिमात्रत्वान्न तत्र प्रविशती'त्यादि । सादृश्यसमाना चेयं बुद्धिरिति सापि तथाभूता । उक्तं च तर्कताण्डवे । 'अत्रोपधानमित्युक्त्या सादृश्यं सर्वनाम्नि वक्तृगतबुद्धिरिव ज्ञातमप्युपलक्षणत्वान्न शक्तिग्रहविषय' इति सूचितमिति । अवच्छिन्नेष्वित्यनन्तरं घटे देवदत्तादीति पाठः। घटपदरहितपाठे घटेति पूरणीयम्। देवदत्तादीत्यादिपदेन घटस्यापि सङ्ग्रहः। प्रकारावच्छिन्नत्वं तु न यथाक्रममपि तु यथायोग्यं संबन्धनीयमिति शेषाश्रयणानावश्यकतेत्यप्याहुः । यत्तच्छब्दयोरिति प्रकृतत्वाद्यत्तच्छब्दयोरित्येव वक्तव्ये यत्तदादीनामित्यादिपदप्रयोगः । उक्तसमानन्यायकिमेतदादिशब्दान्तरेऽप्येव विशेषोपस्थापकत्वं सर्वनाम्नामित्युक्तप्रकारेण ज्ञेयमित्याशयेन । वस्तुतस्तु 'यो यस्य सुतः स तस्ये'ति वक्ष्यमाणोदाहरणानुसारेण यत्र विषय इत्यत्र मूलेऽपि यो यत्रेत्यादिरूपेण पर्यवसानाद्यत्तच्छब्दद्वयस्य च भिन्नभिन्नप्रकारकबोधजनकत्वनिमित्तेन यच्छब्दयोः तच्छब्दयोश्च प्रथमा सप्तमीनिर्दिष्टत्वे प्रयुक्ते पार्थक्यमाश्रित्य यत्तदादीनामित्युक्तमिति प्रतिभाति । अव्याप्तेर्दूषणत्वाभावं मन्वानं प्रति दूषणान्तरमाह आप्तमात्र इति । आप्त इति व्यवहार इत्येव मूलकोशे पाठः । आप्त इत्यादीति पाठे आदिपदेनाप्तानाप्ता इत्यस्य तत्र तत्रेदमाप्तस्य वाक्यमिदमाप्तेनोक्तमित्यादिव्यवहारस्यषष्ठ्यन्तादेश्च परिग्रहः । अव्याप्तेरिति इति । अव्याप्तेरित्येतदित्यर्थः ।

स०व्र०— आद्ये अव्याप्तिमाह न आप्तानामिति ॥ द्वितीयमाशङ्क्य निषेधति यत्रेति।

कुण्डल०— असाधारण्यादिति। लक्षणस्याननुगतविषयघटितत्वेनानुगत्यभावादव्याप्तिरित्यर्थः।

विट्ठ०— यत्तच्छब्दयोरिति । सर्वनामशब्दानां सर्वार्थत्वात् यदत्र विषय इत्यादि विषयादिशब्दसमभिव्याहृतयत्तच्छब्दयोः घटादिविशेषविषयत्वेन घटविषये आप्त इत्याद्यर्थप्राप्त्या अस्य लक्षणस्य लक्ष्यतावच्छिन्नसर्वलक्ष्यसाधारणत्वाभावादव्याप्तिरूपलक्षणदूषणप्रसङ्गादित्यर्थः। लक्षणस्य हेतुत्वे नायमाप्त इति व्यवहर्तव्यो घटविषये निर्दोषत्वादित्यस्य सपक्षाप्रवेशितत्वेन असाधारण्यात् लक्षणपथे अव्याप्तेश्चेत्याहुः।

चषकः— तुरीये द्वितीयं प्रत्याख्याति यत्तदिति। सर्वनाम्नामन्वयधीविषयतानापन्नबुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने शक्त्युपगमेन, निर्विशेषणघटत्वदेवदत्तत्वादिप्रकारकोपस्थितिजनकतादृशयत्तत्पदादि-

घटितलक्षणवाक्यादपि तादृश्येवान्वयधीरुदेष्यति इति प्रकृतलक्ष्यतावच्छेदकाभिमताप्तत्वावच्छेदेन लक्षणप्रतीतिविरहेण न तदवच्छेदेन तन्नियन्त्रितव्यावृत्तिव्यवहृतिप्रत्यापनसंभव इति भावः।

काशी०— निर्दोष इति। वाक्याप्रामाण्यकारणदोषशून्य इत्यर्थः। **आप्तानामिति।** आप्ताभिमतानां युधिष्ठिरादीनामपि क्वचिद्विषये विप्रलिप्सादिदोषसंभवादसंभव इति भावः। **यत्रेति।** यो यत्र निर्दोषः स तत्राप्त इति व्यवहर्तव्य इत्यर्थः। तथा च तत्राप्त इति व्यवहारनिर्वाहकं तत्तद्विषये निर्दोषत्वमेवाप्तलक्षणमतो लक्ष्यव्यक्तीनां क्वचिन्निर्दोषत्वसंभवान्नासंभव इति भावः। विशेषविषयत्वेन घटत्वादिरूपतत्तद्धर्मावच्छिन्नबोधकत्वेन। असाधारण्यात् तत्तद्विषये निर्दोषत्वस्य विशिष्यैव लाभात्। **अव्याप्तेरिति।** घटविषये निर्दोषत्वस्य पटादिविषय आप्तेष्वभावादिति भावः। यद्यपि यत्तच्छब्दयोर्वक्तृबुद्धिविषयतावच्छेदकावच्छिन्ने एव सामान्यतः शक्तिः। तथाऽपि वक्तृबुद्धिविषयतावच्छेदकत्वमुपलक्षणमेव। न तु तच्छब्दात्तद्रूपेण बोधः किन्तु विशिष्यैव घटत्वाद्यवच्छिन्नानां बोधः। तथैवानुभवात्। तथा च यत्र निर्दोष इति वाक्यादपि घटत्वाद्यवच्छिन्ने निर्दोषत्वस्यैव लाभात्तस्य च यावल्लक्ष्यवृत्तित्वाभावादिति भावः।

गूढ०— यत्तु अज्ञाते सन्दिग्धे अनुवादे च प्रयोक्तुरनाप्तत्वं स्यादित्यर्थ इति तन्न। अज्ञातसन्दिग्धप्रयोक्तुराप्तत्वस्य कुत्राप्यदृष्टत्वेन तथाऽव्याप्तिदानपरत्वस्यायुक्तत्वात्। एवं हि यत्र वाक्यविशेषविषये यो निर्दोषः स तद्वाक्यविशेषविषये आप्त इत्युक्तं स्यात्। एवं चास्य लक्षणस्याप्तविशेष एवासाधारणत्वेनाप्तान्तरस्याभावेन अव्याप्तेरयुक्तमेतदित्याह यत्तदिति। यद्वा यो यत्र विषये निर्दोषः स तत्राप्त इत्युक्तं स्यात्। तथात्वे च ब्रह्मसूत्रविषये निर्दोषो य आप्तस्तद्वाक्यत्वस्य सपक्षीभूते भारतादावभावेन सति सपक्षे तत्र हेतोरुपवेशेनासाधारण्यादव्याप्तिरित्याशयेनाह यत्तदिति।

प्रदीपः— द्वितीयमाशङ्क्ते निर्दोष इति। किमाप्तत्वं सर्वदा सर्वत्रैकमेवाहोस्वित् अनेकान्याप्तत्वानि। आद्येऽव्याप्तिमाह नामानामिति। द्वितीयमाशङ्क्य निषेधति यत्रेति।

६१ सु०— मैवम्। विवक्षितार्थतत्त्वज्ञानमविप्रलिप्सा विवक्षा करणपाटवं चेतीयमाप्तिः। तद्वान् आप्त इत्यङ्गीकारात्॥ आप्तत्वाभिमतेऽपि कदाचिदिदं नास्तीति चेन्मा भूत्। तदाऽसावनाप्त इत्यङ्गीकारात्। कालादिभेदेनाविरोधात्॥ एवं सति यो यत्रैवंभूतः स तत्राप्त इत्युक्तं स्यादिति चेदस्तु को दोषः। यत्तच्छब्दार्थयोरननुगम इति चेत्। कोऽयमननुगमो नाम, किं सार्वत्रिकव्यवहारानौपयिकत्वम् उत एकस्यानेकवृत्तित्वाभावः। नाद्यः, 'यो यस्य सुतः स तदीयं धनं अर्हती'त्यादौ सार्वत्रिकव्यवहारहेतुतोपलम्भात्। न द्वितीयः, अदोषत्वात्। यथा चाननुगतस्यापि नाव्याप्तिः सार्वत्रिकव्यवहारहेतुता च तथा सामान्यपरीक्षायां वक्ष्यामः।

परि०— यत्तच्छब्दार्थयोरननुगम इति चेदिति। यत्त्वतत्त्वरूपजातेरभावेन व्यक्तिविशेषग्रहणे सति सर्वत्राननुगम इत्यर्थः। नन्वाप्तवाक्यत्वरूपहेतुशरीरप्रविष्टाप्तेरननुगमे सति यद्यदाप्तवाक्यं तत्सर्वं प्रमाणमिति आप्तवाक्यत्वमात्रे व्याप्तिर्न स्यात् व्यक्तिविशेष एव व्याप्तिः स्यादित्यत आह **यथा चेति**। **अव्याप्तिः** व्याप्तिहीनता। यद्वाऽऽप्तत्वावच्छिन्नाप्तमात्रे अनुगतस्यैकस्याभावे तत्तद्व्यक्तिमात्रनिष्ठधर्मस्यैवाप्तलक्षणत्वेनोक्तावेकत्र व्यक्तौ विद्यमानस्यान्यत्र व्यक्त्यभावेनाप्तलक्षणस्याव्याप्तिः। आप्तत्वावच्छिन्नसर्वव्यक्तिषु अयमाप्त इति व्यवहारश्च न स्यादित्यत आह **यथा चेति**। वैशेषिकाधिकरणे 'नरत्वादिकमप्येवं तत्तद्धर्मतयेष्यते। न सर्वधर्म एकोऽस्ति समुदायस्तु भिन्नग' इत्यादि सामान्यास्तित्वनास्तित्वविचारप्रकरणे। 'इति व्युत्पत्तिरपि हि सादृश्येनैव गम्यते। सर्वेषु युगपच्छब्दः सदृशेषु च वर्तत' इत्यादिना सादृश्येनैवाननुगतस्यापि धर्मस्य नाव्याप्त्यादिकमित्यादि वक्ष्याम इत्यर्थः। तत्र सादृश्येन सार्वत्रिकव्यवहारस्यैव स्फुटत्वेऽपि तुल्यन्यायतया लक्षणाव्याप्तेरपि सुपरिहरत्वादिति भावः। अत एव च तर्कताण्डवे सादृश्येनैव लक्षणाव्याप्तिं च निरस्य चतुर्णामपि पक्षाणामनुव्याख्यानोक्तं सादृश्यमेव जीवातुरिति ग्रन्थेन स्वोक्तपक्षचतुष्टयं मूलारूढतया दर्शितमिति ज्ञेयम्।

यादु०— यो यत्रैवंभूत इति। यत्र विषये, **एवंभूतो** विवक्षितार्थतत्त्वज्ञानादिमानित्यर्थः॥ **एकस्येति**। यत्तच्छब्दघटितस्यैव लक्षणस्येत्यर्थः॥ **यो यस्य सुत इति**। अत्रापि कथमिति चेत्। इत्थम्। विशेषविषययोरपि यत्तच्छब्दयोरपि प्रयोगोपाधिर्बुद्धिस्थत्वम्। तच्च प्रकृतसर्वसङ्ग्राहकम्। अतस्तयोः सार्वत्रिकव्यवहारहेतुतोपपद्यत इति॥ सर्वनाम्नां सर्वार्थत्वाद्यत्तच्छब्दयोः विशेषविषयत्वेऽपि विशेषतः सर्वत्रानुगतिरस्तीत्यप्याहुः॥ **सामान्यपरीक्षायामिति**। 'व्युत्पत्तिरपि हि सादृश्येनैव गम्यते' इत्यनुव्याख्यानव्याख्यावसर इत्यर्थः। तत्र यद्यपि सादृश्यस्य सार्वत्रिकव्यवहारहेतुतोक्ता न त्वननुगतस्य लक्षणत्वेऽव्याप्त्यभावः तथापि सामान्यस्यानाभिषिक्तेन सादृश्येन अव्याप्तिपरिहारोऽपि तत्रोपलक्षणया विवक्षित एव। लक्ष्यसदृशे लक्षणसदृशस्यावृत्तिरव्याप्तिः न त्वेकस्य लक्षणस्य लक्ष्यैकदेशे; येनानुगतलक्षणानामव्याप्तिरिति॥

आनन्दः— **आप्तिशब्दार्थं निर्वक्ति मैवं विवक्षितार्थेत्यादि**। ननु चतुष्टयानुगतस्यानुगतस्यैकस्य अवच्छेदकस्याभावाद्व्यापकतावच्छेदकप्रकारकानुमित्यसंभवेन अनुकूलवक्त्रादिमत्वहेतुकाप्तवाक्यत्वसाधकानुमानानुपपत्तिः। न च चतुष्टयान्यान्यत्वमेव तदवच्छेदकमिति वाच्यम्। अनेकपदार्थज्ञानसापेक्षत्वेन नञ्द्वयगर्भत्वेन च गुरुत्वादिति चेत्। मैवम्। निर्दोषत्वस्यैव चतुष्टयानुगतस्यावच्छेदकत्वोपपत्तेः। अत एव निर्दोषत्वमपि आप्तलक्षणमिति वक्ष्यति। एतेन निर्दोषः प्रमितस्यैव वक्ता आप्त इत्यपि लक्षणद्वयं समाहितमिति। नन्वत्र निर्दोषत्वं नाम दोषाभावः। स किं दोषप्रागभावः प्रध्वंसोऽत्यन्ताभावो वा दोषवदन्योन्याभावो वा। आद्येऽपि किं यावद्दोषप्रागभाव उत यत्किञ्चिद्दोषप्रागभावः। नाद्यः। केषाञ्चिद्दोषाणां ध्वस्तत्वेन व्यधिकरणानां चात्यन्ताभावेन यावत् तत्प्रागभावस्यासंभवग्रस्तत्वात्। द्वितीये यत्किञ्चिद्दोषप्रागभावस्यानाप्तेऽपि सत्त्वेनातिव्याप्तिः। न द्वितीयः।

उक्तविकल्पदोषग्रस्तत्वात् । न तृतीयः । तथा सति स्वनिष्ठाज्ञानादिदोषध्वंसवत आप्तत्वं न स्यात् । न चतुर्थः । यत्किञ्चिद्दोषवत्यपि दोषवदन्योन्याभावसत्त्वेनाप्तत्वापत्तेः । कस्मिंश्चिदंशे दोषशून्यस्य सर्वत्राप्तत्वप्रसङ्गश्चेति प्रैवम् । यो यत्रविषये यदाऽज्ञानभ्रमप्रमादविप्रलिप्साकरणपाटवरूपदोषप्रागभावध्वंसान्यतरवान् स तत्रविषये तदानीं आप्त इत्यर्थस्य विवक्षितत्वेन दोषाभावात् । नन्वेकस्याप्तमनाप्तत्वं विरुद्धं कथमङ्गीक्रियत इत्यत आह कालादि-भेदेनेति । आदिपदेन विषयविशेषपरिग्रहः । एवं चैकस्मिन्काले वाक्यविषयविशेषे आप्तत्वं विषयविशेषान्तरे-ऽनाप्तत्वमिति न विरोध इत्यर्थः । यो यत्रेति । यः यस्मिन्काले यत्र वाक्यविशेषे विवक्षादिमान् स तस्मिन्काले तत्र वाक्यविशेषे आप्त इत्युक्तं स्यादित्यर्थः । नन्वत्र यत्तच्छब्दयोर्विशेषविषयत्वं वाप्तमात्रप्रयुक्तवाक्यविषयत्वं वा । नाद्यः । उक्तरीत्या अव्याप्तेः । द्वितीय इत्याह यत्तदिति । यो यस्येति । पितुर्धनं गृह्णीयादित्यस्य यस्य कस्यचित्पुत्रो यस्य कस्यचिद्धनं गृह्णीयादिति शङ्कायां यो यस्य पुत्रः स तस्येति यत्तच्छब्दार्थानां अननुगतत्वेऽपि यथा सार्वत्रिकव्यवहारः तथा प्रकृतेऽपीत्यर्थः । नन्वस्याननुगतत्वे आप्तान्तरस्याभावादव्याप्तिः । सार्वत्रिकव्यवहारश्च न स्यादित्यत्राह यथा चेति । सामान्यपरीक्षायां महद्दीर्घवद्ध ह्रस्वपरिमण्डलाभ्यां इत्यत्राधिकरणे सामान्यनिग-करणावसर इत्यर्थः ।

कं०रा०— सार्वत्रिकव्यवहारानौपयिकत्वमिति । विनयादिभ्यष्ठगिति उपायशब्दात्स्वार्थे ठकि उपायात् ह्रस्वत्वं चेत्यस्य पदमञ्जर्यामुपायशब्दष्ठकमुत्पादयति ह्रस्वत्वं चापयते । य च ह्रस्व आकारस्य भवति । अन्यस्याच-स्वत एव ह्रस्वत्वादिति व्याख्यानत्वादाकारस्य ह्रस्वत्वे आदिवृद्धौ ठस्येकादेशे यस्येति चेत्यवर्णलोपे चौपयिकशब्दो निष्पन्नः ।

श्रीनिधि०— सार्वत्रिकव्यवहारहेतुतोपलम्भादिति । सार्वत्रिकव्यवहारहेतुज्ञानविषयतोपलम्भा-दित्यर्थः । सामान्यपरीक्षायामिति । वैशेषिकपक्षान्तर्गतजातिपरीक्षायामित्यर्थः ।

वा०चं०— वाक्याप्रामाण्यस्यावोधकत्वविपरीतवोधकत्वनिवन्धनत्वाद्विवक्षाभावे वाक्यस्वरूपस्यैव अभावाद्वक्तुरुपदुष्करणत्वे चावोधकत्वप्राप्तेस्तस्यैव विवक्षितार्थविपरीतज्ञानविप्रलिप्साभ्यां विपरीतबोधकत्वप्राप्तेः वाक्याप्रामाण्यप्रसञ्जकनिरासहेतुत्वाद्विवक्षितार्थतत्त्वज्ञानादेरप्यशब्दार्थतया स्वविवक्षां दर्शयति नैवमित्यादिना ॥ अत्र 'विवक्षितार्थतत्त्वज्ञानादिमत्त्वं सर्वथा वा, किञ्चिद्विशेषितं वा विवक्षितमि'ति विकल्प्य मनसि निधायाह 'अज्ञातसन्दिग्धे'ति 'मीमाग्रजस्यापी'ति 'आप्तानामपी'त्युक्तं पूर्वलक्षणयोर्दोषं शङ्कते आप्तत्वेति ॥ अलक्ष्यत्वान्न क्षतिरित्याह नेति ॥ तदेत्युक्तिप्रयोजनमाह कालेति ।

आप्तत्वानाप्तत्वयोः समावेशस्य लक्षणस्याविशेषितत्वेऽनुपपत्त्या समावेशं कथयतो द्वितीयपक्षाभिप्रायं गूढाभिसन्धिः उद्घाटयति एवमिति । गूढाभिसन्धिरेव सिद्धान्ती तं पक्षमङ्गीकरोति अस्त्विति । पूर्वलक्षणोक्तदोषो अत्रापि न निवृत्त इति पूर्ववादी स्वाशयमुद्घाटयति यत्तदिति ॥ सिद्धान्ती स्वाशयमुद्घाटयति कोऽयमिति । अनुगमशब्दस्य रूढिभावव्युत्पत्तिभ्यामेकस्यानेकवृत्तित्वे, रूढिकरणव्युत्पत्तिभ्यां चानुगमके प्रवृत्तेर्विकल्पोपपत्तिः ॥ अदोषत्वादिति । एकस्यानेकवृत्तित्वाभावस्य स्वयं लक्षणदोषरूपत्वाभावादित्यर्थः ॥ ननु लक्षणस्यानेक-

लक्ष्यवृत्तित्वाभाव एवाव्याप्तिरिति कथं नायं दोषः। कथं च 'यो यस्य सुत' इत्यादौ उपलब्धिमात्रेण घटत्वपटत्वाद्यनन्तानुगतधर्मेष्वदृष्टा सार्वत्रिकव्यवहारहेतुता विनोपपादकं निश्चेतुं शक्या। अन्यथा यावद्द्रव्यभाविरूपादिषु अभेदस्य धर्मधर्मिभावस्य चोपलब्धिमात्रेण स्वीकर्तव्यताऽऽपत्त्या; तदुपपादकत्वेन विशेषोऽपि न त्वत्सिद्धान्ते कल्पनीयः स्यात् इत्यतो न लक्षणस्यानेकवृत्तित्वाभावमात्रमव्याप्तिरपि तु लक्ष्यजातीये लक्षणजातीयस्यावृत्तिः। यद्यपि मन्मते जातेरप्यननुगतत्वान्न साजात्यमेकजातीयत्वं तथाऽपि सदृशजात्याश्रयत्वरूपं तदुपपद्यत एव॥ यद्यपि मन्मते गवादिशब्दप्रवृत्तिनिमित्तगोत्वादिजातीनां सादृश्ये विद्यमानेऽपि यत्तदादिशब्दप्रवृत्तिनिमित्तघटत्वदेवदत्तत्वादीनां सादृश्याभावः तथाऽपि तदादिशब्दानां घटत्वाद्यवच्छिन्नघटादिशक्तिग्रहे वक्तृबुद्धेरुपाधितया स्वीकृतत्वात् तस्याश्च सदृशत्वाद् बुद्धिद्वारकं तदादिशब्दप्रवृत्तिनिमित्तं घटत्वादौ सादृश्यं विवक्षित्वा सदृशजात्याश्रयत्वं मयाऽपि वक्तुं शक्यत एव। तदेव सदृशजात्याश्रयत्वमुपपादकं विवक्षित्वा सार्वत्रिकव्यवहारहेतुत्वमपि सूपपादमित्याशयेनाह **यथा चेति॥ वक्ष्याम इति**। 'व्युत्पत्तिरपि हि सादृश्येनैवे'त्याद्यनुव्याख्यानव्याख्यावसरे। 'एतेन कार्यकारणभावावधारणादिकमपि समाहितं वेदितव्यमि'त्यत्रादिशब्दसङ्गृहीते अव्याप्तिः सार्वत्रिकव्यवहारौपयिकत्वादौ शक्तिग्रहप्रकारनिर्देशेन वक्ष्याम इत्यर्थः।

वा०र०— वाक्याप्रामाण्यस्याबोधकत्वेत्यादि। अत्र विवक्षितार्थतत्त्वज्ञानादेरासिशब्दार्थतया विवक्षाकरणं हेतुर्वाक्याप्रामाण्यप्रसञ्जक इत्यादि। **प्रसञ्जकाबोधकत्वविपरीतबोधकत्वनिरासहेतुत्वादित्यर्थः**। अबोधकत्वादिनिरासावश्यकत्वमुपपादयितुमुक्तं **वाक्याप्रामाण्यप्रसञ्जकेति**। तस्याप्युपपादनं वाक्याप्रामाण्यस्येत्यादि निबन्धनत्वादित्यन्तम्। शब्दे स्वाभाविकदोषाभावेन पुरुषगताज्ञानादिदोषप्रयुक्तमेवाबोधकत्वादीत्याश्रयणीयतया तद्दोषप्रयुक्तमेव वाक्याप्रामाण्यमिति भावः। तत्त्वज्ञानाद्यभावेऽबोधकत्वादेः कथं प्राप्तिर्येन तन्निरासो विवक्षितार्थतत्त्वज्ञानादिना स्यादित्यतस्तदुपपादनं विवक्षाभाव इत्यादि। अबोधकत्वविपरीतबोधकत्वक्रमानुसारेण विवक्षादिव्यावर्त्यं विवक्षाभावादेः प्रथमत उपपादनम्। विपरीतबोधकत्वप्राप्तेरित्यनन्तरं वाक्याप्रामाण्यप्राप्तेति वाक्याप्रामाण्यप्रसञ्जकतन्निरासहेतुत्वादिति पाठस्तु स्वरस एव। शेषपूरणाश्रयणाभावादिति ज्ञेयम्। निरासहेतुत्वात्प्राप्तायास्त्वविवक्षेति योज्यम्। अनेन स्वस्येयं विवक्षा निर्मूलेति शङ्का निराकृता। **सन्दिग्धेतीति**। सन्दिग्धानुवादेत्यनेनोक्तमित्युत्तरेण संबन्धः। **भीमाग्रजस्यापीत्यामानामपीतीत्येवमपीतीत्यस्योभयत्र संबन्धः**। त्रयस्यापि पूर्वलक्षणयोरित्युक्तं दोषमिति संबन्धः। **इत्येतद्वाक्यत्रयेणोक्तमव्याप्त्याख्यदोषमित्यर्थः**। **प्रयोजनमाहेति**। एकस्यैवाप्तत्वं तदभावश्चेत्येवमुभयं विरुद्धमित्याशङ्कापरिहाराय तदेत्यनेन सूचितं प्रयोजनमाहेत्यर्थः। **आप्तानाप्तत्वयोरिति**। विवक्षितार्थतत्त्वज्ञानादिमत्वस्य यो यत्रेत्यादिरूपेण विशेषितत्वाभावे आप्तत्वानाप्तत्वयोः समावेशस्यानुपपत्त्येत्यर्थः। **कथयतः तदेत्येतद्विवरणरूपकालादिभेदेनेत्यनेनेति शेषः**। कथयतो द्वितीयेत्यस्य तथाकथनेनाङ्गीकृततया सूचितो यः किञ्चिद्विशेषितमिति द्वितीयपक्षस्तत्र योऽभिप्रायः समावेशकथकस्य सिद्धमेव तमुद्घाटयतीत्यर्थः। गूढाभिसन्धिरित्यनेन लक्षणाननुगमरूपदूषणेन तमभिप्रायं दूषयितुं तावदुद्घाटयतीत्युक्तं भवति **सिद्धान्तीति**। सिद्धान्त्यपि पराभिसंहितं दोषं परिहरिष्यामीति भावेनाङ्गीकृतोऽयं किञ्चिद्विशेषितं तत्त्वज्ञानादिकमिति द्वितीयः पक्ष इत्याहेत्यर्थः। **पूर्वलक्षणेति**। यत्र विषये निर्दोष इति पूर्वनिरस्तचरमलक्षणेत्यर्थः। अननुगमस्यानुगमा-

भावरूपत्वात्प्रतियोगिभूतानुगमज्ञाने सति तदभावज्ञानं सुलभमिति मत्वानुगमपदार्थत्वेन प्रसक्ततत्तदर्थप्रापकं कथयन् तदभावविकल्पोपपत्तिमाह अनुगम्येति। भावेति। अनुगमनमनुगम इति भावव्युत्पत्तिः। वृत्तित्वे प्रवृत्तेरिति संबन्धः। करणेति। अनुगम्यतेऽनेनेत्यनुगम इति करणव्युत्पत्तिः। विकल्पोपपत्तिः। एवमनुगमशब्दस्यानेकवृत्तित्वानुगमकस्यार्थद्वयवत्वात्तस्यानेकवृत्तित्वाभावोऽनुगमकत्वाभावश्चेत्यर्थद्वयप्राप्तेः किं सार्वत्रिकेत्यादिविकल्पोपपत्तिरित्यर्थः। एकस्येति। एकस्य यदनेकवृत्तित्वं तदभावस्य स्वयं साक्षात्तत्स्वरूपेण लक्षणदोषरूपत्वाभावात्। एकस्यानेकवृत्तित्वाभावाख्यलक्षणदोषाभावादिति यावत्। एवाव्याप्तिरिति। उक्ताभावस्य स्वरूपेण पृथग्दोषत्वाभावेऽपि तस्याव्याप्तिरूपतया तस्याश्च दोषत्वसिद्धेर्दोषत्वमनिवार्यमित्यर्थः। एवं सन्निहितत्वनिमित्तैकस्यानेकवृत्तित्वाभावरूपद्वितीयपक्षदूषणमाक्षिप्य सार्वत्रिकव्यवहारानौपयिकत्वरूपाद्यपक्षोक्तं दूषणमप्याक्षिपति कथं च य इति। मूले तत्रत्यसार्वत्रिकव्यवहारहेतुतायाः सर्वसंमतत्वेन कथञ्चित्कार्यवशेन निर्वाह्यत्वमित्यभिप्रायेणैतदुदाहरणोपादानात्तत्रैवाक्षेप इति ज्ञेयम्। अनन्ताननुगतेति। घटत्वपटत्वस्तम्भत्वादिरूपा येऽननुगता धर्मास्तेषु कस्मिंश्चिदस्य दृष्टाया सार्वत्रिकव्यवहारहेतुतेत्यर्थः। अत्र च घटत्वादौ सार्वत्रिकव्यवहारहेतुत्वादर्शनं नाम एकमेव घटत्वं घटपटदेवदत्तादिषु व्यवहारहेतुर्नेत्येवं प्रकृतयत्तच्छब्दः धर्मभूतसार्वत्रिकव्यवहारहेतुत्वादर्शनमेव विवक्षितम्। अन्यथाऽनेकघटेष्वेकस्य घटत्वस्योक्तव्यवहारहेतुता एवं पटेषु पटत्वस्येत्यादिरूपेण सार्वत्रिकव्यवहारहेतुतापि प्रत्येकं दृश्यत एवेति तददर्शनोक्तयोगप्रसङ्ग इति ज्ञेयम्। उपपादकं विना निश्चेतुं शक्यत्वाभावे हेतुर्घटत्वेत्यादिरदृष्टेत्यन्तः। तथाच कथमित्यस्याक्षेपार्थत्वात् 'यो यस्य सुत' इत्यादौ सार्वत्रिकव्यवहारहेतुतोपलभ्यमानापि उपपादकं विना निश्चेतुं न शक्येत्युक्तं भवति। संभावनामात्रसंभवेऽपि तस्याप्रयोजकत्वान्निश्चयानुपपत्तिरेवोक्ता। उपपादकसहितोपलम्भस्यैव साधकत्वादिति भावः। यत्र यदुपलभ्यते तत्र तदुपपादके सत्येव तन्निश्चय इत्यनङ्गीकारे बाधकमाह अन्यथा बाधादिति। अयावद्द्रव्यभाविरूपादौ तु खण्डितत्वेन भेदस्यापि सत्त्वाद्भेदेनैव धर्मधर्मिभावोपपत्तेरित्याशङ्कावारणाय तत्रापि भेदाभेदविरोधपरिहाराय। ततो विशेषाङ्गीकार्य एवेत्युपपादनप्रयास इत्यतो यावद्द्रव्यभाविनामेव ग्रहणम्। अभेदस्य धर्मिणेति शेषः। तदुपपादकत्वेनेति। अभेदे सत्यधर्मधर्मिभावस्योपपादकत्वेनेत्यर्थः। अव्याप्तिरिति। येनानुगमस्य दोषत्वाभावे तदुच्छेदः प्रसज्येतेति भावः। अवृत्तिरिति। अव्याप्तिरिति वर्तते। उक्तरथलीयतर्कताण्डवे कार्यकारणभावावधारणादिकमिति सामान्यपरीक्षास्थादिपदसङ्गृहीतप्रदर्शनपरे लक्ष्यजातीये लक्षणजातीयस्यावृत्तिरव्याप्तिः। अलक्ष्यजातीये च तस्य वृत्तिरतिव्याप्तिरित्यादिनिरूपणात्तदनुसारेणेदमव्याप्तिनिर्वचनम्। अत्र च लक्षणजातीयस्येति पाठो मूलकोशानुसारी। लक्षणस्येति पाठस्तु लेखकप्रसादात्। उक्तविधाव्याप्तिस्वरूपान्तर्गतजातीयपदार्थं वक्तुं तमाक्षिपति यद्यपीति। एकजातीयत्वं नापैकजातिमत्त्वरूपं साजात्यं न विवक्षितम्। मन्मते जातेरप्यननुगतत्वादिति योजना। गोत्वादिजातीनां सादृश्य इति। गोशब्दप्रवृत्तिनिमित्तानामनन्तगोत्वानां गोशब्दप्रवृत्तिनिमित्तत्वाविशेषेण सादृश्ये विद्यमानेऽपीत्यर्थः। तथा देवदत्तशब्दप्रवृत्तिनिमित्तानामनन्तदेवदत्तत्वानामित्यादि योज्यम्। अत्र च कथञ्चिदिति शेषः। तन्निघ्नत्वे सति तद्गतभूयोधर्मवत्त्वस्य सादृश्यस्य भिन्नधर्मैरभावेनोक्तसादृश्यानुपपत्तेः। तद्गतधर्मसदृशधर्मवत्त्वस्यैव च सादृश्यपदेन विवक्षणे च तद्धर्मेष्वपि सादृश्यनिरूपणस्योक्तरीत्या कर्तव्यत्वेऽनवस्थादि प्रसज्यते। अतः सदृशाविमावित्यादिप्रतीतिसिद्धमखण्डमेव

सादृश्यं विवक्षणीयमिति गोत्वानां सादृश्यं कथञ्चिदेव प्राप्तम्। एवं देवदत्तत्वादितत्तज्जातीनामपि सादृश्यमूह्यम्। उक्तं च 'वैशेषिकनयस्थव्युत्पत्तिरपि हि सादृश्येनैवे'त्येतदनुभाष्यमूले। अस्ति तावत्सादृश्यं नाम पदार्थान्तरमिति। उक्तं च तट्टीकायाम्। सामान्याद्भिन्नं परमते सामान्यादिवदखण्डमेव सादृश्यमित्यङ्गीकारात्तत्सिद्धान्ते तदनुपपत्तिरित्याशयेनोक्तं **पदार्थान्तरमितीति**। एतेन तद्भिन्नत्वे सतीत्यादि निर्वचनानुपपत्तिशङ्कानिर्वचनपक्षानङ्गीकारादेव नावकाशवतीति सूचनात्। केचित्तु ययोर्यदन्योन्यधर्मिकान्योन्याभावप्रतियोगितानवच्छेदकभूयोधर्मवत्त्वं न तयोः सादृश्यमिति विवक्षितम्। अस्ति च दृश्यत्वेनाभिमतयोगो व्यक्त्योरुक्तं सादृश्यम्। एकगोधर्मिकान्योन्याभावस्याश्वादिप्रतियोगिकतया अश्वत्वादेस्तत्प्रतियोगितावच्छेदकत्वेऽपि सास्नादिमदादिप्रतियोगिकत्वाभावेन सास्नादिमत्त्वादेरुक्तान्योन्याभावप्रतियोगितानवच्छेदकतया तादृशभूयोधर्मवत्त्वस्य द्वितीयगोव्यक्तौ सत्त्वेन तथैव द्वितीयगोव्यक्तिधर्मिकान्योन्याभावप्रतियोगितानवच्छेदकसास्नादिमत्त्वधानकर्मत्वादिभूयोधर्मत्वस्यैकेति निर्दिष्टगोव्यक्तौ सत्त्वेन तयोः सादृश्यनिरूपणसंभवात्। **गौः सास्नादिमती नेति** प्रत्ययाभावे गोव्यक्तिधर्मिकान्योन्याभावस्य सास्नादिमत्त्वप्रतियोगितानवच्छेदकं तच्च **गोव्यक्त्यन्तरेऽस्तीति** तयोः सादृश्यप्राप्तिवत् **गौश्चलनादिमती नेति** प्रत्ययाभावेन गोधर्मिकान्योन्याभावप्रतियोगितानवच्छेदकचलनादिमत्त्वस्याप्यस्तीति तादृशधर्मवत्त्वेनाश्वादेरपि गोसादृश्यप्राप्तिवारणाय भूय इति विशेषणम्। न चोक्तप्रतियोगितावच्छेदकभूयोधर्मवत्त्वं गोव्यक्त्यन्तरस्येवाश्वादेरप्यस्तीति युक्तस्तद्वत्त्वावच्छेदः। अत्र सादृश्यं वक्तुर्येन रूपेण विवक्षितं तद्रूपस्योक्तान्योन्याभावप्रतियोगितानवच्छेदकत्वमित्युच्यत इति। गवाश्वयोः पशुत्वादिना सादृश्यविवक्षास्थले पशुत्वादेर्गोधर्मिकान्योन्याभावप्रतियोगितानवच्छेदकतया तादृशधर्मवत्त्वेन घटादिव्यावृत्तेन युक्तं गवाश्वयोरपि सादृश्यो नेति न दोषः। एवं च यो यद्धर्मिकान्योन्याभावप्रतियोगितानवच्छेदकविवक्षितधर्मवान् तस्य तेन सादृश्यमिति फलति। न चैवं सत्यतिप्रसङ्गोऽस्ति। गवाश्वयोरिव उक्तधर्मस्य घटादावभावात्। एवमन्यत्रापि सादृश्यं विवक्षानुसारेणैवेति न कश्चिद्दोषः। एवं तथापि तदादीत्युत्तरवाक्येऽपि गोत्वगोत्वत्वरूपविवक्षितधर्मवत्त्वस्यापरगोत्वे सत्त्वे वाऽनेकगोत्वधर्मिकान्योन्याभावप्रतियोगितानवच्छेदकत्वसादृश्यप्राप्तिवच्च यत्तदादिसर्वनामप्रवृत्तिनिमित्तघटत्वं देवदत्तत्वादिजातीनामपि तत्तद्घटत्वादिजातिधर्मिकान्योन्याभावप्रतियोगितानवच्छेदकं वक्तृबुद्धिविषयत्वरूपविवक्षितधर्मवत्त्वे च वक्तृबुद्धयविषयव्यावृत्तेन सादृश्यप्राप्तिः संभवतीति न सादृश्यनिर्वचनानुपपत्तिरित्यभिप्रेतमित्याहुः **यत्तदादीति**। यच्छब्दस्य घटत्वदेवदत्तत्वादिविशिष्टेषु शक्तिग्रहः। एवं तच्छब्दे तच्छब्दादेरपि प्रत्येकमुक्तेषु शक्तिग्रहः। तथा च एकगोशब्दप्रवृत्तिनिमित्तगोत्वानां गोशब्दप्रवृत्तिनिमित्तत्वेन रूपेण सादृश्यं कथञ्चिदुपपादयितुं शक्यम्। एकयच्छब्दप्रवृत्तिनिमित्तघटत्वदेवदत्तत्वादीनां तु भिन्नभिन्नशब्दप्रवृत्तिनिमित्तत्वसद्भावेन सादृश्यं न कथञ्चिदपीत्यर्थः। **घटत्वादीति**। घटत्वदेवदत्तत्वादिभिन्नभिन्नानन्तधर्मावच्छिन्नानन्तघटदेवदत्तादिव्यक्तिषु शक्तिग्रहे घटदेवदत्तादिविषयकवक्तृनिष्ठबुद्धेरुपाधितया स्वीकृतत्वादित्यर्थः। **सादृश्यत्वादिति**। तत्तद्वक्तृणां स्वस्वबुद्धिविषयघटे देवदत्तादिष्वेते घटदेवदत्तादयो यच्छब्दवाच्यास्तथा तच्छब्दवाच्या इत्येवमेकप्रकारबुद्धयुत्पादनात्तद्बुद्धीनां सादृश्यमिति भावः। अस्तु बुद्धेः सदृशत्वं तावतापि घटादिशब्दप्रवृत्तिनिमित्ते घटत्वादौ तु किमायातमित्यतस्तेषु साक्षात्सादृश्यसंभवेऽपि घटत्वदेवदत्तत्वादौ विशिष्टेषु यत्तदादिशब्दशक्तिग्रहोपयोगिप्रत्यासत्तिभूततदधिगतसादृश्यस्य विषयतासंबन्धेन बुद्धि-

निरूपकघटत्वादिच्यप्युपचारेण प्रवृत्तिस्वीकारात्पदानामर्थानां च साकाङ्क्षत्वादिवद्घटत्वसदृशदेवदत्तत्वं देवदत्तत्व-सदृशं च घटत्वमित्येवं घटत्वदेवदत्तत्वादीनामपि सादृश्याद्व्यामिव घटादीनामपि सदृशजात्याश्रयत्वं मयापि वक्तुं शक्यत एवेत्यर्थः । तदादिशब्दप्रवृत्तिनिमित्तघटत्वादाविति समस्तपदे पाठः । निमित्तमिति तु लेखकागतम् । अत्र शक्यत एवेत्यस्येत्याशयेनेत्युत्तरेण संबन्धः । एवमव्याप्तिमुपपाद्य परोक्तोपपादकत्वाभावे घटत्वादीनां सार्वत्रिकव्यवहारहेतुतानिश्चयो न संभवतीत्येतदपि दूषयति तदेव चेति । उपपादनमिति । यो यस्य सुत इत्यादौ विद्यमानयत्तच्छब्दार्थभूतपुत्रपित्रोरपि पितापुत्रविषयवक्तृनिष्ठसदृशबुद्धिगतसादृश्यस्य पितृत्वपुत्रत्वयोरुपचारेण वृत्तिस्वीकारात्सदृशपितृत्वादिजात्याश्रयत्वरूपमुपपादकत्वतन्त्रितृणां तत्तत्पुत्राणां चास्त्येवेति तद्विवक्षया सार्व-त्रिकव्यवहारहेतुत्वमप्युपपादयितुं शक्यत इत्यर्थः । एतत्प्रमेयस्य वक्ष्यमाणत्वं घटयति इत्यत्रादिशब्देति । त्वादाविति यनन्तरं समाधानमिति शेषः । अत्र वक्ष्यमाणत्वोक्त्यनुसारेणोत्तरटीकाया व्याख्यानाभावात्तद्व्याख्यावसरे आदिपदसङ्गृहीताव्याप्त्याद्युपपादनपरैतद्ग्रन्थानुसारेण व्याप्त्यवधारणादीत्यादिपदेन टीकास्थेनाव्याप्तिसार्वत्रिकव्यव-हारोपयिकत्वयोरपि ग्रहणम् । उपपादनं त्वत्रत्यमेव तत्र लिख्यतेऽस्माभिः । तत्रत्यव्याख्यानस्याप्यप्रयोगे इदमधिकत्वेन निक्षेप्यम् । तेन पूर्वोत्तरग्रन्थयोरेकवाक्यता भवतीति न दोषः ।

स०व्र०— आप्तिशब्दार्थान्तरमाह **मैवमिति ॥ यो यस्येति** । सर्वनाम्नां सर्वार्थपरामर्शार्थत्वात् यत्तच्छब्दयोः विशेषविषयत्वेऽपि विशेषतः सर्वत्रानुगतिरस्तीत्यर्थः ॥ **अदोषत्वादिति** । मा भूदेकमनेकवृत्ति, को दोष इत्यर्थः ॥ नन्वेकमनेकानुगतं यदि न स्यात् तदा तस्य व्याप्तिसार्वत्रिकव्यवहारहेतुते न स्यातामिति तत्राह **यथा चेति** ।

कुण्डल०— **सार्वत्रिकव्यवहारानौपयिकत्वमिति** । विनयादिभ्यः ष्ठगिति उपायशब्दात्स्वार्थे ठकि उपायाद् ह्रस्वत्वं चेत्यस्य पदमञ्जर्यां उपायशब्दात् ठकमुत्पाद्यति ह्रस्वत्वं चापयते । स च ह्रस्वः आकारस्य भवति । अन्यस्याचः स्वत एव ह्रस्वत्वादिति । व्याख्यातत्वादाकारस्य ह्रस्वत्वे किति चेत्यादिवृद्धौ ठस्येक इति ठस्य इकादेशे यस्येति चेत्यकारलोपे चौपयिकशब्दो निष्पन्नः । **यो यस्येति** । यत्तच्छब्दयोः विशेषविषयत्वेऽपि प्रातिस्विकरूपेण प्रकृततदर्थविषयकतया सर्वार्थविषयकत्वात् सार्वत्रिकव्यवहारहेतुता संभवति इत्यर्थः । केचित्तु सर्वनाम्नां सर्वार्थकत्वा-द्यत्तच्छब्दयोर्विशेषविषयत्वेऽपि विशेषतः सर्वानुगतिरस्तीत्याहुः । **सामान्यपरीक्षायामिति** । इति व्युत्पत्तिरपि हि सादृश्येनैव गम्यत इति अनुव्याख्यानव्याख्यानावसरे इत्यर्थः ।

वि०— **कालादिभेदेनेति** । यस्मिन्काले यत्र विषये आप्तस्यैव तत्रैव लक्ष्यतावच्छिन्नता तदा तत्र तस्मिन्निदं लक्षणमस्तीति नाव्याप्तिरूपविरोध इति भावः । **यत्तच्छब्दयोरननुगत इति** । तथा चोक्तरीत्या नाव्याप्ति-दोष इति भावः । **यो यस्य सुत इति** । सुतादिशब्दसमभिव्याहारेण यत्तच्छब्दयोः सुतादिरूपार्थविशेषविषयत्वेऽपि सुतादिशब्दानामपि सुतत्वाद्युपाध्यवच्छिन्नसर्वसुतादिबोधितया सर्वसङ्ग्राहकत्वस्य प्रयोगमर्यादया दृष्टत्वादिति भावः । ननु एकस्य लक्षणस्य अनेकवृत्तित्वाभाव एवाव्याप्तिर्नाम तत्कथं न दोषः कथं च यो यस्य सुत इत्यादावुपलब्धत्वमात्रेणाननुगतधर्मस्य सार्वत्रिकव्यवहारहेतुता इत्यतो नैकलक्षणस्य अनेकवृत्तित्वाभाव एवाव्याप्तिः

अपि तु लक्ष्येषु मध्ये केषु च लक्षणसद्भावो परत्राभाव एव तथा चैकलक्ष्यधर्मभूतलक्षणस्य सर्वलक्ष्येष्वभावेऽपि तत्तल्लक्ष्येषु तत्तद्धर्मभूतानाम् एकव्यक्तिगततत्तल्लक्षणसदृशानां सर्वत्र सद्भावात् नाव्याप्तिः। जात्यादेरननुगतत्वेऽपि सादृश्यमात्रेणैव सार्वत्रिकव्यवहारहेतुता च संभवतीत्यस्यार्थस्य व्युत्पत्तिरपि सादृश्येनैव गम्यते इत्यनुव्याख्यान-व्याख्यानावसरे वक्ष्यमाणत्वान्न दोष इत्याह **यथा चेति**।

चषक:— समाधत्ते **मैवमिति** ॥ **आप्तत्वाभिमते** आप्तत्वप्रकारकाभिमतिविषये, अज्ञातसन्दिग्धे-त्यादिनाभिहिते ॥ **कालादीति**। आप्तताया अव्याप्यवृत्तित्वोपगतेरिति भावः ॥ **यो यत्रैवंभूतः** यो यादृशार्थ-विषयकतत्त्वज्ञानाविप्रलिप्साविवक्षाकरणपाटववान् स तादृशार्थविषयकाप्तिमान्। अनपसृष्टस्य गमेर्व्यवहारार्थतां, तदुत्तरप्रत्ययस्य करणसाधनताम् अभिप्रेत्य सार्वत्रिकव्यवहारौपयिकप्रत्यायकता; तादृशगमेः सत्तार्थतां प्रत्ययस्य च भावसाधनतामाश्रित्यानेकवृत्तित्वप्रमापकताऽभिहितेति विकल्पोपपत्तिः ॥ **यो यस्य सुत इति**। सर्वनामनिरू-पितशक्यतावच्छेदकतापन्नदेवदत्तत्वादीनाम् अन्वयधीविषयतानिर्मुक्तबुद्धिविषयतावच्छेदकत्वेनोपलक्षितत्वाङ्गी-कारात् सार्वत्रिकव्यवहृतिनिर्वाहकता सङ्कच्छत इत्याशयः ॥ **अदोषत्वादिति**। न्यायनय इव सिद्धान्ते स्वसमा-नाधिकरणलक्ष्यतावच्छेदकाभिमतधर्मसमानाधिकरणाभावप्रतियोगितत्वस्य अव्याप्तिरूपत्वानङ्गीकारादित्यर्थः ॥ यावन्तो लक्ष्यतावच्छेदकाभिमतधर्माः प्रत्येकं तत्तद्व्यक्तित्वावच्छिन्नाश्रयीभूतकतिपयावृत्तिस्वसमानजातीयक-त्वस्यैव सिद्धान्तेऽव्याप्तिरूपतोपगत्या गवादिशब्दप्रवृत्तिनिमित्तगोत्वादिजातीनां सादृश्योपगमेन, सदृशजात्या-श्रयत्वस्यैव सार्वत्रिकव्यवहारनिर्वाहकतोपगमेन, न क्षतिरिति-अर्थस्य अविरोधलक्षणे 'व्युत्पत्तिरपि हि सादृश्येनैव गम्यत' इत्यनुव्याख्याव्याकृत्यवसरेऽभिधास्यमानतया सामञ्जस्यमित्यभिधत्ते **यथा चेति**।

काशी०— नन्वित्यादिपूर्वपक्षं प्रतिक्षिपति **मैवमिति**। विवक्षितार्थतत्त्वज्ञानादीनां समुदितानामेवाप्ति-पदार्थत्वं न तु प्रत्येकम्। एकैकसत्त्वेऽप्याप्तत्वाव्यवहारादित्याशयेनाह **इतीयमिति**। एतच्चतुष्टयमित्यर्थः। आप्तिः आप्तपदप्रवृत्तिनिमित्तम्। आप्तः प्रकृतसाध्यसाधनघटकाप्तपदार्थः। यद्यपि निर्दोषत्वादिलक्षणमपि निर्दोषमिति वक्ष्यते। तथाऽप्यत्र वक्ष्यमाणरीत्यानुकूलतर्कस्य स्फुटत्वादेतदुक्तिः। **आप्तत्वाभिमते** आप्तत्वेन संप्रतिपन्ने। **कदाचिदिति**। यदा यद्विषयतत्त्वज्ञानादिकं नास्ति तदानीमयमत्राप्त इति व्यवहारो न स्यादिति भावः। इष्टापत्त्या परिहरति **मा भूदिति**। तर्हि तदा तत्रायमनाप्त इति व्यवहारः स्यादित्यत्रापीष्टापत्तिमाह **तदेति**। तत्रेति शेषः। अनाप्त इति व्यवहर्तव्यः। नन्वेकस्मिन्नाप्तानाप्तव्यवहारयोर्विरोध इत्यत आह **कालादीति**। एकस्मिन्नपि काले विषयभेदेनाय-मत्राप्तो न तत्रेति व्यवहारयोरिवैकस्मिन्नपि विषये कालभेदेनायमिदानीमत्राप्तो न तदानीमिति व्यवहारयोरप्यविरोधादि-त्यर्थः। नन्वेकदैकस्मिन्पुरुष एवाप्तानाप्तव्यवहाराङ्गीकारे विषयभेदेनाप्तत्वं भिन्नं स्यात्। अन्यथा भावाभावयोः सहभावानुपपत्तेरिति साभिसन्धिः शङ्कते **एवं सतीति**। तत्राप्तः तत्राप्त इति व्यवहर्तव्यः। तद्वाचकसप्तम्यन्त-पदसमभिव्याहृताप्तपदव्यवहर्तव्य इत्यर्थः। आप्तपदप्रवृत्तिनिमित्तं तत्तद्विषयभेदभिन्नं स्यादिति यावत्। साभिसन्धि-त्वेदमङ्गीकरोति **अस्त्विति**। पूर्वपक्ष्यभिसन्धिमाविष्करोति **यत्तच्छब्दार्थयोरिति**। यत्तच्छब्दार्थघटितधर्मयो-रित्यर्थः। अननुगमो दोष इत्यनुषज्यते। यच्छब्दघटितवाक्येन लक्षणवत्तयाऽवगते तच्छब्दघटितवाक्येन

लक्ष्यपदव्यवहर्तव्यतावोधाद्धि व्यवहारः। तत्राप्तत्वरूपलक्षणस्याप्तपदव्यवहारस्य च यत्तच्छब्दार्थघटितत्वेऽननुगमः। यत्तच्छब्दयोर्विशेषविषयत्वात् । यः प्रमाविषयः स प्रमेयपदव्यवहर्तव्य इत्यादौ तु लक्षणव्यवहार्ययोर्यत्तच्छब्दार्थाप्रवेशान्न तदननुगम इति भावः। अत्र संभवदननुगमशब्दार्थं विकल्प्य सिद्धान्त्यभिमतव्याविष्कारेण समाधत्ते कोऽयमिति। दोषत्वेनोक्तोऽननुगमशब्दार्थः क इत्यर्थः। सार्वत्रिकेति। सर्वलक्ष्यनुगतेत्यर्थः। यो यस्येति। यत्तच्छब्दार्थघटितधर्मयोर्देवदत्तसुतत्वदेवदत्तधनभागित्वयोर्देवदत्तसुतमात्रनिष्ठत्वेऽपि यज्ञदत्तसाधारणव्यवहारप्रयोजकत्वदर्शनादित्यर्थः। अदोषत्वादिति। गन्धादेरेकस्यानेकवृत्तित्वाभावेऽपि पृथिवीलक्षणत्वादिदर्शनादिति भावः। ननु तार्किकादिमते गन्धादेः प्रत्येकमनेकवृत्तित्वाभावेऽपि गन्धत्वाद्यनुगतधर्मावच्छिन्नाभावस्य लक्ष्यव्यक्तावसत्त्वाल्लक्ष्यनिष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपं यावल्लक्ष्यवृत्तित्वमुपपद्यते। एवं वक्तृबुद्धिविषयतावच्छेदकत्वेनानुगतीकृतदेवदत्तायवच्छिन्नेषु यत्तत्पदशक्तिग्रहसंभवेन यत्तत्पदाभ्यां तत्तदर्थोपस्थितौ सार्वत्रिक्यव्यवहारः। सिद्धान्ते तु गन्धत्वादेरप्यननुगतत्वेन तदवच्छिन्नाभावस्य लक्ष्येऽपि वृत्तेरेकस्यानेकवृत्तित्वाभावोऽव्याप्तिकरत्वादोष एव। एवं वक्तृबुद्धिविषयतावच्छेदकत्वस्याप्यननुगतत्वेन यत्तत्पदयोर्यज्ञदत्तत्वायनेकधर्मावच्छिन्नेषु शक्तिग्रहस्याप्ययोगान्न सार्वत्रिक्यव्यवहारोपपत्तिरित्यत आह यथेति। अव्याप्तिपरिहारस्य कण्ठतोऽनुक्तेर्यथा नाव्याप्तिस्तथेत्युक्तम्। येन प्रकारेणाव्याप्तिपरिहारस्तं प्रकारमित्यर्थः। वक्ष्याम इति। वैशेषिकाधिकरणे व्युत्पत्तिरपि हि सादृश्येनैव गम्यत इत्यनुव्याख्याव्याख्यावसरे व्युत्पत्त्यर्थं नानुगतं सामान्यमङ्गीकरणीयं सादृश्येनैव तदुपपत्तेरित्यादिना। एतेन कार्यकारणभावावधारणादिकमपि समाहितमित्यन्तग्रन्थेन वक्ष्याम इत्यर्थः। यथा गोशब्दवाच्योऽयमित्युक्ते सन्निहितगोपिण्डे तत्सदृशगोपिण्डान्तरेषु च गोशब्दशक्तिग्रहस्तथा यत्तत्पदयोरपि बुद्धिस्थदेवदत्ते तत्सदृशेषु च शक्तिग्रहायत्तच्छब्दार्थघटितयोर्देवदत्तसुतत्वदेवदत्तधनभागित्वयोः सादृश्येनैव यज्ञदत्तसुतत्वादिमति यज्ञदत्तादिधनभागित्वव्यवहारनिर्वाहकत्वम्। एवं गन्धत्वादेरननुगतत्वेऽपि लक्ष्यगतदृशेष्वेकगन्धत्वसदृशगन्धत्वावच्छिन्नवत्त्वमात्रेण पृथिव्यां गन्धो नास्तीत्यप्रतीत्या गन्धत्वादेर्लक्ष्यनिष्ठाभावप्रतियोगितानवच्छेदकत्वोपपत्तेर्न लक्षणदोषोऽपीत्याशयः।

गूढ०— आप्तशब्दार्थं निरुक्तिं मैवम्। विवक्षितार्थेत्यादिना। ननु चतुष्टयानुगतस्यैकस्यावच्छेदकस्याभावाद्व्यापकतावच्छेदकप्रकारकानुमित्यसंभवेनानुकूलवक्त्रादिमत्वहेतुकाप्तवाक्यत्वसाधकानुमानानुपपत्तिः। न च चतुष्टयान्यान्यत्वमेव तदवच्छेदकमिति वाच्यम्। अनेकपदार्थज्ञानसापेक्षत्वेन तन्निष्ठगौरवत्वेन च गुरुत्वादिति चेत् मैवम्। निर्दोषत्वस्यैव चतुष्टयानुगतस्यावच्छेदकत्वोपपत्तेः। एवमपि निर्दोष आप्त इति लक्षणमिति वक्ष्यति। एतेन निर्दोषः प्रमितस्यैव वा वक्ता आप्त इत्यपि लक्षणद्वयं समाहितमिति। नन्वत्र निर्दोषत्वं नाम दोषाभावः स किं दोषप्रागभावः उत दोषध्वंसः। यद्वा दोषात्यन्ताभावः अथवा दोषवदन्योन्याभावः। आद्येऽपि किं यावद्दोषप्रागभाव उत यत्किञ्चिद्दोषप्रागभावः। नाद्यः। केषाञ्चिद्दोषाणां ध्वंसत्वेन व्यधिकरणानां चात्यन्ताभावेन यावत्प्रागभावस्य असंभवग्रस्तत्वात्। द्वितीये यत्किञ्चिद्दोषप्रागभावस्यानाप्तेऽपि सत्त्वेनातिव्याप्तेः। न द्वितीयः। उक्तविकल्पदोषग्रासात्। न तृतीयः। तथा सति स्वनिष्ठज्ञानादिदोषध्वंसवत आप्तत्वं न स्यात्। न चतुर्थः। यत्किञ्चिद्दोषवत्यपि दोषवदन्योन्याभावसत्त्वेनाप्तत्वापत्तेः। किञ्चिदंशे दोषशून्यस्य सर्वत्राप्तत्वप्रसङ्गश्चेति। मैवम्।

यो यत्रविषये यदा अज्ञानभ्रमप्रमादविप्रलिप्साकरणपाटवरूपदोषप्रागभावप्रध्वंसान्यतरवान् स तत्रविषये तदानीमाप्त इत्यर्थस्य विवक्षितत्वेन दोषाभावात् । नन्वेकस्यैवाप्तत्वमनाप्तत्वं च विरुद्धं कथमङ्गीक्रियत इत्यत आह **कालादिभेदेनेति** । आदिपदेन विषयविशेषपरिग्रहः । एवं चैकस्मिन्नेव काले वाक्यविशेषविषये आप्तत्वं विषयविशेषान्तरेऽनाप्तत्वमिति न विरोध इत्यर्थः । **यो यत्रेति** । यः यस्मिन्काले यत्र वाक्यविशेषे विवक्षादिमान् स तस्मिन्काले तत्र वाक्यविशेषे आप्त इत्युक्तं स्यादित्यर्थः । नन्वत्र यत्तच्छब्दयोर्विशेषविषयत्वं वा आप्तमात्रप्रयुक्तवाक्यविषयत्वं वा । नाद्यः । उक्तरीत्याऽव्याप्तेः । द्वितीय इत्याह **यत्तदिति** । **यो यस्येति** । पितुर्धनं पुत्रो गृह्णीयादित्यत्र कस्यचित्पुत्रो कस्यचिद्धनं गृह्णीयादित्याशङ्कायां यो यस्य पुत्र स तस्येति यत्तच्छब्दार्थानां अननुगतत्वेऽपि यथा सार्वत्रिकव्यवहारस्तथा प्रकृतेऽपीत्यर्थः । नन्वस्याननुगतत्वे आप्तान्तरस्याभावादव्याप्तिः । सार्वत्रिकव्यवहारश्च न स्यादित्यत्राह **यथा चेति** । सामान्यपरीक्षायां महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामित्यत्राधिकरणे सामान्यनिगकरणावसर इत्यर्थः ।

प्रदीपः— आप्तशब्दार्थं वदन्नुत्तरमाह **मैवमिति** । **यो यस्येति** सर्वनाम्नां सर्वार्थपरामर्शित्वाद्यत्तच्छब्दार्थयोः विशेषविषयत्वेऽपि विशेषतः सर्वानुगतिरस्तीत्यर्थः । **अदोषत्वादिति** । मा भूदेकमनेकवृत्तिको दोष इत्यर्थः । नन्वेकमनेकानुगतं यदि न स्यात् तदा **तस्य व्याप्तिः सार्वत्रिकव्यवहारहेतुत्वे न स्यातामिति** तत्राह **यथा वेति** ।

६२ सु०— एतेन 'निर्दोषः, प्रमितस्यैव वक्ता' इति लक्षणद्वयमपि समाहितं वेदितव्यम् । अनुवादस्य वादविषयत्वेन तत्प्रयोक्तुरप्याप्तत्वाविरोधात् ।

परि०— आप्तेरुक्तरूपत्वे **विमतमाप्तवाक्यमिति** प्रागुक्तप्रयोगे हेतोर्वक्ष्यमाणदिशा कथञ्चित् साध्यावैशिष्ट्यं मन्वानं प्रति लक्षणान्तरं समाधत्ते **एतेनेति** । यत्रैवंभूत इत्यननुगमस्यादोषत्वकथनेन इत्यर्थः । द्वितीयलक्षणे प्रागुक्तदोषं निराह **अनुवादस्येति** ।

गु०दी०— **निर्दोषः प्रमितस्यैव वक्ता** इत्यत्र निर्दोषत्वं नाम वाक्याप्रामाण्यनिमित्तदोषराहित्यं विवक्षितमतो नासंभवः ।

यादु०— **एतेनेति** । 'यो यत्रैवंभूतः स तत्राप्त' इति विवक्षितत्वेनेत्यर्थः । अज्ञातसन्दिग्धेत्यादिनोक्तं दोषमप्यनयैव विवक्षया निराकरोति **अनुवादस्येति** ॥ **आप्तत्वाविरोधादिति** । वादांश इति शेषः ।

आनन्दः— अत्रोक्तदोषं परिहरति **अनुवादस्येति** ।

श्रीनिधि०— **अनुवादस्येति** । मयेदमज्ञातं मयेदं सन्दिग्धमिति अनुवादो वादविषयकः वादस्य च प्रमाणविषयत्वादिति भावः । प्रमाणाविषयस्यापि कथनादवधारणानुपपत्तिरिति चेन्न । तात्पर्यविषयस्य प्रमाणदृष्टस्यैव कथनात् । अज्ञानसन्देहयोर्विषयनिरूप्यत्वमात्रेण लङाद्युपादानमिह तस्य तात्पर्यविषयतयेति ।

वा०चं०— 'निर्दोषः, प्रमितस्यैव वक्ते'ति लक्षणद्वयेऽपि 'यत्र विषय' इति विशेषणविवक्षामभ्युपेत्य एतद् दूषणपरिहारप्रकारमतिदिशति **एतेनेति** । 'मा भूत्तदाऽऽप्तावनाप्त इत्यङ्गीकारादि'त्यज्ञानसन्दिग्धवाक्यप्रयोक्तुः अलक्ष्यत्वाङ्गीकारवदनुवादवाक्यप्रयोक्तुरपि अलक्ष्यत्वमनुपपन्नमिति भ्रान्तिं, तस्य लक्ष्यत्वेऽपि लक्षणोपपादनेन परिहरति **अनुवादस्येति** ॥

वा०र०— **लक्षणद्वय इति** । निर्दोष आप्त इति लक्षणे यावत्प्रमाणदृष्टं तावत एव वक्तेत्यनेनोक्तप्रमितस्यैव वक्तेति लक्षणे चेत्येवं लक्षणद्वयेऽपीत्यर्थः । **अलक्ष्यत्वाङ्गीकारवदिति** । विवक्षितार्थतत्त्वज्ञानादिरूपाप्तिनिर्वचने आप्तत्वाभिमतेषु तदभावादित्यनेनाज्ञातादिप्रयोक्तुर्व्याप्तिचोदने तदाप्तावनाप्त इत्यङ्गीकारादित्यनेनालक्ष्यत्वान्न व्याप्तिरिति परिहारसिद्धेरिति भावः । **भ्रान्तिमिति** । अज्ञातवाक्यादिसमभिव्याहृतानुवादवाक्यस्य व्यवच्छेदकाभावेन प्रोक्तस्य व्यावर्तनप्रतीत्यनुदयायुक्ता भ्रान्तिरिति शेषम् । **लक्ष्यत्वेऽपीति** । अत्र तस्य लक्ष्यत्वाश्रयणेन परिहरतीति योजना । यदि लक्ष्यत्वाङ्गीकारस्तर्हि तत्राव्याप्तिः स्यादेवोक्तलक्षणाभावादित्यत उक्तं **लक्ष्यत्वेऽपि लक्षणोपपादनेनेति** । परोक्तलक्ष्यत्वमङ्गीकृत्यापि तत्र लक्षणसद्भावोपपादनेनेत्यर्थः । **वादविषयत्वेन** इत्यनेन तदुपपादनवादश्च प्रमित एवेति भावो मूले ।

स०व्र०— **एतेनेति** । व्याप्तिसार्वत्रिकव्यवहारहेतुत्वसंभवेनेत्यर्थः ॥ यदुक्तम् 'अज्ञातसन्दिग्धानुवाद-वाक्यप्रयोक्तुरनाप्तत्वं प्रसज्येते'ति तत्राज्ञातसन्दिग्धवाक्यप्रयोक्तुरनाप्तत्वम् अनुपपन्नमेव । अनुवादप्रयोक्तुस्तु नाप्तत्वं पुरोवादविषयकत्वादनुवादस्येत्याह **अनुवादस्येति** ।

कुण्डल०— **एतेनेति** । यत्रैवंभूतः स तत्राप्त इति पक्षे लक्षणस्य यत्तच्छब्दघटितत्वेऽपि सार्वत्रिक-व्यवहारहेतुत्वोपपादनेनेत्यर्थः । ननु यावत्प्रमाणप्रमितं तावत एव वक्तेति पक्षे अज्ञातसन्दिग्धानुवादवाक्य-प्रयोक्तुर्व्याप्तेरुक्तत्वात्प्रमितस्यैव लक्षणं कथं समाहितमित्यत आह **अनुवादस्येति** । अनुवादविषयस्य वादस्य वादत्वेन तदवच्छेदकयोरज्ञानसंदिग्धयोरज्ञातत्वेन सन्दिग्धत्वेन चानुवादित्वप्रमितनया अज्ञातसन्दिग्धानुवाद-वाक्यप्रयोक्तुः प्रमितस्यैव वक्तृत्वेनाप्तत्वमविरुद्धमित्यर्थः । अन्ये तु आप्तत्वाविरोधादिति अनुवादो अंश इति शेष इत्याहुः ।

वि०— **एतेनेति** । यो यत्रैवंभूतस्य तत्राप्त इत्यनेन यत्र विषये निर्दोष इत्यादुक्तदोषपरिहारसंभवादिति भावः । प्रमितस्यैवेत्यनेन यावत्प्रमाणप्रमितं तावत एव वक्तेत्युच्यते तर्ह्यज्ञानसन्दिग्धवाक्यप्रयोक्तुरनाप्तत्व-प्रसङ्गादित्युक्तदोषपरिहारः कथमित्यत आह **अनुवादस्येति** । अज्ञानसन्दिग्धवादस्य प्रमितत्वेन तद्विषयकानु-वादस्य यथावस्थितार्थविषयकत्वेन प्रमाणत्वात् तत्प्रयोक्तुराप्तत्वं न विरुद्ध्यते इति भावः ।

चक्रः— एतेन 'यत्र विषय' इत्यंशस्य लक्षणवाक्यघटकत्वोपगमेन ॥ अज्ञातेत्यादिनाभिहितक्षतिं प्रतिविधत्ते **अनुवादस्येति** । वादविषयकतत्त्वज्ञानं त्वज्ञातमेवेति भावः ।

काशी०— लाघवान्निर्दोषत्वादिकमपि लक्षणं संभवतीत्याशयेन तत्राशङ्कितदोषमुक्तप्रकारातिदेशेन परिहरति **एतेनेति** । आप्तत्वे विषयभेदभिन्नत्वस्य कालभेदेनाप्तत्वाविरोधस्य सार्वत्रिकव्यवहाराप्रयोजकत्वस्या-व्याप्त्यादिदोषशून्यत्वस्य चोपपादनेनेत्यर्थः । ननु यो यत्र निर्दोषः प्रमितस्यैव वक्ता स तत्राप्त इत्युक्त्या दोषान्तरवारणेऽपि कथमज्ञातसन्दिग्धानुवादवाक्यप्रयोक्तुराप्तत्वोपपत्तिरत आह **अनुवादस्येति** । वादिवाक्यत्वेन वादप्रतिपादनमनुवादस्तत्कर्तुश्च वादविषये निर्दोषत्वात्प्रमितमात्रवक्तृत्वाच्चाप्तत्वमुपपद्यते । वादार्थविषये त्वज्ञानादिमत्त्वान्नाप्तत्वमिति भावः । वाक्यार्थचन्द्रिकायामज्ञातसन्दिग्धवाक्यप्रयोक्तुरिवानुवादप्रयोक्तुरलक्ष्यत्वं नोपेयम् । लक्ष्यत्वेऽप्युपपत्तेरित्याह **अनुवादस्येति** इत्यवतारितम् ।

गूढ०— अत्रोक्तदोषं परिहरति **अनुवादस्येति**।

प्रदीपः— **एतेनेति** । व्याप्तिसार्वत्रिकव्यवहारहेतुत्वसंभवेनेत्यर्थः । यदुक्तमज्ञातसन्दिग्धानुवादप्रयोक्तु-राप्तत्वं पुरोवादविषयकत्वादनुवादस्येत्याह **अनुवादस्येति**।

६३ सु०— एवं च वक्तुरानुकूल्यमात्रेकदेश एव । विप्रलिप्सा च श्रोतृप्रसङ्गाननु-कूलतैकनिबन्धना तदभावे निवर्तत इति वक्त्राद्यानुकूल्यवत्तायाः आप्तवाक्यतया सुस्थः प्रतिबन्धः ।

परि०— प्रतिबन्धः अविनाभाव इत्यर्थः ।

गु०दी०— सुस्थः प्रतिबन्ध इत्यत्र प्रतिबन्धः साध्यं प्रति संबन्धः व्याप्तिरित्यर्थः ।

यादु०— यदर्थमाप्तस्वरूपं निरूपितं तदिदानीमाह **एवं चेति** । एवं 'निर्दोषः, प्रमितस्यैव वक्ते'ति पक्षद्वयेऽपि 'अन्यथा निरुपाधिकः साध्यसंबन्धो भज्येते'ति विपक्षबाधकतर्को द्रष्टव्यः ।

आनन्दः— नन्वरत्वनुकूलवक्त्रादिमत्त्वं आप्तवाक्यत्वं मास्तु विपक्षे बाधकाभावादप्रयोजको हेतुरित्यत आह **एवं चेति**।

कं०रा०— प्रतिबन्धः व्याप्तिः ।

श्रीनिधि०— वक्त्राद्यानुकूल्यस्य आप्तवाक्यतां प्रत्यप्रयोजकत्वं नेत्याह **एवं चेति** । विपक्षे चाकारण-कार्योत्पत्तिप्रसङ्गो बाधक इति हृदयम् । **प्रतिबन्ध इति** । संबन्ध इत्यर्थः ।

वा०चं०— 'ननु कोऽयमाप्तो नामे'ति प्रश्नपूर्वं विवक्षितार्थतत्त्वज्ञानादीनां चतुर्णामाप्तिस्वरूपत्वप्रतिपादनं यदर्थं कृतं तदाह **एवं चेति** । **प्रतिबन्धो** व्याप्तिः ।

वा०र०— यदर्थमिति । वक्त्रानुकूल्यस्यात्येकदेशत्वसिद्धयर्थमित्यर्थः । तदाहेत्यत्र तदात्येकदेशत्व-मप्रयोजकताशङ्कानिरासाय व्याघातदण्डसमर्पकं व्याप्तिसिद्धयुपयोगित्वेनाहेत्यर्थः ।

स०ब्र०— यदाऽऽप्तवाक्यत्वं वक्तृश्रोतृप्रसङ्गानुकूल्यवत्त्वेन साधयितुं शक्यते, तदा न विप्रलिप्सा-निबन्धनमप्रामाण्यम्, श्रोतृप्रसङ्गानुकूल्ये सति तदननुकूलतानिबन्धनविप्रलिप्साऽभावादित्याह **एवं चेति** । ननु निर्दोषवाक्यत्वादेरेवाप्तवाक्यत्वप्रयोजकत्वादनुकूलवक्त्रादिमत्त्वेऽप्याप्तवाक्यत्वाभावे बाधकाभावात्, निदर्शना-दर्शनाच्च, नायं हेतुः साध्यसाधनक्षम इत्याशङ्क्याह **इतीति** । निर्दोषवाक्यत्वादेराप्तवाक्यत्वानतिरिक्तत्वात्, आप्तवाक्यत्वाभावे अनुकूलवक्त्रादिमत्त्वायोगात्; यदनुकूलवक्त्रादिमत् तदाप्तवाक्यं यथा भारतादि, यन्नाप्तवाक्यं न तदनुकूलवक्त्रादिमत् यथा जैनादिवाक्यमिति व्याप्तेर्न दोष इत्यर्थः ।

कुण्डल०— ननु विवक्षितार्थतत्त्वज्ञानकरणपाटवविवक्षाणामेवाप्तत्वसंभवेऽपि अविप्रलिप्साऽपि किमर्थं निवेशनीया । आवश्यकत्वेऽपि तस्याः प्रकृते कथं लाभः । **येन साध्यसाधनयोर्व्याप्तिः सुस्था स्यात्** इत्यत आह **एवमिति । प्रतिबन्ध इति** । व्याप्तिलक्षणः संबन्ध इत्यर्थः ।

विद्व०— यदर्थमाप्तस्वरूपं निर्धारितं **तदिदानीमाह एवं चेति** । विवक्षितार्थतत्त्वज्ञानादिकमाप्तिः तद्वानाप्त इत्येवं सति अनुकूलेन वक्त्रा अनुकूलान् श्रोतॄन् प्रति **तदीयहितसाधनबोधनायोपदिष्टत्वादिति** हेतुशरीरप्रविष्टं यद्वक्तुरानुकूल्यं तद्विवक्षितार्थतत्त्वज्ञानविवक्षाकरणपाटवरूपाण्यैकदेश एवेति हेतोर्विमतस्य ब्रह्ममीमांसाशास्त्र-स्याप्तवाक्यत्वानङ्गीकारे तदेकदेशभूतं वक्त्रानुकूल्यं न स्यात् ब्राह्मण्याभावे तदेकदेशब्रह्मचर्याद्यभावदर्शनात् । एवमविप्रलिप्सापि विप्रलिप्साभावः । विप्रलिप्सा च श्रोतृप्रसङ्गाननुकूलतैकनिबन्धना तदभावे निवर्तत इत्यविप्र-लिप्साप्यस्य शास्त्रस्याङ्गीकार्या । अन्यथा हेतुशरीरप्रविष्टश्रोतृप्रसङ्गानुकूल्योः छेदापत्तिः । तदेवं विपक्षे बाधकसद्भावेन पक्षे व्यभिचारशङ्काभावात् **सुस्थः प्रतिबन्धः व्याप्तिरिति** भावः ।

चषकः— आप्तिस्वरूपनिरूपणं फलवत्तां नयति **एवं चेति** । भावसाधनघञन्तप्रत्युपसृष्टबध्नात्युपस्थाप्य-व्याप्त्यन्वयनिरूपितता तत्समभिव्याहृततलन्तप्रकृतिकतृतीययोच्यते ।

काशी०— एवमाप्तत्वेऽवधारितेऽनुकूलतर्कसंभवाद्व्याप्तिः सिद्धेत्याह **एवं चेति** । आद्यानुमाने हेतुमति साध्याभावशङ्का वक्तुर्विवक्षितार्थतत्त्वज्ञानाद्यभावेन वा विप्रलिप्सावत्त्वेन वा स्यात् । आद्ये व्याघात इत्याह **वक्तुरनुकूल्यमिति** । द्वितीये प्रमितप्रयोज्यप्रयोजकभावानुपपत्तिरित्याह **विप्रलिप्सा चेति** । वक्तुरिति वर्तते । इतीत्यनन्तरं विरोधिशङ्कानिवृत्तेरिति शेषः । प्रतिबन्धो व्याप्तिः । एवं च निर्दोषत्वादिरूपाप्तत्वस्य साध्यघटकत्वे-ऽप्यनुकूलतर्कः सिद्धः । अज्ञानादेरेवाप्रामाण्यकारणदोषत्वेनाप्रमितवक्तृत्वप्रयोजकत्वेन च विवक्षितार्थतत्त्वज्ञानादि-मत्यज्ञानाद्यसंभवेनैव सदोषत्वादिशङ्काया निवृत्तेरित्यवधेयम् । विमतं प्रमाणमाप्तवाक्यत्वादिति द्वितीयानुमाने हेतौ

प्रकृतविषये तत्त्वज्ञानादिमत्त्वरूपाप्तत्वनिवेश एव वक्ष्यमाणानुकूलतर्केण व्याप्तिसिद्धिः। अन्यथा यत्र क्वचिदाप्तत्वेऽपि प्रकृतविषयेऽप्रामाण्यसंभवात्।

गूढ०— नन्वस्तु अनुकूलवक्त्रादिमत्वं आप्तवाक्यत्वं मास्तु विपक्षे बाधकाभावादप्रयोजको हेतुरित्यत आह **एवं चेति**।

प्रदीपः— यदा चाप्तवाक्यत्वं वक्तृश्रोतृप्रसङ्गानुकूल्यवत्त्वेन साधयितुं शक्यते तदा न विप्रलिप्सानिबन्धनमप्रामाण्यं श्रोतृप्रसङ्गानुकूल्ये सति तदनुकूलतानिबन्धनविप्रलिप्साभावादित्याह **एवं चेति**। ननु निर्दोषवाक्यत्वादावाप्तवाक्यत्वादौ वाप्तवाक्यत्वं प्रयोजकत्वादनुकूलवक्त्रादिमत्त्वेनाप्तवाक्यत्वाभावे बाधकाभावान्निदर्शनादर्शनाच्च नायं हेतुः साध्यसाधनक्षम इत्याशङ्क्याह **इतीति**। निर्दोषवाक्यत्वादेराप्तवाक्यत्वानतिरिक्तत्वादाप्तवाक्यत्वाभावे अनुकूलवक्त्रादिमत्वायोगाद्यदनुकूलवक्त्रादिमत् तदाप्तवाक्यं यथा भारतादि यन्नाप्तवाक्यं न तदनुकूलवक्त्रादिमद्यथा जैमिन्यादि वाक्यमिति व्याप्तेर्न दोष इत्यर्थः।

६४ सु०— नन्वाप्तवाक्यता तावत् स्वकपोलकल्पितेषु मालतीमाधवादिषु प्रामाण्यं व्यभिचरति। न हि नाटकादिप्रबन्धं विरचयन्नपि कदाचिदुक्तलक्षणोपपन्नो न भवति भवभूतिरिति चेन्न। 'यो यत्रैवंभूत' इत्यनेनैवोक्तोत्तरत्वात्, आप्तिमूलवाक्यस्याप्तवाक्यतया विवक्षितत्वाच्च।

परि०— विमतं प्रमाणमाप्तवाक्यत्वादिति द्वितीयानुमानेऽव्याप्तिमाक्षिप्य समाधत्ते **नन्वि**-त्यादिना **कार्योत्पत्तिप्रसङ्गादित्यन्तेन**। मालतीमाधवेति भवभूतिनामककवीश्वरकृतनाटकग्रन्थस्य नामधेयम्। आदिपदेन मेघसन्देशादेर्मानान्तरासिद्धकथाप्रतिपादकप्रबन्धस्य सङ्ग्रहः॥ **उक्तोत्तरत्वा**-**दिति**। मालतीमाधवादिग्रन्थविषये तस्यानाप्तत्वेन हेतोरेवाभावान्न व्यभिचार इति भावः।

यादु०— एवमाद्यानुमाने अनुकूलतर्कोक्त्या व्याप्तिमुपपाद्य, द्वितीयानुमानेऽपि तामुपपादयितुमाह **नन्वाप्तवाक्यतेति**॥ **यो यत्रैवंभूत इत्यनेनैवेति**। तथा च यो यत्र एवंभूतः, तद्वाक्यत्वमाप्तवाक्यत्वम्। इदं च न मालतीमाधवादिषु। तत्प्रणयनकाले तस्यैवंभूतत्वाभावस्य 'स्वकपोलकल्पितेष्वि'ति वदता त्वयैवोक्तत्वादिति भावः॥

आनन्दः— यो यत्रैवंभूत इत्येतददृष्ट्वा शङ्कते **नन्विति**। किञ्चात्राप्तवाक्यत्वं नामाप्तिमूलवाक्यत्वं विवक्षितं तस्य च नाटकादावभावान्न व्यभिचार इत्याह **आप्तीति**।

वा०चं०— एवं विवक्षितार्थतत्त्वज्ञानादीनां चतुर्णामाप्तिशब्दार्थताविवक्षाप्रयोजनत्वेन प्रथमानुमाने व्याप्तिसिद्धिमुपपाद्य, 'यो यत्रे'त्यंशस्याप्तलक्षणे विवक्षायाः प्रयोजनस्य प्रथमानुमाने अभावात्, द्वितीयानुमाने

व्यभिचारपरिहारलक्षणं तत्प्रयोजनमभिप्रेत्य; तच्चिवर्त्यव्यभिचारं शङ्कते नन्विति । स्वकपोलेति साध्याभावोपपादनम् । न हीति साधनसद्भावोपपादनम् । यो यत्रेति । आप्तलक्षणे 'यो यत्रे'ति विशेषणप्रक्षेपेण, यो यद्विषये विवक्षितार्थतत्त्वज्ञानादिमांस्तद्विषये तद्वाक्यस्याप्तवाक्यताहेत्वर्थत्वेनोक्तत्वादित्यर्थः ॥ एवम् आप्तलक्षणे 'यो यत्रे'ति विवक्षितत्वात् तत्सामर्थ्यलब्धार्थानुसारेण व्यभिचारः परिहृतः । अधुना तु लक्षणे विवक्षितस्य 'यो यत्रे'त्यंशस्य हेतुशरीराप्रवेशेऽपि आप्तिमद्वाक्यत्वेनाप्तिमूलकत्वस्य विवक्षाया व्यभिचारं परिहरति आप्तीति ।

वा०२०— प्रथमानुमान इति । विमतमाप्तवाक्यमनुकूलवक्त्रादिमत्त्वादिति प्रथमेत्यर्थः । आप्तिशब्दार्थेति । चतुर्णां या आप्तिशब्दार्थतया विवक्षा तावन्मात्रप्रयोजकत्वेन व्याप्तिसिद्धिं प्रथमानुमानीय यत्रानुकूलवक्त्रादिमत्त्वं तत्राप्तवाक्यतेति व्याप्तिसिद्धिमुपपादयेत्यर्थः । उक्तव्याप्तिसिद्धिः नादृशविवक्षयोपपादयितुं यावत् । यो यत्रेत्यंशस्येति । एवं सति यो यत्रैवंभूत इति पूर्वत्र सिद्धान्त्यभिमतपक्षाशङ्कनात् तत्रत्यविवक्षितार्थतत्त्वज्ञानादिभागस्य व्याप्तिसिद्ध्यर्थतया आप्तत्वलक्षणे प्रवेशस्यावश्यकत्वेऽपि यो यत्रेत्यंशस्य नाप्तत्वे प्रवेश आवश्यकः । यत्रानुकूलेत्यादि व्याप्तिशरीरे तदप्रवेशायां व्यभिचाराभावात् । साध्यगतविशेषणानां व्यभिचारवारणप्रयोजनकत्वाभावाच्च । एवं च प्रथमानुमाने आप्तत्वं विवक्षितार्थतत्त्वज्ञानादिरूपमेव विवक्षितम् । विमतं प्रमाणम् आप्तवाक्यत्वादिति द्वितीयानुमाने तु विवक्षितार्थत्वादि चतुर्णामाप्तत्वे प्रवेशविवक्षायामपि विशिष्टस्य व्यभिचार आयातीति हेतौ व्यभिचारवारकतया यो यत्रेत्यंशो व्याप्तत्वे प्रवेशनीयः इत्येवं प्रयोगभेदेन विशिष्टार्थलक्षणस्यांपयोग इत्याशयेनेत्यर्थः । तत्प्रयोजनं विवक्षाप्रयोजनं द्वितीयानुमान एव तत्प्रयोजनं ज्ञेयमिति योज्यम् । विशेषणप्रक्षेपेति । एवं सति यो यत्रैवंभूत इति पूर्वशङ्कावाक्ये प्रक्षेपेणेत्यर्थः । एवमुत्तरत्रापि । आप्तवाक्यताहेत्विति । अत्र हेतुर्गिनि हेतुवाक्यं गृह्यते तदर्थत्वेनोक्तत्वादित्यर्थः । लब्धार्थेति । यो यद्विषये इत्यादिरूपलब्धार्थत्यर्थः । हेतुशरीराप्रवेशेऽपीति । अयमर्थः । आप्तिमद्वाक्यत्वेनेत्यस्याप्तत्वहेत्वर्थो हि आप्तिमद्वाक्यत्वं तदर्थत्वेनेत्यर्थः । तथा च आप्तवाक्यत्वस्याप्तिमद्वाक्यत्वपर्यवसानद्वारा आप्तिमूलकवाक्यत्वे पर्यवसाने सति स्वकपोलकल्पितमालतीमाधवादिष्वाप्तिमूलकवाक्यत्वरूपत्वस्याप्तवाक्यत्वस्याभावेन तत्र व्यभिचारो नेति किलाप्तिमूलेति मूलार्थः । न चायं युज्यते । आप्तलक्षणे यो यत्रेत्यंशस्यापि सत्त्वेनोक्ताप्तिमद्वाक्यत्वस्य च मालतीमाधवादिष्वभावेन तत्र व्यभिचारप्रसक्त्या तद्वारणाय आप्तिमूलकत्वाविवक्षायाः वैयर्थ्यापातादिति न शङ्कनीयम् । आप्तलक्षणे यो यत्रेत्यंशस्य प्रवेशाङ्गीकारेऽपि हेतुकृताप्तवाक्यत्वं शरीरान्तर्गताप्तत्वे यो यत्रेत्यंशपरित्यागेन विवक्षितार्थतत्त्वज्ञानादिचतुष्टयमात्रस्य विवक्षणात्तदा च मालतीमाधवादिषु हेतुप्राप्त्या तत्र व्यभिचारप्रसक्त्युपपत्त्या तद्वारणायोक्तरूपाप्तिमूलकत्वमात्रविवक्षोपपत्तेरिति ।

स०ग्र०— व्याप्तेः सार्वत्रिकव्यवहारहेतुत्वसिद्ध्यर्थं यावद्भनुगतत्वमाप्तत्वं मन्यमानश्चोदयति नन्विति । मालतीमाधवादयो नाटकग्रन्थविशेषाः । अननुगतस्यापि व्याप्तिसार्वत्रिकव्यवहारोपयोगित्वसंभवान्न व्यभिचार इति परिहरति न इति ॥ प्रकारान्तरेण व्यभिचारं वारयति आप्तीति ।

कुण्डल०— आप्तवाक्यत्वसाधकानुमानस्येव प्रामाण्यसाधकानुमानस्यापि व्याप्तिं चोद्यपूर्वकमुपपादयति **नन्वाप्तवाक्यतेत्यादिना** । यत्तच्छब्दघटितत्वं विनाऽप्यतिप्रसङ्गनिवारणायाप्तवाक्यत्वं निर्वक्ति **आप्तिमूलेति** । निरुक्ताप्तिविशिष्टपुरुषप्रणीतवाक्यस्येत्यर्थः ।

विद्व०— द्वितीयानुमानस्यापि व्यभिचारमाशङ्क्य निराकरोति **नन्वाप्तवाक्यतेति** । नियामकप्रमाणमन्तरेणोच्छ्रकतया स्वकपोलमात्रकल्पितेष्वित्यर्थः । एतच्च साध्याभावोपपादनम् । साधनसद्भावं दर्शयति **न हीति** । यो यत्रेति मालतीमाधवादिकर्तुर्भवभूतेः प्रणयनकाले एवंभूतत्वाभावेन तद्वाक्ये आप्तवाक्यत्वरूपहेतोरेवाभावात् न व्यभिचार इति भावः ।

चक्रकः— साधनानुमानेऽनुकूलतर्कसानाध्याऽऽपादितनिरङ्कुशताकव्याप्तिं उपपाद्य फलितानुमानेऽपि तादृशीं प्रतिपिपादयिषुरनैकान्त्यमाशङ्क्ते **नन्वित्यादि** ॥ **यो यत्रेत्यादि** । 'ब्रह्ममीमांसाशास्त्रं स्वप्रतिपाद्यार्थविशेषघटितप्रामाण्यकं स्वप्रतिपाद्यगोचरतत्त्वज्ञानादिमत्प्रणीतत्वादि'त्यर्थविशेषघटितमूर्तिकयोरेव हेतुसाध्ययोर्गादृनतया, 'यादृशार्थगोचरतत्त्वज्ञानादिमत्प्रणीतो यः स तादृशार्थघटितप्रामाण्यक' इति सामान्यव्याप्तेरेवाश्रयितव्यतया, भवभूत्यादौ मालतीमाधवादिप्रतिपाद्यगोचरतत्त्वज्ञानादिसत्तारहित्येन तादृशनाटके तादृशार्थघटितत्वानुमतावित्रहेण तादृक्षत्वनवकाशादिति भावः । हेतुसाध्यशरीरघटकतयार्थविशेषानिवेशेऽपि हेतुकृताप्तवाक्यत्वव्याप्त्यवच्छिन्नकर्तृताकप्रणयनक्रियाकर्मत्वरूपतया मालतीमाधवादिप्रणेतृतावच्छेदककोटावाप्तिनिवेशाविरहनियन्त्रितनद्धटितहेतुमत्त्वाभावेन न क्षतिरित्याशयेनाह **आप्तिमूलेति** ।

काशी०— अतस्तत्र तन्निवेशं स्पष्टयितुमाशङ्क्ते **नन्विति** । यद्यपि यो यत्रैवंभूतः स तत्राप्त इत्यादिकमुक्तम् । तथाऽपि तेनाप्तत्वस्य विषयभेदेन भेद एवोक्तो न तु प्रकृतविषये आप्तत्वस्य हेतौ प्रवेशः । तथा च यत्र क्वचिदाप्तो यो भवभूतिस्तद्वाक्यत्वस्य मालतीमाधवाख्यप्रकरणादौ सत्त्वात् प्रामाण्याभावाच्च व्यभिचारः । न च तत्र विवक्षितार्थतत्त्वज्ञानाद्यभावान्न व्यभिचार इति वाच्यम् । यद्विषये तस्य तत्त्वज्ञानादिकमस्ति तस्यापि कदाचिद्विवक्षितार्थत्वसंभवात् । विवक्षितत्वेनार्थनिवेशे पृथग्विवक्षानिवेशवैयर्थ्यापत्तेश्चेति भावः । एवं सति प्रथमानुमानेऽप्याप्तज्ञानादिमूलकवाक्येऽनुकूलवक्त्रादिमत्त्वस्याप्युक्तरीत्या संभवाद्व्यभिचारः संभवतीति शङ्काऽऽप्तवाक्यत्वगर्भोक्त्या गर्भस्रावेणैव निरस्ता वेदितव्या । स्वकपोलकल्पितेत्यनेन प्रामाण्यरूपसाध्यासत्त्वं न हीत्यनेन हेतुगतत्वं चोपपादितम् । न चाप्तविशिष्टवाक्यत्वस्यैव हेतुत्वान्न कादाचित्काप्तिमादाय दोष इति वाच्यम् । एकदेशेऽतिव्याप्तिविशिष्टत्वस्यापि संभवात् । यो यत्रेत्यनेन प्रकृतविषये तत्त्वज्ञानादिमद्वाक्यत्वमेव प्रामाण्यसाधकत्वेन विवक्षितम् । अन्यथा तत्कथनस्य प्रकृतानुपयोगात् । तथा च भवभूतेः प्रकृतविषयेऽविप्रलिप्साभावान्न व्यभिचार इत्याशयेन समाधत्ते **नेति** । उक्तोत्तरत्वादित्यनेन पूर्वानुमाने साध्यतयाऽपि प्रकृतविषये आप्तवाक्यत्वमेव विवक्षितमिति सूचितम् । प्रामाण्यसाधकस्यैव तत्र साध्यत्वात् । अन्यथा जिनादेरपि क्वचिदाप्तत्वसंभवेन तद्वाक्यत्वस्य जैनादावपि सत्त्वेन तत्र वक्त्राद्यानुकूल्यव्यावृत्त्युक्तिविरोधात् । नन्वेवं सत्येतच्छास्त्रमेतच्छास्त्रविवक्षितार्थं

विष्णूत्तमत्वादावाप्तवाक्यम् । तद्विषये वक्त्राद्यानुकूल्यवत्त्वादित्युक्तं स्यात् । तथा चैतच्छास्त्रविवक्षितार्थज्ञान-योग्यतारूपश्रोत्रानुकूल्यस्य तज्ज्ञानजन्यश्रोतृप्रयोजनोद्देशरूपप्रसङ्गानुकूल्यस्य च जैनादावसत्त्वात्तत्र वक्त्रानुकूल्य-व्यावृत्त्युक्तिरनुपपन्नैवेति चेन्न । यद्विषये यद्वक्त्राद्यानुकूल्योपेतं तद्विषये तदाप्तवाक्यमिति सामान्यव्याप्तौ जैनादौ वक्त्राद्यानुकूल्यव्यावृत्त्युपपत्तेः । एवं च वाक्यार्थचन्द्रिकायां प्रथमानुमाने यो यत्रेत्यंशस्यासलक्षणे विवक्षायाः प्रयोजनाभावोक्तिर्द्वितीयानुमाने व्यभिचारवारकतया तद्विवक्षाया आवश्यकत्वे तत्र हेत्वसिद्धिपरिहारानुरोधेनैव प्रथमानुमानेऽपि तद्विवक्षा न तु स्वातन्त्र्येण तत्प्रयोजनमस्तीत्यभिप्रायाऽवसेया । प्रामाण्यसाधकहेतौ प्रकृत-विषयस्य विशिष्यानिवेशपक्षमपि लाघवादाह **आप्तिमूलकेति** । तत्त्वज्ञानादिमूलकेत्यर्थः । न चाप्रमाणवाक्यस्या-प्येकदेशे तत्त्वज्ञानादिमूलकत्वसंभवाद्व्यभिचार इति वाच्यम् । यदंशे तत्त्वज्ञानादिमूलकत्वं तदंशे प्रामाण्यस्यापि सत्त्वात् । आप्तिमूलकेत्यनेन भ्रान्त्यादिमूलकत्वाभावस्यैव विवक्षितत्वाच्च । एवं च प्रथमानुमानेऽप्युक्ताप्तिमूलकत्वं साध्यम् । अनुकूलश्रोतृहितसाधनत्वबोधोद्देशविशिष्टवक्त्रानुकूल्यमूलकत्वं हेतुरित्यवधेयम् ।

गूढ०— यो यत्रैवंभूत इत्येतददृष्ट्वा शङ्कते **नन्विति** । किन्त्वाप्तवाक्यत्वं नामाप्तिमूलवाक्यत्वं विवक्षितम् । तस्य च नाटकादावभावान्न व्यभिचार इत्याह **आप्तीति** ।

प्रदीपः— व्याप्तिसार्वत्रिकव्यवहारसिद्धत्वं यावद्भस्तुसत्त्वमाप्तत्वं मन्यमानश्चोदयति **नन्विति** । अननुगत-स्यापि व्याप्तिसार्वत्रिकव्यवहारोपयोगित्वसंभवान्न व्यभिचार इति परिहरति **य इति** । प्रकारान्तरेण व्यभिचारं वारयति **आप्तीति** ।

६५ सु०— अबोधकं विपरीतबोधकं वा वाक्यमप्रमाणमित्युच्यते । तत्राबोधकं वक्तुरपटुकरणतया भवति, विपरीतबोधकं च विपरीतज्ञानादिना, इत्याप्तिपूर्वकवाक्यत्वस्य प्रामाण्येन प्रतिबन्धसिद्धिः । अन्यथा कारणेन विना कार्योत्पत्तिप्रसङ्गादिति ।

परि०— हेतोरप्रयोजकत्वनिरासाय विपक्षे बाधकं व्यनक्ति **अबोधकमित्यादिना** ॥ **अन्यथेति** । अपटुकरणत्वादेरभावेऽप्यप्रामाण्ये इत्यर्थः ।

यादु०— एवं व्यभिचारमपाकृत्याप्रयोजकतापरिहाराय विपक्षबाधकतर्कं वक्तुमाह **अबोधकमिति** ॥ **अन्यथेति** । आप्तवाक्यत्वमङ्गीकृत्य प्रामाण्यानङ्गीकार इत्यर्थः ॥ **कारणेन विनेति** । आप्तवाक्यत्वाङ्गीकारे उक्तरीत्याऽप्रामाण्यकारणाभावप्राप्तेरित्यर्थः ॥

आनन्दः— ननु प्रामाण्याभावेऽप्यस्तु आप्तवाक्यत्वमत आह **अबोधकमिति** । **अन्यथेति** । अप्रामाण्य-कारणदोषाभावेऽपि अप्रामाण्य इत्यर्थः ।

श्रीनिधि०— विमतं प्रमाणमाप्तवाक्यत्वादित्यनुमाने अप्रयोजकत्वं निरस्यति **अबोधकमिति**।

वा०चं०— द्वितीयानुमाने अप्रयोजकत्वशङ्कायाम् अकारणकार्योत्पत्तिरूपं (अप्रामाण्यरूपकार्येत्यर्थः।) बाधकं वक्तुं करणाप्रामाण्यस्वरूपं विवृण्वन्नेव वाक्यप्रामाण्यकारणान्याह **अबोधकमिति**।

वा०र०— **अप्रामाण्यस्वरूपमिति** । यद्यपि निर्दोषः शब्दः आगम इत्यत्रत्यनिर्दोषत्वनिरूपणपरपद्धतावबोधकत्वं विपरीतबोधकत्वमित्येवमबोधकत्वविपरीतबोधकत्वयोरप्रामाण्यकारणदोषेषु उक्तियोग्यतया च विपरीतबोधकत्वस्य च निरास इति चोक्तम् । तथाप्युभयमिदं दोषरूपमप्यप्रामाण्यरूपतया विवक्षितम् । तत्कारणदोषास्तु निरन्वयादयोऽन्ये विवक्षिताः । अत एव तत्त्वनिर्णयटीकायामप्रामाण्यं खल्वबोधकत्वं विपरीतबोधकत्वं चेत्याद्युक्तमित्यादि ज्ञेयम् । **वाक्याप्रामाण्यकारणानीति** । मैवं विवक्षितार्थतत्त्वज्ञानमित्यादि ग्रन्थोक्तासलक्षणे विवक्षायाऽविप्रलिप्सायाश्चोक्तत्वाट्टीकाकृता च विवक्षाभावे वाक्यस्वरूपासिद्धेः विप्रलिप्सायां च विपरीतबोधकत्वप्राप्तेश्चोक्तत्वात् तदुभयनिरासप्रयोजनकविवक्षाऽविप्रलिप्सयोरपि ग्रहणस्य अत्र आप्तिशरीरान्तर्भूतत्वेन वाच्यत्वाद्विपरीतज्ञानादिनेत्यादिपदेन **विप्रलिप्सायाः** ग्रहणस्य सिद्धत्वाद्विवक्षाभावे वाक्यस्वरूपासिद्धेश्च उपलक्षणया सङ्ग्रहस्याभिप्रेतत्वात्सर्वेषामप्रामाण्यकारणानां सङ्ग्रहो युक्त इति ज्ञेयम् । **अन्यथेति** मूलम् । अप्रामाण्यकारणदोषाभावेऽप्यप्रामाण्य इत्यर्थः ।

स०व्र०— 'कथमाप्तिमूलवाक्यत्वस्य प्रामाण्येनाव्यभिचरिता व्याप्तिः, आप्तिमूलवाक्यत्वेऽपि प्रामाण्याभावे किं बाधकम्' इत्याशङ्क्य आप्तिशब्दार्थपर्यालोचनया व्याप्तिं, विपक्षे बाधकं चाह **अबोधकमिति**।

कुण्डल०— आप्तिमूलवाक्यत्वलक्षणाप्तवाक्यत्वस्य प्रामाण्यप्रयोजकत्वं व्यतिरेकमुखेनोपपादयति **अबोधकमित्यादिना**। अन्यथेति पौरुषेयवाक्यनिष्ठप्रामाण्यं प्रत्यपि मूलवाक्यत्वस्य प्रयोजकत्वानङ्गीकार इत्यर्थः। यद्वा अबोधकादिवाक्यनिष्ठाप्रामाण्यं प्रत्यपटुकरणादिमद्वक्तृत्वस्याप्रयोजकत्व इत्यर्थः।

विट्ठ०— अत्र व्याप्तिनिर्धारणाय अप्रयोजकताशङ्कानिवृत्तये विपक्षे बाधकतर्कं वक्तुमाह **अबोधकमिति**। **प्रतिबन्धसिद्धिरिति** । पटुकरणत्वादिरूपाप्तिपूर्वकवाक्यत्वादिरूपहेत्वङ्गीकारेणैवाबोधकत्वादिनिवृत्तेः प्रामाण्यं नियतमेवेति व्याप्तिसिद्धिरित्यर्थः । विपक्षे बाधकतर्कमाह **अन्यथेति** । बोधकत्वादिव्याप्तविवक्षितार्थतत्त्वज्ञानपटुकरणत्वादिरूपाप्तत्वरूपहेतुमङ्गीकृत्य साध्यानङ्गीकारे प्रत्युत प्रामाण्यस्यैवाङ्गीकारे अबोधकत्वविपरीतबोधकत्वरूपकारणेन विना प्रामाण्यरूपकार्योत्पत्तिप्रसङ्गादित्यर्थः । अपटुकरणत्वादिकारणेन विना बोधकत्वादिकार्योत्पत्तिप्रसङ्ग इति वा।

चषकः— एवमनैकान्त्यनिरसनानन्तर्येणाप्रयोजकतां 'यदीदमप्रमाणं स्यात् तदा अप्रामाण्यनियामकाबोधकत्वविपरीतबोधकत्वान्यतरविशेषितं स्यात्' 'यदि दर्शितान्यतरविशेषितं स्यात् तदा तन्नियामककरणापाटवविपरीतज्ञानादिपूर्वकं स्यादि'ति बाधकतर्कप्रदर्शनेन **प्रतिविधित्सते अबोधकमिति**।

काशी०— एवं व्यभिचारं निरस्यानुकूलतर्केण व्याप्तिमुपपादयति अबोधकमिति । विपरीतबोधकं भ्रमात्मकबोधजनकम् । अप्रमाणं प्रमित्यजनकम् । अबोधकत्वं विपरीतबोधकत्वं चाप्रामाण्यप्रयोजकमिति यावत् । अस्यार्थस्य प्रमितत्वसिद्धयर्थमित्युच्यत इत्युक्तम् । तत्र तयोर्मध्ये । विपरीतज्ञानं वक्तृदोषादिना विप्रलिप्सादिग्रहः । तत्र इति । अतोऽपटुकारणत्वादेरबोधकत्वादिद्वाराऽप्रामाण्यप्रयोजकत्वादिति यावत् । आप्तिपूर्वकत्वाक्यत्वाभ्यां निरुक्ताप्तिविशिष्टवाक्यत्वस्यामिमूलकवाक्यत्वस्य च । प्रतिबन्धसिद्धिः व्याप्तिसिद्धिः । प्रयोजकाभावं प्रयोज्याभावस्यावश्यकत्वादिति भावः । आप्तिपूर्वकवाक्यस्याप्यप्रामाण्याङ्गीकारे उक्तप्रयोज्यप्रयोजकभावस्यैव व्याघात इत्याह अन्यथेति ।

गूढ०— ननु प्रामाण्याभावेऽप्यस्तु आप्तवाक्यत्वमत आह अबोधकमिति । अन्यथेति । अप्रामाण्यकारणदोषाभावेऽप्यप्रामाण्य इत्यर्थः ।

प्रदीपः— कथमाप्तिमूलवाक्यत्वस्य प्रामाण्येनाव्यभिचारिता व्याप्तिः । आप्तिमूलवाक्यत्वेऽपि प्रामाण्याभावे किं बाधकमित्याशङ्क्याव्याप्तिशब्दार्थपर्यालोचनया व्याप्तिविपक्षे बाधकं चाह अबोधकमिति ।

हेतूनां परंपरया साध्यसंबन्धसमर्थनम्—

६६ सु०— ननु चानुकूलवक्त्रादिमत्तया प्रामाण्यसाधनमेवात्र व्याख्यायताम् । किमाप्तवाक्यतासाधनं मध्ये व्याख्यायते । व्याप्तिपक्षधर्मतयोस्तुल्यत्वात् । न हि यद् यद्व्यापकस्य व्यापकं तत्तस्याव्यापकमिति संभवति । अनुकूलवक्त्रादिमत्तया आप्तवाक्यतासाधने वक्त्रानुकूल्यस्य आप्तैकदेशत्वेन साध्यविशिष्टता च स्यात् । 'वक्तृश्रोतृप्रसक्तीनामि'ति वाक्यं तु शङ्कितस्य उपाधेः साधनव्यापकताप्रदर्शनार्थं भविष्यति ।

परि०— वक्तृश्रोत्रित्यादित्रिपाद्याः स्वकृतव्याख्यानस्य दार्ढ्याय शङ्कोत्तराभ्यां परीक्षामारभते ननु चेत्यादिना को निवारयितेत्यन्तेन ॥ अत्रेति । वक्त्रित्यादित्रिपाद्यामित्यर्थः ॥ व्याप्तिपक्षधर्मतयोरिति । पक्षीकृतशास्त्रनिष्ठाप्रामाण्यरूपसाध्येनाप्तवाक्यत्वस्यैव वक्त्राद्यानुकूल्यवत्त्वरूपहेतोरपि व्याप्तेः सत्त्वात्पक्षधर्मतायाश्च पूर्वश्लोकेनैव सिद्धत्वादिति भावः । व्याप्त्यंशं स्पष्टयति न हीति । यत्प्रामाण्यमनुकूलवक्त्रादिमत्त्वव्यापकामवाक्यत्वस्य व्यापकं तत्प्रामाण्यं तस्यानुकूलवक्त्रादिमत्त्वस्याव्यापकं न हीत्यर्थः । तथा व्याख्याने दोषोऽप्यस्तीत्याह अनुकूलेति ॥ आप्तैकदेशत्वेनेति ॥ विवक्षितार्थतत्त्वज्ञानमविप्रलिप्सा विवक्षा करणपाटवं चेति चतुष्टयरूपाप्तित्वात् । अविप्रलिप्सां विनोर्वीरितत्रयस्य वक्त्रानुकूल्यरूपत्वादंशतः साध्यविशिष्टतेति भावः । वक्त्रित्यर्धस्य

व्यर्थतामाशङ्क्याह **वक्त्रिति** ॥ **शङ्कितस्येति** । एतच्छास्त्रं प्रमाणं अनुकूलवक्त्रादिमत्त्वादिति प्रयोगे शङ्कितस्याप्तवाक्यत्वरूपोपाधेरित्यर्थः ॥ **साधनव्यापकतेति** । पूर्वोक्तव्याख्यानरीत्यैवेति भावः ॥

यादु०— अत्र व्याख्यायतामिति । 'गुर्गुरूणामि'ति श्लोक इत्यर्थः । 'गुर्गुरूणामि'ति हेतुसिद्धानुकूल-वक्त्रादिमत्त्वं साक्षात्प्रामाण्यानुमापकमेवास्तु । न त्वाप्तवाक्यतानुमितिद्वारेत्यर्थः ॥ **शङ्कितस्योपाधेरिति** । आप्तवाक्यत्वरूपस्योपाधेरित्यर्थः ।

वं०प०— यद्यद्व्यापकस्य व्यापकमिति । यत् द्रव्यत्वं यद्व्यापकस्य घटत्वव्यापकपृथिवीत्वस्य व्यापकं, तत् द्रव्यत्वं तस्य घटत्वस्याव्यापकमिति न हि संभवति । किं नाम व्यापकमेवेति यावत् । एवं प्रामाण्यमनुकूल-वक्त्रादिमत्त्वव्यापकीभूताप्तवाक्यत्वव्यापकम् अनुकूलवक्त्रादिमत्त्वव्यापकं भवत्येव । व्याप्यव्याप्यस्य सुतरां व्याप्यत्ववत्, व्यापकव्यापकस्य सुतरां व्यापकत्वादित्यर्थः ॥

आनन्दः— नन्वनुकूलवक्त्रादिमत्त्वस्य प्रामाण्यव्याप्यत्वाभावान्न तेन तत्साध्यत इत्यत आह **न हीति** । एवमप्याप्तवाक्यत्वस्य मध्ये साधने को दोष इति तत्राह **अनुकूलेति** । तर्हि वक्तृश्रोत्रिति वाक्यवैयर्थ्यमित्यत आह **वक्त्रिति** ।

कं०रा०— वक्त्रानुकूल्यस्येति । विवक्षितार्थतत्त्वज्ञानादिरूपस्य वक्त्राद्यानुकूल्यस्याप्तिशरीरे प्रविष्टत्वेन तदेकदेशत्वमिति भावः ।

वा०चं०— 'बादरायणेन ब्रह्मादीन्प्रति मोक्षार्थमुपदिष्टत्व''मानत्व'योः साक्षात्साध्यसाधनभावाभ्युपगमे अप्रयोजकत्वापातेन विपक्षबाधकत्वेन वक्त्राद्यानुकूल्योपेततताभावस्यानिष्टत्वेनावश्याश्रयणीयत्वे, तदुपपत्तये वक्त्रा-द्यानुकूल्यसाधनस्यावश्यकत्वेन तत्र परम्पराश्रयणवद्वक्त्राद्यानुकूल्यमानत्वयोः साक्षात्साध्यसाधनभावाभ्युपगमे अप्रयोजकत्वपरिहाराय आप्तवाक्यत्वसाधनस्यावश्याश्रयणीयतया, युक्तमत्रापि ग्रन्थकृतः परम्पराश्रयणमिति वक्तुं; 'कुतोऽस्य ग्रन्थकृदभिप्रायत्वं येनेदं प्रयोजनाभिधानं सङ्गच्छेते'ति शङ्कापरिहाराय 'अभिप्रायानवगमादि'त्युक्तं परम्पराश्रयणस्य ग्रन्थकृदभिप्रेतत्वमुपपादयितुं 'ननु तर्ह्यनेनेदमुक्तं भवती'ति पूर्वपक्ष्युत्प्रेक्षिताभिप्रायं शङ्कामुखेन उपपादयति **नन्विति । **अत्र गुर्गुरूणामिति श्लोके** । 'गुरूणां गुरुत्वादि'त्यादिहेतून्प्रति वक्त्राद्यानुकूल्य-रूपसाध्याध्याहारस्योक्तरीत्या सिद्धत्वात् साक्षादेव तस्य मानत्वेन साध्यसाधनभावे 'गुर्गुरूणामि'ति श्लोकाभि-प्रेततया व्याख्यातुं शक्ये, किमाप्तवाक्यतासाधनं तदभिप्रेततया मध्ये व्याख्यायत इत्यर्थः ॥ व्याप्तिपक्षधर्मतयोः साधनाङ्गतया, साक्षात्साध्यसाधनभावे तदसंभवात्परम्पराश्रयणमिति शङ्का निवर्तयति **व्याप्तीति** ॥ उभयसाधनेऽपि शास्त्रस्यैव पक्षत्वेन पक्षधर्मतायाः स्पष्टत्वात्तामनुपपाद्य व्याप्तिमेवोपपादयति **न हीति** । न केवलं व्याप्तिपक्षधर्म-तयोस्तुल्यत्वेन परंपराश्रयणमेव दोषो अपि तु अनुकूलवक्त्रादिमत्त्वेनाप्तवाक्यतासाधने आप्तिवक्त्रानुकूल्ययोः

साध्यसाधनानुप्रवेशात्त्रितयरूपवक्त्रानुकूल्यस्य चतुष्टयरूपात्येकदेशत्वादंशतः साध्याविशिष्टता च स्यादित्याह **अनुकूलेति**। ननु साधनेनोपाधेः पक्षे साधनार्थमुत्तरवाक्यमिति न वैयर्थ्यम्। न च तस्यापि साधनव्यापकतार्थत्वात् तस्याश्च पूर्ववाक्येनैव सिद्धत्वात् पूर्ववाक्येन तां व्युत्पाद्य, पुनस्तदर्थमुपाधेः पक्षे साधने पूर्वेणोत्तरस्योत्तरेण वा पूर्वस्य गतार्थताया अनपाय एवेति वाच्यम्; उपाधेः पक्षे साधनस्य तेन पक्षे साध्यसिद्ध्यर्थतया साधनव्यापकतार्थकत्वाभावात्; इत्यतः स्यादिदं यदि पक्षे साध्यसिद्ध्यर्थं प्रथमत एव साधनतया स प्रयोजितः स्यात्तर्हि तदसिद्धौ तत्साधनं युक्तं स्यात्। न चैवम्।

वा०२०— नन्वत्र गुर्लुरूणामित्यादीनामित्यारभ्यान्यथाप्रयोजकत्वापत्तेरित्यन्तं पूर्वमूलं मनसि निधाय दृष्टान्तकथनं बादरायणेनेत्यादि परम्पराश्रयणवदित्यन्तम्। अप्रयोजकत्वपरिहारायेति। अस्तु वक्त्राद्यानुकूल्यवक्तुर्विप्रलिप्सामूलत्वेनाप्रामाण्यं च भवत्वित्येवं वक्ष्यमाणाप्रयोजकतापरिहाराय अविप्रलिप्साघटिताप्तवाक्यत्वाभावरूपानिष्टाभिधानायोक्तविधाप्तवाक्यत्वसाधनस्यावश्याश्रयणीयतयेत्यर्थः। इति पूर्वपक्ष्युत्प्रेक्षितमिति। इति पूर्वत्र वक्त्राद्यानुकूल्येन साक्षात्प्रामाण्यसाधनस्योक्तत्वमिति उत्प्रेक्षितो यो ग्रन्थकृतोऽभिप्रायस्तमित्यर्थः। उपपादयतीति। पूर्वपक्ष्युत्प्रेक्षितग्रन्थकाराभिप्रायमुपपादयन् शङ्कामुत्थाप्य अभिप्रायानवगमादित्युक्तग्रन्थकाराभिप्रेतपरम्पराश्रयणस्योपपादनेन तन्निरासं करोतीत्यर्थः फलति। अत्र व्याख्यायतामिति मूलगतात्रेत्यस्याप्तवाक्यतया तेनेत्येतद्वाक्ये इति नार्थः। तत्र वक्त्राद्यानुकूल्यप्रतिपादनस्यैवाभावात्। आप्तवाक्यतया तेनेत्युत्तरेत्युत्तरवाक्यविरोधापत्तेश्च। वक्तृश्रोतृप्रसक्तीनामित्यत्रेत्यपि नार्थः। तत्रापि वक्त्राद्यानुकूल्याप्त्योर्व्याप्तिप्रतिपादनेऽपि प्रामाण्ये वक्त्राद्यानुकूल्यस्य हेतुत्वाप्रतीतेरित्यतोऽत्रेति पदमनूद्य व्याचष्टे अत्र गुरुरिति। उक्तरीत्येति। उक्तासाधनोपपन्नत्वेऽप्यस्तु भारतादीनां प्रामाण्यं मा भूत्तास्येति शङ्कायां वक्त्राद्यानुकूल्यसाधनस्य आश्रयणीयत्वादित्युक्तरीत्येत्यर्थः। साक्षादेव तस्येति। वक्त्राद्यानुकूल्यस्य प्रामाण्येन सहाप्तवाक्येतरव्यवधानमन्तरेणैव साध्यसाधनभाव इत्यर्थः। व्याप्तिपक्षधर्मतयोस्तुल्यत्वादित्युक्त्यनन्तरमुभयस्याप्युपपादनीयतया व्याप्तिमात्रस्य न हीत्यनेनोपपादनानुपपत्तिरित्यतः पक्षधर्मतानुपपादने निमित्तं कथयन्नुत्तरवाक्यं व्याप्तिमात्रोपपादकतयावतारयति उभयसाधनेऽपीति। प्रामाण्यस्य वा आप्तवाक्यताया वा साधनेऽपीत्यर्थः। उपपादयतीति। व्याप्यव्यापस्य सुतरां व्याप्यत्ववद्व्यापकव्यापकस्य सुतरां व्यापकत्वमुपपादयतीत्यर्थः। साध्याविशिष्टता चेति चशब्दसमुच्चयप्रकाशदर्शनिनान्याविशिष्टतायाः प्रागभिधानाभावाच्च शब्दायोग इति शङ्कां परिहरन् अनुकूलवक्त्रादिमत्त्वाप्तवाक्यत्वयोर्विशिष्टयोरविशेषाभावेऽपि वक्त्रानुकूल्याप्त्योरविशेष इति प्रतिपादनमसङ्गतम्। तयोः साध्यसाधनाभावाभावादित्याशङ्कां च तयोः साध्यसाधनानुप्रवेशकथनेन परिहरन् चतुष्टयरूपाप्तिरूपता वक्त्रानुकूल्यस्य नास्तीति न तयोरप्यविशेष इति शङ्कां चैकदेशेऽविशेषाभावसूचनेन परिहरन् तर्हि साध्याविशिष्टतेति कथमुक्तमित्यतस्तत्रांशत इत्युत्तरमूलानुसारेण तत्पूरणान्नानुपपत्तिरिति च प्रतिपादयन्नुत्तरवाक्यमवतारयति न केवलमित्यादिना। त्रितयरूपेति। विवक्षितार्थतत्त्वज्ञानं करणपाटवं विवक्षा चेति त्रयं वक्तुरानुकूल्यं नामेति पूर्वं मूले उक्तत्वादिति भावः। चतुष्टयरूपेति। मैवम्। विवक्षितार्थेत्यादिमूले अविप्रलिप्सायाः पूर्वापेक्षया अधिकाया उक्तत्वादिति भावः। अंशत इति। यद्यपि वक्त्रानुकूल्यस्येव श्रोतृप्रसङ्गानुकूल्ययोरप्यात्येकदेशाविप्रलिप्सा-

संपादकतया वक्त्राद्यानुकूल्यस्य संपूर्णात्मिरूपताप्राप्त्या संपूर्णं साध्याविशिष्टतैव वक्तुं शक्येति वक्त्रानुकूल्यमात्रस्यात्येकदेशत्ववर्णनायोग इति टीकायामप्यंशत इति विशेषणायोग इत्याभाति। त्वयापि चतुष्टयरूपास्यन्तर्गतत्रितयरूपमेव यथा वक्त्रानुकूल्यं न तथा श्रोतृप्रसङ्गानुकूल्यमविप्रलिप्सारूपं येन तदंशेऽप्यविशेषः प्रसज्येत। तत्त्वज्ञानयोग्यत्ववक्तृप्रेमास्पदत्वश्रोतृप्रयोजनोद्देश्यकत्वरूपतदुभयानुकूल्ययोरेवाविप्रलिप्सारूपत्वाभावात्। किन्तु श्रोतृप्रसङ्गयोरननुकूलत्वनिबन्धना विप्रलिप्सापि तयोरानुकूल्ये परिहियत इत्येव। तथैव पूर्वमूले उक्तेः। तथा च वक्त्राद्यानुकूल्येन वैषम्यान्न श्रोत्राद्यानुकूल्यमादाय संपूर्णसाध्यावैशिष्ट्यप्रसङ्ग इत्यदोष इति ज्ञेयम्। **तस्यापीति**। साधनेनोपाधेः पक्षे साधनस्यापीत्यर्थः। **तस्याश्च साधनव्यापकतायाश्च**। **पूर्वेति**। वक्तृश्रोत्रिति पूर्वेत्यर्थः। तां साधनव्यापकतां तदर्थसाधनव्यापकतार्थम्। **साध्यसिद्धीति**। **उपाधिना हि पक्षे साध्यं साधनीयमस्ति तदर्थं च पक्षे** उपाधिसिद्धया भवितव्यं तदर्थं च साधनेनोपाधेः पक्षे साधनमित्यर्थः। **अभावादिति**। ततो न पौनरुक्त्यमिति भावः। **स्यादिदमित्यादि**। अत्र उपाधिपक्षे साध्यसाधनार्थमुपाधेः पक्षे साधनेन साधनमितीदं तदा स्याद्यदि पक्षे साध्यसिद्धयर्थमुपाधिः प्रथमत एव साधनतया प्रयोजितः स्यात्। न चैवमिति संबन्धः। प्रथमतः प्रयोजितत्वेऽपि कुतस्तत्साधनावकाश इत्यतः स्यादिदमित्यस्यैव निमित्तप्रदर्शनेन विवरणं तर्हि तदसिद्धौ तत्साधनं युक्तं स्यादिति। साधनेनेति तु सिद्धम्। तस्योपाधेः साधनमिति योजना। **एतेन तर्हीति वाक्यवैयर्थ्यशङ्कानवकाश इति ज्ञेयम्**। स इति उपाधिरित्यर्थः। **न चैवमिति**। प्रथमत एव **साध्यसिद्धयर्थमुपाधिः प्रयोजितस्तु न भवतीत्यर्थः**।

स०व्र०— उक्तपरम्परामाक्षिपति **ननु चेत्यादिना ॥ न हि यदिति**। यत्प्रामाण्यं यद्वचापकस्य यस्यानुकूलवक्त्रादिमत्वस्य व्यापकं आप्तवाक्यत्वं तस्य व्यापकं तत्प्रामाण्यं तस्यानुकूलवक्त्रादिमत्वस्य अव्यापकं न हीत्यर्थः। आप्तवाक्यत्वप्रामाण्ययोरिवानुकूलवक्त्रादिमत्वप्रामाण्ययोरपि भारतादौ व्याप्तिः दृश्यते इति भावः॥ न केवलं व्याप्तिः परम्पराश्रयणे दोषश्चेत्याह **अनुकूलेति। साध्यवद्धेतोरपि सन्दिग्धत्वेन सन्दिग्धासिद्धिर्हेतुवत्साध्यस्य** सिद्धत्वेन सिद्धसाधनता वा स्यादिति भावः॥ यद्यप्यत्राविप्रलिप्साऽपि साध्यते, सा च न वक्त्राद्यानुकूल्याभिन्नेति न साध्यावैशिष्ट्यम्। तथापि सिद्धस्यासिद्धेन सहाभिधानेऽप्यसिद्धत्वाभावादविशिष्टत्वमेवेति द्रष्टव्यम्॥ नन्वनुकूलवक्त्रादिमत्वस्याप्तवाक्यत्वं प्रत्यहेतुत्वे 'वक्तृश्रोतृप्रसक्तीनां यदाप्तिरनुकूलता' इत्ययुक्तं तत्राह **वक्त्रेति**। 'ननु तर्ह्यनेने'त्यादिना शङ्कितस्योपाधेराप्तवाक्यत्वस्यानुकूलवक्त्रादिमत्त्वेन भारतादौ व्याप्तिं दर्शयितुमित्यर्थः॥ **मैवमिति**। न चानुकूलवक्त्रादिमत्त्वं हेत्वन्तरम्, अनुकूलवक्त्रादिमत्वस्य प्रामाण्यहेतुत्वे सुतरां त्रित्वविरोधादिति भावः॥

कुण्डल०— गुर्ल्गुरूणामित्याद्यनुव्याख्यानं शङ्कापूर्वकं द्रढयति **ननु चेत्यादिना। अत्रेति**। गुर्ल्गुरूणामिति श्लोक इत्यर्थः। **वक्त्रानुकूल्यस्येति। विवक्षितार्थतत्त्वज्ञानकरणपाटवविवक्षा लक्षणवक्त्रानुकूल्यस्याविप्रलिप्साघटितविवक्षितार्थतत्त्वज्ञानादिरूपात्मैकदेशत्वेन साध्याविशिष्टता स्यात्** इत्यर्थः। नन्वेवं चेद्वक्त्राद्यानुकूल्यस्य व्याप्त्या सह व्याप्तिबोधकोत्तरवाक्यविरोध इत्यत आह **वक्तृश्रोतृप्रसक्तीनामिति। शङ्कितस्येति**। आप्तवाक्यत्वलक्षणस्योपाधेरित्यर्थः। ननु उत्तरवाक्यस्याप्तवाक्यत्वलक्षणोपाधेः साधनव्यापकत्वव्युत्पादनान्न वैयर्थ्यमित्यत आह **उपाधेरिति**।

विद्व०— ननु गुरुर्गुरूणामित्यादिना अस्यानुकूलवक्त्रादिमत्त्वे सिद्धे तेन प्रामाण्यस्यैव साक्षात् साधयितुं शक्यत्वात् किमनुमानद्वयपरतया व्याख्यानेनेति शङ्कते ननु चेति । अस्तु पक्षधर्मतायाः तुल्यत्वं व्याप्तिस्तु कथ इत्यत आह न हीति । तथा व्याख्याने बाधकमप्याह अनुकूलेति । ननु यत्र वक्तृश्रोतृप्रसक्तीनामनुकूलत्वं तत्राप्तिरिति व्याप्तिप्रदर्शनान्मध्ये अनुमानान्तरतया व्याख्यानं युक्तमित्यत आप्तवाक्यत्वरूपोपाधेः पूर्वं शङ्कितत्वात् तस्य साधनवति पक्षे सद्भावोपपादनेन साधनव्यापकताप्रदर्शनार्थं व्याप्तिप्रदर्शनेनोपपत्तेरित्याह वक्तृश्रोत्रेति ।

चषकः— नन्विति । गुरुसंबन्धिगुरुत्वाद्यनुमापितानुकूलवक्त्रादिमत्तायां प्रामाण्यनिरूपितप्रधानसाधनत्वमेवोपेयतां, न त्वप्रधानसाधनत्वमिति भावः ॥ तुल्यत्वादिति । अन्तरस्थितसाध्यनिरूपितव्याप्तौ सत्यां प्रधानसाध्यनिरूपितव्याप्तेः कैमुत्यसिद्धत्वादिति भावः । पक्षधर्मता प्रतिज्ञाताऽपि स्फुटप्रतिपत्तिकतया नोपपादितेति ध्येयम् । वक्त्रानुकूल्यस्य विवक्षितार्थतत्त्वज्ञानविवक्षाकरणपाटवत्रिकरूपस्य । आप्त्येकदेशत्वेन अविप्रलिप्सातत्त्रिकघटितचतुष्टयरूपाप्तिघटकत्वेन । साध्याविशिष्टता साध्यसिद्धिसन्दिग्धासिद्ध्यन्यतरापादिकेत्यादि ॥ शङ्कितस्येति । 'आप्तवाक्यतायास्तत्रोपाधित्वादि'त्यादिनेत्यर्थः ॥

काशी०— स्वकृतव्याख्यानं दृढयितुमाशङ्कते ननु चेति । अत्र गुरुर्गुरूणामिति श्लोके व्याख्यायतां लाघवादिति शेषः । निरुक्तबादरायणोपदिष्टत्वेन साक्षात्प्रामाण्यसाधनपरत्वस्योत्तरवाक्ये वक्त्राद्यानुकूल्यस्य साध्यसंबन्धव्युत्पादनविरोधेनायोगेऽपि प्रकृते तदभावादिति भावः । ननु व्याप्तिपक्षधर्मतयोः सत्त्वादनुकूलवक्त्रादिमत्त्वेनाप्तवाक्यतासाधनं संभवति न तु प्रामाण्यसाधनमित्याशङ्कां परिहरति व्याप्तीति । पक्षधर्मताया उभयसिद्धत्वाद्व्याप्तिमेवोपपादयति न हीति । प्रामाण्यव्याप्यं यदाप्तवाक्यत्वं तद्व्याप्यत्वेऽनुकूलवक्त्रादिमत्त्वस्य प्रामाण्यव्याप्यत्वमावश्यकमेवेति भावः । स्वपक्षे साधकमुक्त्वा परपक्षे बाधकमाह अनुकूलवक्त्रादिमत्तयेति । साध्याविशिष्टतेति । बादरायणस्य विवक्षितार्थतत्त्वज्ञानाद्यसिद्धौ हेत्वसिद्धिः । तत्सिद्धौ च तदंशे सिद्धसाधनमित्यर्थः । नन्वेवं वक्तृश्रोतृप्रसक्तीनामित्यनेन वक्त्राद्यानुकूल्यवत्त्वस्याप्तवाक्यत्वेन व्याप्तिप्रदर्शनवैयर्थ्यमित्युक्तबाधकं परिहरति वक्तृश्रोतृप्रसक्तीनामिति । शङ्कितस्योपाधेः उपाधित्वेन शङ्कितस्याप्तवाक्यत्वस्य । साधनव्यापकतेति । अनुकूलवक्त्रादिमत्त्वव्यापकतेत्यर्थः । तावन्मात्रेणोपाधिशङ्कानिवृत्तेरनुमानद्वयपरतया व्याख्यानमयुक्तमिति भावः ।

गूढ०— नन्वनुकूलवक्त्रादिमत्त्वस्य प्रामाण्यव्याप्यत्वाभावान्न तेन तत्साध्यत इत्यत आह न हीति । एवमप्याप्तवाक्यत्वस्य मध्ये साधने को दोष इति तत्राह अनुकूलेति । तर्हि वक्तृश्रोत्रिति वाक्यवैयर्थ्यमित्यत आह वक्त्रिति ।

प्रदीपः— ननु चेत्यादिना परम्परामाक्षिपति न हीति । यत्प्रामाण्यं यद्व्यापकस्य यस्यानुकूलवक्त्रादिमत्त्वस्य व्यापकमाप्तवाक्यत्वं तस्य तत्प्रामाण्यं तस्यानुकूलवक्त्रादिमत्त्वस्याप्तवाक्यत्वप्रामाण्ययोरिवानुकूलवक्त्रादिमत्त्वप्रामाण्ययोरपि भारतादौ व्याप्तिर्दृश्यत इति भावः । न केवलं व्याप्तिः परम्पराश्रयणे दोषश्चेत्यत आह

अनुकूलेति। नन्वनुकूलवक्त्रादिमत्त्वस्याप्तवाक्यत्वं प्रत्यहेतुत्वे वक्तृश्रोतृप्रसक्तीनामित्यनर्थकं स्यात् इत्युक्तं तत्राह वक्त्रिति।

६७ सु०— मैवम्। 'आप्तवाक्यतया तेने'त्युत्तरवाक्यवैयर्थ्यप्रसङ्गात्। उपाधेः साधनव्यापकताया 'वक्तृश्रोतृप्रसक्तीनामि'त्यनेनैवोपपादितत्वात्। न हि उपाधिं दूषयता साधनव्यापकतां व्युत्पाद्य साधनेनोपाधेः पक्षे साधनं विधाय तेन साध्यं साधनीयमिति कुलधर्मः।

परि०— उत्तरवाक्येति॥ तत्र वक्त्राद्यानुकूल्यस्याप्तवाक्यत्वरूपसाध्यसंबन्धस्यैव प्रतीतेरिति भावः। ननु वक्त्राद्यानुकूल्येन हेतुना आप्तवाक्यत्वस्योपाधेः पक्षे साधनार्थमाप्तवाक्यतया तेनेत्येतदर्थवदित्यत आह **न हीति॥ व्युत्पाद्येति। वक्त्रित्यर्थेनेत्यर्थः।**

यादु०— उत्तरवाक्येति। अत्र हि आप्तवाक्यत्वेनैव प्रामाण्यानुमानमवगम्यत इति भावः। ननु 'वक्तृश्रोतृप्रसक्तीनामि'त्यत्रोपाधेः पक्षे साधनव्यापकतां व्युत्पाद्य, तेन सिद्धेनाप्तवाक्यत्वरूपोपाधिना प्रामाण्यं साधयितुम् 'आप्तवाक्यतये'ति वाक्यमतो न वैयर्थ्यमित्यत आह **न हि उपाधिं दूषयतेति।** तथा च कथकसंप्रदायविरोध इति भावः॥

आनन्दः— किमेवं ग्रन्थकृतोऽनभिमतमिति वा शङ्कते वैयर्थ्यं वा। नाद्य इत्याह **आप्तेति।** ननु तेनोपाधेः साधनव्यापकत्वं प्रदर्श्यत इत्यत आह **उपाधीति।** नन्वनुकूलवक्त्रादिमत्त्वेन पक्षे आप्तवाक्यत्वं प्रसाध्यानन्तरं प्रामाण्यं प्रसाध्यत इत्यत आह **न हीति।**

कं०रा०— उपाधेरिति। आप्तवाक्यत्वरूपोपाधेरित्यर्थः।

श्रीनिधि०— ननु नोत्तरवाक्यवैयर्थ्येन वक्तृश्रोतृप्रसक्तीनामित्यनेन उपाधेः साधनव्यापकताया उपपादितत्वेऽपि उपाधेः पक्षे साधनार्थं तत्सार्थक्योपपत्तेरित्यत आह **न त्वुपाधिं दूषयतेति। तेन अनुकूलवक्त्रादिमत्त्वरूपसाधनेनेत्यर्थः।**

बा०चं०— साध्यसिद्ध्यर्थं साधनान्तरे प्रयोजिते तत्रोपाधिशङ्कायां, तं दूषयता, तस्य साधनव्यापकत्वव्युत्पादनेनैव दूषितत्वात् तावन्मात्रमेव व्युत्पाद्य, निरुपाधिकपूर्वप्रयुक्तसाधनेन एव साध्यस्य साधनीयतया, साध्यसाधनस्योपाधिना अकर्तव्यतया, तदर्थं पक्षे तत्साधनं व्यर्थमेवेत्याशयेन आह **न हीति।** इदं च 'वक्तृश्रोतृप्रसक्तीनामि'त्यस्य स्वकृतव्याख्यानानुसारेण दूषणम्। शङ्कित्रभिमतव्याख्यानं 'तूपाधेः साधनाभेदमि'त्यादिना आशङ्क्य निराकरिष्यतीति द्रष्टव्यम्।

वा०र०— तस्य साधनतया प्रयोजितत्वाभावमेवोपाधिप्रसक्तिस्थले तद्दूषणकारप्रदर्शनेनोपपादयति **साध्यसिद्ध्यर्थमित्यादिनोपाधिनाऽकर्तव्यतयेत्यन्तेन**। पक्षे उपाधिना साध्यसाधनस्य कर्तुमशक्यत्वादित्यर्थः। अत्र बुद्ध्या विवेकेनाकर्तव्यत्वादित्येतन्न चैवमित्यत्र हेतुकथनपरत्वेन योजयित्वा पुनः अकर्तव्यत्वादेव तदर्थं पक्षे इत्येवं योजनाया अभिमतत्वात्परोक्तस्योपाधेः पक्षे साधनस्य व्यर्थताया उपसंहार इति ज्ञेयम्। एतेन न चैवमित्यत्र हेत्वनुक्तिशङ्कानवकाश इति ज्ञेयम्। **इदं चेति**। साधनव्यापकतां व्युत्पाद्येत्येतदित्यर्थः। **अनुसारेणेति**। तथैव व्याख्यानस्य पूर्वत्र कृतत्वादिति भावः।

स०व्र०— न चोपाधेः साधनव्यापकतोपपादनार्थमुत्तरवाक्यमित्याह **उपाधेरिति**। यदि साधनव्यापकतोपपादनार्थं तर्ह्याप्तवाक्यतये'त्यनुकूलवक्त्रादिमत्वेनाप्तवाक्यत्वं प्रसाध्य तेन प्रामाण्यसाधनमयुक्तं स्यादित्याह **न हीति**।

कुण्डल०— नन्वथाऽप्युत्तरवाक्यं न व्यर्थम्। उपाधिना पक्षे साध्यसाधनप्रतिपादनार्थत्वेन सप्रयोजनत्वादित्यत आह **न हीति**।

विट्ठ०— वैयर्थ्यप्रसङ्गादिति। उत्तरवाक्ये तेन वक्त्राद्यानुकूल्यवत्त्वेन सिद्धया आप्तवाक्यतया मानमिदं शास्त्रमित्याप्तवाक्यत्वहेतुना प्रामाण्यसाधनावगमात् वक्त्राद्यानुकूल्येनैव प्रामाण्यसाधनमित्युक्तौ तद्वैयर्थ्यप्रसङ्गादिति भावः। ननु उक्तमत्रोपाधेः साधनव्यापकताप्रदर्शनार्थमुत्तरवाक्यमित्यत आह **उपाधेरिति**। ननु वक्तृश्रोतृप्रसक्तीनामिति पूर्वार्धे साधनव्यापकतामुपाधेरुपपाद्य तेन पक्षे सिद्धे न उपाधिना प्रामाण्यं साधयितुमुत्तरवाक्यं प्रवृत्तम् अतो न वैयर्थ्यमित्यत आह **न ह्युपाधिं दूषयतेति**।

चषकः— वैयर्थ्येति। प्रामाण्यविधेयकानुमितेर्दर्शितसाधनेनैव निर्वृत्ततया तदेकफलकाप्तवाक्यतारूपसाधनान्तरस्य अनर्थकतेति भावः॥ दर्शितोपाधौ प्रकृतसाधननिरूपितव्यापकतां 'वक्तृश्रोत्रि'तिदलेन निरूप्य, तादृशोपाधिना प्रामाण्यसिषाधयिषयोत्तरग्रन्थः प्रावर्तिष्ट इति नानर्थकतेत्यत आह **न हीति**। **कुलधर्मः** कथकसंप्रदायः॥

काशी०— वैयर्थ्यप्रसङ्गादिति। तद्वाक्यस्य साधनव्यापकत्वाप्रदर्शकत्वादिति भावः। ननु तस्यापि हेतुमति पक्षे उपाधिसत्त्वप्रदर्शकतया साधनव्यापकतोपपादकत्वादवैयर्थ्यमत आह **उपाधेरिति**। **उपपादितत्वादिति**। यत्र तत्रेत्युक्त्यैतल्लाभात्। अन्यथा वक्त्राद्यानुकूल्येनाप्तवाक्यतासाधनस्याप्ययोगादिति भावः। ननु भवत्पक्ष इव पूर्वपक्षेऽपि पक्षे वक्त्राद्यानुकूल्यवत्त्वेनाप्तवाक्यत्वं प्रसाध्य तेन प्रामाण्यसाधनार्थत्वादुत्तरवाक्यस्य न वैयर्थ्यमित्यत आह **न हीति**। युक्तमाप्तवाक्यत्वादिसाधनमस्मत्पक्षे। तस्यैव प्रामाण्यसाधकत्वात्। पूर्वपक्षे च वक्त्राद्यानुकूल्यवत्त्वस्यैव प्रामाण्यसाधकत्वादुपाधेस्तद्व्यापकत्वप्रदर्शनमात्रेण दूषणसंभवादधिकस्य वैयर्थ्यमेवेति भावः।

गूढ०— किमेवं ग्रन्थकृतोऽनभिमतमिति वा शङ्क्यते वैयर्थ्यं वा। नाद्य इत्याह आप्तेति। ननु तेनोपाधेः साधनव्यापकत्वं प्रदर्श्यत इत्यत आह उपाधेरिति। नन्वनुकूलवक्त्रादिमत्त्वेन पक्षे आप्तवाक्यत्वं प्रसाध्यानन्तरं प्रामाण्यं प्रसाध्यत इत्यत आह न हीति।

प्रदीपः— नन्वत्रेत्यादिना शङ्कितस्योपाधेराप्तवाक्यत्वस्यानुकूलवक्त्रादिमत्त्वेन भारतादौ व्याप्तिं दर्शयितुमित्यर्थः। नैवमिति। न चानुकूलवक्त्रादिमत्त्वं हेत्वन्तरं त्रित्वविरोधादिति भावः। न चोपाधेः साधनव्यापकतोपपादनार्थमुत्तरवाक्यमित्याह उपाधेरिति। यदि साधनव्यापकत्वोपपादनार्थं तर्हि आप्तवाक्यतयेति अनुकूलवक्त्रादिमत्त्वेनाप्तवाक्यत्वं प्रसाध्यते न प्रामाण्यसाधनमयुक्तमेव स्यादित्याह न हीति।

६८ सु०— उपाधेः साधनाभेदं प्रदर्श्य तेन साध्यं साध्यत इति चेन्न। आप्तेर्वक्तृमात्रधर्मस्य साधनाभेदानुपपत्तेः। साध्याविशिष्टता तु नास्त्येव। वक्त्रादीनामानुकूल्येन वक्तुराप्तिसाधने खल्वंशतः सा स्यात्। अनुकूलवक्त्रादिमत्तया आप्तवाक्यता साध्यत इति चोक्तम्॥ तथाऽपि साध्यसाधनयोः आप्त्येकदेशानुप्रवेशोऽस्तीति चेत्। सत्यम्। तथाऽपि विशिष्टभेदेन अदोषत्वात्। अन्यथा यो धूमवानसावग्निमानिति व्याप्यव्यापकभावोऽपि न स्यात्। विशेष्यांशस्योभयत्रानुप्रवेशात्। कृतकत्वानित्यत्वयोस्सत्तानुप्रवेशेऽपि परैर्व्याप्यव्यापकभावस्याङ्गीकृतत्वाच्च॥ यदा तु 'निर्दोषः प्रमितस्यैव वक्ता आप्त' इत्याश्रितं तदा साध्याविशिष्टतायाः शङ्कैव नास्ति।

परि०— ननु वक्तृश्रोत्रित्यर्धं भवद्व्याख्यानरीत्या यत् यत्रेत्याश्रित्योपाधेर्न साधनव्यापकत्वदर्शनार्थं प्रवृत्तम्। किन्त्विदमेव ह्याप्तत्वं यद्वक्तृश्रोतृप्रसक्त्यानुकूल्यमिति सन्न्यायरत्नावल्युक्त्यानुकूलवक्त्रादिमत्त्वरूपसाधनस्य आप्तवाक्यत्वरूपोपाधेश्चाभेदं दर्शयितुं आप्तवाक्यतया तेनेत्येतत्तु यस्मादभेदस्तेन कारणेनाप्तवाक्यतया हेतुना मानमिति पूर्वेणान्वितया प्रवृत्तमित्येव योज्यत इत्याशङ्क्याह उपाधेरिति॥ तेनेति। साधनाभिन्नोपाधिना प्रामाण्यरूपं साध्यमित्यर्थः। मूले आप्तिरित्येव श्रवणादाह आप्तेरिति। अत एव नयचन्द्रिकायां 'स वै बलं बलिनां चापरेषामि'त्यादाविव यदाप्तिरनुकूलतेति निमित्तनैमित्तिकयोरभेदव्यवहार इत्युक्तम्। ननु भवत्पक्षे साध्याविशिष्टतेत्युक्तमित्यत आह साध्येति॥ इति चोक्तमिति। वक्त्रित्यर्धावतारिकायामित्यर्थः॥ सत्तानुप्रवेशेऽपीति। उत्पत्तिर्नाम कारणाधीनसत्तालाभ इत्येतदध्यायान्त्यभागे वक्ष्यमाणदिशा वा पूर्वमसतः सत्तासमवायवत्त्वं वा कृतकत्वम्। उत्तरकालमसतः पूर्वं सत्तासमवायवत्त्वं वा सत्तासंबन्धापगमो वा अनित्यत्वमित्येवंरूपेणेति भावः॥

गु०दी०— यत्र वक्त्राद्यानुकूल्यं तत्राप्तिराप्तवाक्यतेति ग्रन्थकाराभिप्रायमजानानः शङ्कते समाधत्ते च । **उपाधेः साधनाभेदं** इत्यादिना । **कृतकत्वानित्यत्वयोः सत्त्वानुप्रवेशेऽपि** इत्यत्र प्रागसतः सत्तासंबन्ध इति कृतकत्वे सत्त्वानुप्रवेशः प्रागेव सतोऽभावः प्रध्वंस इत्यनित्यत्वेऽपि सत्त्वानुप्रवेश इत्यर्थः । **यदा तु निर्दोषः प्रमितस्यैव वक्ता** इत्यत्र वाक्याप्रामाण्यकारणीभूतभ्रमादिदोषाभावस्यैवोक्त्या विवक्षितार्थतत्त्वज्ञानस्याप्रवेशात् प्रमितस्यैव वक्तेत्यत्र एवकारोक्ताप्रमाभावस्यैवोक्त्या विवक्षितार्थतत्त्वज्ञानस्याप्रवेशाच्चेत्यर्थः ।

यादु०— साधनाभेदमिति । तथा च 'वक्तृश्रोतृप्रसक्तीनां यदाप्तिरनुकूलते'ति 'वक्तृश्रोतृप्रसक्तीनामनुकूलता यद्यस्मादाप्तिस्तेन कारणेनाप्तवाक्यतया मानमि'त्येव योजनाऽत्राभिप्रेतेति द्रष्टव्या । न तु 'यद्यत्र वाक्य' इत्यादिनोक्ता पूर्वयोजनेति भावः । **साधनाभेदानुपपत्तेरिति** । श्रोतृप्रसङ्गानुकूल्यधर्मयोः अपि साधने प्रविष्टत्वादिति भावः । ननु 'यो धूमवानि'त्यादौ विशेष्यांशस्योभयत्रानुप्रवेशेऽपि न दोषः । विशेषणांशस्यैवोभयत्र प्रवेशाभ्युक्त-दोषहेतुत्वादित्यत आह **कृतकत्वानित्यत्वयोरिति** । इदं च 'असतः सत्तासंबन्ध एव कृतकत्वम् । सतः सत्तासंबन्धस्यापगमो अनित्यत्वम्' इत्यभिप्रेत्योक्तमिति ज्ञातव्यम् । यदाह किरणावलीकारः । 'कार्यत्वमभूत्वा भावित्वमि'ति, 'अनित्यत्वं, भूत्वा अभावित्वमि'ति ॥

वं०प०— विशेष्यांशस्येति । पर्वतस्येत्यर्थः ॥ यदा त्विति । एतदर्थमेव 'निर्दोषः, प्रमितस्यैव वक्ता इति लक्षणद्वयमपि समाहितं वेदितव्यमि'ति प्रागुक्तमिति ज्ञातव्यम् ॥

आनन्दः— आप्तेरिति । आप्तिरूपवक्तृमात्रधर्मस्यानुकूलवक्त्रादिमत्त्वेन त्रितयधर्मेण नैक्यं विरोधा-दित्यर्थः । तथापि साध्याविशिष्टतेत्यत आह **साध्येति** । तथाप्यंशे साध्याविशेष इति शङ्कते **तथापीति** । अनुकूलवक्त्रंशे आप्तवाक्यत्वमित्येतत्राप्यंशे ऐक्येऽपि अनुकूलवक्त्रादिमत्त्वरूपविशिष्टाप्तवाक्यत्वरूपविशिष्टयो-र्भेदोऽस्तीति न साध्याविशेष इत्यर्थः । **अन्यथेति** । अंशैक्येन साध्याविशेष इत्यर्थः । ननु तत्रापि यत्र धूमस्तत्र वह्निरित्येव व्याप्तिर्गृह्यत इति नांशैक्यमित्यत आह **कृतकत्वेति** । न चात्र साध्यसाधनयोः कथं सत्तानुप्रवेश इति वाच्यम् । प्रागभावप्रतियोगित्वमात्रस्य कृतकत्वे ध्वंसे व्यभिचारः स्यादिति प्रागभावावच्छिन्नसत्ता-योगित्वस्यावश्यवक्तव्यत्वात् । तथापि साध्ये तत्प्रवेशः कुत इति न वाच्यम् । जन्यो भावोऽनित्यः कृतकत्वा-दिति व्यतिरेकिणि ध्वंसप्रतियोगित्वमात्ररूपस्यानित्यत्वस्य साधने प्रागभावरूपसपक्षाप्रवेशित्वेनासाधारण्यं स्यादिति तत्रापि ध्वंसावच्छिन्नसत्तायोगित्वं तद्वाच्यमिति सत्तानुप्रवेश आवश्यक इति तत्रापि साध्याविशेषः स्यादिति भावः । न च विशिष्टस्य पदार्थान्तरत्वपक्षे साध्याविशेषपरिहारेऽपि विशेषणविशेष्यतत्संबन्धात्मकं तदिति पक्षेन तत्परिहार इति वाच्यम् । विशिष्टपदार्थान्तरत्वस्य तं प्रत्यङ्गीकार्यत्वात् यद्वा पक्षान्तरमाह **यदा त्विति** ।

कं०रा०— साधनाभेदमिति । 'वक्तृश्रोतृप्रसक्तीनामनुकूलतेति यत्तौवाप्तिरि'त्येतदर्थकेन वक्तृश्रोतृ-प्रसक्तीनां यदाप्तिरनुकूलतेति पूर्ववाक्येन वक्त्राद्यानुकूल्यरूपसाधनेनाभेदप्राप्तिं प्रदर्श्य तेनैवाप्तवाक्यस्योपाधित्वाभावं च व्युत्पाद्याप्तवाक्यतया तेनेत्युत्तरवाक्ये आप्तवाक्यतारूपेण वक्त्राद्यानुकूल्येनेत्यर्थकेन तेन साधनेन साध्यं साध्यत इत्यर्थः । यद्यप्याप्तवाक्यतया तेनेत्यत्र तच्छब्देन पूर्ववाक्यनिर्दिष्टवक्त्राद्यनुकूलतापरामर्शे तेनेति निर्देशानुपपत्तिः ।

तथाऽपि वक्त्रादिसमुदायिसंबन्धिन एकस्यानुकूल्यस्याभावेन द्वन्द्वनिर्दिष्टानामपि वक्त्रादीनामनुकूलताशब्दितानुकूल्येन प्रत्येकमन्वयेन पूर्ववाक्ये अनुकूलतात्रयस्य प्रकृतत्वात्तत्सामान्येन निर्देष्टुं सामान्ये नपुंसकं प्रयोक्तव्यमिति न्यायेन तेनेति निर्देशः कृतः । अतो नानुपपत्तिरिति हृदयम् । आप्तेरिति । आप्तेर्वक्तृमात्रनिष्ठाया वक्तृश्रोतृप्रसङ्गानुकूल्यरूपसाधनाभेदानुपपत्त्या पूर्ववाक्ये साधनाभेदप्रदर्शनमेवानुपपन्नम् । सुतरां तत्पूर्वकूटमुत्तरवाक्यस्थं साधनेन साध्यसाधनमिति भावः । सत्त्वेति । कृतकत्वं प्रागसतः सत्तासमवायित्वमनित्यत्वं ध्वंसोपलक्षितसत्तायोगित्वमिति तयोः सत्त्वानुप्रवेश इति भावः । यदेति । निर्दोषत्वं प्रमितमात्रवक्तृत्वं वा आप्तत्वमिति यदा आश्रीयते तदा वक्त्रानुकूल्यस्याप्येकदेशत्वाभावेन साध्याविशिष्टताशङ्कैव नास्तीत्यर्थः ।

श्रीनिधि०— आप्तेर्वक्तृमात्रधर्मस्येति । साधनं तु अनुकूलवक्तृकत्वे सति अनुकूलश्रोतृकत्वे सति अनुकूलप्रसङ्गवत्त्वम् । आप्तिर्नाम विवक्षितार्थतत्त्वज्ञानं करणपाटवं अविप्रलिप्सा विवक्षा चेत्येवंरूपा । एवं च तयोर्व्याप्यव्यापकभाव एव नाभेद इत्यर्थः । **कृतकत्वानित्यत्वयोस्सत्तानुप्रवेशोऽपि इति** । प्रागभावोपलक्षितसत्ताकत्वं कृतकत्वं ध्वंसोपलक्षितसत्ताकत्वमनित्यत्वमिति सत्तानुप्रवेशोऽपीत्यर्थः ।

वा०चं०— ननु माऽस्तु वक्तृश्रोतृप्रसक्तीनामिति वाक्यस्योपाधिसाधनव्यापकताप्रदर्शनपरत्वमुत्तरवाक्यवैयर्थ्यापत्तेः अपि तु साधनानुप्रविष्टवक्त्राद्यानुकूल्यस्योपाध्यनुप्रविष्टाप्तेश्चाभेददर्शनमुखेन साधनोपाध्योरभेदं प्रदर्श्य तेन साध्यसाधने तात्पर्याभ्युपगमेन उत्तरवाक्यवैयर्थ्यमिति प्रकारान्तरेणान्यथासिद्धिं शङ्कते **उपाधेरिति** । वक्तृमात्रधर्मभूताप्तेर्वक्तृश्रोतृप्रसङ्गरूपत्रितयधर्मभूतानुकूल्यानामभेदानुपपत्त्या तद्घटितोपाधिसाधनयोरप्यभेदानुपपत्त्या तदभेदप्रतिपादने वाक्यार्थो बाधितः स्यादित्याह **आप्तेरिति** । बाधकाधीनत्वात्साधकान्यथासिद्धेः, परेण साध्याविशिष्टत्वमुद्भाव्य साधकान्यथासिद्धावुक्तायामपि, साधकाधीनत्वाद्वस्तुसिद्धेः स्वयमुत्तरवाक्यवैयर्थ्यप्रसङ्गेन अन्यथासिद्धिं परिहृत्य साधके निरवकाशतामुपपाद्य इदानीं बाधकं परिहरति **साध्येति** । वक्त्राद्यानुकूल्यस्य आप्तैकदेशत्वेन साध्याविशिष्टतोद्भावनस्य वक्त्रादीनामानुकूल्येन वक्तुराप्तिसाधने सङ्गतत्वेऽप्यनुकूलवक्त्रादिमत्तया आप्तवाक्यतासाधने न कथमपि सङ्गतिः इत्यसङ्गतिकथनं परोक्तस्य यथाश्रुताभिप्रायमादायेति द्रष्टव्यम् ॥ स्वाभिप्रायं परः शङ्कते **तथाऽपीति** । साध्यसाधनयोरेकदेशप्रवेशेऽपि चतुष्टयविशिष्टवक्तृघटितत्वात्साध्यस्य त्रितयविशिष्टवक्तृघटितत्वाच्च साधनस्य विशिष्टयोश्च भेदात् तस्यादोषत्वमित्याह **सत्यमिति** । यथाकथञ्चिदेकदेशानुप्रवेशमात्रेण साध्याविशिष्टत्वे बाधकमाह **अन्यथेति** ॥ **कृतकत्वेति** । कृतकत्वानित्यत्वयोः परस्परव्याप्यव्यापकभावमङ्गीकुर्वद्भिः परैर्ध्वंसप्रागभावव्यभिचारपरिहाराय प्रागभावध्वंसावच्छिन्नसत्तायोगित्वरूपत्वेन तयोरभ्युपगमादित्यर्थः । न च यस्य यदा हेतुत्वं तदा व्यभिचारपरिहाराय हेतौ सत्ताप्रवेशेऽपि साध्ये न तत्प्रवेश, इति न साध्याविशिष्टतेति वाच्यम् । जन्यभावपक्षकानुमाने अव्यभिचाराय हेतावसाधारण्यपरिहाराय साध्येऽपि तत्प्रवेशस्यावश्यकत्वात् ॥ एवं सत्तापरित्यागेन भावत्वादिविशेषणान्तरप्रक्षेपेऽपि तत्प्रयुक्त एवाविशेषो द्रष्टव्यः ॥ सत्तावतो विनाशित्वमनित्यत्वं, प्रागसतः सत्तासंबन्धः कृतकत्वम् इति कृतकत्वानित्यत्वनिरुक्त्याश्रयणेनेदमुक्तम् । अत एव सकलसपक्षवृत्तित्वं कृतकत्वस्य भवति । अत एव न ध्वंसे व्यभिचारोऽपीति भावः ।

'उत्पत्तिर्नाम कारणाधीनसत्तालाभ' इत्येतदध्यायान्त्यभागे वक्ष्यमाणदिशा वा, 'पूर्वमसतः सत्तासमवायवत्त्वं वा कृतकत्वम्; उत्तरकालमसतः पूर्वं सत्तासमवायवत्त्वं वा, सत्तासंबन्धापगमो वा अनित्यत्वमि'त्येवं रूपेण सत्तानुप्रवेश इति भावः)।

वा०र०— अपि त्वित्यादि । अपि तु साध्यसाधने तात्पर्यम् । तत्र तात्पर्याभ्युपगमे च नोत्तरवाक्यवैयर्थ्यमिति बुद्धया विवेकेन योजनादपि त्वित्यस्यानन्वय इति शङ्कानवकाश इति ज्ञेयम् । अन्यप्रकारान्तरेणासिद्धिरुपपत्तिरन्यथासिद्धिरित्येतच्छब्दानुमानादिसाधारणस्वतन्त्रदूषणम् । अप्रयोजको वाक्यत्वादिहेतुरन्यथासिद्धो व्याप्यत्वासिद्धो वेति तत्त्वनिर्णयटीकायामपौरुषेयत्ववादे उक्तेः । तत्रैव तर्कसाध्यानुग्रहनिरूपणावसरे एवं स्वर्गकामो यजेतेत्याद्युक्त्वा एवमन्यत्राप्यन्यथासिद्धिनिरसनादिरनुग्रहस्तत्र तत्र दर्शयितव्य इत्युक्तेश्च । वरदराजीयेऽप्येवम् । अधिकं च वाक्यत्वस्यान्यथासिद्धिव्युत्पादनावसरे उक्तं तत्त्वनिर्णयटीकाव्याख्यानप्रपञ्चेऽस्माभिर्निरूपितं तत एव प्रतिपत्तव्यम् । मूलेऽपि द्रव्यमेव ततोऽन्तेति समवायनिराकरणानुव्याख्यानव्याख्यावसरे अन्यथासिद्धं च । यथा समवाय इत्यादिना विद्यैवेत्यधिकरणीय विशेषात्मतया सदेत्यनुव्याख्याव्याख्यावसरे निस्वेदादिकमौषधादिना संभवदन्यथासिद्धं चेत्यनेनान्यत्रापि तत्र तत्रान्यथासिद्धिर्वक्ष्यते परन्तु दोषान्तर्भावनिरूपणस्थलीययुक्तिपादगतान्यथासिद्धेः प्रकारान्तरेण दोषताया वक्ष्यमाणत्वादित्यत्राभिप्रेताया अन्यथासिद्धिर्व्यर्थविशेषणासिद्ध्यादिरूपा । सैव च विशेषणे वैयर्थ्यमेकासिद्धौ चेति भक्तिपादे निरूपिता । सेयमन्यथासिद्धिरिह पदार्थो नेति ज्ञेयम् । साधनस्याप्याप्तितुल्यत्वेऽभेदः संभवत्यतः साधनभूतानुकूल्यानां वक्तृश्रोतृप्रसङ्गरूपत्रितयधर्मवत्त्वं कथयन्नभेदानुपपत्तिमुपपादयति वक्तृमात्रेति । वाक्यार्थ इति । आप्तवाक्यतया तेनेति वाक्यार्थ इत्यर्थः । मध्ये आप्तवाक्यतासाधनाङ्गीकारे साध्यावैशिष्ट्यस्य प्रथमशङ्कने सति तत एव वक्तृश्रोत्रित्युक्तसाधकस्यान्यथासिद्धौ चोक्तायां सिद्धान्तिनापि सा वैशिष्ट्यरूपबाधकपरिहारपूर्वकमेव साधकान्यथासिद्धिः परिहरणीया । तत्कुतो व्यत्यास इत्यत आह बाधकाधीनत्वादिति । उक्तायामपीत्यपिना तथैव परिहारोऽपि कार्यः स कुतो न कृत इति शङ्का सूचिता । न कथमपीति । वक्त्रानुकूल्याप्तिभ्यां विशिष्टे भेदस्य स्पष्टत्वादिति भावः । यथाश्रुतेति । तेन तथापीति वक्ष्यमाणाभिप्रायेण साध्यावैशिष्ट्यस्योक्तत्वेन वक्त्रानुकूल्यस्यान्येकदेशत्वेनेत्यस्य विशिष्टयोरविशेषापादने तात्पर्यभावः । अतो नान्ययोरभेदेनान्ययोरविशेषापादनं युक्तमिति तदाश्रयणेन वक्त्रादीनामित्यादिदूषणायोग इति न शङ्कनीयम् । यतो वक्त्रानुकूल्यस्यान्येकदेशत्वेन साध्याविशिष्टतेति परोक्तेरापाततः प्रतिपन्नमर्थमाश्रित्यैव तदूषणकरणादित्यर्थः । अत एवेदं दूषणे गूढाभिसन्धिना दत्तमिति गुरवः । उत्तरत्रापि स्वाभिप्रायं पर इत्यत्राशयमजानान इव परः शङ्कत इति । परस्याशये विज्ञानाभावेन शङ्कापरिहारादिपरम्परेति भावः । पर्वतरूपविशेष्यांशस्य धूमवत्त्वाग्निमत्त्वरूपविशिष्टयोः प्रवेशेऽपि वक्त्रानुकूल्याप्त्योरुभयोरपि विशिष्टतार्थतत्त्वज्ञानादेरिव पर्वतस्य केवलधूमाग्न्योरप्रवेशाद्वैषम्यमित्यतः कृतकत्वानित्यत्वयोरिति मूलं प्रवृत्तम् । तत्र तयोः सत्तानुप्रवेशस्यास्पष्टत्वात्तमुपपादयति कृतकत्वानित्यत्वयोरिति । यस्य यदेति प्रयोगभेदेनानित्यत्वकृतकत्वयोः साध्यत्वसंभवेऽपि एकप्रयोगे तदभावात् । तत्रापि व्यभिचारपरिहाराय हेतौ

विशेषणस्यावश्यकत्वेऽपि साध्ये तदभावादिति भावः। एकस्मिन्नेव प्रयोगे उभयत्रापि तत्प्रवेशो यथा स्यात्तथाविधमुदाहरणमाह जन्यभावेति। तत्र च जन्यभावत्वावच्छिन्नस्य पक्षतया भावान्तरस्य सपक्षत्वायोगेन सपक्षत्वेन अभावस्यैव वाच्यतया सति सपक्षे तत्राप्रवेशित्वेन प्राप्तासाधारण्यस्य वारणाय साध्येऽपि तत्प्रवेशस्यावश्यकत्वादिति भावः। एवं सत्ताया साध्यसाधनयोर्विशेषणेनासाधारण्यादिदोषपरिहार इति प्रतिपादने साध्याविशेषमुपपाद्य विशेषणान्तरेणापि प्रागभावादिव्युदाससिद्धेस्तादृशविशेषणे तत्प्रकारमतिदिशति एवमिति। प्रागभावावच्छिन्नभावत्वयोगित्वप्रध्वंसावच्छिन्नभावत्वयोगित्वरूपेण कृतकत्वानित्यत्वयोः निर्वचनस्य करणेऽपि भावत्वस्योभयत्र प्रवेशेन साध्याविशेषप्राप्तिरिति द्रष्टव्यमित्यर्थः। एवं कृतकत्वानित्यत्वयोः सत्तानुप्रवेशे व्युत्पाद्यसाध्याविशेषप्रसक्तिरुपपादिता। अत्र च साध्यत्वसाधनत्वावस्थायामेव कृतकत्वादौ तत्प्रवेशः प्राप्तः। मूले च कृतकत्वानित्यत्वयोः सत्तानुप्रवेशेऽपीत्यनेनावस्थाभावकाल एव तत्प्रवेशः उक्तः। अतो मूलाननुगुणमेतदुपपादनमित्यस्वरसं सूचयन्नाह इति वदन्तीति। कथं तर्हि स्वरूपत एव तयोस्तत्प्रवेश इत्यतस्तल्लक्षणमेव पदाभिहितं दर्शयन् स्वपक्षमाह वस्तुतस्त्विति। सत्तावत इति। एतच्च भूत्वाभावित्वरूपमनित्यत्वं वदता किरणावलीकारेणाभिहितम्। तथा कार्यत्वमपि प्रागसत इत्यादिरूपेणोक्तमिति कृतकत्वमप्यत्र तथा व्याख्यातम्। न केवलं निरुक्त्याश्रयणेनेति वदता कृतकत्वानित्यत्वस्वरूपमेवेदं न तु साध्यसाधनभावोपपत्तये विशेषणान्तरविशेषितमिति सूचयति। न केवलमेवं निरुक्त्याश्रयणेन प्रवृत्तिस्वीकारे स्वत एवोभयत्र सत्ताप्रवेशलाभ इत्येव। किन्तु साधनसाध्यभावेनानयोः प्रयोगकरणेऽप्युक्तस्वरूप-मात्राश्रयणेनैवासाधारण्यव्यभिचारयोरपि निरासो भवतीत्याह अत एवेति। अत्र टीकायां द्रष्टव्य इत्यनन्तरम् इति वदन्तीति तदुत्तरं च वस्तुतस्त्विति पाठः। सत्तावतो विनाशित्वमित्यादि ग्रन्थलेखनाय प्रवृत्तेन तत्रैव भारवतेति वदतीत्यादि लेखनीयमिति जानतापि तत्परित्यागात्। पुनस्तदक्षरशोधाभावात्। अत्रेति वदन्तीति पक्षान्तरारुचिसूचनरूपलक्षणम्। शब्दो नित्यः कृतकत्वादिति सकलसपक्षवृत्त्यन्वयव्यतिरेक्युदाहरणे व्यभिचारपरिहाराय हेतौ सत्त्वावच्छिन्नप्रागभावप्रतियोगित्वं कृतकत्वम्। साध्ये चासाधारण्यवारणाय सत्त्वावच्छिन्नध्वंसप्रतियोगित्वं विवक्षणीयमित्यादि वदन्तीत्यपि ज्ञेयम्। तत्पक्षेऽपि पूर्ववत्साधनसाध्यकोटौ निवेशप्राप्तावपि प्रागभावादिप्रतियोगित्वरूपकृतकत्वादिशरीर एव तत्प्रवेशालाभादिति पूर्ववदेवास्वरसो बोध्यः। वाक्यार्थविनोदे चैते पक्षाः निराकृताः सन्ति। ननु चैवं सत्तावतो विनाशित्वमित्यादि निर्वचनेऽप्येष दोषोऽनिवार्य इति चेन्मैवम्। प्रागसतः सत्तासंबन्धो हि कृतकत्वं व्याख्यातम्। न चात्र प्रागभाववारणाय विशेषणोपादानं तद्विशेषणाविशेषितमेव च कृतकत्वमस्तीति प्रतीयते। येन प्रागभावावच्छिन्नसत्तायोगित्वमित्यादौ प्रागभावयोगित्वमित्यादिरूपेण सत्तयाऽविशेषितरूपान्तरप्रतिभासेन विशेषणेन योगस्य दोषत्वदिहापि तथात्वं स्यात्। यद्यपि विनाशित्वमात्रमनित्यत्वमित्यङ्गीकारे सत्तावत इति विशेषणमेवेति प्राप्नोति। तथापि तन्न तथा। इदं स्थलं सावकाशं परप्रक्रियामालोच्य विवेचनीयमस्ति।

स०व्र०— अन्यधर्मस्यान्यतरधर्मत्वायोगान्नांशतोऽभेदमात्रेणोपाधिसाधनयोरभेदः, येनोपाधिना साध्यं साध्यत; इत्याशङ्कामुखेनाह उपाधेरिति॥ तथाऽपीति। विवक्षितार्थतत्त्वज्ञानादेरासिपदार्थत्वेन तस्यैव च

'उत्पत्तिर्नाम कारणाधीनसत्तालाभ' इत्येतदध्यायान्त्यभागे वक्ष्यमाणदिशा वा, 'पूर्वमसतः सत्तासमवायवत्त्वं वा कृतकत्वम्; उत्तरकालमसतः पूर्वं सत्तासमवायवत्त्वं वा, सत्तासंबन्धापगमो वा अनित्यत्वमि'त्येवं रूपेण सत्तानुप्रवेश इति भावः)।

वा०र०— अपि त्वित्यादि । अपि तु साध्यसाधने तात्पर्यम् । तत्र तात्पर्याभ्युपगमे च नोत्तरवाक्यवैयर्थ्यमिति बुद्धया विवेकेन योजनादपि त्वित्यस्यानन्वय इति शङ्कानवकाश इति ज्ञेयम् । अन्यप्रकारान्तरेणासिद्धिरूपपत्तिरन्यथासिद्धिरित्येतच्छब्दानुमानादिसाधारणस्वतन्त्रदूषणम् । अप्रयोजको वाक्यत्वादिहेतुरन्यथासिद्धो व्याप्यत्वासिद्धो वेति तत्त्वनिर्णयटीकायामपौरुषेयत्ववादे उक्तेः । तत्रैव तर्कसाध्यानुग्रहनिरूपणावसरे एवं स्वर्गकामो यजेतेत्याद्युक्त्वा एवमन्यत्राप्यन्यथासिद्धिनिरसनादिरनुग्रहस्तत्र तत्र दर्शयितव्य इत्युक्तेश्च । वरदराजीयेऽप्येवम् । अधिकं च वाक्यत्वस्यान्यथासिद्धिव्युत्पादनावसरे उक्ते तत्त्वनिर्णयटीकाव्याख्यानप्रपञ्चेऽस्माभिर्निरूपितं तत एव प्रतिपत्तव्यम् । मूलेऽपि द्रव्यमेव ततोऽनन्तेति समवायनिराकरणानुव्याख्यानव्याख्यावसरे अन्ययासिद्धं च । यथा समवाय इत्यादिना विद्यैवेत्यधिकरणीय विशेषात्मतया सदेत्यनुव्याख्याव्याख्यावसरे निस्वेदादिकमौषधादिना संभवदन्यथासिद्धं चेत्यनेनान्यत्रापि तत्र तत्रान्यथासिद्धिर्वक्ष्यते परन्तु दोषान्तर्भावनिरूपणस्थलीययुक्तिपादगतान्यथासिद्धेः प्रकारान्तरेण दोषताया वक्ष्यमाणत्वादित्यत्राभिप्रेताया अन्यथासिद्धिर्व्यर्थविशेषणासिद्धचादिरूपा । सैव च विशेषणे वैयर्थ्यमेकासिद्धौ चेति भक्तिपादे निरूपिता । सेयमन्यथासिद्धिरिह पदार्थो नेति ज्ञेयम् । साधनस्याप्याप्तितुल्यत्वेऽभेदः संभवत्यतः साधनभूतानुकूल्यानां वक्तृश्रोतृप्रसङ्गरूपत्रितयधर्मवत्त्वं कथयन्नभेदानुपपत्तिमुपपादयति वक्तुर्न्यात्रेति । वाक्यार्थ इति । आप्तवाक्यतया तेनेति वाक्यार्थ इत्यर्थः । मध्ये आप्तवाक्यतासाधनाङ्गीकारे साध्यावैशिष्ट्यस्य प्रथमशङ्कने सति तत एव वक्तृश्रोतृत्युक्तसाधकस्यान्यथासिद्धौ चोक्तायां सिद्धान्तिनापि सा वैशिष्ट्यरूपबाधकपरिहारपूर्वकमेव साधकान्यथासिद्धिः परिहरणीया । तत्कुतो व्यत्यास इत्यत आह बाधकाधीनत्वादिति । उक्तायामपीत्यपिना तथैव परिहारोऽपि कार्यः स कुतो न कृत इति शङ्का सूचिता । न कथमपीति । वक्त्रानुकूल्यादिभ्यां विशिष्टे भेदस्य स्पष्टत्वादिति भावः । यथाश्रुतेति । तेन तथापीति वक्ष्यमाणाभिप्रायेण साध्यावैशिष्ट्यस्योक्तत्वेन वक्त्रानुकूल्यस्यात्येकदेशत्वेनेत्यस्य विशिष्टयोरविशेषापादने तात्पर्याभावः । अतो नान्ययोरभेदेनान्ययोरविशेषापादनं युक्तमिति तदाश्रयणेन वक्त्रादीनामित्यादिदूषणायोग इति न शङ्कनीयम् । यतो वक्त्रानुकूल्यस्यात्येकदेशत्वेन साध्याविशिष्टतेति परोक्तेरापाततः प्रतिपन्नमर्थमाश्रित्यैव तद्दूषणकरणादित्यर्थः । अत एवेदं दूषणे गूढाभिसन्धिना दत्तमिति गुरुवः । उत्तरत्रापि स्वाभिप्रायं पर इत्यत्राशयमजानान इव परः शङ्कत इति । परस्याशये विज्ञानाभावेन शङ्कापरिहारादिपरम्परेति भावः । पर्वतरूपविशेष्यांशस्य धूमवत्त्वाग्निमत्त्वरूपविशिष्टयोः प्रवेशेऽपि वक्त्रानुकूल्याप्त्योरुभयोरपि विशिष्टतार्थतत्त्वज्ञानादेरिव पर्वतस्य केवलधूमाग्न्योरप्रवेशाद्वैषम्यमित्यतः कृतकत्वानित्यत्वयोरिति मूलं प्रवृत्तम् । तत्र तयोः सत्तानुप्रवेशस्यास्पष्टत्वात्तमुपपादयति कृतकत्वानित्यत्वयोरिति । यस्य यदेति प्रयोगभेदेनानित्यत्वकृतकत्वयोः साध्यत्वसंभवेऽपि एकप्रयोगे तदभावात् । तत्रापि व्यभिचारपरिहाराय हेतौ

विशेषणस्यावश्यकत्वेऽपि साध्ये तदभावादिति भावः। एकस्मिन्नेव प्रयोगे उभयत्रापि तत्प्रवेशो यथा स्यात्तथा-विधमुदाहरणमाह **जन्यभावेति**। तत्र च जन्यभावत्वावच्छिन्नस्य पक्षतया भावान्तरस्य सपक्षत्वायोगेन सपक्षत्वेन अभावस्यैव वाच्यतया सति सपक्षे तत्राप्रवेशित्वेन प्राप्तासाधारण्यस्य वारणाय साध्येऽपि तत्प्रवेशस्यावश्यवक्त्वा-दिति भावः। एवं सत्ताया साध्यसाधनयोर्विशेषणेनासाधारण्यादिदोषपरिहार इति प्रतिपादने साध्याविशेषमुपपाद्य विशेषणान्तरेणापि प्रागभावादिव्युदाससिद्धेस्तादृशविशेषणे तत्प्रकारमतिदिशति **एवमिति**। प्रागभावावच्छिन्न-भावत्वयोगित्वप्रध्वंसावच्छिन्नभावत्वयोगित्वरूपेण कृतकत्वानित्यत्वयोः निर्वचनस्य करणेऽपि भावत्वस्योभयत्र प्रवेशेन साध्याविशेषप्राप्तिरिति द्रष्टव्यमित्यर्थः। एवं कृतकत्वानित्यत्वयोः सत्तानुप्रवेशे व्युत्पाद्यसाध्याविशेष-प्रसक्तिरुपपादिता। अत्र च साध्यत्वसाधनत्वावस्थायामेव कृतकत्वादौ तत्प्रवेशः प्राप्तः। मूले च कृतकत्वानित्यत्वयोः सत्तानुप्रवेशेऽपीत्यनेनावस्थाभावकाल एव तत्प्रवेशः उक्तः। अतो मूलाननुगुणमेतदुपपादनमित्यस्वरसं सूचयन्नाह इति **वदन्तीति**। कथं तर्हि स्वरूपत एव तयोस्तत्प्रवेश इत्यतस्तल्लक्षणमेव पदाभिहितं दर्शयन् स्वपक्षमाह **वस्तुतस्त्विति**। **सत्तावत इति**। एतच्च भूत्वाभावित्वरूपमनित्यत्वं वदता किरणावलीकारेणाभिहितम्। तथा कार्यत्वमपि प्रागसत इत्यादिरूपेणोक्तमिति कृतकत्वमप्यत्र तथा व्याख्यातम्। न केवलं निरुक्त्याश्रयणेनेति वदता कृतकत्वानित्यत्वस्वरूपमेवेदं न तु साध्यसाधनभावोपपत्तये विशेषणान्तरविशेषितमिति सूचयति। न केवलमेवं निरुक्त्याश्रयणेन प्रवृत्तिस्वीकारे स्वत एवोभयत्र सत्ताप्रवेशलाभ इत्येव। किन्तु साधनसाध्यभावेनानयोः प्रयोगकरणेऽप्युक्तस्वरूप-मात्राश्रयणेनैवासाधारण्यव्यभिचारयोरपि निरासो भवतीत्याह **अत एवेति**। अत्र टीकायां द्रष्टव्य इत्यनन्तरम् इति वदन्तीति तदुत्तरं च **वस्तुतस्त्विति** पाठः। सत्तावतो विनाशित्वमित्यादि ग्रन्थलेखनाय प्रवृत्तेन तत्रैव भारवतेति वदतीत्यादि लेखनीयमिति जानतापि तत्परित्यागात्। पुनस्तदक्षरशोधाभावात्। अत्रेति वदन्तीति पक्षान्तरारुचिसूचनरूपलक्षणम्। शब्दो नित्यः कृतकत्वादिति सकलसपक्षवृत्त्यन्वयव्यतिरेक्युदाहरणे व्यभिचारपरिहाराय हेतौ सत्त्वावच्छिन्नप्रागभावप्रतियोगित्वं कृतकत्वम्। साध्ये चासाधारण्यवारणाय सत्त्वावच्छिन्नध्वंसप्रतियोगित्वं विवक्षणीयमित्यादि वदन्तीत्यपि ज्ञेयम्। तत्पक्षेऽपि पूर्ववत्साधनसाध्यकोटौ निवेशप्राप्तावपि प्रागभावादिप्रतियोगित्वरूपकृतकत्वादिशरीर एव तत्प्रवेशालाभादिति पूर्ववदेवास्वरसो बोध्यः। वाक्यार्थविनोदे चैते पक्षाः निराकृताः सन्ति। ननु चैवं सत्तावतो विनाशित्वमित्यादि निर्वचनेऽप्येष दोषोऽनिवार्य इति चेन्मैवम्। प्रागसतः सत्तासंबन्धो हि कृतकत्वं व्याख्यातम्। न चात्र प्रागभाववारणाय विशेषणोपादानं तद्विशेषणाविशेषितमेव च कृतकत्वमस्तीति प्रतीयते। येन प्रागभावावच्छिन्नसत्तायोगित्वमित्यादौ प्रागभाव-योगित्वमित्यादिरूपेण सत्तयाऽविशेषितरूपान्तरप्रतिभासेन विशेषणेन योगस्य दोषत्वबदिहापि तथात्वं स्यात्। यद्यपि विनाशित्वमात्रमनित्यत्वमित्यङ्गीकारे **सत्तावत इति** विशेषणमेवेति प्राप्नोति। तथापि तन्न तथा। इदं स्थलं सावकाशं परप्रक्रियामालोच्य विवेचनीयमस्ति।

स०व्र०— अन्यधर्मस्यान्यतरधर्मत्वायोगान्नांशतोऽभेदमात्रेणोपाधिसाधनयोरभेदः, येनोपाधिना साध्यं साध्यत; इत्याशङ्कामुखेनाह **उपाधेरिति**॥ **तथाऽपीति**। विवक्षितार्थतत्त्वज्ञानादेरासिपदार्थत्वेन तस्यैव च

वक्त्राद्यानुकूल्यशब्दार्थत्वेनैकदेशात्साध्यविशिष्टता स्यादिति भावः ॥ विशिष्टभेदेनेति । विवक्षितार्थतत्त्वज्ञानं, करणपाटवं, विवक्षा, अविप्रलिप्सा चेति चतुष्टयमाप्तिः तद्वद्वाक्यत्वं आप्तवाक्यत्वम् । अनुकूलेन वक्त्राऽनुकूलान् श्रोतॄन् प्रति तदीयेच्छितसाधनबोधायोपदिष्टत्वं वक्त्राद्यानुकूल्यम् । तथा च विशिष्टभेदेन न साध्यावैशिष्ट्यमिति भावः ॥ विशिष्टभेदेऽप्येकदेशाभेदेन साध्यविशिष्टता स्यादित्यत्र आह अन्वयेति । वह्निविशिष्टधूमविशिष्टयोर्भेदेऽपि विशेष्यांशस्याभेदादिति भावः ॥ पर्वतो वह्निमान् धूमवत्वादित्यत्र विशेष्यातिरिक्तविशेषणांशाग्र्योभयत्रानुप्रवेशाभावेन दूषणान्तरमाह कृतकत्वेति । कृतकत्वस्य प्रागभावप्रतियोगित्वरूपत्वात्प्रागभावस्य चानादित्वे सति सान्तत्वरूपत्वादनादित्वस्य चोत्पत्तिमत्ताभावरूपत्वादुत्पत्तेश्चासतः सत्तासंबन्धरूपत्वात् कृतकत्वे सत्ताप्रवेशः । एवमनित्यत्वस्यापि ध्वंसप्रतियोगित्वरूपत्वात् ध्वंसस्य च सादित्वे सत्यनन्तत्वरूपत्वात्सादित्वस्य चोत्पत्तिमत्त्वरूपत्वात् उत्पत्तेश्चासतः सत्तासंबन्धरूपत्वादनित्यत्वरूपसाध्येऽपि सत्ताप्रवेश इति भाव इत्याहुः । वस्तुतस्तु प्रागभावोपलक्षितसत्ताकत्वं कृतकत्वं, ध्वंसोपलक्षितसत्ताकत्वमनित्यत्वमिति सत्ताप्रवेशोऽपीत्यर्थः ॥ यद्वा त्विति । न हि निर्दोषत्वं प्रमितवक्तृत्वं वा वक्त्राद्यानुकूल्येऽनुप्रविष्टमिति भावः । तस्माद्वक्त्राद्युपदेष्टोपदिष्टत्वेन अनुकूलवक्त्रादिमत्त्वं तेनाप्तवाक्यत्वं तेन च प्रामाण्यमिति स्थितम् ।

कुण्डल०— नन्वाप्तवाक्यतया तेनेत्युत्तरवाक्यमुपाधिसाधनयोर्भेदबाधनार्थं भविष्यतीति शङ्कते उपाधेस्साधनाभेदमिति । आप्तवाक्यतया इत्युत्तरवाक्यं समानविभक्तिकत्वमहिम्ना आप्तवाक्यत्वन्याय्योपाधेः तेनेति तृतीयान्ततच्छब्दवक्त्राद्यानुकूल्यलक्षणसाधनेनाभेदमापेद्य साधनाभिन्नेनोपाधिना प्रामाण्यरूपसाध्यसाधनव्युत्पादनपरमतो न व्यर्थमिति शङ्कार्थः । स्वामिचरणास्तु वक्तृश्रोतृप्रसक्तीनामनुकूलतेति यत् सैवाप्तिरित्यंतदर्थकेन वक्तृश्रोतृप्रसक्तीनां यदाप्तिरनुकूलतेति पूर्ववाक्येन वक्त्राद्यानुकूल्यरूपसाधनेनाभेदमाप्तेः प्रदर्श्याप्तवाक्यतया तेनेत्युत्तरवाक्ये आप्तवाक्यतारूपेण वक्त्राद्यानुकूल्येनेत्यर्थके तेन साधनेन साध्यं साध्यत इति अर्थं व्युत्पादितवन्तः । अन्ये तु साधनाभेदमिति । तथाच वक्तृश्रोतृप्रसक्तीनां यदाप्तिरनुकूलतेत्यस्य वक्तृश्रोतृप्रसक्तीनामनुकूलता यतस्यादाप्तिस्तेन कारणेनाप्तवाक्यतया मानमित्येव योजनाऽभिप्रेता । न तु यतश्च वाक्य इत्यादिनोक्ता पूर्वयोजनेति भाव इत्याहुः । आप्तेरिति । आप्तवाक्यत्वरूपोपाधिशरीरप्रविष्टायाः वक्तृप्राप्तनिविष्टायाः विवक्षितार्थतत्त्वज्ञानरूपायाः आप्तेः वक्तृश्रोतृप्रसक्त्यनुकूल्योपेतत्वरूपसाधनाभेदोऽनुपपन्न इत्यर्थः । यतश्चाप्तवाक्यतया तेनेत्यत्र तयेति भाव्यम् । पूर्ववाक्ये वक्त्राद्यनुकूलतायाः प्रकृतत्वात् । तथापि पूर्ववाक्ये वक्त्राद्यनुकूलतात्रयस्य प्रकृतत्वात् तत्सामान्येन निर्देष्टुं सामान्ये नपुंसकं इति न्यायेन तेनेति निर्देश इति ज्ञातव्यम् । अंशत इति । साधनशरीरप्रविष्टवक्त्राद्यनुकूल्यशब्दितविवक्षितार्थतत्त्वज्ञानादेरात्मिलक्षणसाध्याभेदेन साधनस्यांशतः साध्यावैशिष्ट्यं स्यादित्यर्थः । आप्तैकदेशेति । साध्यसाधनगताप्यामाप्यनुकूलवक्तृपदाप्यामाप्येकदेशो वाक्यावेदनादिति भावः । ननु यो धूमवानित्यादौ विशेष्यांशस्यैकस्यैऽपि विशेषांशो तदभावेन तत्र व्याप्यव्यापकाभावसंभवेऽपि प्रकृते न संभवति । विशेषणांशा एवैक्यात् इत्यत आह कृतकत्वानित्यत्वयोरिति । प्रागसतः सत्तासंबन्धः कृतकत्वम् । प्राक् सतः सत्तासंबन्धापगमः अनित्यत्वमिति कृतकत्वानित्यत्वयोः सत्त्वानुप्रवेशोऽपीत्यर्थः । उक्तं चैतत्किरणावल्याम् ।

कार्यत्वं अभूत्वाभावित्वम् । अनित्यत्वं भूत्वाऽभावित्वं इति । **यदा त्विति** । साध्यकोटावास्थंशे साधनशरीरस्याप्रवेशात्साध्याविशिष्टताशङ्कैव नास्तीत्यर्थः ।

विद्व०— साधनाभेदानुपपत्तेरिति । विवक्षितार्थतत्त्वज्ञानाविप्रलिप्साविवक्षाकरणपाटवरूपास्तेर्वक्तृमात्रधर्मत्वेन साधनाभेदानुपपत्तेः श्रोतृप्रसक्तधर्मयोरपि साधनशरीरप्रविष्टत्वादिति भावः । साध्याविशिष्टताभावमुपपादयति **वक्त्रादीनामिति** । वक्तृश्रोतृप्रसक्तीनामानुकूल्येन वक्तृधर्मभूतस्यास्तिशरीरानुप्रविष्टतयांशतः साध्याविशिष्टता स्यात् न चैवं किं नाम विमतं शास्त्रं पक्षीकृत्य तस्य अनुकूलवक्त्रादिमत्त्वेन हेतुनाप्तवाक्यत्वं साध्यते तथाच अनुकूलवक्त्रादिमत्त्वस्याप्तवाक्यैकदेशत्वाद्यभावेन न साध्याविशिष्टतेति भावः । तथापि साध्ये साधने चास्यैकदेशभूतवक्त्रानुकूल्यानुप्रवेशेन पुनः साध्याविशिष्टतेति शङ्कते **तथापीति** । यथाकथञ्चिदेकदेशानुप्रवेशमात्रेण साध्याविशिष्टत्वे बाधकमाह **अन्यथेति** । धूमवतोऽग्निमत्त्वैकत्वादिति भावः । ननु विशेषणांशस्योभयत्र प्रवेश एव दोषहेतुः न विशेष्यांशस्येत्यत आह **कृतकत्वेति** । कृतकत्वं नाम सत्तासंबन्धप्रागभावप्रतियोगित्वम् अनित्यत्वं तु संबन्धप्रध्वंसः तथा चोभयत्र सत्तानुप्रवेशोऽस्तीति भावः ।

चषक:— साधनाभेदमिति । आप्यनुकूलतापदयोरभेदान्वयबोधानुकूलसमानविभक्तिकतारूपाकाङ्क्षाशालिताया, 'यदि'त्यस्य लिङ्गविपरिणामेन स्त्रीरूपप्रथमान्तस्य तद्विशेष्यपदत्वोपपत्त्या, 'या वक्त्रादीनाम् अनुकूलतास्तिस्तादृशास्तिमत्प्रणीतवाक्यतये'ति योजनैवाभिप्रेयते, न तु 'यदि'त्यस्य सप्तम्यर्थतामुपेत्य दर्शिता प्राचीनयोजनेति भावः । **अनुपपत्तेरिति** । श्रोतृप्रसक्त्यानुकूल्याघटितास्तेस्तद्घटितसाधनाभेदानुपपत्तेः इत्यर्थः ॥ **उक्तमिति** । 'अनुकूलेन वक्त्राऽनुकूलान् श्रोतॄन्प्रति तदीयहितसाधनबोधायोपदिष्टत्वादि'त्यादिनोक्तमित्यर्थः ॥ **आप्यैकदेशानुप्रवेश इति** । 'आप्तिश्चैकदेशश्चेति द्वन्द्वस्तयोरनुप्रवेशः तत्र साध्यशरीरे आप्तेरेव प्रवेशः, साधनशरीरे च तदेकदेशभूताविप्रलिप्साविनिर्मुक्तांशत्रिकस्य प्रवेश इत्यर्थः । न च द्वन्द्वस्याभिप्रेततायामाप्तिदेकदेशेति विन्यासेन भवितव्यमिति वाच्यम् । अनुपपत्त्यैकदेशपदस्यैव लक्षणया स्वीयान्यपक्षयोरि'त्यादाविवैतदेकदेशकतात्पर्यकत्वोपगमात् ॥ **विशिष्टभेदेनेति** । चतुष्टयरूपव्याप्यज्यवृत्तिधर्मावच्छिन्नावच्छेदकताककर्तृताकप्रणयनक्रियाकर्मत्वस्य साध्यतया, त्रित्वरूपतदवच्छिन्नावच्छेदकताकर्तृताकप्रणयनक्रियाकर्मत्वस्य च हेतुतयाभिप्रेततया, क्षत्यनवकाशादिति भावः । उभयत्र विशेषणांशनिवेशस्य असहिष्णुतायामभियुक्तकिरणावलीकारादिव्यवहारविरोध इत्याह **कृतकत्वेति** । कृतिनिर्वर्त्यत्वरूपकृतकत्वेन ध्वंसप्रतियोगित्वरूपानित्यत्वसाधने ध्वंसे व्यभिचारवारणाय, तथा नादृशानित्यत्वेन कृतकत्वसाधने प्रागभावे व्यभिचारवारणाय च, हेतौ जन्यभावसामान्ये कृतकत्वेनानित्यत्वस्य सिषाधयिषितायां, प्रागभावपरिगृहीतिनियन्त्रितासाधारण्यव्युदसनाय युगपत् उभयत्र च सत्तानुप्रवेश आदृत इति ध्येयम् ।

काशी०— स्यादेवमुत्तरवाक्यवैयर्थ्यं यदि वक्तृश्रोतृप्रसक्तीनामिति वाक्यमुपाधेः साधनव्यापकतापदर्शनपरं स्यात् । न चैवमित्याशङ्कते **उपाधेरिति** । उपाधित्वेन शङ्क्यमानस्याप्तवाक्यत्वपदार्थस्य वक्त्राद्यानुकूल्य-

वत्त्वरूपतामुपाधिशङ्कानिवृत्तये ज्ञापयित्वा तेन तथाभूतेन साधनेन प्रामाण्यमाप्तवाक्यतया तेनेत्यन्तेन साध्यत इत्यर्थः । तथा च वक्तृश्रोतृप्रसक्तीनामनुकूलता यद्यस्मादाप्तिरामपदप्रवृत्तिनिमित्तं तेनाप्तवाक्यतयाऽऽप्तिमूलक-वाक्यतया मानमिदं शास्त्रमिति मूलयोजनेति भावः । एवं च मूलेनाप्तैर्वक्त्राद्यानुकूल्यरूपत्वोक्त्योपाधेः साधनाभेदो ज्ञाप्यत इत्यवधेयम् । स्यादेवं यद्याप्तैर्वक्त्राद्यानुकूल्यरूपा स्यान्न चैवमिति समाधत्ते नेति । वक्तृमात्रधर्मस्येति हेतु-गर्भम् । वक्त्राद्यानुकूल्यरूपत्वानुपपत्तेति शेषः । आप्तैर्वक्तृमात्रधर्मत्वादविप्रलिप्सा तत्र निविष्टा । श्रोतृप्रसक्त्यनु-कूल्ययोः श्रोतृप्रसक्तधर्मत्वात्तत्त्वज्ञानयोग्यतादिकमत्र निविष्टम् । अतो न तदैक्यमिति भावः । साधनेत्यादेरुपाधे-रित्यादिः । न च श्रोतृप्रसक्त्यनुकूल्यमूलकत्वस्य तन्मूलकाविप्रलिप्सामूलकत्वरूपत्वादाप्तिमूलकवाक्यत्वरूपोपाधेः वक्त्राद्यानुकूल्यमूलकवाक्यत्वरूपसाधनाभेदः संभवत्येवेति वाच्यम् । श्रोतृप्रयोजनोद्देशादेः साक्षादपि वाक्यमूलत्वं साधनशरीरे साक्षात्तन्मूलकत्वस्यैव लाघवेन निवेशयत्वात् । पूर्वपक्षोक्तं बाधकं निराह साध्याविशिष्टतेति । उक्तरीत्या हेतुसाध्ययोर्भेदादिति भावः । नन्वत्र बादरायण आप्तो वक्त्राद्यानुकूल्यवत्त्वादित्येव साधनीयम । शास्त्रस्य तद्वाक्यत्वे विवादाभावात् । अत एव मूले यत्र वक्तृश्रोतृप्रसक्तीनामनुकूलता तत्राप्तिरित्येवोक्तम् । तथा च वक्त्रानुकूल्यांशे साध्याविशिष्टत्वं दुर्वारमित्याशङ्क्य स्यादेवं यदि तथा साधनमभिप्रेतं स्यान्न चैवमित्याह वक्त्रादीनामिति । न च श्रोतृप्रसक्त्यनुकूल्ययोरप्याप्तिव्यधिकरणत्वात्कथं तत्साधकत्वमिति वाच्यम् । व्यधिकरणत्वेऽपि साधकत्वाङ्गीकारात । अनुकूलश्रोतृप्रयोजनोद्देश्यकप्रवृत्तिमत्त्वस्य वा विवक्षितत्वात् । आप्तवाक्यतेति । वाक्यत्वादिमात्रे विवादा-भावेऽपि विशिष्टवाक्यत्वे तद्भावात् मूलस्थाप्तिपदस्याप्तवाक्यत्वपरतया व्याख्यातत्वादिति भावः । ननु साधने साध्यैकदेशप्रवेशोऽपि दोष एव । पर्वतो धूमवानग्निमांश्च धूमवत्त्वादित्यादौ साध्याविशिष्टतायाः सर्वसम्मतत्वा-दित्याशयेन शङ्कते तथाऽपीति । आप्तैकदेशो वक्त्रानुकूल्यम् । साधने साध्यैकदेशप्रवेशो हि पक्षधर्मतानिश्चयस्य साध्यसन्देहविरोधित्वे दोषः । तस्य साधनाङ्गत्वात् । यद्यैकांशयोः साध्यत्वे प्रकृते च विशिष्टसाध्यसाधनयोर्भेदेन पक्षधर्मतानिश्चयस्य विशिष्टसाध्यसन्देहाविरोधित्वात्र दोष इत्याशयेन समाधत्ते सत्यमिति । अदोषत्वादित्यस्य साधने विशिष्टसाध्यैकदेशप्रवेशस्येत्यादिः । अन्यथा साधने विशिष्टसाध्यैकदेशप्रवेशस्यापि दोषत्वे । इतीति । इति वाक्यप्रतिपाद्ययोर्धूमवत्त्ववह्निमत्त्वयोरित्यर्थः । व्याप्यव्यापकभावः हेतुसाध्यभावः । विशेष्येति । मतुवर्थ-रूपविशेष्येत्यर्थः । ननु वह्न विशेष्यांशस्य हेतुशरीरप्रविष्टत्वेन निश्चितत्वेऽपि वह्निरूपविशेषणसन्देहाधीन-विशिष्टसाध्यसन्देहसंभवान्न दोषः । प्रकृते च वाक्यत्वादिरूपविशेष्यांशस्य वक्त्रानुकूल्यरूपविशेषणांशस्य च हेतुघटकत्वेन निश्चिततया विशिष्टसाध्यसन्देहासंभवादेकदेशप्रवेशो दोष एवेत्याशङ्क्याह कृतकत्वेति । यथा सत्त्वे सति प्रागभावप्रतियोगित्वरूपकृतकत्वे सत्त्वे सति ध्वंसप्रतियोगित्वरूपानित्यत्वे च सत्ताप्रतियोगित्वरूप-विशेषणविशेष्ययोः प्रवेशेऽपि तयोः परस्परावच्छेदकध्वंसप्रागभावावच्छिन्नत्वेनैकस्य सिद्धावप्यन्यस्य सन्देहसंभवा-द्धेतुसाध्यभावः । तथा प्रकृतेऽपि हेत्वघटकाविप्रलिप्सांशावच्छिन्नत्वेन विशिष्टसाध्यस्य सन्देहसंभवान्नोक्तदोष इति भावः । सिद्धान्ते सत्ताजात्यनङ्गीकारात्पुराणादौ व्यभिचाराच्च पौरित्युक्तम् । तार्किकादिभिरित्यर्थः । ननु कृतकत्वानित्यत्वयोः सत्तानुप्रवेश एव किमर्थमिति चेत् । उच्यते । कार्यत्वानित्यत्वे हि जन्यभावलक्षणत्वेनोक्ते । तत्र ध्वंसे प्रागभावे चातिव्याप्तिवारणाय सत्तानुप्रवेशः । कार्यत्वमभूत्वाभावित्वमनित्यत्वं भूत्वाऽभावित्वमिति

किरणावल्यां तद्व्याख्यानस्याप्युक्त एवार्थः । तथाऽप्येकेनापरसाधने तत्रैव व्यभिचारवारणाय हेतौ सत्तानिवेशस्यावश्यकत्वेऽपि साध्ये तन्निवेशवैयर्थ्यमिति चेत् । जन्यभावपक्षकानुमाने ध्वंसादिरूपसपक्षव्यावृत्तत्वेन हेतोरसाधारण्यवारणाय साध्येऽपि तत्प्रवेश इति वाक्यार्थचन्द्रिकायामुक्तम् । यद्यप्युद्देश्यसिद्ध्यर्थत्वात्साध्यघटकविशेषणस्य न प्रयोजनान्तरापेक्षा । तथाऽपि सत्ताया हेतुघटकत्वेन सिद्धत्वाद्विनाशित्वस्यैव साध्यत्वमस्त्वित्याशङ्कावारणाय प्रयोजनान्तरोक्तेरावश्यकतेति ध्येयम् । **शङ्कैव नास्तीति** । यद्यपि वाक्यत्वादिरूपविशेष्यांशस्योभयत्र प्रवेशप्रयुक्तसाध्याविशिष्टत्वशङ्का संभवति तथाऽपि विशेष्यविशेषणोभयप्रवेशप्रयुक्ताया निष्कृष्टशङ्काया अनवकाश इत्याशयः ।

गूढ०— आमेरिति । आप्तिरूपवक्तृमात्रधर्मस्यानुकूलवक्त्रादिमत्त्वेन त्रितयधर्मेण नैक्यं विरोधादित्यर्थः । तथापि साध्याविशेष इत्यत आह **साध्येति** । तथापि अंशे साध्याविशेष इति शङ्कते **तथापीति** । अनुकूलवक्त्रंशे आप्तवाक्यत्वमित्यत्राप्यंशे ऐक्येऽपि अनुकूलवक्त्रादिमत्त्वरूपविशिष्टाप्तवाक्यत्वरूपविशिष्टयोर्भेदोऽस्ति इति न साध्याविशेष इत्यर्थः । **अन्यथेति** । अंशैक्येन साध्याविशेष इत्यर्थः । ननु तत्रापि यत्र धूमस्तत्र वह्निरित्येव व्याप्तिर्गृह्यत इति नांशैक्यमित्यत आह **कृतकत्वेति** । न चात्र साध्यसाधनयोः कथं सत्तानुप्रवेश इति वाच्यम् । प्रागभावप्रतियोगित्वमात्रस्य कृतकत्वे ध्वंसे व्यभिचारः स्यादिति प्रागभावावच्छिन्नसत्तायोगित्वस्यावश्यकत्वात् । तथापि साध्ये तत्प्रवेशः कुत इति न वाच्यम् । **जन्यो भावोऽनित्यः** कृतकत्वादिति व्यतिरेकिणि ध्वंसप्रतियोगित्वमात्ररूपस्यानित्यत्वस्य साधने प्रागभावरूपसपक्षाप्रवेशित्वेनासाधारण्यं स्यादिति तत्रापि ध्वंसावच्छिन्नसत्तायोगित्वं तद्व्याप्यमिति सत्तानुप्रवेश आवश्यक इति तत्रापि साध्याविशेषः स्यादिति भावः । न च विशिष्टस्य पदार्थान्तरत्वपक्षे साध्याविशेषपरिहारेऽपि विशेषणविशेष्यतत्संबन्धात्मकं तदिति पक्षे न तत्परिहार इति वाच्यम् । विशिष्टपदार्थान्तरत्वस्य तं प्रत्यङ्गीकार्यत्वात् । यद्वा पक्षान्तरमाह **यदा त्विति** ।

प्रदीप.— अन्यतरधर्मस्य त्रितयधर्मत्वायोगान्नांशभेदमात्राश्रयण उपाधिसाधनयोरभेदः येनोपाधिना साध्य साध्येनेत्याशङ्कामुद्बोधनाह **उपाधेरिति** । **साध्याविशिष्टता त्वित्यादि** । विशेषणभेदेऽपि विशेष्यैक्येन साध्यावैशिष्ट्यापातेऽपि विशेषणविशेष्यभेदे तदप्रसङ्गादेकदैकदेशानुप्रवेशोऽपि व्याप्यव्यापकभावदर्शनाभ्युपगमाभ्यां विशिष्टभेदादन्यथातिप्रसङ्गान्न दोष इति समुदायार्थः । **यदा त्विति** । न हि निर्दोषत्वं प्रमितवक्तृत्वं च वक्त्राद्यानुकूल्ये प्रविष्टमिति । तस्माद्भ्रान्त्यायुपदेष्ट्रायुपदिष्टत्वेनानुकूलवक्त्रादिमत्त्वं तेनाप्तवाक्यत्वं तेन च प्रामाण्यमिति स्थितम् ।

६९. सु०— ग्रन्थकृताऽपि कस्मादियं परम्पराऽऽश्रितेति चेन्न । वक्त्राद्यानुकूल्येन प्रामाण्यं साधयताऽप्यन्ततोऽस्यार्थस्याश्रयणीयत्वात् । अन्यथा 'अस्तु वक्त्राद्यानुकूल्यं वक्तुर्विप्रलिप्सामूलत्वेनाप्रामाण्यं च भवतु' इत्याशङ्कायाः को निवारयिता ।

परि०— ग्रन्थकृता भाष्यकृतेत्यर्थः ॥ **अस्यार्थस्येति** । आप्तवाक्यत्वद्वारकत्वस्येत्यर्थः ॥

गु०दी०— अन्यथाऽस्तु वक्त्राद्यानुकूल्यम् इत्यत्र अस्तु वक्त्राद्यानुकूल्यमस्तु च श्रोत्रानुकूल्यं भवतु प्रसङ्गानुकूल्यं च। तथाऽप्यनुकूलमेव श्रोतारं वक्ता विप्रलिप्सतां को दोष इति शङ्कायां लोके सर्वत्र वक्त्राद्यानुकूल्यं सत्यविप्रलिप्सादिमूलत्वरूपाप्तवाक्यत्वस्यैव दर्शनेन प्रकृतेऽपि तथेत्यनुमानविधया प्रतिबन्धमुखप्रम्पराया अवश्यमाश्रयणीयत्वादिति भावः।

बालु०— अन्ततोऽस्वार्थस्येति। विप्रलिप्साभावघटितापिसाधनस्येत्यर्थः॥ को निवारयितेति। तथा च विपक्षे बाधकोपन्यासार्थमाप्तवाक्यत्वसाधनमावश्यकमित्यर्थः॥

आनन्दः— द्वितीयं शङ्कते ग्रन्थकृतेति। वक्त्रादीति। तथा चाप्रयोजकतापरिहार एव परम्पराश्रयणे निमित्तमिति भावः।

श्रीनिधि०— वक्तुर्विप्रलिप्सामूलत्वेनेति। ननु श्रोतृप्रसङ्गयोरानुकूल्ये विप्रलिप्सैव नोदेष्यतीति चेत् तर्हि वक्त्राद्यानुकूल्यं साध्यं विवक्षितार्थतत्त्वज्ञानं करणपाटवविप्रलिप्सारहितवाक्यत्वरूपमाप्तवाक्यत्वमेव प्रामाण्यं प्रयोजकतया आदातव्यमिति।

वा०चं०— एवं ग्रन्थकृतः परम्पराश्रयणाभिप्रायमुपपाद्य तत्र निमित्तं शङ्कते ग्रन्थेति। वक्त्राद्यानुकूल्यस्य विवक्षितार्थतत्त्वज्ञानकरणपाटवविवक्षारूपत्वात्सति तस्मिन्विवक्षितार्थतत्त्वज्ञानविरोधिप्रयुक्ताप्रामाण्यशङ्कायाः अगत्यवेऽपि अविप्रलिप्सायाः वक्तृश्रोतृप्रसङ्गानुकूल्यरूपत्वाभावेन, सत्यपि तस्मिंस्तदभावप्रयुक्ताप्रामाण्यशङ्कायाः संभवेन, तच्छङ्कायाः श्रोतृप्रसङ्गनामानुकूल्यैकनिबन्धनत्वाद्विप्रलिप्सायास्तदानुकूल्याभावे प्रयोजकाभावेनानुपपत्तेः इत्येवं श्रोतृप्रसङ्गनामानुकूल्यैकनिबन्धनत्वाद्विप्रलिप्सायास्तदानुकूल्याभावे प्रयोजकाभावेनानुपपत्तेः इत्येवं श्रोतृप्रसङ्गानुकूल्येन वक्तुर्यविप्रलिप्सानाश्रयणेऽनिवृतेरन्ततः तन्नाधनाश्रयणे प्रथमत एव तदस्तिवनि भावेन भाष्यकृतः परम्पराश्रयणं युक्तमेवेत्याह वक्त्रादीति॥

वा०र०— तत्र निमित्तमिति। उक्तपरम्पराश्रयणे निमित्तमित्यर्थः। विवक्षितार्थतत्त्वज्ञानादिचतुष्टयमध्ये तत्त्वज्ञानविरोधिप्रयुक्ताप्रामाण्यशङ्कायाः वक्त्राद्यानुकूल्ये सत्यनुत्थानवदविप्रलिप्साभावप्रयुक्ताप्रामाण्यशङ्कायाः अप्यनुत्थानात्कथमप्रामाण्यशङ्कानिवर्तकाभावमिधानं मूल इत्यतः तच्छङ्कोत्थानशङ्कान्तरवैषम्यमुपपादयन् संभवतीत्याह वक्त्राद्यानुकूल्यस्येति। तस्मिन्। वक्त्राद्यानुकूल्ये। तत्त्वज्ञानविरोधीति। तद्विरोधपदज्ञानादितत्प्रयुक्तेत्यर्थः। वक्तृश्रोत्रित्यनेन प्रागुक्तवक्त्राद्यानुकूल्यं व्याख्यातम्। तस्मिन् वक्त्राद्यानुकूल्ये। तदभावेति। अविप्रलिप्साभावेत्यर्थः। संभवेन इत्यनेन मूले शङ्कायाः एवाभावात्को वारयितेत्याक्षेपानुपपत्तिरिति शङ्कानिरासः। तच्छङ्कायाऽनिवृत्तेरिति वक्ष्यमाणेन संबन्धः। वक्तृश्रोत्रानुकूल्येनाविप्रलिप्सानाश्रयणे उक्तशङ्काया अनिवृत्तिमेवोपपादयितुं तदाश्रयणे तन्निवृत्तिः संभवतीति प्रतिपादनं कृतं श्रोतृप्रसङ्गानुकूल्येत्यादि। आनुकूल्याभावे तत्सत्त्वे। अन्यत इत्यस्याभिप्रायमाह अतस्तस्मादिति। एवं च साक्षाद्वक्त्राद्यानुकूल्यमात्रेण संपूर्णप्रामाण्यनिर्वाहासंभवात्

तदर्थमध्येऽविप्रलिप्सासाधनस्य कर्तव्यत्वादाप्तवाक्यतासाधनमेव तर्हि मध्येऽस्तित्याशयेन भाष्यकृता परम्पराश्रितेति फलितोऽर्थः।

स०व्र०— परम्पराश्रयणे प्रयोजनं प्रश्नपूर्वकमाह **ग्रन्थेति**। विपक्षे बाधकोपन्यासार्थमाप्तवाक्यत्वसाधनमित्यर्थः॥

कुण्डल०— ननु भवत्विदं व्याख्यानं पूर्वोत्तरमूलानुरोधात् मूलमेवैवं किमर्थमिति शङ्कते **ग्रन्थकृताऽपीति**। **इयं परम्परेति**। आप्तवाक्यत्वानुमानद्वारा प्रामाण्यलक्षणानुमानपरम्परेत्यर्थः। **वक्त्राद्यानुकूल्येनेति**। भवतु वक्त्राद्यानुकूल्योपेतत्वं मास्तु प्रामाण्यम्। विप्रलिप्सामूलकत्वेनाप्रामाण्यं स्यात्। तथाच हेतुप्रयोजक इति शङ्कानिरासार्थं अविप्रलिप्सामूलकत्वव्युत्पादनाय आप्तवाक्यत्वानुमाया आवश्यकत्वादित्यर्थः।

विद्व०— **को निवारयता इति** तथाच विपक्षे बाधकोपन्यासार्थम् आप्तवाक्यतासाधनमावश्यकम् इत्याशयः।

चषक:— एवं सत्तापरित्यागेन भावत्वादिविशेषणान्तरप्रक्षेपेऽपि तत्प्रयुक्त एवाविशेषो द्रष्टव्य इत्यपि स्थितम्। **अस्यार्थस्येति**। विप्रलिप्साभावघटितासाधनस्येत्यर्थः। **अन्यथा** तादृशासाधनानभ्युपगमे। **को निवारयितेति**। विवक्षितार्थतत्त्वज्ञानविवक्षाकरणपाटवेति त्रितयरूपवक्त्रानुकूल्यसमवधाने तद्घटकान्यतमाभावनिबन्धनाप्रामाण्यशङ्काया असंभवेऽपि; अविप्रलिप्साया उक्तानुकूल्यघटकताविरहेण, श्रोतृप्रसङ्गानुकूल्यघटकत्वाभावेन च तादृशानुकूल्यत्रयघटितहेतूपगमेऽपि विप्रलिप्सानियन्त्रिताप्रामाण्यशङ्का सङ्कुच्छत एव। न च विप्रलिप्सायास्तादृशानुकूल्यत्रयघटकत्वाभावेऽपि श्रोतृप्रसङ्गानुकूल्यैकप्रयोज्यतया तत्प्रयोजकाभावदशायां कथं सा सङ्कुच्छतामिति वाच्यम्। श्रोतृप्रसङ्गानुकूल्येन वक्तुर्यविप्रलिप्साश्रयणस्य एतावन्तं पन्थानं प्रयातस्यावश्यकतायामादित एव विप्रलिप्साभावघटितासाधनौचित्यादित्याशयः॥

काशी०— एवं भाष्यकर्तुः परम्पराभिप्राये ज्ञापकमनन्यथासिद्धमभिधाय निमित्तं वक्तुमाशङ्कते **ग्रन्थकृताऽपीति**। **इयं** उक्तानुमानद्वयरूपा। **अस्यार्थस्य** उक्तपरम्परारूपस्य। **विप्रलिप्सामूलत्वेनेति**। अविप्रलिप्साया वक्त्राद्यानुकूल्याघटकत्वादिति भावः। नन्वेवं वक्त्राद्यानुकूल्येन प्रामाण्यसाधने उक्ताप्रयोजकत्वशङ्कावारणाय श्रोतृप्रसङ्गानुकूल्यवत्त्वेन वक्तुरविप्रलिप्सैव साधनीया। न तु वक्त्राद्यानुकूल्येनासिरिति लाघवम्। न चानुमानद्वयस्यावश्यकत्वादविशेष इति वाच्यम्। परम्परापक्षे हेतुसाध्यशरीरगौरवात्। मैवम्। शास्त्रप्रामाण्ये विप्रतिपद्यमानं प्रति प्रथमतस्तत्प्रामाण्ये साधनीये लाघवात्साक्षादनुकूलतर्कलाभाच्चाप्तवाक्यत्वेन तत्साधनमेव युक्तम्। न त्वनुकूलवक्त्रादिमत्त्वेन गौरवादविप्रलिप्सासाधनमन्तरेणानुकूलतर्कालाभाच्च। पश्चात्तु हेत्वसिद्धिशङ्कायां गुरुभूतेनाप्यनुकूलवक्त्रादिमत्त्वेनाप्तवाक्यतासाधनस्य न्यायप्राप्तत्वाच्च दोषः। एवं श्रोतृप्रसङ्गानुकूल्यवत्त्वेनाविप्रलिप्सामात्रसाधनेऽपि यदि शास्त्रमप्रमाणं स्यात्तर्ह्यविप्रलम्भकवाक्यं न स्यादित्यनुकूलतर्को न वक्तुं शक्यः।

व्याप्यभावात् । किं त्वाप्तवाक्यं न स्यादित्येव । तस्य च तस्यात्प्रमाणमित्याशय विपर्ययेणापादकविपर्यय-पर्यवसानावश्यकत्वे प्रथमत एवाप्तवाक्यत्वेन प्रामाण्यसाधनमुचितम् । तदेतदभिप्रेत्योक्तमन्तर्नीऽप्यस्यार्थ-स्याश्रयणीयत्वादिति । नन्वेवमनुमानेन शास्त्रप्रामाण्यसाधनं व्यर्थम् । प्रामाण्यस्य स्वतो ग्राह्यत्वात् । न च करणप्रामाण्यस्य ज्ञानकरणतागाहकमात्रग्राह्यत्वमेव स्वतो ग्राह्यत्वम् । तथा च तदुपपादकमेवेदं प्रामाण्या-नुमानमाप्तवाक्यत्वस्यापि ज्ञानकरणतागाहकत्वादिति वाच्यम् ।

गूढ०— द्वितीयं शङ्कते ग्रन्थकृदिति । वक्तृत्वादीति । तथा च अप्रयोजकतापरिहार एव परम्परागाश्रयणे निमित्तमिति भावः ।

प्रदीप:— परम्परागाश्रयणे प्रयोजनं प्रश्नपूर्वकमाह ग्रन्थेति । विपक्षे बाधकोपन्यासार्थमाप्तवाक्यतासाधन-मित्यर्थः ।

७० सु०— यद्यपि 'प्रामाण्यं स्वत एवे'ति बादरायणीयं मतम् । यद्वक्ष्यति 'न विलक्षणत्वादि'ति । जैमिनिरपि 'तत्प्रामाण्यं बादरायणस्य अनपेक्षत्वादि'ति । तथाऽप्यप्रामाण्यशङ्कानिरासार्थोऽयं प्रयत्न इत्यविरोधः ।

बिन्दु:— शङ्कानिरासार्थम् आप्तोक्तत्वानुमानमिति समाधानं च युज्यत इति ध्येयम् ।

परि०— प्रामाण्यं स्वत इति ॥ ननु कथमेतत् । पदतो करणप्रामाण्यं ज्ञातो परत इत्युक्तेरित्यत आह यद्वक्ष्यतीति । तच्च विवरिष्यते 'प्रत्यक्षवच्च प्रामाण्यम्' इत्यत्र । पदत्युक्तिस्तु विवक्षाभेदेन युक्तेति प्रत्यक्षवच्चेत्यत्रैव व्यक्तीकरिष्यतीति भावः ॥ नन्वेतच्छास्त्रं प्रमाणं प्रमितिजनकम् । आप्तवाक्यत्वादिति शास्त्रप्रामाण्यज्ञानाय न विजातीयसंवादरूपानुमानोक्तिर्युक्ता । शास्त्रस्य ज्ञानजननशक्तिः येन ज्ञायते तेनैव तस्य प्रमाजननशक्तिरूपप्रामाण्यस्यापि ज्ञायमानत्वरूपस्वतस्त्वोपगमविरोधात् । न चाप्तवाक्यत्व-रूपमनुमानं प्रमाजननशक्तिग्राहकं सत् ज्ञानजननशक्तिं न गृह्णातीति युक्तम् । तयोरभेदात् । भेदे वा इदं ज्ञानजनकमाप्तवाक्यत्वादिति प्रयोगसंभवेन तस्या अपि ग्राहकत्वादिति चेन्न । पर्यायेण ग्राहकत्वे अपि ज्ञानं प्रमाणमितिवत् ज्ञानजनकमिदं प्रमाजनकमिति युगपद्ग्रहात् । ननु च ज्ञानजनकमिदं शास्त्रं प्रमाजनकमाप्तवाक्यत्वादित्युक्तौ युगपदुभयग्राहकत्वमप्यस्तीति चेत् । एवं तर्हि वक्ष्यमाणश्रुतियुक्ति-संवादेन प्रामाण्यग्रहस्योत्तरवाक्ये वक्ष्यमाणत्वात्तदपेक्षयैते शङ्कोत्तरे स्याताम् । अत एव 'न विलक्षणत्वात्' इति संमत्युक्तिः सङ्गता । तत्र संवादनिरपेक्षेण प्रामाण्यग्रहस्य वक्ष्यमाणत्वात् । यद्वा मूले ब्रह्मसूत्राणां

प्रामाण्यमित्यस्य ब्रह्मसूत्रज्ञानप्रामाण्यमित्यर्थः। आप्तवाक्यतयेत्यादेराप्तवाक्यजत्वेनेत्यादिरर्थः। एवं च तत्प्रामाण्यस्य साक्षिवेद्यतयाऽनुमानावेद्यत्वादाप्तवाक्यत्वादित्युक्तिरयुक्तेति शङ्काभिप्रायः। 'न विलक्षणत्वात्' इत्यत्रापि तज्जन्यज्ञानप्रामाण्यस्वतस्त्वाशयेनैव संमत्युक्तिरिति ध्येयम्। अथवेदं शास्त्रं प्रमाजनकं ज्ञानजनकत्वे सति संशयविपर्ययाजनकत्वात्संमतवाक्यवदित्यनुमानमेव प्रामाण्यग्राहकम्। आप्तवाक्यत्वादिहेतुत्रयं चोक्तहेतोः विशेष्यासिद्धिवारकमिति शङ्कोत्तरे ध्येये। वस्तुतस्तु वाक्यश्रवणात् जायमानबोधरूपकार्यलिङ्गेन ज्ञानजननशक्तिरनुमीयते। तेनैव प्रमाजननशक्तिरपि न त्वाप्तवाक्यत्वादिनेति स्वतःप्रामाण्यमिति शङ्कार्थः॥ **नेति**। 'न विलक्षणत्वादस्य तथात्वं च शब्दात्' इति युक्तिपादीयद्वितीयाधिकरणे अस्य वेदादिशास्त्रस्य विलक्षणत्वात्संवादानपेक्षत्वरूपस्वतःप्रामाण्याख्यात् पाशुपताद्यागमविलक्षणत्वान्न तथात्वं नाप्रामाण्यमिति वक्ष्यतीत्यर्थः। **जैमिनिरपीति**। स्वत एव प्रामाण्यमिति बादरायणीयं मतमित्येतत्प्रमेयं 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थे अनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्' इति सूत्रेण आद्याध्यायाद्यपादस्थेनाहेत्यर्थः। सूत्रार्थस्तु शब्दस्यार्थेन संबन्ध औत्पत्तिकः स्वाभाविकः उपदेशो वेदात्मा तस्य ज्ञानं ज्ञापकः अव्यतिरेको विपर्ययाजनकः चशब्दात्संशयाजनकश्च। बोधकत्वे सति संशयविपर्ययाजनक इति यावत्। तत्तस्मात् अनुपलब्धे मानान्तरानवगतेऽर्थे प्रमाणमनपेक्षत्वादन्यानपेक्षत्वादिति। बादरायणग्रहणं पूजार्थम्। बुद्धिदोषनिरासमात्रकारणत्वाद्युक्तीनामिति तत्त्वनिर्णयोक्तदिशा समाधिमाह **तथाऽपीति**॥

यादु०— यद्यपीति। तथा च युक्त्या तत्साधनेऽपसिद्धान्त इति भावः॥ **न विलक्षणत्वादिति**। 'न विलक्षणत्वादस्य तथात्वं च शब्दात्' इति सूत्रखण्डस्य 'न विलक्षणत्वादि'त्यस्य नैवं श्रुतेस्तदनुसारिस्मृतेश्च तदुक्तानुपलब्धेरप्रामाण्यं वाच्यं विलक्षणत्वात्तत्प्रामाण्यस्य संवादानपेक्षतया स्वतस्त्वादित्यर्थः॥ **तत्प्रामाण्यमिति**। 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धेः तत्प्रामाण्यं बादरायणस्य अनपेक्षत्वात्' इति जैमिनिसूत्रखण्डस्य 'तत्प्रामाण्यमि'त्यादेस्तस्यापौरुषेयत्वेनानाशङ्कितदोषस्य वेदस्य, स्वत एव प्रामाण्यं, बादरायणस्यापि संमतम्। प्रामाण्यस्योत्पत्तावामोक्तत्वादेः ज्ञातौ संवादादेः चानपेक्षणादित्यर्थो बोध्यः। 'बुद्धिदोषनिरासमात्रकारणत्वाद्युक्तीनाम्' इति भगवत्पादीयं वाक्यं मनसि निधाय आह **तथाऽपीति**।

कं०रा०— जैमिनिरिति। जैमिनिरप्यौत्पत्तिकस्तुशब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धेस्तत्प्रमाणं बादरायणस्यानपेक्षितत्वादिति प्रामाण्यं स्वत एवेति बादरायणीयं मतमाहेत्यर्थः। जैमिनिसूत्रार्थस्तु। औत्पत्तिकः स्वाभाविकः शब्दार्थयोः संबन्धो नाधुनिकः। अतोऽग्निहोत्रं जुहुयादित्यादिरुपदेशो विधिः। 'चोदना चोपदेशश्च विधिश्चैकार्थवाचिन' इति भट्टोक्तेः। तस्याग्निहोत्रादिलक्षणस्य धर्मस्य ज्ञानं ज्ञापकम्। ज्ञायतेऽनेनेति करणे ल्युट्। एतेन ज्ञानानुत्पत्तिलक्षणमप्रामाण्यं निरस्तम्। विपर्ययं निराचष्टे। अव्यतिरेकस्तस्याव्यतिरेको-

ऽविपर्ययः । चकारादसंशयश्च । अर्थेऽनुपलब्धे इत्यनुवादत्वं निरस्यति । अतस्तच्चोदनाख्यं प्रमाणमेवानपेक्षत्वे-नाज्ञातज्ञापकत्वात् । बादरायणग्रहणं पूजार्थम् । न परमतत्वेनेति । अत्रानपेक्षत्वादित्यनेन स्वतःप्रामाण्यमुक्तमिति द्रष्टव्यम् ।

श्रीनिधि०— यद्यपि प्रामाण्यं स्वत एवेति बादरायणीयं मतमिति । ननु सिद्धान्ते करणप्रामा-ण्यस्य करणग्राहकातिरिक्तग्राह्यत्वरूपपरतस्त्वाङ्गीकारात् कथं प्रामाण्यं स्वत एवेत्युच्यत इति चेन्न । ज्ञानप्रामाण्य ज्ञानग्राहकेणैव गृह्यत इति तत्स्वतः, करणप्रामाण्यं च यथार्थज्ञानजनकत्वेन लिङ्गेनैव गृह्यते चेत् तदा ज्ञानप्रामाण्यस्य स्वतस्त्वं अन्येनैव गृहीत्वा प्रमाणजन्यत्वेन ज्ञानप्रामाण्यग्रहेण तदा स्वतस्त्वमित्यभिप्रायात् । तथाऽपीति । यद्यपि यथार्थज्ञानजनकत्वेनैवाप्रामाण्यशङ्कानिरासः शक्यते कर्तुम् तथापि तदभावशङ्कानिरासेन प्रामाण्यशङ्कानिरासार्थः प्रयत्न इत्यदोषः ।

वा०चं०— जैमिनिरपीति । 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थे-ऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वादि'ति सूत्रम् । तत्र चोपदेशो विधिवाक्यं तस्य धर्मस्य ज्ञानं ज्ञापकम् । तच्च प्रमाणमेव । प्रामाण्यस्य स्वतस्त्वेनाप्तिमूलत्वाद्यनपेक्षितत्वात् । न चैवमनाप्तवाक्यस्यापि प्रामाण्यापत्तिः इति वाच्यम् । स्वाभाविकस्यापि प्रामाण्यस्यानाप्तसंस्पर्शप्रयुक्तकरणदोषबाधकप्रत्ययज्ञानार्थकत्वैरपोदितत्वेन तत्र प्रामाण्याभावेऽपि स्वतस्त्वानपायादित्यभिप्रायेणौत्पत्तिकस्तु शब्दस्यार्थेन संबन्ध' इति, करणदोषाभावस्य 'अव्यतिरेक' इति व्यतिरेको विपर्ययो बाधकप्रत्यय इति यावत्, तदभावस्य 'अनुपलब्धेऽर्थ' इति ज्ञानार्थकत्वाभावस्य चोक्त्या अपवादकाभावाद्युक्तं प्रामाण्यमित्युपपाद्यते । तथा च प्रामाण्ये स्वतस्त्वं जैमिनिरप्याहेत्यर्थः । सूत्रावयवस्यैव प्रकृतोपयोगितया, तावत एवात्रोदाहरणमिति द्रष्टव्यम् ॥ तथाऽपीति । प्रामाण्यस्यौत्सर्गिकत्वेन बुद्धिदोषनिरासाय युक्त्यपेक्षायाः स्वतस्त्वाविघातकत्वादिति भावः ।

वा०र०— मूले स्वत एवेति । संवादेन विनेत्यर्थः । कुतः प्रामाण्यस्य संवादानपेक्षत्वमित्यत आह **यद्वक्ष्यतीति** । युक्तिपाद इति शेषः । सूत्रकार इति च । मूले **जैमिनिरपीति** । प्रामाण्यस्वतस्त्वमाहेति योज्यमित्युत्तरटीकायां स्पष्टम् । मूलोदाहृतसूत्रभागगततत्पदार्थज्ञानोपयोगितया संपूर्णसूत्रमनुवदन् भाष्याद्युक्त-प्रकारेण तत्सूत्रार्थमाह **औत्पत्तिकस्त्वित्यादिना** । **तत्प्रमाणमिति** । पाठप्रदर्शनव्याख्यानाभ्यां प्रामाण्यमिति पाठाश्रयणं टीकान्तरे न युक्तमिति सूचयति । सूत्रांशानाकाङ्क्षाक्रमेण योजयति **तत्र चेति** । एवं विशिष्टसूत्र इत्यर्थः । **तच्चेति** । धर्मज्ञापकविधिवाक्यमित्यर्थः । भाष्याद्यनुसारेणाधिकं स्पष्टनीयमस्ति । बादरायणग्रहणं पूजार्थमिति तद्ग्रन्थोक्तेरत्र बादरायणस्येत्येतन्न योजितम् । **प्रकृतोपयोगीति** । प्रामाण्यस्य स्वतस्त्वेनाप्तिमूलत्वा-द्यनपेक्षत्वादित्येतदर्थसमर्पणोपयोगितयेत्यर्थः । बुद्धिदोषनिरासमात्रकारणत्वाद्युक्तीनामित्यादेस्तत्त्वनिर्णयादावुक्तेरिति भावः । बुद्धिदोषस्थले प्रामाण्यग्रहणाभावात्स्वतस्त्वभङ्गापत्तिरित्यत उक्तं **प्रामाण्येति** । अत्र प्रामाण्यस्वतस्त्व-स्यौत्सर्गिकत्वेनेति पाठः । प्रामाण्यस्येत्येव पाठेऽपि तत्स्वतस्त्वमेव पर्यवसानगत्या प्राप्नोतीति ज्ञेयम् ।

स०व्र०— **यद्यपीति** । युक्त्यादिपरीक्षापक्षे प्रामाण्ये सति स्वतःप्रामाण्याभावः ॥ **जैमिनिरपीति** । अनपेक्षत्वलक्षणस्वतःप्रामाण्यं प्रमाणानां जैमिनिरपि वक्तीत्यर्थः । स्वतश्च प्रामाण्यमपवादाद् विपर्यय, इति युक्त्यादंर्बुद्धिदोषमात्रनिरासहेतुत्वान्मूलापेक्षत्वेऽपि स्मृत्यादीनां न स्वतःप्रामाण्यहानिरिति भावः ॥ ननु सिद्धान्ते करणप्रामाण्यस्य ज्ञप्तिस्वतस्त्वं नाभ्युपेयते यथोक्तमन्यत्र टीकाकारैः 'ज्ञप्तिस्तु परत एव । इन्द्रियादिस्वरूपस्य यथायथं स्वप्रमाणवेद्यत्वात् यथार्थज्ञानसाधनत्वस्यानुमानवेद्यत्वादि'ति । अत्रापि वक्ष्यति 'करणानां तु ज्ञप्तौ स्वतस्त्वं नास्त्येवे'ति । तत्कथमेवमाक्षेपपरिहाराविति चेन्न । 'परत एवे'त्युक्ते 'स्वाश्रयीभूतकरणग्राहकमात्र-ग्राह्यत्वरूपं स्वतस्त्वं नेत्यभिप्रेत्य प्रवृतात् । वस्तुतस्तु करणप्रामाण्येऽपि ज्ञानजनकत्वग्राहकमात्रग्राह्यत्वरूपं यथार्थज्ञानान्वयव्यतिरेकानुविधानातिरिक्तप्रमाणनिरपेक्षत्वरूपस्वतस्त्वमेव विवक्षितम् । अत एव वक्ष्यति 'अथवा ज्ञानजनकत्वं येन गृह्यते तत एव यथार्थज्ञानजनकत्वस्य तदीयस्य ग्राह्यत्वं स्वतस्त्वमि'ति ॥

कुण्डल०— **यद्यपीति** । तथाच प्रामाण्यसाधनं नातीव प्रयोजनवदिति भावः । **न विलक्षणत्वादितीति** । 'न विलक्षणत्वादस्य तथात्वं च शब्दादि'ति सूत्रस्यायमर्थः । नैवं श्रुतेस्तदनुसारिस्मृतेश्च तदुक्तानुपलब्ध्या प्रामाण्यं वाच्यम् । विलक्षणत्वात् प्रामाण्यस्य संवादानपेक्षतया स्वतस्त्वात् । तथा विलक्षणत्वात् । अपौरुषेयतया वेदस्य कृतकवैलक्षण्यात् । अस्य वेदस्य तथात्वं चापौरुषेयत्वं चशब्दात् । वाचा विरूपनित्यया इत्यादिशब्दादिति । **जैमिनिरपीति** । 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रामाण्यं बादरायणस्यानपेक्षत्वादि'ति जैमिनिसूत्रस्यायमर्थः । **अर्थेन** शब्दस्य संबन्धः औत्पत्तिकः स्वाभाविकः । न तु आधुनिकः । यतः उपदेशः अग्निहोत्रं जुहुयादित्यादिरूपो विधिः । 'चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः' इति भट्टोक्तेः । तस्याग्निहोत्रादिलक्षणस्य धर्मस्य ज्ञानं ज्ञापकम् । ज्ञायते अनेनेति करणे ल्युट् । एतेन ज्ञानानुत्पत्ति-लक्षणमप्रामाण्यं निरस्तम् । विपर्ययसंशयौ निराचष्टे **अव्यतिरेकश्चेति** । तस्याग्निहोत्रादिधर्मस्य अव्यतिरेकः अविपर्ययः चशब्दादसंशयश्च । अनुवादत्वं निरस्यति **अर्थेऽनुपलब्ध इति** । अत्र तच्चोदनाख्यं प्रमाणमेव । **अनपेक्षत्वात्** अज्ञातज्ञापकत्वात् । **बादरायणस्येति** । बादरायणग्रहणं पूजार्थम् । न परमतत्वेन । अत्रानपेक्ष-त्वादित्यनेन स्वतःप्रामाण्यमुक्तमिति । **अन्ये तु तत्प्रामाण्यं बादरायणस्यानपेक्षत्वादिति** । जैमिनिसूत्रखण्डं पठित्वा तस्यैवमर्थमाहुः । तस्यापौरुषेयत्वेनानाशङ्कितदोषस्य वेदस्य स्वत एव प्रामाण्यं बादरायणस्यापि संमतम् । प्रामाण्यस्योत्पत्तावाप्तोक्तत्वादेः ज्ञप्तौ संवादादेश्चानपेक्षितत्वादिति । **तथापीति** । संप्रतिपन्ने प्रमेये युक्त्युपन्यासस्य बुद्धिदोषनिरासप्रयोजनकत्वादिति भावः ।

वि०— ननु भगवता बादरायणेन 'न विलक्षणत्वादस्य तथात्वं चशब्दादि'त्यत्र नैवं श्रुतेः तदनुसारिस्मृतेश्च तदुक्तानुपलब्धेरप्रामाण्यमिति वाच्यम् । विलक्षणत्वात् प्रामाण्यस्य संवादानपेक्षतया स्वत एव सिद्धत्वादिति जैमिन्याचार्येणापि तत्प्रामाण्यं बादरायणस्यानपेक्षत्वादिति सूत्रखण्डेन तस्यापौरुषेयत्वेनानाशङ्कितदोषस्य प्रामाण्यं बादरायणस्यापि संमतं प्रामाण्यस्य उत्पत्तौ आप्तोक्तत्वस्य ज्ञप्तौ संवादादेश्चानपेक्षत्वादिति संवादानपेक्षतया स्वत एव

सिद्धवत्कीकारात् । अनुमानात्परतो ग्राह्यत्वे सिद्धान्तविरोध इत्याशङ्क्य बुद्धिदोषनिरासमात्रकारणत्वात् युक्तीनां इत्युक्तरीत्या परिहरति वयपीति ।

चक्रः— उत्तरवादिमते प्रामाण्यस्य स्वतस्त्वोपगत्या प्रकृतेऽनुमेयत्वोपगमेऽपसिद्धान्तमाशङ्क्य वयपीऽति ॥ बद्धक्वतीति । अविरोधलक्षण इति पूरणीयम् ॥ जैमिनिरपीति । 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रामाण्यं बादरायणस्यानपेक्षत्वादि'ति जैमिनिसूत्रावयवस्य तत्प्रामाण्यमित्यादेः " 'तस्यापौरुषेयत्वापादितप्रामाण्यतदभावकोटिकशङ्कानास्कन्दितनाकवेदस्य, प्रामाण्यं स्वत एवे'ति बादरायणस्यापि संमतम्; आप्तोक्तत्वादेः प्रामाण्योत्पत्तौ, संवादादेस्तज्ज्ञप्तौ अनपेक्षितत्वादि''त्यर्थोऽवगेयः । भाष्यकारीयप्रयत्नस्याप्रामाण्यशङ्काव्युदसनफलत्वोपगमेन प्रामाण्याधिगतिफलत्वानुपगमान्न क्षतिरित्याशयः ।

काशी०— तथा सति वाक्यत्वमात्रस्य तथात्वेन हेतावाप्तिनिवेशस्य गुरुत्वादिना तद्बधबरस्यापनस्य च वैयर्थ्यादित्याशयेन शङ्कते वयपीति । बादरायणमतत्वे ज्ञापकमाह बद्धक्वतीति । न विलक्षणत्वादस्य तथात्वमिति सौत्रखण्डस्य श्रुत्यादेप्रामाण्यं न शङ्क्यम् । स्वतःप्रामाण्यादित्यर्थः । मीमांसकानामेव ब्रह्मनन्त्रप्रामाण्यं अत्यन्तविरोधित्वेनादौ निरस्यत्वात् तन्मंमतमित्याह जैमिनिरपीति । आर्हति शेषः । तस्य धर्मोपदेशस्य वेदस्य प्रामाण्यं बादरायणस्यापि संमतम् । कथं उत्पत्तौ ज्ञप्तौ चाप्तोक्तत्वसंवादादेरनपेक्षितत्वादित्यर्थः । प्रकृतोपयुक्तत्वात् सूत्रैकदेशस्यैवोदाहरणम् । बुद्धिदोषनिरासमात्रकारणत्वाद्युक्तीनामिति तत्त्वनिर्णयोक्तरीत्या समाधत्ते तथाऽपीति । तथा चाप्रामाण्यशङ्कारूपप्रतिबन्धकनिवृत्तौ स्वत एव प्रामाण्य गृह्यत इति भावः । तत्त्वाप्तवाक्यतादिलिङ्गेन प्रामाण्यानुमितिरुत्पद्यते न वा । आद्ये युक्तेरप्रामाण्यशङ्कानिरासमात्रार्थत्वानुपपत्तिः । प्रामाण्यसिद्धयप्रामाण्यशङ्कानिरासोभयार्थत्वे चोदाहृततत्त्वनिर्णयविरोधात् । बुद्धिदोषनिरासार्थ एव युक्त्युपन्यासौ न तु प्रामाण्यज्ञानार्थ इति तदीकाविरोधाच्च । अन्त्ये व्याप्तिपक्षधर्मताविशिष्टलिङ्गज्ञाने सत्येऽप्यनुमित्यनुत्पत्तौ बीजाभावः । आप्तवाक्यतया भानमित्यस्य प्रामाण्यं त्रिविधं दृश्यत इत्यस्य च विरोधश्च । आप्तवाक्यत्वादि-प्रमाणत्रयेण दृश्यत इति तस्य व्याख्यास्यमानत्वात् । न चाप्रामाण्यशङ्कानिरासार्थमप्रामाण्याभावानुमानस्यैव भानमित्यादिना विवक्षितत्वान्न दोष इति वाच्यम् । अनुमानतोऽपि तत्सिषाधयिषुरित्यादिग्रन्थानुगुणत्वादिति । अत्र ब्रूमः । भवत्येवाप्तवाक्यत्वादिलिङ्गेन प्रामाण्यानुमितिः । परन्तु तत्र प्रामाण्यभानं ज्ञानजनकत्वभासकमात्र-पर्यवसन्नम् । तथाहि । ज्ञानजनकत्वव्याप्यवत्तापरामर्शो व्यापकत्वेन जनकत्वभानमेवानुमितौ विधेयतया तद्भानप्रयोजकम् । व्यापकविशेषणत्वेन ज्ञानभानं तु विधेयविशेषणत्वेन ज्ञानभाने तद्विशेषणत्वेन याथार्थ्यभाने च प्रयोजकम् । न तु तदर्थं व्यापकविशेषणविशेषणत्वेन याथार्थ्यभानमपेक्षितम् । अस्ति बाधके ज्ञानजनकत्वव्याप्य-वत्तापरामर्शादेव यथार्थज्ञानजनकत्वानुमितिजननात् । तथा च यथार्थज्ञानजनकत्वव्याप्याप्तवाक्यत्वपरामर्शसत्त्वेऽपि तत्र व्यापकविशेषणत्वेन ज्ञानभानमेव प्रामाण्यानुमितौ ज्ञानविशेषणत्वेन याथार्थ्यभानप्रयोजकम् । क्लृप्तत्वात् । परामर्शे व्यापकविशेषणविशेषणत्वेन याथार्थ्यभानस्य प्रतिबन्धकनिरास एवोपयोगः । प्रामाण्यव्याप्यदर्शनस्याप्रामाण्य-शङ्काविरोधित्वात् । तदर्थमेव चाप्तवाक्यत्वाद्यनुसरणम् । एवं चाप्तवाक्यत्वादिना प्रामाण्यानुमाने ज्ञानजनकत्व-

भासकातिरिक्तस्याप्यनुमितौ प्रामाण्यभानप्रयोजकत्वात्तन्मात्रभास्यत्वरूपस्वतस्त्वानुपपत्तिरिति शङ्काशयः । अतिरिक्तांशस्य प्रतिबन्धकनिरासमात्रार्थत्वान्न स्वतस्त्वविरोध इति समाधानाभिप्रायः । तत्त्वनिर्णये च युक्तीनामित्यस्य ज्ञानतज्जनकत्वभासकातिरिक्तानामित्यर्थः । तट्टीकायां च न प्रामाण्यज्ञानार्थ इत्यस्य न ज्ञाने प्रामाण्यभानार्थ इत्यर्थ इति सर्वं सुस्थम् । परिमळे तु ज्ञानजनकताग्राहकेण ज्ञानजनकत्वज्ञानान्तरासवाक्यत्वादिना प्रामाण्यग्रहात्तस्य स्वतस्त्वविरोध इति शङ्काशयः । आप्तवाक्यत्वादिना विरोधिशङ्कानिवृत्तौ ज्ञानजनकताग्राहकेणैव प्रामाण्यग्रहान्न विरोध इति समाधानाशयः । यद्वा । मूले ब्रह्मसूत्राणां प्रामाण्यमित्यस्य ब्रह्मसूत्रजन्यज्ञानयाथार्थ्यपर्यवसितत्वेन शास्त्रजन्यज्ञानस्याप्तवाक्यजन्यत्वेन याथार्थ्यानुमाने तस्य साक्षिमात्रग्राह्यत्वरूपस्वतस्त्वभङ्ग इति शङ्कायां आप्तवाक्यजन्यत्वादेरप्रामाण्यशङ्कामात्रनिवर्तकत्वात्प्रामाण्यस्य स्वतस्त्वाविरोध इति समाधानस्य चाभिप्रायः । अथवा शास्त्रं प्रमाजनकं ज्ञानजनकत्वे सति संशयविपर्ययाजनकत्वादित्यनुमानवेद्यत्वमेव स्वतस्त्वम् । तच्चाप्तवाक्यत्वेनैव प्रामाण्यानुमाने विरुद्धचत इति शङ्कायामाप्तवाक्यत्वादेर्विशेष्यासिद्धिनिरासमात्रार्थत्वान्न दोष इति समाधिः । वस्तुतः शास्त्रजन्यबोधरूपकार्यलिङ्गेन ज्ञानजननशक्तिग्राहकेण ग्राह्यत्वमेव प्रमाजननशक्तेः स्वतस्त्वम् । शङ्कोत्तरे तु पूर्ववदेवेति पक्षा उक्ताः । तत्र ज्ञानजनकत्वं येन गृह्यते तत एव यथार्थज्ञानजनकत्वस्य ग्राह्यत्वं स्वतस्त्वमिति प्रामाण्यपरीक्षायां वक्ष्यमाणलक्षणानुसारेणाद्यन्तपक्षयोरस्मदुक्त एवाभिप्रायः । अधिकमग्रे वक्ष्यामः । **विजातीयसंवादेनेति** । सजातीयसंवादातिरिक्तेनाप्तवाक्यत्वेनेत्यर्थः ।

प्रदीपः— यद्यपीति । युक्त्यादिपरीक्षापेक्षे प्रामाण्ये सति स्वतःप्रामाण्यं न स्यात् । **जैमिनिरपीति** । अनपेक्षलक्षणं स्वतःप्रामाण्यं प्रमाणानां जैमिनिरपि वक्तीत्यर्थः । **तथापीति** । औत्सर्गिकं प्रामाण्यमपवादाद्विपर्यय इति युक्त्यादेर्बुद्धिदोषमात्रनिरासहेतुत्वान्मूलापेक्षत्वेऽपि स्मृत्यादीनां न स्वतःप्रामाण्यहानिः । एवं हीति मूलित्वेनाङ्गत्वदर्शनात् ब्रह्मसूत्राणामङ्गत्वेन श्रुतिसंवादार्थं मूलित्वव्यपदेश इति ।

ब्रह्मसूत्राणां प्रामाण्यस्य त्रिविधदर्शनम्—

७१ सु०— एवं विजातीयसंवादेनास्य शास्त्रस्य प्रामाण्यमुपपाद्य तदनुत्तमतासिद्धये सजातीयद्वयसंवादमप्याह श्रुतीति ।

अनु०— श्रुतिमूलतया तथा ॥

युक्तिमूलतया च

तथाचशब्दौ समुच्चयार्थौ । मानमित्यस्यानुकर्षणार्थौ वा । यथा आप्तवाक्यतया तथा श्रुतिमूलतयाऽपि इत्युपमार्थौ वा तथाशब्दः ।

विन्दुः— विजातीयसंवादेनेति । प्रमाणत्रितयसंवादो ह्यनुत्तमप्रामाण्यप्रयोजकः । उक्तं च भगवत्पादैरेव हव्यादौ पूर्णं प्रमाणं तत्र पञ्चावरोधेनैकत्रस्थ तत्र पञ्चावरोधि । पृथक्त्वभ्यं चाप्रमाणं विरोधि स्यात्तस्यात्रमेकत्र कार्यमिति । तत्र आप्तिमूलतयेत्यनेन प्रत्यक्षसंवादोऽभिहितविवक्षितार्थतत्त्वज्ञानस्य आप्तिघटकत्वेन प्रविष्टत्वात् । तच्च प्रकृते सर्वज्ञस्य भगवतः प्रत्यक्षरूपमेव । तथाच शब्दरूपत्वेन परोक्षप्रमाणरूपब्रह्मसूत्रापेक्षया प्रत्यक्षत्वेन तद्विजातीयमिति भावः । अत एव श्रुतियुक्त्योः परोक्ष-प्रमाणत्वेन तथाविधब्रह्मसूत्रैः सजातीयत्वात्तत्संवादं सजातीयसंवादत्वेन व्यवहरति । ब्रह्मसूत्राणां श्रुतिसजातीयत्वं न्यायगर्भत्वेन च युक्तिसजातीयसंवादत्वेन व्यवहरति । यद्वा आगमत्वेन ब्रह्मसूत्राणां श्रुतिसजातीयत्वं न्यायगर्भत्वेन च युक्तिसजातीयत्वमिति द्रष्टव्यम् । विष्णुतत्त्वनिर्णयटीकायां तु सजातीयविजातीयसंवादः प्रकारान्तरेण निरुक्तः । साक्षात्त्वविषयावगाहित्वं सजातीयत्वम् । प्रामाण्य-द्वारा स्वविषयावगाहित्वं विजातीयत्वं तद्वतोः प्रमाणयोः संवादस्तथाविधसंवाद इति । तच्च न प्रकृते विवक्षितं त्रयाणामपि प्रामाण्यसाधकत्वाद्विजातीयसंवादित्वापत्तेः । तत्र वेदप्रामाण्यसाधनावसरे सजातीयविजातीयसंवादयोरभावात् परिशेषेणाप्तोक्तत्वेन प्रामाण्यं साधनीयमिति पूर्वपक्षितत्वेन आप्तोक्तत्वस्योभयबहिर्भावापत्तेश्च तस्मादुदयनमतानुवाद एव सः । स्वमतं त्वग्रोक्तं बोध्यम् ।

परि०— विजातीयेति । आप्तवाक्यत्वरूपप्रमाणसंवादेनेत्यर्थः । तस्य श्रुतियुक्त्योरिव साक्षाच्छास्त्रसमानार्थविषयकत्वेन विजातीयत्वमिति भावः ॥ **अनुत्तमतेति** । सर्वोत्तमतेत्यर्थः । 'चक्रे शास्त्रमनुत्तमम्' इत्यत्र प्रागेव विग्रहः प्रदर्शितः । तदनुवादत्वादेतत्प्रयोगः ॥ **अनुकर्षणार्थौ वेति** । श्रुतिमूलतया मानं युक्तिमूलतयाऽपि मानमिति प्रत्येकमनुकर्षणार्थावित्यर्थः ॥

गु०दी०— एवं विजातीयसंवादेनेत्यत्र आप्तवाक्यत्वादित्यनुमानस्य ब्रह्मसूत्रप्रामाण्यमात्रसाधकस्य ब्रह्मसूत्रप्रतिपाद्यसमानार्थकत्वाभावाद्विजातीयत्वम् । श्रुतेर्युक्तेर्ब्रह्मसूत्रस्य च "आनन्दमयोऽभ्यासादि"त्यादौ विष्णो-रानन्दमयशब्दमुख्यार्थत्वरूपस्यैकस्यैवार्थस्य श्रुत्या युक्त्या ब्रह्मसूत्रेण च त्रिभिरपि प्रतिपादनेन ब्रह्मसूत्रसमाना-र्थकत्वात् सजातीयमिति भावेन सजातीयद्वयसंवादमप्याह इत्युक्तम् । संवादस्तु ब्रह्मसूत्रप्रामाण्यरूपार्थस्यानु-मानत्रयेणापि साधितत्वादिति ज्ञेयम् । मानमित्यस्यानुकर्षणार्थौ वेत्यत्र श्रुतिमूलतया तथा मानं युक्तिमूलतया च मानमिति स्थानद्वयेऽप्यनुकर्षणार्थावित्यर्थः ।

आनन्दः— नन्वाप्तवाक्यत्वेन प्रामाण्यस्य साधितत्वात् पुनः श्रुतियुक्तिमूलत्वाभ्यां प्रामाण्यसाधन-मयुक्तम् । वैयर्थ्यात् । यदि च हेत्वन्तरत्वादवैयर्थ्यं तर्ह्यनेकेषां हेतूनां सत्त्वादनेकेषां साध्यानां वक्तव्यतापत्तेरित्यत-स्तत्प्रयोजनं दर्शयति एवमिति । ननु चशब्देनैव समुच्चयानुकर्षयोः संभवात् तथाशब्दवैयर्थ्यमित्यत आह यथेति ।

श्रीनिधि०— एवं विजातीयेति। आप्तवाक्यत्वलक्षणयुक्ते ब्रह्मसूत्रप्रामाण्यमात्रसाधकत्वेन तत्समान-विषयकत्वाभावात् विजातीयसंवादत्वं श्रुतियुक्त्योस्तु सूत्रसमानविषयत्वात् सजातीयसंवादत्वमिति ज्ञेयम्।

वा०चं०— 'आदौ तावत्प्रामाण्य' इति तावच्छब्दसूचितमाह **तदनुत्तमतेति** ॥ वक्त्राद्यानुकूल्याप्त-वाक्यत्वयोरिव न श्रुतियुक्तिमूलत्वयोः पूर्वोक्तहेतुं प्रति साध्यत्वमपि तु मानत्वं प्रति स्वतन्त्रसाधकत्वमिति अभि-प्रेत्य भाष्यकृता प्रयुक्तयोः 'तथाच'शब्दयोस्तदभिप्रायं विशदयति **तथेति**। 'तथाच' शब्दयोर्हेतुसमुच्चयार्थत्वे तद्बलात्साध्यसंबन्धलाभः ॥ अनुक्तसाध्यसमुच्चयरूपसाध्यानुकर्षणार्थत्वे तु साक्षात्साध्यसंबन्धालाभात्परस्पर-हेतुसमुच्चयफलस्यापि लाभात्पक्षान्तरमाह **मानमिति**। 'च'शब्दस्योक्तरीत्या समुच्चयार्थतामङ्गीकृत्य 'तथा'शब्द-स्यौपमार्थतया प्रसिद्धत्वात्तदर्थत्वेऽपि समुच्चयफललाभात्तथाशब्दे प्रकारान्तरम् आह **यथेति** ॥

वा०र०— इति तावच्छब्देति। गुर्गुरूणामित्येतदवतारे आदौ तावत्प्रामाण्यमात्र इत्युक्तं तत्र तावच्छब्देनोत्तरप्रामाण्यस्यानुत्तमता साधयिष्यत इत्यभिप्रायसूचनात्तत्सूचितमाहेत्यर्थः। अनेनात्रत्यप्रामाण्यो-त्तमत्वसाधनविवक्षया तत्र तावच्छब्द इति व्याख्यातं भवति। तथा च तावदित्यनेनोत्तरत्र तदनुत्तमत्वसाधनं यदभिप्रेतं तदिदानीं कर्तुं सजातीयद्वयसंवादमाहेति योजना च सूचिता भवति। **पूर्वोक्तहेतुं प्रतीति**। गुरुगुरुत्वादिरूपपूर्वानुमान-हेतुं प्रति न साध्यत्वमिति संबन्धः। अयमाशयः। गुरुगुरुत्वादिना प्रामाण्यसाधनपरवाक्योक्तगुरुगुरुत्वादिहेतोर्न साक्षात्प्रामाण्यहेतुता अपि तु तेन वक्तृश्रोत्रित्युक्तरीत्या अनुकूलवक्त्रादिमत्त्वरूपवक्त्राद्यानुकूल्यसिद्धिः। न च तावन्मात्रेण मानत्वसाधनं साक्षात्कर्तुं शक्यम्। किन्तु मध्ये आप्तवाक्यत्वसाधनमपीत्येवमप्रयोजकतापरिहाराय गुरुगुरुत्वादिपूर्वोक्तहेतुं प्रति मध्ये साध्यमानवक्त्राद्यानुकूल्याप्तवाक्यत्वयोर्यथा साध्यत्वम्। नतूक्तहेतोः प्रामाण्यं प्रति स्वतन्त्रसाधकत्वम्। गुरुगुरुत्वादिसिद्धं वक्त्राद्यानुकूल्यम्। तत्सिद्धं चाप्तवाक्यत्वं तत्सिद्धं च प्रामाण्यमित्येव गुरुगुरुत्वादिप्रामाण्ययोः साध्यसाधनभावघटनाय मध्ये उक्तरीत्या तदुभयसाधनसाक्षात्परम्परया यथा क्रियते इति यावत्। तथाप्तवाक्यतनयेति समभिव्याहारात् श्रुतियुक्तिमूलत्वयोरपि तेन हेतुना प्रामाण्यसाधनोपपादकतया मध्ये साधनं क्रियत इति न भ्रमितव्यं किन्तु गुरुगुरुत्वादिसमकक्षतया प्रामाण्ये स्वतन्त्रसाधनत्वेनैव ते कथ्यते इत्यभिप्रायप्रयुक्तौ यौ तथाचशब्दौ तयोर्यस्तदभिप्रायो भाष्यकारीयोऽभिप्रायस्तमिति योजना। भाष्यकारेण प्रयुक्तौ तथा-चशब्दौ श्रुतियुक्तिमूलत्वयोर्वक्त्राद्यानुकूल्याप्तवाक्यत्वसमुच्चयार्थौ न भवतः। किन्तु गुरुगुरुणोदितत्वादिना प्रामाण्ये समुच्चयार्थौ। प्रामाण्ये गुरुगुरुत्वादिना तयोः समुच्चयसिद्ध्यर्थं तौ प्रयुक्ताविति यावत्। इत्येवं तदभिप्रायं विशदयतीत्यर्थः। नन्वेवं हेतुसमुच्चयार्थत्वे प्रामाण्यरूपसाध्यसंबन्धलाभायोगः। तत्साध्यसमर्पकाभावात्। उत्तरयोजनायामपि मानमित्यस्यानुकर्षणीयत्वेन साध्यसंबन्धलाभेऽपि हेतूनां समुच्चयस्य लाभाभाव एवेति कथमिदं योजनाद्वयमपीत्यत उभयपक्षेऽप्युभयलाभप्रकारं दर्शयन्नवतारयति **तथाचशब्दयोरिति**। तद्बलात्साक्षात्साध्येति वदता साक्षात्साध्यलाभाय द्वितीययोजनेति सूचिते तर्ह्यत्र पक्षे हेतुसमुच्चयलाभायोग इति साम्यमित्यत उक्तं **परस्परेति**। परस्परेति च वदता नान्यतरवैयर्थ्यमिति सूचितम्। हेतुसमुच्चयो हि साध्यसंबन्धलाभार्थ इति तत्समुच्चयफलसाध्यसंबन्ध एव। तस्यापि लाभोऽनुकर्षणार्थत्वे भवति। कथम्। अनुक्तं यत्साध्यं तेन समुच्चय-

रूपत्वात् साध्यानुकर्षणस्य तेन साक्षादेव साध्यसंबन्धलाभात् । तथाचोक्तफललाभाय हेत्वोः समुच्चयोऽपि न पृथक् वक्तव्यः । इयांस्तु विशेषः । हेतुसमुच्चयार्थत्वपक्षे फलतः साध्यसंबन्धलाभः । अनुकर्षणार्थत्वे तु साक्षादेवेति । तथाच साक्षात्साध्यसंबन्धलाभेन समुच्चयफलस्यापि लाभमभिप्रेत्येति ल्यब्लोपनिमित्ता पञ्चमीति ज्ञेयम् । पूर्वपक्षद्वये तथाचशब्दयोरुभयोरपि परस्परहेतुसमुच्चयार्थत्वं वा साध्यसमुच्चयार्थत्वं वाश्रितम् । इदानीं तथाशब्दमात्रस्योपमार्थत्व-मुच्यते चशब्दार्थस्तु नोक्त इत्यतोऽव्यवहितपूर्वपक्ष इवैतत्पक्षेऽपि चशब्दो यत्र वर्तते तत्रानुक्तसाध्यसमुच्चयार्थत्वं नेत्याश्रित्य तथाशब्दार्थकथनान्न दोषः । तथाशब्दस्योपमार्थतया व्याख्याने श्रुतिमूलत्वस्य साध्यसंबन्धलाभायोग इति च न शङ्कनीयम् । उपमार्थत्वेऽपि समुच्चयार्थत्व इव समुच्चयस्य यत्फलं साध्यसंबन्धस्तल्लाभादित्यर्थः । अनेन तथाशब्द एव प्रकारान्तराश्रयणे हेतुतया चशब्दापेक्षयोपमार्थत्वेन प्रसिद्धत्वादिविशेषः सूचितः ।

कुण्डल०— अनुत्तमतेति । सर्वोत्तमतेत्यर्थः । ननु चशब्देनैवोक्तप्रयोजनसंभवे तथाशब्द व्यर्थ इत्यत आह **यथेति** ।

विद्व०— **समुच्चयार्थौ** परस्परसमुच्चयार्थौ । **अनुकर्षणार्थौ** श्रुतिमूलतया तथा प्रमाणं युक्तिमूलतया च प्रमाणमिति पृथगनुकर्षणार्थावित्यर्थः । तथाशब्दस्यार्थान्तरमाह **यथेति** ।

चषकः— तदनुत्तमतासिद्धये स्वावधिकोत्तमत्वविशेषितराहित्यसिद्धये ॥

काशी०— **तदनुत्तमतासिद्धय इति** । एतच्छास्त्रप्रामाण्यस्य प्रमाणत्रयावसितत्वेन सर्वोत्तमत्वं साधयितुमित्यर्थः । **सजातीयेति** । समानविषयकप्रमाणेत्यर्थः । **तथाचशब्दाविति** । तथाशब्दचशब्दौ हेतुसमुच्चयार्थावित्यर्थः । अन्यथा वक्त्राद्यानुकूल्येनाप्तवाक्यत्वमिवाप्तवाक्यत्वेन श्रुतिमूलत्वम् । तेन मानमिति परम्पराप्रतीत्यापत्तेरिति भावः । मानमित्यस्य श्रुतिमूलतया युक्तिमूलतयेत्याभ्यां प्रत्येकमन्वयादेव समुच्चयरूपापि सिद्धेस्तयोस्तत्सूचकतामेवाह **मानमित्यस्येति** । अधिकार्थलाभायाह **यथेति** । अपिना युक्तिमूलतापरिग्रहः । उपमेत्यस्य विरोधि(अप्रामाण्य)शङ्कानिवर्तकत्वादिनेत्यादिः । चशब्दश्चोक्तार्थ एवेति भावः । **श्रुतियुक्ति-मूलशब्दाविति** । श्रुतिर्युक्तिश्च मूलमर्थज्ञानद्वारा हेतुर्यस्येति व्युत्पत्त्या श्रुतिमूल्युक्तिमूलशब्दावित्यर्थः । ज्ञानद्वारा श्रुतियुक्तिहेतुकार्थकावित्यर्थः ।

गूढ०— नन्वाप्तवाक्यत्वेन प्रामाण्यस्य साधितत्वात् पुनः श्रुतियुक्तिमूलत्वाभ्यां प्रामाण्यसाधनमयुक्तम् । वैयर्थ्यात् । यदि च हेत्वन्तरत्वादवैयर्थ्यं तर्ह्यनेकेषां हेतूनां सत्त्वादनेकेषां साध्यानां वक्तव्यतापत्तेरित्यतस्तत्प्रयोजनं दर्शयति **एवमिति** । ननु चशब्देनैव समुच्चयानुकर्षयोः संभवात् तथाशब्दवैयर्थ्यमित्यत आह **यथेति** ।

७२ सु०— यद्यपि 'श्रुतियुक्तिमूल'शब्दौ श्रुतियुक्तिभ्यामर्थमुपलभ्य रचितस्य वाचकौ । तथाऽप्यत्र समानार्थतासाम्येन गौण्या वृत्त्या श्रुतियुक्तिसंवादितार्थौ व्याख्येयौ । भगवतो बादरायणस्य स्वतः सर्वज्ञत्वेन मुख्यार्थासंभवात् ॥ यदि च 'श्रुतियुक्तिसंवादित्वादि'त्येवा-

वक्ष्यत्तदा यादृच्छिकसंवादिताऽपि व्यङ्ग्यास्यत । सा मा विज्ञायीति गौणप्रयोगः ॥ एवं हि प्रयोगे अङ्गाङ्गिभावोऽप्यधिको विज्ञायते । स च पक्षधर्मतोपपादको भविष्यति ।

बिन्दुः— **पक्षधर्मतोपपादक इति ।** श्रुतिसंवादित्वरूपहेतोरपक्षधर्मत्वेऽङ्गाङ्गिभाव एव न स्यात् ततश्च 'पुनस्तस्यार्थवित्तये चकार ब्रह्मसूत्राणी'ति स्मृतेरप्रामाण्यं प्रसज्येतेति भावः । यद्वा करणप्रामाण्यस्यापि ज्ञानसाधनतया येनान्वयव्यतिरेकादिना गृह्यते तेनैव दोषाभावे सति यथार्थज्ञान-साधनत्वरूपं प्रामाण्यमपि गृह्यत एवेति तस्यापि स्वतस्त्वादाक्षेपो युक्त एवेति मन्तव्यम् ।

परि०— **समानार्थतेति ।** मूलमूलिभावापन्नयोर्यथैकार्थत्वं तथाऽत्रापीत्येकार्थतागुण-साम्येनेत्यर्थः । किं गौणप्रयोगे प्रयोजनमित्यत एकं प्रयोजनमुक्त्वाऽन्यदप्याह **एवं हि प्रयोग इति ।** श्रुतिमूलतयेति प्रयोगे हि तद्विचारपरत्वाच्छास्त्रमङ्गं अङ्गि तु श्रुतय इत्येवं विज्ञायते । मूलमूलिनो-रङ्गाङ्गित्वस्य काव्यटीकादौ प्रसिद्धेः । न चाङ्गाङ्गिभावज्ञापनं व्यर्थम् । शास्त्रं मानं श्रुतिसंवादित्वा-दित्यत्र असिद्धिशङ्कानिरासार्थत्वात् । मूलमूलितया अङ्गाङ्गिभावापन्नयोरेकार्थत्वस्यान्यत्र दर्शनादित्येतत् प्रयोजनलाभाय च गौणप्रयोग इति भावः ।

गु०दी०— **रचितस्य** इत्यस्य मन्वादिरूपवचनस्य परार्थानुमानरूपवाक्यस्य चेत्यर्थः । **अत्र समाना-र्थतासाम्येन** इत्यत्र अत्र ब्रह्मसूत्रेषु श्रुतिमूलस्मृतौ युक्तिमूलवाक्ये च या समानार्थता अस्ति तन्मात्ररूपेण सिंहस्थितशौर्यमात्रसारूप्येण देवदत्ते सिंहशब्दप्रयोगवदयमपि प्रयोग इति भावः । **अङ्गाङ्गिभावोऽप्यधिक** इत्यत्र ब्रह्मसूत्राणां निर्णायकत्वेनाङ्गत्वं श्रुतेः निर्णीयमानार्थत्वेनाङ्गित्वं सूत्रयुक्त्योस्तु तार्किकादीनां कुयुक्तिशतकेन-निमज्जितसुयुक्तीनां सूत्रोपनिबद्धमणिवत्पुनरुद्धारेणाङ्गाङ्गिभाव इति विवेकः ।

यादु०— **गौणप्रयोग इति ।** तथा च श्रुत्यादिनाऽर्थमुपलभ्य रचितं यद्वाक्यं तत्सादृश्यनियमेन संवादि-त्वस्य लाभेन, यादृच्छिकसंवादिताशङ्क्या या व्यभिचारशङ्का तस्या निरास इति भावः । एवं प्रयोगे कृत्यान्तर-मप्याह **एवं हीति ।** 'श्रुतिर्मूलभूता विचार्यतयोपजीव्या यस्ये'त्यपि व्याख्यानसंभवेन विचार्यविचारक-भावलाभादङ्गाङ्गिभावोऽपि ज्ञायत इत्यर्थः । एवं 'युक्तिर्मूलभूतोपजीव्या स्वार्थनिर्णयायोपादीयमाना यत्रे'ति व्याख्याने विचाराङ्गयुक्तिग्रथनात्मकत्वलाभेनाङ्गाङ्गिभावो ज्ञायत इत्यर्थः ॥ यद्वा यादृच्छिकसंवादितेत्यस्य विवक्षितस्य 'नियमेन श्रुत्यादिसंवादित्व'स्य प्रामाण्यसाधकहेतोरसिद्धिराशङ्क्तेत्यर्थः । ननु गौणप्रयोगे कथमुक्तशङ्कापरिहार इत्यत आह **एवं हीति ।** तथा चाङ्गाङ्गिभावे सति श्रुत्यादिसंवादित्वस्य कर्ममीमांसादौ दर्शनात्, अत्रापि तत्सादृश्यलाभ इति भावः । **पक्षधर्मतोपपादक इति ।** वक्ष्यमाणानुमानयोरिति शेषः ॥

आनन्दः— ननु श्रुतियुक्तिमूलत्वं नाम श्रुतियुक्तिभ्यामर्थमुपलभ्य रचितत्वम् । तच्च नारायणावतारत्वेन सर्वज्ञेन व्यासे न संभवति श्रुतिविरोधादित्याशङ्क्याह **यद्यपीति ।** ननु गौणीवृत्तिरयुक्ता गुणयोगाभावादित्यत उक्तं

समानार्थतासाम्येनेति । श्रुतियुक्तितोऽर्थमुपलभ्य रचिते तत्संवादिन्यपि श्रुतियुक्तिसमानार्थत्वरूपगुणयोगसत्त्वेन गौणीवृत्तिर्युक्तेति भावः । तर्हि मुख्यशब्दं परित्यज्य गौणप्रयोगे किं निमित्तमित्यत आह **यदि चेति** । न केवलमेतदेव प्रयोजनं किन्त्वन्यदप्यस्तीत्याह **एवं हीति** । यद्धि मूलं तदङ्गि । एवं च वेदस्य करणत्वेनाङ्गित्वं सूत्राणां चेतिकर्तव्यतात्वेनाङ्गत्वमित्यङ्गाङ्गिभावोऽपि मूलत्वोक्त्या विज्ञायत इत्यर्थः । न चाङ्गाङ्गीभावज्ञापनेन किं प्रयोजनमित्यत आह **स चेति** । श्रुतिसंवादित्वरूपश्रुतिमूलत्वस्य पक्षीभूतेषु सूत्रेषु असत्त्वेन श्रुतिसूत्रयोरङ्गाङ्गिभावो न स्यादस्ति चासावतः श्रुतिसंवादित्वं पक्षेऽस्तीत्येवं पक्षधर्मतोपपादनमनेन भवतीति भावः ।

कं०रा०— समानार्थतेति । यथा श्रुतियुक्तिसमानार्थत्वं श्रुतियुक्तिमूलकत्वं मन्वादिवाक्यस्य तथा सूत्राणामपि तदस्तीति गौण्या वृत्त्या श्रुतियुक्तिमूलशब्दौ श्रुतियुक्तिसमानार्थत्वरूपतत्संवादितार्थौ व्याख्येयावित्यर्थः । **एवमिति** । एवं गौणप्रयोगे सति न केवलं नियतश्रुतियुक्तिसमानार्थत्वरूपयादृच्छिकतत्संवादित्वमेव ज्ञायते । किन्तु श्रुत्यर्थनिर्णायकयुक्तिविचारात्मकत्वरूपं यत् श्रुत्याद्यङ्गत्वं शास्त्रस्य तदपि ज्ञायत इत्यर्थः । ज्ञातेनाङ्गाङ्गिभावेन किं प्रयोजनमित्यत आह **स चेति** । स च ज्ञातोऽङ्गाङ्गिभावश्चेदं शास्त्रं प्रमाणं श्रुतिसंवादित्वाद्युक्तिसंवादित्वादित्यनयोर्हेत्वोर्वक्ष्यमाणरीत्या पक्षधर्मतोपपादको भविष्यतीत्यर्थः । **तच्चेति** । शास्त्रस्य श्रुत्यर्थविचारपरत्वं च 'पुनस्तस्यार्थवित्तये । चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसे'त्यागमसिद्धमित्यर्थः ।

श्रीनिधि०— गौणीप्रयोगे शक्यसादृश्यमाह **समानार्थतेति** । मुख्यार्थबाधमाह **भगवत** इति । प्रयोजनमाह **यदि च श्रुतियुक्तीति** । श्रुतियुक्ती उपलभ्य रचिते **यथा** यादृच्छिकसंवादिता नाशङ्क्यते तथा श्रुतियुक्तिमूलतयेत्युक्ते सा नाशङ्क्नीया । प्रयोजनान्तरमप्यस्तीत्याह **एवं हि प्रयोग** इति । **अङ्गाङ्गिभाव** इति । श्रुतीनां निर्णेयत्वेनाङ्गित्वं ब्रह्ममीमांसाया निर्णायकत्वेनाङ्गत्वमिति ज्ञेयम् । **स च पक्षधर्मतोपपादक** इति । मीमांसायाः श्रुत्यङ्गत्वस्य सर्वैरपि प्रमितत्वादिति भावः । ननु श्रुतिमूलत्वं श्रुतिसमानविषयत्वम् । तच्च सूत्राणां नास्ति । न हि आनन्दमयादिर्विष्णुरिति श्रुतिरस्तीति चेन्न । तथा श्रुतेरभावेऽपि आनन्दमयादेर्विष्णुत्वतात्पर्यकत्वात् श्रुतीनां तत्तात्पर्यकत्वमेव अभ्यासादियुक्त्या प्रदर्श्यत इति श्रुतिमूलत्वं नानुपपन्नम् । अत्र सर्वत्र श्रुतिमूलत्वं युक्तिमूलत्वं च प्रतिज्ञाभागस्यैव न तु युक्तिभागस्यापि अभ्यासादिप्रतिपादकश्रुत्यभावादभ्यासादेः प्रत्यक्षत्वेन युक्त्यनपेक्षणाच्चेति द्रष्टव्यम् ।

वा०चं०— श्रुतियुक्तिमूलत्वशब्दयोर्मुख्यार्थत्वभ्रान्तिं वारयति यद्यपीति । **समानार्थतासाम्येनेति** । 'श्रुतियुक्तिभ्यामर्थमुपलभ्य रचित'वदस्यापि श्रुतियुक्तिसमानार्थत्वादिति भावः ॥ मुख्यार्थानुपपत्तिमभिधाय, गौणप्रयोगे प्रयोजनं वक्तुं, तदप्रयोगे तदसिद्धिमाह **यदि चेति** । मूलस्याङ्गित्वनियमेन तन्मूलकत्वोक्त्या तदङ्गत्वसूचनोपपत्तिरित्याह **एवं हीति** ।

वा०र०— गुणयोगाभावात् कथं गौण्याश्रयणमित्यत उक्तं समानार्थतेति मूलम् । मुख्यार्थानुपपत्तिमाह **भगवत इति** मूलम् । **स्वत** इति । स्वभावसिद्धप्रज्ञयेत्यर्थः । **प्रयोजनं वक्तुमिति** । अन्यथा स्वायत्तन्यायविरोधप्रसङ्ग

इति भावः। श्रुतिर्मूलभूता विचार्यतया यस्येति व्युत्पत्त्या विचार्यविचारकभावलाभेन अङ्गाङ्गीभावविज्ञानप्रकारमाह **मूलस्येति**। अङ्गाङ्गीभावज्ञापनेनापि किमित्यत आह **स चेति** मूलम्। श्रुतियुक्तिसंवादित्वहेतोरिति शेषः। नियतश्रुतिसमानार्थकत्वस्यैव प्रामाण्यसाधकत्वेन यादृच्छिकतत्संवादस्य साधकत्वाभावान्नियतसमानार्थकत्व-लाभाय मूलपदप्रयोगः। मूलमूलिनोश्च नियतसमानार्थत्वम्। अन्यथा मूलमूलिभावानुपपत्तेः। वक्ष्यति च विसंवादे तदनुपपत्तेरित्यादीत्येवं पक्षधर्मतोपपादक इत्यर्थः।

स०व्र०— एवं हीति। मूलित्वेनाङ्गत्वदर्शनात् ब्रह्मसूत्राणामङ्गत्वेन श्रुतिसंवादार्थमूलित्वव्यपदेश इति भावः॥ **स चेति**। श्रुतिसंवादित्वस्य यादृच्छिकश्रुतिसंवादित्वे तेन तस्य प्रामाण्यसाधकत्वाभावात्, नियत-श्रुतिसमानार्थत्वस्यैव च तत्साधकत्वात् प्रामाण्यसाधनानुपपत्तिपरिहारार्थं मूलमित्युक्तम्। तथा च मूलमूलिनो-र्नियतसंवाददर्शनात् 'मूल'पदेन तदभिधानात्तेन प्रामाण्यसाधनमुपपन्नमिति भावः॥

कुण्डल०— ननु स्वतः सर्वज्ञेन भगवता बादरायणेन प्रणीतानां ब्रह्मसूत्राणां श्रुतियुक्तिभ्यां अर्थमुपलभ्य रचितत्वरूपश्रुतियुक्तिमूलत्वाभावेन कथं मूले तदुक्तिरित्याशंक्य **परिहरति यद्यपीत्यादिना। समानार्थतेति**। यथाश्रुत्यर्थमुपलभ्य रचितस्य मन्वादिस्मृतिनिबन्धनस्य श्रुतिसमानार्थकत्वलक्षणं श्रुतिसंवादित्वम्। यथा च युक्तितोऽर्थमुपलभ्य रचितस्य धूमवन्तं पर्वतं पक्षीकृत्य प्रयुक्तस्य धूमवान् पर्वतोऽग्निमानिति वाक्यस्य युक्ति-समानार्थत्वरूपं युक्तिसंवादित्वं तथा प्रकृते ब्रह्मसूत्राणां श्रुतियुक्तिमूलकत्वाभावेऽपि तन्मूलकमन्वादिनिबन्धन-निष्ठश्रुत्यादिसमानार्थतासाम्येन निमित्तेन गौण्या वृत्त्या श्रुतिमूलतायुक्तिमूलताशब्दौ श्रुतियुक्तिसंवादितार्थौ व्याख्येयावित्यर्थः। स्वायत्ते शब्दप्रयोगे किमर्थोऽयं गौणप्रयोग इत्यत आह **यदि चेति**। तथा च श्रुत्यादिमूलकमन्वादिस्मृतेरिव नियमेन श्रुत्यादिसंवादिताव्युत्पादनात्सूत्राणां न यादृच्छिकसंवादशङ्कावकाश इति भावः। न केवलं गौणप्रयोगस्य यादृच्छिकसंवादितानिरास एव प्रयोजनं किन्त्वन्यदप्यस्तीत्याह **एवमिति**। 'श्रुतिमूलतया चैव युक्तिमूलतया तथे'त्येवंरूपे गौणप्रयोगे सति श्रुत्यर्थनिर्णायकन्यायग्रथनात्मकस्यास्य शास्त्रस्येति कर्तव्यतारूपतयाङ्गत्वं च वार्यतया मूलभूतश्रुतीनां ब्रह्मप्रमितावङ्गित्वमित्यङ्गाङ्गिभावोऽधिको लभ्यते। अयं चाङ्गाङ्गिभावः श्रुतिसंवादित्वयुक्तिसंवादित्वहेत्वोर्वक्ष्यमाणरीत्या पक्षधर्मतोपपादको भविष्यतीत्यर्थः।

विद्व०— समानार्थतेति। श्रुत्यादिनाऽर्थमुपलभ्य रचितस्थले या तत्समानार्थता तत्साम्येनेत्यर्थः। मुख्यार्थबाधे सति च प्रयोजने गौणप्रयोगो दृष्टः अतो मुख्यार्थानुपपत्तिं दर्शयति **भगवतो बादरायणस्येति**। प्रयोजनं दर्शयति **यदि चेति**। श्रुत्यादिनार्थमुपलभ्य रचितसादृश्यप्रास्यानियमेन संवादितालाभेन यादृच्छिकसंवादिता शङ्का निरस्यते इति भावः। प्रयोजनान्तरमाह **एवमिति**। श्रुतिश्च युक्तिश्च मूलभूता निर्णायकतया उपजीव्या यस्येत्यपि व्याख्यानसंभवेनाङ्गाङ्गिभावोऽपि ज्ञायत इत्यर्थः। तद्ज्ञानफलमाह **स चेति**। वक्ष्यमाणानुमानयोः पक्षधर्मता तेन ज्ञायत इति भावः।

चषकः— अर्थमुपलभ्य रचितस्य अर्थकर्मकोपलब्धिप्रयोज्यरचनक्रियाकर्मीभूतस्य ॥ गौणः प्रयोग इति । तादृशमन्वादिवाक्यं, तस्य यथानियतश्रुतिसंवादित्वादिकं तथैतस्यापीति भावः ॥ ईदृशविन्यासस्य फलान्तरमपि दर्शयति एवं हीति ॥ पक्षधर्मतेति । (अत्रैव) अभिधास्यमानतदर्थविचारपरत्वमीमांसारूपत्वयोरित्यर्थः ॥

काशी०— समानार्थतेति । श्रुतियुक्तिसमानार्थतया श्रुतियुक्तिहेतुकवाक्यरूपवाच्यार्थसादृश्यरूपगौणवृत्त्येत्यर्थः । श्रुतियुक्तिसंवादितार्थी श्रुतियुक्तिसिद्धार्थकार्थी । वाच्यार्थत्यागेन गौणार्थव्याख्याने कारणमाह भगवत इति । नारायणावतारस्येत्यर्थः । स्वत इति । प्रमाणानपेक्षसर्वप्रमितिमत्त्वेन श्रुत्यादिजन्यार्थज्ञानासंभवेनेति यावत् । अत्र शास्त्रे मुख्यार्थासंभवात् श्रुतियुक्तिभ्यामुपलभ्य रचितत्वानुपपत्तेरित्यर्थः । अत्र यद्यपि श्रुतियुक्तिसिद्धार्थमुपलभ्य रचितार्थाविति वक्तुमुचितम् । वाच्यार्थे बाधितांशमात्रत्यागौचित्यात् । न चैवमर्थगौरवम् । तदर्थप्रतिपत्तिजनकत्वरूपतत्संवादित्वात्तदर्थप्रतिपत्तिजन्यत्वरूपस्य तदर्थमुपलभ्य रचितत्वस्यागुरुत्वात् । तथाऽप्यर्थज्ञानस्य साक्षाच्छब्दप्रयोगहेतुत्वे विवादात्परम्परया तज्जन्यत्वस्य च गुरुत्वात्तत्त्यागः । एवं श्रुत्यादिसंवादित्वे प्रामाण्यव्याप्तेर्वक्ष्यमाणरीत्या स्फुटत्वात्तत्परिग्रह इति ध्येयम् । मुख्यप्रयोगत्यागेन गौणप्रयोगे बीजमाह यदि चेति । ननु गौणप्रयोगेऽपि यादृच्छिकसंवादः कुतो न ज्ञायते । यादृच्छिकसंवादनिषेधस्यैव गौणप्रयोगप्रयोजनत्वादिति चेत् । तर्हि लाघवात् श्रुतितया युक्तितयेत्येव प्रयोक्तुमुचितमित्यत आह एवं हीति । श्रुतिमूलतयेत्यादिप्रयोगे श्रुतेर्विचार्यत्वरूपं युक्तेश्च विचारोपयोगित्वेन प्रतिपाद्यत्वरूपमङ्गत्वमेतच्छास्त्रस्य तदर्थविचारपरत्वतत्प्रतिपादकत्वरूपमङ्गत्वं च मूलशब्देन ज्ञाप्यत इति न यादृच्छिकसंवादशङ्केति भावः । ननु यादृच्छिकसंवादिनोऽपि प्रामाण्यदर्शनात्तत्प्रतीतिनिरासोऽङ्गाङ्गिभावज्ञापनं च किमर्थम् । येनैव गौणप्रयोग इत्यत आह स चेति । यादृच्छिकसंवादिनः क्वचिद्विसंवादस्यापि संभवेन श्रुतियुक्तिसंवादित्वयोः पक्षधर्मतानिश्चयानुपपत्तिरतस्तन्निश्चायकत्वादङ्गाङ्गिभावस्य ज्ञापनमावश्यकमिति भावः ।

गूढ०— ननु श्रुतियुक्तिमूलत्वं नाम श्रुतियुक्तिभ्यामर्थमुपलभ्य रचितत्वम् । तच्च नारायणावतारत्वेन सर्वज्ञेन व्यासे न संभवति श्रुतिविरोधादित्याशङ्क्याह यद्यपीति । ननु गौणीवृत्तिरयुक्ता । गुणयोगाभावादित्यत उक्तं समानार्थतासाम्येनेति । श्रुतियुक्तितोऽर्थमुपलभ्य रचिते तत्संवादित्वेऽपि श्रुतियुक्तिसमानार्थरूपगुणयोगसत्त्वेन गौणीवृत्तिरयुक्तेति भावः । तर्हि मुख्यशब्दं परित्यज्य गौणप्रयोगे किंनिमित्तमित्यत आह यदि चेति । न केवलमेतदेव प्रयोजनं किं त्वन्यदप्यस्तीत्याह एवं हीति । यद्धि मूलं तदङ्गि । एवं च वेदस्य करणत्वेनाङ्गित्वं सूत्राणां चेतिकर्तव्यतात्वेन अङ्गत्वमित्यङ्गाङ्गिभावेऽपि मूलत्वोक्त्या विज्ञायत इत्यर्थः । न चाङ्गाङ्गिभावज्ञापनेन किं प्रयोजनमित्यत आह स चेति । श्रुतिसंवादित्वरूपश्रुतिमूलत्वस्य पक्षीभूतसूत्रेषु असत्त्वेन श्रुतिसूत्रयोरङ्गाङ्गिभावो न स्यादस्ति चासावतः श्रुतिसंवादित्वं पक्षेऽस्तीत्येवं पक्षधर्मतोपपादनमनेन भवतीति भावः ।

७३ **सु०— ततश्चायमर्थः । यत् श्रुतिसंवादि तत्प्रमाणम् । यथा मन्त्रादिवाक्यम् । श्रुतिसंवादि चेदं शास्त्रम् । तदर्थविचारपरत्वात् । विसंवादे तदनुपपत्तेः । तच्च 'पुनस्तस्यार्थवित्तय' इत्यागमसिद्धम् ॥ यच्च युक्तिसंवादि तत्प्रमाणम् । यथा धूमवन्तं पर्वतमुद्दिश्य पर्वतोऽयमग्निमानित्युक्तं वाक्यम् । युक्तिसंवादि चेदम् । मीमांसारूपत्वात् । मीमांसायाश्च युक्त्यनुसन्धानात्मकत्वात् । तस्मात् प्रमाणम् । अन्यथा श्रुतेर्युक्तेश्च अप्रामाण्यप्रसङ्गः । अर्धवैशसासंभवादिति ।**

परि०— यद्वा 'उदाहरणादिकानि'त्युक्तत्वादस्य मीमांसाशास्त्रत्वादुदाहरणावयवपूर्वं प्रयोगमाह **यत् श्रुतीति** । उपनयमाह **श्रुतीति** । तत्र हेतुः **तदर्थेति ॥ तच्चेति** । श्रुतिविचारणपरत्वम् । 'पुनस्तस्यार्थवित्तये । चकार ब्रह्मसूत्राणि' इति भाष्योक्तस्मृतिसिद्धमित्यर्थः । तस्य वेदराशेरित्यर्थः । उभयत्र निगमनमाह **तस्मादिति** । श्रुतियुक्तिसंवादित्वादित्यर्थः । अप्रयोजकत्वनिरासाय विपक्षे बाधकमाह **अन्यथेति** । शास्त्राप्रामाण्ये श्रुत्यादेः कुतोऽप्रामाण्यप्रसङ्ग इत्यत आह **अर्धेति** । **वैशसः** हिंसा । अङ्गाङ्गिनोः एकशरीरापन्नत्वादिति भावः । **विपूर्वाच्छसु** हिंसायामित्यतः पचाद्यजन्तात् तस्येदमित्यणि वैशसेति रूपनिष्पत्तेः ।

गु०दी०— अपराधिषु चतुर्षु द्वयोरेव **वैशसं** हिंसा न परयोरित्यस्याप्यनुपपत्तेरिति भावेनाह **वैशसासंभवादिति** ।

याद्०— **अर्धवैशसासंभवादिति** । अर्धहिंसान्यायासंभवात् इत्यर्थः । अर्धवैशसासंभवादिति पाठेऽर्धवैशसाऽसंभवाद्विरोधासंभवात्, वस्तुनो द्वैरूप्यासंभवादिति यावत् इति व्याख्यानं द्रष्टव्यम् ।

वं०प०— **अन्यथेति** । श्रुतियुक्तिसंवादिनो ब्रह्ममीमांसाशास्त्रस्याप्रामाण्य इत्यर्थः ॥ कुत इत्यत आह **अर्धवैशसेति** । ब्रह्ममीमांसाशास्त्रश्रुतियुक्तीनामेकार्थप्रतिपादकत्वे समाने, ब्रह्ममीमांसाया अप्रामाण्यमितरयोस्तु प्रामाण्यमित्यर्धहिंसान्यायासंभवादित्यर्थः ॥ **अर्धवैशसेति** पाठे, ब्रह्ममीमांसाशास्त्रस्य श्रुतियुक्तिसंवादे त्रयाणामेकार्थप्रतिपादकत्वं प्राप्तम् । तत्र श्रुतियुक्त्योः प्रामाण्ये तत्प्रतिपादितप्रमेयस्य सत्यत्वं प्राप्तम् । ब्रह्ममीमांसाशास्त्रस्याप्रामाण्ये तत्प्रतिपादितप्रमेयस्यासत्यत्वं प्राप्तमित्येकस्यैवार्थस्य सत्यत्वासत्यत्वरूपद्वैरूप्यासंभवादित्यर्थः ।

आनन्द:— ननु श्रुतियुक्तिमूलत्वेन प्रामाण्यसाधनमयुक्तम् । व्याप्तेरभावात् । न चाङ्गाङ्गिभावसत्त्वाद्व्याप्तिरिति वाच्यम् । निषेध्यनिषेधसमर्पकयोरङ्गाङ्गिभावे सत्यपि तदभावात् । किञ्चानुमानप्रकारश्चात्र कथमित्यत

आह **ततश्चेति** । श्रुतिसंवादित्वमेव कुत इत्यत आह **तदर्थविचारपरत्वादिति** । श्रुत्यर्थविचारपरत्वादित्यर्थः । एवमपि मास्तु तत्संवादित्वमित्यत आह **विसंवाद इति । तदनुपपत्तेः** । श्रुत्यर्थविचारपरत्वानुपपत्तेरित्यर्थः । ननु सति हि श्रुत्यर्थविचारपरत्वे तत्संवादित्वेन प्रामाण्यं, तदेव च न युज्यते प्रमाणाभावादित्यत आह **तत्रेति** । श्रुत्यर्थविचारपरत्वमित्यर्थः । अस्तु तर्हि श्रुतिमूलत्वेन प्रामाण्यं युक्तिमूलत्वेन तु कुतः । व्यास्यादेरभावादित्यत आह **यत्रेति । मीमांसारूपत्वादिति** । न च सूत्राणां वाक्यरूपत्वात् । मीमांसायाश्च युक्त्यनुसन्धानरूपत्वाद्वाक्य-युक्त्यनुसन्धानयोः कथमभेद इति वाच्यम् । **मीमांसा युक्त्यनुसन्धानं तद्रूप्यते** निरूप्यते प्रतिपाद्यतेऽनेनेति मीमांसारूपं तस्य भावस्तत्त्वं तस्मादित्यर्थः । युक्त्यनुसन्धानप्रतिपादकत्वं च युक्तिग्रथनात्मकत्वादिति भावः । एवमपि युक्तिसंवादित्वं कुत इत्यत आह **मीमांसाया इति** । ननु श्रुतियुक्तिमूलत्वेऽपि मास्तु प्रामाण्यमिति विपक्षे बाधकाभावादप्रयोजको हेतुरित्यत आह **अन्यथेति** । श्रुतियुक्तिमूलत्वेऽपि प्रामाण्यं न चेदित्यर्थः ।

कं०रा०— अन्यथेति । श्रुतियुक्तिसंवादित्वेऽपि शास्त्रस्य प्रामाण्याभाव इत्यर्थः । **अर्धवैशसंति** । न हि संवादिनोर्मध्ये एकस्याप्रामाण्यमपरस्य प्रामाण्यमिति संभवतीति भावः ।

श्रीनिधि०— अर्धवैशसेति । मत्स्यादेः प्रसवार्धमर्धशरीरस्यावशेषणं भक्षणाय अर्धस्य लिंगा न संभवति । तद्वत् श्रुत्यादिसंवादिशास्त्रस्य प्रामाण्यमङ्गीकृत्य श्रुत्यादेः प्रामाण्याङ्गीकारो न युज्यत इति भावः ।

वा०चं०— व्याप्तिपक्षधर्मतयोरुभयोरप्यनुमानाङ्गत्वाद्वाक्यकारीयं पक्षधर्मतासूचनं व्याप्तेरप्युपलक्षण-मित्यभिप्रेत्य; व्याप्तिप्रदर्शनपूर्वं कीदृशोऽङ्गाङ्गिभावः, कुतश्च सः, कथं च पक्षधर्मतोपपादकः, इत्याशङ्कां परिहरति ततश्चेति ॥ अर्धेति । समानार्थत्वाविशेषेऽप्येकप्रामाण्यस्यापराप्रामाण्यस्य चार्धवैशसवदसंभावितत्वादित्यर्थः ।

वा०र०— यत् श्रुतिसंवादीत्यादिना करिष्यमाणव्याप्तिप्रदर्शनादिकं सङ्गमयन्नवतारयति व्याप्तिपक्षधर्म-तयोरिति । तदर्थविचारपरत्वात् मीमांसारूपत्वादित्यनेनाङ्गाङ्गिभावस्य श्रुत्यर्थविचारपरत्वमीमांसानिरूपकत्वरूपेण प्रदर्शनात्तद्भावावर्त्ययं शङ्का । **नन्व पुनस्तस्यार्थवित्व इत्यादिर्मीमांसायाः** पुनरनुसन्धानात्मकत्वादित्याभ्या-मङ्गाङ्गिभावसाधनात्कुतश्च स इति तद्भावावर्त्याशङ्काविसंवादे तदनुपपत्तेः । मीमांसाया इत्याभ्यां श्रुतिसंवादित्वस्य पक्षधर्मतोपपादनात्तद्भावावर्त्यशङ्का कथं च पक्षेऽपीति विवेकः । **मीमांसारूपत्वादिति** मूलम् । तन्निरूपकत्वादि-त्यर्थः । युक्त्यनुसन्धानात्मकमीमांसानिरूपकत्वं च शास्त्रस्य तदनुसन्धानसाधनयुक्तिग्रथनात्मकत्वात्सिद्धमित्या-शयेनाह **मीमांसाया इति** मूलम् । श्रुतियुक्तिसंवादित्वयोरप्रयोजकत्वं परिहरति **अन्यथेति** मूलम् । तत्रार्धवैशस-न्यायसंभवाभिधानं वक्ष्यमिदमेनेन घटयति । **अर्धवैशसवदिति** । समानार्थत्वे सत्यप्येकस्य प्रामाण्यमपरस्य चाप्रामाण्यमित्येतदर्धकुक्कुटीपाकवदसंभावितमित्यर्थः । अर्धचरतीत्यायोगादिति यावत् । तन्न्यायश्च शेषलक्षणस्य-ग्रहैकत्वाधिकरणीयश्रुतशब्दाभिधेयानां नार्थानां युगपत्तया ग्रहणाग्रहणं युक्तमर्धकुक्कुटीपाकवदिति राणकोक्तो ज्ञेयः । वक्ष्यते चायं न्यायष्टीकाकृतानन्दमयाधिकरणे । **इत्यर्थ इति** । अन्यथार्धकुक्कुटीपाकोऽपि स्यादिति भावो मूले ।

स०र०—अन्यथेति । न हि श्रुतियुक्त्योरपि 'कयोश्चित्प्रामाण्यं, कयोश्चिन्ने'ति वैरूप्यं सङ्गच्छत इत्यर्थः ।

कुण्डल०— उपपादनप्रकारं दर्शयति **ततश्चेति**। **तच्चेति**। श्रुत्यर्थविचारात्मकत्वम्। 'पुनस्तस्यार्थवित्तये। चकार ब्रह्मसूत्राणि' इत्याद्यागमसिद्धमित्यर्थः। **अन्यथेति**। श्रुतियुक्तिसंवादतोऽपि शास्त्रस्य अप्रमाणत्व इत्यर्थः। **अर्धवैशसेति**। समानार्थकयोः प्रमाणयोर्मध्ये एकं प्रमाणमन्यदप्रमाणमित्यर्थवैरूप्यायोगादित्यर्थः।

विद्व०— व्याप्तिपक्षधर्मताप्रदर्शनपूर्वकमनुमानद्वयं सूचयितुमाह **ततश्चायमर्थ इति**। अप्रयोजकताशङ्का-निवारणाय विपक्षे बाधकमाह **अन्यथेति**। श्रुतियुक्तिसमानार्थकस्य प्रामाण्यानङ्गीकारे इत्यर्थः। **वैशसः** हिंसा।

चषकः— **वैशसशब्दो** हिंसावचनः।

काशी०— मूले पक्षधर्मतामात्रसूचनं व्याप्तेः स्फुटत्वादित्याशयेन तत्तात्पर्यार्थं वक्तुमाह **ततश्चेति**। अत्र श्रुतिमूलतया मानं युक्तिमूलतया मानमित्यनेन सहेतुकप्रतिज्ञाया मूल एवोक्तत्वादुदाहरणादित्रयस्यापि न्याय्यत्वाभ्युपगमाद्वा प्रतिज्ञाहेत्वोरनुक्तिः। मूलसूचितमङ्गाङ्गिभावं विवृण्वन् पक्षधर्मतामुपपादयति **तदर्थेति**। श्रुत्यर्थानुमितिपरत्वादित्यर्थः। अत्र हेतोरप्रयोजकत्वं निराह **विसंवाद इति**। श्रुत्यर्थाप्रतिपादकत्व इत्यर्थः। तदर्थ-ज्ञानजनकवाक्यस्यैव तदर्थज्ञानेच्छया प्रेक्षावद्भिः प्रयोगादिति भावः। **तच्चेति**। श्रुत्यर्थविचारपरत्वं चेत्यर्थः। **युक्ति-संवादि** युक्तिसिद्धार्थप्रतिपादकम्। व्याप्यवति व्यापकज्ञानप्रयोजकमिति यावत्। **मीमांसारूपत्वात्** मीमांसा-हेतुत्वात्। ज्ञानेच्छारूपमीमांसाहेतुत्वस्य अप्रयोजकत्वादाह **युक्तीति**। व्याप्तिपक्षधर्मताविशिष्टलिङ्गज्ञान-रूपत्वादित्यर्थः। निगमयति **तस्मादिति**। **श्रुतिसंवादित्वाद्युक्तिसंवादित्वाच्चेत्यर्थः**। अत्राप्रयोजकत्वशङ्कानिरासाय विपक्षे बाधकमाह **अन्यथेति**। कुत इत्यत आह **अर्धेति**। समानार्थकयोरेकस्य प्रामाण्यमपरस्याप्रामाण्यमित्य-स्यार्धहिंसातुल्यस्यासंभवादित्यर्थः। अर्धेति पाठे त्वर्धस्य परमार्थस्य बाधनासंभवात् श्रुत्याद्यर्थस्याप्यपरमार्थत्व-प्राप्तेरित्यर्थः। यादुपते त्वर्धे वैशसस्य विरोधस्य द्वैरूप्यरूपस्यासंभवादित्यर्थ उक्तः।

गूढ०— ननु श्रुतियुक्तिमूलत्वेन प्रामाण्यसाधनमयुक्तम्। व्याप्तेरभावात्। न चाङ्गाङ्गिभावसत्त्वात् व्याप्तिरिति वाच्यम्। निषेध्यनिषेधसमर्पकयोरङ्गाङ्गिभावे सत्यपि तदभावात्। किञ्चानुमानप्रकारश्चात्र कथमित्यत आह **ततश्चेति**। श्रुतिसंवादित्वमेव कुत इत्यत आह **तदर्थविचारपरत्वादिति**। श्रुत्यर्थविचारपरत्वादित्यर्थः। एवमपि मास्तु तत्संवादित्वमित्यत आह **विसंवाद इति**। **तदनुपपत्तेः** श्रुत्यर्थविचारपरत्वानुपपत्तेः। ननु सति हि श्रुत्यर्थविचारपरत्वे तत्संवादित्वेन प्रामाण्यं, तदेव च न युज्यते। प्रमाणाभावादित्यत आह **तच्चेति**। श्रुत्यर्थविचार-परत्वमित्यर्थः। अस्तु तर्हि श्रुतिमूलत्वेन प्रामाण्यं युक्तिमूलत्वेन तु कुतः। व्याप्त्यादेरभावादित्यत आह **यच्चेति**। **मीमांसारूपत्वादिति**। न च सूत्राणां वाक्यरूपत्वात् मीमांसायाश्च युक्त्यनुसन्धानरूपत्वाद्वाक्ययुक्त्यनुसन्धानयोः कथमभेद इति वाच्यम्। मीमांसायुक्त्यनुसन्धानं तत् रूप्यते निरूप्यते प्रतिपाद्यतेऽनेनेति मीमांसारूपं तस्य भाव-स्तत्त्वं तस्मादित्यर्थः। युक्त्यनुसन्धानप्रतिपादकत्वं च युक्तिग्रथनात्मकत्वादिति भावः। एवमपि युक्तिसंवादित्वं कुत इत्यत आह **मीमांसाया इति**। ननु श्रुतियुक्तिमूलत्वेऽपि मास्तु प्रामाण्यमिति विपक्षे बाधकाभावादप्रयोजको हेतुरित्यत आह **अन्यथेति**। श्रुतियुक्तिमूलत्वेऽपि प्रामाण्यं न चेदित्यर्थः।

प्रदीपः— **अन्यथेति**। न हि श्रुतियुक्त्योरपि कयोश्चित्प्रामाण्यं कयोश्चिन्नेति वैरूप्यं सङ्गच्छत इत्यर्थः।

७४ सु०— किमतो यद्येवमित्यत आह **एव प्रामाण्यमिति।**

अनु०— एव प्रामाण्यं त्रिविधं महत्।
दृश्यते ब्रह्मसूत्राणां

एवशब्दो ब्रह्मसूत्राणाम् इत्यनेन संबध्यते। त्रिविधम् इति क्रियाविशेषणम्॥ ब्रह्म वेदः, तदर्थः परंब्रह्म वा। तस्य सूत्राणि ब्रह्मसूत्राणि। सकलवेदार्थभूतस्य परस्य ब्रह्मणो विष्णोः स्वरूपनिर्णयार्थानि सूत्राणीति यावत्। सूत्रशब्दार्थश्च 'अल्पाक्षरम्' इत्याद्यागमादवगन्तव्यः।

परि०— प्रमाजनकत्वरूपप्रामाण्यस्यैकविधत्वेन त्रैविध्यायोगादाह **क्रियाविशेषणमिति**। विवरिष्यते चैतत्। **त्रिविधं दृश्यते। आप्तवाक्यत्वादिप्रमाणत्रयेण दृश्यत इति यावदिति ग्रन्थेन॥ ब्रह्मपदस्य तन्त्रतामुपेत्यार्थमाह॥ ब्रह्म वेद इत्यादि। वाशब्दः समुच्चये॥**

गु०दी०— **त्रिविधमिति क्रियाविशेषणम्** इत्यत्र त्रिष्वप्यनुमानेषु त्रिविधमिति साक्षादनुक्तत्वात्तिस्रो विधा यथा भवन्ति तथा विजातीयानुमानत्रिकेषु दृश्यमानत्वात् क्रियाविशेषणमित्युक्तम्। बहुशाखानिर्णायकत्वरूपविश्वतोमुखत्वस्य सूत्रलक्षणत्वाद्वेदनिर्णायकत्वं तदर्थभूतपरब्रह्मगुणनिर्णायकत्वं सूत्रशब्दार्थ इति भावेनाह **सकलवेदार्थभूतस्य** इति।

वं०प०— **प्रमाजनकत्वरूपप्रामाण्यस्यैकविधत्वेन त्रैविध्यायोगादाह क्रियाविशेषणमिति॥**

आनन्दः— प्रामाण्यमेवेत्येवकारसंबन्धे वैयर्थ्येन प्रकृतानुपयोगादाह **एवशब्द इति**। तथाच ब्रह्मसूत्राणामेव एतादृशं प्रामाण्यं नान्येषामित्यनुत्तमत्वं प्रामाण्यस्य सिद्धचतीति भावः। ननु प्रामाण्यं त्रिविधमित्ययुक्तं यथार्थज्ञानसाधनत्वरूपस्य सूत्रनिष्ठप्रामाण्यस्य एकत्वेन त्रैविध्यासंभवात्। तथा च कथं तस्य त्रैविध्यकथनमित्यत आह **त्रिविधमितीति**। एवं च त्रिविधं यथा भवति तथा दृश्यत इत्यर्थः। आप्तवाक्यत्वेन श्रुतिमूलत्वेन युक्तिमूलत्वेन चेति प्रकारत्रयेण प्रामाण्यं दृश्यत इत्युक्तं भवतीति च कश्चिद्दोषः। **ब्रह्मसूत्राणामित्यत्र ब्रह्म वेदः, तदर्थप्रतिपादकानि सूत्राणि जैमिनीयसूत्राणि, तेषां त्रेधा प्रामाण्यमिति प्रतीयते अत आह ब्रह्म वेद इति**। एवं तर्हि **ब्रह्म ब्रह्मेत्यनन्वय इत्यत आह सकलेति**। ब्रह्म सूत्र्यते प्रतिपाद्यतेऽनेनेति व्युत्पत्त्या ब्रह्मप्रतिपादकभारतादेरेव त्रिविधं प्रामाण्यं समर्थ्यत इति प्रतीयते तदप्ययुक्तं सूत्रप्रामाण्यस्यासमर्थनात्। अतः सूत्रशब्दार्थमाह **सूत्रेति**।

कं०रा०— याथार्थ्यरूपप्रामाण्यस्यैकविधत्वेन त्रिविधं प्रामाण्यमिति त्रैविध्यस्य प्रामाण्यविशेषणत्वानुपपत्तेर्व्याचष्टे **क्रियाविशेषणमिति** । क्रियाविशेषणत्वे त्वाप्तवाक्यत्वादिप्रमाणत्रयजन्यप्रामाण्यदर्शनस्य त्रित्वान्नानुपपत्तिरिति भावः । **तस्येति** । शारीरकशब्दितपरमात्मनः सकलगुणपूर्णत्वसर्वदोषविहीनत्वजीवभिन्नत्वादिमीमांसैव शारीरकमीमांसेत्यर्थः ।

श्रीनिधि०— **त्रिविधमिति क्रियाविशेषणमिति** । प्रमाकरणत्वरूपप्रामाण्यस्य एकविधत्वात् कथं त्रैविध्यमित्यत एवमुक्तं **ब्रह्म वेद इति** । अत्र मध्यमपदलोपी समास इति ज्ञेयम् । **सकलवेदार्थभूतस्येति** । अत्रेदं लक्ष्यार्थकथनं वेदविष्णवोरेव वाच्यत्वात् ।

वा०चं०— यद्येवं श्रुतियुक्तिसंवादितया प्रामाण्यं लब्धम् अतोऽपि तदनुत्तमता सिद्धा किमित्याशङ्क्ते किमिति । 'यथाश्रुतान्वये एवशब्दस्य वैयर्थ्याद्, ब्रह्मसूत्राणामित्यनेन संबन्धे प्रयोजनं कथयिष्याम इत्यभिप्रेत्य भिन्नक्रमतया तं व्याचष्टे **एवशब्द इति** । **प्रामाण्यस्यैकविधत्वेन त्रैविध्यासंभवात्, स्वरूपेण त्रैविध्यस्यानुत्तमतानुपपादकत्वाच्च, क्रियाविशेषणतायां बाधकाभावाद्वक्ष्यमाणरीत्या अनुत्तमतोपपादकत्वसंभवाच्च तथा व्याचष्टे त्रिविधमितीति** । साधनं परित्यज्य, धात्वर्थमात्रविशेषणं हि क्रियाविशेषणमित्यर्थः । 'चक्रे शास्त्रमनुत्तमम्' इति प्रकृतशास्त्रस्यैव पूर्वत्रेवात्रापि प्रामाण्यसंबन्धित्वेन लाभे सिद्धेऽपि यद् 'ब्रह्मसूत्राणामि'ति विशेषग्रहणं तस्य प्रयोजनं वक्तुं, तस्य स्वाभिप्रेतयथास्थितोक्तिं विनाऽसंभवात्स्वाभिप्रेतार्थं तावदाह **ब्रह्मेति** । वेदपरब्रह्मणोरुभयोरपि ब्रह्मपदशक्यत्वेन ब्रह्मपदात्तयोः स्वातन्त्र्येणोपस्थितावपि; प्रत्ययोपस्थितकर्तृत्वैकत्वयोरेकप्रत्ययश्रुत्या वा, योग्यतावशाद्वा, विवक्षाबलाद्वा, यथा परस्परान्वयस्तथा; प्रकृतेऽप्येकपदश्रुत्यादिना प्रतिपाद्यप्रतिपादकभावेन परस्परान्वय इत्यभिप्रेत्य 'तदर्थ' इत्युक्तम्; न तु शक्यसंबन्धाभिप्रायेण परब्रह्मणोऽपि शक्यत्वादिति बोध्यम् ।

वा०र०— **यद्येवं श्रुतियुक्तीति** पाठः । **किमतो यद्येवमिति** मूलस्यार्थरूपत्वात् । यद्यपि इत्यपिपदं लेखकागतम् । **यथाश्रुत इति** । **प्रामाण्यमेवेत्यन्वय इत्यर्थः** । **कथयिष्याम इति** । **आप्तवाक्यत्वादिलिङ्गत्रयेत्यादिनेति शेषः** । **अनेन ब्रह्मसूत्राणामित्यनेन संबध्यत इति** मूले तत्प्रयोजनं च वक्ष्याम इति शेषः पूरणीय इत्युक्तं भवति । **प्रामाण्यस्यैकविधत्वेनेति** । **यथार्थज्ञानसाधनत्वरूपैकप्रकारत्वेनेत्यर्थः** । **स्वरूपेणेति** । प्रकारत्रयावसितत्वस्यैव प्रामाण्येऽनुत्तमतासाधकत्वादिति भावः । **बाधकाभावादिति** । दर्शनानामनेकविधत्वेन त्रैविध्यसंभवादिति भावः । **वक्ष्यमाणेति** । **यत एवं ब्रह्मसूत्राणामित्यादि वक्ष्यमाणेत्यर्थः** । 'दैवमेव परे यज्ञमि'ति चतुर्थाध्यायगीताभाष्ये यज्ञमिति क्रियाविशेषणमित्युक्तस्य तट्टीकायां साधनं परित्यज्येत्यादि व्याख्यानं कृतं तदनुसृत्य व्याचष्टे **साधनं परित्यज्येति** । साधनं कर्त्रादिप्रत्ययार्थभूतम् । अत्र च ततश्च क्रियाद्वारेण स्त्रीलिङ्गत्वे प्राप्ते क्रियाव्ययविशेषणानां क्लीबत्वमेकवचनान्तत्वं च वाच्यमिति क्रियाविशेषणानां क्लीबत्वैकवचनान्तत्वविधानात् त्रिविधमिति युक्तमिति भाव इति पूरणीयम् । **जैनाधिकरणे स्वप्नभयेति** क्रियाविशेषणमित्येतन्मूलटीकादौ

तथोपपादनात् । यत्र तु सुब्लोपोऽतः एकः पञ्चधा उक्तोऽन्नमय इत्यादीत्याद्यानन्दमयाधिकरणादिस्थलीयानुव्याख्यानमूलगतेत्यादीति । क्रियाविशेषणमित्यादौ विवक्षितस्तत्र टीकायामुक्तरीत्या क्लीबत्वैकवचनान्तत्वयोरिव अव्ययत्वविधानमधिकमाश्रित्य सुब्लोप उक्तः । तथा क्रियायाः कर्मत्वमङ्गीकृत्य तद्विशेषणानामपि कर्मत्वमाश्रित्य कर्मणि द्वितीयाया करणे च स्तोकात्पेत्यादि चतुर्थादिसूत्रेषु आप्तेरप्रतिपादनादिहापि त्रिविधमपि द्वितीयान्तम् । स्तोकं चलतीत्यादौ समानाधिकरणत्वात्स्तोकं चलनं करोतीत्याद्यर्थाश्रयणस्याकरे स्थित्येहापि त्रिविधं दृश्यत इत्यस्य त्रिविधं दर्शनं विषयो भवतीत्यर्थो लब्धः । तदेतत्सर्वमानन्दमयाधिकरणगतेत्यादीति क्रियाविशेषणमित्येतन्मूलटीकोपपादनावसरे सविस्तरमुपपादयिष्यतेऽस्माभिरत्र एव प्रतिपत्तव्यम् । पूर्वत्रेवेति । तदिति तं मानमित्यत्रेवेत्यर्थः । तच्च मूलकृता इदं शास्त्रमिति पूरणेन योजनावदिहाप्यस्य शास्त्रस्येति योजनया विवक्षितार्थलाभादिति भावः । विशेषेति । शास्त्रत्वरूपमपुरस्कृत्य ब्रह्मसूत्रत्वरूपविशेषाकारेण शास्त्रग्रहणमित्यर्थः । वक्तुमिति । ब्रह्मसूत्रशब्दार्थेन विरोधदानेन परकीयशारीरकपदार्थनिराकरणरूपं प्रयोजनं वक्तुमित्यर्थः । तस्य प्रयोजनवचनस्य । असंभवादिति । स्वाभिप्रेतार्थकथनानन्तरमेव परापव्याख्यानपराकरणावकाशात्तदभावेऽसंभवादिति भावः । तदर्थ इत्युक्त्या शक्यसंबन्धप्रदर्शनमुखेन परब्रह्मणि लक्षणोच्यते । अन्ययोभयोरेकपदोपस्थाप्यत्वेऽन्वयानुपपत्तिरिति शङ्कां सूचयन्नेव तदन्वयप्रदर्शनेन तत्परिहारपूर्वकं तदर्थ इत्यस्योभयोः स्वातन्त्र्येणार्थत्वमिति वाक्यभावं च दर्शयन्नेव प्रतीतार्थे निषेधति वेदपरब्रह्मणोरिति । शक्यत्वेनेति । ब्रह्मवेदस्तप इति वेदेऽपि शक्तिग्रहमितेरिति भावः । स्वातन्त्र्येणोपस्थितावपीति । तदुपस्थितिस्थले च परस्परान्वयो नास्ति । नानार्थाक्षादिपदार्थयोः परस्परान्वयस्यादर्शनादिति शङ्कां सूचयितुमपिपदम् । गङ्गातीरयोरेकपदोपस्थाप्ययोर्गङ्गातीरमिति परस्परान्वयदर्शनं व्यावर्तयितुं स्वातन्त्र्येण इत्युक्तम् । तीरस्य च गङ्गोपस्थित्युत्तरमर्थान्वययोगप्रतिसन्धाने चोपस्थापनादिति भावः । नायं नियमो यदेकपदोपस्थाप्ययोः परस्परान्वयो नास्तीति । तदन्वयस्यापि बहुलमुपलम्भादित्याह प्रत्ययोपस्थितेत्यादि । तिबादिप्रत्ययेत्यर्थः । तिप्मिपादेः कर्तरि विधानादेकवचनत्वाच्च तदुभयोपस्थापकत्वमिति भावः । एकप्रत्ययेत्यस्यापि तिबादिरूपैकप्रत्ययेत्यर्थः । उपलक्षणं चेदम् । सार्वधातुके यगित्यादिसूत्रीयरमादौ पच्यादयो हि धातुत्वेन भावनामाहुः । विक्लित्याद्यंशान्तरं तु पचित्यादिना प्रातिस्विकरूपेणाहुः । तच्चांशान्तरं भावनां प्रति प्रायेण भाव्यतया संबध्यत इत्यादेः प्रतिपादनात्तदनुसारेणैकधातूपात्तयोरपि यथा परस्परान्वय इत्यपि ज्ञेयम् । प्रतिपाद्यप्रतिपादकेति । अनेन तदर्थ इत्यस्य व्याख्यानं तत्प्रतिपाद्यमिति सूचितम् । नन्विति । ईक्षतेरिति धातुनिर्देशस्तेन तदर्थो लक्ष्यते । पक्ष इति तदेकदेश इत्यादिस्थलेषु शक्यसंबन्धप्रतिपादनाभिप्रायदर्शनादिति भावः।

स०व्र०— ननु ब्रह्ममीमांसाशास्त्रस्य यथार्थज्ञानसाधनत्वरूपप्रामाण्यस्यैकविधत्वात् 'त्रिविधमि'ति अनुपपन्नमित्यतः 'त्रिविधमि'त्यस्य 'दृश्यत' इति क्रियाविशेषणत्वान्न दोष इत्याह त्रिविधमिति ॥

कुण्डल०— ननु ब्रह्मसूत्राणां प्रामाण्यस्य याथार्थ्यलक्षणस्यैकविधत्वेन प्रामाण्यं त्रिविधमिति कथमित्यत आह **त्रिविधमिति** । त्रिविधमित्येतन्न प्रामाण्यविशेषणं किन्तु दृश्यत इत्युक्तदर्शनक्रियाविशेषणम् । एवं च ब्रह्मसूत्राणां प्रामाण्यमाप्तवाक्यत्वादिलिङ्गत्रयजन्यानुमितिविषयभूतमित्यर्थः पर्यवस्यति । एवं च न काचिदनुपपत्तिरिति भावः । एतच्छास्त्रे प्रयुक्तस्य शारीरकमीमांसाशब्दस्यापव्याख्यां प्रत्याख्यातुं तत्समानार्थकब्रह्मसूत्रशब्दो भाष्यकृता प्रयुक्तस्तदर्थमाह **ब्रह्मेति। तस्येति**। शारीरकशब्दितपरमात्मन इत्यर्थः।

विद्व०— प्रमाकरणत्वस्यैकप्रकारत्वेन त्रैविध्यासंभवादाह **क्रियाविशेषणमिति**।

चषकः— प्रामाण्ये त्रैविध्यस्य बाधिततया, स्वावधिकोत्तमत्वविशेषितराहित्यानुपपादकतया च; अभेदेन प्रामाण्यविशेषणीभूतकर्मप्रत्यायकलकारप्रकृतिभूतधातूपस्थाप्यानुमितिरूपदर्शनक्रियानिष्ठविशेष्यतानिरूपिताभेदसंसर्गावच्छिन्नप्रकारतापन्नप्रत्यायकमित्याशयेनाभिधत्ते **त्रिविधमिति**।

काशी०— शङ्कते **किमिति**। यद्येवं प्रामाण्यमनुमितमतः किं प्रकृते प्रामाण्यानुत्तमत्वविषये सिद्धमित्यर्थः। वक्ष्यमाणप्रयोजनानुसारेणैवकारं योजयति **एवशब्द इति** । आप्तवाक्यत्वादिज्ञाप्यप्रामाण्यस्यैकविधत्वेन तत्र त्रैविध्यान्वयायोगादाह **क्रियाविशेषणमिति** । दृश्धात्वर्थविशेषणमित्यर्थः । एतच्छास्त्रे ब्रह्मपदप्रयोगप्रयोजनं विवक्षुस्तदुपयुक्तत्वेन तदर्थमाह **ब्रह्म वेद इति** । एतत्पक्षेऽर्थनिर्णायकत्वरूपपरम्परासंबन्धस्य ब्रह्मणः सूत्राणीति षष्ठ्यर्थस्य काम्य(र्य)तया गौरवादाह **तदर्थ इति** । सकलवेदप्रतिपाद्यं परब्रह्म वा लक्षणया ब्रह्मशब्दार्थ इत्यर्थः। वाच्यवाचकयोरैक्यव्यपदेशेन तद्वाच्ये तद्वाचकस्य रूढलक्षणाऽङ्गीकारात्। न च परब्रह्मणः शक्त्यैव ब्रह्मशब्दार्थत्वात्तत्र तस्य लक्षणानर्थक्यमिति वाच्यम्। परब्रह्मत्वेन शक्यत्वेऽपि वेदार्थत्वेनाशक्यत्वात्। न च वेदार्थनिर्णायकत्वस्य विश्वतोमुखत्वार्थकसूत्रशब्देनैव लाभात्पृथक् तदुक्तिवैयर्थ्यमिति वाच्यम्। सामान्यतो वेदार्थनिर्णायकत्वस्य तेन लाभेऽपि विशिष्यविष्णुनिर्णायकत्वालाभात्। अत एव परब्रह्मेत्युक्तम्। न चैवं वेदार्थत्वेन परब्रह्माभिधानं व्यर्थम् । परब्रह्मत्वमात्रेण तदभिधानेऽपि तल्लाभादिति वाच्यम् । निर्णये वेदकरणकत्वलाभाय वेदार्थत्वेन तदभिधानस्यावश्यकत्वात् । अत एव ब्रह्मणि लक्षणैव नास्तीत्यप्यपास्तम् । शक्यसंबन्धस्य दुरपह्नवत्वात् । ब्रह्मशब्दाद्वेदार्थत्वादिना ब्रह्मबोधस्य विना लक्षणामयोगाच्च । ह्यपेक्षया त्विति सूत्रेऽङ्गुष्ठमात्रपदस्याङ्गुष्ठमात्रावकाशसंबन्धेन ब्रह्मणि वृत्तेरुक्तत्वाच्च। एवं च वाक्यार्थचन्द्रिकायां ब्रह्मपदस्य लक्षणानिराकरणं परब्रह्मत्वेनैव विष्णोर्विवक्षितत्वमभिप्रेत्येति ध्येयम् । यद्वा । वाक्यार्थचन्द्रिकारीत्या वेदः परब्रह्म च ब्रह्मशब्दार्थः । वेदस्य प्रतिपाद्यतया परब्रह्मण्यन्वयसूचनाय तदर्थ इत्युक्तम् । न च तच्छब्दार्थे तच्छब्दार्थान्वययोगः । शाब्दिकैकाख्यातार्थकर्तरि तदर्थसङ्ख्यान्वयस्य तार्किकैकाख्यातार्थकृतौ तदर्थकालान्वयस्याङ्गीकृतत्वात् । न च नामार्थयोर्भेदान्वययोगः । अयं वै लोकः प्रथमा महानाम्नीत्यादौ महानाम्नीलोकरूपनामार्थयोर्वाच्यवाचकभावेनैवान्वयात् । महानाम्नीपदस्य महानाम्नीवाच्ये लक्षणायां प्रथमेत्यस्यैकदेशान्वयप्रसङ्गात् । परिमळरीत्या तु तन्त्रेण ब्रह्मशब्दार्थे ब्रह्मशब्दार्थान्वयः । षष्ठ्यर्थेन सह विशिष्टार्थं वक्तुं षष्ठीसमासमाह **तस्येति** । वेदस्य तदर्थपरब्रह्मणो वा ।

सूत्राणि ब्रह्मसूत्रपदोक्तानीत्यर्थः । अत्र ब्रह्मशब्दस्य वेदपरत्वेऽर्थभूतपरब्रह्मनिर्णायकत्वस्य वेदार्थभूतपरब्रह्मपरत्वे च निर्णायकत्वस्यैव षष्ठ्यर्थत्वादुभयत्रैकमेव फलितार्थमाह सकलेति । स्वतः परब्रह्मभूतजीवचैतन्यस्य तटस्थलक्षणादिनिर्णायकं सूत्रमिति मतनिरासाय विष्णोः स्वरूपेत्युक्तम् । ब्रह्मसूत्राणां सर्वनिर्णायकत्वेऽपि प्राधान्येन परब्रह्मनिर्णायकत्वमेवेत्याशयेन निर्णयार्थानीत्युक्तम् । सूत्रशब्दार्थाज्ञाने ब्रह्मसूत्राणामन्यतो महत्त्वासिद्धेरगाह सूत्रेति । 'अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुरि'ति भाष्योदाहृतस्कान्दवचनादवगन्तव्य इत्यर्थः । तथा हि । भारतादावसन्दिग्धत्वादिमति सूत्रव्यवहारवारणार्थमल्पाक्षरमित्युक्तम् । तट्टीकायां यावदक्षरतां विना विवक्षितार्थासिद्धिस्तदल्पाक्षरत्वमिति विवृतम् । तत्पदं च तदर्थप्रतिपादनाय ततोऽधिकाक्षरानुपादानमिति व्याख्यातम् । चन्द्रिकायां तत्र च यावदक्षरत्वे विवक्षितार्थसिद्धिरित्युक्तौ सूत्रघटकद्वित्राक्षरवत्त्वस्यापि विवक्षितार्थसिद्धिप्रयोजकत्वेन तदधिकाक्षरशून्यत्वस्य सूत्रेष्वभावादसंभव इत्यतो यावदक्षरतां विनेत्याद्युक्तम् । यावदक्षरत्वाभावो विवक्षितार्थासिद्धिप्रयोजक इत्यर्थः । न चोक्तद्वित्राक्षरवत्त्वाभावेऽपि विवक्षितार्थासिद्ध्या तस्यापि तत्प्रयोजकत्वादुक्तदोषस्तदवस्य इति वाच्यम् । तत्तदक्षरवत्त्वाद्यभावानां प्रयोजकत्वापेक्षया लाघवेन तावदक्षरवत्त्वाभावस्यैकस्यैव प्रयोजकत्वोपगमात् । तत्सूत्रघटकद्वित्राक्षरवतोऽपि सूत्रान्तरात्तत्सूत्रविवक्षितार्थासिद्ध्या व्यभिचाराच्च । न च तावदक्षरवत्त्वाभावस्य प्रयोजकत्वेऽपि राजा जारेत्यादौ व्यभिचार इति वाच्यम् । यादृशानुपूर्वी विनेत्यर्थस्य विवक्षितत्वात् । राजेत्यानुपूर्व्याश्च जारेत्यादावभावात् । एवं च यादृशानुपूर्व्यभावो यादृशार्थासिद्धिप्रयोजकस्तादृशार्थप्रतिपादकतादृशानुपूर्वीघटकवर्णाधिकवर्णाघटितत्वमल्पाक्षरत्वमिति फलितम् । अथातो ब्रह्मजिज्ञासेत्यानुपूर्व्यभावश्च विशिष्टाधिकारिकमोक्षफलकब्रह्मजिज्ञासाकर्तव्यत्वरूपविवक्षितार्थासिद्धिप्रयोजक इति तद्घटकवर्णाधिकवर्णाघटितत्वात्तत्र लक्षणसमन्वयः । एतेन यावदक्षरतां विना विवक्षितार्थासिद्धिरिति व्याप्तिः । ब्रह्मजिज्ञासेत्यक्षरतां विनाऽपि ब्रह्मणो जिज्ञासेत्यादिना विवक्षितार्थसिद्धिसंभवेन व्यभिचारात् । व्याप्त्यविवक्षायां च सूत्रघटकद्वित्राक्षरवत्त्वाभावेऽप्यथातो जिज्ञासेत्यादौ विवक्षितार्थासिद्धिसत्त्वेन तदधिकाक्षरशून्यत्वस्यासंभव इत्यपास्तम् । यावदक्षरत्वाभावे विवक्षितार्थासिद्धिप्रयोजकत्वस्यैव विवक्षितत्वेन व्याप्तेरविवक्षितत्वात् । न च तस्य तत्प्रयोजकत्वमप्यनुपपन्नम् । उक्तरीत्या व्यभिचारादिति वाच्यम् । अनेककारणकार्याभावे कारणाभावकूटस्यैव प्रयोजकत्वात् । ब्रह्मजिज्ञासेत्यस्येव ब्रह्मणो जिज्ञासेत्यस्यापि विवक्षितार्थगिद्धिं प्रति हेतुतया तत्तदानुपूर्व्यभावकूटस्यैव तदभावप्रयोजकतया व्यभिचारानवकाशात् । तदल्पाक्षरत्वमित्यत्र तत्पदेन तावदक्षरत्वस्य विवक्षायामव्याप्तिः । कर्तव्यादिपदानामध्याहारं विना विवक्षितार्थासिद्धेः । तादृशपदवत्त्वस्य च सूत्रे अभावात् । अतस्तदधिकाक्षरशून्यत्वं विवक्षितम् । न चैवं सूत्रैकदेशेऽतिव्याप्तिः । तन्मात्रे वक्ष्यमाणस्य विश्वतोमुखत्वस्याभावात् । एवं च ब्रह्मजिज्ञासेत्यवान्तरवाक्यानुपूर्वी विना तदर्थासिद्धेस्तदधिकाक्षरशून्यत्वस्य चाथशब्दादिघटितमहावाक्यरूपसूत्रेऽव्याप्तिरतस्तदर्थप्रतिपादनायेत्युक्तम् । अथशब्दादेस्तदर्थाप्रतिपादकत्वान्न दोषः । अत एवास्तोभत्वविशेषणमपि सार्थकम् । अन्यथा व्यर्थाक्षरस्याप्यधिकाक्षरत्वेनैव व्यावृत्तेरन्तद्वैयर्थ्यापत्तेः । न चैवमनेकसूत्रसमुदायेऽतिव्याप्तिः । तस्यैकैकसूत्रादधिकाक्षरत्वेऽपि तदर्थप्रतिपादकतदधिकाक्षरशून्यत्वादिति वाच्यम् । एकैकसूत्रस्येव सूत्रसमुदायस्यापि लक्ष्यत्वोपगमात् । अत एव 'अथातःशब्दपूर्वाणि सूत्राणी'त्यादौ

सूत्रसन्दर्भात्मकशास्त्रेषु सूत्रशब्दप्रयोगः। नन्वेवमप्याकाशस्तल्लिङ्गादित्यादिसूत्रेष्वव्याप्तिः। खं तल्लिङ्गादित्यादिनैव विवक्षितार्थसिद्धेः। तेषां ततोऽधिकाक्षरत्वात्। न चाक्षरपदस्य पदपरतया यावत्पदत्वं विना विवक्षितार्थासिद्धिः। तदधिकपदशून्यत्वमल्पाक्षरत्वम्। एवं च पर्यायपदेष्वक्षराधिक्येन दोष इति वाच्यम्। तथा सति 'अन्तर उपपत्तेरि'त्यादावन्तरन्तरादिपदेषु लाघवगौरवचिन्ताया असङ्कत्यापत्तेरिति चेन्न। तत्राकाशादिपदानां श्रौताकाशादिपदार्थपरत्वात्। तादृशार्थस्य च पदान्तरेणालाभात्। एवं गतिसामान्यादित्यादौ साम्यादिपदाप्रयोगेऽपि प्रयोजनविशेष ऊह्यः। एवमपि भवितुमर्हतीत्यादिसन्देहजनकवाक्यवारणार्थमसन्दिग्धमिति। सन्देहाजनकमित्यर्थः। न च सन्देहजनकवाक्ये बहुशाखानिर्णायकत्वरूपं विश्वतोमुखत्वं नेति नातिव्याप्तिप्रसक्तिरिति वाच्यम्। आनन्दमयोऽभ्यासादन्यस्माद्वेत्यादौ साध्यांशे विश्वतोमुखत्वस्य हेत्वंशे सन्देहजनकत्वस्य च संभवादतिव्याप्तेः। 'अग्निर्हिमनिवर्तक' इत्यादिवाक्यव्यावृत्तये सारवदिति। सारवत्त्वं विशिष्टार्थत्वम्। विशिष्टत्वं च पुरुषार्थहेतुत्वादिरूपम्। विष्णुनाममन्त्रादावतिव्याप्तिवारणाय विश्वतोमुखमिति। बहुशाखानिर्णायकमित्यर्थः। नन्वत्र शाखाविषयकनिर्णयजनकत्वस्य शाखाश्रोत्रग्राह्येत्यादिवाक्यसाधारणत्वाच्छाखार्थनिर्णयजनकत्वस्य च शाखायामपि सत्त्वाच्छाखार्थनिर्णायकन्यायव्युत्पादकत्वमेव विश्वतोमुखमित्यनेन विवक्षणीयम्। तथा च सद्व्याकरणसूत्रादेरपि बहुशाखागतपदार्थनिर्णायकत्वान्नाव्याप्तिरिति चन्द्रिकाविरोधः। तस्य निरुक्तन्यायव्युत्पादकत्वाभावादिति चेन्न। पदार्थज्ञानं विना वाक्यार्थनिर्णयानुपपत्त्या पदशक्त्यादेरपि शाखार्थनिर्णायकन्यायत्वात्। वस्तुतस्तु शाखार्थनिर्णयोद्देश्यकत्वमेव शाखानिर्णायकत्वमिति नोक्तदोषः। अत एव कल्पसूत्रादावपि नाव्याप्तिः। अभिनवचन्द्रिकायां तु मीमांसासूत्राणामेवात्र लक्ष्यत्वात्सद्व्याकरणसूत्रादेरपि पदार्थमात्रनिर्णायकत्वेनालक्ष्यत्वान्न तत्राव्याप्तिशङ्केत्यन्यथैव चन्द्रिकार्थ उक्तः। टीकायां किं तत्सूत्रत्वमिति सामान्यतः सूत्रलक्षणप्रश्नेनावतारितत्वादिह च सूत्रशब्दार्थ इत्येवोक्तत्वात्सकलसत्सूत्राणामपि लक्ष्यत्वमिति तु युक्तम्। अर्थाबोधकतावच्छब्दादिघटितेति प्रसङ्गभङ्गाय अस्तोभमिति। साग्नि गानभागपूरणाय हावु इत्यादिस्तोभाक्षराणामिव व्यर्थाक्षरस्यानुपादानमित्यर्थः। न च व्यर्थाक्षरान्तर्भविन विशिष्टार्थत्वशाखानिर्णायकत्वयोरसत्त्वादेव नातिव्याप्तिरिति वाच्यम्। यतो विशिष्टार्थत्वं नाम न विशिष्टार्थवाचकत्वम्। तस्य पदमात्रधर्मत्वात्। नापि विशिष्टार्थबोधकत्वम्। परंपरया तद्बोधप्रयोजकेषु समयपादीयसूत्रीयेषु तदभावात्। किन्तु विशिष्टार्थबोधपरत्वम्। तच्चोच्चारणसौकर्याय प्रयुक्तावच्छब्दादिसाधारणं शाखानिर्णायकत्वमप्येवमेवेत्यस्तोभत्वमर्थवत्। एवमपशब्दादेरपि यथाकथञ्चिदुक्तबोधपरत्वसंभवादपशब्दादिमत्यतिप्रसङ्गभङ्गार्थम् अनवद्यमिति। अपशब्दादिशब्ददोषशून्यमित्यर्थः। तेन हेत्वाद्यंशेऽपार्थकस्यापि व्यावृत्तिः। न च लाघवात्प्रमाणत्वमेव निवेशयितुमुचितमिति वाच्यम्। तथा सति पुनरुक्तादिदोषवत्यतिव्याप्तेरिति तत्त्वप्रदीपाद्यनुसारी पन्थाः। गुर्वर्थदीपिकादौ त्वल्पाक्षरत्वे सति विश्वतोमुखत्वमेव लक्षणं शेषं तु स्वरूपकीर्तनमित्युक्तम्। तत्रायमभिप्रायः। यावदक्षरतां विना विवक्षितार्थासिद्धिस्तदधिकाक्षरशून्यत्वमेवाल्पाक्षरत्वम्। तेनास्तोभत्वस्य गतार्थता। न च महावाक्यरूपसूत्रेष्वव्याप्तिः। तत्तदर्थकसूत्रत्वस्यैव निरुच्यमानत्वात्। यावदक्षरघटितसूत्रेण च यावानर्थो विवक्षितस्तावदक्षरतां विना तावदर्थासिद्धेस्तदधिकाक्षरशून्यत्वेन तस्य तदर्थकसूत्रत्वोपपत्तेः। विश्वतोमुखत्वं च बहुशाखातात्पर्यविषयविशिष्टार्थनिर्णयजनकत्वम्। तेन सन्दिग्धासार-

सूत्राणि ब्रह्मसूत्रपदोक्तानीत्यर्थः । अत्र ब्रह्मशब्दस्य वेदपरत्वेऽर्थभूतपरब्रह्मनिर्णायकत्वस्य वेदार्थभूतपरब्रह्मपरत्वे च निर्णायकत्वस्यैव षष्ठ्यर्थत्वादुभयत्रैकमेव फलितार्थमाह सकलेति । स्वतः परब्रह्मभूतजीवचैतन्यस्य तटस्थलक्षणादिनिर्णायकं सूत्रमिति मतनिरासाय विष्णोः स्वरूपेत्युक्तम् । ब्रह्मसूत्राणां सर्वनिर्णायकत्वेऽपि प्राधान्येन परब्रह्मनिर्णायकत्वमेवेत्याशयेन निर्णयार्थानीत्युक्तम् । सूत्रशब्दार्थाज्ञाने ब्रह्मसूत्राणामन्यतो महत्त्वासिद्धेरगाह सूत्रेति । 'अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुरि'ति भाष्योदाहृतस्कान्दवचनादवगन्तव्य इत्यर्थः । तथा हि । भारतादावसन्दिग्धत्वादिमति सूत्रव्यवहारवारणार्थमल्पाक्षरमित्युक्तम् । तट्टीकायां यावदक्षरतां विना विवक्षितार्थासिद्धिस्तदल्पाक्षरत्वमिति विवृतम् । तत्पदं च तदर्थप्रतिपादनाय ततोऽधिकाक्षरानुपादानमिति व्याख्यातम् । चन्द्रिकायां तत्र च यावदक्षरत्वे विवक्षितार्थसिद्धिरित्युक्तौ सूत्रघटकद्वित्राक्षरवत्त्वस्यापि विवक्षितार्थसिद्धिप्रयोजकत्वेन तदधिकाक्षरशून्यत्वस्य सूत्रेष्वभावादसंभव इत्यतो यावदक्षरतां विनेत्याद्युक्तम् । यावदक्षरत्वाभावो विवक्षितार्थासिद्धिप्रयोजक इत्यर्थः । न चोक्तद्वित्राक्षरवत्त्वाभावेऽपि विवक्षितार्थासिद्धचा तस्यापि तत्प्रयोजकत्वादुक्तदोषस्तदवस्थ इति वाच्यम् । तत्तदक्षरवत्त्वाद्यभावानां प्रयोजकत्वापेक्षया लाघवेन तावदक्षरवत्त्वाभावस्यैकस्यैव प्रयोजकत्वोपगमात् । तत्सूत्रघटकद्वित्राक्षरवतोऽपि सूत्रान्तरात्तत्सूत्रविवक्षितार्थासिद्धचा व्यभिचाराच्च । न च तावदक्षरवत्त्वाभावस्य प्रयोजकत्वेऽपि राजा जारेत्यादौ व्यभिचार इति वाच्यम् । यादृशानुपूर्वी विनेत्यर्थस्य विवक्षितत्वात् । राजेत्यानुपूर्व्याश्च जारेत्यादावभावात् । एवं च यादृशानुपूर्व्यभावो यादृशार्थासिद्धिप्रयोजकस्तादृशार्थप्रतिपादकतादृशानुपूर्वीघटकवर्णाधिकवर्णाघटितत्वमल्पाक्षरत्वमिति फलितम् । अथातो ब्रह्मजिज्ञासेत्यानुपूर्व्यभावश्च विशिष्टाधिकारिकमोक्षफलकब्रह्मजिज्ञासाकर्तव्यत्वरूपविवक्षितार्थासिद्धिप्रयोजक इति तद्घटकवर्णाधिकवर्णाघटितत्वात्तत्र लक्षणसमन्वयः । एतेन यावदक्षरतां विना विवक्षितार्थासिद्धिरिति व्याप्तिः । ब्रह्मजिज्ञासेत्यक्षरतां विनाऽपि ब्रह्मणो जिज्ञासेत्यादिना विवक्षितार्थसिद्धिसंभवेन व्यभिचारात् । व्याप्यविवक्षायां च सूत्रघटकद्वित्राक्षरवत्त्वाभावेऽप्यथातो जिज्ञासेत्यादौ विवक्षितार्थासिद्धिसत्त्वेन तदधिकाक्षरशून्यत्वस्यासंभव इत्यपास्तम् । यावदक्षरत्वाभावे विवक्षितार्थासिद्धिप्रयोजकत्वस्यैव विवक्षितत्वेन व्याप्तेरविवक्षितत्वात् । न च तस्य तत्प्रयोजकत्वमप्यनुपपन्नम् । उक्तरीत्या व्यभिचारादिति वाच्यम् । अनेककारणककार्यामावे कारणाभावकूटस्यैव प्रयोजकत्वात् । ब्रह्मजिज्ञासेत्यस्येव ब्रह्मणो जिज्ञासेत्यस्यापि विवक्षितार्थसिद्धिं प्रति हेतुतया तत्तदानुपूर्व्यभावकूटस्यैव तदभावप्रयोजकतया व्यभिचारानवकाशात् । तदल्पाक्षरत्वमित्यत्र तत्पदेन तावदक्षरत्वस्य विवक्षायामव्याप्तिः । कर्तव्यादिपदानामध्याहारं विना विवक्षितार्थासिद्धेः । तादृशपदवत्त्वस्य च सूत्रे अभावात् । अतस्तदधिकाक्षरशून्यत्वं विवक्षितम् । न चैवं सूत्रैकदेशेऽतिव्याप्तिः । तन्मात्रे वक्ष्यमाणस्य विश्वतोमुखत्वस्याभावात् । एवं च ब्रह्मजिज्ञासेत्यवान्तरवाक्यानुपूर्वी विना तदर्थासिद्धेस्तदधिकाक्षरशून्यत्वस्य चाथशब्दादिघटितमहावाक्यरूपसूत्रेऽव्याप्तिरतस्तदर्थप्रतिपादनायेत्युक्तम् । अथशब्दादेस्तदर्थाप्रतिपादकत्वान्न दोषः । अत एवास्तोभत्वविशेषणमपि सार्थकम् । अन्यथा व्यर्थाक्षरस्याप्यधिकाक्षरत्वेनैव व्यावृत्तेरस्तद्वैयर्थ्यापत्तेः । न चैवमनेकसूत्रसमुदायेऽतिव्याप्तिः । तस्यैकैकसूत्रादधिकाक्षरत्वेऽपि तदर्थप्रतिपादकतदधिकाक्षरशून्यत्वादिति वाच्यम् । एकैकसूत्रस्येव सूत्रसमुदायस्यापि लक्ष्यत्वोपगमात् । अत एव 'अथातःशब्दपूर्वाणि सूत्राणी'त्यादौ

सूत्रसन्दर्भात्मकशास्त्रेषु सूत्रशब्दप्रयोगः । नन्वेवमप्याकाशस्तल्लिङ्गादित्यादिसूत्रेष्वव्याप्तिः । खं तल्लिङ्गादित्यादिनैव विवक्षितार्थसिद्धेः । तेषां ततोऽधिकाक्षरत्वात् । न चाक्षरपदस्य पदपरतया यावत्पदत्वं विना विवक्षितार्थासिद्धिः । तदधिकपदशून्यत्वमल्पाक्षरत्वम् । एवं च पर्यायपदेष्वक्षराधिक्येन दोष इति वाच्यम् । तथा सति 'अन्तर उपपत्तेरि'त्यादावन्तरन्तरादिपदेषु लाघवगौरवचिन्ताया असङ्गत्यापत्तेरिति चेन्न । तत्राकाशादिपदानां श्रौताकाशादिपदार्थपरत्वात् । तादृशार्थस्य च पदान्तरेणालाभात् । एवं गतिसामान्यादित्यादौ साम्यादिपदाप्रयोगेऽपि प्रयोजनविशेष ऊह्यः । एवमपि भवितुमर्हतीत्यादिसन्देहजनकवाक्यवारणार्थमसन्दिग्धमिति । सन्देहाजनकमित्यर्थः । न च सन्देहजनकवाक्ये बहुशाखानिर्णायकत्वरूपं विश्वतोमुखत्वं नेति नातिव्याप्तिप्रसक्तिरिति वाच्यम् । आनन्दमयोऽभ्यासादन्यस्माद्वेत्यादौ साध्यांशे विश्वतोमुखत्वस्य हेत्वंशे सन्देहजनकत्वस्य च संभवादतिव्याप्तेः । 'अग्निर्हिमनिवर्तक' इत्यादिवाक्यव्यावृत्तये **सारवदिति** । सारवत्त्वं विशिष्टार्थत्वम् । विशिष्टत्वं च पुरुषार्थहेतुत्वादिरूपम् । विष्णुनाममन्त्रादावतिव्याप्तिवारणाय **विश्वतोमुखमिति** । बहुशाखानिर्णायकमित्यर्थः । नन्वत्र शाखाविषयकनिर्णयजनकत्वस्य शाखाश्रोत्रग्राह्येत्यादिवाक्यसाधारणत्वाच्छाखार्थनिर्णयजनकत्वस्य च शाखायामपि सत्त्वाच्छाखार्थनिर्णायकन्यायव्युत्पादकत्वमेव विश्वतोमुखमित्यनेन विवक्षणीयम् । तथा च सद्वचाकरणसूत्रादेरपि बहुशाखागतपदार्थनिर्णायकत्वान्नाव्याप्तिरिति चन्द्रिकाविरोधः । तस्य निरुक्तन्यायव्युत्पादकत्वाभावादिति चेन्न । पदार्थज्ञानं विना वाक्यार्थनिर्णयानुपपत्त्या पदशक्त्यादेरपि शाखार्थनिर्णायकन्यायत्वात् । वस्तुतस्तु शाखार्थनिर्णयोद्देश्यकत्वमेव शाखानिर्णायकत्वमिति नोक्तदोषः । अत एव कल्पसूत्रादावपि नाव्याप्तिः । अभिनवचन्द्रिकायां तु मीमांसासूत्राणामेवात्र लक्ष्यत्वात्सद्वचाकरणसूत्रादेरपि पदार्थमात्रनिर्णायकत्वेनालक्ष्यत्वान्न तत्राव्याप्तिशङ्केत्यन्यथैव चन्द्रिकार्थ उक्तः । टीकायां किं तत्सूत्रत्वमिति सामान्यतः सूत्रलक्षणप्रश्नेनावतारितत्वादिह च सूत्रशब्दार्थ इत्येवोक्तत्वात्सकलसत्सूत्राणामपि लक्ष्यत्वमिति तु युक्तम् । अर्थाबोधकतावच्छब्दादिघटितेति प्रसङ्गभङ्गाय **अस्तोभमिति** । साग्नि गानभागपूरणाय हावु इत्यादिस्तोभाक्षराणामिव व्यर्थाक्षरस्यानुपादानमित्यर्थः । न च व्यर्थाक्षरान्तर्भवेन विशिष्टार्थत्वशाखानिर्णायकत्वयोरसत्त्वादेव नातिव्याप्तिरिति वाच्यम् । यतो विशिष्टार्थत्वं नाम न विशिष्टार्थवाचकत्वम् । तस्य पदमात्रधर्मत्वात् । नापि विशिष्टार्थबोधकत्वम् । परंपरया तद्बोधप्रयोजकेषु समयपादीयसूत्रीयेषु तदभावात् । किन्तु विशिष्टार्थबोधपरत्वम् । तच्चोच्चारणसौकर्याय प्रयुक्तावच्छब्दादिसाधारणं शाखानिर्णायकत्वमप्येवमेवेत्यस्तोभत्वमर्थवत् । एवमपशब्दादेरपि यथाकथञ्चिदुक्तबोधपरत्वसंभवादपशब्दादिमत्यतिप्रसङ्गभङ्गार्थम् **अनवद्यमिति** । अपशब्दादिशब्ददोषशून्यमित्यर्थः । तेन हेत्वाद्यंशेऽपार्थकस्यापि व्यावृत्तिः । न च लाघवात्प्रमाणत्वमेव निवेशयितुमुचितमिति वाच्यम् । तथा सति पुनरुक्तादिदोषवत्यतिव्याप्तेरिति तत्त्वप्रदीपाद्यनुसारी पन्थाः । गुर्वर्थदीपिकादौ त्वत्पाक्षरत्वे सति विश्वतोमुखत्वमेव लक्षणं शेषं तु स्वरूपकीर्तनमित्युक्तम् । तत्रायमभिप्रायः । यावदक्षरतां विना विवक्षितार्थासिद्धिस्तदधिकाक्षरशून्यत्वमेवाल्पाक्षरत्वम् । तेनास्तोभत्वस्य गतार्थता । न च महावाक्यरूपसूत्रेष्वव्याप्तिः । तत्तदर्थकसूत्रत्वस्यैव निरुच्यमानत्वात् । यावदक्षरघटितसूत्रेण च यावानर्थो विवक्षितस्तावदक्षरतां विना तावदर्थासिद्धेस्तदधिकाक्षरशून्यत्वेन तस्य तदर्थकसूत्रत्वोपपत्तेः । विश्वतोमुखत्वं च बहुशाखातात्पर्यविषयविशिष्टार्थनिर्णयजनकत्वम् । तेन सन्दिग्धासार-

सावद्यानां व्यावृत्तिः । न च समयपादीयसूत्रेष्वव्याप्तिः । तदर्थस्यापि परम्परया पुरुषार्थोपयोगित्वेन शास्त्रातात्पर्यविषयत्वादिति । अन्ये तु विश्वतोमुखत्वमेव लक्षणमित्याचक्षते । तेषामयं भावः । पर्यायेष्वाधिक्यस्यादोषत्वात्प्रश्नादिवाक्यानां च साक्षाच्छास्त्रार्थनिर्णायकत्वाभावान्न भारतादिष्वतिव्याप्तिः । तत्रापि येषां वाक्यानामुक्तलक्षणाक्रान्तत्वं तेषां सूत्रत्वमिष्टमेव । अत एव ब्रह्मविदाप्नोति परमिति श्रौतवाक्येऽपि सूत्रत्वव्यवहारः । यदि च तत्र सूत्रव्यवहारो नेष्यते तदा सूत्रशब्दबोध्यत्वेन वक्तुरिच्छाविषयत्वमपि चशब्देन समुच्चीयत इति दिक् ।

गूढ०— प्रामाण्यमेवेत्येवकारसंबन्धे वैयर्थ्येन प्रकृतानुपयोगादाह एवशब्द इति । तथाच ब्रह्मसूत्राणामेवैतादृशप्रामाण्यं नान्येषामित्यनुत्तमत्वं प्रामाण्यस्य सिद्ध्यतीति भावः । ननु प्रामाण्यं त्रिविधमित्ययुक्तं यथार्थज्ञानसाधनत्वरूपस्य सूत्रनिष्ठप्रामाण्यस्य एकत्वेन त्रैविध्यासंभवात् । तथाच कथं तस्य त्रैविध्यकथनमित्यत आह त्रिविधमितीति । एवं च त्रिविधं यथा भवति तथा दृश्यत इत्यर्थः । आप्तवाक्यत्वेन श्रुतिमूलत्वेन युक्तिमूलत्वेन चेति प्रकारत्रयेण प्रामाण्यं दृश्यत इत्युक्तं भवतीति न कश्चिद्दोषः । ब्रह्मसूत्राणामित्यत्र ब्रह्म वेदः तदर्थप्रतिपादकानि सूत्राणि जैमिनीयसूत्राणि तेषां त्रेधा प्रामाण्यमिति प्रतीयते अत आह ब्रह्म वेद इति । एवं तर्हि ब्रह्म ब्रह्मेत्यनन्वय इत्यत आह सकलेति । ब्रह्म सूत्र्यते प्रतिपाद्यते अनेनेति व्युत्पत्त्या ब्रह्मप्रतिपादकभाग्नादेरेव त्रिविधं प्रामाण्यं समर्थ्यत इति प्रतीयते । तदप्ययुक्तम् । सूत्रप्रामाण्यस्यासमर्थनात् । अतः सूत्रशब्दार्थमाह सूत्रेति ।

७५ सु०— एतेनैतच्छास्त्रवाचिनः शारीरकशब्दस्य 'शरीरमेव शरीरकं, तत्र भवः शारीरको जीवः । तमधिकृत्य कृतोऽयं ग्रन्थः शारीरक' इति व्याख्यानं निरस्तं भवति । ब्रह्मसूत्रशब्दार्थेन विरुद्धत्वात् । '' 'त्वं'पदाभिधेयस्य 'तत्'पदाभिधेयब्रह्मरूपतामीमांसे''ति व्याख्यानादविरोध इति चेन्न । असंभवात् । 'न हि जन्मादिसूत्राणि अभेदपराणि । प्रत्युत तन्निरासपराणी'ति वक्ष्यते । अतः शारीरकः परमात्मैव । यथोक्तम् 'शारीरौ तावुभौ ज्ञेयौ जीवश्चेश्वरसंज्ञित' इति । तस्य सकलगुणपूर्णत्वादिमीमांसैव शारीरकमीमांसा । तथा चोक्तं पुराणे 'सर्वदोषविहीनत्वम्' इत्यादि ।

परि०— एतेनेति । ब्रह्मसूत्रपदोपादानेनेत्यर्थः ॥ त्वंपदेति । तत्त्वमसीतिवाक्यस्येत्यर्थः ॥ यथोक्तमिति । सप्तमे गीताभाष्ये । 'शारीरौ तावुभौ ज्ञेयौ जीवश्चेश्वरसंज्ञित' इति । परमस्तथेति पाठो लेखकायत्तः । सर्वदोषविहीनत्वमिति । 'सर्वदोषविहीनत्वं गुणैः सर्वैरुदीर्णता । अभेदः सर्वरूपेषु जीवभेदस्सदैव च । विष्णोरुक्तानि सूत्रेषु सर्ववेदेज्यता तथा । तारतम्यं च मुक्तानां विमुक्तिर्विद्यया तथा' इति भारततात्पर्यनिर्णयोक्तपुराणे उक्तमित्यर्थः ।

गु०दी०— शरीरान्तःस्थित्वा शरीरनियामकत्वात् शारीरकः परमात्मेति भावेनाह अत इति ।

यादु०— 'ब्रह्ममीमांसा'शब्दस्योक्तविरोधपरिहाराय व्याख्यानान्तरमाशङ्क्ते **त्वंपदाभिधेयस्य इति** ॥ **शारीराविति** । तद्धितस्य भवार्थकत्वानुपपत्त्या वासार्थता स्वीकार्येति भावः ॥ **सर्वदोषविहीनत्वमित्यादीति** । 'सर्वदोषविहीनत्वं गुणैः सर्वैरुदीर्णता । अभेदः सर्वरूपेषु जीवभेदः सदैव च । विष्णोरुक्तानि सूत्रेषु सर्वदेवेड्यता तथा' इत्यादिना पुराणेन सकलगुणपूर्णत्वादिमीमांसारूपत्वं सूत्राणामुक्तमित्यर्थः ॥

आनन्दः— अत्र ब्रह्मसूत्राणामिति प्रयोगे किं निमित्तमित्यतस्तदर्शयति **एतेनेति** । **ब्रह्मसूत्रेति** । अशेषवेदार्थभूतब्रह्मस्वरूपनिर्णयार्थं सूत्रं ब्रह्मसूत्रमिति हि ब्रह्मसूत्रशब्दार्थः । शारीरकशब्दस्य च जीवप्रतिपादकत्वरूपार्थत्वे ब्रह्मसूत्रशब्दार्थविरोधः स्यादित्यर्थः । जीवस्य ब्रह्मप्रतिपादकं सूत्रमित्यर्थकरणान्न विरोध इति शङ्क्ते **त्वंपदाभिधेयस्येति** । नैवमर्थो युक्तः भावप्रधाननिर्देशस्याध्याहारस्य च कृतत्वेन शब्ददोषात् । न केवलमेतावत्, अर्थदोषोऽप्यस्तीत्याह **न हीति** । तर्हि कः शारीरकशब्दार्थ इत्यत आह **अत इति** । एवं च शरीरमेव शारीरकं तत्र भवः । **नियामकत्वेन प्रादुर्भूतः शारीरकः परमात्मेत्यर्थ इति** भावः ।

कं०रा०— ननु 'शारीरौ तावुभौ ज्ञेयौ जीवश्च परमस्तथे'ति वचनाच्छारीरकशब्दस्य परमात्मवाचित्वेऽपि शारीरकस्य मीमांसा **शारीरकमीमांसेति परमात्मविषयकमीमांसैव** शारीरकमीमांसाशब्देन लक्ष्यते, न तु परमात्मनः सकलगुणपूर्णत्वादिना रूपेण **मीमांसेति** । **ब्रह्मसूत्रात्मकमीमांसाशास्त्रस्य** परमात्मीयगुणपूर्णत्वादिप्रतिपादकत्वे प्रमाणाभावादित्यत आह **तथा चोक्तमिति** । 'सर्वदोषविहीनत्वं गुणैः सर्वैरुदीर्णता । अभेदः सर्वरूपेषु जीवभेदः **सदैव हि** । **विष्णोरुक्तानि सूत्रेष्वि**'ति पुराणवाक्ये ब्रह्मसूत्राणां परमात्मीयगुणपूर्णत्वादिप्रतिपादकत्वस्योक्तत्वेन शारीरकस्य **मीमांसेत्यत्र** केन प्रकारेण मीमांसेति जिज्ञासायां सकलगुणपूर्णत्वादिलक्षणप्रकारस्यैव वक्तव्यत्वाच्छारीरकस्य परमात्मनः सकलगुणपूर्णत्वादिरूपेण मीमांसा शारीरकमीमांसेत्यर्थ एव ग्राह्य इति भावः ।

श्रीनिधि०— पुराणे पुरातने भविष्यत्पर्वणि । एतन्नामकं पुराणान्तरं वा । पुराणान्तरेऽप्येतद्वाक्यपाठाच्चेति । ब्रह्म वेदः तदर्थः परब्रह्म वा इत्यर्थद्वयकथनं तु वेदस्य वाच्यत्वे तदर्थतया तत्संबन्धि ब्रह्मणि लक्षणा ब्रह्मणः वाच्यत्वे वेदार्थत्वविशिष्टे तस्मिन् लक्षणेति लक्षणामुखभेदज्ञापनार्थम् ।

वा०चं०— एवं 'ब्रह्मसूत्र'पदं व्याख्याय तद्धेतुं पद्मपादयुक्तशारीरकमीमांसापदान्तर्गत'शारीरक'पदव्याख्यानं निरस्तमित्याह **एतेनेति** ॥ **ब्रह्मेति** । जीवमधिकृत्य प्रवृत्ते ग्रन्थे परब्रह्मस्वरूपनिर्णयार्थसूत्रत्वाभावेन ब्रह्मसूत्रशब्दार्थविरुद्धत्वात् इत्यर्थः ॥ ननु 'शारीरकस्य त्वंपदाभिधेयस्य जीवस्य तत्पदाभिधेयब्रह्मरूपताप्रतिपादकमीमांसाया अपि शारीरकजीवमधिकृत्य प्रवृत्तत्वाद्, ब्रह्मविषयकसूत्रत्वसंभवाच्च, न विरोध इति शङ्क्ते **त्वंपदेति** । यद्वा । नन्वस्तु 'शारीरकं जीवमधिकृत्य कृतो ग्रन्थः शारीरकस्तद्रूपा मीमांसे'ति पद्मपादीव्याख्यानस्येदं

दूषणम्। 'शारीरमेव शरीरकम्। तत्र निवासी शारीरको जीवात्मा। तस्य त्वंपदाभिधेयस्य तत्पदाभिधेयेश्वरात्मरूपता मीमांसा तथोक्ते'ति भामतीव्याख्याने नेदं दूषणं संभवतीत्याशङ्क्ते **त्वंपदेति**। यद्वा व्याख्यानद्वयस्यानतिविशेषतया व्याख्यानद्वयम् 'एतेने'त्यादिना संमुग्धतयाऽनूद्य, ब्रह्मसूत्रशब्दार्थविरोधेन अपाकृत्य, 'त्वंपदे'त्यादिनोभयाभिप्रायाविष्करणपूर्वम् 'असंभवादि'ति दूषणाभिधानमिति द्रष्टव्यम्। **असंभवादिति**। एवं च जन्मादिसूत्रेषु त्वदुक्तब्रह्मसूत्रशब्दार्थाभावेन तस्य ब्रह्मसूत्रार्थशब्दतया वक्तुमशक्यत्वे अस्मदुक्तार्थकत्वे वक्तव्ये, तद्विरोधस्तदवस्थ इति भावः॥ **अत इति**। परोक्तार्थस्यानुपपन्नत्वादित्यर्थः। ब्रह्मसूत्र-शब्दार्थविरोधासंभवयोः परपक्ष इव स्वपक्षेऽभावादिति भावः। न केवलं स्वपक्षेऽसंभवाभावो अपि तु शारीरकमीमांसाशब्दार्थतयाऽस्मदुक्तार्थः प्रामाणिकश्चेत्याह **तथा चेति**।

वा०र०— पञ्चपाद्युक्तेत्यस्य शारीरकपदव्याख्यानमिति संबन्धः। कत्यः शारीरकशब्द इत्यत उक्तं शारीरकमीमांसेत्युत्तरमूलमनुसृत्य **शारीरकमीमांसापदान्तर्गतेति**। अनेनैव मूले केवलशारीरकपदोपादानाभावात् कथं तद्विचार इति शङ्का निराकृता। **शारीरमेवेति मूलम्**। स्वार्थे कप्रत्यय इति भावः। **तत्रेति**। तथा च भावार्थे अण्प्रत्यये णित्वादादिवृद्धौ शारीरकमिति रूपसिद्धिरिति भावः। **एतेनेति**। परामृष्टेतुकथनपरब्रह्मसूत्रशब्दार्थेनेति वाक्यमुपादाय तदभिप्रायमाह **ब्रह्मेतीति**। आद्यव्याख्यानस्य पञ्चपाद्युक्तत्ववत् त्वंपदेत्याद्युक्तव्याख्यानस्य भामत्युक्ततया तदुक्तमपि व्याख्यानं निराकरोति। **त्वंपदेतीत्यवतार** एवोचितो न तु पूर्वत्रोक्तदोषोद्धारपरतया अवतार इत्यस्वरसं सूचयन्पक्षान्तरमाह **यद्वा नन्विति**। **इदं दूषणमिति**। ब्रह्मसूत्रशब्दार्थेन विरोधरूपं दूषणमित्यर्थः। शरीरमेव शरीरकं तत्र भवः शारीरको जीवस्तमधिकृत्येति मूलस्य शारीरमेव शारीरकम्। शारीरकं जीवमधिकृतो ग्रन्थः शारीरक इत्यादि पञ्चपाद्युक्तव्याख्यानसङ्ग्राहकत्ववच्छरीरमेव शरीरकं तत्र निवासीत्यादि भामत्युक्तव्याख्यानसङ्ग्राहकत्वस्यापि संभवे तद्व्याख्यानपरतया त्वंपदेत्यादेर्योजनाकरणमनुचितं ब्रह्मसूत्रपदविरोधस्य भामत्युक्तव्याख्यानेऽप्यविशेषे असंभवस्य पञ्चपाद्युक्तेऽप्यविशेषे च एकत्र उक्तविरोधप्रतिपादनमपरत्र चासंभवप्रतिपादनमिति विवेकायोग इत्यपरितोषं पूर्वत्र सूचयन् पक्षान्तरमाह **यद्वा व्याख्यानेति**। पञ्चपादीभामत्योरुक्तस्य व्याख्यानद्वयस्येत्यर्थः। जीवमधिकृतो ग्रन्थ इत्यादि पञ्चपादीव्याख्यानादधिकं त्वंपदेत्यादिकं भामत्युक्तव्याख्यानेऽस्तीति कथमुक्तमूलेनोभयसङ्ग्रह इत्यत उक्तम् **अनतिविशेषतयेति**। पञ्चपाद्यामपि तावतो विशेषस्याभिप्रायतया प्रतीतेर्मुखत उक्तेरप्रयोजकत्वात् जीवविषयकत्वरूपदूष्यताप्रयोजकस्योभयत्राविशेषादिति भावः। **उभयाभिप्रायेति**। जीवविषयकत्वेऽपि जीवस्य तत्पदाभिधेयपरब्रह्मरूपता मीमांसेत्युक्ते परब्रह्मविषयकत्वस्यापि प्राप्तिरित्यभिप्रायेत्यर्थः। **आविष्करणपूर्वम्**। आविष्करणेनोक्तदोषोद्धारशङ्कनपूर्वमित्यर्थः। **त्वदुक्तेति**। जीवस्य ब्रह्माभेदरूपार्थेत्यर्थः। अत्र ब्रह्मसूत्रशब्दार्थविरोधोद्धारे शङ्कितेऽसंभवरूपदूषणाभिधानेन प्रागुक्तदोषे भारो नास्तीति न भ्रमितव्यम्। किं त्वसंभवदूषणेनाभिप्रायान्तरनिरासे सति परेण पूर्वपक्षमेवाङ्गीकार्य तत्र प्रागुक्तदोषं तदवस्थमिति प्रतिपादनेन तत्र भार एवास्तीति दर्शयति **तस्य ब्रह्मसूत्रेति**। असंभवोपपादनाय

प्रवृत्तं न हीति मूले वक्ष्यत इत्यस्य लक्ष्यलक्षणयोर्भेद इत्यादिना जन्माधिकरणे वक्ष्यत इत्यर्थः । अस्मदुक्तार्थः प्रामाणिकश्चेत्याहेति । अनेन शारीरकस्य परमात्मनः सकलगुणपूर्णत्वादिमीमांसायाः शारीरकमीमांसापदार्थत्वं पुराणे उक्तं चेति सूचितं भवति । मूले पुराण इत्यस्य भविष्योत्तरपुराण इत्यर्थः । इत्यादीत्यादिपदेन च 'गुणैः सर्वैरुदीर्णता । अभेदः सर्वरूपेषु जीवभेदस्तथैव च । विष्णोरुक्तानि सूत्रेषु सर्ववेदाङ्कता तथे'ति वाक्यशेष-परिग्रहादुक्तपुराणेन विवक्षितार्थलाभ इति ज्ञेयम् ।

स०व्र०— शारीराविति । भावार्थतद्धितानुपपत्तेः साध्वर्थेत्यर्थः । 'सर्वदोषविहीनत्वं, गुणैः सर्वैरुदीर्णता । अभेदः सर्वरूपेषु जीवभेदः सदैव च । विष्णोरुक्तानि सूत्रेषु सर्ववेदेड्यता तथा' इति प्रमाणस्य प्रतीकं गृह्णाति सर्वदोषविहीनत्वमित्यादीति ।

कुण्डल०— ननु शारीरकमीमांसाशब्देनायमर्थः कथं लब्ध इत्यत आह यथोक्तमिति । 'सर्वदोषविहीनत्वं गुणैः सर्वैरुदीर्णता । अभेदः सर्वरूपेषु जीवभेदः सदैव हि । विष्णोरुक्तानि सूत्रेष्वि'ति पुराणवाक्ये ब्रह्ममीमांसायाः गुणपूर्णत्वाद्यावेदकत्वप्रतिपादनाच्छारीरकमीमांसाशब्दस्याप्युक्त एवार्थोऽभ्युपगन्तव्य इति भावः ।

विद्व०— ब्रह्मसूत्रपदप्रयोगेण विवरणकारीयं एतच्छास्त्रवाचितया पुराणादिप्रसिद्धस्य शारीरकपदस्य व्याख्यानं निरस्तमित्याह एतेनेति । नन्वस्याः मीमांसायाः शारीरकं जीवमधिकृत्य कृतत्वेन ब्रह्मविषयकसूत्रत्वेन विरोधः त्वंपदाभिधेयस्य जीवस्य तत्पदाभिधेयब्रह्मस्वरूपताङ्गीकारादिति शङ्कते त्वंपदाभिधेयस्येति । यद्वा शारीरकपदवाच्यस्य त्वंपदाभिधेयजीवस्य तत्पदाभिधेयब्रह्मरूपता मीमांसा शारीरकमीमांसेति भामतीव्याख्याने नेदं दूषणमिति शङ्कते त्वंपदेति । जन्मादिसूत्राणीति । यद्यपि जिज्ञासासूत्रमपि भेदपरमेव अभेदेन पूर्वपक्षयित्वा भेदेनैव सिद्धान्तस्य न्यायविवरणादौ स्पष्टमुक्तेः । तथापि द्वितीयसूत्रे जन्मादिकारणत्वादिगुणाभिधायकतया भेदस्य मुखत एव प्रतीतेरेवमुक्तमिति ज्ञेयम् । पुराणे निर्णये द्वितीयाध्यायोदाहृतभविष्यत्पर्वणि ।

काशी०— इदानीमेतच्छास्त्रे ब्रह्मसूत्रपदप्रयोगप्रयोजनमाह एतेनेति । ब्रह्मसूत्रपदप्रयोगेनेत्यर्थः । तत्र भव इति । भवार्थेऽण्प्रत्यय इति भावः । तदिति । अधिकृत्य कृते ग्रन्थ इत्यनेन पुनरण्प्रत्यय इति भावः । विरुद्धत्वादिति । जीवब्रह्मणोरेकत्राधिकृतत्वायोगादिति भावः । भामत्यामुक्तस्य शारीरकमीमांसाशब्दार्थस्य शारीरकब्रह्मसूत्रपदाभ्यां विवक्षितत्वान्न विरोध इत्याशङ्कते त्वंपदाभिधेयस्येति । शारीरकशब्देन विवक्षितस्य जीवस्य तत्पदाभिधेयं यद्ब्रह्म तद्रूपता मीमांसा तत्त्वमसीत्यादिश्रुत्यर्थविचार इति यावत् व्याख्यानात् शारीरकब्रह्मसूत्रपदयोरिति शेषः । तथा च द्वयोरपि जीवब्रह्मैक्योपपादकग्रन्थार्थत्वादविरोध इति भावः । एतेनैतच्छास्त्रे शारीरकशब्दवृत्तिचिन्तायां शारीरकमीमांसाशब्दस्य तत्पुरुषवृत्त्युक्तिरसङ्गतेति निरस्तम् । असंभवादिति । उक्तव्याख्यानस्येत्यादिः । कस्तर्हि शारीरकशब्दार्थ इत्यत आह अत इति । नियामकतया शरीरे निवासाच्छारीरकशब्दार्थ इत्यर्थः । अत्र पौराणिकरूढिमप्याह यथोक्तमिति । गीताभाष्य इति शेषः । शारीराविति । शारीरशब्दस्य जीवपरत्वे कुत्सार्थः

कप्रत्ययः । ईश्वरपरत्वे च पूर्णसुखार्थः कशब्दः । अत एवोत्तरार्धे 'अनादिबन्धनरत्वेको नित्यमुक्तस्तथापर इति हेतूक्तिः । अत्र जीवश्चेश्वरसंज्ञित इति पाठः । जीवश्च परमस्तथेति पाठस्तु लेखकायत्त इति परिमळः । अस्तु शारीरकः परमात्मा । तदैक्यमीमांसैव तन्मीमांसेत्यत आह **तस्येति** । अन्यथा दोषस्योक्तत्वादिति भावः । तेन शारीरकब्रह्मसूत्रशब्दयोरेकार्थतेति शेषः । न केवलमुपपत्तिसिद्धोऽयमर्थः । किन्तु वाचनिकश्चेत्याह **तथोक्तमिति** । महाभारततात्पर्यनिर्णयोदाहृतभविष्यत्पर्वणीति शेषः । इत्यादीत्यादिना 'गुणैः सर्वैरुदीर्णता । अभेदः सर्वरूपेषु जीवभेदः सदैव च । विष्णोरुक्तानि सूत्रेषु सर्ववेदेऽप्यता तथे'त्यादितच्छेषसङ्ग्रहः ।

गूढ०— अत्र ब्रह्मसूत्राणामिति प्रयोगे किंनिमित्तमित्यतस्तद्दर्शयति **एतेनेति** । **ब्रह्मसूत्रेति** । अशेषवेदार्थभूतब्रह्मस्वरूपनिर्णयार्थं सूत्रं ब्रह्मसूत्रमिति हि ब्रह्मसूत्रशब्दार्थः । शारीरकशब्दस्य च जीवप्रतिपादकत्वरूपार्थत्वे ब्रह्मसूत्रशब्दार्थविरोधः स्यादित्यर्थः । जीवस्य ब्रह्मत्वप्रतिपादकं सूत्रमित्यर्थकरणान्न विरोध इति शङ्कते **त्वंपदाभिधेयस्येति** । नैवमर्थो युक्तः । भावप्रधाननिर्देशस्याध्याहारस्य च कृतत्वेन शब्ददोषात् । न केवलमेतावत् अर्थदोषोऽप्यस्तीत्याह **न हीति** । तर्हि कः शारीरकशब्दार्थ इत्यत आह **अत इति** । एवं च शरीरमेव शारीरकं तत्र भवो नियामकत्वेन प्रादुर्भूतः शारीरकः परमात्मेत्यर्थ इति भावः ।

७६ सु०— यत एवं ब्रह्मसूत्राणां प्रामाण्यं त्रिविधं दृश्यते । आप्तवाक्यत्वादिप्रमाणत्रयेण दृश्यत इति यावत् । अतस्तन्महदनुत्तमं मन्तव्यम् ।

आनन्दः— महत्प्रामाण्यं त्रिविधमित्यत्र महत्त्वस्योद्देशविशेषणत्वं प्रतीयते । तच्च सिद्धं वक्तव्यम् । न हि महत्त्वं सिद्धम् । तथाच कथमेतत् । किञ्च त्रिविधमित्यस्य क्रियाविशेषणत्वे योजनाप्रकारः कथमित्यत आह **यत एवमिति** । तथाच महत्त्वस्य विधेयत्वान्न कश्चिद्दोष इति भावः ।

वा०चं०— 'एकधाऽन्यत्र सर्वश' इत्यनेन, 'अतो नैतादृशमि'त्युपसंहारबलेन च लब्धं, प्रामाण्यसाधकप्रमाणे त्रैविध्यं, तस्यानुत्तमत्वे हेतुत्वं च, दर्शयितुं **यत्तच्छब्दार्थाध्याहारेण** वाक्यं व्याख्याति **यत इति** । यद्वैवं पदार्थमुक्त्वा वाक्यार्थमाह **यत इति** ।

विद्व०— क्रियाविशेषणमित्युक्तं स्पष्टयति **आप्तवाक्यत्वादिप्रमाणत्रयेण दृश्यत इति यावदिति** ।

चषकः— **अनुत्तमं मन्तव्यमिति** । 'ब्रह्मसूत्रप्रामाण्यमनुत्तमम् आप्तवाक्यत्वादिलिङ्गत्रयावसितत्वादि'त्यनुमानाकारोऽवसेयः ॥

काशी०— इदानीं विवक्षितहेतुहेतुमद्भावेन मूलं योजयति **यत इति** । **प्रमाणत्रयेणेति** । अनुमानत्रयेण इत्यर्थः । तेनागमप्रमाणस्य प्रागुक्तत्वेऽपि न त्रित्वानुपपत्तिः । त्रिविधमित्यस्य क्रियाविशेषणत्वेऽपि दर्शनक्रियायां विधापदार्थप्रकारत्रयस्य प्रमाणत्रयरूपत्वादिति भावः ।

गूढ०— महत्प्रामाण्यं त्रिविधमित्यत्र महत्त्वस्योद्देश्यविशेषणत्वं प्रतीयते। तच्च सिद्धं वक्तव्यम्। न हि महत्त्वं सिद्धम्। तथाच कथमेतत्। किञ्च त्रिविधमित्यस्य क्रियाविशेषणत्वे योजनाप्रकारः कथमित्यत आह यत एवमिति। तथाच महत्त्वस्य विधेयत्वान्न कश्चिद्दोष इति भावः।

७७ सु०— आप्तवाक्यत्वादिलिङ्गत्रयावसितं प्रामाण्यं अन्यत्रापि चेत् स्यात् तदा कथमेषां तदनुत्तममित्यतो ब्रह्मसूत्राणामेवेत्युक्तम्। तत्कथमित्यत आह एकधेति।

अनु०— एकधाऽन्यत्र सर्वशः॥

'सर्वश' इति वचनाद् 'एकधे'त्युपलक्षणम्।

तथा हि॥ क्वचिदेकधा। यथाऽऽप्तिमूलतया लौकिकविषये पितृवाक्ये। श्रुतिसंवादेन धर्मादिविषये प्रतिवाद्युदीरितवचने। तदुक्त एव 'पर्वतोऽग्निमान्' इतिवाक्ये युक्तिसंवादेन॥ क्वचिद् द्वेधा। यथाऽऽप्तिश्रुतिभ्यां मन्वादिवाक्ये। आप्तियुक्तिभ्यां 'पर्वतोऽग्निमानि'त्यादौ पितृवाक्ये। श्रुतियुक्तिभ्यां 'ईश्वरः सर्वज्ञ' इति प्रतिवाद्युदीरितवचसीति।

जैमिन्यादिवाक्ये त्रेधाऽप्यस्तीति चेत्। सत्यम्। यथा ब्रह्मसूत्रेषु न तथा। निरवधिकं हि तत्रास्त्यादिकम्। एतदर्थमपि 'महत्' इत्येतत् 'त्रिविधम्' इत्यनेनापि योजनीयम्।

परि०— उपलक्षणत्वे बीजोक्तिः इति वचनादिति। सर्वशः सर्वत्रान्यत्रेत्युक्तयैकधेत्युक्तिरयुक्ता। क्वचिद् द्वेधा त्रेधाऽपि संभवादत उपलक्षणं कार्यमिति भावः॥ श्रुतियुक्तिभ्यामिति। यः सर्वज्ञः इत्यादिश्रुत्या ईश्वरः सर्वज्ञः सर्वकर्तृत्वादित्यादियुक्त्या च मूलभूतयेत्यर्थः। प्रामाण्यमिति सर्वत्रानुषङ्गः॥ एतदर्थम्। जैमिन्यादिवाक्यव्यावृत्तप्रामाण्यसिद्ध्यर्थमित्यर्थः॥ त्रिविधमित्यनेनापि इति। त्रिविधमित्यस्य क्रियाविशेषणत्वादाप्तवाक्यत्वादिप्रमाणत्रयेणेति पूर्वं तदर्थो दर्शितः॥ तत्र महदित्यस्य प्रामाण्येनेव तेनाप्यन्वये सति महदाप्तवाक्यत्वादिप्रमाणत्रयेणेत्यर्थः। महत्त्वं च प्रमाणस्य आप्तेः निरवधिकत्वेन। श्रुतियुक्त्योरनन्तत्वेनेत्यर्थो लभ्यत इति कर्ममीमांसादेवमीमांसाव्यावृत्तप्रामाण्यं सिद्ध्यतीति भावः॥

गु०दी०— **न तथा निरवधिकं** इत्यस्य जैमिनेरसर्वज्ञत्वेन व्यासवदाप्तत्वाभावात् कर्मकाण्डमात्रमीमांसया सकलवेदानां वैदिकयुक्तीनां चाभावेन त्रितयमपि ब्रह्मसूत्रवन्न मुख्यमिति भावः । **एतदर्थमपि** इति वाक्ये त्रिविधमपि प्रामाण्यं महद्यथा भवति तथा ब्रह्मसूत्राणां दृश्यत इति योजना कर्तव्या ।

यादु०— **तत्रेति** । ब्रह्मसूत्रकर्तरि बादरायण इत्यर्थः ॥

आनन्दः— नन्वेकधान्यत्रेति व्यर्थम् अनुत्तमप्रामाण्यस्य पूर्वेणैव समर्थितत्वादित्यतः तन्निवर्त्यां शङ्कां दर्शयति **आमेति**। नन्वत्रैकधैव प्रामाण्यमित्ययुक्तं क्वचिद्द्वेधापि संभवादित्यत आह **सर्वत्र इतीति**। उपलक्षणे सर्वत्र इत्येतद्बीजम् । अन्यत्र कुत्रचिदेकधा प्रामाण्येऽपि सर्वत्र तथाऽभावादिति तत्रैकधाप्रामाण्यं क्व द्वेधा च क्व, इत्येतद्दर्शयति **तथा हीति** । ननु जैमिन्यादिवाक्येऽपि त्रेधा प्रामाण्यस्य सत्त्वाद्ब्रह्मसूत्राणां को विशेष इत्याशङ्क्ते **जैमिन्यादीति** । अत्र कीदृशमित्यत आह **निरवधिकं हीति** । नन्वेतन्मूलस्थपदेन न प्रतीयत इत्यत आह **एतदर्थमपीति**। निरवधिकास्यादिप्रतीत्यर्थमित्यर्थः ।

कं०रा०— **आम्यादिकमिति**। आदिशब्देन श्रुतिसंवादित्वयुक्तिसंवादित्वयोर्ग्रहणम् ।

श्रीनिधि०— **निरवधिकं हि इति**। जैमिनेरसर्वज्ञत्वेन व्यासवदाप्तेरभावात् कर्मकाण्डमात्रनिर्णायकत्वेन ब्रह्मसूत्रवत् सकलश्रुतिसकलवैदिकयुक्तिसंवादित्वाभावाच्च । जैमिनिसूत्रस्य त्रिविधमप्यमुख्यमिति भावः ।

वा०चं०— अन्यत्र द्वैविध्यस्य स्पष्टदृष्टत्वेऽपि **'सर्वत्र'** इति यद्वचनं तत् 'एकधे'त्यस्योपलक्षणत्व-ज्ञापकमित्याह **सर्वत्र इतीति** । 'आम्यादिकमि'त्यत्र **'आदि'**पदेन श्रुतिमहातात्पर्यविषयसमानार्थत्वमिति निरव-काशयुक्त्यनुसन्धानात्मकत्वं च परिगृह्यते ॥

वा०र०— एवशब्दस्य ब्रह्मसूत्राणामेवेति संबन्धप्रदर्शनस्य प्रयोजनं वक्ष्याम इत्युक्तं तदिदानीमाह **आप्तवाक्यत्वादिलिङ्गत्रयेति** मूलम् । एवमस्यावतारः प्रयोजनं कथयिष्याम इति पूर्वग्रन्थ एव सूचित इति पृथङ् नोक्तः । मूले तत्कथमित्यत्र तदित्यस्य लिङ्गत्रयावसितं प्रामाण्यं ब्रह्मसूत्राणामेवेत्येतदित्यर्थः । कथमित्याक्षेपे । अन्यत्रापि तत्संभवादवधारणायोग इत्यर्थः । **अत आहेति** । इत्याशङ्कापरिहारायान्यत्र तदसंभवमुपपादयितुं तत्रैकविध्याद्याहेत्यर्थः । **स्पष्टदृष्टत्वेऽपीति** । अनेनान्यत्र द्वैविध्यस्यापि स्पष्टत्वे सर्वत्रैकधेत्येतदयुक्तमित्याशङ्का-परिहारायैकधेत्युक्त्वा सर्वत्र इति वचनबलादेकविधत्वस्योपलक्षणतया ग्रहणमित्यस्य ज्ञानसंभवान्नानुपपत्ति-रित्याहेत्यर्थः सूचितः । **त्रेधापीति** मूलम् । आप्तिमूलत्वादिप्रकारत्रयेणापीत्यर्थः । जैमिन्यादेरप्तिपदार्थ-विवक्षितार्थतत्त्वज्ञानादिमत्तया तत्प्रणीतसूत्रेष्वप्तिमूलत्वात् तत्सूत्राणां श्रुत्यर्थविचाररूपतया श्रुतिसंवादित्वात् मीमांसारूपत्वेन युक्तिसंवादित्वाच्चेति भावः । उभयत्र लिङ्गत्रयावसितप्रामाण्यसत्त्वेऽपि ब्रह्मसूत्रेषु यादृशं लिङ्गत्रयावसितं तादृशं लिङ्गत्रयावसितं जैमिन्यादिवाक्येनास्तीत्याह **यथा ब्रह्मेति** । तत्कुत इत्यतः प्रामाण्ये महत्त्वापादकत्वेन यल्लिङ्गत्रयावसितत्वं वाच्यं तल्लिङ्घटकाम्यादितारतम्यात्तल्लिङ्गत्रयतारतम्ये तत्प्रयुक्तं प्रामाण्य-

त्रैविध्यदर्शनमपि तारतम्योपेतं जातमित्याशयेनाह **निरवधिकं हीति** मूलम्। निरवधिकात्यादिकमित्यत्रादिपदेन श्रुतियुक्त्योः सङ्ग्रहः। तत्र विवक्षितार्थतत्त्वज्ञानादिरूपाप्तेर्निरवधिकत्वं स्पष्टमिति मत्वा आप्तेर्निरवधिकत्वे तादृशाप्तिमूलत्वं लिङ्गमप्यतिशयितं स्पष्टमिति च मत्वा श्रुतियुक्तिसंवादित्वमित्यत्रत्यश्रुतिपदविवक्षिततद्विषयस्य निरवधिकत्वं नाम श्रुतिमहातात्पर्यविषयत्वम्। युक्तिपदविवक्षितस्य न्यायस्य चातिनिरवकाशत्वं निरवधिकत्वम्। तथाच श्रुतियुक्तिसंवादित्वमप्यतिशयितं प्राप्तमित्याशयेन श्रुतियुक्तिनिरवधिकत्वे दर्शयंस्तद्घटितातिशयित-तत्संवादित्वमेवादिपदार्थतया दर्शयति **आदिपदेनेति**। एतेनात्यादीत्यादिपदोक्तश्रुतियुक्त्योरेव निरवधिकत्ववर्णन-पूर्वकमादिपदेन सङ्ग्रहे वर्णनीये श्रुतियुक्तिसंवादित्वसङ्ग्रहनिरूपणायोग इति निरस्तम्। उभयसंवादित्ववर्णनस्य श्रुतियुक्तिनिरवधिकत्वरूपे ये श्रुतिमहातात्पर्यविषयत्वातिनिरवकाशत्वे तद्वर्णनायैव तदा श्रुतियुक्तिसंवादित्वयोरिदं रूपमिति शिष्यानुजिघृक्षया विशिष्टरूपेण कथनोपपत्तेः। यदा यल्लिङ्गत्रयेण प्रामाण्यमवसीयते तदुत्तमप्रामाण्य-मित्युक्तजैमिन्यादिवाक्यप्रामाण्यस्य त्रेधा दृष्टत्वेऽपि महत्त्वाभावेन व्यभिचारशङ्कायामतिशयितलिङ्गत्रया-वसितत्वस्य विवक्षणात् तस्य च तत्राभावान्न व्यभिचार इति भावेन हि लिङ्गत्रयातिशयोपपादकतया तद्घटका-त्यादेर्निरवधिकत्वकीर्तनमित्यतोऽत्र निरवधिकं हीति वाक्यस्य निरवधिकाप्तिघटिताप्तिमूलकत्वनिरवधिक-श्रुतिसंवादित्वनिरवधिकयुक्तिसंवादित्वान्यतिशयितानि तत्रेति फलतोऽर्थः। तथा चाप्ते निरवधिकत्वनिमित्तक-तन्मूलकत्वस्य मुखत उपादानादादिपदेनोक्तविधश्रुतियुक्तिमूलत्वयोरवग्रहणस्य वर्णनीयत्वाद्युक्तं तथा वर्णनं टीकाकारस्येति न दोष इति ज्ञेयम्। **एतदर्थमपीति** मूलम्। निरवधिकाप्त्यादिसिद्धचर्थमपीत्यर्थः। तद्घटित-लिङ्गत्रयातिशयसिद्धचर्थमपीति यावत्। अपिपदं प्रामाण्येऽनुत्तमत्वरूपे साध्यसमर्पकमपि महदित्येतदिति महत्पदस्यार्थान्तरसद्भावमात्रसूचकम्। प्रागन्यार्थं महदित्यस्य त्रिविधमित्यनेन संबन्धस्यानुक्त्या तत्समुच्चयार्थ-त्वायोगादिति ज्ञेयम्। तथाच प्रामाण्यं महत्त्रिविधं दृश्यत इति संबन्धप्राप्तौ महता आप्तवाक्यत्वादिप्रमाणत्रयेण दृश्यत इत्युक्तं भवति। महत्त्वं चास्मदुक्तेऽतिशय एव। एवं चातिशयितलिङ्गत्रयस्य जैमिन्यादिवाक्येऽभावा-त्तदवसितं प्रामाण्यमपि तत्रानुत्तमं नेत्येव हेत्वभावेन व्यभिचारो नेति भावः।

कुण्डल०— प्रामाण्यदर्शनस्य त्रैविध्यं कथमित्यतस्तदुपपादयति **आप्तेति**।

विद्व०— **योजनीयमिति**। **महत्त्रिविधं निरवधिकं त्रिविधमिति योज्यमित्यर्थः**।

काशी०— **एषां ब्रह्मसूत्राणाम्**। **एकधेत्यस्य एकधैवेत्यर्थमभिप्रेत्याह सर्वदा इति**। **सर्वाधिक्यलाभाय** सर्वश इत्यस्य आवश्यकत्वात्क्वचिच्च द्वेधाऽपि प्रामाण्यसत्त्वेन सर्वत्रैकधैवेत्यस्य अनुपपत्तिरिति भावः। **उपलक्षणमिति**। एकधा द्वेधा वा न तु त्रेधेत्यर्थकमित्यर्थः। एतदेव दर्शयति **तथा हीति**। युक्त्यागममूलकत्व-व्यावृत्तये **लौकिकविषय इति**। पितृप्रत्यक्षमात्रमूलके साध्विदं भुंक्ष्वेत्यादावित्यर्थः। युक्तिमूलकत्वव्यावृत्तये **धर्मेति**। आप्तिमूलकत्वव्यावृत्तये **प्रतिवादीति**। ज्योतिष्टोमः स्वर्गसाधनमित्यादावित्यर्थः। **आप्तिश्रुतिभ्याम्** आप्तिमूलकत्व-श्रुतिमूलकत्वाभ्याम्। **श्रुतियुक्तिभ्यामिति**। यः सर्वज्ञ इत्यादिश्रुतिमूलकत्वेनेश्वरः सर्वज्ञः सर्वकर्तृत्वादित्यादि-

युक्तिमूलकत्वेन चेत्यर्थः । देवमीमांसाया ईश्वरः सर्वज्ञ इत्यादिपितृवाक्यस्य च सङ्ग्रहाय जैमिन्यादीत्यादिपदम् । **यथेति** । यादृशमाप्तिमूलकत्वादिकं ब्रह्मसूत्रेषु न तादृशं जैमिन्यादिवाक्येष्वित्यर्थः । तद्विवृणोति **निरवधिकमिति** । आप्तिशब्देनाप्तिघटकतत्त्वज्ञानमादिना श्रुतियुक्ती गृह्येते । तत्र तत्त्वज्ञानस्य निरवधिकत्वं नित्यत्वसर्वविषयकत्वादिरूपम् । श्रुतियुक्त्योश्चानन्त्यरूपं बोध्यम् । ननु ब्रह्मसूत्रेष्वाप्त्यादेर्निरवधिकत्वेऽपि न प्रामाण्यातिशयसिद्धिः । प्रमाणत्रयावसितप्रामाण्यस्य जैमिन्यादिवाक्येऽपि सत्त्वात् । न च निरवधिकाप्तिमूलकत्वाद्यनुमितप्रामाण्यं न तत्रेति वाच्यम् । विशेषणवैयर्थ्येन आप्तिमूलकत्वादेरेवोभयत्र प्रामाण्यानुमापकत्वात् । मैवम् । आप्त्यादेर्निरवधिकत्वावगमे सति कदाऽपि क्वाप्यनाप्तत्वशङ्कानुदयेन श्रुत्यादीनां च मिथःसंवादेनार्थान्तरपरत्वशङ्कानुदयेन झटित्येव प्रामाण्यानुमानेन क्षिप्राविशङ्कप्रवृत्त्यतिशयसंभवात् । नन्विदं मूलवाक्यान्न लभ्यत इत्यत आह **एतदर्थमिति** । आप्त्यादेर्निरवधिकत्वलाभार्थमित्यर्थः । यद्यप्येवं त्रिविधदर्शनस्यैव महत्त्वं लभ्यते न त्वाप्त्यादेर्निरवधिकत्वम् । तथाऽपि सविशेषणे हीति न्यायेन त्रिविधत्वविशिष्टे महत्त्वविशेषणं विशिष्टघटकाप्त्यादावन्वेतीत्याशयः ।

गूढ०— नन्वेकधाऽन्यत्रेति व्यर्थं अनुत्तमप्रामाण्यस्य पूर्वेणैव समर्थितत्वात् इत्यतः तन्निवर्त्यां शङ्कां दर्शयति **आप्तेति** । नन्वत्रैकधैव प्रामाण्यमित्ययुक्तम् । क्वचित् द्वेधापि संभवादित्यत आह **सर्वज्ञ इतीति** । उपलक्षणे सर्वज्ञ इत्येतद्बीजम् । अन्यत्र कुत्रचिदेकधा प्रामाण्येऽपि सर्वत्र तथाऽभावादिति । तत्रैकधा क्व प्रामाण्यं द्वेधा च क्वेत्येतद्दर्शयति **तथा हीति** । ननु जैमिन्यादिवाक्येऽपि त्रेधा प्रामाण्यस्य सत्त्वात् ब्रह्मसूत्राणां को विशेष इत्याशङ्क्ते **जैमिन्यादीति** । अत्र कीदृशमित्यत आह **निरवधिकं हीति** । नन्वेतन्मूलस्थपदेन न प्रतीयत इत्यत आह **एतदर्थमपीति** । निरवधिकाप्त्यादिप्रतीत्यर्थमित्यर्थः ।

७८ सु०— ननु प्रमाणैकत्वानेकत्वयोः प्रमेयतादवस्थ्यात् कथमेतत् । इत्थम् । न हि प्रमाणमात्रं निःशङ्कप्रवृत्तावुपयुज्यते । किं नाम प्रमाणतया प्रमितमेव । तच्च यावद्यावदधिकं प्रमीयते तत्तदनुसारिणीमविशङ्कां क्षिप्रप्रवृत्तिं प्रसूत इत्यनुभवसिद्धम् । ततः प्रामाण्यमेव स्वकार्यातिशयवशेनातिशयवदुच्यते ।

परि०— प्रमाणेति । प्रामाण्यज्ञापकप्रमाणैकत्वानेकत्वयोरित्यर्थः ॥ **एतदिति** । उत्तमानुत्तमप्रामाण्ये इत्येतदित्यर्थः ।

आनन्दः— नन्वेकेन वाऽनेकेन वा प्रामाण्ये साधितेऽपि प्रमेये विशेषाभावात् त्रेधा प्रामाण्येऽपि अनुत्तमत्वं कुत इति शङ्क्ते **नन्विति** । **ततः प्रामाण्यमेव स्वकार्यातिशयवशेनेति** । नन्वेतावता हि प्रामाण्यज्ञानस्य निःशङ्कप्रवृत्तिं प्रति कारणत्वमुक्तं भवेत् । न चैतद्युज्यते । तथाहि प्रामाण्यज्ञानस्य हि किं प्रवृत्तित्वावच्छेदेन कारणत्वम् उत बहुवित्तव्ययायाससाध्यप्रवृत्तित्वावच्छेदेन । नाद्यः । सन्देहादपि प्रवृत्तेर्जायमानत्वेन व्यतिरेक-

व्यभिचारात् । नापि द्वितीयः । आवश्यकार्थनिश्चयादेव बहुवित्तव्ययायाससाध्यप्रवृत्तेरप्युपपत्तौ प्रामाण्यनिश्चयस्यानुपयोगात् । स्वसमानविशेष्यकस्वसमानप्रकारकनिश्चयस्यैव प्रवृत्तिजनकतानियमेनार्थनिश्चयस्य च तादृशत्वेन भिन्नविषयकप्रामाण्यनिश्चयस्य तदसंभवात् । अन्वयव्यतिरेकाभ्यां व्यभिचाराच्च । न च बहुवित्तव्ययायाससाध्यप्रवृत्तौ न व्यभिचार इति वाच्यम् । तत्राप्यर्थनिश्चयार्थमपेक्षितत्वेनान्यथासिद्धत्वात् । तस्मादयुक्तमेतदिति । मैवम् । अर्थनिश्चयस्य प्रवृत्तिं प्रति कारणताया असंभवात् । तथाहि । यदि हि अर्थनिश्चयः प्रवृत्तिं प्रति कारणं तर्हि पीतः शङ्ख इत्यादिनिश्चये सति पीतार्थिनोऽपि प्रवृत्त्यापत्तिः । न चैतत् ज्ञानं न निश्चयरूपमिति वाच्यम् । शङ्खः पीतत्वेनैव भातीत्यनुभवेन एकाकारनियतत्वेन च कोट्यन्तरप्रत्यायकनवेत्याद्यप्रयोगेण च संशयरूपताया वक्तुमशक्यत्वात् । तथा च व्यभिचारान्नार्थनिश्चयस्य प्रवृत्तिजनकत्वम् । भिन्नविषयत्वेऽपि प्रामाण्यनिश्चयस्य व्याप्तिज्ञानादेरनुमितिं प्रतीव जनकत्वसंभवात् । न च सत्यप्यर्थनिश्चये अप्रामाण्यज्ञानाभावरूपसहकार्यभावादप्रवृत्तिरिति वाच्यम् । तथा सत्यप्रामाण्यस्यानुमेयत्वेन तदननुमितिदशायां पीतार्थिनः प्रवृत्त्यापत्तेः । किञ्चाप्रामाण्याज्ञानात्प्रवृत्तौ प्रामाण्यज्ञानान्निवृत्तिः किं न स्यात् । अपि च तदभाववति तत्प्रकारकत्वरूपाप्रामाण्यशङ्काद्यभावस्यानेकाभावघटितत्वेन गुरुत्वात्, प्रामाण्यनिश्चयस्य तदघटितत्वेन लघुत्वात्प्रामाण्यशङ्काद्यभावायत्ततद्वतितत्प्रकारकज्ञानत्वरूपप्रामाण्यात्यन्ताभावशङ्काद्यभावतद्व्याप्यदोषजन्यत्वादिशङ्काद्यभावयोरपि हेतुत्वेनाभावानामनेकत्वात्प्रामाण्यनिश्चयस्य चैकत्वात्तस्यैव हेतुत्वमुचितम् । न चाभावानां प्रामाण्यनिश्चयविरोध्यभावत्वेनैकत्वमिति वाच्यम् । तथा सति आवश्यकत्वाल्लाघवाच्च प्रामाण्यनिश्चयस्यैव सहकारिताया उचितत्वात् । न चाप्रामाण्यज्ञानमप्यावश्यकम्, अन्यथाऽप्रमात्वेन ज्ञातस्यापि प्रामाण्यनिश्चयस्य प्रवर्तकत्वापत्तेरिति वाच्यम् । मया तस्यापि निश्चितप्रामाण्यस्यैव प्रवर्तकत्वाङ्गीकारात् । न च क्लृप्ताक्लृप्तयोः क्लृप्ते कार्यसंप्रत्यय इति न्यायेन कल्प्यप्रामाण्यनिश्चयापेक्षया क्लृप्ताप्रामाण्यशङ्काद्यभाव एव सहकारीति वाच्यम् । गृहीतप्रामाण्यसमानविषयकज्ञानान्तरे निश्चयप्रवृत्तिजनकज्ञानमात्रे च सामग्रीसत्त्वेन तस्यापि क्लृप्तत्वात् । फलमुखगौरवस्य चादोषत्वात् । किञ्चाप्रामाण्यशङ्काशून्यज्ञानस्य प्रवर्तकत्वे शङ्काया धर्मिज्ञानसाध्यत्वात् धर्मिज्ञानकाले प्रामाण्यशङ्काया अभावात्प्रवृत्त्यापत्तिः । न च संशयं प्रति धर्मिज्ञानस्य कारणतैव नास्तीति वाच्यम् । तथा सति तुरगादौ वेगेन गच्छतः पनसत्वादिकोटिस्मृतिमतोऽनेकवृक्षेन्द्रियसन्निकर्षेऽपि यस्यैव वृक्षस्य ज्ञानं तत्रैव पनसत्वादिसन्देहो नान्यत्रेत्येवं धर्मिनियमो न स्यात् । ननु तद्धेतोरेवेति न्यायेन धर्मिज्ञाननियामकादेव संशयोपपत्तौ किमर्थं धर्मिज्ञानस्य कारणत्वमास्थेयम् । न च विषयमाहात्म्यरूपत्वेन तेषामननुगतत्वादनुगतधर्मिज्ञानमेव कारणमिति वाच्यम् । एवं सति विशिष्टज्ञानमात्र एव धर्मिज्ञानस्य कारणतापत्तेः । यदि चावश्यकत्वाद्विशेष्य भानसामग्रीत्वेनानुगमाच्च विशेष्येन्द्रियसन्निकर्षादिरेव तत्र हेतुत्वम् । तर्हि प्रकृतेऽप्यावश्यकत्वाद्धर्मिज्ञानजनकसामग्रीत्वेनानुगमाच्च विषयमाहात्म्यादेरेव हेतुत्वमस्तु किं धर्मिज्ञानेनेति चेन्न । संशयस्य धर्मिज्ञानानपेक्षत्वे संशये उत्कटत्वं न स्यात् । उत्कटत्वं हि यन्निष्ठधर्मत्वस्य यत्कोट्या सह भूयः सहचार उपलब्धः यत्र वा धर्मिणि यद्धर्मसहचरितानेकधर्मोपलम्भस्तत्त्वम् । न च धर्म्यनुपलब्धो तादृशमुत्कटत्वं संभवति । न चैवमपि तादृशसंशयविषयविशेषे धर्मिज्ञानस्य हेतुत्वे संशयसामान्यहेतुत्वं न स्यादिति वाच्यम् । यद्विशेषयोरिति न्यायेन तत्संभवात् । ननु स्वसहचरितानेकधर्मिसहिता या कोटिर्यत्र भासते तत्र तस्याः

कोटेरुत्कटत्वं न तूक्तमेवेति नियमः । एवं चैतादृश उत्कटकोटिकसन्देहो न धर्मिज्ञानकारणतामानयति यस्याः कोटेः स्वसहचरितभूयोधर्मसहितायाः स्मृताया धर्मिण्यसंसर्गाग्रहानन्तरं संशयस्तत्र तत्कोटेरुत्कटत्वं यथाऽयं प्रायेण पुरुष एवेति । यत्र तु कोट्योः केवलं स्मृतयोरसंसर्गाग्रहस्तुल्यधर्मसहितयोर्वा तत्र समकोटिकः संशयः । यथा अयं स्थाणुर्वा पुरुषो वेति । तस्मान्नोत्कटकोटिकसंशयाद्यनुरोधेनापि धर्मिज्ञानकारणतेति । मैवम् । अत्र हि न तावत् संशयत्वं कार्यतावच्छेदकमेव नेति वक्तुं शक्यम् । उक्तरीत्या कार्यतावच्छेदकत्वस्य स्थितत्वात् तथा च कोट्यो-र्विरोधज्ञानत्वेन कारणतायाः संशयत्वेन् कार्यताया आगतं धर्मिज्ञानस्य कारणत्वम् । तथाहि । न तावत्कोट्योः सार्वत्रिकविरोधो ज्ञातव्यः । भूतत्वमूर्तत्वे पृथिव्यादौ सहचरिते इति जानतो नभसि न सहचरिते इति ज्ञाने सति नभो मूर्तं भूतं वेति संशयापत्तेः । नापि काचित्को विरोधः । केवलं आकाशे मनसि च भूतत्वमूर्तत्वे विरुद्धे इति ज्ञाने सति जलं भूतं मूर्तं वेति संशयापत्तेः । किन्तु प्रकृतधर्मिणि विरोधज्ञानं संशयकारणं, तच्च न प्रकृत-धर्मिज्ञानं विनेति आगतं धर्मिज्ञानस्य कारणत्वम् । तथा चाप्रामाण्यशङ्काशून्यस्यार्थज्ञानस्य प्रवृत्तिकारणत्वे धर्मिज्ञानकाले तस्य सत्त्वाद्युक्तं प्रवृत्त्यापादनमिति । न च तद्धेतोरेवास्तु किं तेनेति न्यायेन तन्निश्चयसामग्रीत एवास्तु प्रवृत्तिरिति वाच्यम् । एवं तर्हि सहचारदर्शनवतो व्यभिचाराज्ञानादेवानुमित्युपपत्तौ तत्र व्याप्तिज्ञानस्य पक्षज्ञानवतः पक्षे लिङ्गानां संसर्गाग्रहादेव अनुमित्युपपत्तौ पक्षे लिङ्गज्ञानस्य भेदाग्रहादेव प्रवृत्त्युपपत्तौ तत्र विशिष्ट-ज्ञानस्यार्थेन्द्रियादिसंबन्धे अर्थाभावज्ञानादेव (अर्थासार्वज्ञादेव) प्रवृत्त्युपपत्तौ अर्थनिश्चयस्य च हेतुत्वं न स्यात् । न चार्थनिश्चय एव प्रवृत्तिहेतुः अप्रमात्वेन अज्ञातत्वादिकं दण्डगतदार्ढ्यादिवत्कारणतावच्छेदकं, तदभावात्पीत इति ज्ञानान्न प्रवृत्तिरिति वाच्यम् । लाघवेन प्रमात्वेन ज्ञातत्वस्यैव तदवच्छेदकत्वौचित्यात् । अन्यथानुमित्यादौ सहचारादिज्ञानमेव हेतुः, व्यभिचरितत्वादिना अज्ञातत्वं कारणतावच्छेदकमिति स्यात् । न चार्थनिश्चय एव प्रवर्तकः पीतः शङ्ख इत्यादौ त्वप्रामाण्यादिज्ञानं प्रतिबन्धकमिति वाच्यम् । अप्रामाण्यादिज्ञानस्य हि व्यभिचारादि-ज्ञानवज्जनकीभूतज्ञानविघटकत्वेन वा प्रतिबन्धकत्वम् उत बाधादिवद्ज्ञाप्याभावावगाहित्वेन । नाद्यः । तथा सति अप्रामाण्यादिज्ञानस्यापि प्रवृत्तिहेतुभूतज्ञानविघटकत्वेनैव तत्प्रतिबन्धकतेति वक्तव्ये अर्थनिश्चयस्य पीतः शङ्ख इत्यादौ सत्त्वेन तद्विघटनासंभवातेन विघटनीयस्य प्रामाण्यज्ञानस्य हेतुत्वसिद्धेः । ज्ञानं हि ज्ञानान्तरस्य विषय-द्वारैवाविरोधीति स्वविषयविरुद्धविषयकमेव ज्ञानं विघटयति । अन्यथा व्यभिचारादिज्ञानमपि स्वाभावरूपहेतु-विघटकतयाऽनुमित्यादिप्रतिबन्धकं वा सहचारादिज्ञानगतशक्तिविघटकत्वेन प्रतिबन्धकं वा स्यात् । न तु व्याप्त्यादि-ज्ञानविघटकम् । न द्वितीयः । ज्ञाननिष्ठाऽप्रामाण्यविषयकज्ञानस्य घटविषयकप्रवृत्तौ साक्षाद्विरोधित्वाभावेन ग्राह्याभावावगाहित्वेनापि प्रतिबन्धकत्वस्य वक्तुमशक्यत्वात् । किञ्चोक्तप्रकारेणाप्रामाण्यज्ञानवत्प्रामाण्यात्यन्ता-भावादिज्ञानानामपि प्रतिबन्धकत्वादभावकूटस्य कारणता कल्प्येऽत्यतिगौरवं ततो वरमेकः प्रामाण्यनिश्चयो हेतुः अप्रामाण्यादङ्कानं तु तद्विघटकमिति । न चोपाधिज्ञानस्याधेयव्यभिचारज्ञानरूपानुमितिप्रतिबन्धकान्तरसंपादनेन अनुमितिप्रतिबन्धकत्वमिवाप्रामाण्यसन्देहस्यापि मानसार्थसन्देहरूपप्रवृत्तिप्रतिबन्धकान्तरसंपादनेन प्रवृत्तिप्रति-बन्धकत्वमिति वाच्यम् । मानसार्थसन्देहस्यापि पीतः शङ्ख इत्यादावुक्तरीत्यार्थनिश्चयसद्भावेन तद्विघटकत्वायोगेन सदर्थत्वरूपप्रामाण्यनिश्चयविघटनेनैव प्रतिबन्धकत्वस्योचितत्वात् । तस्मादसंसर्गाग्रहव्यभिचारज्ञानादेः प्रवृत्त्यनु-

मित्यादिप्रतिबन्धकत्वान्यथानुपपत्त्यैव तद्विघटनीयस्य संसर्गाग्रहव्याप्तिज्ञानादेरनुमित्यादिहेतुत्ववदप्रामाण्यज्ञानस्य प्रवृत्तिप्रतिबन्धकत्वानुपपत्त्यैव तद्विघटनीयस्य प्रामाण्यज्ञानस्य तद्धेतुत्वसिद्धिः । यद्यपि परप्रक्रियया न निश्चित-प्रामाण्यं ज्ञानं प्रवर्तकं, प्रामाण्यलिङ्गज्ञानादिना अर्थज्ञाननाशात् । किन्तु तत्समानविषयकं यत्प्रामाण्यशङ्कारहित-मुत्तरज्ञानान्तरमेव, तथापि मन्मते साक्षिरूपस्य सुखादिज्ञानस्य स्वप्रकाशत्वेन स्वस्यैव स्वप्रामाण्यनिश्चय-रूपत्वात् । घटादिज्ञानस्य तु मनसा ग्राह्यत्वेऽपि तद्ग्राहकेण नित्येन साक्षिणा प्रमाणत्वेनैव ग्रहणात् । तस्य च स्वप्रकाशत्वेनानवस्थाभावात्, निश्चितप्रामाण्यमेव ज्ञानं प्रवर्तकं किञ्च अप्रामाण्यशङ्कानन्तरप्रवृत्तौ प्रामाण्यनिश्चयो हेतुरिति तावदविवादम् । तत्र च निःशङ्कप्रवृत्तित्वमेव कार्यतावच्छेदकं लाघवात् । न तु शङ्कानन्तरनिष्कम्पप्रवृत्तित्वं गौरवात् । तत्र प्रामाण्यनिश्चयोऽप्रामाण्यशङ्कानिरासोपक्षीण इति तु गौरवान्निरस्तम् । अन्यथा व्याप्त्यादिनिश्चयोऽपि व्यभिचारादिशङ्कानिरासोपक्षीणः स्यात् । किञ्च प्रामाण्यनिश्चयस्याप्रामाण्यशङ्कानिवर्तकत्वेनोपक्षये त्वत्पक्षे प्रामाण्यस्यानुमेयत्वेनावश्यकत्वेन प्रामाण्यव्याप्यतया लिङ्गज्ञानेनैवाप्रामाण्यशङ्कानिवृत्तिसंभवात्, प्रामाण्यज्ञानस्य प्रवृत्तावनुपयोगात् तद्ग्रहणचिन्ता व्यर्था । यद्यपि व्यवसायः शङ्कानिवर्तकपरीक्षाकाले नास्ति, तथापि स्मृत्युपनीतस्य व्यवसायस्य प्रामाण्यनिश्चय एव प्रवर्तकः । किञ्च अनुमानेनापि प्रामाण्यनिश्चयस्य प्रवृत्तिं प्रति करणता सिद्धयति । तथाहि विमता प्रवृत्तिः प्रामाण्यनिश्चयसाध्या तत्संशयप्रतिबध्यत्वे सति तद्व्यतिरेकनिश्चयप्रतिबध्यत्वात्, प्रामाण्य-निश्चयो वा प्रवृत्तिहेतुः प्रवृत्तिप्रतिबन्धकसंशयविषयकत्वे सति तत्प्रतिबन्धकनिश्चयविषयप्रतियोगिविषयत्वात् अनुमितौ व्याप्त्यादिवत् । न चाप्रयोजकत्वं अनन्यथासिद्धान्वयव्यतिरेकबलेन प्रामाण्यनिश्चयस्य प्रवृत्तिकारणताया उक्तत्वेन हेतूच्छित्तेरेव बाधकत्वात् । तस्मात्प्रामाण्यनिश्चयस्य प्रवृत्तिकारणत्वे साधकसद्भावात् बाधकाभावाच्च युक्तमुक्तप्रामाण्यमेव स्वीकार्यमित्यादीति ।

कं०रा०— कथमेतदिति । प्रमाणत्रितयावसितस्य ब्रह्मसूत्रप्रामाण्यस्य महत्त्वं कथमित्यर्थः । एकप्रमाण-प्रमितप्रामाण्यापेक्षया अनेकप्रमाणावसितप्रामाण्यस्य स्वरूपेऽतिशयाभावेऽपि अतिशयिताऽविशङ्कक्षिप्रप्रवृत्ति-जनकत्वात् तत्तोऽतिशयत्वेनोच्यत इत्यभिप्रेत्य परिहरति इत्थमिति ।

वा०चं०— कथमेतदिति । प्रामाण्यज्ञापकत्रैविध्यात्प्रामाण्ये महत्त्वं नोपपन्नमित्यर्थः ॥

वा०र०— मूलस्थेतत्पदार्थं वदन्नेव कथंशब्द आक्षेपार्थ इत्याश्रित्य व्याचष्टे प्रामाण्येति । मूले अधिकं प्रमीयत इति । प्रमाणत्वेन ज्ञायत इत्यर्थः । स्वकार्यातिशयेनेति । क्षिप्रप्रवृत्तिरूपस्वकार्यातिशयेनेत्यर्थः ।

स०व्र०— आप्तवाक्यत्वादिप्रमाणानां बाहुल्यात् 'प्रामाण्यमनुत्तममि'त्युक्तं, तदनुपपन्नमिति शङ्कते ननु प्रमाणैकत्वानेकत्वयोरिति ॥ इत्थमिति । एवं चाप्तवाक्यतया सिद्धेऽपि प्रामाण्ये, सर्वोत्तमप्रामाण्यसिद्धये श्रुतियुक्तिसंवादद्वयम् इत्यनेकप्रमाणानां निःशङ्कप्रवृत्तिहेतुत्वात्सार्थक्यम् । कर्ममीमांसासूत्रापेक्षया ब्रह्मसूत्राणा-मविशङ्कप्रवृत्तिलक्षणकार्यातिशयेन, धर्माद्यपेक्षयातिशयितविषयेण ब्रह्मणा, स्वर्गाद्यपेक्षयातिशयितेन फलेन मोक्षेण अतिशयवत्त्वात्; प्रामाण्यस्यापि त्रिविधातिशयवत्त्वं 'प्रामाण्यं त्रिविधं महदि'त्यनेनोक्तमिति भावः ॥

कुण्डल०— **कथमेतदिति** । ब्रह्मसूत्रप्रामाण्यस्य प्रमाणत्रितयावसितत्वमात्रेण कथं महत्त्वमित्यर्थः । प्रमाणैकत्वानेकत्वयोः प्रमेयस्यैकरूप्येऽप्यनेकप्रमाणावसितप्रामाण्यस्य विशङ्कक्षिप्रप्रवृत्तिलक्षणकार्यातिशयात्कारणे प्रामाण्ये महत्त्वोक्तिरित्याह **इत्थमित्यादिना** ।

विद्व०— ननु प्रामाण्यज्ञापकस्यैकत्वे बहुत्वे वा तज्ज्ञाप्यप्रामाण्यस्यैकप्रकारत्वात् ज्ञाप्यातिशयमात्रेण प्रामाण्यातिशयः कथं इति शङ्कते **नन्विति** । न हि ज्ञापकातिशयेन प्रामाण्यातिशय इत्युच्यते किन्तु बहुप्रमाण-संवादश्च दार्ढ्यहेतुरेवेत्युक्तरीत्या प्रामाण्यनिश्चयदार्ढ्यात् क्षिप्रप्रवृत्तिवशादेव प्रामाण्यातिशया इत्युच्यत इति परिहरति **इत्थमिति** ।

काशी०— यत एवमित्यादिनोक्तमाक्षिपति **नन्विति** । **प्रमेयस्य** प्रामाण्यस्य । **तादवस्थ्यात्** एकरूप-त्वात् । एकप्रमाणावसितप्रामाण्यादनेकप्रमाणावसितप्रामाण्ये विशेषाभावादिति यावत् । कथमेतत्प्रमाणत्रया-वसितत्वेन महत्त्वसाधनमित्यर्थः । समाधत्ते **इत्थमिति** । अनेन प्रकारेणेत्यर्थः । प्रामाण्ये स्वतो महत्त्वाभावेऽपि बहुप्रमाणावसिते कार्यातिशयप्रयुक्तमहत्त्वसत्त्वात्तत्साधनमुपपन्नमिति समाधानप्रकारं स्फुटयितुमाह **न हीति** । प्रमाणत्वेनानिश्चितमिति मात्रार्थः । अन्यथा प्रमाणत्वसन्देहेऽपि निष्कम्पप्रवृत्त्यापत्तेरिति भावः । **तच्चेति** । मुमुक्षो-र्मोक्षजनकतत्त्वज्ञानाय शास्त्रे प्रवृत्तिः । तत्र चाप्रामाण्यशङ्कायामविशङ्कप्रवृत्त्यनुपपत्तेरस्तन्निवृत्तये लिङ्गविशेषानुसरणम् । तत्रैकलिङ्गेनानुमितौ प्रामाण्यसंशये द्वितीयलिङ्गेनानुमितौ प्रामाण्यसंभावना तृतीयलिङ्गेनानुमितौ तु प्रामाण्यनिश्चय एव भवतीत्यप्रामाण्यशङ्कानिवृत्त्या निःशङ्कप्रवृत्तिरिति भावः । **तत इति** । बहुप्रमाणावसितप्रामाण्यस्य क्षिप्राविशङ्क-प्रवृत्तिहेतुत्वादित्यर्थः । **स्वकार्येति** । क्षिप्राविशङ्कप्रवृत्तिहेतुत्वनिमित्तेनेत्यर्थः ।

गूढ०— नन्वेकेन वाऽनेकेन वा प्रामाण्ये प्रसाधितेऽपि प्रमेये विशेषाभावात् त्रेधाप्रामाण्येऽप्यनुत्तमत्वं कुत इति शङ्कते **नन्विति** । **ततः प्रामाण्यमेव स्वकार्यातिशयवशेनेति** । नन्वेतावता हि प्रामाण्यज्ञानस्य निःशङ्क-प्रवृत्तिं प्रति कारणत्वमुक्तं भवेत् । न चैतदुज्यते । तथाहि प्रामाण्यज्ञानस्य हि किं प्रवृत्तित्वावच्छेदेन कारणत्वं उत बहुवित्तव्ययायाससाध्यप्रवृत्तित्वावच्छेदेन । नाद्यः । सन्देहादपि प्रवृत्तेर्जायमानत्वेन व्यतिरेकव्यभिचारात् । न द्वितीयः । आवश्यकार्थनिश्चयादेव बहुवित्तव्ययायाससाध्यप्रवृत्तेरप्युपपत्तौ प्रामाण्यनिश्चयस्यानुपयोगात् । स्वसमानविशेष्यकस्वसमानप्रकारकनिश्चयस्यैव प्रवृत्तिजनकतानियमेनार्थनिश्चयस्य च तादृशत्वेन भिन्नविषयक-प्रामाण्यनिश्चयस्य तदसंभवात् । अन्वयव्यतिरेकाभ्यां व्यभिचाराच्च । न च बहुवित्तव्ययायाससाध्यप्रवृत्तौ न व्यभिचार इति वाच्यम् । तत्राप्यर्थनिश्चयार्थमपेक्षितत्वेनान्यथासिद्धत्वात् । तस्मादयुक्तमेतदिति । **मैवम्** । अर्थनिश्चयस्य प्रवृत्तिं प्रति कारणताया असंभवात् । तथाहि । यदि हि अर्थनिश्चयः प्रवृत्तिं प्रति कारणं तर्हि पीतः शङ्ख इत्यादिनिश्चये सति पीतार्थिनोऽपि प्रवृत्त्यापत्तिः । न चैतत् ज्ञानं न निश्चयरूपमिति वाच्यम् । शङ्खः पीतत्वेनैव भातीत्यनुभवेन एकाकारनियतत्वेन च कोट्यन्तरप्रत्यायकनवेत्याद्यप्रयोगेण च संशयरूपताया वक्तुमशक्यत्वात् । तथाच व्यभिचारा-न्नार्थनिश्चयस्य प्रवृत्तिजनकत्वं भिन्नविषयत्वेऽपि प्रामाण्यनिश्चयस्य व्याप्तिज्ञानादेरनुमितिं प्रतीव जनकत्वसंभवात् ।

न च सत्यप्यर्थनिश्चये अप्रामाण्यज्ञानाभावरूपसहकार्यभावादप्रवृत्तिरिति वाच्यम् । तथा सत्यप्रामाण्यस्यानुमेयत्वेन तदननुमितिदशायां पीतार्थिनः प्रवृत्त्यापत्तेः । किञ्चाप्रामाण्याज्ञानात्प्रवृत्तौ प्रामाण्यज्ञानान्निवृत्तिः किं न स्यात् । अपि चैतदभाववति तत्प्रकारकत्वरूपाप्रामाण्यशङ्काद्यभावस्यानेकाभावघटितत्वेन गुरुत्वात्, प्रामाण्यनिश्चयस्य तदघटितत्वेन लघुत्वात् । प्रामाण्यशङ्काद्यभावायत्ततद्वतितत्प्रकारकज्ञानत्वरूपप्रामाण्यात्यन्ताभावशङ्काद्यभावतद्वच्चाप्यदोषजन्यत्वादिशङ्काद्यभावयोरपि हेतुत्वेनाभावानामनेकत्वात् प्रामाण्यनिश्चयस्य चैकत्वात् तस्यैव हेतुत्वमुचितम् । न चाभावानां प्रामाण्यनिश्चयविरोध्यभावत्वेनैकत्वमिति वाच्यम् । तथा सत्यावश्यकत्वाल्लाघवाच्च प्रामाण्यनिश्चयस्यैव सहकारिताया उचितत्वात् । न चाप्रामाण्यज्ञानमप्यावश्यकं, अन्यथा अप्रमात्वेन ज्ञातस्यापि प्रामाण्यनिश्चयस्य प्रवर्तकत्वापत्तेरिति वाच्यम् । मया तस्यापि निश्चितप्रामाण्यस्यैव प्रवर्तकत्वाङ्गीकारात् । न च कृताकृतयोः कृते कार्यसंप्रत्यय इति न्यायेन कल्प्यप्रामाण्यनिश्चयापेक्षया कृताप्रामाण्यशङ्काद्यभाव एव सहकारीति वाच्यम् । गृहीतप्रामाण्यसमानविषयकज्ञानान्तरे निश्चयप्रवृत्तिजनकज्ञानमात्रे च सामग्रीसत्त्वेन तस्यापि कृतत्वात् । फलमुखगौरवस्य चादोषत्वात् । किञ्चाप्रामाण्यशङ्काशून्यज्ञानस्य प्रवर्तकत्वे शङ्काया धर्मिज्ञानसाध्यत्वाद् धर्मिज्ञानकाले प्रामाण्यशङ्काया अभावात् प्रवृत्त्यापत्तिः । न च संशयं प्रति धर्मिज्ञानस्य कारणतैव नेति वाच्यम् । तथा सति तुरगादौ वेगेन गच्छतः पनसत्वादिकोटिस्मृतिमतोऽनेकवृक्षेन्द्रियसन्निकर्षेऽपि यस्यैव वृक्षस्य ज्ञानं तत्रैव पनसत्वादिसन्देहो नान्यत्रेत्येवं धर्मिनियमो न स्यात् । ननु तद्धेतोरेवेति न्यायेन धर्मिज्ञाननियामकादेव संशयोपपत्तौ किमर्थं धर्मिज्ञानस्य कारणत्वमास्थेयम् । न च विषयमहात्म्यादिरूपत्वेन तेषामननुगतत्वादनुगतं धर्मिज्ञानमेव कारणमिति वाच्यम् । एवं सति विशिष्टज्ञानमात्र एव धर्मिज्ञानस्य कारणतापत्तेः । यदि चावश्यकत्वाद्विशेष्यभानसामग्रीत्वेनानुगमाच्च विशेष्येन्द्रियसन्निकर्षादेव तत्र हेतुत्वम् । तर्हि प्रकृतेऽपि आवश्यकत्वाद्धर्मिज्ञानजनकसामग्रीत्वेनानुगमाच्च विषयमाहात्म्यादेव हेतुत्वमस्तु । किं धर्मिज्ञानेनेति चेन्न । संशयस्य धर्मिज्ञानानपेक्षत्वे संशये उत्कटत्वं न स्यात् । उत्कटत्वं हि यन्निष्ठधर्मत्वस्य यत्कोट्या सह भूयःसहचार उपलब्धः यत्र वा धर्मिणि यद्धर्मसहचरितानेकधर्मोपलंभस्तत्त्वम् । न च धर्म्यनुपलब्धौ तादृशमुत्कटत्वं संभवति । न चैवमपि तादृशसंशयविषयविशेषे धर्मिज्ञानस्य हेतुत्वे संशयसामान्ये हेतुत्वं न स्यादिति वाच्यम् । यद्विशेषयोरिति न्यायेन तत्संभवात् । ननु स्वसहचरितानेकधर्मिसहिता या कोटिर्यत्र भासते तत्र तस्याः कोटेरुत्कटत्वं न तूक्तमेवेति नियमः । एवं चैतादृशउत्कटकोटिकसन्देहो न धर्मिज्ञानकारणतामानयति । यस्याः कोटेः सहचरितभूयोधर्मसहितायाः स्मृताया धर्मिण्यसंसर्गाग्रहानन्तरं संशयस्तत्र तत्कोटेरुत्कटत्वं यथाऽयं प्रायेण पुरुष एवेति । यत्र तु कोट्योः केवलं स्मृतयोरसंसर्गाग्रहस्तुल्यधर्मसहितयोर्वा तत्र समकोटिकः संशयः । यथायं स्थाणुर्वा पुरुषो वेति । तस्मान्नोत्कटकोटिकसंशायाद्यनुरोधेनापि धर्मिज्ञानकारणतेति । मैवम् । अत्र हि न तावत्संशयत्वं कार्यतावच्छेदकमेव नेति वक्तुं शक्यम् । उक्तरीत्या कार्यतावच्छेदकत्वस्य स्थितत्वात् । तथाच कोट्योर्विरोधज्ञानत्वेन कारणतायाः संशयत्वेन कार्यताया आगतं धर्मिज्ञानस्य कारणत्वम् । तथाहि । न तावत्कोट्योः सार्वत्रिकविरोधो ज्ञातव्यः । भूतत्वमूर्तत्वे पृथिव्यादौ सहचरिते इति जानतो नभसि न सहचरिते इति ज्ञाने सति नभो मूर्तं भूतं वेति संशयाभावापत्तेः । नापि क्वाचित्को विरोधः केवलं आकाशे मनसि च भूतत्वमूर्तत्वे विरुद्धे इति ज्ञाने सति जलं भूतं मूर्तं वेति

संशयापत्तेः । किन्तु प्रकृतधर्मिणि विरोधज्ञानं संशयकारणं, तच्च न प्रकृतधर्मिज्ञानं विनेति आगतं धर्मिज्ञानस्य कारणत्वम् । तथाचाप्रामाण्यशङ्कशून्यस्यार्थज्ञानस्य प्रवृत्तिकारणत्वे धर्मिज्ञानकाले तस्य सत्त्वाद्युक्तं प्रवृत्त्यापादनमिति । न च तद्धेतोरेवास्तु किं तेनेति न्यायेन तन्निश्चयसामग्रीत एवास्तु प्रवृत्तिरिति वाच्यम् । एवं तर्हि सहचारदर्शनवतो व्यभिचाराज्ञानादेवानुमित्युपपत्तौ तत्र व्याप्तिज्ञानस्य पक्षज्ञानवतः पक्षे लिङ्गानां संसर्गाग्रहादेव अनुमित्युपपत्तौ पक्षे लिङ्गज्ञानस्य भेदाग्रहादेव प्रवृत्त्युपपत्तौ तत्र विशिष्टज्ञानस्य अर्थेन्द्रियादिसंबन्धे अर्थासार्वज्ञादेव प्रवृत्त्युपपत्तौ अर्थनिश्चयस्य च हेतुत्वं न स्यात् । न चार्थनिश्चय एव प्रवृत्तिहेतुः अप्रमात्वेनाज्ञातत्वादिकं दण्डगतदार्ढ्यादिवत्कारणतावच्छेदकं, तदभावात् पीत इति ज्ञानान्न प्रवृत्तिरिति वाच्यम् । लाघवेन प्रमात्वेन ज्ञानत्वस्यैव तदवच्छेदकत्वौचित्यात् । अन्यथा अनुमित्यादौ सहचारादिज्ञानमेव हेतुः । व्यभिचारित्वादिनाऽज्ञातत्वं कारणतावच्छेदकमिति स्यात् । न चार्थनिश्चय एव प्रवर्तकः पीतः शङ्ख इत्यादौ त्वप्रामाण्यादिज्ञानं प्रतिबन्धकमिति वाच्यम् । अप्रामाण्यादिज्ञानस्य हि व्यभिचारादिज्ञानवज्जनकीभूतज्ञानविघटकत्वेन वा प्रतिबन्धकत्वं उत बाधादिवत् ग्राह्याभावावगाहित्वेन । नाद्यः । तथा सत्यप्रामाण्यादिज्ञानस्यापि प्रवृत्तिहेतुभूतज्ञानविघटकत्वेनैव तत्प्रतिबन्धकतेति वक्तव्ये अर्थनिश्चयस्य पीतः शङ्ख इत्यादौ सत्त्वेन तद्विघटनासंभवात् तेन विघटनीयस्य प्रामाण्यज्ञानस्य हेतुत्वसिद्धेः । ज्ञानं हि ज्ञानान्तरस्य विषयद्वारैव विरोधीति स्वविषयविरुद्धविषयकमेव ज्ञानं विघटयति । अन्यथा व्यभिचारादिज्ञानमपि स्वाभावरूपहेतुविघटकतया अनुमित्यादिप्रतिबन्धकं वा सहचारादिज्ञानगतशक्तिविघटकत्वेन प्रतिबन्धकं वा स्यात् न तु व्याप्त्यादिज्ञानविघटकम् । न द्वितीयः । ज्ञाननिष्ठाप्रामाण्यविषयकज्ञानस्य घटविषयकप्रवृत्तौ साक्षाद्विरोधित्वाभावेन ग्राह्याभावावगाहित्वेनापि प्रतिबन्धकत्वस्य वक्तुमशक्यत्वात् । किञ्चोक्तप्रकारेणाप्रामाण्यज्ञानवत् प्रामाण्यात्यन्ताभावादिज्ञानानामपि प्रतिबन्धकत्वादभावकूटस्य कारणताकल्प्येऽत्यनिगौरवं, ततो वरमेकः प्रामाण्यनिश्चयो हेतुः अप्रामाण्यज्ञानं तु तद्विघटकमिति । न चोपाधिज्ञानस्याधेयव्यभिचारज्ञानरूपानुमितिप्रतिबन्धकान्तरसंपादनेनानुमितिप्रतिबन्धकत्वमिवाप्रामाण्यसन्देहस्यापि मानसार्थसन्देहरूपप्रवृत्तिप्रतिबन्धकान्तरसंपादनेन प्रवृत्तिप्रतिबन्धकत्वमिति वाच्यम् । मानसार्थसन्देहस्यापि पीतः शङ्ख इत्यादावुक्तरीत्या अर्थनिश्चयस्य सद्भावेन तद्विघटकत्वायोगेन सदर्थत्वरूपप्रामाण्यनिश्चयविघटनेनैव प्रतिबन्धकत्वस्यौचितत्वात् । तस्मादसंसर्गाग्रहव्यभिचारज्ञानादेः प्रवृत्त्यनुमित्यादिप्रतिबन्धकत्वान्यथानुपपत्त्यैव तद्विघटनीयस्य संसर्गाग्रहव्याप्तिज्ञानादेरनुमित्यादिहेतुत्ववदप्रामाण्यज्ञानस्य प्रवृत्तिप्रतिबन्धकत्वानुपपत्त्यैव तद्विघटनीयस्य प्रामाण्यज्ञानस्य तद्धेतुत्वसिद्धिः । यद्यपि परक्रियया न निश्चितप्रामाण्यं ज्ञानं प्रवर्तकम् । प्रामाण्यलिङ्गज्ञानादिनार्थज्ञाननाशात् । किन्तु तत्समानविषयकं यत् प्रामाण्यशङ्कारहितमुत्तरज्ञानान्तरमेव, तथापि मन्मते साक्षिरूपस्य सुखादिज्ञानस्य स्वप्रकाशत्वेन स्वस्यैव स्वप्रामाण्यनिश्चयरूपत्वात् । घटादिज्ञानस्य तु पर(मनसा)ग्राह्यत्वेऽपि तद्ग्राहकेण नित्येन साक्षिणा प्रमाणत्वेनैव ग्रहणात् । तस्य च स्वप्रकाशत्वेनानवस्थाभावात्, निश्चितप्रामाण्यमेव ज्ञानं प्रवर्तकम् । किञ्चाप्रामाण्यशङ्कानन्तरप्रवृत्तौ प्रामाण्यनिश्चयो हेतुरिति तावदविवादम् । तत्र च निःशङ्कवृत्तित्वमेव कार्यतावच्छेदकं लाघवात् । न तु शङ्कानन्तरनिष्कम्पप्रवृत्तित्वं गौरवात् । तत्र प्रामाण्यनिश्चयोऽप्रामाण्यशङ्कानिरासोपक्षीण इति तु गौरवान्निरस्तम् । अन्यथाप्रामाण्यनिश्चयोऽपि व्यभिचारादिशङ्कानिरासोपक्षीणः स्यात् । किञ्च प्रामाण्यनिश्चयस्याप्रामाण्यशङ्का-

निवर्तकत्वेनोपक्षये त्वत्पक्षे प्रामाण्यस्यानुमेयत्वेनावश्यकत्वेन प्रामाण्यव्याप्यतया लिङ्गज्ञानेनैवाप्रामाण्यशङ्का-निवृत्तिसंभवात् । प्रामाण्यज्ञानस्य प्रवृत्तावनुपयोगात् । तद्ग्रहणचिन्ता व्यर्था । यद्यपि व्यवसायः शङ्कानिवर्तक-परीक्षाकाले नास्ति तथापि स्मृत्युपनीतस्य व्यवसायस्य प्रामाण्यनिश्चय एव प्रवर्तकः । किञ्चानुमानेनापि प्रामाण्यनिश्चयस्य प्रवृत्तिकारणता सिध्यति । तथाहि । विमता प्रवृत्तिः प्रामाण्यनिश्चयसाध्या तत्संशयप्रतिबध्यत्वे सति तद्व्यतिरेकनिश्चयप्रतिबध्यत्वात् । प्रामाण्यनिश्चयो वा प्रवृत्तिहेतुः प्रवृत्तिप्रतिबन्धकसंशयविषयकत्वे सति तत्प्रतिबन्धकनिश्चयविषयप्रतियोगिविषयत्वात् अनुमितौ व्याप्त्यादिवत् । न चाऽप्रयोजकत्वम् । अनन्यथासिद्धा-वन्वयव्यतिरेकबलेन प्रामाण्यनिश्चयस्य प्रवृत्तिकारणताया उक्तत्वेन हेतूच्छित्तेरेव बाधकत्वात् । तस्मात्प्रामाण्य-निश्चयस्य प्रवृत्तिकारणत्वे साधकसद्भावात् बाधकाभावाच्च युक्तमुक्तप्रामाण्यमेव स्वीकार्यमित्यादीति ।

प्रदीपः— इत्थमिति । एवं चाप्तवाक्यतया सिद्धेऽपि प्रामाण्ये सर्वोत्तमप्रामाण्यसिद्धये श्रुतियुक्तिसंवाद-द्वयमित्यनेकप्रमाणानां निःशङ्कप्रवृत्तिहेतुत्वात् सार्थक्यम् ।

७९ सु०— एवं विषयप्रयोजनातिशयवशेनाप्यतिशयो द्रष्टव्यः ।

परि०— ब्रह्मसूत्रपदप्रयोगसूचितं तदर्थत इति पदप्रयोगसूचितं च कार्यातिशयमप्याह एवं विषयेति । यथा निःशङ्कक्षिप्रप्रवृत्तिजनकत्वेनातिशयः तथा कर्मदेवतादितोऽपि प्रागुक्तदिशा सर्वदोष-विहीनत्वादिगुणविशिष्टपरब्रह्माख्यातिशयितविषयप्रतिपादनेन अनल्पस्थिरमोक्षाख्यातिशयितप्रयोजन-कत्वेन चैतच्छास्त्रप्रामाण्यस्यातिशयो द्रष्टव्य इत्यर्थः ।

आनन्दः— एवमिति । सूत्रविषयस्य तत्प्रयोजनस्य चातिशयितत्वादतिशय इति भावः ।

कं०रा०— विषयेति । ब्रह्मरूपविषयातिशयेन मोक्षरूपप्रयोजनातिशयेन च धर्मविषयकस्वर्गादिप्रयोजक-जैमिनिसूत्रप्रामाण्यापेक्षया ब्रह्मसूत्रप्रामाण्यस्यातिशयो द्रष्टव्य इत्यर्थः ।

वा०चं०— न केवलं साक्षाद्भाष्यकारोक्तो लिङ्गत्रयावसितत्वप्रयुक्तस्वकार्यातिशयवशादेव प्रामाण्ये-ऽतिशयः अपि तु 'फलवत्त्वे सति ज्ञानसाधनत्वो'पाधिना यथास्थितज्ञेयविषयीकारित्वरूपवाक्यप्रामाण्यस्य प्रकृते सर्वोत्तमज्ञेयविषयीकारित्वरूपतया, सर्वोत्तमफलसाधनज्ञानसाधनत्वोपाधिकत्वात् चातिशयो भाष्यकाराभिप्रेतो द्रष्टव्य इत्याह एवमिति । भाष्यमुपलक्षणमिति अभिप्रेत्य वाह एवमिति ।

वा०र०— विषयप्रयोजनातिशयेन प्रामाण्ये कथमतिशयः प्रामाण्यस्य निर्विषयत्वान्निष्प्रयोजनत्वाच्चेत्यतः साधारणवाक्यप्रामाण्यस्थितिं दर्शयन् वाक्यगतप्रामाण्यस्वरूपमात्रस्य प्रकृतशास्त्रसंबन्धेनातिशयलाभं च दर्शयन्

प्रामाण्यशरीरान्तर्भूतविषयप्रयोजने एवात्र विवक्षिते इति च सूचयति **फलवत्त्वे सतीति** । ज्ञेयविषयकारित्वरूपं प्रामाण्यं साक्षाद्भाने। करणे तु साक्षाद् ज्ञेयविषयीकारिज्ञानसाधनत्वेनेत्युक्तावपि प्रत्यक्षानुमानयोरेव ज्ञेयविषयीकारिज्ञानसाधनत्वमात्रं यथावस्थितं ज्ञेयविषयीकारितायामुपाधिः वाक्यगतज्ञेयविषयीकारित्वे तु याथार्थ्यमेव मानत्वमपि वाक्यं प्रयोजकम् । मानत्वमेतीति युक्तिपादे वक्ष्यमाणत्वात्फलवत्त्वे सति यथावस्थितज्ञेयविषयीकारिज्ञानसाधनत्वरूपं विशिष्टमेवोपाधिरित्याशयेन सोपाधिकं वाक्यप्रामाण्यं दर्शितं प्रामाण्यस्येत्यन्तेन । अत्र विषयप्रयोजनातिशयोपपादकत्वाभावाभिप्रायेण **यथार्थज्ञानेति** यथार्थप्रयोगाभावो न तूपाध्यनन्तर्गतत्वादिति न दोषः। तथा च फलवत्त्वे सति ज्ञानजनकत्वरूपे। य उपाधिर्निमित्तं तेन निमित्तेन यद्यथावस्थितज्ञेयविषयीकारित्वं तद्रूपं यद्वाक्यप्रामाण्यं तस्येति योजना। उपाधिकीर्तनाभावे यथावस्थितेत्यादिवाक्यप्रामाण्यस्य प्रकृतशास्त्रसंबन्धेन सर्वोत्तमज्ञेयविषयीकारित्वरूपतामात्रप्राप्त्या विषयनिमित्तकातिशयप्राप्तावपि प्रयोजननिमित्तातिशयो न प्राप्नोतीत्यतस्तत्प्राप्तये उपाधिकीर्तनम्। तदुपाधौ च **फलवत्त्वे सतीत्यादिरूपोक्तेः** फलवज्ज्ञानसाधनत्वे पर्यवसानमभिप्रेत्य सर्वोत्तमफलसाधनज्ञानसाधनत्वोपाधिकत्वाच्चेत्युक्तिः। उक्तरूपज्ञानसाधनत्वरूपो य उपाधिस्तद्वत्त्वाच्चेत्यर्थः। अनेन प्रामाण्यस्वरूपमात्रस्य सर्वोत्तमविषयोपेतप्रकृतशास्त्रसंबन्धे **सर्वोत्तमज्ञेयविषयीकारित्वरूपत्वप्राप्त्या** तादृशविषयप्रयुक्तः प्रामाण्येऽप्यतिशयः प्राप्तः । **तथा मूलवज्ज्ञानस्य साधनत्वोपाधेः** सर्वोत्तमफलोपेतप्रकृतशास्त्रसंबन्धे सर्वोत्तमफलसाधनज्ञानस्य साधनत्वरूपोपाधिमत्त्वप्राप्त्या तादृशप्रयोजनप्रयुक्तोऽपि प्रामाण्येऽतिशयः प्राप्तः । स चायमतिशयो मुखतोऽनुक्तावपि क्षिप्रप्रवृत्तिरूपकार्यातिशयहेतुकप्रामाण्यमहत्त्वरूपतदतिशयवद्भाष्यकाराभिप्रेतत्वादिह प्रामाण्यमहत्त्वरूपो द्रष्टव्य इत्यर्थः। उक्ताभिप्रायज्ञापकाभावादभिप्रेतोऽतिऽशयो द्रष्टव्य इति वाक्ययोजना न स्वरसेति मन्वानः प्रकारान्तरेण मूलं योजयति **भाष्यमुपलक्षणमिति**। अत्र वेत्यस्य यद्वेत्यर्थः। तथा यद्वा भाष्यमिति योजना । प्रामाण्यकार्यातिशयेन प्रामाण्येऽतिशयप्रतिपादकभाष्यमुक्तरीत्या विषयप्रयोजनातिशयनिमित्तकप्रामाण्यगतातिशयस्याप्युपलक्षणया प्रतिपादकमित्यभिप्रेत्येत्यर्थः ।

कुण्डल०— न केवलं ब्रह्मसूत्राणामतिशयितप्रामाण्योपेतत्वादेवातिशयः किन्तु कर्ममीमांसादिविषयादितोऽप्यतिशयितब्रह्ममोक्षादिलक्षणविषयप्रयोजनवत्त्वाच्चातिशय इत्याह **एवं विषयेति** ।

काशी०— ब्रह्मसूत्रपदेन तदर्थत इत्यनेन च सूचितमतिशयान्तरमप्याह **एवमिति**। विष्णवाख्यविशिष्टवस्तुविषयकप्रमाघटितत्वेन मोक्षाख्यविशिष्टप्रयोजनकप्रमाघटितत्वेन च निमित्तेन प्रामाण्यस्यातिशयोक्तिरित्यर्थः। यद्वा । यथा प्रामाण्यस्य बहुप्रमाणावसितत्वेन कार्यातिशयस्तथा विषयप्रयोजनातिशयेनापीति क्षिप्रप्रवृत्तिहेतुत्वे निमित्तान्तरोक्तिरिति ज्ञातव्यम् ।

गूढ०— एवमिति। सूत्रविषयस्य तत्प्रयोजनस्यातिशयितत्वादतिशय इति भावः।

॥ अनुत्तमप्रामाण्यसाधनोपसंहारः ॥

८० सु०— तदेवं श्रुत्यनुमानाभ्यामिदमेव शास्त्रं प्रमाणतमम्, नान्यदेतादृशमस्ती-त्युपसंहरति **अत इति** ।

अनु०— अतो नैतादृशं किञ्चित्प्रमाणतममिष्यते ।

इष्यते प्रामाणिकैरिति शेषः । तथा चान्यपरिहारेणास्यैव व्याख्यानं युक्तमिति हृदयम् ।

परि०— एकधाऽन्यत्र सर्वत्र इत्युक्तमात्रोपसंहारपरत्वभ्रमनिरासाय व्याकुर्वन्नेवावतारयति तदेवमित्यादिना । अत इत्यस्यार्थः **श्रुत्यनुमानाभ्यामिति** । परविद्याख्यं चक्रे शास्त्रमित्यत्रोक्तया 'द्वे विद्ये वेदितव्ये' इत्यादिश्रुत्या । आप्तवाक्यत्वाद्यनुमानत्रयावगतप्रामाण्यकत्वरूपानुमानेन चेत्यर्थः । शास्त्रपदमनुवर्त्य तेन प्रमाणतमपदस्य अन्वयमुपेत्योक्तम् **इदमेवेत्यादि** । प्रमाणतमत्वोक्तेः क उपयोग इत्यतः प्रागुक्तशङ्कानिरासः फलमित्याह **तथा चेति** । गीताभाष्ये प्रथमे 'वेदादपि परं चक्रे पञ्चमं वेदमुत्तमम्' ॥

यादु०— तदेवं श्रुत्यनुमानाभ्यामिति । श्रुतिः 'परविद्याख्यमि'त्यत्रोक्ता ॥

आनन्दः— अस्त्वस्यानुत्तमं प्रामाण्यं तथापि प्रकृते किमायातमित्यत आह **तथा चेति** ।

श्रीनिधि०— **श्रुत्यनुमानाभ्यामिति** । अत्र श्रुतिः 'द्वे विद्ये वेदितव्ये परा चैवापरा च' इत्यत्रत्य-'परविद्याश्रुति'र्ज्ञेया ।

वा०चं०— ननु 'अत' इत्युत्तरवाक्यस्य पूर्वोक्तार्थप्रतिपादकत्वात्पौनरुक्त्यमित्यतः " 'परमाख्यविद्ये'-त्यारभ्य प्रकृतप्रमेयो''पसंहारपरत्वान्न वैयर्थ्यमित्याह **तदेवमिति** ॥ 'मये'त्यध्याहारस्य स्वतःसिद्धत्वेऽपि, प्रमाणतमत्वेन स्वाङ्गीकारमात्रस्यानुपयुक्तत्वात्सर्वाङ्गीकारस्य च बाधितत्वात् प्रमाणानां चानुपदमेवोपपादितत्वात्, 'प्रामाणिकैरि'त्येव शेषपूरणं युक्तमित्यभिप्रेत्याह **इष्यत इति** ॥ परमप्रमेयानुपसंहारेणोपसंहारभाष्यन्यूनतां परिहर्तुं भाष्यकाराभिप्रेतं परमप्रमेयं स्वयं दर्शयति **तथा चेति** ॥

वा०र०— मूले **श्रुत्यनुमानाभ्यामित्यत्र श्रुतिः परमाख्यविद्येत्यनेन** सूचिता द्वे विद्ये इत्यादिका । कथं तर्हि प्रामाणिकैरित्यपि शेषलाभ इत्यत उक्तं **प्रमाणानां चेति** । आप्तवाक्यत्वादिरूपाणां प्रमाणानां चाव्यवधानेन पूर्वमुपपादितत्वादित्यर्थः । **परमप्रमेयेति** । परमाख्यविद्येत्यनेन भाष्येणेतरपरित्यागेनास्यैव व्याख्यानायोगशङ्का-

वारणाय सर्वोत्तमप्रामाण्यस्येहैव सत्त्वादितरपरित्यागेनास्यैव व्याख्यानं युक्तमिति पूर्वमभिधानात्तदुपसंहारस्याप्यावश्यकत्वमिति भावः।

स०ब्र०— श्रुत्यनुमानाभ्यामिति। श्रुतिः परविद्याऽख्या। अनुमानम् आप्तवाक्यत्वादि।

कुण्डल०— श्रुतीति। 'अथ परा यया तदक्षरमधिगम्यत' इत्यादिप्रागुदाहृतश्रुतीत्यर्थः।

विद्व०— श्रुत्यनुमानाभ्यामिति। परमाख्यविद्यामित्यत्रोक्ताथर्वणीश्रुतिः युक्तिरामिमूलत्वादिरूपा।

चषक:— श्रुत्यनुमानाभ्यामिति। श्रुतिः परविद्याख्यमित्यत्राभिहिता॥

काशी०— पौनरुक्त्यशङ्कानिरासायाह तदेवमिति। श्रुतीति। आथर्वणश्रुत्याऽऽप्तवाक्यत्वादिलिङ्गत्रयावसितत्वानुमानेन चेत्यर्थः। **प्रामाणिकैरिति। स्वाङ्गीकारोक्तेरनुपयुक्तत्वान्मयेति नोक्तम्।** एतावता सिद्धमाह **तथा चेति।**

गूढ०— अस्त्वस्यानुत्तमं प्रामाण्यं **तथापि** प्रकृते किमायातमित्यत आह **तथा चेति।**

८१ सु०— ननु भारतं सर्वशास्त्रेषूत्तममुच्यते। सत्यम्। विचार्येषु शास्त्रेषु तदित्यविरोधः।

परि०— भारतमिति। 'भारतं सर्वशास्त्रेषु भारते गीतिका वरा' इत्यादिनोक्तभारतोत्तमत्वविरोधमाशङ्क्य निराह नन्विति।

आनन्दः— नन्वस्य सर्वशास्त्रोत्तमत्वे भारतस्य सर्वोत्तमत्वप्रतिपादकवचनविरोध इति शङ्कते **नन्विति। विचार्येष्विति।** निर्णेयेषु भारतस्य निर्णायकेषु चास्योत्तमत्वमिति न कश्चिद्विरोध इति भावः।

कं०रा०— विचार्येष्विति। निर्णेतव्यार्थेषु शास्त्रेषु भारतस्योत्तमत्वेऽपि निर्णायकेषु ब्रह्मसूत्राणामेवोत्तमत्वमुच्यमानं न विरुद्धमिति भावः।

श्रीनिधि०— विचार्येष्विति। ननु 'निर्णयस्सर्वशास्त्राणां भारतं परिकीर्तितम्' इति भारतस्यापि निर्णायकत्वमुच्यते। सत्यम्। यथा ब्रह्मसूत्राणां न तथा तस्य। भारते दृष्टान्तप्रदर्शनमुखेन सूत्रेषु पुनः प्रतिवेदं प्रतिशाखं प्रतीकग्रहणपुरस्सरमुपक्रमादिचिन्तनेनेति स्मृत्यधिकरणे वेदवेदानुसारि पौरुषेयग्रन्थप्रामाण्यस्य विचारितत्वात् भारतादीनां विचार्यत्वमिति ज्ञेयम्। यदि प्रामाण्ये सत्येवारम्भणीयता तर्हि सूत्रकृता कुतो न प्रामाण्यं व्युत्पादितम्।

वा०चं०— ननु श्रुत्यनुमानाभ्यामस्यैव प्रमाणतमत्वे 'भारतस्य सर्वशास्त्रेषूत्तमत्वो'क्तिर्व्याहन्येतेति शङ्कते **नन्विति।** 'भारतं सर्वशास्त्रेषु भारते गीतिका वरा' इति प्रमाणमनेनानुकरोति। 'द्वे विद्ये वेदितव्ये' इति श्रुतौ

ऋगादिपदोपलक्षिताशेषशास्त्राणामपरविद्यात्वमुक्त्वा अनुग्राहकत्वेनास्यैव परविद्यात्वेनोक्त्या लिङ्गत्रयावसितत्व-रूपस्य महत्त्वस्यात्रैव संभवेनास्यैव शास्त्रस्य भारतापेक्षया उत्तमत्वेऽपि, भारतस्योत्तमत्वोक्तिः निर्णेतव्यान्तरा-पेक्षया सङ्कोचयितव्येत्याह **सत्यमिति** ।

वा०र०— **व्याहन्येतेति** । उभयोश्च सर्वोत्तमप्रामाण्यं विरुद्धमिति भावः । विचार्येषु तदित्युक्त्या विचार-केषु सूत्रमुत्तममित्येव प्राप्या भारतोत्तमता सूत्रस्य न सिद्ध्यतीत्यतस्तदभिप्रायमाह **द्वे विद्ये इति** । अस्य शास्त्रस्य भारतापेक्षयोत्तमत्वोपपादनाय **ऋगादीत्यादि** । अत्राशेषशास्त्राणामपरविद्यात्वमुक्तवेति पाठः । वोक्त्येति पाठः प्रागासीत् उत्तरत्र च परविद्यात्वोक्त्या चेति चशब्दश्चासीत् । ततः पूर्वोत्तरभावज्ञापनाय चशब्दो विनाशितः । त्वमुक्तवेति च करिष्यामीति मन्वानोऽपि लिङ्गत्रयेत्याद्युत्तरत्र वाक्यसङ्कोचाय प्रवृत्तो व्यासस्तेन तथा न कृतवान् । अवसितत्वरूपमहत्त्वस्यात्रैवेति पाठे अत्रैवेत्यनेन एतत् प्रामाण्य एवेत्यर्थाश्रयणात् न दोषः । प्रमाणत्वेन लिङ्गत्रयावसितत्वरूपस्येति योजनाद्वा प्रमाणतममिति ग्रन्थपुरस्कारेणोक्तेः प्रामाण्यमहत्त्वग्रन्थ एव पर्यवस्यतीति ग्रन्थमहत्त्वप्रतिपादनं युक्तमेव । अवसितत्वरूपमहत्त्वकप्रामाण्यस्यात्रैव संभवेनेति पाठस्तु स्वरस एव ।

स०व्र०— **विचार्येषु शास्त्रेष्विति** । 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इत्यत्र भारतस्य निर्णायकत्वोक्तावपि युक्तिभिरनिर्णायकत्वाद्विचार्यतुल्यत्वमेवेति भावः ॥ **न विरोध इति** । 'भारतं सर्ववेदार्थे'-त्यादिना इति शेषः । 'न च तावता आरम्भणीयत्वमि'त्यतःपरं 'किन्त्वि'त्यध्याहार्यम् ।

कुण्डल०— **उच्यत इति** । 'भारतं सर्वशास्त्रेषु भारते गीतिका वरा । विष्णोः सहस्रनामापि ज्ञेयं पाठ्यं च तद्वयमि'त्याद्यागमेनेति शेषः । **विचार्येष्विति** । तथाच निर्णेतव्यशास्त्रेषु भारतस्योत्तमत्वेऽपि निर्णायकशास्त्रे ब्रह्मसूत्राणामुत्तमत्वकथनं न विरुद्धमित्यर्थः ।

विद्व०— **विचार्येष्विति** । एतच्छास्त्रेण विचार्येषु मध्ये भारतस्योत्तमत्वम् अस्य तु उक्तरीत्या सर्वोत्तमत्वम् इति भाव इति संप्रदायविदः ।

काशी०— **उक्तमाक्षिपति नन्विति** । भारतमित्यादिना 'भारतं सर्वशास्त्रेषु भारते गीतिका वरे'त्यादिवचनं सूचयति । यद्यप्येतच्छास्त्रव्युत्पादितन्यायोपकृतस्य भारतस्य परविद्यात्वमिष्यत एव । तथाऽपि तद्वेदादिसाधारणम् । भारतं तु वेदादप्युत्तमं वेदादपि परं चक्रे वेदादप्युत्तमं तु यदित्यादेरतो भारतस्य स्वरूपेणैव सर्वशास्त्रोत्तमत्वात्तद्विरोध इति भावः । समाधत्ते **सत्यमिति** । **विचार्येषु** वेदादिषु । तथा च भारतं सर्वशास्त्रेष्विति वाक्ये शास्त्रशब्दो विचार्यवेदादिमात्रपर इति भावः । नन्वेतावताऽप्येतच्छास्त्रस्य न भारताद्यपेक्षयोत्तमत्वं सिद्ध्यति । तद्धि प्रमाण-प्रमेयप्रयोजनातिशयादित्युपपादितम् । तानि च भारतेऽपि समानानि । न च भारते युक्तिमूलत्वं नास्तीति युक्तम् । युक्तिसंवादित्वरूपस्य तस्य सत्त्वात् । अन्यथा तदर्थनिर्णायके ब्रह्मसूत्रेऽपि तन्न स्यादिति चेन्न । एतच्छास्त्रानुपकृतभारतादितः प्रमेयप्रयोजनाधिक्येनैवाधिक्यस्य सिद्धत्वात् । तदुपकृतात्तु पृथक्प्रामाण्याभावेना-

धिक्याभावस्येष्टत्वात् । (अत एव जैमिन्यादिवाक्य एव त्रेधा प्रामाण्यमाशङ्क्य तन्मात्रव्यावृत्तिरेव कृता न तु भारतादौ तच्छङ्कातद्व्यावृत्तिर्वा तदितिकर्तव्यतारूपस्यैतच्छास्त्रस्य तदर्थनिर्णायकन्यायव्युत्पादकत्वेन ततः क्षिप्रतरतत्त्वनिर्णयादिहेतुत्वेन च तदाधिक्यं त्वनुमतमेवेति । यद्वा । एवमित्यादिपूर्ववाक्यमेतदर्थत्वेनापि व्याख्येयम् । विषयस्य वेदभारताद्यर्थस्य विष्णोरतिशयेन न्यायैरुपपादनेन प्रयोजनस्य तत्त्वनिर्णयस्यातिशयेन क्षिप्रतयोत्पादनेन च वेदादिभ्योऽप्याधिक्यमिति) ।

गूढ०— नन्वस्य सर्वशास्त्रोत्तमत्वे भारतस्य सर्वोत्तमत्वप्रतिपादकवचनविरोध इति शङ्कते नन्विति । विचार्येष्विति । निर्णयेषु भारतस्य निर्णायकेषु चास्योत्तमत्वमिति न कश्चिद्विरोध इति भावः ।

॥ अस्य व्याख्यानस्य गतार्थतानिरासः ॥

८२ सु०— ननु चास्य शास्त्रस्यारम्भणीयत्वं सूत्रकार एव प्रथमसूत्रे समर्थयते । तद्व्याख्यानेनैव सर्वं संपद्यते । किमनेन । प्रथमसूत्र एव कथं प्रवृत्तिरिति चेत्, प्रथमभाष्येऽपि कथम् । सन्देहात्प्रवृत्तस्य पुनरुक्तप्रमाणैर्निर्णय इति चेत्, समं प्रथमसूत्रेऽपि ॥ मैवम् । विषयादिसंपादनेनैव तत् । न च तावता आरम्भणीयत्वम् । प्रामाण्ये हि सति काकदन्तपरीक्षादिग्रन्थवैलक्षण्यार्थं विषयादिव्युत्पादनमुपयुज्यते । अतः सूत्राक्षिप्तमेवेदं शिष्याणां बुद्धिशुद्ध(सिद्ध)ये भाष्यकृतोक्तमिति ।

परि०— प्रादुर्भूत इत्यादिश्लोकचतुष्टयस्योत्सूत्रितार्थत्वेन वक्ष्यमाणदिशा परमते अभ्यासभाष्यस्येव वैयर्थ्यदोषमाशङ्क्य निराह **ननु चेत्यादिना ॥ समर्थयत इति** । तत्प्रकारोऽग्रे व्यक्तः ॥ **किमनेनेति** । श्लोकचतुष्टयकृतेनारम्भणीयतोपयुक्तप्रामाण्यसमर्थनेनेत्यर्थः ॥ **कथं प्रवृत्तिरिति** । आरम्भणीयत्वानिर्णये तत्प्रवृत्तेरयोगात् प्रादुर्भूत इत्यादिभाष्येणारम्भणीयत्वसिद्धौ पश्चात्तत्र प्रवृत्तिरिति भावः ॥ **कथमिति** । प्रवृत्तिरित्यनुषङ्गः । सूत्रस्यैवारम्भणीयत्वानिर्णये तद्व्याख्यारूपभाष्येऽपि प्रवृत्तेरयोगादिति भावः । उत्तरं शङ्कते **सन्देहादिति** । आरम्भणीयत्वानारम्भणीयत्वसन्देहात् इत्यर्थः ॥ **उक्तेति** । आप्तवाक्यत्वादिरूपप्रमाणैः सूत्रप्रामाण्यसिद्धौ तद्व्याख्यानत्वयुक्त्या आरम्भणीयत्वनिर्णयो भविष्यतीत्यर्थः । सत्यम् । प्रथमसूत्रेऽप्यारम्भणीयत्वसन्देहात्प्रवृत्तस्य सूत्रस्थाथादिपदोक्तप्रमाणैरारम्भणीयत्वनिर्णयो भवतीति । तथाप्यारम्भणीयत्वसन्देहो द्वेधा । प्रामाण्यसन्देहनिमित्तको विषयप्रयोजनाधिकारिसंबन्धसन्देहनिमित्तकश्च । तत्रान्त्यस्य सूत्रेण परिहारेऽपि आद्यस्य न परिहारः । अतो भाष्यमेतत्सार्थकमिति भावेनाह **मैवमित्यादिना ॥ तदिति** । प्रथमसूत्रे आरम्भणीयत्वसमर्थनमित्यर्थः ।

तावतैवालमित्यत आह **न चेति** । बौद्धादावपि तत्संपादनस्य बौद्धादिग्रन्थकर्तृक्रियमाणत्वेन व्यभिचारादिति भावः । तर्हि सूत्रे विषयादिव्युत्पादनं व्यर्थम् । तावन्मात्रस्यारम्भानुपयोगादित्यत आह **प्रामाण्ये हीति** ॥ **अत इति** । प्रामाण्ये सत्येव विषयादिव्युत्पादनस्योपयोगात् इत्यर्थः ॥ **सूत्राक्षिप्तमिति** । विषयादिव्युत्पादनान्यथानुपपत्त्यैवार्थालब्धं प्रामाण्यमित्यर्थः । आर्थिकोऽप्यर्थः सूत्रार्थ एवेति तु बन्धमिथ्यात्वमित्येतदवतारिकायां परमतानुवादप्रस्तावे निपुणतरमुपपादयिष्यत इति भावः । एतेन प्रामाण्ये हीत्यादिग्रन्थेनैव श्रौतार्थं प्रागनुक्त्वा आर्थिकार्थमेव प्राक्कथयन् भाष्यकारोऽकुशल इति परास्तम् । प्रामाण्येन विना विषयादिव्युत्पादनस्यैव अयोगादिति । **बुद्धिसिद्धये** प्रवृत्तिबुद्ध्युत्पादनाय ॥

यादु०— विषयादिसंपादनेनैव तदिति । आरम्भणीयत्वमित्यर्थः । 'प्रथमसूत्रे समर्थयत' इति पूर्वेणान्वयः । न प्रामाण्यसंपादनेनेत्यर्थः । अतो नास्य प्रामाण्यव्युत्पादनस्य प्रथमसूत्रेण गतार्थतेति भावः ॥ ननु विषयादिसंपादनेनैव आरम्भणीयत्वसिद्धिसंभवे प्रामाण्यव्युत्पादनं व्यर्थमित्याशङ्क्य निराकरोति **न चेति** । तावता तावतैवारम्भणीयत्वं समर्थयितुं शक्यमिति शेषः ॥ कुतो नेत्यत आह **प्रामाण्ये हीति** । अन्यथाऽप्रामाण्येनैवानारम्भणीयत्वशङ्कायां, प्रयोजनादिव्युत्पादनस्यावसर एव नेति भावः ॥ ननु इदं प्रामाण्यसमर्थनं सूत्रोक्तं न चेत्तर्हि गुरुर्लुण्णामित्यादेर्भाष्यत्वव्याघातः । तदुक्तं चेद्भाष्यकारीयं तद् व्युत्पादनं व्यर्थमसङ्गतं स्यादित्याशङ्कां परिहरन्नुपसंहरति **अत इति** । प्रामाण्यसमर्थनाभावे विषयादिव्युत्पादनस्यावसर एव नेति विषयादिव्युत्पादकसूत्रेण तदाक्षिप्तमित्यर्थः ॥ **बुद्धिशुद्धय इति** । विषयादिव्युत्पादनप्रतिबन्धकाप्रामाण्यशङ्कानिरासायेत्यर्थः ॥

आनन्दः— न चैतावता हि शास्त्रस्यारम्भणीयत्वं व्युत्पादितं तदयुक्तं वैयर्थ्यात् । आरम्भणीयत्वस्य प्रकारान्तरेणैव सिद्धेरिति शङ्कते **ननु चेति** । **प्रथमसूत्रे प्रवृत्तावारम्भणीयत्वम्** आरम्भणीयत्वे सति च प्रथमसूत्रे प्रवृत्तिरित्यन्योन्याश्रय इति शङ्कते **प्रथमेति** । **तुल्यन्यायतया परिहरति प्रथमेति** । विषयाद्यभावादनारम्भणीयत्वे प्राप्ते तत्सद्भावेनारम्भणीयत्वव्युत्पादकं हि **प्रथमसूत्रम्** । **न च प्रामाण्याभावे तावता आरम्भणीयत्वं सिद्ध्यतीति तदवश्यमुपपादनीयमित्याह मैवमित्यादिना** । **प्रामाण्याभावे प्रथमं विषयादिव्युत्पादनमसङ्गतं स्यादिति भावः** । **न च तावतेति** । ननु विषयादिव्युत्पादनेनारम्भणीयत्वं कुतो न सिद्ध्यति प्रामाण्याभावादिति चेत् । तथा सति विषयादिमत्ताया एवासंभवात् । न हि वस्तुतो विषयाद्युपेतं प्रामाण्यरहितमिति संभवति । तथाच कथमुक्तं विषयादिसंपादनमात्रेण नारम्भणीयत्वं किन्तु प्रामाण्ये सतीति । तदप्युपपादनीयमिति चेन्मैवम् । न हि वस्तुतो विषयाद्युपेतमपि प्रामाण्यशून्यं चेन्नारम्भणीयमतः प्रामाण्यं व्युत्पादनीयमित्येतद्ग्रन्थार्थः । किन्तु विषयादिप्रतिपादनेन तज्ज्ञानमात्रसंभवेऽपि प्रामाण्यनिश्चयाभावेन आरम्भणीयत्वं संभवतीत्यतः प्रामाण्यनिश्चयार्थमुक्तः प्रयत्न आवश्यक

एवेत्याशयान्न कश्चिद्दोषः । तर्हि सूत्रार्थकथनरूपत्वाभावेन भाष्यलक्षणाभावादेतदभाष्यमित्यत आह **अत इति** । तथा च सूत्रार्थकथनरूपत्वाभावेऽपि तदाक्षिप्तार्थकथनरूपत्वाद्भाष्यत्वं युक्तमिति भावः । अतःशब्देन हि वेदप्रामाण्यमुक्तं तदितिकर्तव्यतारूपा हि मीमांसा, अतः करणप्रामाण्ये उक्ते तदविनाभूतत्वात्तदिति-कर्तव्यतारूपमीमांसाया अपि प्रामाण्यं सिद्धचतीति भावः।

कं०रा०— सर्वं प्रामाण्यादिकम् । **किमनेनेति** । प्रामाण्यादिसमर्थनेन किमित्यर्थः । **प्रथमभाष्य इति** । प्राक् भाष्यप्रामाण्यनिश्चयाभावेन प्रथमभाष्येऽपि कथं प्रवृत्तिर्न कथञ्चिदित्यर्थः । तथा च प्रथमभाष्य एव प्रवृत्त्य-योगाद्भाष्यकारीयप्रामाण्यसमर्थनेन सूत्रप्रामाण्यनिश्चयो नोपपद्यत इति भावः । सन्देहात् प्रथमभाष्ये प्रवृत्तस्य तद्वचु-त्पादितास्तवाक्यत्वादिप्रमाणैः सूत्रप्रामाण्यनिर्णयोपपत्तिरित्याशयेन परिहरति **सन्देहादिति** । **सममिति** । सन्देहा-त्प्रथमसूत्रे प्रवृत्तस्य तद्वचाख्यानेनैव सूत्रप्रामाण्यनिश्चयो भविष्यतीति भाष्यकारीयं तत्समर्थनं व्यर्थमिति भावः ।

श्रीनिधि०— सूत्रानुक्तप्रामाण्यव्युत्पादनं चोत्सूत्रमित्यत आह **अतः सूत्राक्षिप्तमेवेदमिति** । विषयादि-व्युत्पादनेनेति भावः । काकदन्तपरीक्षादीत्यत्रादिपदेन नाटकं ग्राह्यम् । एवं च तद्वैलक्षण्याय विषयादिव्युत्पादनं काकदन्तपरीक्षावैलक्षण्यव्युत्पादनाय प्रयोजनव्युत्पादनमिति द्रष्टव्यम् ।

वा०चं०— नन्वियता प्रबन्धेन प्रतिपादितयोः प्रामाण्यतदनुत्तमत्वयोरुक्तरीत्या शास्त्रारम्भणीयतार्थत्वात् शास्त्रारम्भणीयतायाश्च सूत्रकारेणैव प्रथमसूत्रे समर्थनात् तद्वचाख्यानेनैवारम्भणीयतौपयिकविषयादिवत्प्रामाण्यादेरपि सिद्धेस्तदेव व्याख्यायतां, किमनेन सूत्रानर्थतया प्रामाण्यादिव्युत्पादकेन प्रथमभाष्येणेति शङ्कते **ननु चेति** । प्रामाण्यनिश्चयस्य प्रवृत्तिप्रयोजकत्वात् शास्त्रप्रवृत्तिप्रयोजकप्रामाण्यनिश्चयाय प्रथमसूत्रगवेषणायां, तत्र प्रवृत्तेरपि प्रामाण्यनिश्चयाधीनतया तत्प्रामाण्येऽवश्यं प्रतिपाद्ये, समानन्यायतया शास्त्रप्रामाण्योक्तिः प्रथमभाष्य इत्याशङ्कते **प्रथमेति** ॥ तर्हि प्रवृत्तेः प्रामाण्यनिश्चयसाध्यत्वादेव, व्याख्यानप्रामाण्यनिश्चयस्य व्याख्येयप्रामाण्यनिश्चयाधीनतया तन्निश्चयाभावे प्रथमभाष्येऽपि न प्रवृत्त्युपपत्तिरिति समाधत्ते **प्रथमेति** ॥ सूत्रे प्रामाण्यानुक्त्या समाधत्ते **विषयादीति** । तत् शास्त्रस्यारम्भणीयत्वम् । **संपादनेन व्युत्पादनेन** । 'सूत्रकारः प्रथमसूत्रे समर्थयत' इति पूर्वेण संबन्धः ॥ ननु सूत्रस्य विषयादिव्युत्पादनेनैव आरम्भणीयत्वसमर्थकत्वे, तावतैवारम्भणीयत्वसिद्धौ भाष्यकारीयं प्रामाण्यव्युत्पादनं व्यर्थ-मेवेत्यत आह **न चेति** । **तावता** विषयादिव्युत्पादनेन । **आरम्भणीयत्वं** 'सिद्धं भविष्यती'ति शेषः । नन्वेवं प्रामाण्यव्युत्पादनस्यावश्यकत्वे, प्रमाणस्य सतो निर्विषयत्वादिप्रयुक्तानारम्भणीयत्वशङ्काया अप्रसक्तेः विषयादि-व्युत्पादनं व्यर्थं सूत्रे; आवश्यकप्रामाण्याव्युत्पादनान्न्यूनता च इत्यतः काकदन्तपरीक्षाग्रन्थादौ सत्यपि याथार्थ्यरूपप्रामाण्ये, निष्प्रयोजनत्वादिप्रयुक्तानारम्भणीयताया दृष्टत्वेन; शङ्काप्रसञ्जकसद्भावात् । अप्रामाण्ये च तेनैवानारम्भणीयत्वप्राप्तौ, काकदन्तपरीक्षाग्रन्थसालक्षण्यशङ्काया अनवसरग्रस्ततया, तद्वैलक्षण्याय सविषयकत्वादे-रतिपादनीयतया, तत्प्रतिपादनेनैव प्रामाण्यव्युत्पादनस्य सूत्रकृदभिमततया सुज्ञानत्वाच्च न न्यूनताऽपीत्याशयेनाह **प्रामाण्ये हि सतीति** ॥ नन्वस्तु सूत्रकारीयविषयादिव्युत्पादनस्य प्रामाण्ये सत्येवोपयोगः तथाऽपि

प्रामाण्यव्युत्पादकस्यास्य कथं भाष्यत्वमित्याशङ्कां परिहरन्नेव भाष्यकारीयतदुक्तेः प्रयोजनं चोपसंहारव्याजेन दर्शयति अत इति। 'न च याथार्थ्ये मानमस्ती'त्यादिशङ्कापरिहारो **बुद्धिशुद्धिः**।

वा०र०— आरम्भणीयतौपयिकविषयादिवदिति। अन्यथा विषयाद्यमपि व्युत्पाद्यं स्यात्। अविशेषात् इत्याशयेन दृष्टान्तीकरणम्। **सूत्रानर्थतयेति**। सूत्रार्थरूपं विहायेत्यर्थः। सूत्रार्थो वर्ण्यते यत्रेति भाष्यलक्षणात् तादृशभाष्ये सूत्रार्थ एव वर्णनीयः। **प्रथमभाष्ये** प्रामाण्यादेश्च सूत्रार्थतया व्युत्पादनं नेति भावः। प्रथमसूत्र एव कथं प्रवृत्तिरिति शङ्काशयाप्रतीतेः सूत्रप्रतिबन्धा शास्त्रप्रामाण्यप्रतिपादनं भाष्ये युक्तमिति तदाशयं वर्णयन् तद्वाक्यं व्याख्याति **प्रामाण्यनिश्चयस्येति**। शास्त्रप्रवृत्तीत्युत्तरत्रोक्ते हेत्वभिधानमिदम्। तत्र प्रथमसूत्रेऽवश्यं प्रतिपाद्ये। प्रथमभाष्येति वक्ष्यमाणमत्रापि संबध्यते। प्रवृत्तेः प्रामाण्यनिश्चयसाध्यत्वेऽपि अन्येनैव प्रामाण्यनिश्चयो भाष्ये संभवतीति न शङ्कनीयमित्याह **व्याख्यानप्रामाण्येति**। **तन्निश्चयाभावे**। व्याख्येयप्रामाण्यनिश्चयाभावे। **प्रथमभाष्येऽपीति**। व्याख्येयप्रामाण्यनिश्चयाभावे तदधीनव्याख्यानप्रामाण्यनिश्चयाभावात् प्रवृत्तिप्रयोजक-विरहादिति भावः। यदुक्तं प्रथमभाष्यप्रतिबन्धा **प्रथमसूत्रेऽपि प्रवृत्युपपत्तेः**। तत्र च शास्त्रारम्भणीयतासमर्थनात् तद्वचाख्यानेनैव प्रामाण्यादिव्युत्पादनलाभात् न प्रथमभाष्यमावश्यकमिति। तत् भवेत् यदि प्रथमसूत्रे शास्त्रारम्भ-णीयताप्रामाण्यव्युत्पादनेन क्रियेत। न चैवं किन्तु विषयाद्यभावपूर्वपक्षनिरासाय विषयादिसद्भावप्रतिपादनेनैव शास्त्रारम्भणीयता प्रथमसूत्रे समर्थ्यते। तथा च सूत्रानुक्तप्रामाण्यव्युत्पादनाय भाष्यमावश्यकमेवेत्याशयेनावतारयति **सूत्रे प्रामाण्यानुक्त्येति**। तदित्याद्यनूद्य व्याचष्टे **तच्छास्त्रस्येति**। साकाङ्क्षतानिरासाय संबन्धं दर्शयति **सूत्रकार इति**। तावतेत्यनुवादः। विषयादिव्युत्पादनेनेति व्याख्यानम्। आरम्भणीयत्वमित्यनूद्य सिद्धं भवतीत्येतावान् शेषः पूरितः। उपलक्षणं चेदम्। किन्तु प्रामाण्यव्युत्पादनेनापि इत्यपि शेष इति ज्ञेयम्। सत्यपि प्रामाण्ये विषयाद्यभावेन काकदन्तपरीक्षादौ सत्यपि विषयादौ प्रामाण्याभावेन विप्रलम्भादिवाक्ये आरम्भणीयत्वाभावेनोभयोरावश्यकत्वस्य सिद्धत्वात्। अत एवोत्तरवाक्ये एवं प्रामाण्यव्युत्पादनस्यावश्यकत्वेति। पूर्वोक्तानुवादः आवश्यकत्वादेव भाष्ये तत् व्युत्पादनं उपपन्नमित्यपि ज्ञेयम्। **व्युत्पादनस्यावश्यकत्वेति**। तत एव भाष्ये तद्व्युत्पादनस्य सार्थक्येऽपीति शेषः। विषयादिव्युत्पादनं सूत्रे व्यर्थमिति संबन्धः। ननु विषयाद्यभावप्रयुक्तानारम्भणीयत्वशङ्कावारणाय तद्व्यु-त्पादनं सूत्रे सार्थकमित्यत उक्तं **प्रमाणस्य सत इत्यादि**। **अप्रसक्तेरिति**। प्रसञ्जकस्य प्रामाण्ये सत्यपि विषयाद्यभावदर्शनस्याभावादिति भावः। तथा चाप्रसक्त्या तन्निरासस्य प्रयोजनत्वायोगात् तदर्थत्वेन सार्थक्यं न संभवतीति भावः। एवं प्रामाण्ये हीत्युत्तरवाक्यं एकप्रकारेणावतार्य प्रकारान्तरेणापि तदवतारमाह **आवश्यकेति**। अत्राप्येवं प्रामाण्यव्युत्पादनस्यावश्यकत्वे इति वर्तते। **इत्यतः** इत्येतच्छङ्काद्वयं यतः प्राप्तम् अतः इत्यर्थः। **सत्यपीति**। अनेन प्रामाण्ये हि सति। प्रामाण्ये विद्यमाने एव किल काकदन्तपरीक्षाग्रन्थसालक्षण्यशङ्का भवति। तत्र सत्यपि प्रामाण्ये आरम्भणीयत्वाभावदर्शनात् तद्वदिहापि किं न स्यादिति। ततः तद्वन्यवैलक्षण्यप्रदर्शनेन तां शङ्कां निराकर्तुं विषयादिव्युत्पादनं सूत्रे उपयुक्तं सार्थकमिति व्याख्यानं सूचितम्। काकदन्तपरीक्षाग्रन्थे फलवत्त्वघटितं वाक्यप्रामाण्यं न संभवतीत्यतो याथार्थ्यरूपमेव प्रामाण्यं इह विवक्षितमिति प्रतिपादनाय याथार्थ्यरूपेत्युक्तम्

एवेत्याशयान्न कश्चिद्दोषः। तर्हि सूत्रार्थकथनरूपत्वाभावेन भाष्यलक्षणाभावादेतदभाष्यमित्यत आह **अत इति**। तथा च सूत्रार्थकथनरूपत्वाभावेऽपि तदाक्षिप्तार्थकथनरूपत्वाद्भाष्यत्वं युक्तमिति भावः। अतःशब्देन हि वेदप्रामाण्यमुक्तं तदितिकर्तव्यतारूपा हि मीमांसा, अतः करणप्रामाण्ये उक्ते तदविनाभूतत्वात्तदिति-कर्तव्यतारूपमीमांसाया अपि प्रामाण्यं सिद्धयतीति भावः।

कं०रा०— सर्वं प्रामाण्यादिकम्। **किमनेनेति**। प्रामाण्यादिसमर्थनेन किमित्यर्थः। **प्रथमभाष्य इति**। प्राक् भाष्यप्रामाण्यनिश्चयाभावेन प्रथमभाष्येऽपि कथं प्रवृत्तिर्न कथञ्चिदित्यर्थः। तथा च प्रथमभाष्य एव प्रवृत्त्य-योगाद्भाष्यकारीयप्रामाण्यसमर्थनेन सूत्रप्रामाण्यनिश्चयो नोपपद्यत इति भावः। सन्देहात् प्रथमभाष्ये प्रवृत्तस्य तद्व्यु-त्पादितात्तवाक्यत्वादिप्रमाणैः सूत्रप्रामाण्यनिर्णयोपपत्तिरित्याशयेन परिहरति **सन्देहादिति**। **सममिति**। सन्देहा-त्प्रथमसूत्रे प्रवृत्तस्य तद्वाख्यानेनैव सूत्रप्रामाण्यनिश्चयो भविष्यतीति भाष्यकारीयं तत्समर्थनं व्यर्थमिति भावः।

श्रीनिधि०— सूत्रानुक्तप्रामाण्यव्युत्पादनं चोत्सूत्रमित्यत आह **अतः सूत्राक्षिप्तमेवेदमिति**। विषयादि-व्युत्पादनेनेति भावः। काकदन्तपरीक्षादीत्यत्रादिपदेन नाटकं ग्राह्यम्। एवं च तद्वैलक्षण्याय विषयादिव्युत्पादनं काकदन्तपरीक्षावैलक्षण्यव्युत्पादनाय प्रयोजनव्युत्पादनमिति द्रष्टव्यम्।

वा०चं०— नन्वियता प्रबन्धेन प्रतिपादितयोः प्रामाण्यतदनुक्तमत्वयोरुक्तरीत्या शास्त्रारम्भणीयतार्थत्वात् शास्त्रारम्भणीयतायाश्च सूत्रकारेणैव प्रथमसूत्रे समर्थनात् तद्वाख्यानेनैवारम्भणीयतौपयिकविषयादिवत्प्रामाण्यादेरपि सिद्धेस्तदेव व्याख्यायतां, किमनेन सूत्रानर्थतया प्रामाण्यादिव्युत्पादकेन प्रथमभाष्येणेति शङ्कते **ननु चेति**। प्रामाण्यनिश्चयस्य प्रवृत्तिप्रयोजकत्वात् शास्त्रप्रवृत्तिप्रयोजकप्रामाण्यनिश्चयाय प्रथमसूत्रगवेषणायां, तत्र प्रवृत्तेरपि प्रामाण्यनिश्चयाधीनतया तत्प्रामाण्येऽवश्यं प्रतिपाद्ये, समानन्यायतया शास्त्रप्रामाण्योक्तिः प्रथमभाष्य इत्याशङ्कते **प्रथमेति**॥ तर्हि प्रवृत्तेः प्रामाण्यनिश्चयसाध्यत्वादेव, व्याख्यानप्रामाण्यनिश्चयस्य व्याख्येयप्रामाण्यनिश्चयाधीनतया तन्निश्चयाभावे प्रथमभाष्येऽपि न प्रवृत्त्युपपत्तिरिति समाधत्ते **प्रथमेति**॥ सूत्रे प्रामाण्यानुक्त्या समाधत्ते **विषयादीति**। तत् शास्त्रस्यारम्भणीयत्वम्। **संपादनेन व्युत्पादनेन**। 'सूत्रकारः प्रथमसूत्रे समर्थयत' इति पूर्वेण संबन्धः॥ ननु सूत्रस्य विषयादिव्युत्पादनेनैव आरम्भणीयत्वसमर्थकत्वे, तावतैवारम्भणीयत्वसिद्धौ भाष्यकारीयं प्रामाण्यव्युत्पादनं व्यर्थ-मेवेत्यत आह **न चेति**। **तावता** विषयादिव्युत्पादनेन। **आरम्भणीयत्वं** 'सिद्धं भविष्यती'ति शेषः। नन्वेवं प्रामाण्यव्युत्पादनस्यावश्यकत्वे, प्रमाणस्य सतो निर्विषयत्वादिप्रयुक्तानारम्भणीयत्वशङ्काया अप्रसक्तेः विषयादि-व्युत्पादनं व्यर्थं सूत्रे; आवश्यकप्रामाण्याव्युत्पादनान्न्यूनता च इत्यतः काकदन्तपरीक्षाग्रन्थादौ सत्यपि याथार्थ्यरूपप्रामाण्ये, निष्प्रयोजनत्वादिप्रयुक्तानारम्भणीयताया दृष्टत्वेन; शङ्काप्रसञ्जकसद्भावात्। अप्रामाण्ये च तेनैवानारम्भणीयत्वप्राप्तौ, काकदन्तपरीक्षाग्रन्थसालक्षण्यशङ्काया अनवसरग्रस्ततया, तद्वैलक्षण्याय सविषयकत्वादे-रप्रतिपादनीयतया, तत्प्रतिपादनेनैव प्रामाण्यव्युत्पादनस्य सूत्रकृदभिमततया सुज्ञानत्वाच्च न न्यूनताऽपीत्याशयेनाह **प्रामाण्ये हि सतीति**॥ नन्वस्तु सूत्रकारीयविषयादिव्युत्पादनस्य प्रामाण्ये सत्येवोपयोगः तथाऽपि

प्रामाण्यव्युत्पादकस्यास्य कथं भाष्यत्वमित्याशङ्कां परिहरन्नेव भाष्यकारीयतदुक्तेः प्रयोजनं चोपसंहारव्याजेन दर्शयति अत इति। 'न च याथार्थ्ये मानमस्ती'त्यादिशङ्कापरिहारो **बुद्धिशुद्धिः**।

वा०२०— आरम्भणीयतौपयिकविषयादिवदिति। अन्यथा विषयाद्यमपि व्युत्पाद्यं स्यात्। अविशेषात् इत्याशयेन दृष्टान्तीकरणम्। **सूत्रानर्थतयेति**। सूत्रार्थरूपं विहायेत्यर्थः। सूत्रार्थो वर्ण्यते यत्रेति भाष्यलक्षणात् तादृशभाष्ये सूत्रार्थ एव वर्णनीयः। प्रथमभाष्ये प्रामाण्यादेश्च सूत्रार्थतया व्युत्पादनं नेति भावः। प्रथमसूत्र एव कथं प्रवृत्तिरिति शङ्काशयाप्रतीतेः सूत्रप्रतिबन्धा शास्त्रप्रामाण्यप्रतिपादनं भाष्ये युक्तमिति तदाशयं वर्णयन् तद्वाक्यं व्याख्याति **प्रामाण्यनिश्चयस्येति**। **शास्त्रप्रवृत्तीत्युत्तरत्रोक्ते हेत्वभिधानमिदम्**। तत्र **प्रथमसूत्रेऽवश्यं** प्रतिपाद्ये। प्रथमभाष्येति वक्ष्यमाणमत्रापि संबध्यते। प्रवृत्तेः प्रामाण्यनिश्चयसाध्यत्वेऽपि अन्येनैव प्रामाण्यनिश्चयो भाष्ये संभवतीति न शङ्कनीयमित्याह **व्याख्यानप्रामाण्येति**। **तन्निश्चयाभावे**। व्याख्येयप्रामाण्यनिश्चयाभावे। **प्रथमभाष्येऽपीति**। व्याख्येयप्रामाण्यनिश्चयाभावे तदधीनव्याख्यानप्रामाण्यनिश्चयाभावात् प्रवृत्तिप्रयोजकविरहादिति भावः। यदुक्तं प्रथमभाष्यप्रतिबन्धा प्रथमसूत्रेऽपि प्रवृत्त्युपपत्तेः। तत्र च शास्त्रारम्भणीयतासमर्थनात् तद्वाख्यानेनैव प्रामाण्यादिव्युत्पादनलाभात् न प्रथमभाष्यमावश्यकमिति। तत् भवेत् यदि प्रथमसूत्रे शास्त्रारम्भणीयताप्रामाण्यव्युत्पादनेन क्रियेत। न चैवं किन्तु विषयाद्यभावपूर्वपक्षनिरासाय विषयादिसद्भावप्रतिपादनेनैव शास्त्रारम्भणीयता प्रथमसूत्रे समर्थ्यते। तथा च सूत्रानुक्तप्रामाण्यव्युत्पादनाय भाष्यमावश्यकमेवेत्याशयेनावतारयति **सूत्रे प्रामाण्यानुक्तयेति**। तदित्याद्यनूद्य व्याचष्टे **तच्छास्त्रस्येति**। साकाङ्क्षतानिरासाय संबन्धं दर्शयति **सूत्रकार** इति। तावतेत्यनुवादः। विषयादिव्युत्पादनेनेति व्याख्यानम्। आरम्भणीयत्वमित्यनूद्य सिद्धं भवतीत्येतावान् शेषः पूरितः। उपलक्षणं चेदम्। किन्तु प्रामाण्यव्युत्पादनेनापि इत्यपि शेष इति ज्ञेयम्। सत्यपि प्रामाण्ये विषयाद्यभावेन काकदन्तपरीक्षादौ सत्यपि विषयादौ प्रामाण्याभावेन विप्रलम्भादिवाक्ये आरम्भणीयत्वाभावेनोभयोरावश्यकत्वस्य सिद्धत्वात्। अत एवोत्तरवाक्ये एवं प्रामाण्यव्युत्पादनस्यावश्यकत्वेति। पूर्वोक्तानुवादः आवश्यकत्वादेव भाष्ये तत् व्युत्पादनं उपपन्नमित्यपि ज्ञेयम्। **व्युत्पादनस्यावश्यकत्वेति**। तत एव भाष्ये तद्व्युत्पादनस्य सार्थक्येऽपीति शेषः। विषयादिव्युत्पादनं सूत्रे व्यर्थमिति संबन्धः। ननु विषयाद्यभावप्रयुक्तानारम्भणीयत्वशङ्कावारणाय तद्व्युत्पादनं सूत्रे सार्थकमित्यत उक्तं **प्रमाणस्य सत इत्यादि**। **अप्रसक्तेरिति**। प्रसञ्जकस्य प्रामाण्ये सत्यपि विषयाद्यभावदर्शनस्याभावादिति भावः। तथा चाप्रसक्त्या तन्निरासस्य प्रयोजनत्वायोगात् तदर्थत्वेन सार्थक्यं न संभवतीति भावः। एवं प्रामाण्ये हीत्युत्तरवाक्यं एकप्रकारेणावतार्य प्रकारान्तरेणापि तदवतारमाह **आवश्यकेति**। अत्राप्येवं प्रामाण्यव्युत्पादनस्यावश्यकत्वे इति वर्तते। **इत्यतः इत्येतच्छङ्काद्वयं यतः प्राप्तम् अतः इत्यर्थः**। **सत्यपीति**। अनेन प्रामाण्ये हि सति। प्रामाण्ये विद्यमाने एव किल काकदन्तपरीक्षाग्रन्थसालक्षण्यशङ्का भवति। तत्र सत्यपि प्रामाण्ये आरम्भणीयत्वाभावदर्शनात् तद्वदिहापि किं न स्यादिति। ततः तद्वन्यवैलक्षण्यप्रदर्शनेन तां शङ्कां निराकर्तुं विषयादिव्युत्पादनं सूत्रे उपयुक्तं सार्थकमिति व्याख्यानं सूचितम्। काकदन्तपरीक्षाग्रन्थे फलवत्त्वघटितं वाक्यप्रामाण्यं न संभवतीत्यतो याथार्थ्यरूपमेव प्रामाण्यं इह विवक्षितमिति प्रतिपादनाय याथार्थ्यरूपेत्युक्तम्

शङ्कापसञ्जकेति । प्रामाण्यस्याप्यनारम्भणीयशङ्कापकर्षदर्शनस्य सद्भावात् इत्यर्थः । सद्भावात् इत्यनन्तरं प्रसक्तत्वच्छङ्कानिरासाय सूत्रे तद्व्युत्पादनं सार्थकमिति पाठः । अस्य चेत्याशयेनाहेत्युत्तरेण संबन्धः । मूलटीकापुस्तके पूर्ववर्णान्त्यभागे शोधसमाप्त्यनन्तरं स्थलाभावेन सद्भावात् इत्यन्तमेवासीत् तदुत्तरं प्रसक्तत्वच्छङ्केत्यादेः लिखनायोद्योगे कृतेऽपि द्वितीयशङ्कानिरासपरत्वेन एतद्वाक्ययोजनायाः उपस्थितौ अणुपत्रान्तरे द्वितीयशङ्कानिरासपरत्वेन योजनैव लिखिता । तदनुसारेण प्रत्यन्तरे सद्भावादित्यनन्तरं द्वितीययोजनैव लिखिता प्रसक्तेत्यादिकं तु कालान्तरे अणुतरपत्रे लिखितमपि तत्पत्रस्य पूर्वलेखकालेऽभावेन प्रत्यन्तरे न निवेशितम् । आकाङ्क्षा तु शेषपूरणेन निवृत्ता भविष्यतीति लेखकाभिप्रायः । वस्तुतः तत्पुराणस्य लाभानन्तरं यथाश्रुतपाठ एवास्तु इति मत्वा अस्माभिः सन्निवेशितमिति अदोष इति ज्ञेयम् । एवमाद्यशङ्कानिरासपरत्वेन प्रामाण्ये हि सतीति वाक्ययोजनां कृत्वा आवश्यकेत्यादिद्वितीयशङ्कानिरासपरतया एतदेव वाक्यं योजयति अप्रामाण्ये चेति । पूर्वं हि शब्दोऽप्यर्थतया योजितो । अत्रत्येवकारार्थतया । तथाच प्रामाण्ये सत्येव भाष्योक्तरीत्या प्रामाण्यव्युत्पादनं अभिप्रैति तदेव विषयादि व्युत्पादनं उपयुज्यते इत्युक्ते अन्यथा तु न युज्यते इत्युक्तं भवति । तत्प्रकारविशदनं अप्रामाण्ये चेत्यादि । पूर्वयोजनायामुपयुज्यते इत्येतत् मूलपदम् उपयोगार्थम् । एतद्योजनायां तु सङ्गतोऽर्थमिति विवेकः । तेनैवाविप्रलम्भादिवाक्यस्यैवेति शेषः । तत्प्रतिपादनेनैवेति । विषयादिप्रतिपादनेनैव काकदन्तपरीक्षाग्रन्थवैलक्षण्यज्ञापनान्यथानुपपत्त्या प्रामाण्यव्युत्पादनमिति सूत्रकारो भाष्योक्तरीत्याऽभिप्रेतवान् इति गम्यते । ततः सूत्रकारेण विषयादिव्युत्पादनेनैव प्रामाण्यव्युत्पादनस्याभिप्रायतः सूचनात्सूचितार्थस्याप्यर्थत्वात् न न्यूनतापीत्यर्थ इत्याशङ्कां परिहरन् इति । इयं च शङ्का प्रथमयोजनायाम् । द्वितीययोजनायां सूत्रसूचितनायाः प्रामाण्यव्युत्पादनेऽङ्गीकृतत्वेनोत्सूत्रत्वशङ्कानुदयात् । तथोजनायां सूत्राभिप्रेते तत्त्वेऽपि भाष्यकारेण कुतः इदं व्युत्पाद्यमित्याशङ्कापरिहाराय भाष्यकारीयतदुक्तेः प्रयोजनमिति योजनाङ्गीकारात् नानुपपत्तिः । भाष्यकारीयेत्यादिकं पूर्वयोजनायां सूत्राक्षिप्तमेव भाष्ये व्युत्पादितं नातः उत्सूत्रत्वं मन्तव्यम् । तदपि शिष्यबुद्धिविशुद्धचर्थमिति योजनोक्तिर्वस्तुस्थितितया । द्वितीययोजनायां तु सूत्रसूचितं भाष्ये किं प्रयोजनायोक्तमिति शङ्कावारकतया प्रयोजनाभिधानपरमिति विशेष इत्यभिधेयम् । यद्यपि विषयादिव्युत्पादनेनैव प्रामाण्यव्युत्पादनेनापि आरम्भणीयत्वसिद्धेः तत्सिद्धचर्थं भाष्ये प्रामाण्यव्युत्पादनं सार्थकं चेत् अस्तु तथा । परन्तु सूत्रानुक्तप्रामाण्यव्युत्पादकभाष्यस्य सूत्रार्थकथनरूपत्वाभावात् अभाष्यत्वापत्तिः इत्यतः सूत्रोक्तार्थकथनरूपत्वाभावेऽपि सूत्राक्षिप्तार्थकथनरूपत्वात् नाभाष्यत्वप्रसङ्गः । इत्यभिप्रेत्य तदाक्षेपप्रकारं दर्शयन् नाक्षिप्तस्यापि कथने किं प्रयोजनमित्यतो भाष्यकारीयं तद्व्युत्पादनस्य प्रयोजनं च दर्शयन् उपसंहरति प्रामाण्ये हि सतीत्यादिना इत्येवं प्रामाण्यं हि इत्यादिग्रन्थो योजयितुं शक्यः । तस्यायं भावः । सूत्रकारेण हि आरम्भणीयत्वसिद्धचर्थविषयादिव्युत्पादनं क्रियते, तदिदं व्युत्पादनम् आरम्भणीयत्वसिद्धौ तदुपयुज्यते । आरम्भणीयतासाधनसमर्थं भवतीति यावत् । यदि तत्प्रामाण्यं स्यात् प्रामाण्याभावे हि विप्रलम्भादिवाक्यवत् अनारम्भणीयत्वापत्तौ सत्यां विषयादिव्युत्पादनेन तदारम्भणीयत्वसमर्थनायोगात् । अतः प्रामाण्ये सत्येव तत्प्रयुक्तारम्भणीयत्वप्राप्तावेवेति यावत् । विषयादिव्युत्पादनं क्रियमाणमारम्भणीयत्वसाधने उपयुक्तं भवतीत्यतः सूत्रकारीयविषयादिव्युत्पादनान्यथानुपपत्त्या

प्रामाण्यस्य सूत्रकृदभिमतत्वसिद्धेः सूत्रोक्तस्यैव तदाक्षिप्तस्याप्यर्थस्य सूत्रार्थत्वात् तत्कथनपरभाष्यस्य नाभाष्यत्वप्रसङ्गः । न च काकदन्तपरीक्षाग्रन्थवैलक्षण्याय विषयादिव्युत्पादनस्य क्रियमाणत्वात् तद्वैलक्षण्ये सति कुतो नारम्भणीयतासिद्धिरिति । अत उक्तं काकेत्यादि । काकदन्तपरीक्षादिवैलक्षण्याय कृतमपि विषयादिव्युत्पादनं प्रामाण्ये सत्येवेति पूर्वेण संबन्धः । अन्यथोक्तरीत्या प्रामाण्याभावेनैव अनारम्भणीयत्वापत्तावुक्तसालक्षण्याशङ्कायोगेन वैलक्षण्यप्रतिपादनाय विषयादिव्युत्पादनानर्थक्यमायाति । अतः सूत्राक्षिप्तमेवेदं प्रामाण्यम् । शिष्याणां बुद्धिविशुद्धये भाष्यकृतोक्तमिति । तथापि एतद्योजनाया अप्यप्रामाण्ये च तेनैवेत्यादिग्रन्थमर्यादया ज्ञातुं शक्यत्वात् नेदं स्वतन्त्रयोजनान्तरम् । तत्त्वे वा उपलक्षणया इदमप्यूह्यम् । अत एव प्रामाण्ये हीति वाक्ये द्वेधा योजितमित्यलम् । न च याथार्थ्ये मानमस्तीत्यादीति । इत्यादि तद्बुद्धिस्थशङ्केति पाठो मूलकोशे । इत्यादिशङ्केति पाठस्तु तद्बुद्धिस्थ इति शोधापरामर्शात् । इयं च शङ्का परमाख्यविद्येत्येतदवतारे कृता । श्रुत्यनुमानरूपप्रमाणाभिधानेन च तत्परिहारः कृत इति ज्ञेयम् ।

स०व्र०— ननु तर्हि प्रामाण्यमात्रेणैव आरम्भणीयत्वसिद्धेर्विषयादिकथनं व्यर्थमित्यत उक्तम् काकदन्तपरीक्षेति ।

कुण्डल०— समर्थयत इति । प्रथमसूत्रे विषयप्रयोजनाधिकारिसमर्थकपदप्रयोगेनेति शेषः । एतदिति । एतत्प्रथमसूत्रं विषयादिसंपादनेनैव चरितार्थमिति शेषः । न च विषयादिसंपादनमेव आरम्भणीयत्वं प्रयोजयति । तस्य निर्विषयकाकदन्तपरीक्षादिग्रन्थवैलक्षण्यसंपादनेनान्यथैवोपपत्तेः । किन्तु प्रामाण्यसहितमेव तत्प्रयोजनमित्याह न चैतावतेति । अन्ये तु । एतदारम्भणीयत्वमित्यर्थः । प्रथमसूत्रे समर्थयत इति पूर्वेणान्वयः । न च प्रामाण्यसंपादनेनेवार्थ इत्याहुः । अत इति प्रामाण्यसहितस्यैव विषयादिमत्त्वस्यारम्भणीयत्वप्रयोजकत्वादेवेत्यर्थः । बुद्धिशुद्धय इति । अप्रामाण्यशङ्कानिरसनद्वारा बुद्धिशोधनायेत्यर्थः । एतेन प्रामाण्यसमर्थनं प्रथमसूत्रे कृतं चेत् भाष्ये तद्व्युत्पादनं व्यर्थं न चैतत्सूत्रतया भाष्यत्वव्याघात इति चोद्यं निरस्तम् । सूत्राक्षिप्तस्यैव प्रामाण्यस्य शिष्यबुद्धिशुद्धयर्थं व्युत्पादनाय भाष्यावतारात् ।

वि०— विषयादिसम्पादनेनैवैतदिति । एतदारम्भणीयत्वम् । निर्विषयत्वादिना नारम्भणीयताक्षेपपरिहाराय विषयादिसम्पादनेन प्रथमसूत्रं समर्थयते न तु प्रामाण्यसम्पादनेनेत्यर्थः । तर्हि विषयादिसम्पादनमात्रेणारम्भणीयत्वसम्भवे किं प्रामाण्यसम्पादनेनेत्याशङ्क्य निराकरोति न चेति । आरम्भणीयत्वमित्यतःपरं किन्त्विति शेषः । हिशब्दः प्रामाण्यस्यावश्यकत्वद्योतकः । तर्हि तावन्मात्रेणारम्भणीयत्वे सिद्धे विषयादिव्युत्पादनं व्यर्थमित्यत आह काकेति । तर्हि प्रामाण्यव्युत्पादनमुत्सूत्रितमित्यापन्नमित्यतः प्रामाण्याप्रतिपादने प्रमाणस्यानारम्भणीयतया न विषयादिव्युत्पादनावसरः अतस्तद्व्युत्पादकेन सूत्रेण प्रामाण्यस्याक्षिप्तत्वात् नोत्सूत्रितत्वमित्याशयेनोपसंहरति अत इति । अप्रामाण्यशङ्काकालुष्यनिरासो बुद्धिशुद्धिः ।

चक्रः— विषयादिसम्पादनेनैव तदिति । 'आरम्भणीयत्वं विषयादिव्युत्पादनेन सूत्रकारः समर्थयत' इत्यनुषक्तेनान्वयः ॥ सूत्रकारीयविषयादिव्युत्पादनमात्रेणैवारम्भणीयता सेत्स्यतीति तन्मात्रफलकभाष्यकारीय-प्रामाण्यतदुत्तमताव्युत्पादनं मन्दप्रयोजनमित्यत आह न चेति । तावता विषयादिव्युत्पादनमात्रेण । पूर्णीय'सिद्धमि'त्यंशेन प्रथमान्तमन्वेति ॥ अथ सूत्रकारः कथमारम्भणीयतानिर्वाहकप्रामाण्यं न व्युदपीपदत्, तदनावश्यकविषयादिमत्तां च प्रत्यपीपददित्यतः सौत्रप्रामाण्यतदुत्तमत्वे सुदृढनिरूढे मन्वानः, काकदन्त-परीक्षाग्रन्थसालक्षण्यशङ्कापादिततदनारम्भणीयताशङ्काऽपचिकीर्षयैव विषयादिमत्तामात्रमेव प्रत्यपीपदत् । भाष्य-कारस्तु सूत्रध्वनितमेव प्रामाण्यादिकं विनेयमतिशुश्रुत्सया प्रागभ्यधादिति सामञ्जस्यमित्याह प्रामाण्ये हीति ।

काशी०— भाष्यकारीयस्यैतच्छास्त्रप्रामाण्यतदुत्तमत्वव्यवस्थापनस्य वैयर्थ्यमाशङ्क्ते ननु चेति । आरम्भणीयत्वं अत्युपादेयत्वम् । जिज्ञासाकर्तव्यत्वोक्त्या समर्थ्यत इत्यर्थः । तथा च तदर्थत्वेन विषय-प्रयोजनातिशयवदुत्तमप्रामाण्यमपि प्रथमसूत्रार्थ एवेति भावः । ननु तत्र विषयप्रयोजनवत्प्रामाण्यं न स्फुटं प्रतीयत इत्यत आह तद्बोधायानेनैवेति । अतःशब्दस्यैव तदर्थतयाऽपि व्याख्यानसंभवादिति भावः । ननु प्रामाण्यनिश्चयस्य प्रवृत्तिहेतुत्वात्प्रथमसूत्रादेव तन्निश्चयेऽन्योन्याश्रय इति शङ्क्ते प्रथमसूत्र एवेति । प्रथम-भाष्येऽपीति । तत्रापि प्रामाण्यनिश्चयाभावात्प्रवृत्त्यनुपपत्तिरित्यर्थः । ननु निष्कम्पप्रवृत्तिं प्रत्येव प्रामाण्यनिश्चयस्य हेतुत्वेन प्रामाण्यसन्देहात्प्रथमभाष्ये सकम्पप्रवृत्तिसम्भवात्ततः शास्त्रप्रामाण्यनिर्णये सति सूत्रे निष्कम्पप्रवृत्त्युप-पत्तिरित्याशङ्क्ते सन्देहादिति । प्रथमभाष्य इत्यनुवर्तते । उक्तप्रमाणैः श्रुत्यनुमानैः । प्रामाण्यस्येति शेषः । सममिति । सन्देहात्प्रवृत्तस्येत्यादिकं समभित्यर्थः । प्रथमसूत्रे सकम्पप्रवृत्तौ सत्यामुत्तरत्र निष्कम्पप्रवृत्तिरिति भावः । विषयादीति । जिज्ञासाया विषयप्रयोजनादिमत्त्वप्रतिपादनेनार्थादेव प्रथमसूत्रे शास्त्रस्यारम्भणीयत्वसमर्थनं न तु साक्षादित्यर्थः । प्रथमसूत्रे हि जिज्ञासाया विषयादिमत्त्वेन कर्तव्यत्वमेव साक्षात्प्रतिपाद्यं शास्त्रस्यारम्भणीयत्वं तु तदाक्षिप्तमार्थिकमेवेत्यतःशब्देन तत्र प्रामाण्यरूपहेतुसमर्पणायोगाद्भाष्यकारीयं तद्व्यवस्थापनं सार्थकमिति भावः । नन्वेवमुत्सूत्रत्वादस्याभाष्यत्वापत्तिरत आह न चेति । यतो विषयादिमत्त्वमात्रेणारम्भणीयत्वं न सिद्ध्यति । विषयादिमतोऽप्यप्रमाणस्यानारम्भणीयत्वात् । नापि प्रामाण्यमात्रेण प्रमाणस्यापि विषयप्रयोजनादिशून्यस्या-तथात्वात् । सिद्धे तु प्रामाण्ये विषयादिव्युत्पादनाद्वत्यारम्भणीयत्वसिद्धिरतस्तदर्थतया सूत्रे विषयादिव्युत्पादना-त्प्रामाण्यं सिद्धवत्कृतमिति ज्ञायते । तथा च सूत्राक्षिप्तार्थप्रतिपादकत्वाद्भाष्यस्य नोक्तदोष इति भावः । बुद्धेः अन्तःकरणस्य । शुद्धिः अप्रामाण्यशङ्कराहित्यम् ।

गूढ०— न चैतावता हि शास्त्रस्यारम्भणीयत्वं व्युत्पादितं तदयुक्तं वैयर्थ्यात् । आरम्भणीयत्वस्य प्रकारान्तरेणैव सिद्धेरिति शङ्क्ते ननु चेति । प्रथमसूत्रे प्रवृत्तावारम्भणीयत्वम् आरम्भणीयत्वे सति च प्रथमसूत्रे प्रवृत्तिरित्यन्योन्याश्रय इति शङ्क्ते प्रथमेति । तुल्यन्यायतया परिहरति प्रथमेति । विषयाद्यभावादनारम्भणीयत्वे प्राप्ते तत्सद्भावेनारम्भणीयत्वव्युत्पादकं हि प्रथमसूत्रम् । न च प्रामाण्याभावे तावता आरम्भणीयत्वं सिद्ध्यतीति तदवश्यमुपपादनीयमित्याह मैवमित्यादिना । प्रामाण्याभावे प्रथमं विषयादिव्युत्पादनमसङ्गतं स्यादिति भावः ।

न च तावतेति । ननु विषयादिव्युत्पादनेनारम्भणीयत्वं कुतो न सिद्धयति प्रामाण्याभावादिति चेत् । तथा सति विषयादिमत्ताया एवासंभवात् । न हि वस्तुतो विषयाद्युपेतं प्रामाण्यरहितमिति संभवति । तथाच कथमुक्तं विषयादिसंपादनमात्रेण नारम्भणीयत्वं किन्तु प्रामाण्ये सतीति । तदप्युपपादनीयमिति चेन्मैवम् । न हि वस्तुतो विषयाद्युपेतमपि प्रामाण्यशून्यं चेन्नारम्भणीयमतः प्रामाण्यं व्युत्पादनीयमित्येतद्वन्यार्थः । किन्तु विषयादिव्युत्पादनेन तज्ज्ञानमात्रसंभवेऽपि प्रामाण्यनिश्चयाभावेनारम्भणीयत्वं संभवतीत्यतः प्रामाण्यनिश्चयार्थमुक्तः प्रयत्नः आवश्यक एवेत्याशयान्न कश्चिद्दोषः । तर्हि सूत्रार्थकथनरूपत्वाभावेन भाष्यलक्षणाभावादेतदभाष्यमित्यत आह **अत इति** । तथाच सूत्रार्थकथनरूपत्वाभावेऽपि तदाक्षिप्तार्थकथनरूपत्वात् भाष्यत्वं युक्तमिति भावः । अतःशब्देन हि वेदप्रामाण्यमुक्तम् । तदितिकर्तव्यतारूपा हि मीमांसा, अतः करणप्रामाण्ये उक्ते तदविनाभूतत्वात्तदितिकर्तव्यता-रूपमीमांसाया अपि प्रामाण्यं सिद्धयतीति भावः ।

८३ **सु०— 'तथाऽपि नेदं व्याख्यातव्यं व्याख्यातत्वादि'त्यत्र 'अन्वपि चे'ति यत् प्रयोजनान्तरमस्तीति सूचितं तद्विवरणार्थमाह स्वयमिति ।**

अनु०— स्वयं कृताऽपि तद्व्याख्या क्रियते स्पष्टतार्थतः ॥

यद्यपि, तेषां ब्रह्मसूत्राणां व्याख्या स्वयं मयैव भाष्ये कृता, तथाऽपि पुनरत्र स्पष्टतैव अर्थः प्रयोजनं यस्य स्पष्टतार्थः, तस्मै स्पष्टतार्थतः । भाष्ये अस्पष्टीकृतमर्थं स्पष्टीकर्तुं क्रियते ।

परि०— सूचितमिति । 'अन्वपि चाहमेव' इत्यत्रस्थचशब्देनेति भावः ॥

यादु०— अस्तीति सूचितमिति । 'अन्वपि चाहमेवे'त्यत्र 'च'शब्देनेति शेषः ॥

आनन्दः— ननु स्वयंकृतेत्यनेन भाष्येणास्य गतार्थत्वकथनमयुक्तम्, अन्वित्यनेनैवास्य गतार्थत्वादित्यत आह **तथापीति** । तद्व्याख्येत्यत्र तच्छब्दपरामृष्टं न प्रतीयते व्याख्या कुत्रेति च न प्रतीयते । स्पष्टतार्थत इत्यत्र च स्पष्टतायाः प्रयोजनकथनार्थमयं ग्रन्थ इति च न प्रतीयते । अतो **व्याख्याति यद्यपीति** । एवं च तच्छब्दः आवृत्त्या तेषां तस्मिन्भाष्य इति उभयपरम् ।

वा०चं०— कृतस्य करणायोगात् 'यद्यपि, तथाऽपि, पुनरि'त्यर्थकत्वम् 'अपि'शब्दस्य दर्शयन् वाक्यं योजयति **यद्यपीति** ।

वा०र०— **सूचितमिति** मूलम् । **अन्वपि चेति** । चशब्देनेति शेषः । **इत्यर्थकत्वमिति** । इत्येतत् त्रितयार्थकत्वमित्यर्थः ।

स०व्र०— सूचितमिति । 'अन्वपि चे'त्यत्र 'च'शब्देनेति शेषः ॥

कुण्डल०— स्पष्टतार्थत इति। आद्यादिभ्य उपसङ्ख्यानमिति चतुर्थ्यास्तसिः।

विद्व०— अत्रेति। एवं शङ्कायां सत्यामित्यर्थः।

काशी०— व्याख्यां करोमीत्युक्तत्वात्स्वयमित्यादेः पौनरुक्त्यमित्याशङ्क्य निराह **तथाऽपीति**। सूचितमित्यस्य चशब्देनेत्यादिः। **आहेति**। अनुवदतीत्यर्थः। कृतस्य पुनः करणायोगाद्वाक्यभेदेन योजयति **यद्यपीति**। **स्पष्टता** निराकाङ्क्षप्रतिपत्तिः।

गूढ०— ननु स्वयंकृतेत्यनेन भाष्येणास्य गतार्थत्वकथनमयुक्तम्, अन्वित्यनेनैवास्य गतार्थत्वादित्यत आह **तथापीति**। तद्व्याख्येत्यत्र तच्छब्दपरामृष्टं न प्रतीयते। व्याख्या कुत्रेति च न प्रतीयते। स्पष्टनार्थत इत्यत्र च स्पष्टताया प्रयोजनकथनार्यमयं ग्रन्थ इति च न प्रतीयते। अतो व्याख्याति **यद्यपीति**। एवं च तच्छब्दः आवृत्त्या तंपां तस्मिन् भाष्ये इत्युभयपरम्। स्वयमित्यस्यार्थो **मयेति**।

८४ सु०— स्पष्टीकरणं चानेकविधम्। क्वचिदनुक्तांशस्योक्तिः। क्वाप्यतिसंक्षिप्तस्य विस्तरणम्। क्वचिदतिविस्तृततया बुद्ध्यनारूढस्य संक्षेपः। क्वापि विक्षिप्तस्य एकीकरणम्। कुत्राप्युक्तस्योपपादनम्। क्वचिदपव्याख्याननिरासेन दृढीकरणमित्यादि तत्र तत्र द्रष्टव्यम्।

परि०— अनुक्तांशस्येति। सिद्धार्थे व्युत्पत्त्यादेः। **अतिसंक्षिप्तस्येति**। व्यक्तमेतदनुपदं तत्र भाष्याद्यपद्यार्थ इत्यादौ॥ **संक्षेप इति**। 'एतद्भावाभिधं लिङ्गम्' इत्यादिविषयमालायाः पूर्वोत्तरपक्षयुक्तिमालादेश्च करणादिति भावः॥ **एकीकरणमिति**। आनन्दमयनयादौ॥ **कुत्रापीति**। अन्तरादिनयेष्वभ्यधिकाशङ्कादिनोपपादनम्। अपव्याख्याननिरासस्तत्र तत्र व्यक्त एव। **इत्यादि** इत्यादिपदेन क्वचिद्बाधकोद्धारादिर्ग्राह्यः॥

यादु०— अनुक्तांशस्य इति। यथा प्रथमाधिकरणे भाष्यानुक्तानाम् 'अतः'शब्दार्थानामुक्तिरित्यादि॥ **अतिसंक्षिप्तस्येति**। एतदुदाहरणम् तु 'अपिशब्दो विशेषणान्तरसमुच्चयार्थः। तद्विवर्णमस्येत्यादी'ति वक्ष्यमाणम्। तथा मान्त्रवर्णिकसमाख्याया भाष्ये संक्षेपेणोदितायाः 'तत्र सत्यत्वं, मृष्टान्नग्राणयोरपी'त्यादिनाऽत्र विवरणमित्यादिकं ज्ञेयम्॥ **संक्षेप इति**। यथा प्रथमेऽध्याये तृतीयपादार्थस्य, द्वितीये चतुर्थपादार्थस्य, तृतीये प्रथमपादार्थस्य चतुर्थे तृतीयपादार्थस्य पूर्वपक्षसिद्धान्तन्यायोक्त्यादिमात्रेण संक्षेप इत्यादि। **विक्षिप्तस्येति**। यथा चतुर्थे शेषमार्गगरुडमार्गस्य वा भाष्ये विक्षिप्ततयोक्तस्यात्र 'सोमस्तु वाराशयुत' इत्यादिनैकीकरणमित्यादि। उक्तस्योपपादनमित्यस्य 'चेष्टा हि चेतनानां या सा भवेत्तत्प्रसादत' इत्याद्यभ्यधिकाशङ्काप्रदर्शनादिनोपपादनमुदाहरणं ज्ञेयम्। **अपव्याख्याननिरासेनेति**। यथा 'बन्ध्यमिथ्यात्वं नैवमुक्तिरपेक्षत' इत्यादि। 'इत्यादी'त्यत्रादिपदेन द्वितीये प्रमाणलक्षणादेरुक्तिः अनुक्तांशोक्त्युक्तोपपादनयोः सूत्रार्थमात्रविषयत्वान्न ताभ्यामिदं गतार्थमित्यवधेयम्।

आनन्दः— ननु स्पष्टीकरणं नाम व्याख्यानमेव ततु टीकादावेव कृतमिति किमनेन । स्पष्टीकरणं च सूत्राणामेवेति प्रतीयते । अत आह **स्पष्टीकरणं चेति**।

श्रीनिधि०— दृढीकरणमित्यादीति प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः इति सूत्रपूर्वपक्षभाष्ये सृष्टिसंहारकर्तृत्वमेवास्य न पालकत्वं स्वतस्सिद्धेरित्यत्र पालकत्वस्य मुक्तांशपूरणमादिपदार्थः।

वा०चं०— ननु सर्वत्रानुव्याख्याने, सङ्क्षिप्य भाष्योक्तविस्तरणादर्शनादयुक्तमेतदित्यत आह **स्पष्टीकरणं चेति** ॥ **इत्यादि तत्र तत्रेति** । 'आदि'पदेनासङ्गतिपरिहारादिकं सङ्गृह्यते । 'अतः'शब्दार्थतया बन्धसत्यत्वोक्ति-प्रभृत्यनुपदं वक्ष्यमाणस्य 'उद्धवादिदं, शास्त्रप्रभवमि'त्यादि, 'एवमेवाविरोधेन प्रारब्धस्यैव कर्मणः। ज्ञानं दृष्टफलं प्रोक्तं मुक्तिश्चैवंह लभ्यते । अतो जगद्व्यापृतिमन्त एवे'त्यादि, 'वैराग्यतो भक्तिदार्ढ्यं, युक्तितो ज्ञातवेदार्थ' इत्यादि, 'परमास्व्यविद्ये'त्यादि, 'आत्मेति नाम कथितमि'त्यारभ्य 'तस्माद्यथोक्तमार्गेणे'त्यादि, 'गुर्ल्गुरूणामि'त्यादि च क्रमेण तत्र तत्र द्रष्टव्यमित्यर्थः।

वा०र०— **सङ्क्षिप्येति** । भाष्योक्तविशेषणम् । इत्यादीत्यादिपदोक्तासङ्गतिपरिहारादिमेलने स्पष्टीकरणं समधा जातमिति तथैव तदुदाहरणान्याह **अतःशब्देत्यादि** । **प्रभृत्यन्तमनुक्तांशोदाहरणम्** । **प्रभवमित्यादि** इत्यादीनि इत्यादिपञ्चकानि दृढीकरणमित्यन्तपञ्चकानामुदाहरणानि । आदिपदोक्तासङ्गतिपरिहारस्य गुर्ल्गुरूणाम् इत्यस्य उदाहरणम् । टीकास्थादिपदेन पुनरुक्तिपरिहारादिसङ्ग्रहः । यथा 'मानमेयविभेदेन पुनरुक्तिर्न जायते' इत्यादि ज्ञेयम् ।

स०व्र०— **दृढीकरणमित्यादि इति** । 'आदि'शब्देन शेषकरणं ग्राह्यम् । यथा 'प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय' इति सूत्रपूर्वपक्षभाष्ये 'सृष्टिसंहारकर्तृत्वमेवास्य न पालकत्वं स्वतःसिद्धेरि'त्यत्र 'पालनस्ये'ति शेषकरणं कृतम् ॥

कुण्डल०— अनुक्तानां जिज्ञासाधिकरणादौ भाष्ये अनुक्तानामतःशब्दादीनां **अनुक्तांशस्योक्तिः** । **अतिसङ्क्षिप्तस्येति** । अपिशब्दो विशेषणान्तरसमुच्चयार्थः । **तद्विवरणमस्येत्यादि** । तथा मान्त्रवर्णिकसमाख्यायाः भाष्ये सङ्क्षेपेणोदितायाः तत्र सत्यत्वं सृष्टचात्रप्राणयोरपीत्यादि विवरणम् । **अतिविस्तृततयेति** । भाष्ये अति-विस्तृतया प्रतिपादितस्य । प्रथमाध्यायतृतीयपादार्थस्य द्वितीये चतुर्थपादार्थस्य तृतीये प्रथमपादार्थस्य चतुर्थे तृतीयपादार्थस्य चात्र पूर्वपक्षसिद्धान्तन्यायोक्तिमात्रेण सङ्क्षेपः **विक्षिप्तस्येति** । भाष्ये चतुर्थाध्याये विक्षिप्योक्तस्य शेषमार्गस्य गरुडमार्गस्य चात्र 'सोमस्तु वारीशयुत' इत्यादिना एकीकरणम् । **उक्तस्योपपादन इति** । 'चेष्टा हि चेतनानां या सा भवेत्तत्प्रसादतः । अचेतनस्वभावस्तु विवरादिः कथं ततः ।' इति शङ्कानिवृत्त्यर्थमाकाश इति नाम चेत्यादिना अभ्यधिकाशङ्काप्रदर्शनोपपादनम् । **अपव्याख्याननिरासेनेति** । 'इत्युक्तेर्बन्धमिथ्यात्वं नैव मुक्तिरपेक्षते' इत्यादिना अपव्याख्याननिराकरणेन दृढीकरणम् । आदिपदेन द्वितीये प्रमाणलक्षणादेरुक्तिः । अनुक्तांशोक्तोपपादनयोः सूत्रार्थमात्रविषयत्वान्न ताभ्याम् इदं गतार्थम् ।

विद्व०— **दृढीकरणमित्यादीत्यत्र** आदिपदेन गतार्थतापरिहारसूत्रशेषपूरणादिग्रहणम् ।

चषक:— **अनुक्तांशस्य** अत:शब्दार्थतया बन्धसत्यत्वादेः । **अतिसङ्क्षिप्तस्य** मान्त्रवर्णिकसमाख्योक्तार्थस्य । **विस्तरणम्** 'सृष्ट्वान्नप्राणयोरपी'त्यादिना । **सङ्क्षेपः** । **समन्वयलक्षणे** उभयत्रप्रसिद्धनामलिङ्गोभयपादार्थस्य, **अविरोधलक्षणे** तुरीयपादार्थस्येत्यर्थः । **विक्षिप्तस्येति** । तुरीये भाष्ये विक्षिप्तोक्तशेषगरुडमार्गादिरूपार्थस्य 'सोमस्तु वारीशे'त्यादिना सङ्कलनम् । **उक्तस्योपपादनं** 'चेष्टा ही'त्याद्यधिकाशङ्काप्रदर्शनादिना । **दृढीकरणं** बन्धमिथ्यात्वनिरासेनेत्यादिकं तत्र तत्रावधेयम् ॥

काशी०— सर्वत्रैकरूपस्पष्टीकरणाभावादाह **अनेकविधमिति** । अनुपयुक्तोक्तेरुक्तार्थस्पष्टीकरणत्वाभावादंशेति । आकाङ्क्षितार्थेष्वनुक्तार्थस्योक्तिरिति यावत् । **यथोद्धारार्थस्योक्तिः** । अतिसङ्क्षिप्तस्य विवरणमन्तेरण दुर्ज्ञेयार्थस्य यथा भाष्याद्यपद्यस्य अत:शब्दो हेत्वर्थ इत्यादेश्चानेकधा विवरणम् । **अतिविस्तृततयेति** । यथा ब्रह्मशब्दस्य विष्णौ मुख्यत्वोपपादनस्य तत्तदधिकरणपूर्वपक्षसिद्धान्तन्यायानां च सङ्क्षिप्योक्तिः । विक्षिप्तस्य व्यवधानेनोक्तार्थसमुदायस्यैकीकरणमव्यवधानेनोक्तिः । यथा चतुर्थे शेषगरुडमार्गादिः । उक्तस्योपपादनं व्यवस्थापनम् । यथा गुरुश्चेति बहुवचनार्थस्य बहुधा गुरुत्वोक्त्या अन्तरधिकरणादेश्चाभ्यधिकाशङ्काप्रदर्शनेनोपपादनम् । **दृढीकरणमिति** । उक्तस्येति वर्तते । यथा व्याख्यातश्रुतिसूत्रार्थस्यावधारणमित्यर्थः । तच्च प्रत्यधिकरणं द्रष्टव्यम् । इत्यादीत्यादिपदेन सङ्गतिशङ्कोद्धारादेर्ग्रहणम् । यद्यपि सङ्क्षिप्तविवरणादौ सर्वत्रानुक्तांशोक्तेः सत्त्वात्तत एवांतरेषां गतार्थता । न च विस्तृतसङ्क्षेपे विक्षिप्तैकीकरणे च कथमुक्तांशोक्तिरिति वाच्यम् । यतो विशेषरूपैरुक्तानां सामान्यरूपेणोक्तिः सङ्क्षेपस्तत्र चानुक्तांशस्य सामान्यरूपस्योक्तिरस्त्येव । विक्षिप्तानामेकीकरणेऽपि मिथः सङ्गत्यादेरनुक्तांशस्योक्तिरस्त्येव । तथाऽपि सूत्रार्थेष्वनुक्तांशोक्तेर्विवक्षितत्वान्न दोषः । क्वचित्साङ्कर्येऽप्यसङ्कीर्णोदाहरणान्तरसत्त्वेन पृथगुक्तेः सार्थक्यात् ।

गूढ०— ननु स्पष्टीकरणं नाम व्याख्यानमेव तत्तु टीकादावेव कृतमिति किमनेन । स्पष्टीकरणं च सूत्राणामेवेति प्रतीयते । अत आह **स्पष्टीकरणं चेति** ।

८५ सु०— नन्वेकत्रैव सर्वं वक्तव्यं वक्तव्यं, किं प्रस्थानभेदेन । मैवम् । यतः सङ्क्षेपविस्तराभ्यामुक्तं श्रोतृणां सुग्रहं सुप्रयोजनं च भवति । यथोक्तम् । 'सङ्क्षेपविस्ताराभ्यां च (तु) कथयन्ति मनीषिणः । बहुवारस्मृतेस्तस्य फलबाहुल्यकारणात्' इति ।

परि०— यथोक्तमिति । प्रथमस्कन्धतात्पर्ये ।

आनन्दः— ननु कर्तृभेदे हि सति एकेन सङ्क्षेपे कृतेऽपरेण विस्तरकरणमिति प्रस्थानभेदो युज्यते । प्रकृते चैककर्तृकत्वान्न प्रस्थानभेदो युज्यत इति शङ्कते **नन्विति** । **यत इति** । तथा च कर्तृभेदोऽप्रयोजक इति भावः । सुग्रहत्वमात्रमनुपयुक्तमत आह **सुप्रयोजनं चेति** । **सङ्क्षेपविस्ताराभ्यां कथनस्य प्रयोजनमाह बहुवारस्मृतेस्तस्येति** । तथाच सङ्क्षेपादिना कथितस्यार्थस्य बहुवारस्मृतिरेव तत्फलमिति भावः । स्मृतेरपि किं फलमित्यत उक्तं **फलेति** ।

कं०रा०— सुग्रहं सुप्रयोजनं चेति । सुप्रयोजनशब्दवत्सुग्रहशब्दोऽपि शोभनो ग्रहो यस्येति बहुव्रीहिसमासरूपः । तेन ईषद्दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खलिति खलन्तत्वात्सुग्रहशब्दस्य खलर्थयोगे च 'न लोकाव्ययनिष्ठाखलर्थतृनामि'ति षष्ठीप्रतिषेधाच्छ्रोतृणामिति षष्ठ्यनुपपत्तिरिति चोद्यमनवकाशमिति ध्येयम् । **बहुवारेति** । तस्य सङ्क्षेपविस्ताराभ्यां कथनस्य बहुवारस्मृतेर्बहुवारस्मृतिरूपव्यापारात् फलबाहुल्यकारणात् । भावप्रधानो निर्देशः । तथा च सङ्क्षेपविस्ताराभ्यां कथनस्य बहुवारस्मृतिद्वारा फलबाहुल्यकारणत्वान्मनीषिणः सङ्क्षेपविस्ताराभ्यामर्थं कथयन्तीति फलितम् । यद्वा । बहुवारं स्मृतिर्यस्य कथनस्य तद्बहुवारस्मृतिः । तस्य तृतीयादिषु भाषितपुंस्कं पुंवद्वालवस्येति पुंवद्भावः । तथा च बहुवारस्मृतिपूर्वकस्य तस्य सङ्क्षेपविस्ताराभ्यां कथनस्य फलबाहुल्यकारणत्वादित्यर्थः । कथनस्यार्थस्मृतिपूर्वकत्वं चार्थं बुद्ध्वा शब्दरचनेति न्यायेन प्रसिद्धमेव । अस्मिन्पक्षे कथनप्रयोजनमुक्तं भवति । पूर्वत्र तु द्वारभूतस्मृतेः श्रोतृनिष्ठत्वात्तत्प्रयोजनमुक्तमिति वेदितव्यम् । ननु पूर्वस्मिन्पक्षे बहुवारस्मृतेरित्यनुपपन्नम् । कथनव्यापारभूतश्रोतृनिष्ठार्थज्ञानस्य शाब्दत्वेन स्मृतित्वाभावादिति चेन्न । स्मृतिशब्देनानुसन्धानमात्रस्य विवक्षितत्वात् । अथवा । बहुवारं स्मृतिर्यस्मात्तद्बहुवारस्मृतिः । तस्य बहुवारस्मृतिहेतोः सङ्क्षेपविस्ताराभ्यां कथनस्य फलबाहुल्यकारणत्वादित्यर्थः । ननु सङ्क्षेपविस्ताराभ्यां कथनस्य बहुवारस्मृतिद्वारा फलबाहुल्यसंपादकत्वे एकस्मिन्नेव प्रस्थाने सङ्क्षिप्योक्त्वा विवक्षितं प्रमेयं विस्तरशोऽपि वक्तव्यं स्यात् । न प्रस्थानभेदे किञ्चिन्नियामकमस्तीति चेत् । एकस्मिन्प्रस्थान एव सङ्क्षिप्योक्त्वा विस्तरशोऽपि वक्तव्यमित्यस्य कोऽर्थः । एकैकस्याधिकरणस्य प्रमेयं सङ्क्षेपत उक्त्वा विस्तरग्रन्थे वक्तुमिष्टमपि प्रमेयं तत्तदधिकरणान्तर्गतत्वेन वक्तव्यमिति वा उत अथातो ब्रह्मजिज्ञासेत्यादेरनावृत्तिः शब्दादनावृत्तिः शब्दादित्यन्तस्य सूत्रसन्दर्भस्य सङ्क्षिप्यार्थं वर्णयित्वा तत्रैव प्रस्थाने विस्तरग्रन्थविवक्षितं प्रमेयं वक्तव्यमिति । नाद्यः । असुग्रहत्वप्रसङ्गात् । न हि जिज्ञासाधिकरणस्य संक्षिप्य प्रमेयमुक्त्वा तत्रैवाधिकरणे विस्तरग्रन्थे वक्तुमिष्टस्यैतावतः प्रमेयस्य कथने श्रोतृभिः सुग्रहं भवति । न द्वितीयः । आद्यसूत्रमारभ्यान्त्यसूत्रपर्यन्तं सङ्क्षेपेणार्थवर्णनं कृते तस्य सङ्क्षेपप्रस्थानस्य परिसमाप्तत्वेन तत्रैव प्रस्थाने विस्तरग्रन्थप्रमेयं वक्तव्यमित्यस्य वचसो रिक्ततया प्रस्थानान्तरारम्भस्यैव प्राप्तत्वादिति ।

श्रीनिधि०— किमर्थं कथयन्तीत्यत आह **फलबाहुल्यकारणात्** । फलबाहुल्यस्य निमित्तात् । तस्य कथितस्य बहुवारस्मृतेरिति स्मृतिमपेक्ष्येत्यर्थः । त्यब् लोपे कर्मण्यधिकरणे च पञ्चमी वाच्येति वार्तिकात् ।

वा०र०— वक्तव्यं वक्तव्यमिति मूलम् । प्रथमस्य वक्तव्यमित्यस्य वक्तुमिष्टं यावत्तावत् इत्यर्थः । द्वितीयं तु द्रष्टव्य इत्यादिवत् विधिरूपमिति विवेकः । एवं तद्वाच्यं वाच्यमिति तत्त्वोद्योतटीकायामपि ज्ञेयम् । **सङ्क्षेपविस्ताराभ्यां कथनस्य प्रयोजनमाह बहुवारेति मूलम्** । तस्यार्थस्य स्मृतेरिति मूले चतुर्थ्यर्थे षष्ठी । बहुवारस्मृत्यर्थमित्यर्थः । अर्थविषयबहुवारस्मृतिरेव सङ्क्षेपादिकथनस्य प्रयोजनमिति भावः । स्मृतेरपि किं फलमित्यतः फलबाहुल्यकारणात् करणत्वादित्युक्तम् । तस्य बहुवारस्मृतेः यत् फलबाहुल्यं तल्लक्षणात् कारणात् इति वा संबन्धः ।

कुण्डल०— सुग्रहमिति । शोभनो ग्रहो यस्येति बहुव्रीहिसमास एवायं सुग्रहशब्दः न तु सूपसृष्टात् ग्रह उपादान इत्यस्मात् ईषदुःसुषु कृच्छ्राकृच्छ्रार्थेषु खलिति सूत्रविहिते खल्प्रत्यये सति निष्पन्नः । एवं च खलन्तसुग्रहशब्दयोगे नलोकाव्ययनिष्ठाखल्र्थतृनामित्यनेन षष्ठीनिषेधात् श्रोतृणामिति षष्ठी न युक्तेति चोद्यानवकाश इति द्रष्टव्यम् । बहुवारेति । तस्य सङ्क्षेपविस्ताराभ्यां कथनस्य फलबाहुल्यकारणात् फलबाहुल्यहेतोः बहुवारस्मृतेः बहुवारस्मरणलक्षणप्रयोजनान्निमित्तात् । सङ्क्षेपविस्तरकथनस्य बहुफलहेत्वनेकवारस्मरणलक्षणप्रयोजनकत्वादिति यावत् । मनीषिणः शास्त्रप्रतिपाद्यमर्थं सङ्क्षेपविस्ताराभ्यां कथयन्ति हीत्यर्थः । स्वामिचरणास्तु तस्य सङ्क्षेपविस्ताराभ्यां कथनस्य बहुवारस्मृतिरूपव्यापारात् । फलबाहुल्यकारणात् फलबाहुल्यकारणत्वात्, भावप्रधानो निर्देशः । यद्वा बहुवारं स्मृतिर्यस्य कथनस्य तत् बहुवारस्मृतिः तस्य । तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्येति पुंवद्भावः । तथाच बहुवारस्मृतिपूर्वकस्य फलबाहुल्यकारणत्वादित्यर्थः । कथनस्यार्थस्मृतिपूर्वकत्वं चार्थं बुद्ध्वा शब्दरचनेति न्यायेन प्रसिद्धमेवास्मिन् पक्षे कथनप्रयोजनमुक्तम् । पूर्वत्र तु द्वारभूतस्मृतेः श्रोतृनिष्ठत्वात् तत्प्रयोजनमुक्तम् । ननु पूर्वस्मिन् पक्षे बहुवारस्मृतेरित्यनुपपन्नं कथनव्यापारभूतश्रोतृनिष्ठार्थज्ञानस्य शाब्दत्वेन स्मृतित्वाभावादिति चेन्न । स्मृतिशब्देनानुसन्धानमात्रस्य विवक्षितत्वात् । अथवा बहुवारं स्मृतिर्यस्मात्तद्बहुवारस्मृतिः, तस्य बहुवारस्मृतिहेतोः कथनस्य फलं बाहुल्यकारणत्वादित्यर्थ इति व्युत्पादितवन्तः । एतेनोक्तरीत्या सङ्क्षेपविस्ताराभ्यां कथनस्यावश्यकत्वे एकस्मिन्नेव प्रस्थाने तत्संभवेन प्रस्थानभेदो निरर्थक इति चोद्यं निरस्तम् । तथा हि । एकस्मिन्नेव प्रस्थाने संक्षिप्योक्त्वा विस्तरशो वक्तव्यमिति वा अथातो ब्रह्मजिज्ञासेत्यारभ्य अनावृत्तिःशब्दादित्यन्तं सूत्रसन्दर्भं व्याख्याय तत्रैव ग्रन्थे विस्तरग्रन्थे विवक्षितं प्रमेयं वक्तव्यमिति वा । नाद्यः । असुग्रहत्वप्रसङ्गात् । न हि जिज्ञासाधिकरणस्य सङ्क्षेप्य प्रमेयमुक्त्वा तत्रैवाधिकरणे विस्तरग्रन्थे वक्तुमिष्टस्य कथने श्रोतुः सुग्रहं भवति । न द्वितीयः । आद्यसूत्रमारभ्य अन्त्यसूत्रपर्यन्तं सङ्क्षेपेणार्थवर्णने कृते तस्य सङ्क्षेपप्रस्थानस्य परिसमाप्तत्वेन तत्रैव प्रस्थाने विस्तरग्रन्थप्रमेयं वक्तव्यमित्यस्य वचसो रिक्ततया प्रस्थानान्तरारम्भस्यैव प्राप्तत्वात् ।

काशी०— सर्वमिति । आकाङ्क्षितं यावदर्थजातमित्यर्थः । सङ्क्षेपेति । सङ्क्षेपविस्तररूपप्रस्थानभेदेन इत्यर्थः । सुग्रहमिति । एकत्र सर्वस्योक्तौ मन्दानां दुर्ग्रहं स्यादिति भावः । तर्हि समर्थान्प्रति तदैयर्थ्यमत आह सप्रयोजनं चेति । उक्तार्थसङ्कलत्वेनानुक्तार्थग्रहणे उक्तार्थस्य पुनःपुनर्ज्ञानात्फलाधिक्यमिति भावः । शिष्टाचारोऽप्येवमेवेत्याशयेन प्रथमस्कन्धतात्पर्योदाहृतवचनसंमतिमाह यथोक्तमिति । तुशब्देन सुग्रहत्वं सूचयति । तस्य कथनस्य बहुवारस्मृतिद्वारा फलबाहुल्यवत्त्वनिमित्तादित्यर्थः ।

गूढ०— ननु कर्तृभेदे हि सति एकेन सङ्क्षेपे कृते परेण विस्तरकरणमिति प्रस्थानभेदो युज्यते । प्रकृते चैककर्तृकत्वान्न प्रस्थानभेदो युज्यत इति शङ्कते नन्विति । यत इति । तथाच कर्तृभेदोऽप्रयोजक इति भावः । सुग्रहत्वमात्रमनुपयुक्तमत आह सुप्रयोजनं चेति । सङ्क्षेपविस्ताराभ्यां कथनस्य प्रयोजनमाह बहुवारस्मृतेस्तस्येति । तथाच सङ्क्षेपादिना कथितस्यार्थस्य बहुवारस्मृतिरेव तत्फलमिति भावः । स्मृतेरपि किं फलमित्यत उक्तं फलेति ।

८६ सु०— तत्र भाष्याद्यपद्यार्थः अत्र श्लोकत्रयेण विवृतः। तथा हि। सर्वगुणोदीर्णतोक्त्या प्राप्ता गुणगुणिभेदशङ्का निखिलेत्यादिना निराकृता। 'ज्ञेयत्वगम्यत्वयोरितरसाधारण्यात्कथं विशेषणत्वमि'त्याशङ्का 'आप्यतममि'त्यनेन परिहृता। अपिशब्दो विशेषणान्तरसमुच्चयार्थः, तद्विवरणम् अस्येत्यादि। 'शास्त्रप्रभवं' इत्यादिभिर्बहुभिः प्रकारैर्यद्गुरुत्वोपपादनं तेन 'गुरूंश्चे'ति बहुवचनान्तं पदं विवृतम्। गुरुदेवतयोः भेदे 'अपि'पदेनारुचिः सूचिता। तद्विवृतिः 'तमेवे'ति। 'सम्प्र'शब्दाभ्यां 'नत्वे'ति विशेषितम्। निरुपपदसूत्रग्रहणेन यद्ब्रह्मसूत्राणां सर्वोत्तमप्रामाण्यं सूचितं तदुपपादनं परमाख्येति। यद् 'द्वापर' इत्यादिभाष्यं तदसङ्गतम्। सूत्रार्थवचनं प्रतिज्ञाय तदुत्पत्तिक्रमकथनस्योपयोगादर्शनात्। मैवम्। यस्माद् आप्तिमूलत्वादियुक्त्याऽपि ब्रह्मसूत्राणां सर्वोत्तमं प्रामाण्यं समर्थयितुं एतदिति दर्शयति 'गुरुर्गुरूणामि'त्यादिनेति।

बिन्दुः— अपिशब्दो विशेषणान्तरसमुच्चयार्थ इति। भाष्याद्यपद्ये गुरूंश्चापीत्यपिशब्दः अस्योद्भवादिदमित्यनुव्याख्यानाद्यपद्योक्तविशेषणसमुच्चयार्थ इत्यर्थः। यद्यपि स्वस्य गुरुदेवतयोश्च शब्दप्राप्तभेदेऽपीत्यस्वरसं सूचयतीति भाष्यटीकायां व्याख्यातं तथापि व्याख्यानान्तरमेतदित्यदोषः। संप्रशब्दाभ्यामिति। सन्नमामीत्याद्यपद्यस्थः संशब्दः। प्रणम्येति। द्वितीयपद्यस्थः प्रशब्दः ताभ्यां नत्वा सूत्रार्थ उच्यत इत्यत्र नत्वेत्येतद्विशेषणीयम्। यद्यपि ग्रन्थान्तरस्थैरुपसर्गैर्ग्रन्थान्तरस्थानां क्रियाणां विशेषणं न संभवति ते प्राग्धातोः छन्दसि परेऽपि व्यवहिताश्चेत्युक्तत्वात् तथापि तद्ग्रन्थारम्भेऽपि मया विशिष्टमेव नमनं कृतमिति व्याख्यानेन सूचयत्याचार्य इति तात्पर्यार्थो बोद्धव्यः।

परि०— अतिसङ्क्षिप्तस्य विस्तरणमित्येतद्व्यनक्ति तत्रेति। निखिलेत्यादिना निराकृतेति। देहस्य गुणात्मकत्वोक्त्या देहदेहिनोरभेदस्य प्रमितत्वाद्गुणाभेद एवोक्तो भवतीति भावः॥ इतरेति। कर्मदेवतासाधारण्यादित्यर्थः। अपिशब्दस्यारुचिसूचकत्ववदनुक्तसमुच्चयरूपार्थान्तरमप्युपेत्य आह अपिशब्द इति॥ सम्प्रेति॥ आद्यद्वितीयश्लोकस्थसम्प्रशब्दाभ्यां यथाक्रमं देवतानतिर्गुरुनतिश्च विशेषितेत्यर्थः। द्वापर इत्यादिभाष्यविवृतिपरं गुरुर्गुरूणामित्यादीत्याह द्वापर इतीति।

गु०दी०— देहदेहिभावकृतभेदशङ्का एकशब्दस्यैकीभूतार्थकत्वमादाय परिहर्तुं शक्येति भावेनाह सर्वगुणोदीर्णतोक्त्येति। बहुवचनान्तं पदम् इत्यस्य माहात्म्यातिशयाद्बहुवचनान्तपदमित्यर्थः।

वं०प०— बहुवचनान्तं पदमिति। गुरुत्वोपपादकप्रकाराणां बहुत्वात् बहुवचनम्। तथा च 'गुरूनि'त्यस्य 'बहुभिः प्रकारैरुपपाद्यं यद्गुरुत्वं तदुपेतानि'त्यर्थो द्रष्टव्यः।

आनन्दः— नन्वस्य ग्रन्थस्य भाष्यसूत्रविवरणरूपत्वे आद्यश्लोकेन भाष्यस्थं किं विवृतमत आह तत्रेति। तत्र कानि कानि विशेषणानि केन पदेन विवृतानीत्यत आह **तथा हीति**। अनेन गुणपूर्णत्वस्योक्तत्वादिति भावः। **कथमिति**। व्यावर्तकस्यैव विशेषणत्वेन ज्ञेयत्वगम्यत्वयोश्च धर्मादिस्वर्गादिसाधारणत्वेन न विशेषणत्वमिति भावः। नन्वस्योद्भवादिदमित्यनेन किं विवृतमित्यत्राह **अपिशब्द इति**। शास्त्रप्रभवमित्यनेन किं विवृतमित्यतो भाष्ये गुरूंश्चेति बहुवचनप्रयोगो न युक्तः। गुरोरेकत्वेन बहुत्वासंभवादित्याशङ्कायां संप्रदायप्रवर्तकत्वजगद्गुरुत्व-साक्षाद्गुरुत्वादिरूपानेकप्रकारवत्त्वादेकस्मिन्नपि बहुवचनप्रयोग इति विवृतमित्याह **शास्त्रेति**। तमेवेत्यनेन किं विवृतमित्यत आह **गुर्विति**। तथापि परमाख्यविद्येत्यनेन किं विवृतमित्यत आह **निरुपपदेति**। ननु गुर्ल्गुरूणामित्यादिना द्वापर इत्यादेर्भाष्यस्याविवृतत्वात्कथमस्य तद्विवरणरूपत्वमित्यतस्तन्निवर्त्यां शङ्कां दर्शयति **द्वापर इत्यादीति**।

कं०रा०— श्लोकत्रयेणेति। यद्यपि प्रादुर्भूतो हरिर्व्यास इति तृतीयश्लोकेन भाष्याद्यपद्यस्थस्य कस्यापि शब्दस्यार्थो न विवृतः। तथाऽपि कृतकृत्यस्य वेदव्यासस्य शास्त्रप्रभवत्वानुपपत्तेः, परविद्याख्याया एतच्छास्त्रविषयत्वे न नियामकमस्तीत्याद्याशङ्कानिरासार्थं प्रवृत्तेन तृतीयश्लोकेनापि व्यासस्य शास्त्रप्रभवत्वसमर्थनद्वारा गुरूनिति बहुवचनान्तोपात्तगुरुत्वप्रकारविवरणं परविद्याख्याया एतच्छास्त्रविषयत्वसमर्थनद्वारा निरुपपदसूत्रग्रहणसूचित-सर्वोत्तमप्रामाण्यविवरणं च कृतमिति द्रष्टव्यम्।

श्रीनिधि०— बहुवचनान्तं पदमिति। गुरुत्वे अतिशयात् बहुवचनमिति भावः। **अपिपदेनारुचि-स्सूचितेति**। ननु अरुचिः अपिपदवाच्या न वेति पक्षे तत्त्वप्रकाशिकायां यद्यपि गुरुर्न देवनाभिन्नस्तथापीति योजनाप्रदर्शनमयुक्तम्। वाच्यत्वे सूचिनेति सुधा न युक्तेति चेन्न। वाच्यत्वं नेति ब्रूमः। न चोक्तदोषः। अपिपदेनेहारुचिर्ध्वन्यते। ध्वनितत्वव्यञ्जनार्थं यद्यपीत्यादि पदान्तरसमभिव्याहारमात्रम्। **न योजनाप्रदर्शनमिति**। केचित्तु वाच्येत्यप्याहुः। न चैवमुक्तदोषः सङ्क्षेपतः प्रतिपादनस्य सूचनापदार्थत्वादिति। **तदसङ्गतमिति**। भाष्यासङ्गतमित्यर्थः।

वा०र०— मूले श्लोकत्रयेणेति। पूर्वश्लोकगतपरमाख्यविद्येत्येतदुपपादनपरत्वात् प्रादुर्भूत इति श्लोकस्यापि विवरणरूपत्वमित्याशयेन त्रयेणेत्युक्तम्। परमाख्य इति अन्तिममूलवाक्ये तु परमाख्यमित्यपि उपलक्षणया अभिप्रेतमिति न दोषः। एतेन तृतीयश्लोकस्य विनियोगानुक्तेः त्रयेणेति मूले कथमुक्तिरिति निरस्तम्। श्लोकत्रयस्य भाष्याद्यपद्यविवरणत्वं सर्वस्याप्यविशेषेण सर्वविवरणत्वरूपमिति प्रतीतिं विघ्नियमाणविवरणविवेकप्रदर्शनेन परिहर्तुं प्रतिजानते। **तथा हीति** मूलम्। माङ्गलिकत्वेन एतत्सूत्रेति। अनेन ताराधयोः माङ्गलिकत्वेन सूत्रे निवेशं सिद्धवत्कृत्य तथाविधयोः तयोः माध्यकृता शास्त्रारम्भे उच्यते इति सूचितं भवति। ननु एतदनुपपन्नमीति उत्तरमूलावतारे

माङ्गलिकत्वेन निवेशनमुपपाद्येति वक्ष्यति च । माङ्गलिकत्वेन निवेशस्येत्यत्र तयोरिति वक्ष्यमाणस्याकर्षणम् । तयोरित्येतन्मध्यदीपिकान्यायेनोभयत्र संबध्यते इति वा तयोर्माङ्गलिकत्वेन निवेशस्य च मङ्गलस्यैव अकर्तव्यत्वेऽनिवेशनीयत्वे वा कथयितुमशक्यत्वेनेति योज्यम् ।

स०व्र०— अपिशब्द इति । गुरुदेवताभेदे अरुचिसूचको भाष्यस्थ'अपि'शब्दो विशेषणान्तरसमुच्चयार्थोऽपीत्यर्थः ।

कुण्डल०— 'क्रियते स्पष्टतार्थत' इति भाष्यकृद्वचनं प्रतिज्ञामात्रमेव न भवति किन्तु अनुव्याख्याने भाष्यार्थस्पष्टनं कृतमस्तीति **प्रथमतो लेशेन दर्शयति तत्रेति** । **सप्रयोजने** प्रस्थानभेदे सिद्धे सतीत्यर्थः । यद्वा सङ्क्षेपविस्ताराभ्यां प्रतिपाद्ये निरूपणीये सतीत्यर्थः । न तु भाष्यस्याद्यपद्यस्य 'नारायणं गुणैः सर्वैरुदीर्णमि'त्यस्य स्फुटार्थत्वेन तद्विवरणं निष्प्रयोजनमित्यत आह **तथा हीति** । **अन्यसाधारण्यादिति** । कार्यब्रह्मसाधारण्यादित्यर्थः । **अपिशब्द इति** । गुरूंश्चापि इत्यपिशब्द इत्यर्थः । **संप्रशब्दाभ्यामिति** । प्रथमद्वितीयपद्यगताभ्यामिति शेषः । यद्यपि प्रादुर्भूत इति श्लोके भाष्याद्यपद्यस्थस्य कस्यापि शब्दस्यार्थो न विवृतः । तथापि कृतकृत्यस्य भगवतो वेदव्यासस्य शास्त्रप्रभवत्वानुपपत्तिः । परविद्याख्यायाः एतच्छास्त्रविषयत्वे च न नियामकमस्तीत्याशङ्कानिरासार्थं प्रवृत्तेनानेन तृतीयश्लोकेनापि व्यासस्य शास्त्रप्रभवत्वसमर्थनद्वारा गुरूनिति बहुवचनोपात्तगुरुत्वप्रकारविवरणं परविद्याख्यायाः एतच्छास्त्रविषयत्वसमर्थनद्वारा निरुपपदसूत्रग्रहणसूचितसर्वोत्तमप्रामाण्यविवरणं च कृतमित्यवधेयम् ।

वि०— विशेषणत्वम् इतरव्यावर्तकत्वम् । **आप्यतममित्यनेनेति** । अतिशयेन ज्ञेयत्वगम्यत्वयोरितरसाधारण्याभावादिति भावः । **सम्प्रशब्दाभ्यामिति** । सन्नमामि प्रणम्येत्यत्र स्थिताभ्यां नारायणं सन्नत्वा गुरूंश्च प्रकर्षेण नत्वेति **विशोधितम्** इत्यर्थः । **सूचितम्** इत्यतःपरं भाष्ये इति शेषः । **द्वापरे इत्यादि भाष्यमिति** । 'द्वापरे सर्वत्र ज्ञाने आकुलीभूते' इत्यादिकम् । **आदिभाष्यम्** उपक्रमभाष्यमित्यर्थः ।

चषकः— तत्र भाष्याद्यपद्यार्थ इति । अत्र व्याचक्षाणाः यद्यपि 'प्रादुर्भूत' इति तृतीयश्लोके भाष्याद्यपद्यस्थस्य कस्यापि शब्दस्यार्थो न विवृतः । तथापि कृतकृत्यस्य व्यासस्य शास्त्रप्रभवत्वानुपपत्तिः, परविद्याख्यायाः एतच्छास्त्रविषयत्वे न नियामकमस्तीत्याद्याशङ्कानिरासार्थप्रवृत्तेन तृतीयश्लोकेनापि व्यासस्य शास्त्रप्रभवत्वसमर्थनद्वारा 'गुरूनि'ति बहुवचनोपेतगुरुत्वप्रकरणविवरणम्, परविद्याख्यायाः एतच्छास्त्रविषयत्वसमर्थनद्वारा निरुपपदसूत्रग्रहणसूचितसर्वोत्तमप्रामाण्यविवरणं च कृतमिति द्रष्टव्यमिति व्याचक्षते ।

काशी०— तत्र तारेत्यादिग्रन्थस्यैव भाष्यार्थस्य स्पष्टतार्थत्वं न पुनः पूर्वस्येति शङ्कां निरसितुमादित एव तदस्तीति दर्शयति **तत्रेति** । **स्पष्टीकर्तव्यानां** मध्य इत्यर्थः । **विवृतः** स्पष्टीकृतः । **प्राप्तेति** । गुणगुणिनौ भिन्नौ एकानेकत्वधर्मधर्मित्वरूपविरुद्धधर्माधिकरणत्वादित्यनुमानप्राप्तेत्यर्थः । **निराकृतेति** । परमात्मस्वरूपदेहस्य निखिलगुणात्मकत्वोक्त्या धर्मधर्मित्वादेरविरोधसूचनादिति भावः । न च देहस्य परमात्मस्वरूपत्वालाभः । राहोः

शिरः तस्य स्वरूपमित्यादाविव त एव देहो यस्येत्यत्राभेदस्यैव षष्ठ्यर्थत्वात् । यद्वा । मूर्तिविशेषस्यैव नारायणशब्दार्थत्वात्तस्य गुणाभिन्नोक्त्यैवोक्तशङ्कानिरासः । न चैवं त एव देहो यस्येति बहुव्रीह्याश्रयणवैयर्थ्यम् । कर्मधारयस्यैव संभवादिति वाच्यम् । देहशून्यत्वे कर्तृत्वानुपपत्तिशङ्कया देहवत्वोक्त्यैव परिहार्यत्वात् । एवं च निखिलेत्यादेरुक्तभेदशङ्काोद्धारकत्वेन स्पष्टीकरणत्वमुक्तं भवति । इदमुपलक्षणम् । गुणैः पूर्णत्वोक्त्या गुणानामर्थ-लब्धपूर्णत्वविवरणेन देहभावाभावयोः कर्तृत्वानुपपत्तिशङ्कोद्धारकत्वेन च स्पष्टीकरणत्वं बोध्यम् । ज्ञेयत्वगम्यत्वयोः ज्ञेयगम्यपदबोध्यधर्मयोः । विशेषणत्वम् इतरव्यावर्तकत्वम् । अन्यथा तद्वैयर्थ्यमिति भावः । परिहृतेति । अतिशयेन ज्ञेयमतिशयेन गम्यमिति तद्विवरणादिति भावः । अस्येत्यादीति । विशेषणत्रयमित्यर्थः । विवृतमिति । बहुवचनार्थबहुत्वस्य साक्षात्परम्परया शास्त्रनिर्माणेन चेत्यनेकविधगुरुत्वेष्वन्वयसूचनादिति भावः । अपिशब्द-स्यार्थान्तरमभिप्रेत्याह गुरुदेवतयोरिति । तमेवेतीति । तेन यद्यपि गुरुर्न देवताभिन्नस्तथाऽपीत्यर्थसूचनादिति भावः । सम्प्रशब्दाभ्यामिति । सन्नमामि प्रणम्येत्याभ्याम् । नत्वेत्युक्तं नमनम् । भक्त्याद्यतिशयराहित्यवत्त्वेन सूचित-मित्यर्थः । न तु भाष्ये संप्रशब्दावध्याहार्यावित्यर्थः । उभयाध्याहारवैयर्थ्यात् । न च नारायणं संनम्य गुरूंश्च प्रणम्येति पृथगन्वयादवैयर्थ्यमिति वाच्यम् । मानाभावाद्गौरवाच्च । यद्यपि नत्वेत्यस्य भाष्याङ्कनमनपरत्वात् संनमामि प्रणम्ये-त्यनयोरनुव्याख्यानाङ्कनमनपरत्वान्न व्याख्येयव्याख्यानभावः । तथाऽप्यत्र संप्रशब्दाभ्यां भक्त्याद्युपेतनमनस्यैव सफलत्वे भाष्येऽपि तादृशनमनमेव विवक्षितमिति ज्ञायते । अन्यथा तद्वैयर्थ्यादिति भावः । निरुपपदेति । विशेषणपरपदान्तरासमभिव्याहृतेत्यर्थः । सूचितमिति । विशिष्टार्थप्रमितिसाधनत्वरूपसारवत्त्वादिसूत्रपदप्रवृत्ति-निमित्ते सर्वोत्तमत्वसूचनादिति भावः । यद्यपि श्लोकत्रयस्य भाष्याद्यपद्यार्थस्पष्टीकरणार्थत्वं प्रतिज्ञाय श्लोकद्वयस्यैव तद्व्युत्पादनमसङ्गतम् । तथाऽपि तृतीयश्लोके शास्त्रप्रभवत्वोपपादकभागस्य गुरुत्वोपपादनान्तर्भूतत्वेन शास्त्र-प्रभवमित्यादिभिरित्यनेन तस्यापि ग्रहणम् । परविद्यात्वविवरणभागस्य च प्रामाण्योपपादनान्तर्भूतत्वेन परमा-ख्येतीत्यनेन तस्यापि ग्रहणं विवक्षितमतो न दोषः । गुरुरित्यादिश्लोकद्वयस्य सङ्गतिप्रदर्शकत्वादिना स्पष्टीकरणत्वं वक्तुमाशङ्कते द्वापर इति । तदसङ्गतमाद्यपद्यासङ्गतम् । सूत्रार्थकथनाभावे भाष्यत्वमप्यनुपपन्नमिति सूचनाय भाष्यग्रहणम् । समर्थयितुमिति । उक्तरीत्या सूत्राक्षिप्तप्रामाण्यसमर्थनार्थत्वादस्य भाष्यत्वमप्युपपन्नमिति भावः ।

गूढ०— नन्वस्य ग्रन्थस्य भाष्यसूत्रविवरणरूपत्वे आद्यश्लोकेन भाष्यस्थं किं विवृतमत आह तत्रेति । तत्र कानि कानि विशेषणानि केन पदेन विवृतानीत्यत आह तथा हीति । अनेन गुणपूर्णत्वस्योक्तत्वादिति भावः । कथमिति । व्यावर्तकस्यैव विशेषणत्वेन ज्ञेयत्वगम्यत्वयोश्च धर्मादिस्वर्गादिसाधारणत्वेन न विशेषणत्वमिति भावः । नन्वस्योद्भवादिदमित्यनेन किं विवृतमित्यत आह अपिशब्द इति । शास्त्रप्रभवमित्यनेन किं विवृतमित्यतो भाष्ये गुरूंश्चेति बहुवचनप्रयोगो न युक्तः । गुरोरेकत्वेन बहुत्वासंभवादित्याशङ्कायां संप्रदायप्रवर्तकत्वजगद्गुरुत्वसाक्षा-द्गुरुत्वादिरूपानेकप्रकारवत्त्वादेकस्मिन् अपि बहुवचनप्रयोग इति विवृतमित्यत आह शास्त्रेति । तमेवेत्यनेन किं विवृतमित्यत आह गुर्विति । तथापि परमाख्यविद्येत्यनेन किं विवृतमित्यत आह निरुपपदेति । ननु गुरुर्गुरूणामित्यादिना द्वापर इत्यादेर्भाष्यस्याविवृतत्वात् कथमस्य तद्विवरणरूपत्वमित्यतस्तन्निवर्त्यां शङ्कां दर्शयति द्वापर इत्यादीति ।

॥ अस्य शास्त्रस्य मङ्गलाचरणसहितत्वसमर्थनम् ॥

॥ ओङ्काराथशब्दयोः मङ्गलजनकत्वम् ॥

८७ सु०— तथाऽपि नेदं शास्त्रं व्याकर्तव्यं मङ्गलाचरणरहितत्वात् । मङ्गलाचरणपुरःसराणि खलु कर्माणि निरन्तरायं परिसमाप्यन्ते प्रचीयन्ते च । न चाकृतमङ्गलाचरणानामपि कार्यपरिसमाप्त्यादिदर्शनात्, कृतमङ्गलाचरणानामपि तदभावोपलम्भान्न तद्धेतुत्वमस्येति सांप्रतम् । तथा सति कारीयदिरपि वृष्ट्यादिहेतुत्वाभावापत्तेः ।

परि०— तत्रेत्यादिमूलमवतारयति **तथाऽपीत्यादिना** । प्रामाण्ये सत्यपीत्यर्थः ॥ **मङ्गलाचरणेति** । मङ्गलाचारपूर्वमकृतत्वादित्यर्थः । हेतोरप्रयोजकत्वमाशङ्क्य समाप्तिप्रचयभङ्गो विपक्षे बाधक इति भावेन तयोर्मङ्गलहेतुकत्वमाह **मङ्गलाचरणपुरस्सराणीति** । निरन्तरायं निर्विघ्नं यथा भवति तथेत्यर्थः । प्रचीयन्तेऽविच्छिन्नपारम्पर्यरूपसंप्रदायवन्ति भवन्तीत्यर्थः । मङ्गलस्य हेतुत्वासिद्धिमाशङ्क्य निराह **न चेति** । अकृतमङ्गलाचरणानां कृतमङ्गलाचरणानां चेति च बहुव्रीहिः । पुरुषाणामित्यर्थः ॥ **कार्येति** । भोजनपचनादिकार्यपरिसमाप्तिप्रचयदर्शनादित्यर्थः । परमुखेन समाधिं वाचयितुं प्रतिबन्दीमाह **तथा सतीति** । व्यतिरेकादिव्यभिचारेणाहेतुत्वे सतीत्यर्थः । कारीरी नाम 'शुष्यत्सस्य(संजीवन)-वृद्धिकामः कारीर्या यजेत' इत्युक्तेष्टिविशेषः । आदिपदेन च पुत्रेष्ट्यादिः । तत्राप्युक्तव्यभिचारद्वयदर्शनादिति भावः ।

यादु०— ननु मङ्गलाचरणस्य शास्त्रपरिसमाप्तिहेतुत्वेऽपि न तद्व्याख्यानकरणेऽपि हेतुता येन तदभावेन तदभावसाधनं सङ्गतं स्यात् इत्यप्रयोजकताऽत्रेत्याह **मङ्गलाचरणपुरस्सराणीति** । व्यतिरेकस्याप्युपलक्षणमेतत् । तथा चानेनान्वयव्यतिरेकौ प्रदर्शिताविति ज्ञातव्यम् ॥ **अयमभिसन्धिः** । शास्त्रे ह्यनुष्ठितं मङ्गलाचरणं शास्त्रसमाप्तिमिव प्रचयरूपं तद्व्याख्यानमपि संपादयति । अन्यथा मङ्गलाचरणरहितशास्त्रव्याख्याने प्रवर्तमानस्य विघ्नोपसंसृष्टतया शास्त्रार्थाप्रतिपत्तिविप्रतिपत्त्यादिप्राप्त्या, शिष्टाचारपरिपालनहीनतयाऽनाप्तप्रणीतत्वशङ्क्या च व्याख्यानस्य कर्तुमशक्यत्वात् । अत एवाहुः 'मङ्गलाचरणपुरःसराणि शास्त्राणि वीर्यवन्ति भवन्ति' इति । तथा च व्याख्येये मङ्गलाचरणस्य तत्प्रचयरूपव्याख्यानं प्रत्यपि हेतुतया, कारणाभावे च कार्यस्य शङ्कितुमशक्यत्वान्नाप्रयोजकतेति ॥ अत्र 'समाप्यन्त' इत्येतत्प्रसङ्गदृष्टान्ततया मङ्गलस्य समाप्तिं प्रत्यपि हेतुतामुपपादयितुमिति ज्ञातव्यम् । प्रचयशब्दस्य प्रसिद्धिमात्रपरत्वेऽपि शास्त्रप्रचयो व्याख्यानरूप एवेति न कोऽपि दोष इति ध्येयम् । केचित्तु सूत्रकृतो विघ्नाद्यसंभवेऽपि शिष्टाचारपरिपालनार्थं शिष्यशिक्षार्थं वा मङ्गलाचरणं कर्तव्यम् । अन्यथा मोक्षफलकमहाशास्त्रे शिष्टाचारमुल्लङ्घ्य भगवान्प्रवृत्त इत्यन्येऽप्येवमेव प्रवर्तेरन् । ततश्च विघ्नादिमत्त्वं च प्रसज्येत । कुतो मङ्गलाचरणाभावे विघ्नादिप्रसक्तिरित्यत आह **मङ्गलेति** । अनेन अन्वयव्यतिरेकावुक्ताविति आहुः ।

वं०प०— सिद्धान्ती शङ्कते **न चाकृतेति ॥ पूर्वपक्षी प्रतिबन्दीं गृह्णाति तथा सतीति ॥**

आनन्दः— ननु 'तत्र ताराथमूलत्वमि'त्यत्र **ओङ्काराथशब्दयोरादित्वकथनमयुक्तं** प्रयोजनाभावात् । **न च मङ्गलादिसूचनद्वाराऽधिकार्यादिज्ञापनमेव प्रयोजनमिति वाच्यम्** । तस्य पदान्तरेणापि संभवेन एतयोरेवादितः प्रयोगे बीजाभावादित्यतस्तन्निवर्त्यां शङ्कां दर्शयति **तथापीति** । **मङ्गलराहित्येऽप्यस्तु** व्याकर्तव्यत्वमत आह **मङ्गलेति** । निरन्तरायमिति क्रियाविशेषणम् । **प्रचीयन्ते** विस्तरं प्राप्नुवन्ति । **नन्वन्वयव्यतिरेकाभ्यां** व्यभिचारान्न मङ्गलानुष्ठानमित्याशङ्क्य **निषेधति न चेति** । **समाप्त्यादिदर्शनादित्यत्र प्रमत्तानुष्ठित इति शेषः । तदभावोपलम्भात्** इत्यत्र कादम्बर्यादाविति शेषः । किमत्र केवलस्य समाप्तिव्यभिचार उत सेतिकर्तव्यताकस्य तत्र नाद्य इत्याह **तथा सतीति** । सेतिकर्तव्यस्य तु नास्तीति भावः ।

कं०रा०— **प्रचीयन्ते चेति** । तथा च निरन्तराय परिसमाप्तिप्रचयहेतुतया शिष्टाचारसंप्रदायप्राप्तं मङ्गलं सूत्रकृता नानुष्ठितमिति तत्प्रणीतं शास्त्रमव्याख्येयमिति भावः । सामग्रीवैकल्येन सकलकारणसंपत्तिवैकल्येन । तरन्त्यनेनेति तॄप्लवनतरणयोरित्यस्माद्धातोरकर्तरि च कारके संज्ञायामिति करणे घञि अचो ञ्णितीति ऋकारस्याकाररूपवृद्धावाकारस्य उरण् रपर इति रपरत्वे च तारशब्दो निष्पन्न इति भावः ।

वा०चं०— 'तत्र ताराथमूलत्वमि'त्यनुव्याख्याने; ताराथयोर्माङ्गलिकत्वेनैतत्सूत्रनिवेशितयोः सर्वशास्त्राङ्गतायाः कथयिष्यमाणत्वात् मङ्गलस्यैवाकर्तव्यत्वेऽनिवेशनीयत्वे वा माङ्गलिकत्वेन निवेशस्य कथयितुं अशक्यतया, तयोर्माङ्गलिकत्वेन निवेशं वक्तुं, मङ्गलस्य कर्तव्यत्वं निवेशनीयत्वं च शङ्कामुखेनोपपादयति **तथाऽपीति**। 'मङ्गलाचरणरहितस्याप्यस्तु व्याकर्तव्यत्वमि'त्यप्रयोजकत्वशङ्कायां, मङ्गलाचरणाभावेऽन्तरायप्रसङ्गेन, तत्साध्यनिरन्तरायसमाप्तिप्रचयाभावेन असमाप्तस्य स्वरूपाभावेन, वीर्यवत्त्वायुष्मत्पुरुषकत्वप्रचयादिहीनस्य च शिष्यानुपादेयत्वेनाव्याकर्तव्यत्वात् । व्याकर्तव्यताऽङ्गीकारे समाप्तिप्रचयौ स्यातां, तौ च कारणाभावादनुपपन्नौ इति विपक्षबाधकं सूचयन् मङ्गलसमाप्त्यादेः कार्यकारणभावं प्रसिद्ध्या दर्शयति **मङ्गलेति** । उपलक्षणं चैतत् । मङ्गलाभावे विघ्नोपसंसृष्टतया वाक्यार्थेऽप्रतिपत्त्यन्यथाप्रतिपत्त्यापत्त्या, शिष्टाचारपरिपालनहीनतयाऽनाप्तप्रणीतत्वप्रसङ्गात् चाव्याकर्तव्यत्वेन हेतोः प्रतिबन्धसिद्धिरिति द्रष्टव्यम् । 'अन्वयव्यतिरेकाभ्यां कार्यकारणभावग्रहोऽनयोरि'ति भ्रान्त्या तत्र व्यभिचारं शङ्कते **न चेति** । **साम्प्रतं युक्तम् ॥** प्रतिबन्दीमुखेन समाधातुं गूढाभिसन्धिरुत्तरमाह **तथा सतीति**।

वा०र०— **निवेशं वक्तुमिति** । तयोः निवेशितयोः या शास्त्राङ्गता वक्ष्यते तदुपयोगित्वेनाकाङ्क्षाक्रमेण निवेशमुपस्थाप्य तदुपपादयितुमित्यर्थः । मूले तथापि इत्यस्यानुत्तमप्रामाण्ये सिद्धेऽपि इत्यर्थः । मङ्गलाचरणरहितत्वं साक्षादकर्तव्यत्वे हेतुरिति मन्वानेन कृतामप्रयोजकत्वशङ्कामुत्थाप्य तत्परिहाराय परम्परा मूले याऽभिहिता तत्प्रदर्शकोत्तरमूलवाक्याभिप्रेतां परम्परां विशदयन् उत्तरवाक्यमवतारयति **मङ्गलाचरणेति** । अस्तु व्याकर्तव्यत्वं इत्येतत् अव्याकर्तव्यत्वं मास्तु इत्यस्य पर्यवसितो योऽर्थः तत्कथनरूपं वक्ष्यमाणरीत्या प्रकारान्तरेण

प्रयोजकत्वोपपादकव्याघातप्रतिपादनाय इति ज्ञेयम्। **तत्साध्यनिरन्तरायेति**। मङ्गलाचरणसाध्येत्यर्थः। तदुभयाभावस्यापि परम्परयैव व्याकर्तव्यत्वं प्रयोजकत्वमिति दर्शयति **असमाप्तस्येत्यादि**। अत्रासमाप्तत्वं स्वरूपाभाव इव प्रचयहीनत्वमेव शिष्यानुपादेयत्वे हेतुत्वेन वक्तुं युक्तम्। परन्तु मङ्गलाचरणपुरःसराणीत्युत्तरमूलोक्तं वीर्यवत्त्वादिकमपि हेतुकोटौ निवेशितमित्यदोषः। अनेन विमतं शास्त्रं न व्याकर्तव्यं स्वरूपलाभशून्यत्वात् शिष्यानुपादेयत्वाच्च। आद्ये हेतुरसमाप्तत्वं द्वितीये प्रचयशून्यत्वं तदुभयत्र च मङ्गलाचरणराहित्यमिति परम्पराप्रतिपादनेनाव्याकर्तव्यत्वं मङ्गलाचरणरहितत्वे सत्युक्तप्रकारेण प्राप्तं भवतीति तद्रहितत्वस्य तत्र प्रयोजकत्वोपपत्तिरित्युक्तं भवति। एवं मङ्गलाचरणराहित्यरूपहेत्वङ्गीकारेऽव्याकर्तव्यत्वस्यैवोक्तरीत्या प्राप्तत्वात्। तदभावास्तित्वशङ्का व्याहता इत्येवंप्रकारेणाप्रयोजकत्वशङ्कानिरासमभिधाय अव्याकर्तव्यत्वं मास्त्वित्यस्य व्याकर्तव्यत्वमस्तु इति पर्यवसानेन व्याकर्तव्यत्वास्तित्वशङ्कने व्याकर्तव्यत्वाङ्गीकारमुखेन मङ्गलाचरणशून्यत्वव्याघातमुपपादयन् अप्रयोजकशङ्कानिरासं दर्शयति **व्याकर्तव्यताऽङ्गीकार इति**। अत्र व्याकर्तव्यताङ्गीकारे वेति वाशब्दयुक्तः पाठः। मङ्गलाचरणाभाव इति वर्तते। तस्य च तदङ्गीकार इत्यर्थकत्वान्मङ्गलाचरणाभावमङ्गीकृत्य व्याकर्तव्यत्वाङ्गीकारे वा कारणाभावेऽपि कार्याङ्गीकारापत्त्या व्याघातः इत्याशयेन तत्रापि परम्परोक्ता **समाप्तिप्रचयावित्यादिना**। व्याकर्तव्यत्वप्रयोजकलब्धस्वरूपत्वशिष्योपादेयत्वयोरपि व्याकर्तव्यत्वमङ्गीकुर्वता स्वीकार्यत्वात् तयोश्च समाप्तिप्रचयसापेक्षतया **तयोरप्यङ्गीकार्यत्वात्** तयोश्च मङ्गलाचरणकार्यत्वात् मङ्गलाचरणरूपकारणाभावाङ्गीकारे तत्साध्यसमाप्तिप्रचययोरपि **अभावस्यैव स्वीकर्तव्यत्वप्राप्तेः** समाप्तिप्रचयाङ्गीकारो व्याहत इत्यर्थः। तथाच मङ्गलाचरणराहित्यरूपहेतूच्छित्तिरेव **बाधिकेत्युक्तं** भवति। अत एव प्रचयौ स्याताम् इत्यत्राङ्गीकार्याविति शेषः। एवं हेतूच्छित्तिरूपबाधककथनपरतया **मङ्गलाचरणेति** वाक्यं योजयित्वा विपक्षे बाधकान्तरकथनपरतयाऽपीदं वाक्यं योजयितुं तत्रोपलक्षणमाह **उपलक्षणं चैतदिति**। अत्र मङ्गलाभावे मङ्गलाचरणरूपशिष्टाचारपरिपालनहीनता आयाति। तथा चाव्याकर्तव्यताया एव प्राप्तेः अव्याकर्तव्यत्वाभावोऽस्त्विति शङ्का व्याहता। अव्याकर्तव्यताप्राप्त्युपपादनाय विघ्नोपसंसृष्टतयेत्याद्युक्तम्। मङ्गलानुष्ठानरूपशिष्टाचारपरिपालनहीनतायां हि विघ्ननिवर्तकाभावेन विघ्नोपसंसृष्टत्वे सति व्याख्यानकालेऽप्रतिपत्त्यन्यथाप्रतिपत्त्योः प्रसङ्गेन तद्वाक्यप्रणेतुः करणपाटवादि-दोषशङ्क्या तद्वाक्येऽनाप्तप्रणीतत्वशङ्कोदयेनानाप्तप्रणीतत्वस्य चाव्याकर्तव्यतया व्याप्तेः विप्रलम्भकादिवाक्ये सुप्रसिद्धत्वात् परम्परया मङ्गलाचरणराहित्यरूपहेतोरव्याकर्तव्यत्वरूपसाध्येन न व्याप्तिसिद्धिरित्यर्थः। अनेन विमतमव्याकर्तव्यम् अनाप्तप्रणीतत्वात्। विमतमनाप्तप्रणीतम्। शिष्टाचारपालनहीनत्वात्। विमतं तद्धीनं विघ्नोपसंसृष्टत्वात् विमतं विघ्नोपसंसृष्टं मङ्गलाचरणरहितप्रणीतत्वात् इति प्रयोगाः सूचिताः। यदि मङ्गलाचरणशून्यं स्यात् तर्हि विघ्नोपसंसृष्टं स्यात् इत्यादिरूपेण तर्कतोऽव्याकर्तव्यताङ्गीकारे वेति पूर्वोक्तरीत्या व्याकर्तव्यत्वमभिलषता परम्परया तदुपयोगिमङ्गलाचरणं स्वीकृतमिति तच्छून्यत्वेऽपि व्याकर्तव्यतास्तित्वशङ्का व्याहतेति ज्ञेयम्। **प्रसिद्धचेति**। खल्वित्यव्ययस्य तदर्थकत्वमित्याशयः। **प्रचीयन्ते** इति मूलम्। विस्तारं प्राप्नुवन्तीत्यर्थः। **सांप्रतं** युक्तमित्यर्थः। 'युक्ते द्वे सांप्रतं स्थान' इत्यमरोक्तेरिति भावः। **समाधातुमिति**। सममेतत् सकलं प्रवृत्तेऽपि इत्यादिनेति पूरणीयम्। **गूढाभिसन्धिरिति**। मङ्गलेऽनुमिता श्रुतिरिति गूढोऽभिसन्धिः।

वं०प०— सिद्धान्ती शङ्कते **न चाकृतेति** ॥ पूर्वपक्षी प्रतिबन्दीं गृह्णाति **तथा सतीति** ॥

आनन्दः— ननु 'तत्र ताराथमूलत्वमि'त्यत्र ओङ्काराथशब्दयोरादित्वकथनमयुक्तं प्रयोजनाभावात् । न च मङ्गलादिसूचनद्वाराऽधिकार्यादिज्ञापनमेव प्रयोजनमिति वाच्यम् । तस्य पदान्तरेणापि संभवेन एतयोरेवादितः प्रयोगे बीजाभावादित्यतस्तन्निवर्त्यां शङ्कां दर्शयति **तथापीति** । मङ्गलराहित्येऽप्यस्तु व्याकर्तव्यत्वमत आह **मङ्गलेति** । निरन्तरायमिति क्रियाविशेषणम् । प्रचीयन्ते विस्तरं प्राप्नुवन्ति । नन्वन्वयव्यतिरेकाभ्यां व्यभिचारान्न मङ्गलानुष्ठानमित्याशङ्क्य निषेधति **न चेति** । समाप्त्यादिदर्शनादित्यत्र प्रमत्तानुष्ठित इति शेषः । **तदभावोपलम्भात्** इत्यत्र कादम्बर्यादाविति शेषः । किमत्र केवलस्य समाप्तिव्यभिचार उत सेतिकर्तव्यताकस्य तत्र नाद्य इत्याह **तथा सतीति** । सेतिकर्तव्यस्य तु नास्तीति भावः ।

कं०रा०— **प्रचीयन्ते चेति** । तथा च निरन्तराय परिसमाप्तिप्रचयहेतुतया शिष्टाचारसंप्रदायप्राप्तं मङ्गलं सूत्रकृता नानुष्ठितमिति तत्प्रणीतं शास्त्रमव्याख्येयमिति भावः । सामग्रीवैकल्येन सकलकारणसंपत्तिवैकल्येन । तरन्त्यनेनेति तॄप्लवनतरणयोरित्यस्माद्धातोरकर्तरि च कारके संज्ञायामिति करणे घञि अचो ञ्णितीति ऋकारस्याकाररूपवृद्धावाकारस्य उरण् रपर इति रपरत्वे च तारशब्दो निष्पन्न इति भावः ।

वा०चं०— 'तत्र ताराथमूलत्वमि'त्यनुव्याख्याने; तारायथोर्माङ्गलिकत्वेनैतत्सूत्रनिवेशितयोः सर्वशास्त्राङ्गतायाः कथयिष्यमाणत्वात् मङ्गलस्यैवाकर्तव्यत्वेऽनिवेशनीयत्वे वा माङ्गलिकत्वेन निवेशस्य कथयितुं अशक्यतया, तयोर्माङ्गलिकत्वेन निवेशं वक्तुं, मङ्गलस्य कर्तव्यत्वं निवेशनीयत्वं च शङ्कामुखेनोपपादयति **तथाऽपीति**। 'मङ्गलाचरणरहितस्याप्यस्तु व्याकर्तव्यत्वमि'त्यप्रयोजकत्वशङ्कायां, मङ्गलाचरणाभावेऽन्तरायप्रसङ्गेन, तत्साध्यनिरन्तरायसमाप्तिप्रचयाभावेन असमाप्तस्य स्वरूपाभावेन, वीर्यवत्त्वायुष्मत्पुरुषकत्वप्रचयादिहीनस्य च शिष्यानुपादेयत्वेनाव्याकर्तव्यत्वात् । व्याकर्तव्यताऽङ्गीकारे समाप्तिप्रचयौ स्यातां, तौ च कारणाभावादनुपपन्नौ इति विपक्षबाधकं सूचयन् मङ्गलसमाप्त्यादेः कार्यकारणभावं प्रसिद्ध्या दर्शयति **मङ्गलेति** । उपलक्षणं चैतत् । मङ्गलाभावे विघ्नोपसंसृष्टतया वाक्यार्थेऽप्रतिपत्त्यन्यथाप्रतिपत्त्यापत्त्या, शिष्टाचारपरिपालनहीनतयाऽनाप्तप्रणीतत्वप्रसङ्गात् चाव्याकर्तव्यत्वेन हेतोः प्रतिबन्धसिद्धिरिति द्रष्टव्यम्। 'अन्वयव्यतिरेकाभ्यां कार्यकारणभावग्रहोऽनयोरि'ति भ्रान्त्या तत्र व्यभिचारं शङ्कते **न चेति** । **साम्प्रतं युक्तम्** ॥ प्रतिबन्दीमुखेन समाधातुं गूढाभिसन्धिरुत्तरमाह **तथा सतीति**।

वा०र०— **निवेशं वक्तुमिति** । तयोः निवेशितयोः या शास्त्राङ्गता वक्ष्यते तदुपयोगित्वेनाकाङ्क्षाक्रमेण निवेशमुपस्थाप्य तदुपपादयितुमित्यर्थः । **मूले तथापि इत्यस्यानुत्तमप्रामाण्ये** सिद्धेऽपि इत्यर्थः । मङ्गलाचरणरहितत्वं साक्षादकर्तव्यत्वे हेतुरिति मन्वानेन कृतामप्रयोजकत्वशङ्कामुत्थाप्य तत्परिहाराय परम्परा मूले याऽभिहिता तत्प्रदर्शकोत्तरमूलवाक्याभिप्रेतां परम्परां विशदयन् उत्तरवाक्यमवतारयति **मङ्गलाचरणेति** । अस्तु व्याकर्तव्यत्वं इत्येतत् अव्याकर्तव्यत्वं मास्तु इत्यस्य पर्यवसितो योऽर्थः तत्कथनरूपं वक्ष्यमाणरीत्या प्रकारान्तरेण

प्रयोजकत्वोपपादकव्याघातप्रतिपादनाय इति ज्ञेयम्। **तत्साध्यनिरन्तरायेति**। मङ्गलाचरणसाध्येत्यर्थः। तदुभयाभावस्यापि परम्परयैव व्याकर्तव्यत्वं **प्रयोजकत्वमिति दर्शयति असमाप्तस्येत्यादि**। अत्रासमाप्तत्वं स्वरूपाभाव इव प्रचयहीनत्वमेव शिष्यानुपादेयत्वे हेतुत्वेन वक्तुं युक्तम्। परन्तु मङ्गलाचरणपुरःसराणीत्युत्तरमूलोक्तं वीर्यवत्त्वादिकमपि हेतुकोटौ निवेशितमित्यदोषः। अनेन विमतं शास्त्रं न व्याकर्तव्यं स्वरूपलाभशून्यत्वात् शिष्यानुपादेयत्वाच्च। आद्ये हेतुरसमाप्तत्वं द्वितीये प्रचयशून्यत्वं तदुभयत्र च मङ्गलाचरणराहित्यमिति परम्पराप्रतिपादनेनाव्याकर्तव्यत्वं मङ्गलाचरणरहितत्वे सत्युक्तप्रकारेण प्राप्तं भवतीति तद्रहितत्वस्य तत्र प्रयोजकत्वोपपत्तिरित्युक्तं भवति। एवं मङ्गलाचरणराहित्यरूपहेत्वङ्गीकारेऽव्याकर्तव्यत्वस्यैवोक्तरीत्या प्राप्तत्वात्। तदभावास्तित्वशङ्का व्याहता इत्येवंप्रकारेणाप्रयोजकत्वशङ्कानिरासमभिधाय अव्याकर्तव्यत्वं मास्त्वित्यस्य व्याकर्तव्यत्वमस्तु इति पर्यवसानेन व्याकर्तव्यत्वास्तित्वशङ्के व्याकर्तव्यत्वाङ्गीकारमुखेन मङ्गलाचरणशून्यत्वव्याघातमुपपादयन् अप्रयोजकशङ्कानिरासं दर्शयति **व्याकर्तव्यताऽङ्गीकार इति**। अत्र व्याकर्तव्यताङ्गीकारे वेति वाशब्दयुक्तः पाठः। मङ्गलाचरणाभाव इति वर्तते। तस्य च तदङ्गीकार इत्यर्थकत्वान्मङ्गलाचरणाभावमङ्गीकृत्य व्याकर्तव्यत्वाङ्गीकारे वा कारणाभावेऽपि कार्याङ्गीकारापत्त्या व्याघातः इत्याशयेन तत्रापि परम्परोक्ता **समाप्तिप्रचयावित्यादिना**। व्याकर्तव्यत्वप्रयोजकलब्धस्वरूपत्वशिष्योपादेयत्वयोरपि व्याकर्तव्यत्वमङ्गीकुर्वता स्वीकार्यत्वात् तयोश्च समाप्तिप्रचयसापेक्षतया **तयोरप्यङ्गीकार्यत्वात् तयोश्च** मङ्गलाचरणकार्यत्वात् मङ्गलाचरणरूपकारणाभावाङ्गीकारे तत्साध्यसमाप्तिप्रचययोरपि **अभावस्यैव स्वीकर्तव्यत्वप्राप्तेः** समाप्तिप्रचयाङ्गीकारो व्याहत इत्यर्थः। तथाच मङ्गलाचरणराहित्यरूपहेतूच्छित्तिरेव **बाधिकेत्युक्तं** भवति। अत एव प्रचयौ स्याताम् इत्यत्राङ्गीकार्याविति शेषः। एवं हेतूच्छित्तिरूपबाधककथनपरतया **मङ्गलाचरणेति** वाक्यं योजयित्वा विपक्षे बाधकान्तरकथनपरतयाऽपीदं वाक्यं योजयितुं तत्रोपलक्षणमाह **उपलक्षणं चैतदिति**। अत्र मङ्गलाभावे मङ्गलाचरणरूपशिष्टाचारपरिपालनहीनता आयाति। तथा चाव्याकर्तव्यताया एव प्राप्तेः अव्याकर्तव्यत्वाभावोऽस्त्विति शङ्का व्याहता। अव्याकर्तव्यताप्राप्त्युपपादनाय विघ्नोपसंसृष्टतयेत्याद्युक्तम्। मङ्गलानुष्ठानरूपशिष्टाचारपरिपालनहीनतायां हि विघ्ननिवर्तकाभावेन विघ्नोपसंसृष्टत्वे सति व्याख्यानकालेऽप्रतिपत्त्यन्यथाप्रतिपत्त्योः प्रसङ्गेन तद्वाक्यप्रणेतुः करणपाटवादि-दोषशङ्क्या तद्वाक्येऽनाप्तप्रणीतत्वशङ्कोदयेनानाप्तप्रणीतत्वस्य चाव्याकर्तव्यतया व्याप्तेः विप्रलम्भकादिवाक्ये सुप्रसिद्धत्वात् परम्परया मङ्गलाचरणराहित्यरूपहेतोरव्याकर्तव्यत्वरूपसाध्येन न व्याप्तिसिद्धिरित्यर्थः। अनेन विमतमव्याकर्तव्यम् अनाप्तप्रणीतत्वात्। विमतमनाप्तप्रणीतम्। शिष्टाचारपालनहीनत्वात्। विमतं तद्धीनं विघ्नोपसंसृष्टत्वात् विमतं विघ्नोपसंसृष्टं मङ्गलाचरणरहितप्रणीतत्वात् इति प्रयोगाः सूचिताः। यदि मङ्गलाचरणशून्यं स्यात् तर्हि विघ्नोपसंसृष्टं स्यात् इत्यादिरूपेण तर्कतोऽव्याकर्तव्यताङ्गीकारे वेति पूर्वोक्तरीत्या व्याकर्तव्यत्वमभिलषता परम्परया तदुपयोगिमङ्गलाचरणं स्वीकृतमिति तच्छून्यत्वेऽपि व्याकर्तव्यतास्तित्वशङ्का व्याहतेति ज्ञेयम्। **प्रसिद्धत्वेति**। खल्वित्यव्ययस्य तदर्थकत्वमित्याशयः। **प्रचीयन्ते** इति मूलम्। विस्तारं प्राप्नुवन्तीत्यर्थः। **सांप्रतं** युक्तमित्यर्थः। 'युक्ते द्वे सांप्रतं स्थान' इत्यमरोक्तेरिति भावः। **समाधातुमिति**। सममेतत् सकलं प्रवृत्तेऽपि इत्यादिनेति पूरणीयम्। **गूढाभिसन्धिरिति**। मङ्गलेऽनुमिता श्रुतिरिति गूढोऽभिसन्धिः।

स०न्न०— कुतो मङ्गलाचाराभावे विघ्नादिप्रसक्तिरित्यत आह **मङ्गलेति** । अनेनान्वयव्यतिरेकावुक्तौ तयोर्व्यभिचारमाशङ्क्याह **न चेति** ॥ तत्र हेतुः **तथा सतीति** । कारीर्याद्यनुष्ठानेऽपि कदाचिद्दृष्ट्यादिहेतुत्वं न स्यादतिप्रसङ्गादिति भावः ।

कुण्डल०— ननु सूत्राणां व्याख्येयत्वप्रयोजकप्रामाण्यादिव्युत्पादनानन्तरं सौत्रपदव्याख्यानमेव सङ्गतम् । अतथाभूतं तत्र ताराथमूलत्वमित्यादि त्वसङ्गतमेवेत्यतस्तस्य सङ्गतिं वक्तुं तद्वचावर्त्यं शङ्कते **तथाऽपीति** । सूत्राणां सर्वोत्तमप्रामाण्येऽपीत्यर्थः । **मङ्गलाचरणरहितत्वादिति** । लोके शिष्टाचारानुगृहीतस्यैवोपादेयतया प्रकृते च ब्रह्मसूत्राणां मङ्गलाचरणलक्षणशिष्टाचाररहितत्वेन अनुपादेयत्वादव्याकर्तव्यत्वमित्यर्थः । अनेन प्रामाण्यवत् मङ्गलाचरणमपि व्याख्येयत्वे प्रयोजकमिति सूचितं भवति । ननु ग्रन्थादौ मङ्गलाचरणस्यावश्यकत्वे सिद्धे प्रकृते तदभावादव्याकर्तव्यतानुमा स्यात्तदेव कुत इत्यत आह **मङ्गलाचरणपुरःसराणीति** । **न चेति** । व्यतिरेकव्यभिचारादन्वयव्यभिचाराच्च मङ्गलस्य समाप्तिहेतुत्वं नेति न शङ्कनीयमित्यर्थः । गूढाभिसन्धिरतिप्रसङ्गमाह **तथा सति इति** । प्रमितकारणभावस्यापि क्वचित्कार्यादर्शनादहेतुत्व इत्यर्थः ।

वि०— तत्र ताराथमूलत्वमित्युत्तरश्लोकमुत्थापयितुमाशङ्कते **तथापीत्यादिना** । ननु शास्त्रस्य मङ्गलाचरणरहितत्वे व्याख्येयत्वाभावः कुतः मङ्गलाचरणभावाभावयोरस्य ग्रन्थकर्तुरिव अभीष्टभावाभावप्रापकत्वेन व्याख्यातुस्तेन प्रयोजनाभावादित्यतो ग्रन्थकर्त्रा कृतमङ्गले ग्रन्थे तत्र प्रवर्तमानानां निर्विघ्नेन परिसमाप्तिशिष्यादिपरम्पराव्याख्यादिरूपप्रचयलक्षणाभीष्टप्राप्तिरूपफलभावादकृतमङ्गले ग्रन्थे प्रवृत्तमानानां तदभावान्मङ्गलाचरणसहितस्य भवत्येव व्याख्येयत्वमिति मन्वानो मङ्गलस्य परिसमाप्त्यादेश्च साध्यसाधनभावं दर्शयति **मङ्गलाचरणपुरस्सराणीति** । मङ्गलपरिसमाप्त्योरन्वयव्यतिरेकव्यभिचारदर्शनान्न कार्यकारणभाव इत्याशङ्क्य व्यभिचारस्य अन्यथासिद्धिं प्रतिबन्धा दर्शयति **न चेत्यादिना** । **सांप्रतं युक्तम्** ।

चक्रः— 'वृद्धिरादैजि'तिसूत्रे वृद्धिशब्दस्येव प्रकृताथसूत्रे ताराथशब्दयोर्माङ्गलिकतया कृत्स्नशास्त्राङ्गतामभिधित्समानः तदौपयिकमङ्गलकर्तव्यतां, तन्निवेशनीयतां च व्यवतिष्ठापयिषुराशङ्कते **तथाऽपीति** ॥ परिसमाप्यन्ते प्रचीयन्ते कर्मलकारौ । परिसमापनप्रचयक्रियाकर्मीभूतानि भवन्ति ॥ **साम्प्रतं युक्तम्** ।

काशी०— तत्रेत्यादिमूले सर्वशास्त्रस्येत्यभिप्रायं वक्तुमाशङ्कते **तथाऽपीति** । **मङ्गलाचरणरहितत्वात्** मङ्गलाचरणपूर्वकत्वाभावात् । हेतोरप्रयोजकत्वं निराह **मङ्गलेति** । अत्र च विघ्नध्वंसे समाप्त्यादौ च मङ्गलं कारणम् । न तु तार्किकाणामिव विघ्नध्वंसद्वारा समाप्तिहेतुः । स्वतो निर्विघ्नस्थले समाप्त्यनुपपत्तेः । प्रतिबन्धकाभावस्य कार्यजनकत्वानुपगमेन विघ्नध्वंसस्य द्वारत्वानुपपत्तेश्च । नापि विघ्नध्वंसं प्रत्येव हेतुः । मङ्गलमाचरतः समाप्तिकामनानैयत्त्यानुपपत्तेः । यद्यपि चरमवर्णोच्चारणादिरूपसमाप्तेरुपान्त्यवर्णोच्चारणादिपर्यन्तपुष्कलकारणे सति

विघ्नकृतप्रतिबन्धादर्शनान्न तद्विघ्नविनाशकत्वं मङ्गलस्य । तथाऽपि पूर्वपूर्ववाक्योच्चारणप्रतिबन्धकस्यापि समाप्त्यनुत्पत्तिप्रयोजकत्वेन तद्विघ्नत्वात् तन्निवर्तकत्वमावश्यकम् । अत एवादावेव मङ्गलाचरणम् । न च विघ्नविनिवर्तकविशिष्टदेवतास्मृतिरूपमङ्गलस्याशुविनाशिनः समयान्तरभाविसमाप्त्यादिहेतुत्वं व्यापारं विना नोपपद्यत इति वाच्यम् । देवतातुष्टेस्तदनुगृहीतापूर्वस्य वा द्वारत्वोपपत्तेः । ययोक्तम् । 'विशिष्टैव देवता तस्येष्ट' इति । न चैवमदृष्टकल्पनागौरवम् । विघ्नध्वंसस्याप्यदृष्टत्वात् । ईश्वरतुष्टेरिच्छाविशेषरूपायाः सर्वसिद्धत्वात् । अपूर्वस्यापि स्वर्गयागयोरिव प्रमितकार्यकारणभावान्यथानुपपत्तिसिद्धत्वात् । नन्वेतावता कथमप्रयोजकत्वशङ्कानिरास इति चेत् । इत्थम् । मङ्गलमकुर्वता सूत्रकृता तस्य निर्विघ्नपरिसमाप्त्यादिहेतुत्वं तावन्नेष्यत इति सिद्धम् । अन्यथा तदकरणानुपपत्तेः । तथा च प्रामाणिकपरित्यागाप्रामाणिकस्वीकारपूर्वकत्वेन शङ्कितप्रामाण्यकत्वादेतच्छास्त्रस्य शाक्यादिशास्त्रवदव्याख्येयत्वम् । एवं वक्ष्यमाणवीर्यवत्त्वाद्यनुपपत्त्या विवक्षितफलसाधनत्वाभावादप्यव्याख्येयत्वमिति । वाक्यार्थचन्द्रिकायां तु समाप्तिकारणमङ्गलाभावेन व्याख्येयस्वरूपस्यैव समग्रस्य निष्पन्नत्वादप्यव्याख्येयतेत्युक्तम् । तत्र यद्यपि व्याख्येयस्वरूपं प्रत्यक्षादिसिद्धम् । तथाऽप्यसमाप्तत्वशङ्कैव व्याख्यानविरोधिनीत्याशयः । यादुपते तु निर्विघ्नपरिसमाप्तिमिव निर्विघ्नप्रचयं प्रत्यपि मङ्गलस्य हेतुतया शास्त्रप्रचयस्य च व्याख्यानरूपत्वेन मङ्गलाभावे विघ्नोपस्पृष्टत्वेन व्याख्यानानुपपत्तेर्नाप्रयोजकत्वमित्याशयो वर्णितः । तत्र यद्यपि व्याख्येये मङ्गलाभावेऽपि व्याख्यानगतमङ्गलेनैव विघ्नपरिहारेण प्रचयोपपत्तिः । तथाऽपि व्याख्यातृगतस्य व्याख्यानप्रतिबन्धकपापरूपविघ्नस्य तत्कृतमङ्गलेन विनाशसंभवेऽपि मूलकारणगतस्य मूलप्रचयप्रतिबन्धकपापरूपविघ्नस्य तत्कृतमङ्गलेनैव नाश्यतया मूले मङ्गलाचरणमावश्यकमिति भावः । ननु किमिदमव्याख्येयत्वम् । न तावद्व्याख्यानाविषयत्वम् । एतच्छास्त्रे बाधाच्छाक्यशास्त्रादौ व्यभिचारश्च । प्रत्यक्षत एव तयोर्व्याख्यानदर्शनात् । नापि व्याख्यानाविषययोग्यत्वम् । तस्य तत्प्रयोजकधर्मराहित्यरूपत्वेनोक्तदोषानिस्तारात् । प्रयोजकाभावे प्रयोज्यानुपपत्तेरिति चेन्न । पुरुषार्थसाधनव्याख्यानाविषयत्वस्य प्रेक्षावद्व्याख्यानाविषयत्वस्य वा विवक्षितत्वात् । विशिष्टनिषेधस्य च विशेषणनिषेधे पर्यवसानात् । यद्वा । व्याख्यानायोग्यत्वमेव साध्यम् । तच्च व्याख्यानप्रयोजकनिश्चितप्रामाण्यप्रयोजनकत्वाभावरूपमिति नोक्तदोषः । उक्तरीत्या शास्त्रस्य प्रामाणिकपरित्यागमूलकत्वादिना प्रामाण्यप्रयोजनयोरनिश्चयात् । स्यादेवं यदि मङ्गलस्य समाप्त्यादिहेतुत्वं प्रामाणिकं स्यात् । न चैवम् । तद्धि मङ्गलसत्त्वे समाप्त्यादिसत्त्वं तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्यामनुमेयम् । तच्च न संभवत्यन्वयतो व्यतिरेकतश्च व्यभिचारादित्याशङ्क्य निषेधति न चेति । अनन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वम् । तत्र यस्यान्वयतो व्यभिचारो गृह्यते तदन्यस्य सामग्रीविघटकत्वमवसीयते । अथ तत एव कार्योत्पत्त्युपपत्तौ सत्यां पूर्वस्यान्यथासिद्धत्वेनाकारणत्वज्ञानमित्यन्वयव्यभिचारः परम्परया कारणत्वविरोधी । व्यतिरेकव्यभिचारस्तु नियतपूर्ववृत्तित्वविघटकतया साक्षादेव कारणत्वविरोधीत्याशयेनादौ व्यतिरेकव्यभिचारमाह अकृतेति । अकृतमङ्गलरूपव्यापाराणामित्यर्थः । कृतेत्यन्वयव्यभिचारोक्तिः । अत्र पूर्वपक्ष्युक्तन्यायातिदेशेन समाधातुं प्रतिबन्दीमाह तथा सतीति । तत्सामान्यं प्रत्यन्वयव्यतिरेकव्यभिचारयोस्तत्कारणताविघटकत्वे इत्यर्थः । कारीयदिरित्यादिना पुत्रेष्ट्यादिपरिग्रहः । तत्राप्यन्वयव्यतिरेकव्यभिचारदर्शनादिति भावः ।

गूढ०— ननु तत्र ताराथमूलत्वमित्यत्र ओङ्काराथशब्दयोरादित्यकथनमयुक्तम् । प्रयोजनाभावात् । न च मङ्गलादिसूचनद्वाराऽधिकार्यादिज्ञापनमेव प्रयोजनमिति वाच्यम् । तस्य पदान्तरेणापि संभवेन एतयोरेवादितः प्रयोगे बीजाभावादित्यतस्तन्निवर्त्यां शङ्कां दर्शयति तथापीति । मङ्गलाद्दित्येऽप्यस्तु व्याकर्तव्यत्वमत आह मङ्गलेति । निरन्तरायमिति क्रियाविशेषणम् । प्रचीयन्ते विस्तरं प्राप्नुवन्ति । नन्वन्वयव्यतिरेकाभ्यां व्यभिचारान्न मङ्गलानुष्ठानमित्याशङ्क्य निषेधति न चेति । समाप्त्यादिदर्शनादित्यत्र प्रमत्तानुष्ठित इति शेषः । तदभावोपलम्भात् इत्यत्र कादम्बर्यादाविति शेषः । किमत्र केवलस्य समाप्तिव्यभिचार उत सेतिकर्तव्यताकस्य तत्र नाद्य इत्याह तथा सतीति । सेतिकर्तव्यस्य तु नास्तीति भावः ।

८८ सु०— स्यादेतदेवम् यदि कारीयदिर्वृष्ट्यादिहेतुत्वं निष्प्रमाणकं स्यात् । न चैवम् । श्रुतिनिश्चिते तु साध्यसाधनभावे तदभावेऽपि भावोऽनेककारणकत्वस्य कल्पको भवति । दर्शपूर्णमासाभ्यामिव त्रैवर्णिकपरिचर्यादिनाऽपि स्वर्गप्राप्तेः ॥ भावेऽप्यभावस्तु कर्तृकरणादिवैगुण्यनिमित्तो भवति । न हि सामग्रीवैकल्येन साध्यं व्यभिचरन् हेतुरहेतुः स्यात् ॥ कर्त्रादिसाद्गुण्ये वा प्रबलप्रतिबन्धकसद्भावः कल्प्यते । न हि प्रतिबद्धं कार्यमजनयत् कारणमकारणं भवति । वह्नेरपि स्फोटं प्रत्यकारणत्वप्रसङ्गात् ।

परि०— तत्र परेणैव समाधिं वाचयित्वा समं मङ्गलाचरणेऽपीत्याह स्यादेतदित्यादिना ॥ एवं व्यभिचारादिना कारीयदिरहेतुत्वं स्यात् । यदि हेतुत्वं निष्प्रमाणकं स्यात् इति योजना । श्रुत्युक्तसाधनाभावेऽपि साध्यसत्त्वमनेककारणकत्वकल्पकमित्येतत् दृष्टान्तेन व्यनक्ति दर्शेति । दर्शो नामामावास्यायां क्रियमाणमाग्नेययागदधियागपयोयागरूपेष्टित्रयरूपकर्मविशेषः । पूर्णमासस्तु पौर्णमास्यां क्रियमाणमाग्नेयोपांश्वग्नीषोमीयाख्येष्टित्रयाख्यं कर्म । ताभ्यां दर्शत्रिकपूर्णमासत्रिकाभ्यां यथा 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति श्रुतिबलात्स्वर्गप्राप्तिः तथा 'परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् । स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः' इत्यष्टादशे गीतायामुक्तदिशा त्रैवर्णिकपरिचर्यातीर्थस्नानदानादिनाऽपि त्रैवर्णिकेतरस्य स्वर्गप्राप्तिर्यथा तथैव कारणान्तरेणाऽपि वृष्ट्यादिसंभवादिति भावः । अन्वयव्यभिचारं निराह भावेऽपीति । साधनस्य भावेऽपि साध्यस्य अभाव इत्यर्थः ॥

यादु०— स्वर्गप्राप्तेरिति । शूद्रस्येति शेषः । 'परिसमाप्त्यादी'त्यत्र 'आदि'पदेन प्रचयादिपरिग्रहः । एवमग्रेऽपि ॥

वं०प०— तत्र सिद्धान्ती समाधानमाशङ्क्ते स्यादेतदेवमिति ॥ श्रुतीति । 'वृष्टिकामः कारीर्या यजेत' इत्यादिश्रुतीत्यर्थः ॥ स्वर्गप्राप्तेरिति । शूद्रस्येति शेषः । तस्य दर्शपूर्णमासानधिकारित्वात्तदभावेऽपि तस्य स्वर्गप्राप्तिसद्भावात् स्वर्गस्यानेककारणकत्वमेव कल्पनीयं, न तयोर्व्यभिचारेणाकारणत्वमित्यर्थः ।

आनन्दः— कारीर्यादिवैषम्यं शङ्कते **स्यादेतदेवमिति। न चैवमिति।** न च निष्प्रमाणकं किन्तु वृष्टिकामः कारीर्या यजेतेति श्रुतिप्रमाणकमेवेति भावः। ननु कारीर्यादिसत्त्वेऽपि वृष्ट्यभावेन व्यतिरेकव्यभिचारान्न तस्य तत्र हेतुत्वमित्यत आह **श्रुतिनिश्चिते त्विति।** तत्र दृष्टान्तं दर्शयति। तथाऽप्यन्वयव्यभिचारान्न हेतुत्वमित्यत आह **भावेऽपीति।** एवमप्यहेतुत्वमापन्नमेव इत्यत आह **न हीति। अन्यथा** केवलस्य दण्डस्य सत्त्वेऽपि घटोत्पत्त्यभावेन व्यभिचारात्तस्यापि हेतुत्वं न स्यादिति भावः। **सत्यपि कर्त्रादिसाद्गुण्ये** कार्याभावान्न हेतुत्वमत्राह **कर्त्रादीति।**

वा०चं०— 'श्रुतिसिद्धे कार्यकारणभावे व्यभिचारशङ्का नोन्मिषती'त्येतत्सहेतुकमुपपादयितुं प्रतिबन्दीमोचनव्याजेन शङ्कामुत्थापयति **स्यादेतदेवमिति॥ निष्प्रमाणकं स्यादिति।** श्रुतिं विहाय अन्वयव्यतिरेकमात्रकल्प्यं स्यादित्यर्थः। श्रुतिसिद्धत्वेऽपि कार्यकारणभावे कुतो न व्यभिचारशङ्केत्यतः अन्यथासिद्धत्वात्तत्र व्यभिचारस्य अन्यथासिद्धान्वयव्यतिरेकयोर्हेतुहेतुमद्भावप्रयोजकत्वाभावस्येव अन्यथासिद्धव्यभिचारस्य तद्बाधकाभावात् उत्पन्ना अपि साऽप्रयोजिकेत्याह **श्रुतीत्यादिना।**

वा०र०— अन्वयव्यतिरेकरूपप्रमाणाङ्गीकार एव व्यभिचारस्य चोदिततया निष्प्रमाणकत्वानङ्गीकारेण तत्परिहारानुपपत्तिरित्यतो निष्प्रमाणपदं व्याचष्टे **श्रुतिं विहायेति। अन्यथासिद्धत्वादिति।** अत्र व्यभिचारस्यान्यथाकारणता विघटनाभावेऽपि प्रकारान्तरेण घटितत्वादित्यर्थोऽभिमतः। **विशेषणे वैयर्थ्यम् एकसिद्धौ चेति** भक्तिपादे वक्ष्यमाणविशेषणाद्यसिद्धिरूपा तु अन्यथासिद्धिरिति नञः **प्रश्लेषयुक्तेति** प्रागेवोक्तम्। एवमन्यत्रापि तत्तदवसरे वक्ष्यामः। अनेनान्यथासिद्धिहेतुः सहेतुकं इत्येतत् पूर्वोक्तहेतुरिति दर्शितम्। **श्रुतीति।** वृष्टिकामः कारीर्या यजेतेति श्रुतीत्यर्थः। **सेति।** व्यभिचारशङ्केत्यर्थः। **अप्रयोजका कार्यकारणाभावघटिका न भवति। भावेऽप्यभाव इति** मूले श्रुतिनिश्चिते त्वित्यादिकमनुवर्तते। **सामग्रीति। स्वेतरसकलकारणसमवधानेत्यर्थः।** तेन हेतोरपि सामग्र्यन्तर्भावाद्धेतोः सामग्रीत्याद्ययुक्तमिति निरस्तम्। **औचितीतिवत्सामग्रीशब्दसाधुतां** टीकाकृत् उत्तरत्र प्रतिपादयिष्यति। न च कर्त्रादिसाद्गुण्येऽपि फलाभावात् व्यभिचार एव इत्यत आह **कर्त्रादीति** मूलम्। प्रतिबद्धकारणमिति मूले संबन्धः।

स०व्र०— **स्यादेतदेवमिति।** यत्रान्वयव्यतिरेकगम्यः साध्यसाधनभावः तत्र तयोर्व्यभिचारे स एवायुक्तः स्यात्।

कुण्डल०— **श्रुतीति।** शुष्यत्सस्यसञ्जीवनकामः। कारीर्या यजेतेति श्रुतिनिश्चिते त्वित्यर्थः। **स्वर्गप्राप्तेरिति।** शूद्रस्येति शेषः। **सामग्रीवैकल्येनेति।** कारणसंपत्तिवैकल्येनेत्यर्थः।

विद्व०— एकस्यानेककारणकत्वं दृष्टान्तेन दर्शयति **दर्शेति।** शूद्रस्येति शेषः।

काशी०— प्रतिबन्दीमोचनमाशङ्कते **स्यादिति। निष्प्रमाणकं** प्रमाणान्तरासिद्धम्। अन्वयव्यतिरेकाभ्यामेव कल्प्यमिति यावत्। **न चैवमिति।** न तु प्रमाणान्तरासिद्धमित्यर्थः। कारीर्या यजेत वृष्टिकाम इत्यादिश्रुतिसिद्ध-

त्वादिति भावः । ननु श्रुतमपि बलवद्युक्तिविरुद्धम् । मृदादिवत्कृत्यवत्त्याज्यमित्यत आह **श्रुतीति** । तदभावे कारीर्यादिसाधनाभावेऽपि भावो वृष्ट्यादिकार्योत्पादः । अनेककारणकत्वस्य कारीर्याद्यनपेक्षकारणान्तरजन्यत्वस्य कल्पक इत्यर्थः । वृष्टिकामादिश्रुत्या वृष्ट्यादिसामान्ये कारीर्यादिजन्यत्वस्य व्यभिचारेणासिद्धावपि वृष्ट्यादिविशेषे तत्सिद्धिर्भवत्येव । न च वृष्ट्यादिसामान्यसामग्रीत एव तत्संभवः । सत्यवग्रहे तदनुपपत्तेः । न चैवमवग्रहनिवृत्तावेव अस्य हेतुत्वमिति युक्तम् । श्रुतिबलादुभयत्रैव हेतुत्वसिद्धेरिति भावः । ननु कारीयदिरवग्रहनिवर्तकत्वादिना वृष्ट्यादि-प्रयोजकत्वपरैवास्तु सा श्रुतिरित्याशङ्कापरिहारार्थमाह **दर्शेति** । यथा वैदिककर्मरहितशूद्रादिस्वर्गे व्यभिचारेऽपि दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिश्रुत्या दर्शादियागस्य स्वर्गविशेषहेतुत्वमेव सिद्ध्यति न तु सर्वथा हेतुत्वाभाव एवमन्यत्रापि श्रुतेरविशेषादिति भावः । एवं व्यतिरेकव्यभिचारं निरस्यान्वयव्यभिचारं निरस्यति **भावेऽपीति** । कारीर्यादिसत्त्वेऽपि वृष्ट्याद्यनुत्पाद इत्यर्थः । भवतीति कल्प्यत इत्यर्थः । तावता तस्य व्यभिचारेणाकारणत्वं दुर्वारमत आह **न हीति** । साध्यं व्यभिचरन् कार्यमनुत्पादयन् । **हेतुः** हेतुत्वेन मतः । **अहेतुः** अकारणं स्यादिति । अन्वयव्यभि-चारो हि न यत्किञ्चित्कारणसत्त्वे कार्याभावरूपः । कार्यकारणभावमात्रोच्छेदप्रसङ्गात् । किन्तु कृत्स्नसामग्रीसत्त्वे । प्रकृते च विशुद्धत्वादिसाद्गुण्यविशिष्टकर्तृकरणादेः सामग्रीघटकत्वात् । श्रुतसाध्यसाधनभावान्यथानुपपत्त्या सामग्रीवैकल्य-स्यैव कल्पनीयत्वेन व्यभिचारानवकाशान्न दोष इति भावः । ननु कर्त्रादिसाद्गुण्यसत्त्वेऽपि क्वचित्कार्यानुपलम्भा-द्व्यभिचारो दुर्वार एवेत्यत आह **कर्त्रादीति** । प्रतिबन्धकस्यापि कारीर्यादिना निवृत्तिः स्यादत उक्तम् **प्रबलेति** । कारीर्याद्यनिवर्त्यकर्मविशेषरूपेत्यर्थः । नन्वस्तु प्रतिबन्धकाधीनः कार्यानुत्पादः । तावता व्यभिचारावारणादकारणत्वं तु कारीयदिर्दुर्वारमित्यत आह **न हीति** । असति प्रतिबन्धके कृत्स्नसामग्रीसत्त्वे कार्यानुत्पाद एवान्वयव्यभिचारः । स च प्रकृते नास्त्येवेति न कारणत्वानुपपत्तिरिति भावः । असति प्रतिबन्धक इत्यनुक्तौ दोषमाह **वह्नेरिति** । मणिमन्त्रादिप्रतिबन्धकसत्त्वे स्फोटाद्यनुत्पादादिति भावः । नन्वेवं कारीर्यादौ प्रवृत्त्यनुपपत्तिः सामग्रीवैगुण्यादिशङ्क्या कार्योत्पादानिश्चयात् ।

गूढ०— कारीर्यादिवैषम्यं शङ्कते **स्यादेतदेवमिति** । **न चैवमिति** । न च निष्प्रमाणकं किन्तु वृष्टिकामः कारीर्या यजेतेति श्रुतिप्रमाणकमेवेति भावः । ननु कारीर्यादिसत्त्वेऽपि वृष्ट्यभावेन व्यतिरेकव्यभिचारान्न तस्य तत्र हेतुत्वमित्यत आह **श्रुतिनिश्चिते त्विति** । अत्र दृष्टान्तं दर्शयति । तथाप्यन्वयव्यभिचारान्न हेतुत्वमित्यत आह **भावेऽपीति** । एवमप्यहेतुत्वमापन्नमेवेत्यत आह **न हीति** । अन्यथा केवलस्य दण्डस्य सत्त्वेऽपि घटोत्पत्त्यभावेन व्यभिचारात् तस्यापि हेतुत्वं न स्यादिति भावः । सत्यपि कर्त्रादिसाद्गुण्ये कार्याभावान्न हेतुत्व-मत्राह **कर्त्रादीति** ।

८९ सु०— न चैवं सामग्रीवैगुण्यशङ्क्या प्रतिबन्धकशङ्क्या वा अस्याननुष्ठानम् । औत्सर्गिकी खलु प्राणभृतां प्रवृत्तिः निवृत्तिस्तु अपवादात् । अन्यथैवंविधायाः शङ्कायाः सर्वत्र सौलभ्येन सकलप्रवृत्तिविलयापातादिति ।

परि०— अस्येति। कारीर्यादिश्रौतसाधनस्येत्यर्थः। औत्सर्गिकी स्वाभाविकी।

वं०प०— सर्वत्र कृष्यादौ।

आनन्दः— न चैवं कारीर्यनुष्ठानमेव न स्यात् सामग्रीवैगुण्यशङ्कायाः प्रतिबन्धकशङ्कायाश्च सर्वत्र सुलभत्वादित्याशङ्क्य निषेधति **न चैवमिति। अन्यथेति। वैगुण्यादिशङ्क्याऽननुष्ठान इत्यर्थः।**

वा०चं०— ननु तर्हि यत्प्रयुक्ता व्यभिचारस्यान्यथासिद्धिः तच्छङ्काप्रतिबद्धः श्रुतिनिश्चितोऽपि हेतुहेतुमद्भावः, फलार्थिनो हेतौ न प्रवृत्तिप्रयोजक इत्याशङ्क्ते **न चैवमिति।**

वा०र०— यत्प्रयुक्तेति। कर्तृकरणादिवैगुण्यप्रबलप्रतिबन्धकप्रयुक्तेत्यर्थः।

विद्व०— फले पाक्षिकसन्देहे प्रवृत्त्यभावमाशङ्क्य कृष्यादाविव उपपद्यते इत्याह **न चैवमिति।**

काशी०— कार्यानुत्पादनिश्चये सति प्रवृत्तिवारणाय कार्योत्पादनिश्चयस्य प्रवृत्तिहेतुत्वावश्यंभावादित्याशङ्क्य निराचष्टे **न चेति**। अननुष्ठानं प्रसज्यत इति शेषः। औत्सर्गिकी प्रतिबन्धकासत्त्वमात्रापेक्षा। तर्हि फलानुत्पादनिश्चयेऽपि प्रवृत्तिः स्यादत आह **निवृत्तिरिति**। फलानुत्पादनिश्चयस्य प्रतिबन्धकत्वात्तत एवाप्रवृत्तिरित्यर्थः। अन्यथा कार्योत्पादनिश्चयस्य प्रवृत्तिकारणत्वे। एवंविधशङ्कायाः फलोत्पादनिश्चयविरोधिवैगुण्यादिशङ्कायाः। सर्वत्र लौकिकविषयेष्वपीत्यर्थः। नन्वेवं मङ्गलस्यापि व्यभिचारेण निर्विघ्नपरिसमाप्त्यादिसामान्यहेतुत्वासिद्धावपि तद्विशेषहेतुत्वं सिद्धचेत्। मङ्गलोत्तरसमाप्त्यादौ तस्य व्यभिचाराभावात्। न च कारणस्य कार्यतानवच्छेदकत्वनियमान्न मङ्गलोत्तरसमाप्तित्वावच्छिन्नं प्रति मङ्गलस्य कारणत्वसंभव इति वाच्यम्। तादृशनियमे मानाभावात्। अन्यथा तत्तल्लिङ्गकानुमितौ तत्तल्लिङ्गपरामर्शस्य हेतुत्वानुपपत्तेः। न चैवमात्मतत्त्वज्ञानस्य तरति शोकमात्मविदित्यादिश्रुतिबोधितमुक्तिहेतुत्वानुरोधेन काशीमरणादेर्मुक्तिप्रयोजकत्वमात्रपरतया काशीमरणान्मुक्तिरित्याद्यागमव्याख्यानमसङ्गतं स्यात्। तत्तदुत्तरमुक्तौ तत्तद्धेतुत्वकल्पनसंभवादिति वाच्यम्। तथा सति 'नान्यः पन्था अयनाय विद्यते' 'दृष्ट्वैव तं मुच्यते नापरेणे'त्यादिश्रुतिविरोधापातात्। तत्र ज्ञानान्यस्य मुक्तिहेतुत्वनिषेधात्। तथा च कारणस्य कार्यतावच्छेदकत्वे बाधकाभावात् मङ्गलोत्तरसमाप्त्यादौ मङ्गलस्य हेतुत्वं निष्प्रत्यूहमिति। मैवम्। अन्यत्र कृत्स्नसामान्यसामग्रीत एव मङ्गलोत्तरसमाप्तिसंभवे तत्र मङ्गलस्यान्यथासिद्धत्वात्। न चान्यत्र विघ्नात्यन्ताभावादिः। सामग्रीविघ्नस्थले तु मङ्गलजन्यविघ्नध्वंसादिरिति सामग्रीभेदान्नैवमिति वाच्यम्। विघ्नसंसर्गाभावत्वेनैव सामान्यतः समाप्तिहेतुत्वात्। विघ्नसद्भावस्य कार्यानुत्पादोन्नेयत्वेन समाप्तिस्थले विघ्नध्वंसानिर्णयाच्च। मङ्गलस्य विघ्नध्वंसहेतुत्वेनैवोपपत्तौ समाप्तिं प्रत्यन्यथासिद्धेर्दुर्वारत्वाच्चेति शङ्काशयः।

गूढ०— न चैवं कारीर्यनुष्ठानमेव न स्यात् सामग्रीवैगुण्यशङ्कायाः प्रतिबन्धकशङ्कायाश्च सर्वत्र सुलभत्वादित्याशङ्क्य निषेधति **न चैवमिति। अन्यथेति। वैगुण्यादिशङ्क्याऽननुष्ठान इत्यर्थः।**

९० सु०— सममेतत्सकलं प्रकृतेऽपि।

मङ्गलाचरणस्य निर्विघ्नपरिसमाप्त्यादिहेतुत्वस्यापि अविगीतशिष्टाचारानुमितश्रुतिसिद्धत्वात्।

परि०— ननु सममित्ययुक्तम्। 'समाप्तिकामो मङ्गलमाचरेत' इति स्पष्टश्रुतेरभावादित्यत आह मङ्गलेति। कर्मादौ शिष्टैः क्रियमाणो मङ्गलाचारः तत्कर्मसमाप्त्यादिहेतुत्वप्रमापूर्वकः तत्कामनयैव शिष्टैरनुष्ठीयमानत्वात् तृप्तिकामनया अनुष्ठीयमानभोजनवत्। तद्धेतुत्वप्रमा च श्रौती भवितुमर्हति प्रत्यक्षानुमानागम्यत्वे सति जन्यप्रमात्वात् यदेवं तदेवं यथा संमतमित्येवंरूपेणानुमितश्रुतिसिद्धत्वात् इत्यर्थः।

यादु०— अविगीतशिष्टाचारेति। श्रुत्यनुमापकं च, 'मङ्गलं श्रुतिप्रमापिताभीष्टपरिसमाप्त्यादिहेतुताकं, तदुद्देश्यकाविगीतशिष्टाचारविषयत्वात् यद्यदुद्देश्यकाविगीतशिष्टाचारविषयस्तत्तद्धेतुतया श्रुतिप्रमापितं, यथा स्वर्गोद्देश्यकं दर्शादि' इति सामान्यव्याप्तिमूलकं द्रष्टव्यम्॥ ननु वेदनिषिद्धाचारस्याशिष्टाचारत्वेन अगम्यागमनादौ शिष्टपदेनैव व्यभिचारवारणे अविगीतपदं व्यर्थमिति चेन्न, वेदप्रामाण्यानभ्युपगमासंभावितास्यैवात्र शिष्टाचारपदेन विवक्षितत्वात्। तस्य च रात्रिश्राद्धादौ व्यभिचारवारणाय अविगीतपदम्। अविगीताचारत्वमात्रस्य च भोजनादौ व्यभिचारपरिहाराय शिष्टपदम्। भोजनादेश्च वेदप्रामाण्यानभ्युपगन्तरि बौद्धेऽपि सत्त्वेनोक्तरूपशिष्टाचारपरत्वाभावान्न व्यभिचार इति।

वं०प०— पूर्वपक्षी उत्तरमाह सममेतदिति। तदुपपादयति मङ्गलेति।

आनन्दः— साम्येन परिहरति सममिति। ननु कारीयादिः वृष्ट्यादिहेतुत्वस्य श्रुत्या निश्चितत्वात्प्रकृते च निश्चायकाभावेन निश्चयासंभवात्कथं साम्यमित्यत आह मङ्गलेति। अविगीतेत्यादि। आचारविषयत्वमात्रस्य जलताडनादौ सत्त्वेऽपि श्रुतिबोधितत्वाभावेन व्यभिचार इत्यत उक्तं शिष्टेति। इष्टसाधनतांशे भ्रमरहितत्वं शिष्टत्वम्। तच्च न तत्रेति न व्यभिचारः। शिष्टकृतागम्यागमनादौ तत्परिहारार्थम् अविगीतेति। तच्च वेदनिषिद्धमेवेति। एवमपि शिष्टकृतभोजनादौ गतमतोऽलौकिकेत्यपि द्रष्टव्यम्।

वा०चं०— तर्हि मङ्गलेऽप्ययं प्रवृत्तिप्रयोजको हेतुर्हेतुमद्भावनिश्चयादिप्रकारः समः। इयांस्तु विशेषः। कारीर्यादौ प्रत्यक्षश्रुतिः मङ्गले त्वनुमितेति स्वाभिप्रायमाविष्कुर्वन् प्रतिबन्दीमुपपादयति सममिति।

वा०स०— तर्हि मङ्गलेऽपीति। सम इति प्रतिबन्दीमुपादाय कारीर्यादौ प्रत्यक्षेत्यादि स्वाभिप्रायं आविष्कुर्वन् प्रतिबन्दीमुपपादयतीत्यर्थः।

स०व०— कारीर्यादिवृष्ट्यादीनां तु श्रुत्यैव साध्यसाधनभाव इत्याह सममिति।

कुण्डल०— अभिसन्धिमुद्घाटयति **सममेतत्सर्वं प्रकृतेऽपीति** । **मङ्गलस्येति** । अयमत्र प्रयोगः । मङ्गलं श्रुतिबोधितोद्देश्यसिद्धिहेतुताकम् । अविगीतशिष्टाचारविषयत्वात् संमतवत् । यदेवं तदेवं यथोद्देश्यस्वर्गादिसिद्धिभूतदर्शादीति सामान्यव्याप्तिः । न चात्र हेतौ वेदानिषिद्धाचारस्यैव विशिष्टाचारतया तद्विषयत्वस्य विशिष्टकृतावगम्यागमनादावभावेन व्यभिचाराभावादविगीतपदं व्यर्थमिति वाच्यम् । वेदप्रामाण्यानभ्युपगन्तृसंभावितावारस्यैव विशिष्टाचारपदेन विवक्षितत्वात् । तस्य चाल्पस्यादिना शिष्टानुष्ठितरात्रिश्राद्धादौ व्यभिचारवारणायाविगीतपदम् । अविगीताचारमात्रविषयत्वस्य भोजनादौ व्यभिचारवारणाय शिष्टपदम् । भोजनादेश्च वेदप्रामाण्यानभ्युपगन्तरि बाह्येऽपि सत्त्वेनोक्तरूपशिष्टाचारविषयत्वाभावान्न व्यभिचार इति ज्ञातव्यम् ।

विद्व०— कथं साम्यं मङ्गलाचरणपरिसमाप्त्योः साध्यसाधनभावे प्रमाणाभावादित्यत आह **मङ्गलाचरणस्येति** । अत्र मङ्गलं श्रुतिबोधिताविघ्नसमाप्त्यादिहेतुकं वक्तव्यं तदुद्देशिकाविगीतशिष्टाचारविषयत्वात् यत् यदुद्देश्यकाविगीतशिष्टाचारविषयं तत् तद्धेतुतया श्रुतिबोधितं यथा स्वर्गोद्देश्यकं दर्शादीति सामान्यव्याप्तिकमनुमानं द्रष्टव्यम् । नन्विदमनुमानमप्रयोजकम् इत्यतो हेतुमङ्गीकृत्य साध्याभावाङ्गीकारे मङ्गलविषयकशिष्टप्रवृत्तेः वैयर्थ्यं वा फलान्तरानुसन्धानपूर्वकत्वं वा **मङ्गलाचरणाविघ्नपरिसमाप्त्योः** साध्यसाधनभावप्रतीतिभ्रान्तित्वं वा प्रमाणान्तरबोधिताविघ्नसमाप्त्यादिहेतुकत्वं वा वक्तव्यं प्रकारान्ताभावात् । तत्राद्ये शिष्टाचारत्वरूपहेतूच्छित्तिः द्वितीये दृष्टपरित्यागादृष्टकल्पनाप्रसङ्गः तृतीये अविगानानुपपत्त्या तद्विशिष्टहेतूच्छित्तिः चतुर्थे प्रमाणान्तरानवकाशेन निर्मूलत्वापत्तिश्च ।

चषकः— **शिष्टाचारानुमितश्रुतिसिद्धत्वादिति** । 'मङ्गलं, श्रुतिप्रत्यापितसमीहितसमाप्त्यादिनिरूपितसाधनताविशेषितम्, तदुद्देश्यकाविगीतशिष्टप्रवृत्तिगोचरत्वात्, यत्तादृशप्रवृत्तिगोचरं, तत्तत्प्रत्यापितसमीहितसाधनताकमि'ति दर्शनिदर्शनकसामान्यव्याप्तिमूलकश्रुत्यनुमापकानुमानभङ्गी द्रष्टव्या ॥

काशी०— पूर्वपक्ष्युक्तन्यायातिदेशेन समाधत्ते **सममिति** । मङ्गलस्य निर्विघ्नसमाप्त्यादिहेतुत्वेऽपि श्रुतिसिद्धत्वादिकं समानमित्यर्थः । ननु तादृशश्रुतेरनुपलम्भात्कथमेतत्साम्यमित्यत आह **मङ्गलाचरणस्येति** । शिष्टाचारेत्यनेन मङ्गलाकरणे शिष्टाचारविरोधोऽपि दोषः सूचितः । **अनुमितेति** । विमतो मङ्गलाचारः समाप्तिमङ्गल्योः साध्यसाधनभावप्रमितिपूर्वकः समाप्त्युद्देश्यकमङ्गलविषयकाविगीतशिष्टाचारत्वात् । यो यदुद्देश्यकयद्विषयकाविगीतशिष्टाचारः स तयोः साध्यसाधनभावप्रमितिपूर्वको यथा स्वर्गोद्देश्यकयागाचार इत्यनुमानेन साध्यघटकप्रमितौ वेदेतरप्रमाणजन्यत्वबाधबलाद्वेदजन्यप्रमितिपूर्वकत्वस्यैव सिद्धया समाप्तिमङ्गल्योः साध्यसाधनभावबोधकवेदसिद्धिः । अनुमितवेदस्यास्मदादीन्प्रत्यबोधकत्वेऽपि मन्वादीन्प्रति बोधकत्वात् । आचारत्वमात्रस्य भ्रान्ताचारे, शिष्टाचारत्वस्य रात्रिश्राद्धाद्याचारे, अनिषिद्धशिष्टाचारत्वस्य यागाद्याचारे, मङ्गलविषयकतादृशाचारत्वस्यान्त्यमङ्गलाचारे, समाप्त्युद्देश्यकतादृशाचारत्वस्य स्तवपाठाद्याचारे च व्यभिचाराद्विशिष्टहेत्वनुसरणम् । न च चैत्यवन्दनादेर्भ्रान्ताचारस्याविगीतपदेनैव वारणाच्छिष्टपदं व्यर्थमिति वाच्यम् । विधिनिषेधविधुरबालक्रीडादौ फलसाधनताभ्रान्तिपूर्वके भ्रान्तिवारणाय तदावश्यकत्वात् । शिष्टत्वं चात्र

प्रेक्षावत्त्वम् । उत्तरवाक्ये तथोक्तेः । तच्च फलसाधनताप्रमितिमत्त्वमभ्रान्तत्वपर्यवसितम् । न च मन्वादीनामपि क्वचिद्भ्रान्तिसंभवादसिद्धिः । मङ्गलाचरणकाले भ्रान्तिरहितत्वेनोपपत्तेः । भ्रान्तिरहितत्वं च तेषामागमसिद्धम् । नन्वप्रयोजको हेतुरिति चेत् । अप्रयोजकत्वं हि साध्यं विना हेतोरुपपत्तौ स्यात् ।

गूढ०— साम्येन परिहरति सममिति । ननु कारीयदिः वृष्टयादिहेतुत्वस्य श्रुत्या निश्चितत्वात् । प्रकृते च निश्चायकाभावेन निश्चयासंभवात्कथं साम्यमित्यत आह मङ्गलेति । अविगीतेत्यादि । आचारविषयत्वमात्रस्य जलताडनादौ सत्त्वेऽपि श्रुतिबोधितत्वाभावेन व्यभिचार इत्यत उक्तं शिष्टेति । इष्टस्य साधनत्वांशे भ्रमरहितत्वं शिष्टत्वं तच्च न तत्रेति न व्यभिचारः । शिष्टकृतागम्यगमनादौ तत्परिहारार्थम् अविगीतेति । तच्च वेदनिषिद्धमंवंति । एवमपि शिष्टकृतभोजनादौ गतमतोऽलौकिकेत्यपि द्रष्टव्यम् ।

९१ सु०— न तावत्प्रेक्षावत्प्रवृत्तिर्विफला संभाविनी । नापि प्रयोजनान्तरार्था । दृष्टपरित्यागादृष्टकल्पनाप्रसङ्गात् । कार्यमारिप्सुः खलु तत्समाप्त्यादिकं कामयत इत्यनुभवसिद्धम् । न च फलान्तरानुसन्धाने प्रमाणमस्ति । न चैतेषामियं साध्यसाधनभावप्रतीतिर्भ्रान्तिः । तथा सत्यविगानानुपपत्तेः । न च प्रत्यक्षादेरत्रावकाश इति श्रुतिरेव शिष्टाचारमूलं कल्प्यते ॥ न च विघ्नहेतुसद्भावानिश्चयादिदमननुष्ठेयम् तत्सन्देहेऽप्यनुष्ठानस्य 'पाक्षिकोऽपि दोषः परिहर्तव्य' इति न्यायप्राप्तत्वात् ॥ न च 'भगवतः सूत्रकारस्य विघ्ना एव न सन्तीति तत्परिहारार्थानुष्ठानं न दोषाये'ति युक्तम् । शिष्यार्थमपि कर्तव्यत्वात् । यतो मङ्गलाचरणपुरःसराणि शास्त्राणि वीर्यवन्ति भवन्त्यायुष्मत्पुरुषकाणि च । अन्यथा भारतादावपि न कुर्यात् ।

परि०— आद्यहेतुप्रयोगे फलकामनारूपविशेषणासिद्धिं निराह न तावदिति । तत्कामनयेत्यस्य असिद्धिं निराह नापीति । दृष्टत्यागादृष्टकल्पने क्रमेण व्यनक्ति कार्यमिति । आरिप्सुः आरब्धुकामः । हेतोरप्रयोजकत्वं निराह न चैतेषामिति । द्वितीयप्रयोगे विशेषणासिद्धिं निराह न चेति । नन्वस्तु मङ्गलाचारस्याविघ्नपरिसमाप्त्यादिहेतुत्वम् । तथापि नास्य कर्तव्यत्वम् । विघ्नसन्देहेन वा सूत्रकृतो निर्विघ्नत्वादेव वाऽननुष्ठानस्य, अनुष्ठानेऽपि वा फलाभावेन ग्रन्थे निवेशनाभावस्य वा संभवेन मङ्गलाचाररहितत्वादित्यस्य अन्यथोपपत्तेरसिद्धत्वादित्यतः क्रमेण त्रयमपि निराह न चेत्यादिना ॥ भारतादाविति । 'नारायणं सुरगुरुं जगदेकनाथं भक्तप्रियं सकललोकनमस्कृतं च । त्रैगुण्यवर्जितमजं विभुमाद्यमीशं वन्दे भवघ्नममरासुरसिद्धवन्द्यम्' इत्यादि भारते । 'जन्माद्यस्य यतोऽन्वयात्' इत्यादि भागवतादौ च न कुर्यादित्यर्थः ॥

गु०दी०— पाक्षिकोऽपि दोषः परिहर्तव्य इत्यत्र दोषाभावपक्षेऽपि विष्णुप्रीतिद्वारा परिसमाप्तिं प्रत्येव कारणत्वात्सार्थक्यमिति ज्ञेयम्।

यादु०— ननूक्तहेतोः साध्यं विनाऽपि; फलाभावेन वा, समाप्तीतरफलकत्वेन वा, तत्फलकत्वप्रतीतेः भ्रान्तित्वेन वा, प्रत्यक्षादिमानान्तरजन्यत्वेन वा उपपत्तेः अप्रयोजकता इत्याशङ्कायामुक्तहेतूच्छित्तिरेवात्र बाधिकेत्यभिप्रेत्याह न तावत् प्रेक्षावत्प्रवृत्तिरित्यादिना। प्रारिप्सितपरिसमाप्त्यादिकामनया मङ्गले शिष्टानां या प्रवृत्तिः सेत्यर्थः॥ दृष्टपरित्यागमुपपादयति कार्यमारिप्सुरिति॥ अदृष्टकल्पनामुपपादयति न च फलान्तरेति॥ न च प्रत्यक्षादेरिति। साध्यसाधनभावस्यातीन्द्रियत्वात्र प्रत्यक्षस्यान्धपरम्पराशङ्कावरुद्धत्वान्नानुमानस्य अत्रावकाश इति भावः॥ ननु 'नाशार्थिप्रवृत्तौ नाश्यनिश्चयवानधिकारी दृष्टः, यथा पापनिश्चयवान् प्रायश्चित्ते। अत्र च नाश्यानां विघ्नहेतूनां प्रथमतोऽनिश्चयादनधिकारिकं मङ्गलं, नानुष्ठेयमि'ति सत्प्रतिपक्षमाशङ्क्याह न च विघ्नहेतुसन्द्रावेति॥ तत्सन्देहेऽपीति। तथा च 'विघ्नज्ञानवानेव अत्र अधिकारी'ति प्रतिपक्षानुमाने स्वरूपासिद्धिरिति भावः॥ शिष्यार्थमपीति। अध्येतृणामायुरादिप्रतिबन्धकविघ्नघातार्थमित्यर्थः। अत एवाह आयुष्मत्पुरुषकाणि चेति। एवमग्रेऽपीति।

वं०प०— श्रुत्यनुमानप्रकारं दर्शयति न तावदिति। प्रयोजनान्तरं स्वर्गादि॥ दृष्टं प्रयोजनमुपपादयति कार्यमिति॥ अविगानेति। विगानं विप्रतिपत्तिः। अविगानं सर्वसंमतिरित्यर्थः॥ अनिश्चयादिति। विघ्ननिश्चयवत एवाधिकारित्वेन आत्मनो विघ्नहेतुसद्भावस्यानिश्चिततया विघ्ननिश्चयाभावेन निरधिकारिकत्वप्राप्त्या, मङ्गलस्याननुष्ठेयत्वमित्यर्थः॥ विघ्नज्ञानवानेवाधिकारी, ज्ञानं निश्चयः, शङ्का चेत्याशयेनाह तत्सन्देहेऽपीति। विघ्नहेतुसन्देहेन विघ्नसन्देहेऽपीत्यर्थः। 'श्रेयांसि बहुविघ्नानि भवन्ति महतामपि' इति वचनादिति भावः। तथाच 'मङ्गलं नानुष्ठेयं निरधिकारिकत्वादि'त्यत्र स्वरूपासिद्धिरिति हृदयम्॥

आनन्दः— ननु श्रुत्युपदिष्टाभीष्टोपायताकत्वाभावेऽपि अस्तु तदाचारविषयत्वमित्यप्रयोजको हेतुरित्याशङ्क्य किं शिष्टानां मङ्गलानुष्ठानप्रवृत्तिः अफलैव वा प्रयोजनान्तरार्था वा तदीयसाध्यसाधनभावप्रतीतेर्भ्रमत्वात् भ्रान्त्या वा। नाद्यः इत्याह न तावदिति। अन्यथा प्रेक्षावत्त्वमेव न स्यादिति भावः। द्वितीयं निराह न चेति। दृष्टपरित्यागाद्येव विशदयति कार्यमिति। उपस्थितानुपस्थितयोरुपस्थितस्यैव फलवत्त्वकल्पनस्य न्याय्यत्वादिति भावः। तृतीयं निराह न चेति। तथा सति सर्वेषामविरोधेन प्रवृत्तिर्न स्यादित्याह तथा सतीति। न हि सर्वे भ्रान्ता इति भावः। तथा दण्डघटादाविव प्रत्यक्षादिनैवं साध्यसाधनबोधसंभवात्। श्रुतेः शिष्टाचारमूलत्वकल्पनमयुक्तमित्यत आह न चेति। अत्र मङ्गलस्य समाप्तिहेतुत्वे। ननु नाशार्थिप्रवृत्तौ नाश्यनिश्चयस्य कारणत्वात् प्रकृते च नाश्यभूतविघ्ननिश्चयाभावात् कथं प्रवृत्तिरित्याशङ्क्य निषेधति न चेति। तत्सन्देहेऽपीति। तथाच नाश्यज्ञानमेव नाशार्थिप्रवृत्तौ हेतुरिति भावः। मङ्गलाचरणस्य प्रयोजनान्तरमाह यत इति। अन्यथेति। शिष्यार्थं कर्तव्यत्वाभाव इत्यर्थः।

श्रीनिधि०— अविगानानुपपत्तेः इत्यत्र विगानं विप्रतिपत्तिः।

वा०चं०— ननु तर्हि 'मङ्गलं श्रुतिबोधिताविघ्नसमाप्त्याद्युपायताकमविगीतशिष्टाचारविषयत्वादि'ति विवक्षितानुमाने अप्रयोजकत्वम् इत्यतो अविगीतशिष्टाचारविषयत्वेऽपि मङ्गलस्य श्रुत्यबोधिताविघ्नसमाप्त्याद्युपायताकत्वाभावे मङ्गलविषयकशिष्टप्रवृत्तेर्वैफल्यं वा फलान्तरानुसन्धानपूर्वकं वाऽविघ्नसमाप्तिसाधनत्वभ्रान्तिपूर्वकत्वं वा प्रमाणान्तरबोधिताविघ्नसमाप्त्याद्युपायताकत्वं वा वक्तव्यम् । प्रकारान्ताभावात् । तत्र च वैफल्ये शिष्टाचारत्वरूपहेतूच्छेदापत्त्या, फलान्तरानुसन्धानपूर्वकत्वे च दृष्टादृष्टपरित्यागकल्पनाप्रसङ्गात् । भ्रान्तिपूर्वकत्वे चाविगीतशिष्टाचारत्वरूपहेतूच्छेदापत्त्या प्रत्यक्षस्य स्वतःसाध्यसाधनभावागोचरत्वात् । अन्वयव्यतिरेकयोश्च व्यभिचारेण तत्सहकाराभावात्तत एवानुमानस्यापि प्रवृत्त्यनुपपत्तेः, अतिप्रसङ्गपराहतेश्चास्यार्थस्यालौकिकत्वाच्च; पौरुषेयवाक्यस्यापि मूलान्तरसापेक्षत्वात्, श्रुतिमूलकत्वाभावे प्रेक्षावत्प्रवृत्तेः निर्मूलत्वापत्तिरूपविपक्षबाधकसत्त्वात्, श्रुतिबोधिताविघ्नसमाप्त्याद्युपायताकत्वसिद्धिरिति न अप्रयोजकत्वमित्याशयेनाह न तावदिति ॥ दृष्टपरित्यागमुपपादयति **कार्यमिति** ॥ अदृष्टकल्पनामुपपादयति **न च फलान्तरेति** । ननु तर्हि समाप्तिविशेषणतया विघ्नाभावस्य मङ्गलप्रवृत्त्युद्देश्यतापत्त्या, नाशार्थिप्रवृत्तौ नाश्यनिश्चयवतोऽधिकारस्य च प्रायश्चित्तादिस्थले क्लृप्तया, विघ्ननिश्चयाभावेन अधिकाराभावात् 'अधिकारिशून्यत्वान्न मङ्गलं श्रुतिबोधिताभीष्टोपायताकमि'त्युक्तानुमाने प्रतिपक्षं शङ्कते **न च विघ्नेति** ॥ न्यायप्राप्तविघ्नसन्देहेच्छिष्टानुष्ठानबलेन विघ्नज्ञानवत एव तत्राधिकारकल्पनात् हेतुः अप्रसिद्ध इत्याह **तत्सन्देहेऽपीति**।

नन्वेवमपि 'अविघ्नसमाप्त्यादिहेतुत्वस्ये'त्ययुक्तम् । तावता विघ्नध्वंसस्य फलत्वोपपत्तावपि, समाप्तेर्मङ्गलफलत्वानुपपत्तेः । यद्यपि श्रुतिनिश्चितसाध्यसाधनभावे, 'मङ्गलाभावे अपि समाप्तिभावो, मद्रीत्याऽनेककारणानामेकशक्तिमत्त्वकल्पको वा, त्वद्रीत्या समाप्तिगतजातिविशेषनिमित्तो वे'ति न व्यतिरेकव्यभिचारः; अन्यथा गङ्गास्नानादिनाऽपि विघ्नध्वंसभावेन तस्यापि मङ्गलव्यभिचारः प्रसज्येत, 'मङ्गलभावेऽपि समाप्त्यभावस्तु सामग्रीवैकल्यस्य वा, प्रतिबन्धकसद्भावस्य वा, कल्पको भविष्यती'ति नान्वयव्यभिचारोऽपि; इति समाप्तिं प्रत्युभयतो व्यभिचाराभावस्तुल्यः; तथाऽपि विघ्नध्वंसविशिष्टसमाप्तेः फलत्वे विशेषणीभूतविघ्नध्वंसफलत्वस्यावश्यकत्वाल्लाघवाच्च, विघ्नसंशये तन्निश्चये वा शिष्टानां मङ्गलाचरणाद्विघ्नाभावस्यावश्यं कामनाविषयत्वेनोपस्थिततया पूर्वानुपस्थितापूर्वप्रतिबन्दीग्रहणासंभवाच्च, 'समाप्यतामि'ति कामनास्थले विघ्नध्वंसस्य बुद्धिस्थत्वाच्च, तस्यैव फलत्वसंभवे, समाप्तेरपि फलत्वे, कल्पनागौरवं स्यादेव । किञ्च विघ्नध्वंसस्य समाप्तिपूर्ववृत्तित्वग्रहानन्तरं मङ्गलस्य तत्पूर्ववृत्तित्वग्रहात्कुलालपितृवत् तस्यान्यथासिद्धत्वम् । अपि च प्रमत्तानुष्ठितसमाप्तौ मङ्गलं विनैव विघ्नसंसर्गाभावो हेतुः, तथा च तत्र क्लृप्तपूर्ववर्तिन एवान्यत्रापि समाप्तिसंभवे तत्सहभूतमङ्गलस्यान्यथासिद्धिरेवेति न समाप्तेरपि फलत्वं युक्तम् इति चेन्मैवम् ।

तथा सति कारीयदिरप्यवग्रहध्वंसविशिष्टवृष्टिफलकत्वे विशेषणीभूतावग्रहध्वंसफलस्यावश्यकत्वाल्लाघवात् चावग्रहनिश्चय एव तदनुष्ठानेन अवग्रहध्वंसस्य कामनाविषयत्वेनावश्यमुपस्थितत्वात् । 'वृष्टिर्भूयादि'ति कामनायामप्यवग्रहध्वंसस्य बुद्धिस्थत्वात् अवग्रहध्वंसस्य वृष्टिपूर्ववृत्तित्वग्रहानन्तरं कारीयदिस्तत्पूर्ववृत्तित्वग्रहात्कुलालपितृवत् तस्यान्यथासिद्धत्वात्, स्वत एव जायमानवृष्टावग्रहसंसर्गाभावस्य हेतुतया तत्र क्लृप्तनियतपूर्ववर्तिन एवान्यत्रापि वृष्ट्युपपत्तौ तस्यान्यथासिद्धत्वाच्च, कारीयदिरप्यवग्रहध्वंसविशिष्टवृष्टिफलकत्वं न स्यात् । न च कारीर्यादितोऽवग्रह-

निवृत्तिमात्रं, वृष्टिस्तु स्वकारणादेवेतीष्टापत्तिरिति वाच्यम् । 'सुखं मे भूयादि'त्यविशेषेण कामनाया अभावेन, 'स्रक्चन्दनादिविशिष्टसुखं स्यादित्ये'व कामनाया दर्शनेन आवश्यकत्वाल्लाघवादुपस्थितत्वात्स्रक्चन्दनादिकमेव यागादिसाध्यम्, स्वर्गपदबोध्यं सुखं स्वकारणात्स्रक्चन्दनादे:, इत्यापातेन यागस्वर्गयोः श्रुतः अपि साध्यसाधनभावः परित्यज्येत । 'कार्यान्विते व्युत्पत्तिबललब्धसिद्धान्वितव्युत्पत्तेः पश्चादुपस्थिताया अपि लाघवेन, गुरुभूतकार्यान्वित-व्युत्पत्तेरन्त्याग'वत्पश्चादुपस्थितापूर्वस्यापि लाघवबलेन यागादिफलत्वं कल्प्येतेत्याद्यनेकातिप्रसङ्गापातेन श्रुत-साध्यसाधनभावपरित्यागस्यानिष्टत्वात् । तदिदमुक्तम् **'कारीर्यादेरपि वृष्ट्यादिहेतुत्वाभावापत्तेरि'ति** ॥ यदि च 'कारीर्यादिर्वृष्ट्यादिकं प्रति साधनत्वस्य श्रुतिसिद्धत्वात्, श्रुतिसिद्धे च साध्यसाधनभावे न लाघवगौरवचिन्ता; श्रुत्या चावग्रहध्वंसविशिष्टवृष्टिं प्रति साधनत्वग्रहणैकपूर्ववृत्तित्वग्रहानन्तरमन्यपूर्ववृत्तित्वग्रहाभावान्नान्यथासिद्धिश्च; श्रुति-सिद्धत्वादेव च न 'अन्यत्र कृत्तपूर्ववर्तिन एवे'त्यादेरपि प्रसर इति कारीर्यादिर्वृष्ट्यादिहेतुत्वमुपपन्नमि'ति मन्यसे; तर्हि मङ्गलेऽप्येतत्सर्वं सममिति युक्तं मङ्गलस्यापि समाप्तिहेतुत्वमिति। तदेतदाह **'सममेतत्सकलं प्रकृतेऽपी'ति**।

ननु तथाऽपि मङ्गलाचरणाभावेऽपि, सूत्रकारस्य स्वत एव विघ्नाभावसिद्धेः, फलविघ्नाताभावात् तद्राहित्यं न व्याकर्तव्यत्वाभावे प्रयोजकमित्यप्रयोजकत्वं शङ्कते **न चेति** । भगवत्त्वान्निरन्तरायसमाप्तिरूपफलविघाता-भावेऽपि, मङ्गलाभावे प्रचयरूपफलविघातः **स्यादेवेत्याह शिष्येति । तदेवोपपादयति यत इति** ॥ ननु न प्रचयस्तस्य फलं, तथात्वे वा सूत्रकारस्य भगवत्त्वादेव **तदिच्छामात्रेण मङ्गलाभावे अपि प्रचयसिद्धिरित्यत आह अन्यथेति** ।

वा०र०— मङ्गलस्य समाप्तिफलकत्वे सामान्यसिद्धिपरिशेषकथनपरतया प्रतीयमानस्यापि न तावत् इत्यादिग्रन्थस्य श्रुतिसिद्धत्वादिति प्रतिज्ञोपपादकत्वात् तत्प्रतिज्ञावाक्ये विवक्षितं यदनुमानं तत्र प्राप्ताप्रयोजकता-शङ्कापरिहारपरत्वेन योजनोचिता इत्याश्रित्याह **ननु तर्हि मङ्गलमित्यादिना । विवक्षितानुमान इति** । अत्र श्रुतिबोधिताभीष्टोपायकताकत्वमेव साध्यम् । अविघ्नसमाप्त्यादि इत्येतत्तु पर्यवसानाभिप्रायेण । तथा च तत्साध्यकव्याप्तौ दर्शादिरेव दृष्टान्त इति न दोषः । श्रुतिबोधातिविघ्नपरिसमाप्त्याद्युपपादकत्वाभावः । किं अनिष्टापायत्वस्यैव भावः । तदुपायत्वेऽपि अविघ्नपरिसमाप्त्याद्युपायत्वस्याभावो वा तत्सद्भावेऽपि प्रमाणान्तर-बोधिततदुपायकत्वेऽपि तदुपायतायाः श्रुतिबोधितत्वाभावो वेति विकल्प्य प्रापकाणि मनसि निधाय विकल्पयति **मङ्गलस्य श्रुतिबोधितेत्यादिना । अविघ्नपरिसमाप्त्याद्युपायकत्वाभावे इति पक्षेऽपि फलान्तरानुसन्धानपूर्वकत्वेन** तदभाव इति अविघ्नपरिसमाप्त्याद्यनुसन्धानपूर्वकत्वेऽपि तदनुसन्धानस्य भ्रान्तितया वस्तुतः तदुपायत्वाभाव इति प्रापकद्वयानुसारेणाविघ्नपरिसमाप्त्याद्युपायत्वाभाव इति द्वितीयविकल्पेऽपि पक्षद्वयविकल्पप्रदर्शनं **फलान्तरेत्यादि** । **प्रमाणान्तरेति** । श्रुत्यतिरिक्तप्रत्यक्षानुमानपौरुषेयशब्दरूपेति योज्यम् । विशिष्टाचारविषयत्वरूपहेत्विति पाठः । स्थलद्वयेऽपि । विषयत्वेत्येतत्पाठो लेखकागतः । प्रेक्षावत एव शिष्टरूपतया तदाचारविषयत्वस्य विफलत्वा-ङ्गीकारेऽसंभवादिति भावः । **अविगीतेति** । **प्रेक्षावत्स्वपि** भ्रान्त्यङ्गीकारे केषाञ्चित् बाधावश्यंभावेन विगीता-चारविषयत्वापत्त्याऽविगीतशिष्टाचारविषयत्वहेतूच्छेदापत्तेरित्यर्थः । प्रमाणान्तरबोधितपक्षं प्रमाणविशेषाणां उपरचापनपूर्वकं निराकरोति **प्रत्यक्षस्येत्यादिना । साध्यसाधनेति** । अतीन्द्रियनियमघटितसाध्यसाधनभावस्य

केवलप्रत्यक्षगम्यत्वायोगात् इत्यर्थः । अस्तु तर्हि अन्वयव्यतिरेकसव्रीचीनप्रत्यक्षगम्योऽसाविति अत आह **अन्वयेति** । व्यभिचारेण तयोरभावात् । तत्सहकारानुपपत्तेरित्यर्थः । **तत एवेति** । उक्तव्यभिचारेणैव तदन्वयव्यतिरेकानुविधायित्वानुमानस्यापि मङ्गलसमाप्त्यादिसाध्यसाधनभावावगमकत्वानुपपत्तेरित्यर्थः । **अतिप्रसङ्गपराहतेश्चेति** । प्रतिपक्षस्यापि प्रसङ्गादित्यर्थः । उपाधिप्रतिरोधौ तु क नामातीव दुर्वचावित्युक्तेरित्यर्थः । लोकसिद्धार्थविरोधिनः प्रतिपक्षस्य बाधितार्थतया तत् पराहतिरित्यत उक्तम् **अस्यार्थस्येति** । तथा च लोकस्य उपजीव्यत्वप्रसङ्गात् तद्विरोधेनातिप्रसङ्गनिवारणानुपपत्तिः इत्याशयः । यद्वा प्रत्यक्षादिवत् लोकरूपसाधकान्तरमुक्तसाध्यसाधनभावेन निराक्रियते । तथा चात्रार्थे लोको न साधक इति भावः । **तहीति** । अविघ्नपरिसमाप्त्यादिहेतुत्वाङ्गीकारेत्यर्थः । विघ्नध्वंसविशिष्टसमाप्तेरेवोद्देश्यतया विघ्नध्वंसस्य तदभावेन तदर्थप्रवृत्तितया तन्निश्चयस्यावश्यकत्ववचनायोगः इत्यतो विघ्नध्वंसस्यापि उद्देश्यत्वसंभवोपपादनेन मूलोक्तप्रतिपक्षशङ्कोपपत्तिमाह **समाप्तिविशेषणतयेति** । मङ्गले या प्रवृत्तिरिति योज्यम् । तावता च विघ्ननाशार्थं प्रवृत्तिरिति सिद्धचतीति तन्मूलिका प्रतिपक्षशङ्का युक्तेति प्रतिपादितं भवति । विघ्ननिश्चयेत्यत्र नाश्येति पूरणीयम् । मङ्गले प्रवृत्तिकाले नाश्यनिश्चयरूपस्याधिकारस्याभावादित्यर्थः । **इत्युक्तेति** । इत्येवं रूपं उक्तानुमाने प्रतिपक्षमित्यर्थः । **न्यायेति** । पाक्षिकोऽर्पीति न्यायेत्यर्थः । न्यायप्राप्तं यच्छिष्टानुमानमिति संबन्धः । शिष्टा हि विघ्नसन्देहवन्तोऽपि पाक्षिक इति न्यायेन मङ्गलमनुतिष्ठन्ति । तदनुष्ठानबलेन संशयनिश्चयसाधारणविघ्नज्ञानवत एव मङ्गलेऽधिकारकल्पनात् अधिकारशून्यत्वात् इति हेतुरसिद्ध इत्यर्थः । प्रायश्चित्तादौ तु नाश्यनिश्चयवतामेव प्रायश्चित्ताद्यनुष्ठानदर्शनेन तद्बलात् नाश्यनिश्चयवतामेवाधिकार इति वैषम्यमिति भावः । एवं मङ्गलाचरणस्यापि अविघ्नपरिसमाप्त्यादिहेतुत्वस्यापि अविगीतशिष्टाचारानुमितश्रुतिसिद्धत्वात् इति प्रतिज्ञोपपादक 'न तावदि'त्यादि 'न्यायप्राप्तत्वात्' इत्यन्तं मूलं व्याख्याय प्रतिज्ञा मूलगताविघ्नपरिसमाप्त्यादिहेतुत्वमित्यनेनोक्तं विघ्नध्वंसविशिष्टसमाप्तेः मङ्गलफलत्वं तत्समर्थयितुं मङ्गलवादीयरुचिदत्ताद्युक्तरीत्या समाप्तिफलत्वमाक्षिपति **नन्वेवमपीत्यादिना** । एवमपि कार्यकारणभावस्य श्रुतिसिद्धतया तत्र व्यभिचारादिप्रसक्त्यभावे इत्यर्थसिद्धावपीत्यर्थः । **इत्ययुक्तम्** । इत्युक्तं विघ्नध्वंसविशिष्टसमाप्तिं प्रति यत् हेतुत्वं तदयुक्तमित्यर्थः । **तावतेति** । श्रुतिबोधितत्वेनेत्यर्थः । ननु श्रुतिबोधितत्वे विशेषाभावे न विघ्नध्वंसस्यैव समाप्तेरपि तत्फलत्वोपपत्तिः यथा च विघ्नध्वंसं प्रति अन्वयव्यतिरेकाभ्यां व्यभिचारोऽन्यथासिद्धः तथा समाप्तिं प्रत्यपि व्यभिचारोऽन्यथासिद्धः तत् किमिति समाप्तेः फलत्वाङ्गीकार इत्याशङ्क्ते **यद्यपीति** । **मङ्गीत्येति** । विघ्नध्वंसफलकं मङ्गलमिति वादिरीत्येत्यर्थः । विघ्नध्वंसे जातिभेदमनङ्गीकृत्य कारणानामनेकेषामपि एककार्यजननानुकूलशक्तिमत्त्वमित्यङ्गीकारेण विघ्नध्वंसफलत्वपक्षोपपादनवत् समाप्तिफलकत्वपक्षेऽपि तत्कारणानामनेकेषां समाप्तिरूप एककार्यजननानुकूलशक्तिमत्त्वकल्पनसंभवादिति भावः । **त्वद्वीत्येति** । समाप्तिफलकं मङ्गलमिति वादिरीत्येत्यर्थः । समाप्तिफलकत्ववादिना तृणारणिमणिन्यायेन तत्तन्मङ्गलविशेषजन्यं तत्तत्समाप्तिविशेषेषु भिन्नभिन्नसमाप्तित्वजातिस्याकारात् तृणाभावेऽपि अरणिजन्यवह्निसद्भावेऽपि तृणजन्यवह्नचभावेन व्यभिचाराभाववत् प्रकृतेऽपि तत्तत्समाप्तिविशेषं प्रत्येव तत्तन्मङ्गलस्य हेतुत्वात् व्यभिचाराभाव इत्यर्थः । समाप्तिफलकत्वे उक्तरीत्या व्यतिरेकव्यभिचारपरिहारानङ्गीकारे बाधकमाह **अन्यथेति** । अन्वयव्यतिरेकाभ्यां व्यभिचाराभावस्य पक्षद्वयेऽपि

अविशेषेऽपि विघ्नध्वंसपक्षेऽस्ति लाघवादिकम्। समाप्तिपक्षे तु नैवमिति परिहरति **तथापीति**। **आवश्यकत्वादिति**। विशेषणस्य फलत्वाभावे तद्विशिष्टसमाप्तेः फलत्वायोगः इति विशिष्टफलत्ववादिना विघ्नध्वंसस्यापि फलतायाः अवश्यमङ्गीकार्यत्वादिति भावः। **लाघवाच्चेति**। उभयोः फलत्वकल्पनापेक्षया एकस्यैव फलत्वकल्पने लाघवम्। नागृहीतविशेषणाबुद्धिः विशेष्ये चोपजायत इति लाघवमूलकन्यायादिति भावः। विघ्नध्वंसविशिष्टसमाप्तेः फलत्वेऽपि यदि लाघवात् विघ्नध्वंसमात्रफलकत्वसिद्धिः **तर्हि यागादेरपि अपूर्वमेव फलं स्यात् न स्वर्ग इत्यतः** प्रकृते तत्र चास्ति विशेष इत्याह **विघ्नसंशय इत्यादि**। तथा च विघ्नाभावस्य समाप्त्युद्देश्यकमङ्गलाचरणकाले उपस्थितत्वेन लाघवन्यायावतारेऽपि विघ्नो निवर्ततामिति कामनानुसारेण विघ्नध्वंसो वा पूर्वं भूयात् इति कामनाभावात् प्रत्युत स्वर्ग एव भूयादिति कामनासत्त्वात् अपूर्वस्य यागस्थले प्रथमतः उपस्थित्यभावेन लाघवावताराप्राप्तेः स्वर्गस्यैव फलत्वमित्याशयः। तर्हि समाप्यतामिति कामनायाः सत्त्वेन प्रथमतः समाप्तेरेवोपस्थित्या विघ्नध्वंसोऽपि प्रथमानुपस्थितः स्यात् इत्यत आह **समाप्यतामितीति**। अत एवोक्तं तत्रापि विघ्नध्वंसोऽपि हृदि चेष्टते इति। **विघ्नध्वंसस्य समाप्तीति**। किञ्च विघ्नध्वंसस्य समाप्तिपूर्ववृत्तित्वेऽपि रुचिदत्तानुसारेणेदम्। उक्तं च पक्षधरे। प्रतिबन्धकध्वंसस्य कार्यपूर्ववृत्तिताग्रहानन्तरं तज्जनककारीरिमङ्गल्योः पूर्ववृत्तित्वग्रहेण कुलालपितृवत् अन्यथासिद्धतया हेतुत्वाग्रहादिति। यत् कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते तत् कार्यं प्रति तत् रूपं अन्यथासिद्धमिति प्रथमा। यथा दण्डत्वं घटं प्रति। यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः। किन्तु कारणमादायान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धमिति द्वितीया। यथा दण्डरूपं घटं प्रति। अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत् कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तत् तत् कार्यं प्रति अन्यथासिद्धम्। यथाकाशं घटादिकं प्रति। यत् कार्यजनकं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत् कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तत्तत्कार्यं प्रति अन्यथासिद्धमिति चतुर्थी। यथा कुलालपिता घटं प्रति। अवश्यङ्कृतनियतपूर्ववर्तिन एव कार्यसंभवे तत्सहभूतमन्यथासिद्धमिति पञ्चमी। यथा रासभः घटं प्रति। इत्येवंरूपासु पञ्चविधासु अन्यथासिद्धिषु चतुर्थीयमन्यथासिद्धिरिति सूचयितुं कुलालपितृवदिति दृष्टान्तोपादानम्। **विघ्नसंसर्गाभाव इति**। स्वतःसिद्धविघ्नसंसर्गाभाव इत्यर्थः। तत्सहभूतमङ्गलस्येत्यनन्तरं रासभवदिति दृष्टान्तः स्पष्टत्वात् नोक्तः। **अन्यथासिद्धिरेवेति**। इयं चान्यथासिद्धिरुक्तपञ्चविधान्यथासिद्धिषु पञ्चमीति ज्ञेयम्। एवं पक्षधराद्युक्तं मङ्गलस्य समाप्तिफलकत्वे दोषमाशङ्क्य मूलोक्तकारीयदिरपि इत्यादिप्रतिबन्ध्युपादानेनैवैतदोषपरिहारोऽपि सूचितः इति व्यञ्जयन् तत्परिहारप्रकारं प्रतिबन्दीमुखेन वारयितुं कारीर्यादिस्थलेऽपि मङ्गले उक्तप्रकारमापादयति **तथा सतीति**। पूर्ववत् अन्यथासिद्धिद्वयप्रदर्शनपरेऽवग्रहध्वंसस्य वृष्टीत्यादिग्रन्थे पूर्ववदेवान्यथासिद्धिद्वयनिरूपणं ज्ञेयम्। उक्तप्रतिबन्दीं मोचयितुं पक्षधराद्युक्तामिष्टापत्तिं निरसितुमाशङ्क्ते **न च कारीर्यादीति**। कारीरीस्थलेऽपि अवग्रहध्वंसविशिष्टवृष्टेरफलत्वमिति नेष्टापत्तिः वक्तुं शक्येति वक्तुं फलत्वाभावे विशिष्टस्य तदनुपपत्त्या विशेषणस्यापि कारीर्यादिरूपमूलगतादिपदसङ्गृहीतयागस्वर्गस्थले तावत् परसंमतं यत् विशिष्टसाधनत्वं यागस्य तदनुपपत्तिं प्रतिपादयति **सुखं मेत्यादिना**। अविशेषेणेत्यस्य स्रक्चन्दनाद्यविशेषितस्य सुखमात्रस्य कामनाया अभावेनेत्यर्थः। न केवलमविशेषेण कामना नास्तीत्येवापि तु स्रक्चन्दनादिभिः विशेषितस्यैव सुखस्य कामना चास्तीत्याह **स्रक्चन्दनेति**। दर्शनेनेत्यनन्तरं चशब्दः स्वरसः। तदभावे वा

चशब्दार्थान्तर्भाविन व्याख्येयम् । **आवश्यकत्वादिति** । विशिष्टस्य कामनाविषयत्वेन फलत्वे प्राप्ते विशेषणस्यापि फलताया आवश्यकत्वात् नागृहीतविशेषणन्यायेन विशेषणस्यैव फलत्वे लाघवावतारात् कामनाविषयत्वेन प्रथमोपस्थितित्वेनापूर्ववैलक्षण्येन तत् प्रतिबन्ध्यनवकाशात् स्वर्गचन्दनादिकमेव यागादिसाध्यमित्यस्येत्यापातेनेति उत्तरेणान्वयः । एवं स्वर्गादिविशिष्टस्य सुखस्य फलत्वपुरस्कारेण यागस्वर्गयोः श्रुतसाध्यसाधनभावानुपपत्ति-प्रसङ्गपरत्वेनादिपदं योजयित्वा अपूर्वमादायापि श्रुतसाध्यसाधनभावायोगप्रसङ्गपरत्वेनापि आदिपदं योजयति **कार्येति** । **मङ्गलफलत्वेन विघ्नध्वंसविशिष्टसमाप्तेः प्राप्तावपि** । यदि विघ्नध्वंसस्यैव फलता तर्हि यागादीनामपि अपूर्वफलकत्वापत्त्या स्वर्गफलकतायाः श्रुतिप्राप्तायाः अपि त्यागप्रसङ्गः । न चापूर्वस्य कामनाकालेऽनुपस्थितत्वात् पश्चादेव चोपस्थितत्वात् न तत् फलतापत्तिरिति वाच्यम् । प्रथमतः कार्यान्वित एव घटेन जलमाहर इत्यादौ व्युत्पत्तिः तद्बलात् पश्चात् सिद्धेऽपूपान् नव भोजनाऽर्तीत्यादौ व्युत्पत्तिरिति व्युत्पत्तिद्वयाङ्गीकारे प्राप्ते सति गौरवात् व्युत्पत्तिद्वयस्यानङ्गीकार्यतया व्युत्पत्तिद्वयमध्ये पश्चादुपस्थितायाः अपि सिद्धे व्युत्पत्तेर्लघुत्वेन गुरुभूतकार्यान्वितं व्युत्पत्तेः त्यागवदित्यर्थः । **अनेकातिप्रसङ्गेति** । पित्रादीत्याद्युक्तानेकातिप्रसङ्गेत्यर्थः । प्रकृतकारीरियागसाधारण्येन यागादिस्थले श्रुतसाध्यसाधनभावयागस्यानिष्टत्वप्रसिद्धमित्याह **श्रुतसाध्येति** । ततश्च इष्टापत्तिरिति शङ्का न युक्तेति भावः । कृतस्य च सर्वस्योन्मूलत्वं नेत्याह **तदिदमिति** । कारीयदिग्न्यादावादिपदप्रयोगात् तेन च यागस्वर्गदिर्ग्रहणेन कारीरियागवृष्ट्योः श्रुतसाध्यसाधनभावत्यागे यागस्वर्गयोरपि श्रुतसाध्यसाधनभावत्यागः स्यात् न चासौ तत्रास्ति इति प्रमेयान्तरप्रतिपादनमुखेन कारीरिवृष्टचोरपि श्रुतसाध्यसाधनभावत्यागो न कार्यः इति प्रमेयस्य सूचनादिति भावः । एवं कारीयदिरपि वृष्ट्यादि इत्युक्तातिप्रसङ्गमुपपाद्य तत्र स्वीकार्यस्य परिहारस्य मङ्गलेऽपि कल्पनोपपत्तेः युक्तं समाप्तेः फलत्वमिति दर्शयितुं कारीयदिः वृष्ट्यादिफलत्वाङ्गीकारे प्रागुक्तलाघवादिबाधकपरिहारं परमुखेन वाचयति **यदि चेति** । कुलालपितृवत् कारीयदिर्वा अन्यथासिद्धिः प्रागुक्तनिरासप्रकारमाह **श्रुत्या चेति** । अन्यत्र कृतेत्याद्युक्तामन्यथासिद्धिं च विघटयति **श्रुतीति** । कारीरिवृष्ट्योः साध्यसाधनभावस्य श्रुतिसिद्धत्वं मूलीकृत्य बाधकपरिहारप्रकारं परमुखेनैव वाचयित्वा तत्परिहारस्य प्रकृतेऽतिदेशमाह **तर्हि मङ्गलेऽपीति** । एतत्सर्वं साध्यसाधनभावस्य श्रुतिसिद्धत्वमूलकं लाघवस्यान्यथासिद्धेश्च न प्रसर इत्येवं लाघवाभावादिकं कृतं च अन्यापि नोन्मूलत्वमित्याह **तदेतदिति** । समप्येतदित्येवातिदेशमकृत्वा सकलपदोपादानं यत् अधिकं कृतं तेन अनुपपत्त्यन्तरपरिहारोऽपि प्रतिबन्धैव कर्तव्य इति मूलकारेण सूचनादिति भावः । **तथापीति** । मङ्गलस्यापि विघ्नपरिसमाप्त्यर्थत्वोपपत्तावपीत्यर्थः । **फलविघातेति** । मङ्गलाभावे हि मीमांसाशास्त्रस्याविघ्नपरिसमाप्त्यभावेन लब्धस्वरूपत्वादिप्राप्त्या व्याकर्तव्यत्वायोगः इति खलु मङ्गलाभावस्य व्याकर्तव्यत्वं प्रति प्रयोजकता वाच्या । न चैवं संभवति सूत्रकारस्य निर्विघ्नपुरुषतया स्वत एव विघ्नाभावसिद्धेः मङ्गलाभावे समाप्तिरूपफलविघानाभावेन व्याकर्तव्यतासंभवात् मङ्गलाभावोऽव्याकर्तव्यत्वे न प्रयोजक इति अप्रयोजकत्वमित्यर्थः । **प्रचयेति** । समाप्यन्ते प्रचीयन्ते चेति पूर्वत्र तस्यापि फलतोक्तेऽप्रचयस्य फलत्वमिदानीं न प्रस्तुतमिति न मन्तव्यम् । **एतदेवेति** । शिष्यार्थत्वमेवेत्यर्थः । **तथात्वे वेति** । प्रचयस्य मङ्गलफलत्वेऽपीत्यर्थः । **अन्यथेति** । शिष्यार्थं कर्तव्यत्वा-भावेत्यर्थः । मूले भारतादौ इत्यादिपदेन भागवतादिपरिग्रहः । 'नारायणं नमस्कृत्ये'ति भारते । 'जन्माद्यस्य यतः'

इत्यादिरूपेण भागवतादौ चेत्यर्थः । **अत्रेति** । पूर्वपक्षेत्यर्थः । **असिद्धिरिति** । मङ्गलस्याकृतत्वस्यासिद्धिरित्यर्थः । कृतत्वाङ्गीकारे बाधकाभावादिति भावः । **अप्रयोजकतेति** । ग्रन्थो न व्याकर्तव्यः । मङ्गलस्यानिवेशितत्वात् कृतत्वात् इत्यत्रानिवेशितत्वेऽपि व्याकर्तव्यत्वमस्तु इत्यत्र बाधकाभावात् अप्रयोजकतेत्यर्थः । **तदुपपादकतयेति** । अत्रोपपादकत्वोक्तिः वस्तुतोऽनिवेशितत्वे तत एवाकृतत्वं सिद्धचति कृतस्य निवेशनियमात् इत्यभिप्रायेण न तु तस्य तदुपपादकत्वमात्रेणैवाशेषस्थापनम् । कृतत्वेऽपि निवेशाभावोऽस्तु इति वदन्तं प्रति करणवत् निवेशस्यापि शिष्टाचारप्राप्तत्वात् इति दूषणानुसारेणानिवेशितत्वस्य स्वातन्त्र्येणापि प्रचयाभावसाधकत्वेन दूषणत्वादिति ज्ञेयम् । **असिद्धिरिति** । अकृतत्वस्येति योज्यम् । इदं चोपपादकत्वपक्षानुसारेण । **अनिवेशस्येति** । यदि मङ्गलं कृतं स्यात् तर्हि कृतस्य निवेशननियमात् अत्रापि निवेशितं स्यात् न चात्र निवेशितम् । तस्मात् न तत् कृतमिति एवमनिवेशनस्याकृतत्वसाधकत्वादिति भावः ।

स०व्र०— मातुलदुहितृपरिणयनादेः शिष्टपरिगृहीतस्य व्यावृत्त्यर्थम् 'अविगीते'त्युक्तम् ॥ 'आचारश्चैव साधूनाम्' इति शिष्टाचाराणां धर्मस्मरणादप्रमाणभूतानां तदयोगात् पौरुषेयत्वेन स्वतःप्रामाण्यरहितत्वेन, प्रामाण्यार्थं वेदानुमापकत्वमिति भावः ।

अन्वयव्यतिरेकौ च कारीर्याद्यन्वयव्यतिरेकसमाविति साध्यसाधनभावं परिशेषादुपपादयति **न तावदित्यादिना** ॥ यद्वा 'मङ्गलाचाररूपप्रवृत्तिः, प्रारिप्सितपरिसमाप्त्यादिफलिका तदितराफलकत्वे सति सफलत्वादि'-त्यभिप्रेतानुमाने विशेष्यासिद्धिं तावत्परिहरति **न तावदिति** । **अभ्रान्तप्रवृत्तिर्नाभीष्टाफलिकेत्यर्थः** ॥ विशेषणासिद्धिं परिहरति **नाऽपीति** ॥ अत्र च तत्त्वसङ्ख्यानटीकोक्तो 'नियमेन ग्रन्थारम्भेऽनुष्ठानादि'ति हेतुरध्याहार्यः । तस्य च प्रारिप्सितपरिसमाप्त्यादिव्यतिरिक्तोद्देशेनाननुष्ठानादित्यर्थः । तेन यथाश्रुते 'आग्नावैष्णवमेकादशकपालं निर्वपेत् दर्शपूर्णमासौ आरिप्समान' इति श्रुतिबोधितायां दर्शारम्भे नियमेनानुष्ठीयमानायामारम्भणीयेष्टौ प्रारिप्सितसमाप्त्यादि-व्यतिरिक्तस्वर्गफलिकायां व्यभिचारः प्रारिप्सितसमाप्त्युद्देशेनानुष्ठानस्य विवक्षायां तत एव समाप्तिफलकत्वसिद्धेः परिशेषवैयर्थ्यमिति निरस्तम् । हेतोरप्रयोजकत्वपरिहाराय विपक्षे बाधकमाह **दृष्टपरित्यागेति** । अन्यथेति शेषः ॥

कुण्डल०— ननु मङ्गलस्याविगीतशिष्टाचारविषयत्वेऽपि नैष्फल्यान्मास्तु श्रुतिबोधितोऽप्यसिद्धिफलकत्वं साफल्येऽपि वा निरन्तरायपरिसमाप्तीतरफलकत्वमस्तु न तु प्रारिप्सितग्रन्थपरिसमाप्तिफलकत्वं साध्यसाधनप्रतीतिः भ्रान्तिर्वास्तु । तस्याः प्रमात्वेऽपि श्रुतिं विनापि प्रत्यक्षानुमाभ्यामेवास्तु । तथा विशिष्टसाध्ये हेतुप्रयोजक इत्यत आह **न तावदिति** । **न च प्रत्यक्षादेरिति** । साध्यसाधनभावस्यातीन्द्रियत्वात् । तत्र प्रत्यक्षस्यान्धपरम्पराशङ्कावरुद्धत्वादनुमानस्य च नावकाश इत्यर्थः । ननु नेदं शास्त्रं व्याकर्तव्यं मङ्गलाचरणरहितत्वादित्यत्र विघ्नाभाव-विशिष्टपरिसमाप्त्यादिफलकमङ्गलराहित्यं संभावितविघ्नवत्पुरुषप्रणीतग्रन्थस्यैवाव्याख्येयत्वे प्रयोजकं न तु निर्दोष-भगवद्बादरायणप्रणीतग्रन्थस्य तथाच ब्रह्मसूत्राणां मङ्गलाचरणराहित्येऽपि व्याख्येयता सेत्स्यतीत्याशङ्क्य निरस्यति **न चेति** । **शिष्यार्थमपीति** । तथा च अवश्यमाचरणीयस्य मङ्गलस्याननुष्ठानान्नेदं शास्त्रं व्याकर्तव्यमिति भावः ।

विद्व०— विपक्षे बाधक इत्यभिप्रेत्याह **न चेति । तथा हि ।** न तावत्प्रत्यक्षस्यावकाशः मङ्गलाचरणा-विघ्नपरिसमाप्त्योः साध्यसाधनभावस्यातीन्द्रियत्वात् । नाप्यनुमानस्य सर्वैरनुष्ठीयमानत्वहेतोरन्धपरम्पराशङ्कावरुद्ध-त्वात् प्रेक्षावद्भिः समाप्त्युद्देशेनानुष्ठीयमानत्वस्य विपक्षे बाधकाभावेनाप्रयोजकत्वात् अन्वयव्यतिरेकानुविधायित्व-स्योक्तरीत्या व्यभिचारित्वात् । नापि पौरुषेयस्यास्ति अवकाशः तस्य मूलान्तरसापेक्षत्वेनानवस्थाकलङ्कितत्वात् । न चाप्तोक्तत्वेनैव तस्य प्रामाण्यनिश्चय इति वाच्यम् आप्तिनिश्चायकाभावात् । अत एव श्रुतिरेव शिष्टाचारमूलं कल्प्यत इति भावः । तथापि मङ्गलं नानुष्ठेयं सन्दिग्धप्रयोजनत्वात् इति प्रतिपक्षग्रस्तमिदमनुमानम् । न च हेत्वसिद्धिः विघ्नहेतुसद्भावनिश्चयेन तद्विघातलक्षणप्रयोजनस्यापि सन्दिग्धत्वादित्याशङ्क्य परिहरति **न चेति** । पाक्षिकदोष-परिहारार्थं प्रयोजनसन्देहेऽपि अनुष्ठानस्य दृष्टत्वेन प्रतिपक्षानुमानं व्यभिचरितमिति भावः । अस्तु मङ्गलाचरणस्य परिसमाप्तिहेतुत्वं परन्तु संभावितविघ्नैरेव तद्विघातायानुष्ठेयं मङ्गलं न च भगवतो विघ्नसंभावनाऽप्यस्ति इत्याशङ्क्य परिहरति **न च भगवत इति । शिष्यार्थमपीति** । ग्रन्थे प्रवर्ततामायुरादिप्रतिबन्धकविघ्नविघातार्थमित्यर्थः । तदेवोपपादयति **यत इति** ।

काशी०— सा चोक्तमङ्गलाचारस्य सफलत्वे ज्ञानपूर्वकत्वाभावेन फलान्तरवत्त्वज्ञानपूर्वकत्वेन वा समाप्ति-साधनत्वभ्रान्तिमूलकत्वेन वा संभवतीत्याशयेनाद्यं निराचष्टे **न तावदिति । विफला** विफलत्वादेव सफलत्व-ज्ञानपूर्वकत्वरहिता । इष्टसाधनताज्ञानस्य प्रवृत्तिहेतुत्वादिति भावः । द्वितीयं निराह **नापीति । प्रयोजनान्तरार्था** प्रयोजनान्तरवत्त्वज्ञानपूर्विका । **दृष्टेति** । प्रमाणसिद्धसमाप्त्यादिज्ञानपरित्यागस्यासिद्धफलान्तरज्ञानकल्पनायाश्च प्रसङ्गादित्यर्थः । समाप्त्यादिज्ञानस्य सिद्धत्वमुपपादयति **कार्यमिति** । फलान्तरज्ञानस्यासिद्धत्वमाह **न चेति** । तृतीयं निराकरोति **न चैतेषामिति । इयं** समाप्तिमङ्गलविषया । **तथा सतीति** । भ्रान्तित्वस्य बाधकप्रमाणमात्रगम्यत्वादिति भावः । साध्यघटकप्रमितौ वेदेतरप्रमाणजन्यत्वासंभवमुपपादयति **न चेति** । अत्र समाप्तिमङ्गल्योः साध्यसाधन-भावेऽतीन्द्रियत्वेन प्रत्यक्षस्यानवकाशात् । अनुमानस्य निरस्तत्वात् । पौरुषेयागमस्य च मूलप्रमाणापेक्षत्वादिति भावः । वाक्यार्थचन्द्रिकायां तु मङ्गलं श्रुतिबोधितविघ्नपरिसमाप्त्यादिहेतुताकमविगीतशिष्टाचारविषयत्वादिति श्रुतिसाधकानुमाने विफलत्वेन फलान्तरवत्त्वेन वा समाप्त्यादिसाधनत्वस्य भ्रान्त्या वा प्रमाणान्तरसिद्धत्वेन वा हेतोरन्यथासिद्धिशङ्कानिरासकत्वेन न तावदित्यादिग्रन्थो व्याख्यातः । तत्र यद्यपि यथाश्रुतहेतोर्यागादौ व्यभिचारः । तथाऽप्यविघ्नपरिसमाप्त्याद्युद्देश्यकाचारस्य विवक्षितत्वान्न दोषः । न च दृष्टान्ताभावः । व्यतिरेकेण यागमात्रादे-र्दृष्टान्तस्य सुलभत्वात् । यादुपते तु यद्यदुद्देश्यकाविगीतशिष्टाचारविषयस्तत्तद्धेतुतया श्रुतिप्रमापितं यथा दर्शादीति सामान्यव्याप्तिर्दर्शिता । तत्र यद्यपि तृप्त्यादिफलोद्देश्यकाविगीतशिष्टाचारविषये भोजनादौ तद्धेतुतया श्रुति-बोधितत्वाभावाद्व्यभिचारः । न च वेदप्रामाण्योपगन्तृमात्राचारस्य शिष्टाचारपदेन विवक्षितत्वाद्भोजनाद्याचारस्य च तदनुपगन्तृसाधारणत्वान्न दोष इति वाच्यम् । तावता वेदप्रामाण्योपगन्तृकर्तृकभोजनादावितरसाधारण्याभावेन व्यभिचारस्य दुर्वारत्वात् । तथाऽपि वेदप्रामाण्याभ्युपगमप्रयोज्याचारस्य शिष्टाचारपदेन विवक्षितत्वान्न दोषः । वेदप्रामाण्यानुपगमासंभावितेत्यनेनाप्ययमेवार्थो विवक्षित इति ध्येयम् । परिमळे तु विमतो मङ्गलाचारः

समाप्त्यादिहेतुत्वप्रमापूर्वकस्तत्कामनया शिष्टैरविगानेनानुष्ठीयमानत्वात् । यो यत्कामनया शिष्टैरविगानेनानुष्ठीयते स तद्धेतुत्वप्रमापूर्वको यथा भोजनाद्याचार इत्यनुमानेन मङ्गलाचारस्य समाप्त्यादिहेतुत्वप्रमापूर्वकत्वे सिद्धे सा च प्रमा श्रौती प्रत्यक्षानुमानाद्यजन्यत्वे सति जन्यप्रमात्वात्स्वर्गसाधनत्वादिप्रमावदित्यनुमानेन तद्धेतुत्वसाधकश्रुतिसिद्धिरत्र विवक्षिता । तत्राद्यानुमाने कामनारूपविशेषणासिद्धिं निराह **न तावदिति** । **विफला** फलकामनारहिता । तत्कामनयेत्यस्यासिद्धिं निराह **नापीति** । हेतोरप्रयोजकत्वं निराह **न चैतेषामिति** । द्वितीयानुमाने सत्यन्तासिद्धिं परिहरति **न चेतीति** । व्याख्यातम् । अथ निर्विघ्नपरिसमाप्त्यादिफलोद्देश्यकाविगीतशिष्टाचारविषयत्वेन मङ्गलस्य निर्विघ्नपरिसमाप्त्यादिफलकत्वमेवानुमीयताम् । किं तत्साधकश्रुत्यनुमानेन । न च विप्रतिपन्नं प्रति श्रुतेरेव बलवत्त्वेन वक्तव्यत्वात्तदनुमानमिति वाच्यम् । अनुमितश्रुतेरानुपूर्वीविशेषानिश्चयेनास्मदादीन्प्रत्यबोधकत्वादिति चेन्न । समाप्त्यादिहेतुत्वस्य श्रुतिसिद्धत्वज्ञाने सति तदर्थिनः क्षिप्रप्रवृत्तिसंभवात् । एवं शिष्टप्रवृत्ताविष्टसाधनत्वप्रमितेस्तस्यां चेष्टसाधनत्वसविषयसत्तायाः प्रयोजकतया समाप्त्यादिरूपेष्टसाधनत्वाभावे तत्प्रमित्यनुपपत्त्या शिष्टप्रवृत्त्यनुपपत्तिरेव विपक्षबाधकतया वाच्या । तत्र तादृशप्रमितेर्वेदं विनाऽसिद्धेर्वेदानुमानमावश्यकमिति । ननु तथाऽपि निर्विघ्नं परिसमाप्यतामित्यादिकामनया मङ्गलाचरणाद्विघ्नध्वंसं जनयित्वैव मङ्गलं समाप्त्यादिकं जनयतीत्युपेयम् । एवं मङ्गलस्य समाप्त्यादिसामान्ये व्यभिचारेण विघ्नध्वंसविशिष्टसमाप्त्यादिकं प्रत्येव हेतुत्वं वाच्यम् । एवं च विघ्नसत्त्वानिश्चयेन तद्ध्वंसेच्छायास्तद्विशिष्टसमाप्त्यादीच्छायाश्चासंभवान्मङ्गलमकर्तव्यं स्यादित्याशङ्क्य निराचष्टे **न चेति** । अत्र विघ्नः कार्यानुत्पादस्तद्धेतोर्दुरितस्योक्तरीत्या फलस्य चानिश्चयादित्यर्थः । एतेन विघ्नानिश्चयेन तन्निवृत्तीच्छाया असंभवेऽपि प्रचयफलेच्छाया मङ्गलस्यानुष्ठेयत्वादननुष्ठेयत्वशङ्का न युक्तेति निरस्तम् । **पाक्षिक इति** । सन्दिग्ध इत्यर्थः । सन्दिग्धस्यापि दोषस्य परिहारोपायोऽनुष्ठेयः । **विघ्नोऽस्ति चेन्निवर्ततामिती**च्छासंभवादिति भावः । नन्वेवमसंभावितविघ्नस्य सूत्रकृतः पाक्षिकविघ्नशङ्कया अप्यसंभवेन तन्निवृत्तीच्छाविरहादेवोपपद्यमानं मङ्गलाकरणं न मङ्गलस्य समाप्त्याद्यसाधनत्वपक्षमाक्षिपतीति न तेन शास्त्रस्याव्याख्येयत्वसिद्धिरित्याशङ्क्याह **न च भगवत इति** । न सन्त्येवेति संबन्धः । शिष्याणामर्थः प्रयोजनं यस्मात्तच्छिष्यार्थमिति क्रियाविशेषणम् । तदेवोपपादयति **यत इति** । **वीर्यवन्ति** निर्विघ्नतया दृष्टादृष्टार्थसाधनसमर्थानि । अध्येतॄणामायुराद्यभिवृद्धिकारणानि चेत्यर्थः । अन्यथा शिष्यार्थत्वाभावे स्वप्रयोजनाभावादिति भावः ।

गूढ०— ननु श्रुत्युपदिष्टाभीष्टोपायताकत्वाभावेऽपि अस्तु तदाचारविषयत्वमित्यप्रयोजको हेतुरित्याशङ्क्य किं शिष्टानां मङ्गलानुष्ठानप्रवृत्तिः अफलैव वा प्रयोजनान्तरार्था वा तदीयसाध्यसाधनभावप्रतीतेर्भ्रमत्वात् भ्रान्त्या वा । नाद्य इत्याह **न तावदिति** । अन्यथा प्रेक्षावत्त्वमेव न स्यादिति भावः । द्वितीयं निराह **न चेति** । दृष्टपरित्यागाद्येव विशदयति **कार्यमिति** । उपस्थितानुपस्थितयोरुपस्थितस्यैव फलवत्त्वकल्पनस्य न्याय्यत्वादिति भावः । तृतीयं निराह **न चेति** । तथा सति सर्वेषामविरोधेन प्रवृत्तिर्न स्यादित्याह **तथा सतीति** । न हि सर्वे भ्रान्ता इति भावः । तथापि दण्डघटादाविव प्रत्यक्षादिनैव साध्यसाधनबोधसंभवात् । श्रुतेः शिष्टाचारमूलत्वकल्पनमयुक्तमित्यत आह **न चेति** । अत्र मङ्गलस्य समाप्तिहेतुत्वे । ननु नाशार्थिप्रवृत्तौ नाश्यनिश्चयस्य कारणत्वात् प्रकृते च नाश्यभूत-

विघ्ननिश्चयाभावात्कथं प्रवृत्तिरित्याशङ्क्य निषेधति **न चेति**। **तत्सन्देहेऽपीति**। तथाच नाश्यज्ञानमेव नाशार्थिप्रवृत्तौ हेतुरिति भावः। **मङ्गलाचरणस्य प्रयोजनान्तरमाह यत इति**। **अन्यथेति**। शिष्यार्थं कर्तव्यत्वाभाव इत्यर्थः।

प्रदीपः— कर्ममीमांसासूत्रापेक्षया ब्रह्मसूत्राणां अविशङ्कप्रवृत्तिलक्षणकार्यातिशयेन धर्माद्यपेक्षयातिशयितेन विषयेण ब्रह्मणा स्वर्गाद्यपेक्षयातिशयितेन फलेन मोक्षेण च कार्यार्थान्वयव्यतिरेकसमानाविति श्रुत्यैव साध्यसाधनभावं परिशेषादुपपादयति **न तावदित्यादिना**।

९२ सु०— एतेन 'सूत्रकृता कृतमेव मङ्गलम्। किं नाम ग्रन्थादौ न निवेशितम्' इत्यपि निरस्तम्। ग्रन्थे निवेशनस्यापि शिष्टाचारप्राप्तत्वात्, शिष्यार्थत्वाच्च॥ अत एव 'अन्यत्किमपि विघ्नविघाताद्यर्थमनुष्ठितं सूत्रकारेण' इति निरस्तम्।

परि०— एतेनेति। शिष्यार्थमपि ग्रन्थे निवेशनस्य कर्तव्यत्वकथनेनेत्यर्थः। **अत एवेति**। आवश्यकस्य ग्रन्थे निवेशनस्याभावादेवेत्यर्थः॥ **अन्यदिति**। ध्यानादिकमित्यर्थः।

यादु०— शिष्यार्थत्वाच्चेति। शिष्यशिक्षार्थत्वाच्चेत्यर्थः। **अत एवेति**। ग्रन्थादौ निवेशनस्यावश्यकत्वादेवेत्यर्थः॥ **अन्यत्किमपि इति**। गङ्गास्नानादिकमित्यर्थः।

आनन्दः— एतेनेत्यतिदेशार्थमाह **ग्रन्थ इति**। **अत एवेति**। शिष्यार्थत्वेन ग्रन्थनिवेशनस्यावश्यकत्वादेवेत्यर्थः।

श्रीनिधि०— अन्यत् किमपीति। दधि दूर्वादर्शनादिकमित्यर्थः। तस्य ग्रन्थे निवेशनानुपपत्तेरिति भावः। पुरा पूर्वं कण्ठं भित्त्वा विनिर्यातौ इति यत् तस्मादित्यर्थः। **मङ्गलस्यैव पूर्वं कर्तव्यत्वादिति भावः**।

वा०चं०— अत्र 'मङ्गलाचरणरहितत्वादि'ति मङ्गलाचरणस्याकृतत्वं हेतुतयाऽभिप्रेतमनिवेशितत्वं वा। आद्येऽसिद्धिः, द्वितीये त्वप्रयोजकता; इत्याशङ्क्यामकृतत्वं तदुपपादकतयाऽनिवेशितत्वं चाभिप्रेतम्। न चासिद्धिः, अनिवेशनस्य तत्साधकत्वात्। न चाप्रयोजकता। **पूर्वन्यायेन** तत्परिहारादित्याशयेनाह **एतेनेति**। प्रकारान्तरेण अप्रयोजकताशङ्कामतिदेशेन दूषयति **अत एवेति**।

वा०र०— न चेति। अनिवेशितत्वेनैव मङ्गलाचरणरहितत्वमिति द्वितीयाङ्गीकारे प्रागुक्तरीत्या अप्रयोजकतेत्यर्थः। **पूर्वन्यायेनेति**। मङ्गलाचरणपुरःसराणि इति पूर्वमूले शिष्टाचारपरिपालनहीनत्वेन अनाप्तप्रणीतत्वापत्त्या इत्युपलक्षितार्थानुसारेण निवेशनाभावे शिष्टाचारपरिपालनहीनत्वाद्यापत्तिरिति न्यायेनेत्यर्थः। एतेनेत्यतिदिष्टं दर्शयति **ग्रन्थ इति मूलम्**। **प्रकारान्तरेणेति**। अनिवेशितत्वेऽपि मङ्गलस्य न तेन अव्या-

कर्तव्यता । निवेशनयोग्यमङ्गलस्यैव प्रणामादिरूपस्य निवेशाभावो दोषाय । कायिकादि दधिदर्शनादि च मङ्गलं तु निवेशायोग्यम् । अतः कायिकादिरूपान्यमङ्गलनिवेशस्य शिष्टाचाराप्राप्तत्वाभावेन तदभावे शिष्टाचारपरिपालन-हीनत्वाद्यप्राप्त्या अप्रयोजकत्वं दुर्वारमिति प्रकारान्तरेणेत्यर्थः । उपलक्षणं चेदम् । अनिवेशनेऽपि कायिकादेः अनुष्ठानोपपत्त्या तेनाकृतत्वोपपादनमिति प्रागुक्तं चासदिति शङ्क्त्यपि ज्ञेयम् । **अत एवेतीति** । वाचनिक-प्रणामादिरूपमङ्गलाचरणतन्निवेशनयोरपि शिष्टाचाराप्राप्तत्वेन तदननुष्ठाने तन्निवेशाभावे वा शिष्टाचारपरिपालन-हीनत्वाद्यापत्तेरेवेत्यर्थः।

स०ब्र०— एवं ब्रह्मसूत्राणामप्रामाण्याद्वचाख्येयत्वमाक्षिप्य, श्रुत्यादिसंवादेन च प्रामाण्यसाधनात्, साधितम् । इदानीं ग्रन्थे निवेशनमेव मङ्गलानुष्ठानमिति मन्वानः प्रकारान्तरेणाक्षिपति **सूत्रकृतेति** । विघ्नाद्यसंभवेऽपि शिष्टाचारस्य पालनार्थं शिष्यशिक्षार्थं च मङ्गलाचारः कर्तव्यः । अन्यथा मोक्षफले महाशास्त्रे शिष्टाचारमुल्लङ्घ्य भगवान् सूत्रकारः प्रवृत्त इत्यन्येऽप्येवमेव प्रवर्तेरन् । ततश्च विघ्नादिमत्त्वं प्रसज्येतेति भावः ।

वि॰— शिष्यार्थत्वाच्च शिष्यशिक्षार्थत्वाच्च शिष्यप्रयोजनार्थत्वादित्यप्याहुः । निवेशनस्यावश्यक-त्वादेव । **अन्यत्किमपि** कायिकं मानसिकं वा ।

काशी०— एतेनेत्युक्तं विवृणोति **ग्रन्थ इति** । **अत एव** शिष्टाचारशिष्यप्रयोजनयोर्विरोधादेव । **अन्यदिति** । गङ्गास्नानादिकमित्यर्थः । न च ग्रन्थादौ मङ्गलाचरणस्यैव शिष्टाचाराप्राप्तत्वे गङ्गास्नानादेर्विघ्नविघातादि-हेतुत्वे मानाभाव इति वाच्यम् । यथोक्तगङ्गास्नानादेः सकलपापनिवर्तकत्वसर्वेष्टसाधकत्वयोरागमसिद्धत्वात् । एवं मङ्गले निर्विघ्नपरिसमाप्त्यादिहेतुत्वस्यागमादिसिद्धत्वात्सिद्धे च तस्मिन्नन्यथासिद्धिशङ्कानुदयाद्वचभिचारस्यान्यथा-सिद्धत्वात् कारणस्य कार्यतावच्छेदकत्वोपपत्तेश्च मङ्गलोत्तरसमाप्त्यादिकारणस्य मङ्गलस्याकरणादिना सूत्रकृतः प्रामाणिकपरित्यागादिसिद्धेः शिष्यप्रयोजनासिद्धेः शिष्टाचारविरुद्धत्वाच्चानाश्वासादेतच्छास्त्रमव्याख्येयमिति प्राप्ते समाधत्ते ।

गूढ०— एतेनेत्यतिदेशार्थमाह **ग्रन्थ इति** । **अत एवेति** । शिष्यार्थत्वेन ग्रन्थनिवेशनस्यावश्यकत्वा-देवेत्यर्थः ।

९३ सु०— अत्रोच्यते । कर्तव्यमेव कार्यारम्भे मङ्गलाचरणम् । कृतं च भगवता सूत्र-कारेण । निवेशितं च ग्रन्थादौ । यदयमोङ्काराथशब्दावादितः कृतवान् । तयोर्माङ्गलिकत्वात् । यथोक्तम् "ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्ग-लिकावुभौ" इति ।

परि०— माङ्गलिकत्वात् मङ्गलप्रयोजनकत्वात् ॥ 'तत्प्रयोजने ठगि'ति ठक्प्रत्ययः ।

वादु०— माङ्गलिकत्वादिति। 'मङ्गलं प्रयोजनमनयोरि'त्यर्थे ठक्प्रत्ययः। तथा च श्रुत्या मङ्गलप्रयोजनकत्वादित्यर्थः।

आनन्दः— ननु निवेशनप्रत्यायकपदाभावात् कथं निवेशनं कृतमित्यत आह यदयमिति। माङ्गलिकत्वादिति। मङ्गलफलकत्वादित्यर्थः। अत्र प्रमाणमाह यथोक्तमिति। श्रुतितो माङ्गलिकत्वादिति। नन्वोङ्कारार्थशब्दयोः माङ्गलिकत्वमिति कोऽर्थः। न च मङ्गलं प्रयोजनमनयोस्तौ माङ्गलिकौ प्रयोजनमिति ठक्। तथाच मङ्गलप्रयोजनकत्वमर्थ इति वाच्यम्। एवं हि किंरूपं मङ्गलं ओङ्कारप्रयोजनमिति पृष्टो व्याचष्टे। न च श्रुतित इत्युक्तत्वाच्छ्रवणरूपमेव तत्प्रयोजनमिति वाच्यम्। तथा सति सूत्रकृतो मङ्गलानुष्ठानाभावप्रसङ्गात्। कण्ठं भित्त्वा विनिर्यातावित्युक्तत्वेन तदुच्चारणस्यैव मङ्गलत्वोक्तेश्च। अस्तु वा श्रवणस्य मङ्गलत्वं तथापि तस्य प्रत्यक्षज्ञानमिति वाच्यम्। तथा सति सूत्रकृतो मङ्गलानुष्ठानाभावप्रसङ्गत्वेन सिद्धान्ते च प्रत्यक्षज्ञानस्य विषयजन्यत्वानङ्गीकारेण ओङ्कार-जन्यत्वरूपतत्फलत्वस्यासंभवात्। सूत्रकर्तुर्नारायणावतारस्य नित्यसर्वज्ञत्वेन ओङ्कारजन्यश्रवणस्य सर्वथा असंभवाच्चेति चेदत्र वक्तव्यम्। ओङ्कारोच्चारणं मङ्गलमिति। न च श्रुतित इति मूलविरोधः। श्रुतिपदस्योपलक्षणत्वेनोच्चारणस्यापि विवक्षितत्वात्। एवं च न सूत्रकृतो मङ्गलानुष्ठानाभावः तस्याप्योङ्कारोच्चारणसंभवात्। न च ज्ञानं नित्यं क्रिया नित्येति श्रुतेः सूत्रकृदनुष्ठितस्योच्चारणस्यापि क्रियारूपस्य नित्यत्वेन ओङ्कारप्रयोजनत्वमयुक्तमिति वाच्यम्। सूत्रकृदनुष्ठितोच्चारणसजातीयास्मदुच्चारणस्य ओङ्कारजन्यत्वेन तस्यापि तत्फलत्वोपचारात्। एवं च कण्ठं भित्त्वेति स्मृतिरप्यनुकूलिता भवति। अन्येषां तच्छ्रवणमपि मङ्गलम्। न च स्वमते श्रवणस्य विषयाजन्यत्वात्कथं तस्योङ्कारकार्यत्वमिति वाच्यम्। श्रवणविशिष्टस्य ओङ्कारस्य मङ्गलत्वाभ्युपगमेन विशिष्टस्य च विशेषणविशेष्यकार्यत्वाभ्युपगमेन ओङ्कारजन्यत्वरूपतत्फलत्वस्य विशिष्टे संभवेन दोषाभावादित्याशयः। ननु ओङ्कारार्थशब्दयोरोङ्कारश्चार्थशब्दश्चेति स्मृतौ माङ्गलिकाविति माङ्गलिकत्वमुक्तं तत्र माङ्गलिकाविति कोऽर्थः। न च मङ्गलं फलं कार्यं यस्येति व्युत्पत्त्या मङ्गलफलकावित्यर्थ इति वाच्यम्। तथा च सति ओङ्कारस्य मङ्गलकारणत्वमुक्तं स्यात्। किञ्च तदोङ्कारजनितं मङ्गलरूपमिति वक्तव्यम्। न च श्रुतितो माङ्गलिकत्वादित्युक्तत्वादोङ्कारश्रुतेरेव मङ्गलत्वमिति वाच्यम्। सिद्धान्ते प्रत्यक्षज्ञानस्य विषयजन्यत्वादोङ्कारश्रुतेर्मङ्गलार्थत्वमिति वाच्यानङ्गीकारात्। किञ्च ओङ्कारश्रवणस्य मङ्गलत्वे सूत्रकारस्य नारायणावतारत्वेन नित्यज्ञानत्वाद्विषयजन्योङ्कारश्रवणासंभवेन सूत्रकृतो मङ्गलानुष्ठानासंभवप्रसङ्गात्। तथाच सूत्रकृता मङ्गलं कृतमित्यनुपपन्नम्। तस्मादयुक्तमेतदिति मैवम्। ओङ्कारस्वरूपेणापि मङ्गलं श्रुतितोऽपि मङ्गलं तथाच मङ्गलरूपावेव माङ्गलिकौ मङ्गलफलकौ माङ्गलिकावित्यर्थ इदं विवक्षितम्। तथाच सूत्रकारेण ओङ्कारस्योच्चारितत्वादुपनिबद्धत्वादनुष्ठितमेव मङ्गलम्। अन्येषां तु तच्छ्रवणमेव मङ्गलम्। न च स्वमते श्रवणस्याविषयजन्यत्वात्कथं तस्योङ्कारकार्यत्वमिति वाच्यम्। श्रुतिविशिष्टस्य ओङ्कारस्य मङ्गलत्वेन विशिष्टस्य च विशेषणविशेष्यकार्यत्वाभ्युपगमेन मङ्गलकार्यत्वसंभवात्। तस्मान्माङ्गलिकाविति युक्तमिति न कश्चिद्दोष इति।

वा०चं०— पूर्ववाद्युक्तं मङ्गलाचरणतन्निवेशयोः कर्तव्यतोपपादनप्रकारं सर्वमङ्गीकृत्य अकृतत्वा-निवेशितत्वरूपपरमभिप्रेतहेतोरसिद्धिमाह **कर्तव्यमेवेत्यादिना ॥ माङ्गलिकत्वादिति । मङ्गलं प्रयोजनमनयोरिति** प्रयोजनमिति ठक्। (प्रयोजनम्। तदस्येत्येव। इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकम्। प्रयोजनं फलं कारणं च।)

वा०र०— एतावता ग्रन्थकलापेन मङ्गलाचरणतन्निवेशनकर्तव्यत्वमुपपाद्य तदकरणात् न्यूनत्वमिति पूर्वपक्षिणा शङ्किते सिद्धान्तो मङ्गलस्यैवाकर्तव्यत्वात् तदकरणं न दोषायेत्येवंरूपेणापि भविष्यतीति भ्रान्तिनिरा-करणायात्र पूर्वपक्ष्युक्तमङ्गलकर्तव्यत्वादेरुपपादनं सर्वमङ्गीकृत्य मङ्गलाद्यकरणप्रयुक्तन्यूनत्वमात्रमेव सिद्धान्ते निराक्रियत इति सिद्धान्तप्रकारं शिष्यसमाधानाय विशदयन् उत्तरमूलमवतारयति **पूर्ववादीति । हेतोरिति ।** हेत्वोरित्यर्थः । अनेन कर्तव्यमेवेत्यनेन परोक्तङ्गीकारः कृतं चेत्यनेनाकृतत्वासिद्धिः निवेशितं चेत्यनेनानि-वेशितत्वस्यासिद्धिः उक्तेति विवेकः सूचितः। **प्रयोजनमितीति** । अत्र सूत्रे तदस्येति वर्तते । तदस्य प्रयोजन-मित्यर्थे प्रयोजनमिति सूत्रेण ठगित्यर्थः। मङ्गलप्रयोजनत्वादित्यर्थोऽनेनोक्तो भवति । अत एव वृद्धिसूत्रीयमाङ्गलिक आचार्य इत्येतत् भाष्यैकदेशे एवमेव ठगुपपादित इति ज्ञेयम्।

स०व्र०— व्याख्येयत्वसिद्ध्यर्थं मङ्गलाचरणभावोपपादनार्थं प्रतिजानीते **अत्रोच्यत इत्यादिना ॥ माङ्गलिकत्वादिति** । माङ्गलिकत्वादिति 'मङ्गलं प्रयोजनमनयोरि'त्यर्थे ठक् । तयोर्भावस्तत्त्वं तस्मादित्यर्थः ।

कुण्डल०— **माङ्गलिकत्वादिति**। मङ्गलप्रयोजनकत्वादित्यर्थः।

चषकः— समाधत्ते **अत्रोच्यत इति ॥ माङ्गलिकत्वात् श्रुत्या मङ्गलफलकत्वात्**।

काशी०— **अत्रोच्यत इति** । कर्तव्यमित्युक्तार्थस्य प्रमितत्वमुक्त्वा कृतमित्यनेन तत्परित्यागशङ्का निवेशितमित्यनेन शिष्टाचारविरोधशङ्का चापास्ता । **यत्** यस्मात् । ओङ्काराद्युच्चारणं मङ्गलकरणनिवेशनयो-र्ज्ञापकमित्यर्थः । तदुपपादयति **तयोरिति । माङ्गलिकत्वात् श्रुत्या** मङ्गलप्रयोजनकत्वादिति । यादुपते अथोङ्कारादिश्रवणस्य देवतास्मृतिरूपत्वाभावात्कथं मङ्गलत्वम् । तथात्वे वा तस्य शिष्यकर्तृकत्वाभावात्कथं सूत्रकारकृतत्वम् । न चोङ्काराद्युच्चारणस्यापि मङ्गलत्वात् तस्य सूत्रकारकृतत्वान्न दोष इति वाच्यम् । तथा सति तयोर्मङ्गलत्वादित्येव वक्तुमुचितत्वात् । न च माङ्गलिकत्वादित्यस्य मङ्गलरूपत्वादित्येवार्थः । अत एव तयोर्विघ्नविघातादिहेतुत्वोक्तिरिति वाच्यम् । अस्माभिरपीत्यादिग्रन्थविरोधात् । अथशब्दो मङ्गलार्थ इति भाष्य-विरोधाच्चेति चेन्न । मङ्गलस्य ज्ञानरूपत्वेऽप्योङ्काराथशब्दश्रवणेन तद्वाच्यदेवतास्मृत्या तयोर्मङ्गलप्रयोजनकत्वोप-पत्तेः । तयोः प्रथमोत्पन्नत्वेन देवतासान्निध्यातिशयात्तच्छ्रवणस्यापि प्रतीक्ष्यानादेरिव देवताविषयकत्वोप-पत्तेश्च । सूत्रकृतोऽप्युच्चार्यमाणवर्णवाच्यदेवतास्मृत्यवश्यंभावेन मङ्गलस्य तत्कृतत्वोपपत्तेश्च । न च शब्दप्रयोग-स्यार्थज्ञानपूर्वकत्वात्कथं तत्प्रयोजनकत्वं श्रोतृणामर्थज्ञानस्य तत्प्रयोजनत्वेऽपि मङ्गलस्य सूत्रकारकृतत्वे तदनुपयोगादिति वाच्यम् । वाक्यार्थज्ञानस्य वाक्यप्रयोगपूर्वत्वेऽपि वाक्यार्थघटकतत्तद्वर्णवाच्यतदधिष्ठानमूर्ति-

विशेषस्मृतेरेकसंबन्धिज्ञानमपरसंबन्धिस्मारकमिति न्यायेन ततद्वर्णोपस्थित्युत्तरमेव संभवात् । श्रुत्येत्येतस्य ज्ञानोपलक्षणत्वात् । एतच्च लोकानुसारेणोक्तम् । भगवतः सर्वदैव सर्वज्ञत्वात् । यत्तु मङ्गलाचरणस्यैव विघ्नविघातादिहेतुत्वं सूत्रकारकृतत्वं चोच्यते न तु मङ्गलस्य । तथा चोङ्कारार्थशब्दयोरेव श्रवणादिरूपमङ्गलहेतुव्यापारत्वेन मङ्गलाचरणत्वात्सूत्रकारकृतत्वाद्विघ्नविघातादिहेतुत्वाच्च न विरोध इति । तच्च । आवश्यकमङ्गलस्यैव विघ्नविघातादौ हेतुत्वेनोपपत्तौ घटादौ कुलालस्थितेत्यादिनेव मङ्गलहेतुव्यापारत्वेन हेतुत्वानुपपत्तेः । मङ्गलस्यैवान्यत्र विघ्नविघातादिहेतुत्वोक्तेश्च । अत्रापि नारायणप्रणामस्यैवादौ तदुक्तेश्च । तस्मादुक्त एवार्थः । यद्यपि कायवाक्चित्तनिमित्तभेदेन मङ्गलत्रैविध्यस्यान्यत्रोक्तत्वादोङ्कारार्थशब्दयोर्मङ्गलत्वमप्यस्ति । तथाऽपि देवताज्ञानस्यैव तन्मुख्यम् । क्रियाशब्दयोस्तु तत्पूर्वकत्वेनैव तद्व्यवहारादमुख्यं मङ्गलत्वमित्यभिप्रेत्य माङ्गलिकत्वादित्युक्तम् । तथाऽपि मङ्गलप्रतिपादकशब्दाभावान्मङ्गलस्य ग्रन्थे निवेशितत्वं कथमिति चेत् । मङ्गलप्रयोजनकशब्दोच्चारणस्यापि तन्निवेशत्वादित्यवधेयम् । पुरा शब्दान्तरनिःसरणात्पूर्वं कण्ठं भित्त्वेति कण्ठदेशस्थं शब्दोच्चारणविघ्नभूतबातविशेषम् । निर्विद निःसृती । सा च शक्तिर्वर्णमात्रस्यानुपपद्यमाना । तत्स्मारिततदधिष्ठातृदेवताया एवेति तत्प्रसादद्वारा विघ्ननिवर्तकतत्स्मृतिरूपमङ्गलप्रयोजनकावित्यर्थः ।

गूढ०— ननु निवेशनप्रत्यायकपदाभावात्कथं निवेशनं कृतमित्युच्यत इत्यत आह यदयमिति । माङ्गलिकत्वादिति । मङ्गलफलकत्वादित्यर्थः । अत्र प्रमाणमाह यथोक्तमिति । श्रुतितो माङ्गलिकत्वादिति । नन्वत्र ओङ्कारार्थशब्दयोर्माङ्गलिकत्वमिति कोऽर्थः । न च मङ्गलप्रयोजनवचनयोस्तौ माङ्गलिकौ । प्रयोजनमिति ठक् । तथाच मङ्गलप्रयोजनकत्वमर्थ इति वाच्यम् । एवं हि किंरूपं मङ्गलमोङ्कारप्रयोजनमिति पृष्टो व्याचष्टे । न च श्रुतित इत्युक्तत्वात् श्रवणरूपमेव तत्प्रयोजनमिति वाच्यम् । तथा सति सूत्रकृतो मङ्गलानुष्ठानाभावप्रसङ्गात् । कण्ठं भित्त्वा विनिर्यातामित्युक्तत्वेन तदुच्चारणस्यैव मङ्गलत्वोक्तेश्च । अस्तु वा श्रवणस्य मङ्गलत्वं तथापि तस्य प्रत्यक्षज्ञानमिति वाच्यम् । तथा सति सूत्रकृतो मङ्गलानुष्ठानाभावप्रसङ्गत्वेन सिद्धान्ते च प्रत्यक्षज्ञानस्य विषयजन्यत्वानङ्गीकारेण ओङ्कारजन्यत्वरूपतत्फलत्वस्यासंभवात् । सूत्रकर्तुर्नारायणावतारस्य नित्यसर्वज्ञत्वेन ओङ्कारजन्यश्रवणस्य सर्वथाऽसंभवादिति चेदत्र वक्तव्यम् । ओङ्कारोच्चारणं मङ्गलमिति । न च श्रुतित इति मूलविरोधः । श्रुतिपदस्योपलक्षणत्वेनोच्चारणस्यापि विवक्षितत्वात् । एवं च न सूत्रकृतो मङ्गलानुष्ठानाभावः । तस्याप्योङ्कारोच्चारणसंभवात् । न च 'ज्ञानं नित्यं क्रिया नित्ये'ति श्रुतेः सूत्रकृत्पुरुषितस्योच्चारणस्यापि क्रियारूपस्य नित्यत्वेन ओङ्कारप्रयोजनत्वमयुक्तमिति वाच्यम् । सूत्रकृत्पुरुषितोच्चारणसजातीयस्यास्मदुच्चारणस्य ओङ्कारजन्यत्वेन तस्यापि तत्फलत्वोपपत्तेः । एवं च कण्ठं भित्त्वेति स्मृतिरप्यनुकूलिता भवति । अन्येषां तच्छ्रवणमपि मङ्गलम् । न च स्वमते श्रवणस्य विषयजन्यत्वात्कथं तस्य ओङ्कारकार्यत्वमिति वाच्यम् । श्रवणविशिष्टस्योङ्कारस्य मङ्गलत्वाभ्युपगमेन विशिष्टस्य च विशेषणविशेष्यकार्यत्वाभ्युपगमेन ओङ्कारजन्यत्वरूपतत्फलत्वस्य विशिष्टे संभवेन दोषाभावादित्याशयः ।

प्रदीप:— अथोच्चत इत्यादि व्याख्येयत्वसिद्ध्यर्थं मङ्गलाचारभावोपपादनार्थं माङ्गलिकत्वादिति । मङ्गलप्रयोजनयोरिति प्रयोजनमिति किमुत तयोर्भवस्तात्त्वं तस्मादित्यर्थः ॥